PRMARTHSUDHA

G.K.V.

परमार्थसुधा

त्रैमासिक-संस्कृत-पत्रिका

परमार्थसुधा

(त्रैमासिक-संस्कृत-पत्रिका)

वर्षो द्वितीयः * अङ्कस्तृतीयः

चैत्र–वैशाख–ज्येष्ठमासाः

संवत्सरः —२०३५

सम्पादकः — श्रीसत्यनारायणशर्मा

सहसम्पादकः — श्रीवासुदेवद्विवेदी शास्त्री

प्रकाशकः
श्रीसोहनलालः
मन्त्री, परमार्थन्यासः
मुड्हू, राँची (विहार)

★

प्राप्तिस्थानं, पत्र-लेख-मूल्यादि-प्रेषणसङ्केतश्च—
व्यवस्थापकः—श्रीविद्याधरद्विवेदी
सार्वभौम-संस्कृत-प्रचार-कार्यालयः
डी० ३८।११०, हौजकटोरा, वाराणसी
(उत्तर-प्रदेशः), दूरभाषः – ६६०२१

★

वार्षिकं मूल्यम्– अष्टौ रूप्यकाणि
अस्याङ्कस्य मूल्यम्– रूप्यकद्वयम्

★

मुद्रकः
बैजनाथ प्रसाद
कल्पना प्रेस
रामकटोरा रोड, वाराणसी ।



विषया लेखकाश्च

परमार्थसूक्तयः

निर्भयतायै प्रार्थना

यथा द्यौश्च पृथिवी च न बिभीतो न रिष्यतः ।
एवा मे प्राण मा बिभेः ॥ १ ॥

यथाहश्च रात्री च न बिभीतो न रिष्यतः ।
एवा मे प्राण मा बिभेः ॥ २ ॥

यथा सूर्यश्च चन्द्रश्च न बिभीतो न रिष्यतः ।
एवा मे प्राण मा बिभेः ॥ ३ ॥

यथा ब्रह्म च क्षत्रं च बिभीतो न रिष्यतः ।
एवा मे प्राण मा बिभेः ॥ ४ ॥

यथा सत्यं चानृतं च न बिभीतो न रिष्यतः ।
एवा मे प्राण मा बिभेः ॥ ५ ॥

यथा भूतं च भव्यं च न बिभीतो न रिष्यतः ।
एवा मे प्राण मा बिभेः ॥ ६ ॥

—अथर्ववेदः २।३।१५

मुनित्रयस्य कालव्यवधानविषयकं प्रतीचीनविमर्शनम्

श्रीसत्यनारायणशर्मा

(१)

पुण्यश्लोकस्य पाणिनेः कालं विनिश्चेतुं बहुभिरैतिह्यानुषङ्गिभिः साभिनिवेशमयत्यत, साधारण्येन प्रतीच्ये जगति। ऊहमानानामेतेषां खलु निष्पत्तिवैभिन्न्यं सत्यानुसन्धित्सूनां चेतांसि विस्मापयति। एतावतो महतो व्याकरणस्य निर्म्मितिः कदाऽभूदितिप्रश्नमुत्तरितुं प्राक्तनभारतीयविपश्चितस्तु तूष्णीम्भावावलम्बनमेव श्रेयस्करं मेनिरे। परं मानवसंस्कृतेर्गतिं विज्ञातुकामानभियुक्तान् विघ्नैः पौनःपुन्येन प्रतिहन्यमानानपि चिकीर्षितस्यासौकर्यं चेष्टितात् पराङ्मुखीकर्त्तुं न प्रभवति।

निमे रुद्रटकाव्यालङ्कारटिप्पणके पाणिन्याख्यस्य कस्यचित्कवेः श्लोकद्वयं लभ्यते। बहुवत्सरा व्यपगता आचार्येण पिशलेन प्राच्यसमाजानुसंधानपत्रिकायां श्लोकाविमावुद्दिश्य पाणिनेः कालविषयकं स्वमतं प्रख्यापितम्। वैयाकरणवरेण्यो दिगन्तलुठत्कीर्त्तिः पाणिनिः श्लोकयोरेतयो रचयिता च भिन्नौ नास्तामिति। इत्थं वैयाकरणः पाणिनिः षष्ठे पञ्चमे वा खिस्तीयशतके स्थापयितुं पार्यते। महदाश्चर्यम्! अष्टाध्याय्या वामनजयादित्यस्य काशिकावृत्तेश्च कालव्यवधानमित्थमाचार्यपिशलो निरुद्वेगं लघूचकार।

अष्टाध्याय्याः काशिकावृत्तेश्च मध्ये वैयाकरणानां या पङ्क्तिर्वीक्ष्यते, सूत्रव्याख्यातॄणां यन्मतबाहुल्यं दृग्गोचरीभवति, तदुपेक्ष्यैवेत्थंभूतमूहनं कर्त्तुं शक्यते। आचार्यकीलहोर्नेन मतस्यास्य सदोषता समुद्भाविता। अमुना पातञ्जलमहाभाष्यस्य खण्डत्रयात्मकं संस्कृतसंस्करणं प्रतीच्ये जगति प्रासारीत्यपि सन्दर्भेऽस्मिन्न विस्मर्त्तव्यम्। महाभाष्यानुशीलनात्तु पाणिनेः काशिकावृत्तेश्चैककालावस्थापनं स्वतो निराक्रियते, तद्घटकप्रमितिः प्रामाण्यं विजहाति। दैवयोगाद् विलुप्तानां व्याकरणग्रन्थानान्तु का कथा, सप्तमशतकप्राग्वर्त्तिनां सम्प्राप्तव्याकरणानामधिगमादन्यदेव मतमनुसन्धित्सोश्चेतसि स्फुरति।

निमेः शब्दानां तेन समुद्धृतश्लोकयोश्च पाणिनेः व्यक्तित्वनिर्धारणे गुर्वर्थता त्याज्येति निर्दिशन्नाचार्यकीलहोर्नः श्लोकयो रचयितुर्वैयाकरणाग्रगण्यस्य चैकव्यक्तित्वं बलवन्निराकरोति। काव्यरचनार्थं कविना महत्तपश्चरणीयम्। नानाविधशास्त्रानुशीलनविमलपेशलधिषणैरनुपहस-

नीयं काव्यं रचयितुं पार्यते। हृद्यं विबुधनिवहश्लाघ्यं काव्यं कथं प्रादुर्भवति ? काव्यप्रकाशकारस्य मम्मटस्य मते तच्छक्तिं, निपुणतां, लोकशास्त्रकाव्याद्यवेक्षणं, काव्यज्ञशिक्षयाऽभ्यासञ्चापेक्षते। शास्त्राणां केषामवेक्षणम् ? छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां व्याकरणशास्त्रस्य चानुशीलनं काव्यकृतेऽपरिहार्यमुपदिष्टम्। बुधैश्छन्दसां व्याकरणं प्रथममङ्गं निगद्यते। कथितञ्च—

शब्दार्थसम्बन्धनिमित्ततत्त्वं, वाच्याऽविशेषेऽपि च साध्वसाधू।
साधुप्रयोगानुमितांश्च शिष्टान्न वेद यो, व्याकरणं न वेद॥

निमिः स्वग्रन्थेऽशुद्धशब्दानां प्रयोगं निषेधयन् वैयाकरणधुरीणस्यानवधानतया विहितान् दोषान् दर्शयन् श्लोकावुद्धरति। श्लोकयोर्गृहीत्वेति पदस्य स्थाने गृह्येति पदं श्लोककारः प्रयुयुजे, पश्यन्तीतिपदस्थाने पश्यतीतिपदम्। संस्कृतव्याकरणाधीतिविनिवेदितधीः कीलहोर्नः श्लोकाविमावष्टाध्याय्याः प्रणेतुः कृती स्त इत्यत्रापत्तिं विदधाति। एतावता सूक्ष्मदर्शिना महता श्रमेण कार्यं कुर्वता महर्षिणा इत्थम्भूते अशुद्धी कथं व्यधायिषाताम् ? अष्टाध्याय्याः सप्तमाध्यायस्य प्रथमपादे सप्तत्रिंशत्तमं स्वलिखितं 'समासेऽनञ्पूर्वे क्त्वो ल्यप्', इति सूत्रं तस्मिन्नेवाध्याये प्रथमपादे एकाशीतितमं स्वरचितं "शप्श्यनोर्नित्यम्" इति सूत्रञ्च समुपेक्ष्यैव महर्षिणा इत्थंभूते अशुद्धी अकारिषाताम्। मुनित्रयानुध्यानपरायणः कीलहोर्नः पृच्छति—किं वैयाकरणः पाणिनिरेते सूत्रे विसस्मार ? प्रश्नोऽयमुत्तरं नापेक्षते। परं श्लोकाविमावसौ प्रथमे वयसि रचयाञ्चकारेत्यूहनं किल कर्त्तुम्पार्यते।

आचार्यकीलहोर्नस्य मते महर्षिः पाणिनिर्वैदिकसाहित्यस्य तु नेदीयान्, भारविभवभूतिकालिदासादीनां युगापेक्षया। स नूनमेवम्भूतस्य युगस्य प्रतिनिधिरासीद् यदा संस्कृतं नासीत् केवलं विदुषां वाक्। व्याकरणग्रन्थेषु लब्धाभिरुदाहृतिभिरेव कस्यचिद् वैयाकरणस्य कालो विनिश्चेतुं न शक्यते। इत्थम्भूतः प्रयास उपहसनीयः स्यात्। ऐतिह्यैकचक्षुष्कैरित्थं यदा तदा न यत्यत इति चेन्न। एवम्भूताया गवेषणायाः कार्पण्यं निःसारत्वञ्चाचार्यकीलहोर्नोऽपि स्वीचकार। निदर्शनानि ग्रन्थकर्त्ता स्वयमेव व्यरचिषत, प्राक्तनवैयाकरणैर्वेति विनिर्णेतुं कः शक्ष्यति ? तान्येव उदाहरणानि पूर्ववर्त्तिनां परवर्तिनाञ्च वैयाकरणानां कृतिषु वीक्ष्यन्ते। महाभाष्यं चेच्चक्षुर्विषयातिक्रान्तमभविष्यत्, तर्हि काशिकायामुपलब्धस्य लङ्लकारस्य व्याख्यानं दृग्गोचरीकृत्यैतिह्यकाराः किं बोद्धुमशक्ष्यन् ? अनद्यतने लङिति पाणिनिसूत्रं व्याख्यास्यमानेन काशिकाकारेण किमलेखि ? परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ् वक्तव्यः। उदाहरणार्थं स यवनान् स्मरति, भाष्यकारस्य उद्धरणं वा। अरुणद्यवनः साकेतम्। अरुणद् यवनो माध्यमिकामिति। पतञ्जलिरपि प्राक्तनग्रन्थकाराणां कृतीरित्थमेव प्रयुयुजे।

पाणिनेः कालसीमानमनुमातुमाचार्यकीलहोर्नेन प्रस्तुतो लिट्लकारविषयकस्तर्कः प्रसमीक्ष्यः। स्वयुगस्य प्रयोगमनुसृत्य पाणिनिरत्र केवलं कृधातोः प्रयोगं विदधाति। विपरीततया षष्ठशतकस्य ग्रन्थकारैरस्कृभू इति धातवो भेदं विहाय अचायिषत। लुङ्लकारविषयकस्तस्योपदेशो ब्राह्मणानां वाचा संवदति। तद्विपरीतं परवर्त्तिनि काले लिट् लुङ् लङ् लकाराणां प्रभेदो विलुलोप। कारकाण्युद्दिश्य विहितानि पाणिनीयसूत्राणि ब्राह्मणे सूक्ष्मतयाऽनुवर्त्तितानि, परं काव्ययुगे व्यतिक्रमाणां नैयून्यं न विद्यते। इत्थं महर्षिं पाणिनिं खिस्तात् कतिपयशतकपूर्वमुपस्थाप्य गवेषकैस्तर्कानुरूपताऽङ्गीक्रियेत। खिस्तात्पश्चाद्वर्त्तिनि काले तमुपस्थापयितुमाग्रहः कथम्?

काशिकाकारस्य पाणिनेश्च काले व्यवधानमासीन्नवेति प्रश्नमुद्दिश्याचार्यपिशलस्य निष्पत्तिर्नादरमर्हति। आचार्यकीलहोर्नस्तस्य निष्कर्षं युक्तिभिः खण्डयाञ्चकार। काशिकावृत्तिं पाणिनीयव्याकरणस्य पुरातनतमवृत्तिषु गणयितुं प्रमाणानामभावोऽस्ति। तस्या अवलोकनादन्यदेव वक्तुं पार्यते। तत्र शतार्धाधिका विधयः पाणिनीयव्याकरणाद् वैभिन्न्यं भजन्ते। सर्वत्र परेषां मतानि निर्दिश्यन्ते। केचित् कश्चित् अन्ये परेऽपर एके पाठान्तरं स्मृत्यन्तरं शास्त्रान्तरं ग्रन्थान्तरमित्यादीन् शब्दान् प्रयुज्य काशिकाकारोपदर्शितानि परेषां मतानि किं साधयन्ति? नगण्यकालव्यवधानं समवाप्य मतानामेवम्विधं बाहुल्यं समजनीति नूनं विश्वासपदवीं न टीकते। काशिकावृत्तेरुपोद्घाते ग्रन्थकारःस्पष्टमेव संकेतं विधत्ते। तत्पूर्वमेव वैयाकरणपुङ्गवा व्याकरणानि निरमासिषुः। काशिकावृत्तिरारभ्यते--

"वृत्तौ भाष्ये तथा धातु-नाम-पारायणादिषु।
विप्रकीर्णस्य मन्त्रस्य क्रियते सारसङ्ग्रहः॥"

विप्रकीर्णमितिपदं किमभिप्रैति? द्रागेव पाणिनीयव्याकरणकारस्य दैशिकीभूतत्वं संभवम्, परं सम्प्रसार्यमाणां तस्य कृतिमुद्दिश्य समुद्भूतानां मतानां बाहुल्यं किल कालमपैक्षिष्ट।

(२)

पाणिनीयव्याकरणं गीर्वाणवाण्याः पदानां संघटनमुद्दिश्य प्रतिपन्नं पाणिनीयमतं च विपश्चितां सदसि भारते वर्षे सर्वत्र सर्वकालेषु च बहु मन्येते स्म, वैयाकरणानां बाहुल्येऽपि न कश्चित् कृतधीरित्थं समाद्रियते स्म, परं तथापि ऐतिह्यविदां महर्षेः कालविषयमुद्दिश्यैकवाक्यताऽद्यापि दृष्टिपथं नायाति। आचार्यकीलहोर्नस्याचार्यपिशलस्य च मतवैभिन्न्ये प्रमाणबलवत्तयाऽऽचार्यकीलहोर्नस्य पर्येषणा बलीयसी प्रतिभाति। कालसंकोचाद् विस्तरेण विचारणाऽत्र भवितुं न शक्नोति। प्रतीच्यजगतो विदुषां प्रयासान् सूचयितुमेवैषा प्रवृत्तिः।

काशिकावृत्तेरुपोद्घातश्लोकविषयकं हरदत्तकृतं जिनेन्द्रबुद्धिकृतञ्च व्याख्यानं कील-होर्नस्य मतं द्रढयति, स्पष्टयति च तस्य तर्कसरणिम्। पाणिनेरतिपुरातनत्त्वमधिकृत्य विशङ्कमानानां विचारणा सोपपत्तिका नास्ति। हरदत्तो व्याख्याति—तत्र सूत्रार्थप्रधानो ग्रन्थो वृत्तिः। सा चेह पाणिनिप्रणीतानां सूत्राणां कुणिप्रभृतिभिराचार्यैर्विरचितं विवरणम्। तथा-शब्दः समुच्चये। पारायणशब्दः प्रत्येकमभिसम्बध्यते। धातुपारायणम्। नामपारायणमिति। यत्र धातुप्रक्रिया तद्धातुपारायणम्। यत्र गणशब्दानां निर्वचनं तन्नामपारायणम्। आदि—शब्देन शिक्षोणादिभिषादेर्ग्रहणम्। जिनेन्द्रबुद्धिरप्यत्रान्यान् संकेतयति। पाणिनिप्रणीतसूत्राणां वृत्तिर्बहुभिर्व्यरचि चुल्लिभट्टिनल्लूरादिभिर्वैयाकरणप्रथमपांक्तेयैः।

काशिकाकारैः पुरातनविवरणैः सह पतञ्जलेर्भाष्यमपि परिशीलितमासीत्। भर्तृ-हरिणाऽपि भाष्यं व्याख्यातम्। आचार्यमोक्षमूलरस्य भर्तृहरेः कालविषयिका गवेषणा विद्वद्भिः संस्तूयते स्म। तदनुसारं वैयाकरणधुरीणोऽयं वाक्यपदीयकारः काशिकातः प्राक्तनः। संस्कृतव्याकरणस्यैतिह्यार्थं पर्येषणैषा गुर्वथा। महाभाष्यप्रणयनविषयकं तस्य मतमाचार्यकील-होर्नस्य दृष्टावादरमर्हति। भर्तृहरिणा महाभाष्यस्य विभिन्नपाठाः सङ्केतिताः। भिन्नमतयो वृत्तिकारा अपि वाक्यपदीयेऽनुल्लिखिता न सन्ति। दैवयोगात्तेषां कृतयश्चक्षुर्विषयातिक्रान्ता बभूवुः। पतञ्जलेर्भर्तृहरेश्च मध्ये कालस्य व्यवधानं कियत्स्यात्? वत्सराणां शतानि त्ववश्य-मेव व्यपगतानि। सन्दर्भेऽस्मिन् वाक्यपदीयस्य द्वितीयकाण्डं द्रष्टव्यम्। तत्र पतञ्जलेर्ग्रन्थ आर्ष इति निगद्यते। आर्षे विप्लाविते ग्रन्थ इति। वैयाकरणानां लाघवमपि सङ्केतितम्। संक्षेपरुचीनल्पविद्यापरिग्रहान् व्याकरणशास्त्रिणः सम्प्राप्य महाभाष्यमस्तमुपयाति। पतञ्जलये तीर्थदर्शीति पदप्रयोगोऽप्यवधार्यः। तीर्थदर्शित्वं सुदीर्घकालमपेक्षते, इति न परोक्षं प्रेक्षाव-ताम्। भाष्यकारार्थं गुरुरितिपदं प्रयुज्य भर्तृहरिणा तस्य गरिमा परां काष्ठां नीतः। सर्वेषां न्यायबीजानां निबन्धनमिदं गाम्भीर्यादलब्धगाढ्यं निरूप्यते। अकृतबुद्धीनां तत्र प्रवेशः कालं प्राप्य सुदुष्करो जातः। सुश्लोक्येन वाक्यपदीयकारेण आर्षस्य ग्रन्थस्य विप्लावनमभिसूच्य कालव्यवधानस्यायामोऽपि अभ्यसूचि। इत्थमकृतबुद्ध्यगम्यत्वाद् भाष्यार्णवस्य दुरवगाहत्वाद् भ्रष्टोऽयं व्याकरणागमः कालं प्राप्य दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थित आसीत्। आचार्यचन्द्रा-दीनां वैयाकरणमूर्धन्यानां तपसा पुनरप्यार्षग्रन्थोऽयं महाभाष्याभिधो व्याकरणरसिकानां कृते प्राङ्मनोरथपथाच्च्युतोऽपि सुलभो बभूव। वर्णनमिदं किमभिव्यनक्ति? उत्तरं सुधियां चेतसि अनायासेनैव परिस्फुरति। चन्द्राचार्योऽयं कश्मीराणां भूभृतोऽभिमन्योः शासने न्यवसदित्या-चार्यकीलहोर्नस्य सङ्केतः सम्भावनाकोटिं नैव परिवृणक्ति। महाभाष्यस्य शैलीमधीत्य भारतीय-विपश्चितस्तु तस्य पुरातनत्वमञ्जसाऽऽकलयन्ति। आचार्यकीलहोर्नः पतञ्जलिं खिस्तस्य पञ्चमे शतके स्थापयन्नपि खलु महान्तं सङ्कोचमन्वभवत्। यदि पतञ्जलिर्महाभाष्यं खिस्तस्य पञ्चमे शतके रचयाञ्चकार तर्हि पाणिनेः कालं कुत्र कस्मिन् युगे स्थापयेयुरैतिह्यविदः।

पतञ्जलेः कृतिरष्टाध्याय्या भाष्यं नास्ति, सा हि कात्यायनकृतेर्भाष्यम् । तन्नास्ति वार्त्तिकस्य पुरातनतमं भाष्यमिति निश्चप्रचम् । एवमेव वाक्यपदीयमपि महाभाष्यस्य पुरातनतमा विवृतिर्नास्ति, काशिकायामष्टाध्याय्या अर्थविशदीकरणार्थं सर्वप्रथममयत्यतेतिमतमप्यज्ञानविजृम्भितमेव कथयिष्यते । पुराकालिके भारते व्याकरणस्य महिमा सुधीभिः सर्वैरङ्गीकृतः । व्याकरणसंस्कारपरिपूतमुखा मानवा रूपान्तरेण देवा महीतले विचरन्तीति पदमञ्जरीकारस्य कथनं भारतीयसंस्कृतौ शब्दशास्त्रानुशीलनस्य गरिम्णा प्रेरितम् ।

पतञ्जलेः कृतावनल्पसंख्यका वार्त्तिकार्थावगन्तारो निर्दिश्यन्ते । उदाहरणानां नैयून्यं नास्ति । आख्यातं साव्ययकारकविशेषणं वाक्यमित्यत्र भाष्ये पठामः—अपर आह । आख्यातं सविशेषणमित्येव । सर्वाणि ह्येतानि क्रियाविशेषणानि । समुदायसामर्थ्याद्वा सिद्धमित्यत्र भाष्ये पुनरपि अपरस्य मतं निर्दिश्यते । अपर आह । समर्थतराणां वा समुदायसामर्थ्यात् । समर्थतराणां वा समासो भवति । षष्ठी प्रसङ्गश्चेत्यत्र भाष्येऽपि, इतरवैयाकरणस्य मतं भाष्यकारोऽभिसूचयति । अपर आह । षष्ठी प्रसङ्गश्च । षष्ठी च प्रसक्तव्या । कुतः मातृशब्दात् । स्मृतशब्देनाभिहितं कर्मेति कृत्वा षष्ठी न प्राप्नोतीति । जाग्रोऽगुण विधिरित्यत्र भाष्येऽपरस्य मतं भाष्यकारो निर्दिदेश । अपर आह । जागर्तेर्गुण विधिः प्रयोजनम् । यथेह भवति जागरितः जागरितवानित्येवं जाग्रतः जाग्रथ इत्यत्रापि प्राप्नोतीति । मतानां वैभिन्न्यमिदमल्पकाल एव नोत्पद्यते, दीर्घकालमपेक्षते तत् । कात्यायनभाष्यकारयोर्मध्यवर्त्तिनि काले बहव इत्थंभूता वैयाकरणा अविद्यन्त, यैर्वार्त्तिककारस्य कृतेः सरलीकरणार्थमर्थविद्योतनार्थं भावविशदीकरणार्थं वा अयत्यत । सन्दर्भेऽस्मिन् भारद्वाजीयानां सौनागानाञ्च समुल्लेखो मनसि निधातव्यः । वैयाकरणानामिमे द्वे शाखे भाष्ये बहुत्र निर्दिश्येते । भारद्वाजीया न्यूनाधिकं कात्यायनानुगामिन आसन्, सौनागैः पाणिनीयसूत्रविवेचनेऽपेक्षाकृतमधिकं स्वातन्त्र्यमग्राहि । काशिकावृत्तिरपि सन्दर्भेऽस्मिन् द्रष्टव्या । इड्विधौ हि अग्रहणमिति वार्त्तिकस्य भाष्ये भारद्वाजीयाः स्मर्यन्ते । भारद्वाजीयाः पठन्ति—नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थमिति । घुसंज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थमिति । ननु नानावैयाकरणमतानि सम्यगधीत्य भाष्यकारो भाष्यं रचयाञ्चकारेति निश्चप्रचम् । पाणिनेर्भाष्यकारस्य च कालव्यवधानदैर्घ्यमित्थं स्पष्टीभवतीत्याचार्यकीलहोर्नः ।

मुनित्रयस्य कालमधिकृत्य गवेषणागतमानसानां विचिकित्सितमिदं विस्मयं खलु नावहति । ननु प्रत्ना अतिप्रत्ना वा, तेषां शब्दशास्त्रपारावारीणतां, तेषां प्रज्ञाया भासुरत्वं, मेधाया व्याकरणशास्त्रकूलङ्कषत्वं, पदसाधनवैदुषीं वा प्राच्ये प्रतीचीने वा जगति को वै गवेषणाकृत्नुः संधुक्ष्यति ?

शिक्षाग्रन्थाः शिक्षाक्रमश्च

आचार्यपट्टाभिरामशास्त्री

प्राक्तना महर्षयो वेदानां शब्दतोऽर्थतश्च संरक्षणाय राजसदनस्य नैकविधानि दुस्तराणि दुर्गाणीव षडङ्गानि निरमासत। दुर्गाणीमानि सुपरिशील्य तत्र प्रवेशमवाप्य वेद-सदनं प्रवेष्टव्यं भवति राजसदनमिव। वेदस्तु कल्पतरुरिव समेषां पुरुषाभिलषितानामर्थानां संसाधनाय परमं साधनम्। अतः केवलं शब्दसमूह एव वेद इति न भ्रमितव्यम्। तत्र विविधा अर्था अपि उच्चावचास्सन्ति। तद्गतशब्दानर्थांश्च व्यवस्थया परिरक्षितुं त्रीणि त्रीण्यङ्गानि, उपाङ्गानि च न्यायमीमांसापुराणादीनि। षट्स्वङ्गेषु शिक्षापि मुख्यं स्थानमाव-हति। वेदानां संरक्षणे प्रथमं साधनम्—वेदाध्ययनम्। अध्ययनञ्च गुरुमुखोच्चारणानूच्चार-णम्, न तु पठनमात्रम्। भारतस्य पुरातनं गौरवं यदि सत्यं वयं संरक्षितुकामास्स्मः तर्हि तद्रक्षणाय गुरुमुखोच्चारणानूच्चारणरूपं मुख्यं साधनमस्माभिरवश्यमवलम्बनीयम्। आधुनिक-दृष्ट्या ग्रन्थप्रकाशनध्वनिग्रहणयोः दुर्भाग्यवशेनावश्यकता समापतिता, किन्तु नैताभ्यां भारतस्य पुरातनं तद्गौरवं संरक्षितं भवेदिति तर्कयामि। प्राक्तनानामध्ययनपरिपाट्यां विचिन्त्यमानायां कियान् प्रयासस्तैरवलम्बित इति परिलक्ष्येत। अध्ययनञ्च तैस्त्रिधा विभक्तम्—ग्रहणम्, धार-णम्, ब्रह्मयज्ञश्चेति। तत्र ग्रहणधारणाध्ययने संहिताब्राह्मणयोः नियमेन भवतः। ब्रह्मयज्ञाध्ययनन्तु गृहीतस्य धारितस्य च वेदभागस्य प्रत्यहमंशतो नियमेन मध्याह्नकाले पारायणात्मकम्। अधि-पूर्वकस्य इङ्धातोरत्रैव प्रयोगः, न तु पठने वाचने वेति मीमांसकसम्प्रदायः। याज्ञिकानां मीमांसकानाञ्च अधीतिप्रयोगो वेदस्यैव, न तु काव्यादेः। अत एव अधिपूर्वकस्य इङ्धातो गुरुमुखोच्चारणानूच्चारणाभावेनाधीतिप्रयोगो गौणः। तत्तद्वेदानुसारेण काण्डम् प्रश्नः(प्रपाठकः) अनुवाकः पञ्चाशत्पदपरिमितो भागः, मण्डलम्, अष्टकम्, वर्गः, सूक्तम्, मन्त्रः, अध्यायः, कण्डिका इत्यादयो विभागाः, तेषामनुभागाश्च न केवलम् अध्यापनसौकर्यायैव, किन्तु तेषु तेषु यज्ञेषु विनियोगायापि। एवं प्रकल्पितेषु छात्राणां सामर्थ्यमवधार्याचार्यः प्रथमत आरभ्य कञ्चन भागं निर्धार्याध्यापयितुमारभते। तदत्र कञ्चन मन्त्रमादायाध्ययनाध्यापनप्रकारं पुरातनैः परिचालितं प्रदर्शयामः। तत्र च शिक्षाग्रन्थस्य कीदृश उपकार इति विवेचयामः।

अध्यापनारम्भे गुरुर्हरिपदसहितमोङ्कारं प्रथमं शिक्षयेत्, एवमध्ययनान्तेऽपि तादृशमोङ्कारं शिक्षयेत् । आदौ "हरिः ओम्" इति सर्वोदात्तत्वेन, अध्ययनावसाने च "हरिः ओम्" इति च शिक्षणम् । इदं नित्यमङ्गम् । एवं कर्तव्यत्वेन शिक्षाग्रन्थश्शिक्षयति । यथा—

'आद्यन्तप्रणवौ नित्यौ यथा हरिपदं तथा ।
सविसर्गं हरिपदं प्रणवात्पूर्वमिष्यते ॥
हरिपदे विसर्गस्य न सन्धिः प्रणवोत्तरे ।
विसर्गस्यार्धमात्रात्वं विरामो मात्रिकस्स्मृतः ॥
आदौ हरिपदं सर्वमुदात्तञ्चेष्यते बुधैः ।
अन्ते रिशब्दस्स्वारः स्याद्विसर्गः प्रचयः स्मृतः ॥
ओमो नित्यानुदात्तत्वं सर्वत्र प्रोच्यते तथा ।
प्रमाणं लक्षणं यद्वच्छिष्टपाठस्तथैव च' ॥ इति ।

'अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद्देवेषु गच्छति' । इति मन्त्रः ।

अत्रैकादश पदानि सन्ति । सकृदेतेषां समेषां पदानामाचार्योच्चारणं निशम्य तानि पदानि छात्रा अनूच्चारयेयुरिति तु न सम्भवत्येव । अत आचार्यः पदद्वयं त्रयं वा संहितातः पृथक्कृत्योच्चारयेत् । तदुच्चारणञ्च सावधानेन मनसा छात्रा द्विरुच्चारयेयुः । एवं निर्धारितभागपर्यन्तं प्रथमदिनेऽध्यापनम् । इदमध्ययनं दशदिनव्यापि भवति । अर्थात् द्वितीयां तिथिमारभ्य द्वादशीतिथिपर्यन्तम् । आचार्यः छात्राणां कौशलमुच्चारणपाटवञ्च संवीक्ष्य क्रमशः पदानि संवर्ध्याध्यापयेत्, छात्राश्च द्विरुच्चारयेयुः । एवमष्टौ दिनान्यध्याप्य नवमदशमदिनयोः समग्रं पञ्चाशत्पदपरिमितं भागम्, अनुवाकम्, सूक्तं कण्डिकादिकं वाऽध्यापयति, छात्राश्च द्विर्द्विस्तदुच्चारयन्ति । इदं ग्रहणाध्ययनं कथ्यते । तत्र निर्दिष्टभागान्तर्गतस्यैकैकं पदं दशसु दिनेष्वेकैकः छात्रो विंशतिवारमुच्चारयतीति सिध्यति । इदं ग्रहणाध्ययनम् । तदनन्तरं धारणाध्ययनं छात्रैरध्यापकसन्निधावनध्यायदिनानि विहाय दश द्वादश दिनानि कर्तव्यं भवति । पूर्वस्मिन् पक्षे गृहीताद् भागात् पञ्चाशत्पदभागं यथायोग्यमन्येषु वेदेषु भागं वा पृथक्कृत्य दश दशवारमावर्तयेयुः । अस्मिन् धारणाध्ययने एकैकश्छात्र एकैकं पदं दशसु दिनेषु शतवारमावर्तयतीति सिध्यति । पूर्वं कृतद्विरुच्चारणेन सह विंशत्युत्तरशतवारमावर्तनं प्रतिपदस्य सम्पन्नं भवति । द्वितीयपक्षे नूतनो निर्दिष्टो भागः एवमुत्तरभागस्याध्ययनम् । यावान् भागो वाचो विधेयो जातस्तावतः प्रत्यहं नियमेन भागश आवर्तनम् । इदं ब्रह्मयज्ञाध्ययनम् । एवं यथावकाशमनेकाः श्रेणयो भवेयुः । सर्वत्राचार्यस्य दृष्टिर्भवति । क्वापि मात्रयाप्यशुद्धिर्यथा न भवेत्तथाचार्यः परिपालयेत् । इयं रीतिरेकस्य संहिताब्राह्मणात्मकस्य वेदस्य ।

इतोऽपि विस्मयजनकमाचार्यैरध्यापनमक्रियत। तच्च मनसापीदानीं चिन्तयितुं न शक्यते। नाम्नैव केवलमिदानीं त्रिवेदिनः। त्रिवेदित्वं ते पुराध्यापनेनात्मनः प्राकाशयन्। न खलु पृथक्पृथक् त्रयाणामध्यापनेन, किन्त्वेकदैव एकत्रैव नियते स्थाने तत्तद्वेदीयान् पृथक्पृथक् छात्रानुपवेश्याध्यापयामासुः। अध्यापनसमये यस्मिन्नेव वेदे य एव छात्रो मात्रयाप्यक्षरे स्वरे वा स्खलति तं विज्ञाय साधूच्चारणं संशिक्ष्य तत्तद्वेदीयोपरितनवाक्यान्यध्यापयाम्बभूवुः। अहो कियती स्मरणशक्तिः? कियद्वा सहनशीलता, विभिन्नवेदानां शब्दघोषसंकुलेऽपि श्रोत्रेन्द्रिये कियती दोषग्रहणपटुता? तत्रापि विशिष्य तस्यैव ग्रहणं यश्च स्खलति। नायमतिचिरन्तनोदन्तः, इतः पञ्चाशद्वर्षेभ्यः पूर्वमप्यासन् ब्रह्मश्रीविश्वेश्वरश्रौतिनः, अन्येऽपि महात्मानः। अनितरसाधारणी चित्तैकाग्रतैतेषाम्। एषां स्थितिं पर्यवेक्ष्याधीतिनोऽपि तथैवासन्। आचार्याः स्वयं शब्दान् यथावदुच्चारयन्तः शिष्याणामपि बहूनामुच्चारणावसरे साधुत्वासाधुत्वयोर्ध्यानं दधुः। तदिदं शिक्षाकारः प्रथमं शिक्षयति।

"व्याघ्री यथा हरेत्पुत्रं दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥" इति।

(शम्भुशिक्षा)

एवमेव—

"सुव्यक्तस्सुस्वरो धैर्यं तच्चित्तत्वं चतुर्गुणाः।
एतद्युवतः पठेद्वेदं स वेदफलमश्नुते ॥ इति ॥

(व्या० शि० ५०३)

अत्र सुव्यक्तपदेन स्थानकरणादिनियमपालनम्। सुस्वरपदेनोदात्तानुदात्तादीनां नासादिदोषराहित्यम्। धैर्यपदेनाव्यग्रता, तच्चित्तत्वपदेन च तत्रैव लीनत्वमभिप्रेयते। अध्यापनावसरे छात्र एवंगुणसम्पन्नोऽस्ति न वेत्यत्र जागरूको भवेदाचार्यः। संघशोऽधीयमानेषु छात्रेषु के वा एतद्गुणविहीना इत्यवगतिराचार्याणामनिर्वर्णनीयैव कुशलतेति स्वीकर्तव्यम्। आचार्याध्यापनावसरे सर्वेऽपि छात्रा आचार्योन्मुखा एव भवेयुः। य एवैवं न भवेत्सोऽवश्यं स्खलेदेव। स्खलनं कस्मान्निर्गतमित्याचार्यस्य विना प्रणिधानेन छात्रस्खलनं कथं परिज्ञातं स्यात्। अत एव 'स्वाध्यायस्तपः' इति माता श्रुतिरुद्घोषयति। तपसि च चित्तैकाग्र्यं मनसा प्रणिधानञ्च मुख्यमङ्गम्। चित्तैकाग्र्यं मनसः प्रणिधानञ्च वर्णानां तद्गतस्वराणाञ्च श्रवणे। एतेषां वर्णानां नित्यत्वं सर्वगतत्वञ्चास्थिषत मीमांसकाः। शिक्षाकाराश्च प्रतिवर्णं देवतां जातिं स्थानं करणं यत्नञ्च सविशेषमुपवर्णयन्ति।

एवमाचार्यः संहितां ब्राह्मणञ्चाध्याप्य पदक्रमजटाघनादिविकृतिपाठमध्यापयति। अस्यामवस्थायां विकृतिपाठाध्येतारश्छात्राः पृथग्भवन्ति, नूतनांश्च संहिताब्राह्मणाध्येतॄन् गृह्णात्याचार्यस्सुपरीक्ष्य। तत्र पदाध्यापनावसरे पदानां पृथक्पृथक्सतां स्वरा भिन्ना भवन्ति। पदानां विभागं तेषां संहितां च यथावद्विज्ञायाचार्यः संहितां ब्राह्मणञ्चाध्याप्यानन्तरं पदपाठं यथायथमध्यापयति। तत्रापि छात्राणां द्विरुच्चारणात्मकमध्ययनं ग्रहणधारणरूपं भवति। पदपाठं समस्तं समाप्य क्रमपाठाध्ययनम्। क्रमपाठे प्रतिपदस्य द्विर्ग्रहणम्—'अग्ने यं, यं यज्ञम्, यज्ञमध्वरम्, अध्वरं विश्वतः,विश्वतः परिभूः,परिभूरसि असीत्यसि। स इत्,इद्देवेषु,देवेषु गच्छति, गच्छतीति गच्छति'इति। अत्र द्वितीयादिपदानां वारद्वयमुच्चारणम्। संहिताध्ययने एकैकस्य पदस्य ग्रहणधारणाध्ययनयोर्विंशत्युत्तरशतवारम्, पदाध्ययने तद्धारणे च विंशत्युत्तरशतवारं, क्रमाध्ययने च ग्रहणावसरे चत्वारिंशद्वारमेकैकस्य पदस्योच्चारणम्, धारणावसरे च यावद्दृढं धारणं भवति तावद्वारमुच्चारणम्, एतद्विहाय नित्यब्रह्मयज्ञाध्ययने उच्चारणानि, एवमनन्तान्युच्चारणानि भवन्ति।

एवं विकृतीनामध्ययनं ग्रहणधारणरूपमाचार्यः कारयति। क्रमाध्ययनपर्यन्तमनुलोमरूपमासीत्। अन्यासु विकृतिषु विलोमानुलोमौ भवतः। अस्मिन्नेव मन्त्रे यथा—

'अग्ने यं यमग्न अग्ने यं, यं यज्ञं यज्ञं यं यं यज्ञम्, यज्ञमध्वरम्, अध्वरं विश्वतो विश्वतोध्वरमध्वरं विश्वतः, विश्वतः परि भूः, परिभूर्विश्वतो विश्वतः परिभूः, परि भूरिति परि भूः परिभूरस्यसि परिभूः परिभूरसि, असीत्यसि। स इदित्स स इत्, इद्देवेषु देवेषु गच्छति गच्छति देवेषु देवेषु गच्छति, गच्छतीति गच्छति, एवमनुलोमविलोमाभ्यां तेषामेव पदानां कियत्य आवृत्तयो भवन्तीति प्रत्यक्षमिदम्। अनेन प्रकारेण समग्रस्य वेदस्यावृत्तौ क्रियमाणायां छात्रेषु आचार्येषु च मन्त्रावृत्तिजनिता शक्तिः कियती विवर्धत इति प्राक्तना अन्वभवन्। शक्तिर्नाम तदेकध्यानातिशयेन जायमानः पदार्थः। 'सामर्थ्यं सर्वभावानां शक्तिरित्यभिधीयते' इति वदन्तो भट्टपादाः शक्तेरतिरिक्तपदार्थत्वमङ्गीकुर्वन्ति। अत एव शब्दसमूहात्मके ब्रह्मणि वेदे इयान् श्रद्धातिशयो याज्ञिकमीमांसकानां मीमांसकानाञ्च। यथा हि पराम्बा शक्तिस्वरूपिणी तथैव वर्णसमूहश्शब्दराशिर्वेदानामपि शक्तिस्वरूपः। पराम्बायाश्शक्तिस्वरूपत्वमप्यकारादिक्षान्ताक्षरैरेवेति कथनं नानुचितम्। वेदे च प्रत्यक्षरं देवतात्मकमिति शिक्षाकारा उपदिशन्ति। यथोपदेशञ्च याज्ञिकास्तानि तान्यक्षराण्युच्चारयन्तः स्मरन्ति। याज्ञिका मीमांसकाश्च तास्ता देवताश्शब्दरूपा अभ्युपगच्छन्ति। एवञ्च सर्वो वेदो ब्रह्ममयः। अतः 'ब्रह्मयज्ञः ब्रह्मचारी' 'ब्रह्मोपदेशः' इत्यादीनि नामानि वेदसम्बन्धीनि प्रसृतानि। तत्र शिक्षाकारस्य व्यासस्य सूत्राणि परिशीलयामः—

अक्षराणां विभागः

अक्षराणां देवतावगमात्पूर्वमक्षराणि कतीति निश्चिनोति व्यासाचार्यः—

अवर्णेवर्णकोवर्णो ऋवर्णौ लृत्वमेत्वमैत् ।
ओदौद्रङ्गौ क्रमादोम्योत्स्वरास्स्युर्व्यञ्जनान्यथ ॥

अ इ उ इमे ह्रस्वदीर्घप्लुतरूपेण प्रत्येकं त्रिविधाः 'आख्यानेकस्य वर्णोर्ध्वे' (सू० १७) इत्यनुशासनेन भवन्ति । तथा च नव वर्णाः । 'ऋवर्णौ' इति द्विवचनेन ह्रस्वदीर्घौ द्वौ वर्णौ भवेताम्, अनयोस्सङ्कलनेनैकादश वर्णा जाताः । लृकारो ह्रस्वः, द्वादश जायन्ते । ए ऐ ओ औ दीर्घा एव । सङ्कलनेन षोडश वर्णाः ।[1] रङ्गौ इति द्विवचनेन दीर्घरङ्गः प्लुतरङ्गश्चेति द्वौ । ओमिति प्रणवे ओकारश्चेति एकोनविंशतिः स्वरा भवन्ति । प्रणवगतौकारस्य पृथग्ग्रहणे रङ्गयोश्च पृथग्ग्रहणे प्रयोजनं वक्ष्यामः । स्वरा एकोनविंशतिसंख्याकाः । व्यञ्जनानि च सप्तचत्वारिंशत् । आहत्य षट्षष्टिसंख्याकाः । तत्र स्वराणामक्षराणीति संज्ञा । व्यञ्जनानाञ्च वर्णा इति व्यवहारः । व्यञ्जनेषु सप्तचत्वारिंशत्संख्याया उपपत्तिरीदृशी—कादिमान्ताः पञ्चविंशतिः, यादिवान्ताश्चत्वारः जिह्वामूलीयादिहान्ताष्षट्, ळकारः, केवलानुस्वारः गकार-संयुक्तश्च सः, विसर्गः स्वरभक्तयश्चतस्रः [2]यमाश्चत्वार इति सप्तचत्वारिंशत् । एकोनविंशति-स्वरैस्सङ्कलनेन षट्षष्टिवर्णा जायन्ते । वर्णानामस्यां शिक्षायां प्रत्येकं कार्यविधानादेतावन्तो वर्णाः परिगण्यन्ते । क्वचन शिक्षायां कालं प्रधानीकृत्य कार्यविधाने त्रिसप्ततिः, क्वचन करणप्रधान-तया पञ्चषष्टिः, क्वचन सर्वकारणकत्वेनाष्टोत्तरशतं वर्णा जायन्ते । अनुस्वारविसर्गयोरक्षरेषु

---

१. याज्ञवल्क्यशिक्षायां रङ्गमधिकृत्येमे कारिके स्तः—

"रंगे चैव समुत्पन्ने न ग्राह्यं पूर्वमक्षरम् ।
स्वरं दीर्घं प्रयुञ्जीत पश्चान्नासिक्यमाचरेत् ॥
यथा सौराष्ट्रिका नारी अराँऽइत्यभिभाषते ।
एवं रंगः प्रयोक्तव्यो ङकारेण विवर्जितः" ॥ इति ॥

(या० शि० १८६, १६०)

२. अपञ्चमैश्चैकपदे संयुक्तं पञ्चमात्परम् ।
उत्पद्यते यमस्तत्र सोऽङ्गं पूर्वाक्षरस्य हि ॥
पञ्चमाश्शषसैर्युक्ता अन्तस्थैर्वापि संयुताः ॥
यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः ॥

(या० शि० २१३, २१४)

वर्णेषु च परिगणना कृता शिक्षाकारेण स्वरविधानाय । स्वरसन्धिस्थले तत्प्रदर्शयामः । इमान्येव चाक्षराणि इम एव च वर्णाः शौनकस्याप्यभिप्रेताः । तत्र कियान् विशेषोऽपि परिदृश्यते । शौनकः लृकारस्य दीर्घत्वमपि स्वीकरोति । चतुरो मूलयमान् बहुधा विभजते । उभयत्रापि कालस्थानकरणानि समानान्येव ।

संहितायामानुपूर्व्या ये वर्णा अक्षराणि वा परिपठितानि तेषां मिथोऽङ्गाङ्गिभावनियमाः, कालनियमाः, कारणप्रयत्ननियमाः जातिभेदाः, देवताभेदाश्च शिक्षाकारेणोपदिष्टाः । एतान्नियमान् सुविज्ञाय योऽध्यापयति स एवाचार्यः ।

ध्वनिस्स्थानञ्च करणं प्रयत्नः कालता स्वरः ।
देवताजातिरेतैश्च वर्णा ज्ञेया विचक्षणैः ॥
पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्राविभागज्ञो गच्छेदाचार्यसम्पदम् ॥ इति ॥

सविशेषमिदं सर्वं विज्ञायाचार्यो वेदान् ग्राहयेत् ।

वर्णानां देवता जातयश्च

तत्र प्रथमं वर्णानां कास्का देवता इति निरूपयामः । पूर्वं षट्षष्टिसंख्याका वर्णाः प्रदर्शिताः । तेषु प्लुतवर्णान् विसर्गं ओङ्कारं जिह्वामूलीयोपध्मानीयौ शुद्धानुस्वारं गकारसंयुक्तमनुस्वारं चतस्रस्स्वरभक्तीः रङ्गौ चतुरो यमांश्च विहायावशिष्टा अष्टाचत्वारिंशद्वर्णाः पञ्चसु राशिषु विभक्तव्याः । तेषु क्रमशः वाय्वग्निभूमीन्द्वर्काः पञ्च देवताः । तत्र वायुदेवताकाः—अ आ ए क च ट त प य षाः; अग्निदेवताकाः—इ ई ए ख छ ठ थ फ र साः; भू-देवताकाः—उ ऊ ओ ग ज ड ब द ल हाः, इन्दुदेवताका—ऋ ॠ औ घ झ ढ ध भ व लाः, अर्कदेवताकाः—लृ ङ ञ ण न म क्ष शाः; तदिदमुक्तं व्यासाचार्येण—

अदादेत्प्रथमयषा लृनासिक्यक्षशोत्तराः ।
क्वचिच्च— अदादेत्प्रथमायशा लृनासिक्याश्च लोत्तराः । इति पाठः
अनिलाग्निमहीन्द्वर्काः पञ्चानां त्वधिदेवताः ॥ इति ॥
(व्या० सू० ४८९, ४९०)

अत्र प्रथमपादेन प्रथमो राशिः, द्वितीयपादेन पञ्चमो राशिः प्रदर्शितः । लृनासिक्यक्षशा उत्तरा येभ्यस्ते इति यच्छब्देन मध्यमास्त्रयो राशय इति सिध्यन्ति । ते चोपरि प्रदर्शिताः । एवं प्रतिवर्णं देवतास्वरूपेऽवगते वर्णेषु जातयोऽवगन्तव्याः । जातयश्च द्विप्रकाराः—उदात्तादि-

स्वरचतुष्टयगताः, अकारादिक्षकारान्तवर्णगताश्चेति। तत्र[1] उदात्तो ब्रह्मजातिः, क्षत्रजातिरनुदात्तः, स्वरितो वैश्यजातिः, शूद्रजातिस्तु प्रचयः। सर्वे स्वराः, वर्गप्रथमद्वितीयवर्णाश्च ब्रह्मजातयः, वर्गतृतीयचतुर्थवर्णाः क्षत्रजातयः, वर्गोत्तमा अन्तःस्थाश्च वैश्यजातयः, अनुस्वारविसर्गोष्माणोऽवरजातय इति व्यवस्था। उदात्तादिस्वराणां व्यञ्जनानाञ्च या या जातयो निश्चिताः तासामुच्चारणावसरे व्यतिक्रमे तत्तत्संहारकत्वदोषः प्रदर्शितः,त तज्जात्युच्चचारणे तत्तजातिपरिरक्षणञ्ज भवति।

एवम्—नातिव्यक्तं न चाव्यक्तमेवं वर्णानुदीरयेत्।

पयः पूर्णमिवामत्रं हरेद् धीरो यथामति ॥ (प्राति ·२·५·८)

इति प्रमाणेन वर्णोच्चारणप्रकार उपवर्णितः

अत्रैवमुदाहरणं पश्यामः—'वीरवत्तमम्' इति पदम्। वीरोऽस्यास्तीति वीरवान् मतुप्, अतिशयेन वीरवान् वीरवत्तमः तमप्। अत्र वीरशब्दस्य फिट्स्वरः, अर्थात्प्रातिपदिकान्तोदात्तः। 'अनुदात्तं पदम्' इत्यादिना प्रथमवर्णस्यानुदात्तस्वरे स्थिते तदुपरि मतुप्तमपोः पित्त्वात् 'अनुदात्तौ' सुप्पितौ इत्यनुदात्ते प्राप्ते 'वी र व त्त म' इति जाते 'उदात्तादनुदात्तस्य स्वरितः' 'स्वरितादनुदात्तानां प्रचयः' इत्यनुशासनाभ्यां 'वीरवत्तमम्' इति स्वरास्सिध्यन्ति। अत्रोदात्तादीनां चतुर्णां स्वराणां चतस्रो जातयः। एवं वकाररेफयोरन्तस्थत्वात् मकारस्य वर्गोत्तमत्वाच्च त्रयाणां वैश्यजातित्वम्। तकारस्य वर्गप्रथमत्वेन ब्रह्मजातित्वम्। अनुस्वारस्य शूद्रजातित्वम्। एवञ्च स्वरेषु चतस्रो जातयः, वर्णेषु च तिस्रो जातयस्समवेतास्सन्ति। 'अर्ध्यातिष्ठत्' इत्यादिषु वर्णेषु चतस्रोऽपि जातयः। अत्र स्वरेषु वर्णेषु वोच्चनीचभावो न परिगण्यते तत्तद्भिभिन्नजातिसम्बन्धेन। काममिमे वर्णाः स्वराश्च ध्वनि-स्थान-करण-प्रयत्नकाल-स्वरैश्च भिन्नाः। एवं मिथस्सत्यपि भेदे एकत्रेमा यथाधिकारं जातयस्समवेता भवन्ति। न केवलमिदमेव—

'यदन्यजातिरुच्येत तत्तत्संहारको भवेत्।

यज्जात्युच्चारणे तेषां तज्जातिपरिरक्षणम्॥ (व्या० सू० ४९९-५००)

इति सूत्रकारोऽनुशास्ति, यत्-येषां या जातिः, तज्जात्युच्चारणे सति तेषां वर्णानां तद्गतोदात्तादिस्वराणां तद्युक्तजातीनाञ्च परिरक्षणं भवतीति। एवञ्चैकस्मिन् पदे सर्वा देवताः सर्वाश्च जातयो मिथो भिन्ना अपि सम्भूयैकमर्थज्ञानरूपं कार्यं जनयन्तीति सिद्ध्यति।

---

१. ब्रह्मजातिर्भवेदुच्चः क्षत्रजातिस्तु नीचकः।
वैश्यजातिर्भवेत्स्वारः शूद्रस्तु प्रचयस्स्मृतः॥ (व्या० शि० ४९२)

विषयोऽयं विमर्शयोग्यः—

स्वमनोगतान् विषयान् परान् प्रत्याययितुं प्रयुज्यमाना वाचो भाषापदवाच्याः। गृहीतपदपदार्थसङ्गतिकः परप्रयुक्तवाक्येभ्यः तदीयमाशयमधिगच्छति। तदनुसारेण स्वयं व्यवहरति। इमं लोकव्यवहारं वयमिदानीं शिक्षिताः प्रत्यक्षमनुभवामः। शैशवावस्थातोऽपत्यानि च शिक्षयामः। तेऽपि शिक्षिता अपरान् शिक्षयन्तीति क्रमः। अत्रैवं प्रश्न उत्तिष्ठते—स कोऽयं प्रथमश्शिक्षक इति। जगत्स्रष्टा परमेश्वर इति केचन, न ह्यत्र कालस्येयत्ता निश्चेतुं शक्यते, किन्त्वनादितो वृद्धव्यवहार एवेत्यपरे, अन्ये च कृमि-कीट-सरीसृप-पतङ्ग-वानरादिक्रमेण मानवा जाताः, ध्वनिचेष्टाद्युपायेन यथा तथा वा व्यवहरन्तः क्रमेण विकासमवाप्नुवानास्तास्ता भाषाः प्रवर्तयाम्बभूवुरिति। सम्प्रतितनकालेऽयं प्रवाहः कश्चन भारते प्रवहति यद् य एव किञ्चिन्नूतनं वस्त्वाविष्करोति, य एव च किञ्चिन्नूतनं सम्बद्धमसम्बद्धं वा लिखति, य एव किञ्चिद्विचित्रमिव भाषते, सर्वत्रात्र 'विज्ञान' पदप्रयोगः। तेषु 'भाषाविज्ञानम्, इत्येकम्। वैज्ञानिकः खल्वयं युगः। विज्ञानशब्दोऽयं नाधुनिकः, वेदेष्वपि प्रचलितः। संज्ञानम्, विज्ञानम्, प्रज्ञानम्, इति सोपसर्गा वेदेषु शब्दाः श्रूयन्ते, निरुपसर्गो ज्ञानशब्दश्च वर्तत एव। तत्र भाषाविज्ञानस्य मूलभित्तिर्विकासवादः। कश्शब्दः कस्मादागतः ? कदागतः ? कथमागतः ? 'अखबार' इत्ययं शब्दः संस्कृतप्रकृतिप्रत्ययाभ्यां कथं साधनीयः ? इत्येवं नूतनमन्वेषणं भाषाविज्ञानकार्येष्वेकम्। अन्विष्टानां विरचनम्, तस्य पाठ्यक्रमे समावेशनम्, विद्यालयेषु विश्वविद्यालयेषु चाध्यापनमित्यादीन्यपि बहूनि कार्याणि तद्विज्ञानान्तर्गतान्यधुना प्रचलितानि। एवंविधेषु कार्येषु नूनं बुद्धेर्विकास इव परिलक्ष्येत। यथा हि विकसितः अविकसितः विकासशीलश्चेति देशाः परिगण्यन्ते, तथा भाषास्वपि काश्चन विकसिताः अविकसिताः विकासशीलाश्चेति प्रविभागः कर्तुं शक्यते। तत्र विकासशीलाया भाषायाः कलेवरमुपबृंहयितुं भाषाविज्ञानिन आधुनिकास्सचेष्टा भवन्ति। यतः कुतश्चिदुत्प्लुत्य स्वप्रान्ते समागतान् शब्दान् स्वस्वकोशे समावेश्यायमस्मद्भाषागतश्शब्दः, अन्यत्र गत आसीत् सम्प्रति समागत इत्युपपत्तये कालादिकं निर्णीय स्वस्वकोशं संवर्धयन्तो ब्रुवते पूर्वमस्माकमियं भाषा दुर्बलासीत्, सम्प्रति सम्पुष्टा जायमाना वर्तते, अग्रिमपञ्चवार्षिकयोजनाप्रपूर्तौ सम्पुष्टा भविष्यतीति। भाषान्तरेषु प्रयुज्यमानानि पदानि स्वस्वभाषायां प्रचलितानि, अत एवास्मत्कोशे समावेशार्हाणि इति च। एवं स्वस्वशब्दकोशोपबृंहणं भाषाविज्ञानिनां व्यापारः। पदार्थोत्पादनेन तेषां व्यापारेण क्रयविक्रयरूपेण यथा देशस्समृद्धो भवति तथैव भाषान्तरशब्दानां ततस्ततः उत्प्लुत्य समागतानां संयोजनेन, स्वस्वभाषामध्ये ज्ञानतोऽज्ञानतो वा भाषान्तरशब्दप्रयोगेण वा व्यापारेण भाषा स्वकीया न केवलं सम्पुष्टा भवति, किन्तु प्रपुष्टा सती आत्मनिर्भरतमावाप्स्यति।

'अस्मद्भाषा' 'अस्मद्भाषा' इति व्यवहारे विद्यमानोऽस्मच्छब्दः तत्तत्प्रान्तस्यैव वाचको, न तु

समग्रस्य भारतस्य । देशान्तरेषु समुत्पन्नानां पदार्थानामायातोऽस्माभिः क्रियते, एवमस्मद्देश आविष्कृतानां देशान्तरेषु निर्यातश्च क्रियते, न तथा शब्दानामायातनिर्यातौ भवतः । न हि शब्दा नौकादिसाधनैर्निर्यातयितुं शक्यन्ते, न वा आयातयितुम् । किन्तु तत्तत्प्रान्तदेशनिवासिषु तत्प्रान्तीयैः तद्देशीयैर्वा शब्दाः संगृह्यन्ते । तान् शब्दान् स्वभाषायां समावेश्य इमे शब्दाः प्रचलिता अस्मिन्नर्थ इति न केवलं वदन्ति शब्दकोशेऽपि समावेशयन्ति । तदिदं विलोक्य भाषाविज्ञानिनोऽनुसन्धातुमारभन्ते कस्यां भाषाया इमे शब्दा इति । तत्रापि न मतैक्यमनुभवामः । सेयं भाषाविज्ञानशैली । इमां शैलीं प्रथमं पाश्चात्त्यशासनकाले पाश्चात्याः शिक्षाशास्त्रिण आरब्धवन्तः । इमामवलम्ब्य भारतीया अपि भाषाविज्ञानिनः शास्त्रलेखने प्रावर्तन्त । मूलन्त्वत्र पाश्चात्यभाषाविज्ञानशास्त्रम् । तेऽनुकार्या जाताः वयञ्चानुकर्तारोऽभवाम, अनुकार्यो रामः, अनुकर्ता च नट इति यथा । अत्र च रामवद्वर्तितव्यम्, न रावणादिवदित्युपदेशो लभ्यते, तथैव पाश्चात्यानामनुकार्यत्वे तद्वदस्माभिर्वर्तितव्यमित्युपदेशस्स्यात् । किन्तु तच्छैलीमात्रानुकरणेन नाहं पश्यामि कञ्चन दोषम् । एतादृशभाषाशास्त्रशैली नाधुनिक्येव । महर्षिजैमिनेः कालादेवेयं दृश्यते । जैमिनिस्तु न केवलं धर्मस्वरूपमात्रविमर्शकः, पदानां पदार्थानाञ्च स्वरूपं सविशेषं विमृशति । यद्यपि वाक्यार्थविचारायैव जैमिनिर्मीमांसां सूत्रात्मना प्रणिनाय, तथापि वाक्यार्थज्ञानाय पदपदार्थतत्सम्बन्धानामावश्यकत्वेन सत्यवसरे इदं पदं कस्मिन्नर्थे प्रयोक्तव्यम् ? अस्य पदस्य कोऽर्थः ? वैदिकपदानां लौकिकपदानाञ्च मिथः किमन्यत्वम् ? उतानन्यत्वम् ? उभयेषां पदानामर्थः किं भिन्नः ? उताभिन्नः ? इत्यपि सुविचार्य सिद्धान्तयति । एतादृशविचारोऽपि धर्मोपयोगी ।

तत्र यववराहाधिकरणे यवादिशब्दानुदाहृत्य लौकिकवैदिकभेदेन यवशब्दस्यार्थभेदं दीर्घशूकप्रियंगुरूपं संवीक्ष्य शब्दप्रयोगरूपाचारे लौकिकानां वैदिकानाञ्च समत्वात्तुल्यबलत्वं 'तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिस्स्यात्' इति सूत्रेण पूर्वपक्षयित्वा 'शास्त्रस्था वा तन्निमित्तत्वात्' इति सूत्रेण शास्त्रस्थानां वैदिकानामेव व्यवहारो ग्राह्यः, न लौकिकानामिति सिद्धान्तितवान् सूत्रकारः । शब्दव्यवहाररूपाचारो वैदिकानां यथाऽविप्लुतः, न तथा लौकिकानामित्यत्र वैदिकप्रयोगे वाक्यशेषस्य 'यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ते' इति वाक्यशेष आनुकूल्यमावहतीति श्रीशबरस्वामिनस्सिद्धान्तशैली । अत्र वार्तिककारः पीलुशब्दमुदाहृत्य विचारयति वर्णकान्तरेण । म्लेच्छाः पीलुशब्दं प्रयुञ्जते हस्तिनि, आर्यास्तु वृक्षे । शब्दव्यवहाररूपाचारे यथा वैदिकाः तथैव म्लेच्छा अपीत्युभयेषां तुल्यत्वादुभयोर्विकल्प एव । 'पीलवान्' इति हस्तिपे म्लेच्छेषु प्रयोगः प्रसिद्धः । 'पैलवो दण्डः' इति वैदिकानां वृक्षे प्रयोगः प्रसिद्धः । अतोऽनयोस्समानत्वाद्विकल्प इति पूर्वपक्षः । सिद्धान्तस्तु 'शास्त्रस्था वा तन्निमित्तत्वात्' इति सूत्रेण शास्त्रस्थानां यथा प्रयोगोऽविप्लुतो भवति, न तथा म्लेच्छानाम् ।

अतो वैदिकप्रयोग एव साधीयानिति । यथा हि—कार्षापणगतसाधुत्वासाधुत्वे परीक्षकै-र्निर्णीयेते, तथा शास्त्रस्थैरेवाविप्लुतार्थक्रियानिमित्तपुण्यार्थिभिः शब्दनिष्ठसाध्वसाधुत्वनिर्णयः क्रियते । गौणभ्रान्त्यादिप्रयोगनिमित्ता अपभ्रंशाश्चेति । तदिदमुक्तं भट्टपादैः—

अतश्शास्त्राभियुक्तत्वादार्यावर्तनिवासिनाम् ।
या मतिस्सैव धर्माङ्गशब्दार्थत्वप्रमा मता ॥
अभियुक्ततरा ये ये बहुशास्त्रार्थवेदिनः ।
ते ते यत्र प्रयुञ्जीरन् स सोऽर्थस्तत्त्वतो भवेत् ॥ इति ॥

(तं० वा० पृ० २२० पूना सं)

एवं शब्दप्रयोगविषये शास्त्रस्थानामार्याणां प्राबल्यं व्यवस्थाप्य पिकनेमाधिकरणे पिकादिशब्दानामर्थविषयिणी चिन्ता प्रवर्तिता । आर्या यान् शब्दान् व्यवहारेषु क्वाप्यर्थे न प्रयुञ्जते अपि च वेदेषु तादृशशब्दोपलम्भे कथमर्थो निश्चेतव्यः ? किं निगमनिरुक्तव्याकरणादि-साधनैरर्थः परिकल्पनीयः ? उत म्लेच्छा यस्मिन्नर्थे प्रयुञ्जते तान् शब्दान्, स एवार्थो ग्राह्य इति सन्दिह्य 'चोदितन्तु प्रतीयेताविरोधात्प्रमाणेन' इति सिद्धान्तमाह जैमिनिः । अर्थात् म्लेच्छप्रसिद्धिविषयीभूतार्थ एव ग्राह्यः, न निगमादिभिः परिकल्पनीय इति । अत्र वार्तिककाराः भाषाशास्त्रदृष्ट्या कांश्चन शब्दानुदाहृत्य विवेचयन्ति—

निगमनिरुक्तव्याकरणादिषु प्रकृतिप्रत्ययकल्पनाद्वारा शब्दानामर्थनिर्णायकेषु आर्यविर-चितेषु सत्सु पिकादिशब्दानां म्लेच्छप्रसिद्धार्थो न ग्राह्यः । म्लेच्छा यस्मिन् कस्मिन्नप्यर्थे यं कमपि शब्दं प्रयुज्य व्यवहरेयुः, न ते धर्मभीरवः, आर्यास्तु न तथा ।

धर्मे चानादरस्तेषां भ्रश्येतार्थोऽपि शब्दवत् ।
न चास्ति संस्कृतश्शब्दः कश्चिन्म्लेच्छाभिभाषणे ॥
संस्कृतप्रतिरूपा हि तद्भाषार्थान्तरे स्थिता ।
न चावाचकरूपाणां वाचकत्वं कथञ्चन ॥
आर्याश्च म्लेच्छभाषाभ्यः कल्पयन्तः स्वकं पदम् ।
पदान्तराक्षरोपेतं कल्पयन्ति कदाचन ॥
न्यूनाक्षरं कदाचिच्च प्रक्षिपन्त्यधिकाक्षरम् ॥ इति ।

अत्रोदाहरणतया भट्टपादाः कांश्चन द्राविडादिभाषागतान् शब्दान् गृह्णन्ति । 'चोर्–अतर् पाप्–माल्–वैर्' इति । द्राविडभाषायाम्–स्वरेषु अ आ इ ई उ ऊ ए ए२ ऐ, ओ ओ२ औ अक् ः इति, व्यञ्जनेषु प्रथमपञ्चमाः य र ल व ड ल१ र२ न२, इति वर्णास्सन्ति । द्वौ लकारौ रेफौ, नकाराश्च त्रयः, विलक्षणः तालुरसनामध्यादुच्चार्यमाणः कश्चन वर्णः डकारस्थानीय इति

तेषां वर्णमाला । तत्र 'चोर्' इति व्यञ्जनान्तं पदमोदनवाचि तेषां भाषायाम् । एवं 'पाप्' इति पदं सर्पवाचि । 'वैर्' इति पदमुदरवाचि । 'माल्' इति पदं वस्तुवाचि भाषान्तरे । 'अतर्' इति पदं मार्गवाचि भाषान्तर इति स्थितिः । तत्र संस्कृते क्रमेण चोरः, पापी, वैरी, माला, अतरः इति शब्दास्तेभ्यो निष्पन्नाः । अर्थाद् द्राविडादिभाषात इमे संस्कृतशब्दाः कल्पिता इति ।' एवमभिधायान्ते 'तद्यदा द्रविडादिभाषायामीदृशी स्वच्छन्दकल्पना तदा पारसी–बर्बर–यवन–रोमकादिभाषासु किं विकल्प्य किं प्रतिपत्स्यन्त इति न विद्मः इत्युक्त्वा पूर्वपक्षमुपसंहरन्ति—

तस्मान्म्लेच्छप्रसिद्धं यत्पदमार्यैर्विकल्प्यते ।
न कश्चित्तत्र विश्वासो युक्तः पदपदार्थयोः ॥
निरुक्तव्याक्रिया द्वारा यस्त्वर्थः परिगण्यते ।
पिकनेमादिशब्दानां स एवार्थो भविष्यति ॥

इति प्राप्तमिति

'एवं प्राप्ते वदामोऽत्र पदं निपुणदृष्टिभिः ।
विज्ञायेताविनष्टं यत्तत्तदर्थं भविष्यति' ॥

इत्यादिना सिद्धान्तितवन्तः । पिकादिशब्दानां म्लेच्छप्रसिद्धार्थ एव ग्राह्य इति । अनेन सन्दर्भेणेदं निर्गलितं भवति यद्—भाषाविषयिणी चर्चा जैमिनिपाणिनिप्रभृतीनां महर्षीणां कालत एवारभ्य प्रचलितेति । शैलीमिमामनुसरन्त आधुनिकाः केचनेदं कथयितुमारब्धवन्तः यत्—संस्कृतभाषा संस्कृता सती भाषान्तरेभ्यस्समुत्पन्नेति । अत्रैवं शास्त्रदृष्ट्या किञ्चिद्विमृशामः—कस्यापि कोऽपि संस्कारः 'भूतभाव्युपयोगि हि द्रव्यं संस्कारमर्हति' इति न्यायेन भूतोपयुक्ते भाव्युपयोक्ष्यमाणे वा द्रव्ये प्रवर्तते । शब्दमयी च भाषा भवति । शब्दश्च ध्वन्यात्मको वर्णात्मकश्चेति द्विविधः । ध्वनीनां संस्कारे ध्वनयोऽपि साधवो भवेयुः । तदा 'गोशब्द एव साधुः, न गाव्यादिः' इति व्यवस्था न सिध्येत् । शब्दविषये भाष्यकारः श्रीशबरस्वामी 'अथ गौरित्यत्र कश्शब्दः' इति पृच्छन् 'गकारौकारविसर्जनीया इति भगवानुपवर्षः' इति पूर्वाचार्यप्रमाणप्रदर्शनपूर्वकं वर्णा एव शब्दा इति स्वीकरोति । तत्र वर्णानां संस्कार इत्यभ्युपगम्यमाने 'गावी' 'गोणी' इत्यादीनामपि वर्णात्मकत्वेन तद्गतवर्णेषु संस्कृतेषु तेऽपि शब्दास्साधवो भवेयुः । मीमांसकास्संस्कारं चतुर्विधं विभजन्ते उत्पत्तिः, आप्तिः, विकृतिः, अपूर्वसाधनसामर्थ्याधान इति । तत्र शब्दत्ववर्णत्वव्यक्तीनां संस्कारे सर्वत्रातिप्रसङ्गः, असाधुष्वपि शब्दत्वादीनां सत्त्वात् । यदि शब्दत्वं संस्क्रियते तर्हि ध्वनीनामपि शब्दत्वात्तेऽपि संस्कृतास्साधवस्स्युः । वर्णव्यक्तीनामपि संस्कारो दुष्करः, वर्णसमूहत्वात्पदानाम् । ये शब्दसंस्कारमभ्युपयन्ति ते वर्णान् प्रध्वंसिन आहुः, संस्कारकाले संस्कार्या एवन सन्ति, प्रध्वंसि-

त्वात्तेषाम् । यदि कथमपि वर्णास्संस्क्रियेरन्, तर्हि संस्कृतान् तान् केऽपि न पश्यन्ति । यथा हि 'सक्तून् जुहोति' इत्यत्र होमस्य संस्कारकत्वे स्वीक्रियमाणे हुतानां सक्तूनां भस्मीभूतत्वेन ते दृष्टिपथं न गच्छन्ति सक्तवः, तथैव वर्णा अपि । संस्कृतानाञ्च क्वचन विनियोग आवश्यकः, संस्कारानन्तरमेव तेषु नष्टेषु विनियोगः क्व भवेत्तेषाम् । एवञ्चोत्पत्तिलक्षणस्संस्कारो वर्णानां तदात्मकशब्दानां वा न भवितुमर्हतीति सिद्धे, विकृतिसंस्कारोऽपि निरस्तः, नित्यत्वाद्वर्णानाम् । आप्तिसंस्कारोऽपि दूरभ्रष्टः, नित्यत्वात्सर्वगतत्वाच्च । अपूर्वसाधनसामर्थ्याधानरूपस्संस्कारोऽपि नोचितः, 'व्रीहीन् प्रोक्षति' इतिवद्विधेः कस्यचनावश्यकत्वात् । एवञ्च वर्णास्तदात्मकशब्दाश्च नित्यास्सर्वगताश्चेति मीमांसकसरणिः । अस्यां सरणौ सञ्चरन्तस्ते शब्दतत्त्वं विमृशन्ति । अत्र महर्षेः सूत्रकारस्य जैमिनेः 'शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम्' इति (१.३.२५.) सूत्रम् । अस्यायं साधारणोऽर्थः—शब्देऽसाधुत्वेनाभिमते अपराधस्य अयथोच्चारणस्य भागित्वम्—भागो भजनं प्रवृत्तिजनकतासम्बन्धेन तद्वान् भागी, तस्य भावस्तत्त्वमिति विग्रहे प्रवर्तकत्वमित्यर्थः पर्यवस्यति । असाधुशब्दोच्चारणमपराधजन्यमिति तात्पर्यम् । तत्र हेतुः—'प्रयत्ननिष्पत्तेः' इति । प्रयत्नविशेषेण शब्दस्वरूपस्याभिव्यक्तिर्भवति । प्रयत्ने यदि न्यूनता शैथिल्यं वा तत्रापराधो जायते । अत्रायं विशेषः—साधवोऽसाधवश्चेति शब्दा द्विविधाः साधुत्वञ्चानादित्वे सत्यर्थप्रत्यायकत्वम् । अर्थप्रत्यायनमसाधवोऽपि शब्दाः कुर्युः, किन्तु तेषां नानादित्वम् । कथमिदं ज्ञायताम्—साधवोऽनादयः, असाधवश्च तद्विपरीता इति । अपराधभागित्वं प्रति यो हेतुरुक्तस्सूत्रकारेण, स चासाधुशब्देष्वित्युच्यते, किन्तु साधवोऽपि विना प्रयत्नेन न निष्पद्यन्ते, तत्रापि प्रयत्नानां सत्त्वात् । साधव एवानादय इति कुतः ? इति प्रश्ने जाते तत्र भट्टपादा अकारप्रश्लेषेण सूत्रं व्याचख्युः—शब्देऽप्रयत्ननिष्पत्तेः इति । यद्यपि तत्रापि प्रयत्नास्सन्त्येव, किन्तु करणानामपाटवेन, यथाकथञ्चिदर्थावबोधेच्छयोच्चारणेन वा शब्दा यैः प्रयुज्यन्ते तत्रापराधभागित्वं न विहितप्रयत्ननिष्पन्नमिति न दोषः । अर्थाद्येऽस्खलितप्रयत्नाः शब्दान् प्रयुञ्जते तत्र शब्देषु परम्परागतत्वम्, ये च स्खलितप्रयत्नाश्शब्दानुच्चारयन्ति तत्र शब्देष्वपराधजनितरूपान्तरत्वमिति तात्पर्यम् । तदिदमुक्तम्—

अतश्चानपराधेन व्यज्यमानेषु साधुता ।
सापराधेष्वसाधुत्वं व्यवस्थैवञ्च तत्कृता ॥ इति ।

अतश्च अनादित्वे सत्यस्खलप्रयत्नोच्चरितत्वे च सति वाचकत्वं साधुत्वम् तद्विपरीतमसाधुत्वमिति साधुत्वासाधुत्वयोस्स्वरूपं सिध्यति । अथवा —'सत्यं वदेत्', 'नानृतं वदेत्' इति विधिनिषेधाभ्यां सत्यत्वासत्यत्त्वमेव साधुत्वासाधुत्वयोस्स्वरूपं भवितुमर्हति, सत्यत्वं यथा अर्थे तथा शब्देऽपि । यथार्थानृतं वर्ज्यम्, तथा शब्दानृतमपि । यथा भक्ष्याभक्ष्यविधिनिषेधयोर्व्यवस्था, तथा शब्दप्रयोगेऽपि । भाषाशास्त्रज्ञ विधिनिषेधानुसारि, भाषाविज्ञानन्त्वाधुनिकैर्य-

त्प्रवर्त्यते, तत्र न कोऽपि विधिः न वा निषेधः। मर्यादां पालयितुं विधिनिषेधयोर्भवत्यावश्यकता। इतस्ततश्शब्दानां संग्रहात्मके कार्ये मर्यादाया अभावान्न विधिनिषेधौ, विद्यमानस्य रक्षणाय भाषाशास्त्रम्, अविद्यमानानां योजनाय भाषाविज्ञानम्,। षड्भावविकाराणां भाषाशास्त्रे न प्रवृत्तिः, भाषाविज्ञाने च तेषां प्रवृत्तिः।

अस्माकं प्राक्तना भाषाशास्त्रिणः पाणिन्यादयश्शब्दान् पूर्वमेव, व्यवस्थितान् स्मारयन्तश्शिक्षाग्रन्थानपि प्रवर्तयाम्बभूवुः। चतुर्दशसु विद्यास्थानेषु शिक्षापि परिगण्यते। तत्र तैत्तरीयोपनिषदि—'शीक्षां व्याख्यास्यामः, वर्णः स्वरः मात्रा बलम्, साम सन्तानः इत्युक्तश्शीक्षाध्यायः' (तै० उ० ७, २) इति श्रुतिवाक्यमवलम्ब्य शिक्षाग्रन्थाः प्रवृत्ताः। 'शिक्ष' विद्योपादाने इति धातोश्शिक्षाशब्दः शिक्ष्यन्ते वेदनीयत्वेनोपदिश्यन्ते स्वरादयो यत्र सा शिक्षा। शिक्षैव शिक्षा। तत्र षट् पदार्था निरूप्यन्ते—अकारादयो वर्णाः, उदात्तानुदात्तस्वरित-प्रचयास्स्वराः, ह्रस्वदीर्घप्लुता मात्राः, स्पृष्टेषत्पृष्टादिप्रयत्नो बलम्, अतिद्रुतत्वमतिविलम्बि-तत्वं परिहृत्य यथोपदेशमुच्चारणं साम, पूर्वस्य पदस्योत्तरेण सन्धानं सन्तानः संहितेत्यर्थः। एवं प्रकारेण शिक्षारूपोऽध्यायोऽध्येतव्यः-गुरुमुखोच्चारणानूच्चारणविधया प्राप्तव्य इति श्रुतेरर्थः। अध्ययनस्य पठनस्य च भेदः पूर्वं प्रदर्शितः। अध्ययनन्तु स्वाध्यायस्य स्वकुलपरम्परा-गतशाखायाः, न तु वेदस्य। वेदस्तु व्यापकः पदार्थः। तत्र भवन्ति बह्व्यश्शाखाः। तास्वेका या स्वपरम्परागता सा प्राप्तव्या। स्वशाखायामधीतायां वेदोऽधीत इति व्यवहारो नानुपपन्नः, वेदस्य व्यापकत्वात्। अतएव प्रतिशाखं पूर्वजाः शिक्षाग्रन्थान् प्रवर्तयाम्बभूवुः। तत्र—

'प्रथमा व्यासशिक्षा च लक्ष्मीशिक्षा द्वितीयिका।
भारद्वाजी तृतीया च शिक्षारण्या तुरीयिका॥
पञ्चमी शम्भुशिक्षा च षष्ठी चापिशली तथा।
सप्तमी पाणिनिशिक्षा चाष्टमी कौहली तथा॥
वासिष्ठी नवमी चैवं नव शिक्षाः प्रकीर्तिताः।
यो जानाति भरद्वाजशिक्षामर्थसमन्विताम्॥
स ब्रह्मस्थानमाप्नोति गृहमेधी गृहं यथा'॥ इति।

एकं रामायणं भारतं वावलोक्य संख्यातीताः कविशिरोमणयः काव्यानि नाटकानि च यथा प्रणीतवन्तः, तथैवैकामेव वेदशाखामवलम्ब्य महर्षयश्शिक्षा न लिखितवन्तस्स्युः। यद्येक-शाखागता अनेकाः शिक्षा भवेयुस्तर्हि, तत्रान्यैः परित्यक्तानां विषयाणां निरूपणं स्यात्। काव्य-नाटकानां विरचने यशोऽर्थप्रभृतीनि फलानि प्रयोजकानि, न तानि शिक्षाग्रन्थानां प्रवर्तकानि भवेयुः। अधीतानां छन्दसां संरक्षण एव तेषां दृष्टिः ... सन्तुरविच्छिन्नः

प्रचलति स्म तावदेतेषां ग्रन्थरचनक्रियायां प्रवृत्तिरेव नाभवद्धिति सुनिश्चितं वक्तुं शक्यते। यदा हि ते वेदाध्ययनाध्यापनतन्तोः किञ्चिदिव विच्छेदमन्वभवन् तदैव ते जागरूका अभवन्। यथेदानीमस्मदपत्यानि वर्णमालादिक्रमेणोपदिशामः, पाठयामश्च, तथैव ते स्वस्वशाखागतवर्णमालात आरभ्य शिक्षयितुं समारब्धवन्तः। शिक्षणमपि वाचोविवेयरूपमेव, लेखनसाधनानामभावकालत्त्वः। विषयाणां विवेचनञ्च गोष्ठीरूपेणैव ते चक्रुरित्यत्र सन्ति सुलभानि प्रमाणानि। अनेन स्मृतिशक्तिः तेषां महीयस्यासीत्। शब्दतोऽर्थतश्च तेषां ज्ञानं स्मृत्यारूढमेवासीत्। अध्ययनक्रम एव तादृशः, येन स्मृतिशक्तेर्विवृद्धिरभवत्। छात्रस्य ब्रह्मचर्यपालनम्, अध्यायानध्यायादिपर्यालोचनम्, अध्ययननियमानामनुसरणे बद्धादरता इत्यादिष्वाचार्यः जागरूकोऽभवत्। अध्ययनावसरे छात्राणामुपवेशनप्रभृत्युत्त्थानपर्यन्तं सन्ति बहवो नियमाः। यथायथं नित्यनैमित्तिककर्माचरणम् उपनयनावसरे आचार्येणोपदिष्टस्य सावित्रमन्त्रस्य यथानियमं जप इत्यादिकं स्मृतिशक्त्युपष्टम्भकम्। अयं शिक्षाग्रन्थसमूह इदमवद्योतयति, यत्तादानीन्तने काले शिक्षाक्रमः कीदृश आसीदिति।

महामहोपाध्याय-कोलाचलमल्लिनाथसूरिः

डॉ प्रभुनाथद्विवेदी

अपारे संस्कृतकाव्यसागरे पथभ्रष्टविमूढानां पोतानां कृते दीपस्तम्भमिव स्वटीकाप्रकाशं दिशि दिशि विकिरन्तं टीकाकारशिरोमणिं कोलाचलमल्लिनाथसूरिं को न जानाति नाम्ना ? किन्तु स्वनामधन्योऽयं टीकाकारः कदाऽभूत्, स्वजन्मग्रहणेनानेन किं कुलं पवित्रतां नीतं, निवासेन को देशोऽलङ्कृतः, काऽस्य वंशपरम्परा, कियत्सङ्ख्याकाश्चास्य कृतयः इत्यादि-विषये विमर्शावसरे प्रायः प्रज्ञा अप्यनवधाना एव । मल्लिनाथ-मल्लिनाथेति सर्वे आकर्णयन्ति तथापि न कोऽपि परिचयं प्रगाढतां नयत्यनेन सह । वस्तुतस्त्वयं टीकाकारो नातिप्राचीनः किन्तु पूर्वपरम्परामनुसृत्यानेनापि स्वविषये न लिखितम् । नातिविस्तृतेऽस्मिन् लेखे टीकाकर्तुर्मल्लिनाथसूरेः परिचय उपलब्धसाधनैर्निरूप्यते ।[1]

कियन्तो मल्लिनाथाः ?

प्राचीनैः प्रायः द्वादशाधिका मल्लिनाथनामानो विद्वांसः कवयश्चोल्लिखिताः सन्ति । तेषामयं संक्षिप्तोल्लेखः—

१. अस्माकं टीकाकर्तुः कोलाचलमल्लिनाथसूरेः पितामहो मल्लिनाथः ।

२. काव्यप्रकाशस्य बालचित्तानुरञ्जनीटीकाकर्तुर्नरहरेः (सरस्वतीतीर्थस्य) पिता मल्लिनाथः ।

३. नृसिंहसूरितनयोऽमरपदपारिजातस्य (अमरकोषस्य टीकायाः) कर्ता मल्लिनाथः ।


४. भट्टजगन्नाथात्मजः, काव्यादर्शस्य वैमल्यविधायिनीटीकाकारो भट्टमल्लिनाथः ।

५. 'प्राकृतव्याकरणवृत्ति' ग्रन्थकर्तुरादित्यवर्मसुतत्रिविक्रमस्य पुत्रो मल्लिनाथः ।

६. 'वैद्यकल्पतरुः' 'पथ्यापथ्यनिरूपणम्' ग्रन्थयोः कर्ता भिषग्वरो मल्लिनाथः ।

---

१. 'कालिदास की कृतियों पर मल्लिनाथ की टीकाओं का विमर्श' इतिनाम्नास्मत्कृतशोध-प्रबन्धान्तर्गतद्वितीयाध्यायस्य सारांश एवात्र प्रस्तूयते ।



७. तर्कभाषायाः टीकाकारो मल्लिनाथः ।

८. नलोदयस्य टीकाकारो मल्लिनाथः ।

९. 'नक्षत्रपात' इत्यस्य ग्रन्थस्य लेखको ज्योतिर्विन्मल्लिनाथः ।

१०. मेघदूतस्य पञ्जरिकाटीकाकर्तुः पिता मल्लिनाथः ।

११. भोजप्रबन्धे उल्लिखिताः त्रिसंख्यकाः मल्लिनाथनामानः कवयः ।

१२. जैनतीर्थङ्करो मल्लिनाथः ।

१३. विजयनगरसम्राजो बुक्कमहाराजस्य सेनानायको मल्लिनाथवोदेयः ।

१४. सेंगेनीराजो राजनारायणमल्लिनाथः ।

नामसाम्यात् बहुधा भ्रमो जायते, प्रमाणैरिदानीं निश्चितमेव यदस्माकं टीकाकारशिरोमणिः कोलाचलमल्लिनाथसूरिः कोऽप्यन्य एव, न स वर्तते उपर्युल्लिखितायां मल्लिनाथनामावल्याम् ।

कोलाचलमल्लिनाथसूरेः वंशपरम्परा

विद्यानाथप्रतापरुद्रयशोभूषणं स्वकीयरत्नापणटीकया विभूषयति कुमारस्वामी। स आत्मानं मल्लिनाथस्य पुत्र इति कथयति। रत्नापणटीकायाः प्रारम्भिकैः श्लोकैर्ज्ञायते यत् मल्लिनाथस्य द्वौ पुत्रावास्ताम् । ज्येष्ठः पेद्दयार्यः कनिष्ठः कुमारस्वामी च। पेद्दयार्योऽपि स्वपितेव सम्पूर्णशास्त्रवित् सर्वविद्यासु प्रबन्धकर्ता चासीत् । स्वाग्रजशिष्यभूतः कुमारस्वामी प्रतापरुद्रयशोभूषणस्य रहस्यभेदनीटीकां रत्नापणनाम्नीमरीरचत् ।[1] कोलाचलवंशे परवर्ती कोऽप्येको नारायणो नाम भोजराजकृतचम्पूरामायणस्य 'पदयोजना'टीकाकारः स्वटीकादौ श्लोकेषु विस्तरेण निजवंश-

---

१. त्रिस्कन्धशास्त्रजलधिं चुलुकीकुरुते स्म यः।
तस्य श्रीमल्लिनाथस्य तनयोऽजनि तादृशः ॥
कोलाचलपेद्दयार्यः प्रमाणपदवाक्यपारदृश्वा यः।
व्याख्यातनिखिलशास्त्रः प्रबन्धकर्ता च सर्वविद्यासु ॥
तस्यानुजन्मा तदनुग्रहात्तविद्योऽनवद्यो विनयावनम्रः।
स्वामी विपश्चिद्वितनोति टीकां प्रतापरुद्रीयरहस्यभेत्रीम् ॥

Prataparudriya–Edited by Dr. V. Raghavan, 1970, P. 1.

परिचयं ददाति ।[1] नारायणेन वर्णिता वंशपरम्परा एवमस्ति—

मल्लिनाथः
|
कपर्दी
|
मल्लिनाथः — पेद्दुभट्टः
|
कुमारस्वामी
|
महादेवः
|
शम्भुः
|
भास्करः
|
नागेश्वरः
|
कौण्डुभट्टः
|
नागेश्वरः (भार्या-नरसक्का)
|
नारायणः (पदयोजनाकर्ता)

नारायणस्येदं विवरणं स्पष्टतया कुमारस्वामिनः विवरणाद् विरुध्यते । नारायणानुसारं

१. 'कोलाचलमान्वयाब्धीन्दुर्मल्लिनाथमहायशाः ।
शतावधानविख्यातः वीररुद्राभिवर्षितः ॥
मल्लिनाथात्मजः श्रीमन्कपर्दी मन्त्रकोविदः ।
अखिल श्रौतकल्पस्य कारिकावृत्तिमातनोत् ॥
कपर्दितनयो धीमान् मल्लिनाथोऽग्रजः स्मृतः ।
द्वितीयरतनयो धीमान् पेद्दुभट्टो महोदयः ॥
महोपाध्याय आख्यातः सर्वदेशेषु सर्वतः ।
मातुलेयक्रतौ दिव्ये सर्वज्ञेनाभिवर्षितः ॥
गणाधिपप्रसादेन प्रोचे मन्त्रगणान् बहून् ।
नैषधज्योतिषादीनां व्याख्याताभूज्जगद्गुरुः ॥
पेद्दुभट्टसुतः श्रीमान् कुमारस्वामिसंज्ञिकः ।
प्रतापरुद्रीयाख्यान-व्याख्याता विद्वदग्रिमः ॥ इत्यादि,

तथा—
नरसक्काख्यवध्वाश्च श्रीनागेश्वरयज्वनः ।
नारायणेन पुत्रेण कोलाचलमान्वयेन्दुना ॥
चम्पूरामायणाख्यस्य प्रबन्धस्याघहारिणा ।
विवृतिः क्रियते प्रेम्णा यथामति समासतः ॥'

कुमारस्वामी मल्लिनाथानुजस्य पेद्दुभट्टस्य पुत्रोऽस्ति किन्तु कुमारस्वामी आत्मानं मल्लिनाथस्य कनिष्ठपुत्रं पेद्दयार्यञ्च स्वाग्रजं लिखति। पूर्वदर्शिते वंशानुक्रमे कुमारस्वामी तृतीये नारायणश्च एकादशे स्थाने तिष्ठति। एवं नारायणापेक्षया कुमारस्वामी मल्लिनाथसांमीप्यमधिकतरं भजते। अतएव कुमारस्वामिनिर्दिष्टतथ्यमेव प्रामाणिकम्।

नृसिंहविरचितस्वरमनोज्ञमञ्जर्याः परिमलटीकायां गिरिनाथः कोलाचलमल्लिनाथसूरिं स्वपितरं स्वीकरोति। एतदधिकृत्य कोलाचलमल्लिनाथसूरेः प्रामाणिकी वंशपरम्परा इयमस्ति[1]—

मल्लिनाथः
|
कपर्दी
|
मल्लिनाथः (महान् टीकाकारः)

पेद्दयार्यः (पेद्दुभट्टः पेद्दिभट्टो वा)	कुमारस्वामी	गिरिनाथः
	महादेव इत्यादयः।	

परन्तु डॉ० वी० राघवन्महाशया गिरिनाथ-पेद्दिभट्टयोरभेदमेव मन्यन्ते।[2] प्रो० के० बी० पाठकमहोदयैः पेद्दभट्टो मल्लिनाथस्य ज्येष्ठपुत्र एव स्वीकृतः।[3] अतएव विनिश्चितमिदं यन्मल्लिनाथस्य द्वौ पुत्रौ अवश्यमेव स्वीकर्त्तव्यौ ययोरन्यतरस्य कुमारस्वामिनः परिचयस्तु निर्विवाद एव।

दक्षिणभारते प्रसिद्धमहाकाव्यानां टीकाकर्तृरूपेण पेद्दिभट्टस्य नामपरम्परा अतिप्राचीना। 'कृष्णकर्णामृतम्' काव्यस्य टीकाकारः पपयल्लयसूरिः (Papayallayasuri) स्वटीकायां एकस्मिन् श्लोके पेद्दिभट्टसदृशं यशः नेच्छितवानपि तु कृष्णस्मरणमेव सदैव।[4]

---

१. Dr. P. Sri Ramamurti : Contribution of Andhra to Sanskrit Literature, 1972. p. 110.

२. Dr. V. Raghavan : New Indian Antiquary. Vol. II. p. 448, f. n. 1.

३. K. P. Trivedi : Ekavali of Vidyadhar, Bombay 1903. Introduction.

४. 'पेद्दिदभट्टादिभिः प्राप्ययशसे प्रार्थना न मे।
किन्तु कृष्णस्मृतिर्नित्यं भवत्विति मतिर्मम॥'
—Contribution of Andhra to Sanskrit Literature, p. 112.

एतेन तथ्यमिदं पुष्टं भवति ।

कन्नडभाषायां 'पेद्दुभट्टचरितम्' इत्येको ग्रन्थोऽप्युपलभ्यते । अस्मिन्नेका पेद्दुभट्टविषयिणी मनोरञ्जनी वार्ता वर्तते । एतदनुसारं मल्लिनाथ एव पेद्दुभट्ट इति कथ्यते स्म । कन्नड-तेलुगूभाषयोः 'पेद्द' इत्यस्यार्थो मूर्खो मृत्पिण्डो वा भवति । पेद्दुभट्टो युवावस्थापर्यन्तं निरक्षर एवासीत् । प्रौढे वयसि अनेनाध्ययनं कृतम् । सम्यगधीत्याऽयं भट्टेत्युपाधिनालङ्कृतः । अद्यापि कर्नाटकप्रदेशे सोऽनेनैव नाम्ना परिज्ञायते ।

एवं कथ्यते यद् बाल्यावस्थायामेनं शिक्षयितुं सर्वारम्भा निष्फलाः जाता । तदनन्तर-मस्य विवाहोऽभूत् । पितुः मन्त्रणया मल्लिनाथः स्वश्वसुरालय एव निवासं स्वीचकार । यदैनं कोऽपि किमपि पृच्छति स्म, एष मौनमेव समालम्बते स्म । तदाऽस्य हस्ते कोऽप्य-लिखितो ग्रन्थो पठितुं दीयते स्म । अनेनापमानेन क्षुब्धा सती तस्य भार्या अध्ययनाय भृशं प्रेरयामास । मल्लिनाथः काशीं प्रति प्रस्थितः । तं निरक्षरं विलोक्य शिक्षकः नगरदुर्गद्वार-देशे भूमौ 'ॐ नमः शिवाय' इति विलिख्य मल्लिनाथेन पाठं कारयति स्म येन पान्थैः स तिरस्कृतः । पुनश्चोपाध्यायः मल्लिनाथाय भोजने निम्बतैलमिश्रितं सूपं दातुं स्वभार्या समादिदेश । विवशो मल्लिनाथः वर्णज्ञानं स्वयमेव सहपाठिनां साहाय्येन लब्धवान् । यदा लिखितरूपेण स्वभोजनास्वादस्य तिक्ततविषये तेन गुरुपत्नी सूचिता तदा शिष्यस्य प्रगतिं विलोक्य प्रीत उपाध्यायः तं समस्तं संस्कृतवाङ्मयं शिक्षितवान् । नातिदीर्घसमये सर्व-विद्यानिष्णातो भूत्वा मल्लिनाथः यदा स्वश्वसुरालयं प्रतिनिवृत्तस्तदा निजश्यालकेन पृष्टानां प्रश्नानां गूढानामपि वैदुष्यपूर्णमुत्तरं दत्त्वा सर्वानाश्चर्यचकितानकरोत् । एषा किंवदन्ती अद्यापि प्रचलति ।

नैषधटीकायाः कस्याञ्चित् प्राचीनायां मातृकायां पेद्दुभट्टस्य नामोल्लेखेन के० पी० त्रिवेदिमहाशयाः पेद्दुभट्ट एव मल्लिनाथ इति मन्यन्ते । आउफ्रेक्ट (Aufrecht) महोदया अपि एवमेव मन्यन्ते । एतादृग्विवादास्पदस्थितौ वयं कुमारस्वामिन एव मतं स्वीकुर्मः । अतएव टीकाकर्तुः कोलाचलमल्लिनाथसूरेः पितामहो मल्लिनाथः, पिता कपर्दी, तनयौ पेद्दयार्यकुमारस्वामिनौ चासन् ।

मल्लिनाथस्य नाम्ना सह 'सूरि' इति पदं दृष्ट्वेयं शङ्का समुत्पद्यते—किं स जैनमताव-लम्बी इति । प्रायः जैनमतावलम्बिनां विदुषामुपाधिः सूरि इति दृश्यते । किन्तु मल्लिनाथ-कृतटीकादौ मङ्गलाचरणश्लोकान् दृष्ट्वा सा शङ्का निर्मूलैव प्रतीयते । अतएव मल्लिनाथो जैनो नासीत् । 'सूरि' इति शब्दस्यार्थो विद्वानपि भवतीति कोषेषु प्रयोगे चोपलभ्यते । अनेन सिद्ध्यति यन्मल्लिनाथस्यायमुपाधिः तद्वैदुष्यं व्यनक्ति ।

जन्मस्थानं निवासश्च

मल्लिनाथस्य नामपूर्ववर्ति 'कोलाचल' इति पदं तस्य पारिवारिकं मूलस्थानं सूचयति। आन्ध्रपरम्परानुरूपं, स कोलाचलपरिवारस्यासीदिति ज्ञायते। पुरा परिवारोऽयं वारङ्गलराक-कोण्डाराजसभाभ्यां सम्बद्ध आसीत्। तेलङ्गानाप्रान्ते कोलाचलमपुरीत्येको ग्रामो वर्तते यस्योल्लेखो वेलुगोतिवारिवंशावलीग्रन्थेऽस्ति। अतएवायं ग्रामो मल्लिनाथवंशस्य मूलस्थानमासीदिति सम्भाव्यते। केचन वर्तमानाः 'कोलिचन' 'कोलाचन' वेत्युपाधिधारकाः मल्लिनाथं स्वकीयं पूर्वजं मन्यन्ते। आन्ध्रप्रदेशस्य काड्प्पाजनपदे अद्यापि कोलाचलमल्लिनाथसूरेः वंशजा निवसन्ति। एवं ज्ञायते यत् कोलाचलग्रामः चतुर्दश-पञ्चदशख्रिष्टाब्दे शक्तिशालिनः कस्यापि सामन्तस्याधिकारे आसीत् यो विदुषां समादरकर्त्ता इति श्रूयते। मल्लिनाथोऽपि तस्यैवा-स्थानपण्डितोऽभूत्। किन्तु पेद्दुभट्टचरितानुसारं मल्लिनाथस्य गृहग्रामो देवपुरमासीत्।

परम्परया ज्ञायते यन्मल्लिनाथवंशस्य आश्रयदाता सदैव कोऽपि राजवंशोऽभूत्। मल्लिनाथस्य पितामहोऽपि मल्लिनाथनामा आसीत् यस्य महती अभ्यर्थना राज्ञा वीररुद्रेण कृता। टीकाकर्तुरस्माकं कोलाचलमल्लिनाथस्य कनकाभिषेकः राककोण्डावेलमवंशोत्पन्नेन विदुषा राज्ञा सर्वज्ञसिंहभूपालेन (१३८६-१४१२ ई०) स्वषोडश-यज्ञावसरे कृतः। अयमेव मल्लिनाथो विजयनगरसम्राजो देवरायप्रथमस्य देवरायद्वितीयस्य च (१४१०-१४४८ ई०) सभामलङ्करोति स्म। अस्यैव मल्लिनाथस्य पुत्रः कुमारस्वामी अपि देवरायद्वितीयात्मजस्य मल्लिकार्जुनस्य (१४४६ ई०) सभापण्डित आसीत्।

अतएवैतैः प्रमाणैर्विनिश्चितमिदं यत् कोलाचलमल्लिनाथसूरिः कोलाचलग्रामे जातः स्वबाल्यावस्थामपि तत्रैव निनाय। पश्चादध्ययनं कृत्वा तस्यैव ग्रामस्य सामन्तसभायामास्थान-पण्डितो बभूव। सर्वज्ञसिंहभूपालकृतेन कनकाभिषेकेण लब्धख्यातिरयं विजयनगरसम्राजा देवरायप्रथमेन स्वराजसभायां नीतस्तत्रैव च स्वजीवनं यापयामास।

स्थितिकालः

मल्लिनाथस्यानेकासां कृतीनां अन्तःसाक्ष्यमवलम्ब्योपलब्धानाञ्च बाह्यप्रमाणानां विमर्शं कृत्वा अस्य स्थितिकालो निर्णेतुं शक्यः।

कुमारसम्भवस्य द्वितीयसर्गस्थप्रथमश्लोकस्य सञ्जीवनीटीकायां मल्लिनाथेन मुग्धबोधकारो बोपदेव उद्धृतः। वोपदेवो यादवराजस्य महादेवस्य तदुत्तराधिकारिणो रामचन्द्रस्य च समकालिकः। रामचन्द्रः १२७१-१३०९ ख्रिष्टाब्दपर्यन्तं शासनमकरोत्। अतएव मल्लिनाथस्य स्थितिरस्यावरमनन्तरमेव।

मल्लिनाथः स्वटीकासु अनेकत्र सङ्गीतरत्नाकरात् प्रमाणं ददाति। सङ्गीतरत्नाकरस्य रचना यादवराजस्य सिंहनस्य शासनकाले (११३३–११५० शक सं०) अभवत। स्पष्टतः मल्लिनाथः सिंहनस्योत्तरवर्त्ती।

मल्लिनाथेन 'एकावली' ग्रन्थः 'तरल' टीकया मण्डितः। एकावल्यां सर्वत्र वीरनसिंहदेवस्योल्लेखो विहितो यः सिंहनस्य समकालिकः। वीरनसिंहदेवस्य शासनकालः १३१४ खिष्टाब्दे समाप्तिं गतः। अतएव मल्लिनाथस्य स्थितिकालः सर्वेषामेतेषामुत्तरवर्ती। मल्लिनाथस्य स्थितिकालनिर्धारणाय सर्वप्रामाणिक आधारस्तस्यैवोपलब्धा कृतिः 'वैश्यवंशसुधार्णवः'।[1] वैश्यानां सम्बन्धे उत्पन्नं विवादं निर्णेतुं विजयनगरसम्राजा देवरायप्रथमेन मल्लिनाथः नियुक्तः। 'वैश्यवंशसुधार्णवः' तन्निर्णयरूपः। अस्य तिथिः १४१०–१४१४ ई० सम्प्राप्ता। अयमेव निश्चीयते स्थितिकालो मल्लिनाथस्य।

एवमेवानेकानि बाह्यप्रमाणानि प्राप्यन्ते। राज्ञोऽच्युतरायस्य विजयनगरशिलालेखे शालिवाहनशक सं० १४५५ तम (१५३३–३४ ई०) तिथ्यङ्किते, एकः श्लोक उत्कीर्णोऽस्ति।[2] अयं श्लोकः मल्लिनाथस्य सञ्जीवनीटीकादौ प्राप्यते।[3] अतएव मल्लिनाथो राज्ञोऽच्युतरायस्य पूर्ववर्ती अस्तीति सिद्धं भवति।

मल्लिनाथसुतोऽपि कुमारस्वामी विजयनगराधिपतेर्मल्लिकार्जुनस्य सभामलङ्करोति स्म। मल्लिकार्जुनस्य राज्याभिषेकः १४४६ खिष्टाब्देऽभूत्।[4] अतः मल्लिनाथस्थितिकालस्येयमपरसीमा।

उपरि वर्णितानि प्रमाणान्यधिकृत्य कोलाचलमल्लिनाथसूरेः स्थितिकालः प्रायेण १३५०–१४५० खिष्टाब्द एव निश्चीयते।

---

1. The Manuscript no. sp--1894 is in oriental Resear.h Institute and Msslibrary, Mysore 5- The work is complete having 1–24 folios in Andhra-character. I have gotten the manuscript transcripted in Dev nagari character during my research work for Ph. D. Now thinking about to edit the san e under kind Supervision of my respected Gurudeve Dr. Amar Nath Pandey.
2. Indian Antiquary Vol. V. P. 19-20.
३. 'अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम्।
तन्नरं वपुषि कुंजरं मुखे मन्महे किमपि तुन्दिलं महः॥'
४. श्रीप्रभातशास्त्री (सम्पादकः) रत्नावलीनाटिका, १९७३ ई०, भूमिका, पृ० ५।

कृतयः

कोलाचलमल्लिनाथसूरिः संस्कृतसाहित्ये महान् टीकाकार इति विख्यातः । तेन कृतानां टीकानां संख्या द्वादश वर्तते । ता एताः सन्ति—

ग्रन्थनाम		मल्लिनाथकृतटीकानाम
१. रघुवंशमहाकाव्यम्	कालिदासत्रयी	सञ्जीवनी
२. कुमारसम्भवमहाकाव्यम्		
३. मेघदूतम्		
४. भारविकृतं किरातार्जुनीयमहाकाव्यम्		घण्टापथः
५. माघकृतं शिशुपालवधमहाकाव्यम्		सर्वङ्कषा
६. श्रीहर्षकृतं नैषधीयचरितमहाकाव्यम्		जीवातुः
७. भट्टिकृतं भट्टिकाव्यम्		सर्वपथीना
८. विद्याधरकृता एकावली		तरला
९. तार्किकरक्षा		निष्कण्टिका
१०. तन्त्रवार्तिकम्		सिद्धाञ्जनम्
११. स्वर (मनोज्ञ) मञ्जरी		परिमलम्
१२. प्रशस्तपादभाष्यम्		?

प्राप्तप्रमाणैरासां टीकानां रचनाक्रमः एवमापद्यते—घण्टापथः, सञ्जीवनी, सर्वङ्कषा, सर्वपथीना, जीवातुः, स्वरमञ्जरीपरिमलम्, प्रशस्तपादभाष्यटीका, निष्कण्टिका, सिद्धाञ्जनम्, तरला चेति ।

अमरकोषस्य टीका अमरपदपारिजातः, तर्कभाषाटीका, काव्यादर्शटीका, लघुशब्देन्दुशेखरटीका, सारमञ्जरीटीका, नलोदयटीका इत्येता अपि मल्लिनाथकृताः । किन्तु ते सर्वे भिन्नभिन्ना मल्लिनाथाः, न तेषामैक्यं सम्भावनीयम् ।

टीकाकारो मल्लिनाथः कविरप्यासीत् । म० म० टी० गणपतिशास्त्रिवर्यैः सम्पादितं 'रघुवीरचरितं' त्रिवेन्द्रमसंस्कृतमालायाम् १९१७ खिष्टाब्दे प्रकाशितमभूत् । सप्तदशसर्गात्मकेऽस्मिन्महाकाव्ये १५९६ श्लोकाः सन्ति । अस्योपरि वाल्मीकिरामायणस्य रघुवंशमहाकाव्यस्य च प्रभावः स्पष्टमेव परिलक्ष्यते । ग्रन्थादौ स्वीयायां भूमिकायां गणपतिशास्त्रिवर्यैः लिखितमस्ति यत् कोऽपि मल्लिनाथ एव यद्यस्य रघुवीरचरितस्य कर्त्ताऽस्ति, तर्हि सोऽस्माकं विख्यातटीकाकारो मल्लिनाथ एव ।

मल्लिनाथस्य द्वितीया मौलिककृतिः 'वैश्यवंशसुधार्णवः' । विजयनगरसम्राजो देवरायप्रथमस्याज्ञया वैश्यानां विवादमधिकृत्य कृतो निर्णय एव वैश्यवंशसुधार्णवः । मातृका-

रूपे प्राप्तेऽस्मिन् ग्रन्थे वैश्यानामुत्पत्तिः, 'वैश्य' इति शब्दस्य पर्यायशब्दाः तेषां विश्लेषणं, वैश्यानां व्यापारोऽधिकारश्च व्यापकतया वेदेतिहास-पुराणस्मृतिकोशकाव्यानि विमृश्य सम्यग् निरूपिताः।

मद्रासस्थिते राजकीयप्राच्यग्रन्थालये ज्योतिषग्रन्थस्य 'नक्षत्रपातस्य' एकोऽध्यायो मातृकारूपेण तिष्ठति। अस्यापि लेखको मल्लिनाथः। उदारकाव्यम्, वैद्यकल्पतरुः, वैद्यरत्नमालेत्यादीनां ग्रन्थानां कर्तृत्वेऽपि मल्लिनाथस्य नाम। किन्तु एतेऽपि केचनान्ये मल्लिनाथाः। टीकाकर्त्रा मल्लिनाथेन सह नैतेषां कर्तृत्वं प्रामाणिकम्। तस्य तु रघुवीरचरित-वैश्यवंशसुधार्णवौ चेति द्वौ ग्रन्थाविति विनिश्चयः।

मल्लिनाथविषयिणी जनश्रुतिः

संस्कृतपण्डितानां मध्ये मल्लिनाथमधिकृत्यैका जनश्रुतिरपि प्रचलति—'भोः! मल्लिनाथीं मा कुरु' इति। अस्याः किं तात्पर्यमिति निश्चयेन किमपि वक्तुं न शक्यते। मया उज्जैनविश्वविद्यालयग्रन्थालये डॉ० शान्ताबाई पेण्ढारकरकृते शोधप्रबन्धे अस्या जनश्रुतेरुल्लेखो दृष्टः। तस्मिन् तया लिखितं यन्महाराष्ट्रप्रदेशे मल्लिनाथस्य मल्लिनाथी अतिप्रसिद्धा वर्तते। यदा कोऽपि मूलं विहाय स्वप्रज्ञया विकल्पयति, सैव मल्लिनाथी इति कथ्यते। मल्लिनाथेन एतादृशी स्वप्रवृत्तिः रघुवंशसञ्जीवन्यां (रघुवंशमहा० ६।१३-१६) प्रदर्शिता। इयमेव मल्लिनाथी। नित्यव्यवहारवार्तास्वपि यदा कोऽपि कस्यचित्तथ्यस्य वर्णनमतिशयेन भावुकतया च करोति सापि तस्य मल्लिनाथी। अस्मिन् जनश्रुतिविषये मया स्वकीये शोधप्रबन्धे विशेषो विमर्शः कृतः।

अपि नाम काव्यत्वमधुनाऽपि संशीतिविषयम् ?

श्रीविश्वनाथमिश्रः

काव्यमिति पुरातनः शब्दः। परिभाषितश्च बहुभिराचार्यैः। तत्र केचन शब्दनिष्ठं तदिति चेदपरे शब्दार्थोभयपर्याप्तं तदिति प्रतिपेदिरे। विसंवादः केवलं व्यासज्यवृत्तित्वे प्रत्येकं पर्याप्तत्वे वा न तु तस्य शब्दनिष्ठत्वं निराकृतं केनापि। उभयवृत्तित्वेऽपि तस्यान्यतरवृत्तित्वं सुतरामेव।

कवेः कर्म काव्यमिति व्युत्पत्तिस्तस्य। कविश्च शब्दमेव करोति न तु अर्थमपि। "अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः" इत्याकारकवाक्यविन्यासे स्वयं प्रभवः कवयो न तु हिमालयस्योत्तरदिश्यवस्थापने क्षमत्वं तेषाम्। अपरे तु—कविवृत्त्युच्चारणकर्मतायाः शब्द इव कविसमवेतरसबोधौपयिकसामग्रीसंघटनविषयकज्ञानकर्मताया अर्थे च सत्वादुभयोः काव्यत्वमव्याहतम्।

इह पुरोऽनिलकम्पितविग्रहा, मिलति का न वनस्पतिना लता।
स्मरसि किं सखि ! कान्तरतोत्सवं, न हि घनागमरीतिरुदाहृता॥

इति पद्ये श्रुतिपथमुपगते तद्घटकपदनिष्ठशक्तिग्रहवतोऽतस्तदर्थविषयकबोधवतः सहृदयस्य यः खलु जायतेऽलौकिकश्चमत्कारस्तत्र शब्दार्थयोर्नान्तरीयकत्वमपाकर्त्तुमशक्यम्।

इदमिदानीमानीयते विचारपदवीं यत् काव्यत्वे नाभिमतः कः खलु शब्दः ? तत्रायं खलु संशयातीतोऽर्थो यत् रघुवंशमेघदूतादौ या लिपिरुट्टंकिता तामेव शब्दमभिप्रेत्य प्रचलतीयं धारणा लोके यच्छब्दः काव्यमिति। तथ्यमप्येतत्-व्यवहारजगति लिपेरेव साम्राज्यं सर्वत्रोज्जृम्भते। यच्च व्याकरणशास्त्रं शब्दसाधुत्वनिकषोपलं तदपि लिपिमाधृत्यैव प्रचालयति स्वकीयं निखिलं व्यवहारम्। "इकः स्थाने यण् स्यादचि" इत्यर्थकम् "इको यणचि" इति सूत्रं लिपिमन्तरा कुत्र प्रवर्तेत ? कथं वा दीर्घवृद्धिगुणादिकार्याणि सम्पाद्येरन् लिपिमन्तरा। प्रकृतिप्रत्ययविधानं तत्प्रकृतिकं निखिलं विकारजातं लिप्यामेव सम्पाद्यते। पिपठिषुश्छात्रः प्रथमकक्षायां ककारोऽयं गकारोऽयमिति रीत्या लिपिमाध्यमेनैव क्रमशः निखिलं वाङ्मयं पठतीति विदन्त्येव बुधाः।

दूरं तिष्ठतु विश्ववाङ्मयम्। दृश्यतां केवलं भारतीयं संस्कृतवाङ्मयमेव। लक्षाधिकपुस्तकान्यत्र लिपिबद्धानि ज्ञानसाधनानि सहस्राब्दीभ्यो दिव्यालोकं विसरन्ति। कश्चन जनो

यदा किमपि पुस्तकं पठति तदासौ लिपिमेव पठति । पाठनसमये तस्य कण्ठताल्वाद्यभिजन्यो यो हि ध्वनिः स वैखरीशब्दवाच्यः । इयं वैखरी तृतीयक्षणवृत्तिध्वंसप्रतियोगिनी । अतोऽनित्येयम् । अनित्यानाञ्च सहभावोऽसम्भवः । सहभावाभावे च पदानां वाक्यानाञ्चावस्थानं यत्नसहस्रेणाप्यशक्यम् । न च संस्कारवशादव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णवत्वं तदुत्तरवर्णे प्रकल्प्य पदप्रत्यक्षं वाक्यप्रत्यक्षं वोपपादनीयमिति वाच्यम् ? नष्टविद्यमानयोः पौर्वापर्यस्य वक्तुमशक्यत्वात् । अत्र हि एको विनष्टो द्वितीयश्चोत्पन्न इति स्पष्टमेव नष्टविद्यमानता ।

स्यान्नामैवं कथञ्चित् पदप्रत्यक्षोपपादनं किन्तु पदस्य सत्ता तु वक्तुमशक्यैव । यद्यविद्यमानेऽपि पदे शक्त्याश्रयत्वमभ्युपगम्यते तदा नष्टो घटो जलवानिति प्रयोगः कथमिव वार्यताम् । अतो वैखरी न कदापि शब्दरूपा, किन्तु मुखादुच्चारितायां वैखर्यां तद्रूपरुषितो य आन्तरः स्फोटात्मको मध्यमाया नादांशो व्यक्तः स एव शब्दः, स एव च शक्त्याश्रयः । तदुक्तं भाष्यकृता—येनोच्चारितेन सास्नालांगूलककुदखुरविषाणवतीनां सम्प्रत्ययो भवति स शब्दः । सम्प्रत्ययो बोधः । बोधश्च शक्तिज्ञानात् । शक्त्याश्रयञ्च पदम् । तच्चान्तरं स्फोटात्मकमेव नान्यदिति निर्बाधम् ।

इदमप्यत्र विज्ञेयम्—मध्यमा वाक् शब्दात्मिका न तु संविद्रूपा । हृदयदेशेऽभिव्यक्ता तत्तदर्थविशेष-तत्तच्छब्दविशेषोल्लेखिन्या बुद्ध्या विषयीकृता परश्रोत्रग्रहणायोग्या कर्णपिधाने सूक्ष्मतरवाय्वभिघातेन, उपांशुशब्दप्रयोगे च स्वयं श्रूयमाणा मध्यमा वागिति लक्षणलक्षितायाः संविदेकरूपत्वस्य कालत्रयेऽपि साधयितुमशक्यत्वात् ।

अयमत्र सारांशः—वैखरी मात्रात्मा न शब्दः । शब्दस्तु मध्यमाया नादांशः स्फोटरूपः । वैखर्यां शब्दप्रयोगो भाक्तः । तत्र हेतुः स्फोटात्मकस्य तस्य तद्द्वाराभिव्यञ्जनम् । लौकिकः शास्त्रीयश्च सर्वोऽपि व्यवहारो रेखागवयन्यायेन वैखर्यामेव । सा एव श्रुतिगोचरा । तामेव श्रुत्वा लिप्यात्मके स्वरूपविशेषे शब्दत्वव्यवहारोऽपि भाक्त एव । स्फोटव्यञ्जकवैखरीव्यञ्जकत्वेन लिपिषु शब्दत्वव्यवहारस्य सार्वजनीनत्वात् ।

एतेन—शब्दो वैखरीमात्रात्मा, मध्यमादयः संविदेकरूपा, वैखरीत्वेऽपि शब्दो काव्यम्, तस्यानुवादेषु परिवर्तनात्, मूककविप्रबन्धेषु चादर्शनात्, इत्यादि सर्वं प्रयुक्तमेव वेदितव्यम् । अनुवादेषु परिवर्तनात् वैखरी न काव्यमिति तु सर्वथा रिक्तं वचः । कल्प्यताम्—'अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः' इति काव्ये पठिते सति एतादृशवैखरीरूपरुषितेन स्फोटेन यथा भवति सम्प्रत्ययोऽर्थस्य तथैव इमं ध्वनिं परिवर्त्यांग्लभाषायां भाषान्तरे वानुवादेन आंग्लभाषाबद्धवैखरीध्वनिरूपरुषितः स्फोटोऽभिव्यक्तो गृहीततन्निष्ठशक्तिकस्य प्रत्याययति चेदर्थं कोऽत्र विसंवादः काव्यत्वस्वीकारे इति न प्रत्येमि ।

आनन्दकोषोल्लासकस्यार्थसंघातस्य जायतां नाम काव्यत्वं परं नैतावता शब्दस्य काव्यत्वं व्यपाकर्त्तुं शक्यम् ।

शब्दमन्तराऽर्थोपस्थापनमपि कथमिति समाहितिः दुःखा च दुरुपपादा च । केरलवास्तव्यस्यादृष्टहिमालयस्य तद्विषयकः काव्यजास्वादः कथमिवोपपाद्यताम् । अस्त्युत्तरस्यामित्यादि शब्दे श्रुतिमुपगते यादृशं चित्रं भवति पाठकस्यान्तस्तले, तेन च यो जायते तस्यालौकिकश्चमत्कारस्तत्र बीजं शब्दमेव पश्यामः । तत्र हिमालस्य बौद्धः प्रत्ययोऽपि शब्दायत्त एव । तदुक्तम्—

शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान् ।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ॥

यदप्युच्यते—अर्थस्यास्य ज्ञानं शब्दस्य ज्ञानादुपजायते, ततः शब्दज्ञानार्थज्ञानयोरेवान्योन्यं संकेतः, न तु शब्दस्यार्थेनार्थस्य वा शब्देनेति शक्तीनां शब्दगतत्वं भाक्तमेव पितामहगतं पौत्रजनकत्वमिव । अत्रोच्यते—घटस्य ज्ञानमित्यभिहिते सति यथा ज्ञाननिष्ठविषयितानिरूपितविषयता घटे भासते, तथैव शब्दस्य ज्ञानमिति वाक्ये ज्ञानविषयीभूतः शब्द एव । तादृशाच्छब्दाज्जायतेऽर्थसम्प्रत्ययः । यदि शब्दो ज्ञानविषयीभूतो न भवेत् तदा कथं जायेत ततोऽर्थबोधः । तस्माच्छब्दस्य श्रावणप्रत्यक्षात्मकज्ञानात् शब्दबोधस्ततः शब्दनिष्ठशक्तिज्ञानादर्थसम्प्रत्यय इत्येव विदुषां पन्थाः । न हि कदापि कस्यापि जायतेऽश्रुतादगृहीतशक्तिकाच्च शब्दादर्थबोधः । यस्य पुरुषस्य भवति संकेतग्रहोऽयं शब्दोऽस्मिन्नर्थे शक्तमिति तस्यैव भवति तदर्थविषयकोपस्थितिस्ततः शाब्दबोधश्चेति शक्तीनां शब्दगतत्वे सुतरां सिद्धे तस्य भाक्तत्वकथनं निराधारमेव । तस्मादभिधादिवृत्तीनां शब्दगतत्वं सुस्थिरमेव मन्तव्यम् । अत एव शक्त्याश्रयत्वात् शक्तं पदमिति प्रवादोऽपि संगच्छते । अत एव पितामहदृष्टान्तोऽप्यत्रापार्थतामेव भजते ।

एवमुपर्युक्तप्रक्रियया यथा साधितः शब्दादर्थप्रत्ययस्तथैव शब्दार्थयोरेवान्योन्यं संकेतो न तु तद्ज्ञानयोरिति मन्तव्यम् । कथमेवमिति चेदवधार्यतां किमपि—पदं श्रावयित्वा वक्ति वाचकः—"पदं श्रुतमथार्थं शृणु" । अत्र विचार्यतां मनाक् किमसौ घटपटादीनर्थान् श्रावयति ? किं घटपटादयोऽर्थाः श्रावणप्रत्यक्षविषया उत् चाक्षुषप्रत्यक्षविषयाः ? किन्तु वाचकप्रयुक्तशब्देनेदमेवावधार्यते यत् असौ अर्थे शब्दधर्मत्वमारोप्य कृतवाँस्तथा प्रयोगम् । एवं "रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः" इत्युक्त्या शब्दार्थयोरेवान्योन्यं संकेतः, संकेत एव तादात्म्यम्, तच्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्; अभेदस्याध्यस्तत्वाच्च न भवति मुखदाहाद्यापत्तिरग्निशब्दोच्चारणे । एतेन शब्दज्ञानार्थज्ञानयोरेव तादा-

त्स्यं, शब्दार्थयोस्तादात्म्याङ्गीकारेऽग्निशब्दोच्चारणे मुखदाहापत्तिः, गुड इत्युच्चारिते मुखमाधुर्यापत्तिरित्यादयः सर्वे विप्रलापाः समूलोन्मूलिताः।

पूर्णतामीयुषः काव्यस्य कश्चन अलंभावाभिधो धर्मोऽलङ्कारः। अयमेव काव्यस्यात्मेति अभिनवकाव्यशास्त्रकारस्य मतम्। तत्र जिज्ञास्यते—कोऽयं परात्परो धर्मोऽलंभावात्मा नामकः ? यद्यलम्भावत्वं पर्याप्तिसम्बन्धेन वृत्तित्वमित्युच्यते तदा आपादमस्तकं पर्याप्त्याऽलंकारभूषितं मृतशरीरमपि सात्मकमिति कथं न व्यवहरणीयं स्यात्। यदि कश्चनालौकिक एवालंकारस्तादृशस्तदा काव्यात्मविषये नाममात्रे विवादः। रसस्य प्रतीतिमात्रस्वरूपस्य सहृदयसामाजिकनिष्ठस्य काव्येऽवर्तनात् तस्यात्मत्वं विखण्डयते चेन्मनस्तोष एव क्रियतां केवलम्, परं सामाजिकैरनुभूयमानस्य तादृशविलक्षणास्वादनादनतिरिक्तस्य रसस्योपस्थापकमभिव्यञ्जकञ्च किमित्यपि विचारितं कदापि ? नो चेदिदमिह सम्प्रधार्यतां यत् दृश्यं श्रव्यं वा काव्यमेव दर्शनपठनद्वारा तदुपस्थापकमिति अभिव्यञ्जकतासम्बन्धेन काव्ये वर्तनात् तस्य काव्यात्मत्वं कथं निराकर्त्तुं शक्यते ? अत एव श्रूयते—

दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।
सर्वे नवा इवाभान्ति मधुमास द्रुमा इव॥

तस्माद् रसस्य काव्यात्मत्वमन्यथयितुमशक्यमेव।

अयञ्चाप्येकः पक्षः—शब्दे शक्तिरस्ति न वेति। परं शब्दे शक्तिर्नास्तीति कथनं मम मुखे जिह्वा नास्तीति कथनान्नातिरिच्यते। विश्वस्यास्य निबन्धिनी शक्तिः शब्देष्वेवाश्रिता। प्रत्यहं शब्दमूल एव जागतिको व्यवहारः। मृदुशब्दश्रवणे प्रसन्नतां, कटुशब्दश्रवणे गालीश्रवणे वा दण्डोद्यतकरतां च प्रेक्ष्य शब्दशक्तेर्निराकरणं कथमिव क्रियते इति न वेद्मि। मन्त्रादिशक्तयः सर्वविदिताः साम्प्रतमपि दृष्टफलाः कथमपाकर्त्तुं शक्यन्ते ?

यच्चापि लिख्यते—सूर्यस्य प्रकाशवत् यदि शब्दस्य देहे शक्तिः स्यात् तदा विश्वस्य भाषापि सूर्य इव एकैव भवेत्। परमिदमपि कथनमविचारितमेव। नहि सूर्य इव विश्वस्मिन् जगति एका भाषा वर्तते। असंख्यभाषाभिः क्रियन्ते व्यवहाराः संसारेऽत्र। स च व्यवहारस्तत्तद्भाषाशब्दैरेवेति संशयातीतोऽर्थः। शक्तिमन्तरा अर्थाप्रत्ययः, अर्थाप्रत्यये च व्यवहाराभावः। तस्मात् सर्वभाषाशब्देषु शक्तिरस्तीति सुतरामेव सिद्धमनुभवगोचरीक्रियमाणञ्च तथ्यम्। नेदं विस्मर्तव्यं यत् सूर्यस्यैकत्वेऽनेकत्वे वा अकिञ्चित्करो मानवः' किन्तु भाषाप्रयोगे स्वाधीनः। अत एव विश्वस्मिन् संसारे बहुविधा भाषाः श्रूयन्ते। तस्माच्छब्दशक्तिखण्डनव्यामोह आहो पुरुषिकामात्रमेवेत्यलम्।

वाद्यपरिचयः समाजे तदुपयोगश्च

श्रीमती विमलामुसलगांवकरः

प्राचीनकालादेव अनेकेषु वर्गेषु वाद्यानां विभाजनं विधाय तानि चतुर्धा विभाजितानि सन्ति ।

१. ततवाद्यानि—एषु तन्त्रीप्रयुक्तानि, आन्त्रप्रयुक्तानि, क्षौमतन्तुप्रयुक्तानि वाद्यानि भवन्ति । यानि लोकभाषायां 'सितार,' 'तानपूरा', 'इसराज,' 'सारंगी,' 'वायलिन' सदृशानि वाद्यानि अभिहितानि सन्ति ।

२. अवनद्धवाद्यानि—एषु मृन्निर्मितानि, धातुनिर्मितानि, काष्ठनिर्मितानि चर्माच्छादितानि वाद्यानि भवन्ति । एतानि वाद्यानि कराघातेन लघुकाष्ठयष्टिकाभिर्वा वादितानि सन्ति । प्रायशः समस्तस्य विश्वस्य लयवाद्यानि स्थूलदृष्टया अवनद्धवाद्येष्वेव अन्तर्गतानि भवन्ति ।

३. घनवाद्यानि—एषु विशिष्टाकाराणि धातुनिर्मितानि, काष्ठनिर्मितानि, मृदा निर्मितानि वाद्यानि भवन्ति, येषु आघातेन नूनं सांगीतिका ध्वनयो निर्मिता भवन्ति । यानि लोकभाषायां घण्टा, झांझ, घुंघरू, जलतरंग, नलतरंग, काष्ठतरंग, गोट्टुवाद्यम् इत्यादीनि वाद्यानि अभिहितानि भवन्ति ।

४. सुषिरवाद्यानि—एषु वायुप्रयुक्तानि वाद्यानि भवन्ति । यानि लोकभाषायां 'शंख, शृङ्ग, वंशी, शहनाई, नागस्वरम्, अलगोजा, क्लेरियोनेट, कोरोनेट, हारमोनियम, माउथआर्गनप्रभृतीनि वाद्यानि अभिहितानि भवन्ति ।

एतेषामेव प्रयोगः सर्वप्रथमं लयसाम्यसिद्ध्यर्थं समनुष्ठितः स्यादिति प्रतीयते । केवलं भारतीयसंगीते एव न, अपितु अन्येषु देशीयसंगीतेष्वपि लयसाम्यनिर्वाहः परोक्षाऽपरोक्षरूपेण उपरि निर्दिष्टैः सर्वैरपि वाद्यैर्भवन्नासीत् अस्ति च । केवलमवनद्धवाद्यान्येव तालवाद्यानि लयवाद्यानीति निर्धारणं भ्रान्तमेव । कियन्त्यपि ईदृशानि राष्ट्राणि सन्ति, येषु संगीतप्रदर्शनावसरे अवनद्धवाद्यानां नितान्तं गौणत्वं वर्तते, तथापि प्रायोगिकदृष्ट्या तत्र तालस्य लयस्य वा

गतेर्निवाहः शोभनतया सम्पद्यते । अस्मिन् लेखे तालस्य लयस्य वा साम्यसम्पादनार्थं प्राचीनकालात् अद्य यावत् प्रयुज्यमानानां वाद्यानां तदुत्पत्तेः, उपयोगितायाश्च विवेचनं कर्तुं प्रयासः क्रियते । सुदूरवर्तिनि प्राचीनतमे काले लयसाम्यस्य संरक्षणं करतालिकाद्वारा अभूत् यदद्यापि विद्यमानमस्ति । लयस्य सर्वप्रथमं वाद्यं 'ताली' अस्ति । क्रमेण लघुयष्टिकाभिराघातं कृत्वा लयसाम्यं प्रदर्शितं स्यात् । मोहेन्जोदडो, हडप्पादिस्थलेषु खननकाले अस्थिनिर्मिता विकृता वंशी, वीणा, चर्माच्छादितानि वाद्यान्यपि उपलब्धानि सन्ति । कांस्यनिर्मिता काऽपि नृत्यशिला, एका नारी तथा द्वयोर्नर्तकयोः खण्डितचित्राण्यपि उपलब्धानि सन्ति ।[१] अनेनैतत्सिद्ध्यति यत् सिन्धुसभ्यताकाले लयात्मकतायाः कियत् महत्त्वपूर्णं स्थानमासीत् । नृत्यावसरे तु वाद्यवादनं प्रचलितमासीदेव, किन्तु तदतिरिक्तेष्वपि अवसरेषु तात्कालिके समाजे भिन्न-भिन्नवाद्यानां वादनं प्रचलितमासीत् । संगीते लयनिर्वाहः चर्मवाद्यद्वारा भवति स्म । चर्मवाद्यानां गलावलम्बनस्य प्रथा आसीत्, एवं करतालद्वारापि लयनिर्वाहो भवति स्म ।[२] अयं करतालः आघातीशब्देनापि निगद्यते । हडप्पास्थाने एकमीदृशं मुद्राचित्रमुपलब्धमस्ति यत्र चर्मवाद्यस्य लयात्मकध्वनिना सिंहं वशीकर्तुं प्रयासः अङ्कितोऽस्ति ।[३] आधुनिकेऽपि काले इयं सकललोकविश्रुता कथा वर्तते यत् एकदा रीवाँराज्ये राजपालितः कश्चन सिंहो विकृतमस्तिष्कतया कदाचिद् विक्षिप्तः समभवत् । तदा भारतविश्रुतस्य गायकशिरोमणेः श्रीमदोङ्कारनाथठाकुरमहोदस्य वाद्यवादने समधिगतकौशलेनाऽनुजेन बेलावादनप्रयोगद्वारा सिंहगतस्योद्दामोद्वेगस्य मनोविकारस्य शमनं कृतमासीत् ।

वैदिकानि लयवाद्यानि—वैदिके काले चर्मावृतानां वाद्यानां किमपि वैशिष्ट्यमासीत् । तत्रापि दुन्दुभिवाद्यस्य सुतरां महत्त्वमासीत् । इदं दुन्दुभिवाद्यं पशुचर्मणाऽवनद्धं भवति । विपत्तेराशङ्कायां सत्यां तथोत्सवानां घोषणाकर्तव्यायां सत्यामपि दुन्दुभिवाद्यस्य प्रयोगो भवति स्म भवति च । ऋग्वेदेऽपि दुन्दुभिवाद्यस्य विविधप्रकारेण प्रयोगानामुल्लेखोऽस्ति ।[४] कतिपयेषु मन्त्रेषु दुन्दुभिवाद्याधिष्ठातृदेवताया आह्वानस्योल्लेखो विद्यते । येनाहूता देवता शत्रून् निर्मथ्य भाययेत् । केषुचिन्मन्त्रेषु शत्रुविनाशार्थञ्च दुन्दुभेरुल्लेखो वर्तते ।[५]

---

१. भारतीय संगीतेर इतिहास पृ० ८४
२. ,, ,, पृ० ८७
३. 'दि ऋग्वेद एण्ड मोहेन्जोदडो, इण्डियन् कलचर, अक्टूबर १९३७, पृ० १५३ ।
४. ऋग्वे० १।२८।५, ६।४७।२०, ६।४७।२९
५. ऋग्वे० ६।४७।२९, ६।४७।३०, ६।४७।३१

ऋग्वेदे गर्गर-पिङ्गादिलयवाद्यानामुल्लेखोऽस्ति। पिङ्गवाद्यं नाम तदानीन्तनं धनुर्वाद्यमासीत्, तदेव रावणास्त्रमप्युच्यते। तदानीन्तने काले एतेषां ध्वनिना लयसाम्यनिर्वाहः क्रियते स्म। अथर्ववेदीये नृसूक्ते बाणसहितस्य नृत्यस्योल्लेखो वर्तते।[1] वेदेषु वीणाया उल्लेखाः प्राचुर्येणोपलभ्यन्ते। सामवेदे नृत्य-गीत-वाद्यानां वर्णनमुपलभ्यते। शुक्लयजुर्वेदे अथर्ववेदेऽपि दुन्दुभिवाद्यस्योल्लेखो वर्तते।[2] कृष्णयजुर्वेदे दुन्दुभेः भूमिदुन्दुभेश्चोल्लेखो दृश्यते।[3] भट्टभास्करेण 'चर्मणा आच्छादितमुखम्' इति भूमिदुन्दुभिर्व्याख्याता। वाजसनेयिग्रन्थे अथर्ववेदेऽपि वनस्पतिसंज्ञकस्य लयवाद्यस्य उल्लेखो वर्तते, तत्र वृक्षस्य मूले गर्तं विधाय, तं पशुचर्मणा आच्छादयन्ति स्म।[4] तैत्तिरीयसंहितायां वनस्पतिवाद्यस्योल्लेखो वर्तते।[5] यजुर्वेदस्य काठकसंहितायामपि वनस्पतिवाद्यस्योल्लेखो विद्यते।[6] ऐतरेयब्राह्मणे भूमिदुन्दुभेर्वर्णनमस्ति,[7] तत्रैव चायमप्युल्लेखो यत् पुरुषा भूमिदुन्दुभिं वादयन्ति स्म तथा स्त्रियः काण्डवीणां वादयन्ति स्म। वाजसनेयिसंहितायां 'शब्दस्य आडम्बरघातम्' इति आडम्बरसंज्ञकस्य लयवाद्यस्योल्लेखो विद्यते।[8] अथर्ववेदे ऋग्वेदेऽपि एकं कर्करीसंज्ञकं वाद्यमप्युल्लिखितमस्ति।[9] वैदिके युगे चर्माच्छादितानि तन्तुवाद्यान्यपि आसन्। तथाहि—गोधावीणानामकं वाद्यं गोधासंज्ञकस्य सर्पस्य चर्मणा आच्छादितं भवति स्म। लयवाद्येषु कर्करी आलावूवक्र-ऐशकी-अपवादालिका-घातकर्करीप्रभृतीनि वाद्यानि उल्लेख्यानि सन्ति। ऋग्वेदे सप्तस्वरा सप्तच्छन्दांसीत्युच्यन्ते।[10] शतपथब्राह्मणे वृन्दवादनस्योल्लेखो विद्यते।[11] तत्र पुरुषाः स्त्रियश्च सर्वे समेत्य विभिन्नवाद्यवादनेन सह लय-तालसहितं नृत्यगीतादिकमाचरन्ति स्म।

(१) कोवाणम् कोनृत्ययो दधौ—अथर्व० १०।२।२७

(२) शु० य०—२।१७।५, अथर्व—कां ५ सू० २० अध्याय ४ ऋ० १, ५, ६ तथा ५।२०।५, ५।३१।१७, ६।३८।४, ५।२०।१३, ६।१२६।३, १२।१।४१,

(३) दुन्दुभिन समप्नोति—७।५।६।२६, 'भूमिदुन्दुभि वप्नोति'—७।५।६।३०

(४) ६।१२, अथर्व—१२।८।१५

(५) ६।१।२५—'स वनस्पतिन प्रेष्यति।'

(६) ३।४।५—या वनस्पतिवाक् तन्

(७) ५।१।५

(८) ३०।१०।१६

(९) अथर्व खं० ४ सू० ३३ अध्याये ८ ऋ० ५—भारतीय संगीतेर इतिहास पृ० १०२,

(१०) ऋग्वे० १।१६४।२४, ऋग्वे० २।४३।३

(११) श० प० १३।२।५।१

वैदिकमन्त्राणां स्वर-च्छन्दोनियामकं शास्त्रं शिक्षाशब्देनोच्यते। तत्रत्योल्लेखदर्शनात् भारतस्य सर्वप्रथमं चर्मवाद्यं डमरुः स्यादिति प्रतीयते। एकदा कैलासाद्रौ देवगणैः परिवृतो भगवान् भूतभावनः शिवस्ताण्डवमनुष्ठितवान्। भगवती सरस्वती वीणाझङ्कारं करोति स्म, ब्रह्मणा क्रियमाणं करताललयमनुलक्ष्य लक्ष्मीर्गायन्ती आसीत्। भगवान् विष्णुः स्वयं मूर्छङ्गं वादयति स्म। यक्षगन्धर्वकिन्नराश्च तथाऽप्सरसश्चैकत्रीभूयेमां शोभां पश्यन्ति स्म। नटराजस्य भगवतः शिवस्य नृत्यमिदं सृष्टेः परिचायकमस्ति। भगवतश्चतुर्षु हस्तेषु दक्षिणप्रथमहस्ते डमरुः, यः खलु अस्मिन् महाकाले छन्दस्ताललयानां संरक्षणं कुर्वन्निव शोभते स्म।

उड्डीशमहामन्त्रोदयतन्त्रस्य षोडशाध्यायेषु षोडशविधानां वाद्यानां विस्तारेण वर्णनं कृतमस्ति। तत्र षोडशविधानां वाद्यानां नामानि—

(१) तालनिलयः, (२) सत्री, (३) पतनम्, (४) मण्डलम्, (५) पैरीतिघनम्, (६) हिमिलम् (७) धुधुकः, (८) मिथःक्कथा, (९) डमरुः, (१०) मुरजः, (११) अंगुलिस्फोटः, (१२) वीणा, (१३) आलमणिः, (१४) रावणहस्तकः, (१५) घोषावती, (१६) ब्रह्मकः। एतेषु आधिक्येन लयवाद्यान्येव स्युरिति प्रतीयते।

विशालकायानां चर्मावनद्धानां वाद्यानां प्रयोगो युद्धार्थं भवति स्मेत्युल्लेखो वर्तते[1]। क्वचित् क्वचित् स्थलविशेषेषु उपरि पृष्ठभागेषु वृन्दवादनस्य अनेकानि दृश्यानि उपलभ्यन्ते, तत्कालीनानां मृदङ्गानां विविधा आकाराः स्वरूपाणि वर्तन्ते स्म। कोणार्के ईदृशानि बहूनि चित्राणि कलाकुशलैरङ्कितानि सन्ति। ईसातः शतद्वयवर्षेभ्यः पूर्वमपि क्वचित् क्वचित् राजप्रासादेषु प्रस्तरनिर्मितस्तम्भानां प्रयोगः सांगीतिकध्वनिनिर्माणाय भवति स्म। एषु प्रस्तरस्तम्भेषु हस्ताघातविधानस्य काऽपि विलक्षणा रीतिरासीत्, यया तेभ्यः स्तम्भेभ्यः सांगीतिकध्वनिरुत्पद्यते स्म।

वाल्मीकिरामायणे ततावनद्धसुषिरघनवाद्यानां चतुर्णामुल्लेखः प्राप्यते[2]। घनवाद्येषु स्वस्तिकम्, घण्टा, करताल उपलभ्यते[3]। महाभारतकाले लयवाद्येषु[4] मृदङ्ग-झर्झर-आनक-

---

१. भारतीय संगीतेर इतिहास पृ० ३००

२. रामायणे ६।५०।६० भेरी, ६।५०।१६ मृदंग, ५।१०।४४ मड्डुक, ५।१०।४४ डिण्डिम, ६।५७।२८ दुन्दुभि, २।३९।४१ मुरज, ६।५९।८ पणव, ६।९६।३५ पटह।

३. तत्रैव ६।१३१।३९ स्वस्तिकम्, ६।१२४।१२५ घण्टा, ६।५२।२४ करतालः

४. आदिपर्व-सौप्तिकपर्व ८।३२, आरण्यपर्व १६२।१६, उद्योगपर्व १४२।२७-७८।१६; भीष्मपर्व १५।१७, द्रोणपर्व ७०।१८, कर्णपर्व ४१।१४, अनुशासनपर्व ६५।५१

गोमुख-आडम्बर-पणव-तरी-भेरी-पुष्कर-घण्टा - वल्लकी-नूपुरं-शिंजिर-पटह - वारिज-दुन्दुभि-देव-दुन्दुभिप्रभृतीनां वाद्यानामुल्लेखोऽस्ति। रायोपसेनीयसुत्तनामके जैनग्रन्थे षष्ठिवाद्यानां नामानि उपलभ्यन्ते। तानि यथा—शंख, शृंग, शंखिया, खरमुही, पेया, पीरिपिरिया, पणव, पटह, भंभा, होरम्मा, भेरी, झल्लरी, दुन्दुभि, मुरज, मृदंग, नन्दीमृदंग, आलिंग्य, कुतुम्ब, गोमुखी, मर्दल, वीणा, विपञ्ची, वल्लकी, महती, कच्छपी, चित्रवीणा, बद्धीषा, सुघोषा, नन्दीघोषा, भ्रामरी, षड्भ्रामरी, परिवादिनी, तूणा, तुम्बवीणा, आमोत, झंझा, नकुल, मुकुन्द, हुडुक्की, विच्चिकी, करटा, डिण्डिम, किणिय, कदम्ब, दर्दरिका, कलशिया, मड्डुक, ताल, कांस्यताल, लत्तिया, मकरिका, शिशुमारिका, वंश, वेणु, वाली, परिल्ली, बद्धगा, इत्यादीनि।

पटहवाद्यमिदं भाण्डवाद्येष्वेकविधम्। मृच्छकटिकनाटके पटहवाद्यस्य ध्वनिः मेघध्वनिना उपमीयते। महाकविना बाणभट्टेन युद्धकालीनगानार्थमाघोषणापटहवाद्यस्य ध्वनेरुपयोगः प्रतिपादितः। शुभयात्रायां च प्रस्थानमङ्गलपटहस्य प्रयोगो वर्णितः। युद्धप्रारम्भ-काले शत्रूणां हृदये भयोत्पादनार्थं, स्वपक्षीयाणां वीराणां हृदये उत्साहवर्धनार्थं च सुषिरावनद्धवाद्यानां प्रयोगो भवति स्मेति श्रीमद्भगवद्गीता ब्रवीति[1]। आनकमपि एकविधं भाण्डवाद्यमस्ति, गोमुखञ्च सुषिरवाद्यमस्ति। मड्डुक-झर्झर वाद्ययोरुल्लेखः पाणिनिनाऽपि कृतोऽस्ति[2]।

प्राचीनकालादेव अवनद्धवाद्यानां प्रयोगः संगीतातिरिक्तेषु विविधकार्येष्वपि भवति। कस्यापि वृत्तस्य घोषणार्थं राजकीयशोभायात्राप्रसङ्गे च प्रायशः सर्वत्रैव सुषिरावनद्धवाद्यानां प्रयोगो भवति। भारतस्य कियत्स्वपि आदिवासिक्षेत्रेषु चर्मावनद्धानां वाद्यानां वादनं विधाय विभिन्नाः संकेता दीयन्ते स्म। एषां संकेतानां काचन गोपनीया भाषा भवति, तां तत्सम्बन्धिन एव ज्ञातुं प्रभवन्ति। अनेन माध्यमेन तत्तदधिपतीनां तत्तद्राज्ञां च आदेशा दूरदूरतरं यावत् प्रसार्यन्ते स्म। कस्या अपि सभायाः सूचना तथा आगामिविपत्तेः साव-धानतासम्पादनार्थं चापि सूचना एभिरेव ध्वनिसंकेतैर्वितीर्यते स्म। अल्पाल्पतरसमयेनैव दूरसुदूरवर्तिनोऽपि जना एभिर्ध्वनिसंकेतैरभिप्रायं विज्ञाय तदनुरोधेन कार्यमनुतिष्ठन्ति स्म। स्वतन्त्रताप्राप्तेः पूर्वं सर्वत्रैव राज्येषु अद्यापि क्वचित् क्वचित् नक्तंदिनयोर्विभिन्नेषु समयेषु अवनद्धवाद्यवादन—(नगाड़ेपर नौबत) प्रथा आसीत्, वर्तते च। तेन समयाऽवबोधो जनानामनायासेन भवति स्म। देवतायतनेषु ब्राह्मे मुहूर्ते रात्रौ च शयनसमये, आरार्तिक्य-

१. श्रीमद्भगवद्गीता अ० १२ श्लो० १२–१३

२. मड्डुकझर्झरादणन्यतरस्याम्-पा० सू० ४।४।५६

समये च सुषिरावनद्धवाद्यानां वादनमद्यापि यत्र तत्र द्रष्टुमुपलभ्यते। क्वचित् क्वचिद् ग्रामेषु भेरीनामकं कोणाकारं चर्मावृतं वाद्यं द्वारपालानां हस्तसात् क्रियते स्म, ते च विपदवसरेषु तानि वादयन्ति स्म। तेन ध्वनिना ग्रामवासिनः सावधानाः सन्तः लुण्टाकेषु, चौरेषु, तथा अन्यास्वपि विपत्तिषु विजयं प्राप्नुवन्ति स्म।[1]

सप्तदशशतकस्य पूर्वार्धे तिरुमलनायकनामकः कश्चन सुप्रसिद्धः शासको मदुराईराज्ये शासनं करोति स्म। तेन मदुराईतः श्रीविल्लीपुत्तरं यावत् पञ्चविंशतिक्रोशपरिमिते मार्गे प्रत्यर्धक्रोशं केन्द्राणि स्थापितानि आसन्। तेषु केन्द्रेषु प्रत्येकं दुन्दुभिवाद्यानि स्थापितानि सन्ति। इमानि केन्द्राणि 'नगारा मण्डप' शब्देन उच्यन्ते स्म। तिरुमलनायको नृपतिर्देव्याः परमभक्त आसीत्। स च मध्याह्नभोजनं श्रीविल्लीपुत्तरे स्थिताया अन्दलदेव्याः पूजासमाप्त्यनन्तरमेव करोति स्म। श्रीविल्लीपुत्तरमन्दिरे पूजासमाप्तिसमनन्तरमेव मन्दिरस्थो दुन्दुभिर्वादयते स्म। अस्य ध्वनिरर्धक्रोशस्थितं नगारामण्डपं यावत् श्रूयते स्म। तदानीमेव तत्रत्यो वादकः तत्रत्यं दुन्दुभिं वादयति स्म। एवं रीत्या पूर्वपूर्वदुन्दुभिध्वनिमाकर्ण्य प्रत्यर्धक्रोशं स्थापिता दुन्दुभयो वाद्यन्ते स्म। मदुराईस्थितं नगारामण्डपं यावत् स ध्वनिः पञ्चनिमेषमात्रेणैव तिरुमलनामकस्य श्रुतिपथं प्राप्नोति स्म। तेन स श्रीविल्लीपुत्तरे पूजा समाप्तेति जानाति स्म।

एतवता लेखेन स्पष्टमिदं भवति यदस्माकं भारते देशे विविधानि वाद्यानि वैदिकयुगादेव आसन्, तेषामुपयोगोऽपि अनेकेषु अवसरेषु नानाविधाभीष्टसिध्यर्थं जनसमाजे क्रियते स्म। अद्यतने उन्नतिशीलेऽपि युगे केवलं वाद्यानामेव न अपि तु सर्वासामपि कलानामवनतिरेव भवन्ती दृष्टिपथमायातीति उपहासास्पदमेव। अद्य न तावन्ति संख्यावन्ति वाद्यानि सन्ति, नापि तेषां नामानि अवगतानि, नापि तेषां वादनाभिज्ञताऽस्ति। अतो यदि गीत-वाद्य-नृत्यात्मकस्य पूर्णसंगीतस्य वास्तविको बोधः समपेक्ष्यते चेत् संगीतशास्त्रस्य अध्ययनं परमावश्यकं, संगीतशास्त्रस्याध्ययनार्थं च संस्कृतभाषाया ज्ञानं नितान्तमावश्यकं वर्तते। तत्रोपेक्षां कृत्वा लाभः कदापि न संभवितुमर्हति। सर्वैरेव कलोपासकैः संस्कृतं श्रद्धया, आदरेण, प्रेम्णा च अभ्यसनीयम्, तन्माध्यमेन च संगीतशास्त्रस्याध्ययनं करणीयम्, तदा संगीतस्य वास्तविकं स्वरूपमवगतं भवेत्, नान्यथेति मे मतिः।

१. लयवाद्य—साम्बमूर्ति

संस्कृतरूपकेषु श्रीकृष्णः नायको विटश्च[1]

डॉ० राजेन्द्रमिश्रः

श्रीकृष्णचरित्रवर्णना वैविध्यं भजतेऽधिसंस्कृतसाहित्यम् । मर्यादापुरुषोत्तमस्य दाशरथेः श्रीरामचन्द्रस्य यादृशं शरच्चन्द्रप्रतीकाशं चरित्रवर्णनं तत्रभवताऽदिकविना वाल्मीकिना कृतं, स्वोपज्ञरामायणमहाकाव्ये तदेव प्रायः परवर्तिभिरपि शतमितैः कविपुङ्गवैः ईषत्परिवर्तनैस्सार्द्धमङ्गीकृतम् । परन्तु नन्दनन्दनस्य कृष्णस्य चरित्रप्रतिपादकानि, अथ च उपजीव्यभूतानि पुराणानि संख्यया बहून्यासन् । प्रत्येकस्मिन् च पुराण-ग्रन्थे कृष्णचरित्रमपि विसंवादि संल्लक्ष्यतेऽपरतः । श्रीमद्भागवते समुपस्थापितः श्रीकृष्णो निखिलचराचरजगन्नियन्ता, धर्मसंरक्षणार्थमेव कृतभूतलावतारो, लीलाविग्रहश्चास्ति । परन्तु ब्रह्मवैवर्तपुराणेऽसौ वृषभानुजास्नेह-सन्दोहदोलाधिरूढो, गोपवधूटी—प्रणयानुरञ्जन-निमज्जितमनाः व्रजौकसां कुटुम्बी परिलक्ष्यते । एवं खलु अन्येष्वपि पुराणेषु श्रीकृष्णचरित्रवर्णनं सपरिवर्तनं विलक्षणञ्चावलोक्यते ।

इमान्येव उपजीव्यभूतानि प्राक्तनपुराणानि आम्नायीकृत्य, भाविनि काले तैस्तैस्साहित्यकारैः नन्दनन्दनजीवनचरितं स्वैरं चित्रितं स्वेषु काव्येषु । काव्येष्वपि, दृश्यश्रव्यतया द्विधा विभक्तेषु, क्वचिन्महाकाव्यनायकरूपेण क्वचिच्च नाट्यनायकरूपेण कृष्णचरितं समुपबृंहितम् । एकतस्तावत्पण्डितराजजगन्नाथादिप्रणीतेषु मुक्तकपद्येषु कृष्णचरितं दृग्विषयीक्रियतेऽपरतस्तावच्छिशुपालवधादिपृथुलमहाकाव्येषु तच्चरितं नवनवोत्प्रेक्षणसंवलितं राराजतेतराम् ।

'रूपकाणि दश' इति दशरूपककारस्य आचार्यधनञ्जयस्य मतम् । तथापि लोकानुरञ्जनप्रवणतया, पार्थिवेतिवृत्तोपस्थापनपरायणतया, रसचर्वणैकमूलभूततया च नाटकमेवातिशेतेऽन्यान् नवमितान् रूपकभेदान् । प्रकरणभाणव्यायोगसमवकारडिमेहामृगवीथ्यङ्कप्रहसनानि च स्वस्वसंविधान-विलक्षणतयैव च परस्परं पृथग्भूतानि वर्तन्ते । क्वचिद् वैश्यो द्विजो

१. शोधनिबन्धोऽयं राज्यशासनसमायोजिते त्रिदिवसीयसंस्कृतसमारोहेऽधिवृन्दावनं पठितो मया ।

वा नायको भवति, क्वचिच्च मकररथ्याधिवासी लम्पटो विटः। क्वचिद्देवविशेषः नयति कथावृत्तं, क्वचिच्च भीमादयो दिव्यादिव्याः पुरुषाः।

एवंभूतेऽपि भेदोपभेदपर्याकुले रूपकवाङ्मये, श्रीकृष्णचरिताश्रितानि रूपकाणि न बहूनि वर्तन्ते इति सर्वथा न। आ महाकविभासात् इदानीं यावत् परश्शतानि दृश्यकाव्यानि तत्तद्युगेषु तैस्तैः कवनपटुभिः वरटवाहिनीरतनन्धयभूतैः कविभिः कृष्णमाश्रित्य कृतानि। तत्र च प्रथममेव भास-मुनिना रूपकद्वयं कृष्णचरिताश्रितं न्यपादि—बालचरितं दूतवाक्यं च। बालचरितस्य नायकभूतः कृष्णो नायकोचितधृतिक्षमादिसर्वगुणोपपन्नः महासत्त्वोऽतिगम्भीरः अविकत्थनो धीरोदात्तश्च दृश्यते। परन्तु दूतवाक्योपवर्णितं कृष्णचरितं किंचिद् विलक्षणं वर्तते। अत्र वासुदेवः कृष्णः कौरवपाण्डवयोर्मध्ये शान्तिसंस्थापनार्थं तटस्थजनोचितं प्रयासं कुर्वन्, दुर्योधनादिभिर्निजभुजदण्डप्रचण्डबलोन्मत्तैः पिशुनकैः कदर्थितस्सन्, प्रकटीकृतविश्वरूपः कृतभाविकुरुक्षेत्रमहासमरोद्घोषः संलक्ष्यते।

अनेनैव प्रकारेण मथुरादासप्रणीतवृषभानुजानाटिकायां, युवराजराजवर्म-प्रणीतरुक्मिणीपरिणये, रविवर्मप्रणीतप्रद्युम्नाभ्युदये, कुलशेखरप्रणीतसुभद्राधनञ्जये, वत्सराजप्रणीत-रुक्मिणीहरणे ईहामृगे, काशीपतिप्रणीतमुकुन्दानन्दभाणे, रूपगोस्वामिप्रणीतविदग्धमाधवे, ललितमाधवे च, शंकरलालशास्त्रिकृतश्रीकृष्णचन्द्राभ्युदये च सविशेषं, सविस्तरं, सपरिवर्तनं च प्रविततं कृष्णचरितं संलक्ष्यते। इदानीन्तनैरपि कतिपयनाट्यलेखनदत्तचित्तैः कविभिः सुमनोहराणि, युगप्रवृत्तिपरितोषकराणि कृष्णपरकाणि रूपकाणि कृतानि विद्यन्ते।

किन्त्वस्मिन् खलु लघुनि-निबन्धे ग्रन्थद्वयमात्रं समीक्षा-विषयीकृत्य श्रीकृष्णचरित्र-वैविध्यं प्रस्तोतुकामोऽयं निबन्धकारः प्रोत्सहते। आचार्यरूपगोस्वामिप्रणीतं विदग्धमाधवं नाम नाटकं प्रथमो ग्रन्थः। काशीपतिकविप्रणीतो मुकुन्दानन्दो भाणश्चापरः। इमावेव ग्रन्थौ कथमूरीकृतौ कथं नान्ये ? नाटकद्वयं, भाणद्वयमेव वा कथं न स्वीकृतम् ? नाटकभाणयोश्च मिथः परिग्रहणे को विशेष इत्यनेके प्रश्नास्साम्प्रतं समुज्जृम्भन्तेतराम्। संग्रहवचनेनैवास्य समाधानं प्रस्तूयते।

मधुसूदनचरिताश्रितेषु समस्त-रूपकोपरूपकभेदेषु नाटकमेव स्वानुगुणतया श्रेष्ठमित्युक्तं पूर्वमेव। तत्रापि च रूपगोस्वामिप्रणीतं विदग्धमाधवं, समस्तनाट्यलक्षणोपपन्नं, रमणीय-कथाविन्यासभूषितं, सन्धिसन्ध्यङ्गनाट्यवृत्तिपताकास्थानकाकाशभाषितोपक्षेपकैश्च संयुक्तं समर्चनगृहमिव गोमयोपलेपमण्डितं स्वीक्रियते गीर्वाणगवीमर्मज्ञैः।

अस्मिन् खलु सप्ताङ्के नाटके आचार्यरूपगोस्वामिना स्वकल्पनावैशिष्ट्यैः परिभूष्य कृष्णचरितं निबद्धम्। राधात्र नायिका, कृष्णश्च धीरललितो नायकः।

एतद्विरुद्धं श्रीकाशीपतिप्रणीतमुकुन्दानन्दभाणे कृष्णाच्चरितं निखिललोककदर्थनाधिष्ठानभूतं विटस्य चरितं वर्तते। अस्मिन् भाणग्रन्थे मुकुन्दीभूतो विटो भुजङ्गशेखरः वेश्यावाटलम्पटः, सायंप्रातः रतिपरायणासु वाराङ्गनासु समासक्तो गेहाद्गेहमाहिण्डमानः परिलक्ष्यते। साहसं खलु कविकाशीपतेः यः सकललोकाराधितं योगीश्वरचरितं खलीकृत्य भाणरूपेण प्रस्तुतवान्। क्व खलु तारापथमण्डितं चञ्चच्चन्द्रमण्डलं, क्व च वाराहकीटाद्युपसेविते मलीमसपङ्के तस्य प्रतिबिम्बः ?

वस्तुतः कृष्णचरितस्येदमेव परस्परविरोधि वैविध्यं प्रदर्शयितुं प्रवृत्तोऽस्मि। अष्टाशीत्यधिकचतुर्दशशततमात् खिस्ताब्दात् समारभ्य एकनवत्यधिकपञ्चदशशततमं खिस्ताब्दं यावत् श्रीरूपगोस्वामिनो जीवनावधिरिति निश्चीयते विविधैः। तस्य जीवनकाल एव सिकन्दरलोदिशेरशाहसूरीहुमायूँइस्लामशाहाकबरप्रभृतयस्तुरुष्कभूपतयो भारतभुवमलञ्चक्रुः। एवमपि भण्यते यदयमेव रूपगोस्वामी कस्यचिन्मानसिंहस्य गुरुरासीत्। एतत् प्रमाणं वृन्दावने मानसिंहनिर्मापितगोविन्दमन्दिरस्य शिलालेखे वरीवर्ति। अनेनैतदुक्तं भवति यत् श्रीरूपगोविन्दपादो नवाधिकशतवर्षदेशीयस्सन् विग्रहं त्यक्तवान्।

अस्यैव चैतन्यदेवदीक्षितशिष्यस्य, श्रीजीवगोस्वामिपितृव्यचरणस्य, बङ्गवसुन्धरोत्सङ्गजातस्य, वृन्दावनविहारभूमिहृतचेतनस्य, नन्दनन्दनचरणाब्जचञ्चरीकस्य श्रीरूपगोस्वामिनः त्रयोदशकृतीनामन्यतमं वर्तते विदग्धमाधवं नाम नाटकम्।

विदग्धमाधवे राधाकृष्णयोः केलिरहोवृत्तं प्राप्यते। जानीमो वयं यत्कृष्णचरितं महाभारतश्रीमद्भागवतविष्णुपुराणब्रह्मवैवर्तपुराणपद्मपुराणेषु प्राधान्येन निबद्धं तत्रभवता कृष्णद्वैपायनेन व्यासेन। अस्यैव कृष्णचरितस्य विकला वर्णना कादाचित्कतया वायुलिङ्गाग्निमत्स्यदेवीभागवतपुराणेषु चापि प्राप्यते। गर्गसंहितायां, हरिवंशपुराणे चापि वासुदेवकथा निबद्धा। परन्तु तथ्यमिदं सर्वथावधेयं यत्पुराणेषु सर्वत्रैव माधवसहचरी, 'राधा' न दृश्यते। केवलं ब्रह्मवैवर्तपद्मपुराणयोरेव सविस्तरं राधाकृष्णयोर्मिथश्चित्रणम्। अनेनैतदुक्तं भवति यत् विदग्धमाधवरचयिता श्रीरूपगोस्वामिमहाभागः ब्रह्मवैवर्तं, पद्मञ्चैव मुख्यतयोपजीव्यत्वेनाङ्गीकरोति।

विदग्धमाधवस्य नायिकाभूतेयं राधा कस्याश्चिद् गोपिकाया मुखरायाः नप्त्री विद्यते। इयमेव मुखरा, नन्दगोपार्धाङ्गिन्याः यशोदाया धात्री।

मुखरायाः प्रेरणयैव राधायाः पाणिग्रहणं जटिलापुत्रेणाभिमन्युना गोपेन सार्धं सम्पाद्यते। साम्प्रतं स्पष्टमिदं यद् राधा अभिमन्युसहचरीत्वेन परकीया कान्ता वर्तते। एवंभूतेऽपि नन्दनन्दनेन कृष्णेन साकं तस्याः प्रणयिनीत्वं कथं सम्भवति ? अभिमन्युभार्यायां श्रीकृष्णस्य निरर्गलसंततासक्तिः केषामाचारमर्यादैकपक्षपातिनां सनातनार्यपरम्परापराणां जनानां

हृदयेषु जुगुप्सां, विचिकित्सां, सन्देहकन्दलं वा नोपपादयेत ? पुनश्च, यदि श्रीकृष्ण एवं-विधस्यैव न्यक्कृतलोकाचारस्य प्रणयवृत्तस्य सूत्रधारः, कथं तर्हि विदग्धमाधवनाटके धीरललितत्वं, प्रख्यातोदात्तचरितत्वञ्च ? एवं सिद्धे सति कोटिमितानां कृष्णभक्तानामास्थापि खञ्जीक्रियते, राधाकृष्णप्रणयस्य, धवलतुहिनाचलोपमस्य, कुन्देन्दुतुषारहाराट्टहाससन्निभस्य पवित्रतापि उभयतः पाशपात्रीक्रियते। एवं हि चिन्त्योऽयं विषयः।

उच्यते साम्प्रतम्। प्रायेण सर्वेऽपि वृन्दारकगवीनिष्णाता विपश्चितो विद्वत्तल्लजाः जानन्ति यद् ब्रह्मवैवर्तपुराणेऽपि, भाण्डीरवने, राधाकृष्णयोः स्वयमेव प्रजापतिना ब्रह्मणा सम्पादितं पाणिपीडनेतिवृत्तं वर्णितं समुपलभ्यते। वस्तुतो राधा श्रीकृष्णस्यैव नित्यसहचरी न खलु तदतिरिक्तस्य कस्याप्यन्यस्य जनस्य।

विदग्धमाधवस्यापि प्रथम एवाङ्के सान्दीपनिमुनेर्माता, देवर्षिनारदस्य च शिष्या वृद्धा पौर्णमासी सोत्कण्ठं कथयति—'येनानयोः सुभगयोरुचिता भवेयं'—शृङ्गारमाङ्गलिकयोर्नवसङ्गमाय'। (१।१२) गुरुनिदेशवशात् पौर्णमासी निरन्तरमेव प्रयतते राधकृष्णयोस्सङ्गमनाय। परन्तु पौर्णमास्याः सेविका नान्दी सङ्गम-वृत्तान्तस्य याथार्थ्यम्, औचित्यं वा नावगच्छति। परपरिग्रहेण सार्धं कस्यचित् सुभगम्मन्यनवयुवकस्य सङ्गमनं कथं न शङ्कनीयं भवेत्।

यद्यपि रूपयौवनविधानभूता राधा नानरूपाऽभिमन्योः। परन्तु किमेतेन ? पतिस्तु पतिरेव भवति। काणः खञ्जः खल्वाटो विकृतो वधिरो वा यः कोऽपि कीदृशोऽपि, कुतोऽपि, कथमपि भवेत् यदि पतिरूपेण प्राप्यते तर्हि तेनैव सार्धं जीवनयात्रा प्रवर्तयितव्येत्येव भारतीयार्षजीवनाचारसंहिता। अस्मादेव कारणात् नान्दी, राधाकृष्णसङ्गमनार्थं पौर्णमास्या क्रियमाणमुद्योगं समर्थितुं नोत्सहते। नान्दी इदमपि सुष्ठु जानाति अनुभवति च यन्नन्दनन्दनं कृष्णमन्तरेण न कोऽपि राधिकां स्वपरिग्रहीकर्तुं योग्यः। राजहंसी मानसरोवर एव शोभते न खलु पङ्किलपल्वले। सिद्धसिन्धुर्गङ्गा समुद्रमेव संगच्छति न खलु अन्यं कमपि। नान्दी विज्ञापयति 'कृष्णतोऽन्येन पुरुषेण तादृशीनां करस्पर्शनम् असह्यम्।'

अस्मिन्नेव सन्दर्भे नान्द्यास्सन्देहलेशं विशकलयितुकामा देवी पौर्णमासी रहस्योद्घाटनं विदधाति—'तद्वचनार्थमेव स्वयं योगमायया मिथ्यैव प्रत्यायितं तद्विधानाम् उद्वाहादिकम्। नित्यप्रेयस्य एव खलु ताः कृष्णस्य।' पौर्णमास्या अनेनैव संक्षिप्तव्यवहरणेन सर्वोऽपि सन्देहो विनश्यति। अनेनैतदुक्तं भवति यद् राधा न खलु परमार्थतोऽभिमन्योः पत्नी। दुरात्मा मथुराधिपतिः कंसो राधालावण्यमरन्दलुब्धचञ्चरीकस्सन् प्रसह्य, सबलात्कारं क्वचित्तां नापहरेदित्येव परिरक्षमाणा योगमाया मिथ्यैव अभिमन्युना गोपेन पाणिभ्यां राधिकां ग्राहितवती। अयमेव संकटस्थितिनिवारणोपायः।

वस्तुतस्तु राधा सम्प्रत्यपि कुमारी, सम्प्रत्यपि अनूढा, नन्दनन्दनप्रणयवागुराबद्धहरिणीव राराजते। षोडशवर्षदेशीया राधा सौन्दर्यप्रतिमूर्तिः, आनन्दकौमुदी, कृष्णस्य नित्यप्रेयसी ह्लादिनीशक्तिश्च तस्य। अयमेव रूपगोस्वामिनोऽभिमतो वादः।

एवं हि, यथा खलु कविकुलगुरुणा कालिदासेन महर्षेः दुर्वाससः शापं विकल्प्य, पद्मपुराणधिक्कृतं दुष्यन्तचरितं सौदात्यं परिरक्षितं तथैवात्र योगमायाचमत्कारं विनियोज्य तत्रभवता श्रीरूपगोस्वामिपादेन परपरिग्रहाभिलाषदूषितं, नन्दनन्दनमलीमसचरितमपि पवित्रितमित्यत्र न कोऽपि सन्देहलेशावसरः। साम्प्रतं विशदीभवति निखिलमेव संविधानकं नाटकस्य यदभिमन्युर्न खलु राधिकाया भर्ता। कामं लोकदृष्ट्या स भवेत्तस्याः कतिपयाप्तजनसाक्ष्यसम्मतः पतिः। किन्तु निर्विचिकित्समिदं तथ्यं यदयं विवाहवृत्तान्तो योगमायाया एव विलासविचेष्टितमासीत्। ये खलु परमार्थवादिनस्ते सुष्ठु जानन्ति अनपायसंश्रयं प्रणयं राधाकृष्णयोः। अतएव विदग्धमाधवनाटके समुपबृंहितं राधाकृष्णप्रणयेतिवृत्तं सर्वथा प्राक्तनपुराणमर्यादानुगतं, समीचीनं, शाश्वतं, सनातनं च सिद्ध्यति।

अनया खलूपपत्त्या विदग्धमाधवनाटकनायकभूतस्य श्रीकृष्णस्य चरितं गुणगणमण्डितं स्फारीभवति। राधामयं त्रिलोकं पश्यन्नन्दनन्दनः साम्प्रतं स्वकीयं धीरललितं चरितं साधु प्रकाशते—

राधापुरः स्फुरति पश्चिमतश्च राधा,
राधाधिसव्यमिह दक्षिणतश्च राधा।
राधा खलु क्षितितले गगने च राधा,
राधामयी ननु बभूव कुतस्त्रिलोकी॥

यद्यपि सम्पूर्णेऽपि विदग्धमाधवे नाटके श्रीकृष्णस्य धीरललितमेव चरितं संलक्ष्यते। परन्तु यत्र कुत्रापि तस्य धृष्टचरितं, शठचरितं चापि द्रष्टुं शक्यते। स्थालीपुलाकन्यायेनैवैकः सन्दर्भो निरूप्यते मया। विदग्धमाधवस्य चतुर्थेऽङ्के चन्द्रावल्या सार्धं कृष्णस्य एकान्तसङ्गमनं व्याख्यातं कविना। भगवति मरीचिमालिनि अस्तङ्गते सति, प्रवृत्ते च निशारम्भे पद्मासुबलयोर्मिथः प्रयासेन चन्द्रावलीकृष्णयोस्संगमस्सम्भवति। कृष्णः सानन्दं व्याहरति—'सेयं मम लोचनेन्दीवरचन्द्रिका चन्द्रावली (इति सादरमुपेत्य) प्रिये !

चन्द्रस्तव मुखबिम्बं चन्द्रो नखराणि कुण्डले चन्द्रो
नवचन्द्रस्तु ललाटं सत्यं चन्द्रावली त्वमसि॥ (४।८)

अस्मिनेव प्रसङ्गे 'सुन्दर ! भ्रमरस्येव नवनवानुसारिणी ते प्रकृतिः कथं चिरासङ्गनीरसासु पद्मिनीषु अभिरमताम् ?' इति चन्द्रावल्या निगदिते सति श्रीकृष्णः प्रतिवचनीकुरुते—प्रिये ! श्रूयताम्—

विपिनान्तरे मिलन्ती मधुररसा शीतलस्पर्शा ।
अमृतमयी त्वद्विरहे समजनि ममतापनुत्तये राधा ॥ (४।९)

अस्मिन् आत्मकथने राधाप्रणयनिमज्जितनिखिलचित्तवृत्तिः श्रीकृष्णोऽकस्मादेव अतर्कितपूर्वम् धारायाः स्थाने 'राधा' शब्दं प्रयुङ्क्ते । तस्येदं गोत्रस्खलनं चन्द्रावल्याः कृते शल्यभूतम् । राधाशब्दं व्याहरन्नेव माधवस्स्वस्खलनं विज्ञाय तत्क्षणमेव ससम्भ्रमं 'राधा राधेति' वारद्वयं सरभसं वक्ति । अनया वर्णनया श्रीकृष्णचरितस्य शाठ्यं साधु प्रस्फुटीभवति । एकतस्तावत् राधया सार्धं विविधावितथशपथोक्तिपुरस्सरं प्रणयप्रवर्तनम्, अपरतश्च चन्द्रावल्यापि सार्धं व्यभिचरित-कन्दर्पोच्छ्वसितनिर्वहणमिति व्यवहारद्वयं शाठ्यमन्तरेण न किमप्यन्यत् ।

साम्प्रतं व्याख्यायते श्रीकाशीपतिप्रणीत-मुकुन्दानन्दभाणस्य प्रतिपाद्यभूतं श्रीकृष्णस्य विटचरितम् । कौण्डिन्यगोत्रीयद्विजवंशावतंसः श्रीकाशीपतिः सम्भवतः क्वचिद् द्रविणदेशे अष्टादशशततमे खिस्ताब्दे जनिं लेभे । उत्तरभारत इति डॉक्टरवासुदेवशरणाग्रवालमहोदयः स्वीकरोति चतुर्भाणीप्रस्तावनायाम् ।

अस्य भाणस्य वैशिष्ट्यद्वयम् प्राधान्येनोल्लेखनीयम् । प्रथमं तावत्—निखिलेऽपि संस्कृतभाणवाङ्मये इयमेवैका विलक्षणकृतिः यस्यां स्त्रियः प्राकृतभाषां प्रयुञ्जन्ति । अन्यथा सर्वेऽपि भाणग्रन्थाः प्रायेण आद्यन्तं संस्कृतभाषयैव निबद्धा वर्तन्ते । अस्मादेव कारणात् नाट्यशास्त्रदृष्ट्या भाणोऽयं 'मिश्रभाण' इत्युच्यते । तद्यथा स्वयमेव काशीपतिः—मुकुन्दानन्दनामा मिश्रभाणः प्रयुज्यते । (श्लोक-४)

द्वितीयं वैशिष्ट्यं यदस्मिन्नेव भाणे लीलापुरुषोत्तमः श्रीकृष्णो विटरूपेण प्रस्तुतः अन्यथा सर्वेष्वपि भाणग्रन्थेषु केवलं वेशवाटोपजीवी खण्डितवृत्तः कोऽपि अन्वर्थनामा विट एव नायको भवति । मुकुन्दानन्दभाणस्य संविधानकं विलक्षणं प्रतीयते । अस्य नायको भुजङ्गशेखरनामा विटः नन्दनन्दनीभूय रङ्गमञ्चं प्रविशति । सर्वा अपि वारयोषितोऽत्र तथैव गोपवधूटीरूपेण समुपस्थापिताः । स्वप्रियतमया मञ्जर्या वियुक्तः श्रीकृष्णस्तामेव मार्गयन् प्रातः काले पथि पुरस्सरीभवति । मध्येमार्गं नैके वियोगसन्तप्ताः सगन्धाः सुहृदः, असकृदुपभुक्ता वाराङ्गनाश्च प्राप्यन्ते । विटीभूतः कृष्णः सर्वान् योगक्षेमान् पृच्छति, सन्तोषयति, उपायमुपदिशति, हासपरिहासं च प्रवर्तयति । जटावल्याः प्रयत्नेन च सान्ध्यवेलायां नायकनायिकासङ्गमनं संभवति । संक्षेपत इदमेव मुकुन्दानन्दभाणस्येतिवृत्तम् ।

साम्प्रतं रामादिवद् वर्तितव्यं न रावणादिवत् इत्याचार्यमम्मटाभिप्रायमुररीकृत्य पृच्छेयं मुखरायते यत् किमौचित्यं वर्ततेऽस्य विटायितकृष्णचरितचित्रणस्य । काव्यं तावत्

व्यवहारविदे, शिवेतरक्षतये, सद्यःपरनिर्वृतये च भवति, परन्तु चिन्त्यमिदं यदनेन, शिष्टजनोपेक्षितभुजङ्गलम्पटचरितस्य भगवद्विग्रहभूतस्य लीलापुरुषोत्तमस्य नन्दनन्दनस्योपरि आरोपमात्रेण किमुपक्रियते जगतां कविना। निजेष्टदेवभूतस्य, वृन्दावनविहारिणो गीतामृतावण्टकस्य भगवतः श्रीकृष्णस्येदं जारकर्मसमर्थनपरायणं चरितं स्मारं स्मारं कस्य भक्तिरसामृत-सिन्धुसफरायमाणस्य भक्तजनस्य चित्तं नोद्विजते? लक्ष्यतां तावदियं श्रीकृष्णविग्रहवर्णना—

चौर्येणैव कृतं हि कुक्षिभरणं जन्मप्रभृत्यन्वहं
गोपीनां पणदानशून्यसुरतक्रीडाक्रणं चेत्पुनः।
दुर्वारं तव जन्मकोटिभिरपि त्वं कृष्ण! तत्तादृशः
किम्मे दास्यसि किं तवास्ति च वयं किं वा ग्रहीष्यामहे॥
(श्लोक–११३)

एकतस्तु महामहिमशालिनो द्वारकाधीशस्येदं विजुगुप्सितं चित्रणमुताहो श्रीरूपगोस्वामिपादोऽभिव्यनक्ति—

जातस्तम्भतया पयांसि सरितां काठिन्यमापेदिरे
ग्रावाणो द्रवभावसंवलनतः साक्षादमी मार्दवम्।
स्थैर्यं वेपथुना जहुर्मुहुरगाज्जाड्याद् गतिं जङ्गमां
वंशीं चुम्बति हन्त यामुनतटीक्रीडाकुटुम्बे हरौ॥ (२१२५)

मन्ये भाणेतिवृत्तानुरोधवशादेव श्रीकाशीपतिना लोकसमर्चितं श्रीकृष्णचरितं खलीकृतम्। परन्तु अनेनापि तर्केण कृष्णचरितावमानना न वितथीभवति। यदि काव्येतिवृत्तानुरोधवशादेव कविभिः स्वैराचरणं क्रियेत तर्हि कथन्न खलु केनापि कविना लङ्केशो रावणो नायकीकृतः? कथन्न खलु वृकोदरो भीमः प्रहसनपात्रीकृतः, कथन्न खलु कोऽपि विट एव व्यायोगनायकीकृतः? वस्तुतः कविपरम्परापि प्रभवति कविकर्मणि। कृष्णस्य विटकरणेन देवविषयिणी रतिः खण्डिता भवति, अतएव श्रृङ्गाररसचर्वणा सर्वथाऽसम्भवतीति काव्यत्वमलिम्लुचं दोषं विनिर्दिश्यैव विरम्यते।

'रीतिरात्मा काव्यस्ये'ति न वामनमतम्

रेवाप्रसादो द्विवेदी

परमार्थसुधाया १.४–अङ्के प्रकाशिते 'वामनमते कः खलु काव्यात्मे'—ति श्री मा० चि० दीक्षितस्य लेखे 'सौन्दर्यमात्मा काव्यस्ये'—ति मम निश्चयस्य यत् खण्डनं तस्य परमार्थसुधाया एवं २.१ अङ्के प्रकाशितेन ममोत्तरेणापरितुष्टो दीक्षितवर्यो भूयोऽपि परमार्थ-सुधाया २.२ अङ्के स्वकीयेन 'काव्यात्मा सौन्दर्यमिति न वामनमतमि'–ति लेखेन निम्न-लिखिता विप्रतिपत्तीरुदभावयत्—

१. रीतेरात्मत्वानङ्गीकारे वामनोक्तिविरोधः
२. अनुक्तप्राप्तिः (अप्राप्तिप्राप्तिः)
३. उक्तप्रतिषेधः (प्राप्तपरीहारः)
४. मतिविभ्रमश्च

तत्र **प्रथमे** वामनोक्तिविरोधे दीक्षिता एवं प्रतिपद्यन्ते "रीतिर्नामेयमात्मा काव्यस्य शरीरस्येवेति वाक्यशेषः'—इति १. २. ६–सूत्रे दत्तया वृत्त्या 'शरीरस्यात्मा यथा प्रधान-भूतस्तथा रीतिः काव्यस्ये' ति वामनसम्मतोऽर्थः, एष च सौन्दर्यं प्रति रीतेरप्राधान्योक्त्या विरुध्यते" । अत्र ब्रूमः—'पदानां गुणविशिष्टा रचना रीतिः काव्यस्यात्मे'—ति दार्ष्टान्तिकेन दृष्टान्तभूतस्य शरीरस्यापि 'यौवनादिगुणविशिष्टाङ्गसंरचनावत्त्वम्, आत्मनश्च यौवनादि-गुणविशिष्टाङ्गसंरचनारूपत्वमुपपद्यते । एवं च काव्ये रीतेस्तदेव स्थानं यद्धि शरीरे यौवना-दिविशिष्टाङ्गसंरचनायाः । उक्तं चैतद् वामनेनैव—

'युवतेरिव रूपमङ्ग काव्यं (वाक्यं) स्वदते स्वादुगुणं, तदप्यतीव ।
विहितप्रणयनिरन्तराभिः सदलङ्कारपरम्पराभिराभिः ॥

यदि भवति वचश्च्युतं गुणेभ्यो
वपुरिव यौवनहीनमङ्गनायाः ।
अपि जनदयितानि दुर्भगत्वं
नियतमलङ्करणानि संश्रयन्ते ॥

इति ३. १. २. वृत्तिगताभ्यां कारिकाभ्याम्। अत्र रूप्यते इति व्युत्पत्या शरीरमेव रूपम्। प्रतीतं चैतच्छिल्पशास्त्रे कादम्बर्यादिषु च। अत एव द्वितीयकारिकायां यौवन्—वपुर्दृष्टान्तः। न च यौवनमत्र गुणस्थानीयमेव न तु रीतिस्थानीयमिति विसंवादो लभ्यप्रसरः 'अङ्गना'-पदेन समाधेः। अङ्गनापदं हि व्याकरणशास्त्रेण प्रशस्ताङ्गता-परम्। प्राशस्त्यं च गुणादिमत्त्वेन रचनाविशेषवत्त्वेन, एतदुभयेन च। एवं च कारिकाभ्यामाभ्यां 'रीतेः अङ्ग-रचना-तुल्यत्वं' वामनवचनैरेव सिद्धम्। अत एव चोक्तमेतेनैव सुमेधसाऽऽचार्येण—"रीतिस्वासु रेखास्विव चित्रं काव्यं प्रतिष्ठितमि'—ति १. २. १३-वृत्तौ। दृष्टान्तेनानेनापि परिणतमेव काव्ये रीतीनां तदेव स्थानं यद्धि चित्रे रेखाणाम्। रेखा हि चित्रेऽवयवस्थानं बिभ्रति। शरीरमेव च तच्चित्रस्य, नात्मा।

उक्ताभ्यां चित्र-युवति--रेखाङ्गविशेषदृष्टान्ताभ्यां स्पष्टमेव काव्ये रीतेः स्वरूपम्। ततश्च शरीरात्मदृष्टान्तोऽप्यननुरुध्य न नेयो दृष्टान्तावुक्तौ। तेन काव्यवाक्यं शरीरस्थानीयम्, यौवनादिविशिष्टावयवसंघटनास्थानीया च रीतिरिति निष्पद्यते सन्दर्भार्थः। सा चेयं रीतिर्यदि काव्यस्यात्मेति वामनेनाभिहिता तर्हि वचनस्यास्य स्तावकार्थवादपरत्वमुत्प्रेक्ष्य शक्यमेव सन्तोष्टुम्। वरो हि वरेण्यायामङ्गनायामङ्गसौष्ठवादिषु स्थविष्ठेष्वेव विशेषेषु बहुमानं बिभर्त्ति। तदानीं स एष चार्वाककल्पः। ततश्च वरस्य मते वरेण्याया वध्वा अङ्गरचनैवात्मा। अस्ति च देहादीनां समेषामेव विशेषाणामात्मपदवाच्यत्वं कोषेषु प्रसिद्धम्—'आत्मा देहेन्द्रियप्राणमनोऽहङ्कारबुद्धिषु'—इत्यादिभिर्वचनैः।

आत्मशब्दस्य भूतार्थवादत्वं पुनः सौन्दर्य एव वामनमते। अङ्गसंचरना हि सौन्दर्यस्य साधनं, न तु सौन्दर्यमेव। अत एव वीतरागस्तस्या जुगुप्सते निवर्त्तते च रागीव करङ्कात्। अत एव प्रतीयमानस्यार्थस्य लावण्येन ध्वनिकृन्मते सौभाग्येन च वक्रोक्तिजीवितकृन्मते साधर्म्यबन्धः। उच्यते हि लावण्यस्य व्यतिरिक्तत्वमङ्गेभ्यः, अनुपलभ्यस्यापि तानि विना। यथा चैतत् तत् सुप्रतीतमेव ध्वन्यालोकादिना। एवं च सौन्दर्यस्यैवात्मत्वे भूतार्थबुद्धिर्वामनस्य। सा चैषा रीतिरात्मा काव्यस्येति स्तुतिभिर्नान्यथनीया।

अतश्च **द्वितीय-तृतीये** विप्रतिपत्ती स्वतः परिह्रियेते। परिसंख्याविधिदृष्टेन वाक्यविदां वर्त्मना शक्यपरीहारे इमे अपि। अस्ति च सामयिकानामसौ क्षुण्णतरोऽध्वा। कुर्वते हि ते दृश्यस्यास्य स्थविष्ठस्यापि प्रपञ्चस्य परीहारम्, अवाङ्मनसगोचरस्य, ततश्चाप्राप्तकल्पस्य परमस्य पुंसः परिग्रहञ्च। अत एव कालिदासः—

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव।

आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा॥ इति

काव्यवर्त्मनि पुनः प्राप्तपरीहारोऽप्राप्तपरिग्रहश्च प्ररूढमूलौ। अत एव प्रतीयमानत्वेन सम्भावितेऽर्थे नितान्तमादृताः, वाच्यत्वेन प्रतीते च तस्मिन्नश्राद्धा अनुभूयन्ते सचेतसः। प्रकृते शरीरात्मदृष्टान्तपुरस्सरं काव्यरीतिसम्बन्धसाधनं काव्यवर्त्मैव, काममिदं शास्त्रकुक्षौ समापतितत्वेन न्यक्कृतिमनुबोभवीतु।

'स्थूलं शरीरम्, सूक्ष्मं शरीरम्, आत्मचैतन्यम्' इति यत्त्रिकं तदप्यादाय शक्यसमाधिरेष शरीरात्मदृष्टान्तः। तथाहि जीवात्मनि यथा तन्मात्रादय उपाधिभूता एवमेव काव्ये गुणालङ्कारादय इति लोचनकारः। एवं सति प्राणादीनामभावे यदि चैतन्यशरीरयोरग्राह्यत्वे प्राणादीनामप्यात्मत्वेन संभावना तथैव प्रकृतेऽपि रीतीनाम्। स चासौ भिन्नः पन्थाः। नैतेनात्र वामनदर्शनस्याकलनेऽर्थः।

अथ **चतुर्थी** विप्रतिपत्तिः—'साध्यसाधनभावेनैव प्राधान्याप्राधान्ययोर्व्यवस्थापने ग्राह्यत्वं प्रति सौन्दर्यस्यापि साधनत्वस्य 'काव्यं ग्राह्यमलङ्कारादि'-त्याचार्येणैव सूत्रितत्वात् सौन्दर्यापेक्षया ग्राह्यत्वस्यैव प्राधान्ये तस्यैव काव्यात्मत्वप्रसक्तिः, प्राधान्यसमानाधिकरणत्वेनैवात्मस्याभ्युपगमादिति। अत्रोत्तरं व्यवहारविद्भिः स्वयमेवोत्प्रेक्ष्यते। एतत् पुनरुच्यते यच्चैतन्यस्य शरीरग्राह्यत्वं प्रति साधनता सर्ववादिसंप्रतिपन्ना, नास्ति च तथापि चैतन्यस्याप्राधान्यन्यक्कारः। तत्समानयोगक्षेम एवैष वादः। अपि च साध्यसाधनभावेन प्राधान्याप्राधान्यव्यवस्था कस्य वा नाभिमता 'उदक-हृति न्यायेन, आलोकदीपशिखान्यायेन, वाक्यार्थ-पदार्थ-न्यायेन, प्रतीयमानाभिधीयमानार्थन्यायेन' च। किञ्च प्रयोजनस्य प्रवृत्तिं प्रति निमित्ततया साधनत्वं व्यवहारशुद्धम्। तत्र च प्रयोजने प्रकृतिविकृतिन्यायेन प्राधान्यसध्रीचीने साधनत्वे विद्यमानेऽपि नास्त्येव उदकहृति-प्रभृति-न्यायस्य विमानना। परिष्कारास्तावत् क्रियन्तां नाम बुद्धिवैशद्यार्थम्। विवक्षा पुनरत्र समादर्त्तव्या। तयैवार्थसिद्धौ कृतं वाग्विजृम्भणेन पौनरुक्त्यकलुषितेन विस्तु।

अथ कल्पः। 'रीतिः सौन्दर्यं चेति द्वितयमप्यभिन्नम्, पदरचनाविशेषस्यैव सौन्दर्यत्वेनाभिमतत्वादि'-ति। अत्र न वामनस्य मनःशुद्धिः – 'रेखासु चित्रमिव रीतिषु काव्यं प्रतिष्ठितमि'-ति काव्यरीत्योः समवायमभ्युपेयुषः। कान्दिशीकति चात्र साम्प्रदायिकानां लावण्यदृष्टान्तः, अकुतोमुखीनति च प्रेक्षावतां सौभाग्य-निदर्शनं समनन्तराभिहितस्वरूपम्।

सिद्धमेतेन यद् 'रीतानां काव्यात्मत्वं स्तुतिमात्रम्, भूतार्थता तु सौन्दर्यस्यैव तत्त्वे लावण्यादिसमानधर्मणि वामनाचार्यमतेऽपि'।

अथ प्रणयः—आक्षेपगर्भा न विदां समाजे वाचो विपश्चिद्भिरुपार्जनीयाः।
एता जलौकन्ति वचोऽधिदेव्याः शास्त्रार्थपद्माकरकेलिकाले ॥ इति

अभिनव-साहित्य-परिचयः

१—विद्यावैजयन्तीनिबन्धमाला (प्रथमो भागः)

लेखकः सम्पादकश्च—**श्रीकेदारनाथ ओझा**

प्रकाशकः—**श्रीकेदारनाथ ओझा**, मुमुक्षुभवन, अस्सी, वाराणसी-५ ।आकारः—डबलडिमाई, पृष्ठानि-६६६, मूल्यम्-३८·०० ।

गवेषणामूलकानां, भारतीयदर्शनाधारेण वैदेशिकदर्शनसम्बन्धं योजयतां, नैकविधनूतनविवेचनसरणिं समर्पयतां, महतां निबन्धानां विलक्षणोऽयं संग्रहः । यो हिं पण्डितानां लेखबद्धशास्त्रार्थावलोकनकौतुकं शमयति, कतिपयविविधशीर्षकनिबन्धेन भारतीयदर्शनानि न केवलं मोक्षफलकानि अपितु ऐहिकजीवने कर्मनिष्ठां सामाजिकीं राष्ट्रियां समुन्नतिञ्च पोषयन्तीति प्रश्नोत्तरचर्चया विशदीकरोति । आधुनिक-वैज्ञानिकध्वनिप्रसारणदूरभाषणयन्त्रकार्यैः शब्दविषयका भारतीयदर्शनसिद्धान्ताः कथं स्थिरतां भजन्ते ? इत्याद्याशङ्काकीलकं निस्सारयति । सुरगवीप्रसूतां संस्कृतवाणीव्यवहारनिपुणैरपि दुर्बोधां संस्कृताश्रितां परिष्कारभाषां सप्रयोजनां परिचाययन् हिन्दीभाषामवतारयति । दार्शनिकानां परस्परखण्डनमण्डनाभ्यां विशेषविभेदमवभजमानां न्याय-सांख्य-वेदान्ताद्यात्मनां सिद्धान्तसरण्यैव साम्यतां नयति, भाषान्तरेषु वैदिकदर्शनानां स्वरूपाणि न शुद्धानि निस्सरन्तीति उद्धरणोदाहरणैः साक्षात्कारयति । विंशशताब्दीयं स्व० श्रीरामावतारशर्मसमुद्घाटितं परमार्थदर्शनं समालोचनमवतारयति । तदवश्यं दार्शनिकजगतः सेवायै प्रभवति, उत्तमदार्शनिकपरीक्षासु निबन्धसहायकत्वेनास्य सन्निवेशः शोभेत ।

प्रथमः कुत्रापि अप्रकाशितः परमाणुवादः स्वतन्त्रो न्यायवैशेषिकयोर्ग्रन्थः शास्त्राचार्यपरीक्षायां पाठ्यतां बिभर्ति इत्यनेके महापण्डिता द्रष्टारो ब्रुवते । सर्वैरङ्गैः विप्रतिपाद्यैर्लक्षणैर्विरोधिपरिणाम-विवर्त-संघातादिपादालोचनैः सज्जीकृत उपनिषदां समन्वयेन दर्शनीयतां गतो विराजते । काशीस्थप्राचीनपण्डितडॉ० गोपालशास्त्रिदर्शनकेसरिभिरयं भूरिप्रशंसया समलंकृतो वर्तते

—**सहसम्पादकः**

२. चक्रवत्परिवर्तन्ते (कथाग्रन्थः)

रचयिता—**श्रीविद्याधरो द्विवेदः**

प्राप्तिस्थानम्—सार्वभौम-संस्कृत-प्रचार-कार्यालयः, डी० ३८।११०, हौजकटोरा, वाराणसी । आकारः—डबलक्राउन, पृष्ठानि-६४, मूल्यम्-रूप्यकद्वयम् ।

कथासरित्सागरगतं वत्सराजोदयनसम्बन्धिकथानकमधिकृत्य महाकविसुबन्धुना सन्दृब्धं गद्यकाव्यं भासविरचितं स्वप्नवासवदत्तं नाटकञ्च सहृदय-हृदयावर्जने विश्रुतं सदपि तदेव

कथानकमवलम्ब्याभिनवं मञ्जुलं प्रसादगुणगुम्फितं पण्डितश्रीविद्याधरद्विवेदेन ग्रथितं "चक्रवत्परिवर्त्तन्ते" नामकं गद्यप्रबन्धं विलोक्य को वा सहृदयः —

'दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ॥'

इति ध्वनिप्रस्थापनपरमाचार्यस्यानन्दवर्धनस्योक्तिं न स्मरति ?

एतत्प्रबन्धप्रणयनात्पूर्वं प्रणीतेषु तद्विषयकप्रबन्धेषु तद्वर्तिनीनां घटनानां कारणं तदुद्देश्यञ्च समग्रस्य प्रबन्धस्याध्ययनं विना जिज्ञास्यमेवास्ते, परञ्चास्मिन् कथाप्रबन्धे तज्जिज्ञासाशमनपूर्वकं कुतूहलप्रवर्धनपरतैव प्रतिभाति । यद्यपि कथाप्रबन्धानां नैष पन्थाः, परञ्चास्य तन्नियमपारतन्त्र्याभावेनापि विच्छित्तिविशेषोद्भावने नाभिपतति कश्चनान्तरायः ।

अत्र हि प्रवाहपूर्णा भाषा, घटनानुकूला संघटना, संवादपेशलता च कामपि विलक्षणां काव्यीयां सम्पत्तिं समेधयतीति दिक् ।

—श्रीगोविन्दपाण्डेयः

३. श्रीनिधिग्रन्थमाला (तृतीयं चतुर्थं पञ्चमञ्च कुसुमं श्रीरामानुजस्तोत्ररत्नावली च)

रचयिता—श्री U-VE VILLUR NADADOOR, आशुकविसार्वभौमः श्रीभाष्यसिंहासनाधिपतिः **श्रीनिधिस्वामी** ।

प्रकाशकः—वी॰ एस्॰ करुणाकरन् B. E. 13, Vivekanand Colony. Mehdi Patnam, Hyderabad–500028. आकारः—डबलक्राउन, पृष्ठानि—५०, ६०, ६४ तथा १८६ । मूल्यम्–कुसुमत्रयाणां न निर्दिष्टम्; स्तोत्ररत्नावल्याः रूप्यकद्वयम् ।

श्रीश्रीनिधिग्रन्थमालातः प्रकाशितेषु कुसुमेषु तृतीये कुसुमे गङ्गलस्तव-नावल्पाकमणिमाला-देशिकपञ्चदशी-कवचशतक-विण्णगरप्पन्विंशतिनामकानि पञ्च स्तोत्राणि, चतुर्थे कुसुमे मणिमंगलस्तव-विवाहवरदस्तव-तटाकपालकस्तव-पादस्तुति-पुरुषोत्तमषोडशी - सिंहाचलपञ्चाशदूर्ध्वपुण्ड्रप्रबन्धाऽऽचार्यमंगल-देवराजमंगलाख्यानि नव स्तोत्राणि तथा पञ्चमे कुसुमे गोपालत्रिंशच्चिलुकूरस्तुति-हयग्रीवविंशति-हयग्रीवस्रग्धरा - यतिपतिषण्णवति-प्राचार्यनवक - स्वाचार्यविंशतिचिन्तनाचार्यपञ्चकाभिधानि अष्टसंख्याकानि स्तोत्राणि सन्ति ।

एतस्मिन् स्तोत्रग्रन्थत्रये विभिन्नविषयकाणि स्तोत्राणि सन्ति यानि हि ललितया सुगमया किन्तु अर्थगाम्भीर्यसम्वलितया संस्कृतगिरा निबद्धानि । अत एव यत्र तत्र आवश्यकटिप्पण्यपि सौकर्याय प्रदत्ता विद्यते । केषाञ्चन स्तोत्राणां रचनाया विशिष्टं कारणं यथास्थानमुद्दङ्कितमस्ति । वस्तुतः श्रीनिधिस्वामिनो न केवलमत्र काव्य-

रचनानैपुण्यं न वा केवलं स्तवनमेव प्रत्युत स्तोत्रकाव्यस्योत्कृष्टतमं निदर्शनमपि दृग्गोचरीभवति प्रतिष्ठितं भवति च मानसे भक्तिभावभरितानामनवद्यपद्यानां निर्माणस्यानितरसुलभं वैदुष्यम्। एकत्र यदि कल्पनायाः कमनीयं स्वरूपमुपलभ्यते चेदपरत्र भक्तिरसस्य महाप्रवाहोऽनुभूयते, एकतश्चेत् नितरामलंकृता शब्दशय्या परिलक्ष्यते तर्हि अन्यतो भावगाम्भीर्यं नापलपितुं शक्यते। छन्दांसि तु नैकानि प्रयुक्तानि।

स्वच्छाक्षराच्छपत्रादिभिर्मण्डिताः मनोहरैरावरणपृष्ठैर्भृशं हृदयावर्जका इमे ग्रन्थाः सर्वैरेव भक्तिभावभरितैः संस्कृतज्ञैरवश्यं संग्राह्या मननीयाश्च सन्ति।

श्रीरामानुजस्तोत्ररत्नावल्यां श्रीनिधिस्वामिना यतिसाम्राज्यचक्रवर्तिनां श्रीरामानुजाचार्याणामेव स्तुतयो विहिताः। तत्र संस्कृतविभागे श्रीरामानुजवैभवहेतुश्लोक इत्यत आरभ्य यतिपतिषण्णवतिरिति यावत् अष्टादश स्तोत्राणि तथा पूजाविभागे श्रीरामानुजाष्टोत्तरशतनामावलिर्निगमनश्लोकाश्च सन्ति। ग्रन्थोऽयं विशिष्टाद्वैतसिद्धान्तप्रतिष्ठापकाणां श्रीरामानुजाचार्याणामेकषष्ट्यधिकनवशतकजयन्त्युत्सवावसरे नागपुरस्थ-भगवत्पादसभया प्रकाशितः। अस्मिन् स्तोत्रग्रन्थे स्तुतिभिः सहैव काव्यकौशलमपि सम्यक् प्रस्फुटितमास्ते।

आंग्लभाषयाऽनुवादोऽस्य ग्रन्थस्य संस्कृतानभिज्ञानां कृते परमोपयोगि किन्तु हिन्दीभाष्यस्यापि सद्भावोऽत्र समपेक्षित आसीत्। आशास्यते संस्करणान्तरेऽवश्यमेवास्य हिन्द्यामनुवादं विधाय सामान्यानपि जनान् लाभान्वितान् विधास्यन्ति प्रकाशका इति। ग्रन्थस्यास्य रचयितारः श्रीनिधिस्वामिनः प्रकाशकाश्च नितरामभिवन्दनीया नन्दनीयाश्च विद्यन्ते।

४. नूतन-नाट्यप्रस्थानम्

रचयिता—श्री घनश्याम मा० त्रिवेदी

प्रकाशिका—श्री बृहद् गुजरात संस्कृत परिषद्, अहमदाबाद–१। **आकारः—डबल-डिमाई**, पृष्ठानि–१४२, मूल्यम्–८.००।

ग्रन्थेऽस्मिन् लघु-लघूनामष्टसंख्याकनाटकानां सग्रहो व्यधायि। तेषां नामानि सन्ति– सत्यवादी हरिश्चन्द्रः, नमामि देवि कालिके, वैष्णवजनं तु एनं ब्रूमः, विना, महोदधौ प्रविशावः, मेना गुर्जरी, महासतीतोललम् तथा राजयोगी भर्तृहरिः। प्राचीनमभिनवं चेतिवृत्तमादाय सरलतमसंस्कृतगिरा गुम्फितानि नाटकरत्नानीमानि साधारणसंस्कृतज्ञस्यापि कृतेऽनायासेनैव बोध्यानि सन्ति। ग्रन्थकर्त्रा प्रतिज्ञातं यत् अद्यत्वे नवीनतररचनायां प्रायः सर्वेषां रुचिस्तत् कमपि नूतनमेव प्रसङ्गमाश्रित्योपस्थातव्यमिति, तत्सर्वथा ग्रन्थसमाप्तिं यावत् निपुणं निभालितम्। संस्कृतभाषाया मृतात्वलाञ्छनमपनेतुमयं प्रयासो नितरां श्लाघनीयः।

सर्वथाऽभिनवप्रणाल्या रचितानि रूपकाणीमानि ग्रन्थकर्तुः प्रतिभावैशिष्ट्यं नाटकरचनानैपुण्यं चाकस्मादेव प्रकटयन्ति। ईदृशानि नाट्यानि सम्प्रकाश्य पाठकानां पुरस्तादुपस्थापयन्तीयं परिषद् तदधिकारिणश्च सर्वे विद्वांसो भूयो भूयो धन्यवादार्हाः। आशास्यते यदेवमेवाग्रेऽपि श्रीत्रिवेदिमहाभागा नवीनसाहित्यं सृष्ट्वा सचेतसां विदुषां मनो रञ्जयिष्यन्ति तथा संस्कृतभाषायाः शाश्वतिकं गौरवं समेधयिष्यन्ति।

५. श्रीशंकरविजयमकरन्दः

सङ्कलयिता—**वैद्यः श्री शि० वे० राधाकृष्णशास्त्री।**

प्रकाशकः—शिमिलि वेङ्कटरामशास्त्री ट्रस्ट, २५ तंजोर टैंक स्ट्रीट, त्रिचुरापल्ली–७२०००२। आकारः—डबलडिमाई, पृष्ठानि–३७०, मूल्य–१५.००।

ग्रन्थेऽस्मिन् श्रीशङ्करभगवत्पादाचार्याणामैतिह्यं विविधग्रन्थेभ्यो नितरां प्रामाणिकरूपेण संगृहीतम्। द्वात्रिंशेष्वास्वादेषु विभक्तेऽस्मिन् श्रीशङ्करविजयमकरन्दे २७८७ संख्यामिताः श्लोकाः सन्ति यत्र भगवत्पादैर्विरचिताः श्लोकाः १२३४ तथा प्राच्यशङ्करविजयादिभ्यस्तत्रोपलभ्यमानयैवानुपूर्व्या उद्धृताः श्लोका १३६२ संख्यामिता वर्तन्ते। पूर्वोत्तरकथयोरनुबन्धिनोः संश्लेषणाय क्वचित्कथासंग्रहणाय रचिताः, क्वचिद् बहुश्रुतां कथामुपजीव्य निबद्धाः १९१ संख्याकाः श्लोकाः संकलयितुरेव विद्यन्ते। एवं ज्ञायते यत् सङ्कलयितुः श्रीशास्त्रिणो नवनवोन्मेषशालिनी प्रतिभा भगवत्पादस्यैतिह्यं यथाक्रममुपस्थापयितुं कियती क्षमा आसीत्। सत्यमेवानेन श्रीशङ्करभगवत्पादानां विजयमकरन्दस्यास्वादाय मधुकरवृत्तिरेवाश्रिताऽत एव यदेव मधुतया दृष्टं तदेव चूषितम्। वस्तुतः सङ्कलनेऽस्मिन्नदृष्टपूर्वैव शैली समाश्रिता शास्त्रिवर्येण।

सङ्कलितानां श्लोकानामाकरग्रन्थपरिचयः प्रत्यास्वादमादावेव प्रदत्तोऽस्ति। जगद्गुरुरत्नमालायामतिसंक्षिप्ततया बीजरूपेणोल्लिखितानां कथांशानां विस्तारः शङ्करविजयग्रन्थेषु तच्चरितप्रतिपादकेषु काव्येष्वन्यत्र चोपलब्धः संवादी यथारुचि तत्तद्ग्रन्थगतयैवानुपूर्व्या संकलितः। तथागृहीतानां ग्रन्थानां परिचयः पृथक् प्रदत्तः। स्वच्छाक्षरावरणादिभिः सुसज्जितोऽयं झटित्येव समावर्जयति नश्चेतः।

पण्डितराज-ब्रह्मश्री वे० सुब्रह्मण्यशास्त्रिपादानामामुखेन युक्तत्वादतिहृद्यतामाचामन्नयं ग्रन्थो भगवत्पादेषु पारमार्थिकीं भक्तिमभिवर्धयिष्यति तथा तद्विजयमकरन्दलोलुपानां मनांस्यावर्जयिष्यतीति दृढीयान् विश्वासः। एतादृशग्रन्थरत्नं सङ्कलय्य प्रकाशनाय कृतश्रमाः श्रीशास्त्रिवर्या भृशं धन्यवादार्हाः।

६. पालि-व्याकरण

लेखकौ—डॉ० रामअवधपाण्डेयस्तथा डॉ० रविनाथमिश्रः।

प्रकाशकः—मोतीलाल बनारसीदास, चौक, वाराणसी। आकारः—D. D. पृष्ठानि—३६६, मूल्यम्—२०.०० ।

हिन्दीभाषामाध्यमेन पालिव्याकरणस्य ज्ञानायात्र स्तुत्यः प्रयासः कृतो विद्यते। ग्रन्थेऽस्मिन् प्रारम्भिकप्रकरणत उणादिप्रकरणान्तं यावत् विशदं पालिशब्दानां तद्धातूनां च विवेचनं समुपस्थापितम्। परिशिष्टरूपेण त्रयोदेशे प्रकरणे समासान्तप्रत्ययानां विचारणा वर्तते। चतुर्दशे तु प्रकरणे धातूनां पाठः प्रदत्तोऽस्ति। वस्तुतः ग्रन्थोऽयं पालिभाषाया वर्णनात्मकं व्याकरणम्। अत्र हि केवलं प्रथमं प्रकरणमैतिहासिकपद्धतिमाश्रयति यत्र पालि-वर्णानां संघटना सन्धिश्च वर्णिते। अवशिष्टानि प्रकरणानि प्राचीन-पालि-व्याकरणानां वर्णनात्मिकां पद्धतिमनुसरन्ति। यत्र किं रूपं कस्मादुद्भूतम्, कथं च विकसितमित्येतद्-विचारमन्तरैव, यस्मिन् रूपे पालिभाषाऽस्ति, तत्रैकैकस्य रूपस्य किं परस्परं सापेक्षा स्थिति-र्विद्यते, इतीदमेव मुख्यतया निरूपितम्। एवञ्चायं पाणिनीय-व्याकरणसिद्धान्तस्यानुगामी।

आधुनिक-संघटनावादिन्याः विचारधाराया नवप्रेरणाधायकेऽस्मिन् प्रतिष्ठापितं यत् पालिवर्णनावसरे पालिभाषाया आत्मनि स्व-स्वरूपमेवोपस्थापनमधिकं समुपयुज्यते, संस्कृतेन प्रतिपदं स्पर्धया भाषायाः आन्तरिकयोजनायाः स्पष्टं चित्रं पुरस्तान्नोद्भवति। संस्कृतव्याकरणस्य परिसरे यावता सर्वसाधारण्येन भवितुं शक्यं तदुपयुज्य प्राचीन-भाषाचिन्तनधाराया उत्तरोत्तरमभिवृद्धेः प्रयासोऽत्र विहितः। लेखकाभ्यामत्र सारग्राहिण्या स्वबुद्ध्या कच्चान-मोग्गलानाख्ययोरुभयोरेव व्याकरणयोरुपादेयसूत्राणां पादटिप्पणीषूपयोगः कृतो येन ग्रन्थोऽयमधिकः समन्वयात्मको जातोऽस्ति।

पालिभाषायां प्रविविक्षूणां छात्राणां कृते पालिव्याकरणमिदं नूनमेव सहायकं सेत्स्यतीति विश्वसिमः।

७. बालावतारो (पालिव्याकरणं)

सम्पादकः—स्वामी द्वारकादासशास्त्री

प्रकाशिका—बौद्धभारती, पो० बाक्स ४६, वाराणसी—१। आकारः—डबल क्राउन, पृष्ठानि—२१४, मूल्यम्—१०.००

पालिव्याकरणस्य कच्चान—मोग्गल्लान—सद्दनीत्याख्यासु तिसृषु परम्परासु कच्चान-परम्परायाः सर्वोपयोगी महत्त्वपूर्णश्च ग्रन्थो बालावतारो महास्वामिधम्मकीर्तिमहाभागेन पालि-

भाषायां प्रणीतः। तस्यैव हिन्दीभाषानुवादेन सह श्रीशास्त्रिमहोदयेन सम्पादनं कृतमस्ति। बालावतारस्येदं हिन्द्यामनूद्य सम्पादनं प्रथमः प्रशंसनीयः प्रयासः। अनेन महतोऽभावस्य पूर्तिर्भवति। अनुवादेन सहैवाऽऽवश्यकटिप्पणीभिः सूत्राणां ग्रन्थयोऽपि व्यपनीताः।

ग्रन्थान्ते सूत्राणामकारादिक्रमेणानुक्रमणिकाऽपि प्रदत्ताऽस्ते। ग्रन्थारम्भे श्रीभिक्षुधर्मरक्षितमहाभागस्याऽऽमुखं परमोपयोगि सहैव श्रीराहुलमहाभागस्य 'पालिसाहित्यस्य महत्त्व' मपि। मुद्रणदोषविधुरं स्वच्छाक्षरादिभिः सुसज्जितं पुस्तकमिदं पालिभाषाज्ञानाय प्रत्येकं छात्रेण जिज्ञासुना च स्थापनीयं विद्यते। ग्रन्थमिमं सुगमं सरलं च विधाय प्रकाशनाय कृतमनसः स्वामि-द्वारकादासशास्त्रिणो नितरां सभाजयितव्याः सन्ति।

—श्रीविद्याधर द्विवेदी



समीक्षणार्थं प्राप्तानि पुस्तकानि :

१—भारतम्
२—शब्द-विमर्श (हिन्दी)
३—साहिती जगती
४—यूथिका
५—श्रीजवाहरज्योतिर्महाकाव्यम्
६—विद्याधर-ग्रन्थावली
७—श्रीकामाक्षी-मातृकास्तवः

———

निवेदना—स्वीय-नूतनरचनाः परिचाययितुं समालोचनाय चाभिनव-साहित्यप्रणेतृभिरेकैकस्य पुस्तकस्य प्रतिद्वयं प्रेषणीयमिति सानुरोधं निवेद्यते।

लेखकेभ्यो विनम्रनिवेदनानि

संस्कृतपत्रपत्रिकाणां निर्बाधसञ्चालने प्रगतौ चावरोधजनकेषु कारणेषु लेखप्राप्त्यभावोऽपि एकं प्रमुखं कारणं भवति। परं परमार्थसुधाया इदं परमं सौभाग्यं मन्ये यदस्या उपरि लेखकानां महती कृपा वर्तते। अस्माकं परिचितैरपरिचितैश्चापि विद्वल्लेखकैः प्रायेण यथासमयं स्वकीयलेखप्रेषणेनास्माकं सर्वदा साहाय्यं विधीयते, तदर्थमहं लेखकेभ्यो हार्दिकीं कृतज्ञतां ज्ञापयामि। परन्तु सिद्धलेखकानामपि कदाचिदनवधानतया तथा नूतनलेखकानामनुभवाभावात् यदा कदाचित् लेखेषु काश्चन त्रुटयो जायन्ते येन तेषां शुद्ध-सुचारु-मुद्रणेऽसौविध्यं भवति वृथा कालातिपातश्च जायते। तस्मात् लेखकमहोदयानां सेवायां कानिचिन्निवेदनानि निम्नलिखितासु पंक्तिषु विधीयन्ते। आशासे, लेखकमहानुभावा एषु सदयं ध्यानं दत्त्वाऽस्माननुग्रहीष्यन्तीति।

तत्र प्रथमं परमावश्यकञ्च निवेदनमिदं वर्तते यत्—

शीर्षोपेतान् सुसम्पूर्णान् समश्रेणिगतान् शुभान्।
अक्षरान् वै लिखेद् यस्तु लेखकः स वरः स्मृतः॥
अतिकार्श्यम् अतिस्थौल्यं वैषम्यं पंक्तिवक्रता।
अतुल्यानां च सादृश्यम् अविभागः पदेषु च।
लेखदोषा इमे प्रोक्ताः सन्त्याज्या लेखकैः सदा॥

इति नीतिमनुसृत्य लेखकैस्तथा लेखा लेखनीया यथा तेषु वर्णानां पदानां च स्पष्टता सुवाच्यता च स्यात् तथा विरामचिह्नान्यपि सुष्ठु प्रयुक्तानि स्युः, एतदभावे मुद्राक्षरयोजकानां महत् काठिन्यं भवति, तत्संशोधने च संशोधकानां भूयान् कालो गच्छति। तस्मादस्मिन् विषये सर्वदाऽवहितैर्भाव्यं लेखकैः। यदि लेखष्टङ्कणद्वारा टङ्कितः प्रेष्येत तर्हि सोऽपि टङ्कणत्रुटीनां स्वहस्तेन सम्यक् संशोधनं विधाय प्रेषणीयः।

द्वितीयं निवेदनं समस्तपदानां विषये वर्तते। यदि लेखकैर्लेखे दीर्घाणि ह्रस्वाणि वा समस्तपदानि दीयन्ते तर्हि तदन्तर्गतानां शब्दानां पृथक् पृथक्-उल्लेखो न विधेयः, प्रत्युत एकस्मिन्नेव शीर्षे सम्मिलितरूपेण तेषामुल्लेखो विधेयः। यदि वाचनसौकर्याय शब्दानां पृथक् पृथगुल्लेखोऽभिकांक्षितस्तर्हि मध्ये समासचिह्नानि (हाइफन) अवश्यं प्रदेयानि।

तृतीयं निवेदनं सन्धिविषयकं वर्तते। प्रायेणाधुनिका लेखकाः सन्धिनियमान् उल्लंघ्य लिखन्ति, तेन सन्धिविषये सम्प्रति महती अव्यवस्था लेखेषु दृश्यते। बहवो लेखकाः पाठकानां सौकर्याय विसर्गसन्धिनियमान् परित्यज्य सर्वत्र विसर्गस्यैव प्रयोगं कुर्वते। परन्त्वेतेन भाषायाः प्रवाहो नश्यति, कर्णकटुताऽपि जायते। तस्मात् पाठकानां सौकर्येण सह भाषायाः प्रवाहस्य, सौन्दर्यस्य, सुश्रवत्वस्य च रक्षणेऽपि अवश्यं ध्यानं देयं सन्धिनियमाश्च यथासम्भवमवश्यं पालनीयाः।

चतुर्थं निवेदनं, भाषाशुद्धिविषये वर्तते। गच्छतः स्खलनं प्रायेण भवत्येव। अतो लेखकैर्लेखं विलिख्य, तस्यैकवारं द्विवारं वा व्याकरणदृष्ट्या पुनर्वाचनं विधाय, सति स्खलने तस्य संशोधनं च कृत्वा लेखाः प्रेषणीयाः। एवं क्रियमाणे संस्कृतभाषायाः, पत्रिकाणां, तत्पाठकानां च समधिका सेवा सम्पद्येत लेखकानाञ्च लाभो जायेत।

इदञ्च पञ्चमं निवेदनं यत् सर्वैर्लेखकैः स्वकीयं नाम, उपाधयः, कार्यक्षेत्रम्, पत्रव्यवहारसङ्केतश्चेति सर्वमपि स्पष्टाक्षरैः पूर्णरूपेण लेखनीयं येन तेषां परिचयप्रदाने सौविध्यं स्यात्। ग्रन्थकारैर्लेखकैः स्वप्रकाशितग्रन्थानामपि कृपया सूचना प्रदेया।

—सहसम्पादकः

—: o :—

शोकसमाचारः

अस्मत्सहयोगिनां दिल्लीस्थ–'संस्कृतप्रचारकं' पत्रस्य सम्पादकानां श्रीरामचन्द्रभारतीयमहोदयानां ३०।६।७८ दिनाङ्के हृदयगत्यवरोधेन आकस्मिकं देहावसानं जातमिति मर्मान्तकं वृत्तं सर्वेषामपि संस्कृतानुरागिणां कृते भृशं शोकावहम्। श्रीमन्तो भारतीमहोदयाः प्रारम्भादेव अध्यापन–प्रचार–ग्रन्थलेखन–पत्रसम्पादन–सभासंयोजन–सामयिकान्दोलनप्रभृतिकार्यकलापैः सुरभारतीसेवायै सर्वथा समर्पितजीवना आसन्। गतेषु मासेषु संस्कृतशिक्षाया अनिवार्यतासम्पादनाय ते अनवरतं प्रयतमाना अभूवन्, दिल्लीस्थं नेतृवृन्दञ्च एतदर्थं ते भृशं प्रभावितानकार्षुः। सम्प्रति एतदेव तेषां दैनिकं कृत्यं संवृत्तमासीत्। महतो दुःखस्य विषयोऽयं यत्ते तादृशे समये दिवङ्गता यदा तेषां जीवनस्य महती अपेक्षा आसीत्। परं पराधीने विषये किं बहुविलपितेन? सम्प्रति एतदेव वयं भगवन्तमभ्यर्थयामहे यत् परलोके ते शुभां गतिमवाप्नुयुः, इहलोके च तैः सञ्चालिताः सर्वाः प्रवृत्तयो विदुषां सहयोगेन सुसम्पन्नाः सफलाश्च सम्पद्यन्तामिति।

—शोकसन्तप्तः सहसम्पादकः

सरस्वती श्रुतिमहती महीयताम् ।

—महाकविकालिदासः





इतिनामकेन विश्वविश्रुतेन लाक्षाप्रतिष्ठानेन

सुरभारती-सेवायै



सादर-समर्पणम्



प्रवचनचिन्तामणि-प्रवचनपारिजातयोः

सम्बन्धे सम्मतिः

डॉ० सत्यनारायणशर्मणा विरच्य प्रकाशितौ द्वावपि निबन्धात्मकौ ग्रन्थौ वारं वारं पठित्वा भृशं प्रमोदमन्वभवम्। शर्मण्य (जर्मन)—देशे संस्कृतप्राध्यापकपदमलङ्कुर्वाणः डॉ० सत्यनारायणशर्मा वैदेशिकानां संस्कृतविदुषां समालोचकानाञ्च बहुवर्षव्यापीनि सारवन्ति चिन्तनानि सम्यगवगाह्य तेषां च सरल—सरसया संस्कृतगिराऽनुवादं सम्पाद्य संस्कृतविद्वत्समाजस्य, विशेषतो वैदेशिकभाषाज्ञानविकलस्य, महान्तमुपकारं कृतवानिति सर्वथाऽस्माकं सर्वेषामपि संस्कृतसेवापरायणानामभिनन्दनार्हः।

उभयोरपि ग्रन्थयोः प्रबन्धेषु वेद-दर्शन-साहित्याऽलङ्कार-काव्य-नाटक-तन्त्र-पुराण-व्याकरणादिविषयेषु वैदेशिकैर्विद्वद्भिः प्रकटीकृतानां महत्त्वपूर्णानां विचाराणां सारभूता अंशाः सुचारुरूपेण निरूपिताः शर्ममहोदयेन। भारतीयानां दार्शनिकानां, वैयाकरणानां कवीनां कलाविदां च जीवनचरितानि समुद्दिश्य तेषां देशकालादिविषयेऽपि वैदेशिकविद्वद्वृन्देन ऊहापोहपूर्वकं विविधप्रमाणैः सह ये तर्का उपस्थापिता ये च निर्णया गृहीतास्तेषामपि ग्रन्थद्वयेऽस्मिन् समावेशो दृश्यते।

भूयांसो भारतीया विद्वांसो भारतीयवाङ्मयविषयेषु समर्पितसमस्तजीवनानां वैदेशिकविदुषां सारगर्भितैर्विचारैरपरिचिता भवन्ति। ते यदि तानपि विचारानवगच्छेयुस्तर्हि तेषामपि विचारा व्यापकाः परिष्कृताश्च जायेरन्। भारतीयविद्यासु अनुसन्धानकर्मप्रवृत्तानां विदुषां विद्यार्थिनाञ्च कृते सर्वथा अमूल्यमेवेदमवदानम्। विषयाणां महत्त्वेन सह भाषायाः प्रसन्नमधुरा शैली अपि अभिनवसंस्कृतलेखकानां कृते सुमहदुपकारिका स्यात्।

किं बहुना, इतः पूर्वं न कदापि संस्कृतभाषायामीदृशः कोऽपि ग्रन्थोऽवलोकितोऽस्माभिः कर्णगोचरी कृतो वा। आङ्गल-जर्मनप्रभृतिभाषाणां गवेषणाप्रधानेषु ग्रन्थेषु पत्रपत्रिकादिषु तु नूनं वैदेशिकविदुषां भारतीयविद्याविषयिणी मनीषा प्राकाश्यमेति परं सा न केवलसंस्कृतज्ञानवतामुपकारिणी सुलभा वा। अतो ग्रन्थरत्नद्वयस्यास्य वैशिष्ट्यमुपयोगित्वं च सुतरां सुस्पष्टम्। ईदृशसमुत्कृष्टग्रन्थरचयित्रे डॉ० सत्यनारायणशर्ममहोदयाय हार्दिकीश्शुभकामना धन्यवादांश्च वितीर्य, संस्कृतजगति सर्वैरपीमे कृती सादरं स्वपुस्तकनिलये रक्षणीये सबहुमानं च पठनीये इति भृशमभ्यर्थये।

—के० लक्ष्मणशास्त्री

आन्ध्रप्रदेशे भूतपूर्व उच्चसस्कृतशिक्षानिदेशकः,

हैदराबाद।

परमार्थसुधा

त्रैमासिक-संस्कृत-पत्रिका

परमार्थसुधा

(त्रैमासिक-संस्कृत-पत्रिका)

वर्षो द्वितीयः * अङ्कश्चतुर्थः

आषाढ-श्रावण-भाद्रपदमासाः

संवत्सरः —२०३५

सम्पादकः — श्रीसत्यनारायणशर्मा

सहसम्पादकः — श्रीवासुदेवद्विवेदी शास्त्री

प्रकाशकः
श्रीसोहनलालः
मन्त्री, परमार्थन्यासः
मुड्हू, राँची (विहार)

★

प्राप्तिस्थानं, पत्र-लेख-मूल्यादि-प्रेषणसङ्केतश्च—
श्रीविद्याधरद्विवेदी
व्यवस्थापकः – परमार्थसुधा
सार्वभौम-संस्कृत-प्रचार-कार्यालयः
डी० ३८।११०, हौजकटोरा, वाराणसी
(उत्तर-प्रदेशः), दूरभाषः – ६६०२१

★

वार्षिकं मूल्यम्– दश रूप्यकाणि
विदेशेषु –दश डालराणि

★

मुद्रकः
वैजनाथ प्रसाद
कल्पना प्रेस
रामकटोरा रोड, वाराणसी।

विषया लेखकाश्च

परमार्थसूक्तयः

श्रद्धायाः महत्त्वम्

(१)

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः ।
श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि ॥

(२)

प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः ।
प्रियं भोजेषु यज्वस्विदं म उदितं कृधि ॥

(३)

यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे ।
एवं भोजेषु यज्वस्वस्माकमुदितं कृधि ॥

(४)

श्रद्धां देवा यजमाना वायुगोपा उपासते ।
श्रद्धां हृदय्य याकुत्या श्रद्धया विन्दते वसु ॥

(५)

श्रद्धां प्रातर्हवामहे श्रद्धां मध्यन्दिनं परि ।
श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ॥

—ऋग्वेदात्-मं० १०, अ. ११, सू. १४१

प्रतीच्ये जगति अध्यात्मरामायणाधीतिः

श्रीसत्यनारायणशर्मा

अध्यात्मरामायणं न केवलं राममुखाब्जमधुपीकृतचित्तवृत्तीनां रामोपासकानां कृते, साहित्यरसपीयूषपानप्रवणमानसानां कृतेऽप्यनवद्यं रत्नमिव चकास्ति। ब्रह्माण्डपुराणस्य भागभूतोऽयं ग्रन्थो दार्शनिकदृष्ट्याऽपि अनुशीलनीयः। रामानन्दसम्प्रदाये तु रामायणमिदं श्रद्धया परमप्रेम्णा च पापठ्यते। वसन्तसुरभिसमन्विते कलकोकिलनादकूजिते चैत्रमासे रघुकुलरत्नस्य दाशरथेर्जन्मदिवसे भक्ता भक्तिभावितमनसाऽध्यात्मरामायणं पठन्ति। यस्य कवितामञ्जरीं रामभ्रमरोऽञ्जसा भूषयाञ्चक्रे, यः स्वान्तःसुखाय रघुनाथगाथां रचयामास, केवलं तस्यैव भक्तिरसावतारस्य चेतसि ग्रन्थस्यास्य प्रभावः परिलक्ष्यते इति चेन्न, अन्येऽपि बहवः श्रेयोऽन्वेषिणोऽध्यात्मरामायणात् सत्प्रेरणां लेभिरे।

जर्मनदेशीयविदुष आचार्यग्लाजेनापस्य चेतो युवावस्थायामेव अध्यात्मरामायणस्य महिम्ना समाकर्षि। अध्यात्मरामायणस्य दार्शनिकदृष्टिमुद्दिश्यामुना निबन्धोऽप्यलेखि, यस्य प्रकाशनं सर्वस्वहारिविश्वसंगरादसम्भवं सञ्जातम्। पुस्तकालयेन साकं निबन्धोऽयमपि विनाशमाप। तदनु रामायणद्वयमुद्दिश्य विद्वानसौ कृतिमेकां प्रकाशयाञ्चकार। भारतीयसाहित्येतिवृत्तप्रणेताऽचार्यविंतरनित्सोऽपि स्वेतिहासेऽध्यात्मरामायणविषयकान् यान् विचारान् निरूपयाञ्चक्रे, तेऽपि चर्चामपेक्षन्ते। अधुनातनविदुषां चेतसि ग्रन्थरचनाकालजिज्ञासा बलीयसी भवति। श्रद्धधानानां भक्तानां प्रवृत्तिस्त्वन्या। ग्रन्थोऽयं कदा कुत्र केनालेखि? चैतन्यमतावलम्बिनो नरोत्तमदासस्य टीका सम्भवतः षोडशशतकस्यान्तिमे चरणे प्रणीता बभूव। अस्माद्धेतोरध्यात्मरामायणं षोडशशतकात् पूर्वं विरचितमिति मतमनायासेनैव दृढीभवति। महाराष्ट्रीयः कविरेकनाथ इदं काव्यमाधुनिककाव्यमिति सञ्जानाति। अतएव ग्रन्थोऽयमतिपुरातनो भवितुं नार्हतीति ग्लाजेनापस्योहने विशयावकाशो नास्ति।

अध्यात्मरामायणेऽप्यपरग्रन्थवत् प्रक्षिप्तांशानां सम्भावना तु न निराक्रियते। अध्यात्मरामायणं पञ्चदशशतकस्य कृतिर्यदि स्यात्तर्हि किं रामहृदयं रामगीता च पञ्चदशशतकस्यैव

कृती ? आचार्यग्लाजेनापस्य मते नास्तीदमपरिहार्यम् । ते अध्यात्मरामायणात्पुरातने भवितुं शक्नुतः, कालं प्राप्याङ्गीभूते । रामस्यानन्दमूर्तित्वमचलत्वं परिणामहीनत्वं मायागुणानुगतत्वञ्च रामहृदये कविना प्रत्यपादिषत । यदात्मनोरैक्यज्ञानमुत्पद्यते तदाऽविद्या स्वकार्यैर्नश्यति । भक्तेस्त्वत्र खलु प्राधान्यम् । भक्तिविमुखानां शास्त्रगर्तेषु मुह्यतां जन्मशतैरपि मोक्षो न सम्पत्स्यते । अध्यात्मरामायणस्य शेषांशस्यापि इदमेव चिकीर्षितम् ।

ग्रन्थस्यास्य प्रतिलिपीनामभावो नास्ति; मुद्रितसंस्करणानामपि बाहुल्यं विद्यते । संस्कृतटीका आंग्लटीका हिन्द्यामुपनिबद्धाष्टीका च लभ्यन्ते । ग्रन्थस्य लोकप्रियतायाः सुदृढं प्रमाणमत्र प्राप्यते । योगवासिष्ठवदेव ग्रन्थस्यास्य दृष्टिराध्यात्मिकी विद्यते । न केवलं साहित्यरससिसृक्षयैव ग्रन्थकारेण श्रमोऽकारि । अनन्तस्य सच्चिदानन्दस्य ब्रह्मण एव माया जगदिदम् । भक्तिबलोपेतमानसाश्चित्तैकाग्र्यं सम्पाद्य मायापाशप्रहाणाय यतन्ते । भक्तिमन्तरा नास्ति कोऽप्युपायो दुःखविमोक्षणस्य । आभासस्तु मृषा, बुद्धिरप्यविद्याकार्यम् । ब्रह्मणोऽविच्छिन्नत्वं ग्राह्यं, विच्छेदोऽयं विकल्पत एव । यदा परात्मात्मविभेदभेदकं भास्वरं विज्ञानमात्मन्यवभाति तदैव आत्मसंसृतेः कारणभूता सकारणा मायेयमञ्जसा प्रविलीयते । मुमुक्षुः समास्वादितचिद्घनामृतः सन्नखिलं निराकुर्यात् । नेति नेतीति । निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽद्वय आत्मैव ध्येयः । यथा रज्ज्वादिकेऽसर्पभूतेऽहिर्विभाव्यते, तद्वदपि परमात्मनि जगदिदम् । मोक्षाकाङ्क्षी सञ्जातविद्यानुभवः सन् अशेषं जडं त्यजेत् । आत्मनः प्रकाशरूपत्वं जन्मरहितत्वमद्वैतत्वमसकृद्विभातत्वं विशुद्धविज्ञानघनत्वं निरामयत्वमक्रियत्वमचिन्त्यशक्तिमत्त्वञ्च मुहुर्मुहुर्विभाव्यानि । विज्ञानदृङ्मुक्तोऽमलः परिविस्मृताखिलो जातपरात्मभावनोऽचलवारिसिन्धुवत् नित्यात्मसुखप्रकाशकः सम्पद्यते । अध्यात्मरामायणप्रणेता जीवात्मन ऊर्ध्वगत्यर्थमित्थं भक्तिज्ञानयोः समन्वयमकांक्षिष्ट ।

योगवासिष्ठस्य दार्शनिकदृष्टौ स्वातन्त्र्यं निभाल्यते । तद्विपरीतं शाङ्करवेदान्तेन रामभक्तिं समन्वेतुमध्यात्मरामायणप्रणेत्राऽचेष्टि । रामायणयोरनयोः साहित्यिकशैल्या भिन्नत्वमपि चर्चामपेक्षते । योगवासिष्ठवदध्यात्मरामायणं वाल्मीकिरामायणस्य पूरकरूपेण ग्रन्थकारो रचितवानिति चेत्, न । अध्यात्मरामायणप्रणेता बहूनि रामायणानि जानीते स्मेति । विपिनवासार्थं समुद्यता सीता रामं प्रति निजगाद बहुभिर्द्विजैर्बहुशः रामायणानि भवता श्रुतानि । सीतां विना रामः किं कुत्रचिद् गतः ? रामायणानां नामानि तु ग्रन्थेऽस्मिन्न संकेतितानि । वाल्मीकिरामायणमन्तरा तस्मिन् युगेऽन्यान्यपि बहूनि रामायणान्यासन्निति तु स्पष्टम् । सदन्र्भेऽस्मिन् आचार्यग्लाजेनापो द्वादशशतकोद्भूतस्य वैष्णवदार्शनिकस्य माध्वस्य मतं निर्दिशति । मूलरामायणमेवासौ महर्षवाल्मीकेः कृतिं मेने ।

वाल्मीकिरचिते रामायणेऽध्यात्मरामायणे च कतिचित्प्रसङ्गेषु वर्णनवैभिन्न्यमवलोक्यते। तन्निर्दिशता आचार्यग्लाजेनापेनाऽध्येतॄणां पन्थाः सरलीकृतः। वाल्मीकिरामायणे बालकाण्डे देवा गन्धर्वाः सिद्धाः परमर्षयश्च यज्ञभागप्रतिग्रहार्थं यथाविधि समागच्छन्ति। रावणस्यानुशासन-विक्लिन्नास्ते लोककर्तारं ब्रह्माणमब्रुवन्—भगवंस्त्वत्प्रसादेन रावणः सर्वान् बाधते। तं शासितुं न शक्नुमः। त्वया प्रीतेन पुरा तस्मै वरो दत्तः। तं मानयन्तस्तस्य सर्वं क्षमामहे। त्रीन् लोकान् स उद्वेजयतीति। अध्यात्मरामायणे भूमिर्गोरूपं धृत्वा दिविजमुनिगणैः साकमब्जासनस्य लोकं गच्छति। तत्र रुदन्ती सा ब्रह्मणे सर्वमुपगतं व्यसनं निवेदयति, तदनु ब्रह्माऽखिललोक-हृत्स्थं हरिमानन्दवाष्पैर्वृतोऽस्तौषीत्। अध्यात्मरामायणे रामस्य बाललीलावर्णनं भागवत-पुराणस्थं कृष्णबाललीलावर्णनं स्मारयति। अध्यात्मरामायणानुसारं दशरथः पूर्वजन्मनि कश्यपप्रजापतिरासीत् ब्रह्मणः सुतः। कौसल्या चासीद् देवमाता अदितिः। विष्णुपूजाध्यानैक-त्परावग्राम्यविषयौ तौ बहुवत्सरं तपश्चक्राते।

(२)

अध्यात्मरामायणे भगवन्तं रामं देवर्षिर्नारदो वनवासार्थं प्रेरयति, राज्याधिरूढत्वा-त्पराङ्मुखं चिकीर्षति। अन्तःपुराजिरे नीलोत्पलदलश्यामं राघवेन्द्रं द्रष्टुमसावायाति, शुद्ध-स्फटिकसंकाशः शरच्चन्द्र इवामलो दिव्यदर्शनः। रामेण सत्कृतो देवर्षिर्नारदो भक्तवत्सलस्य महिमानं निगद्य स्वं रामभक्तानां किंकरमिति निवेदयति। तस्य वर्णनानुसारं जाग्रत्स्वप्नसुषु-प्त्याख्येयं संसृतिः। रघूत्तमस्तु तस्या विलक्षणः साक्षी। तस्मादेव जगज्जातम्। तस्मिन्नेव सर्वमिदं प्रतिष्ठितम्। तस्मिन्नेव कृत्स्नं लीयते। सर्वदेहेषु सर्वा बुद्धयश्चिन्मात्रज्योतिषा रामेण प्रकाश्यन्ते। अज्ञानादेव सर्वं रज्जौ भुजङ्गवत् प्रभौ न्यस्यते। रामभक्तियुक्ता हि मुक्ति-भाजः। इत्थं राघवेन्द्रस्य महिमानं वर्णयित्वा देवर्षिरानन्दाश्रुपरिप्लुतः सन् स्वागमनहेतुं प्रकुरुते। रघुसत्तमं राज्यरक्षार्थं राजा दशरथोऽभिषेक्तुमिच्छति। राज्याभिसंसक्तिः सत्यसन्धत्व-विरोधिका। भूभारहरणार्थं वै रामावतारो, न तु राज्याभिसंसक्तये। एतद् गदितं श्रुत्वा नारदं रामः सस्मितं प्राह —यत्पूर्वं प्रतिज्ञातं तत्करिष्ये। सर्वभूभारं हरिष्ये। कानने मुनिवेशधृक् चतुर्दशसमा उषित्वा राक्षसान् नाशयिष्यामि।

राज्ञो दशरथस्य पुरोहितो वामदेवो वाल्मीकीयरामायणे केवलं निर्दिष्टो विद्यते, बालकाण्डेऽयोध्याकाण्डे च। अध्यात्मरामायणेऽसौ दुःखसमावृतान् जनान् सान्त्वयति। रामो वा सीता वा नानुशोचनार्हौ। रामः परो विष्णुः। आदिनारायणः। जानकी तु योगमाया। लक्ष्मणाख्यः शेषस्तमन्वेति। मायागुणैर्युक्तस्तत्तदाकारवानिव एष विभुः प्रतिभाति। एष एव भगवान् रजोयुक्तो विश्वभावनो ब्रह्माऽभूत्। एष एव सत्त्वाविष्टः सन् जगत्प्रतिपालको विष्णुः सञ्जातः। तमसाविष्टोऽसावेवान्ते प्रलयं कुरुते। ये मनुजा रामरामेति नित्यं भुवि जपन्ति तेषां

मृत्युभयादीनि न भवन्ति। कलौ रामनाम्नैव मुक्तिः स्यात्। लोकक्कदसौ मायामानुषरूपेण विडम्बयति, भक्तानां भजनार्थम्। मानुषं वपुराश्रितोऽसौ परमात्मा। गुरुर्वसिष्ठोऽपि वाल्मीकीयरामायणे भरतस्य दुःखाभिनिवेशं दूरीकर्तुं चिचेष्टे। रामो भरतस्य निर्बन्धं दृष्ट्वाऽध्यात्मरामायणे गुरवे नेत्रान्तसंज्ञां कुरुते। ज्ञानिनां वरो गुरुर्वसिष्ठो भरताय रामस्य नारायणत्वं स्पष्टीचकार। सीता योगमाया। यः सर्वदा राममन्वेति स लक्ष्मणः शेषः। कैकेय्या निष्ठुरभाषणादिकं सर्वं देवकृतम्। रामस्य विनिवर्तने आग्रहस्त्याज्यः। स्वयं कैकेयी श्रीरामस्य सनातनप्रभुत्वं जानीते। नेत्रजलाकुला सा रामं स्तौति, रामस्य क्षमासारत्वं निर्दिश्य। रामेणैव प्रेरितो लोकः साध्वसाधु वा कुरुते। इदं विश्वं रामाधीनमस्वतन्त्रम्। कुलकेच्छया यथा कृत्रिमनर्तक्यो नृत्यन्ति तथैव जगतः सर्वाः क्रिया भवन्ति। मुनिरगस्त्यो वाल्मीकीयरामायणेऽरण्यकाण्डे रामेण सह संलपते। अध्यात्मरामायणेऽरण्यकाण्डे मुनिवरोऽयं रामस्य परात्परत्वं प्रतिपादयति। अगस्त्यस्याश्रमः सर्वर्तुफलपुष्पाढ्यो नानामृगगणैर्युतो नन्दनोपम आसीत्! विविधैः पक्षिसंघैर्नादितः। अपरब्रह्मलोकसंकाशमायान्तं मुनिं दृष्ट्वा हर्षसमाकुलो रामः सीतया लक्ष्मणेन च सह भुवि दण्डवत्पपात। शशिनिभाननं राममेकान्ते कृताञ्जलिः सन्नृषिस्तस्य परमात्मशक्तिं वर्णयति। भूमेर्भारापनुत्यर्थं रामः खलु आगमिष्यतीति विभावयन् मुनिभिः सार्धं वसन् राममेव परिचिन्तयन् कालमसौ यापयामास। सृष्टेः प्राक् राम एवासीत् निर्विकल्पोऽनुपाधिकः। देवतिर्यङ्मनुष्याः सर्वे कालक्रमेण तस्मादेव जायन्ते। यदाऽसौ सृष्टिलीलां कर्तुं मीहते तदा गुणवानिव मायामङ्गीकुरुते। इष्टानिष्टप्राप्तौ समबुद्धीनां विगतैषणां संन्यस्ताखिलसङ्कल्पानां सन्निधितो भक्तिः समुदेति; उपपन्नायां भक्तौ स्फुटं विज्ञानं समुदेतीत्यध्यात्मरामायणकर्त्रा विस्पष्टं भक्तिज्ञाने समन्वेतुं बलवदचेष्टि।

स्पष्टमेवाध्यात्मरामायणस्य वर्णनशैली वाल्मीके रामायणस्य शैल्या भिन्ना, तयोश्चिकीर्षितमपि भिन्नम्। अतएव वर्णनपार्थक्यन्तु स्वाभाविकम्। आचार्यग्लाजेनापः सपरिश्रममेवंविधस्थलानि निर्दिदेश, ग्रन्थयोस्तुलनात्मकानुशीलनसौकर्यार्थम्।

अध्यात्मरामायण एवंविधान्याख्यानान्यपि वीक्ष्यन्ते येषां वाल्मीकीयरामायणे महर्षिणा वर्णनं नो विहितम्। अध्यात्मरामायणस्य शैली पुराणसमा। शिवस्य पार्वत्याश्च संवादं सूतो वक्ति। परानुग्रहकांक्षी योगी नारदः सकलाँल्लोकान् पर्यटन् सत्यलोकमुपागमत्। तत्र नष्टबुद्धीनां पुण्यविवर्जितानां कलौ युगे वसतां लघूपायेन कथं परलोकगतिर्भवेदिति जिज्ञासते। अम्बुजासनो देवर्षेर्वाक्यमाकर्ण्य तस्मादध्यात्मरामायणाख्यस्य महादेवनिगदितस्य महिमानं निजगाद—यस्त्वनन्यधीः सन् प्रत्यहमध्यात्मरामायणं यथाशक्ति वदेत् स जीवन्मुक्तपदमाप्नोतीति।

अयोध्याकाण्डे यमुनामुत्तीर्य रामश्चित्रकूटाद्रिमेति। आश्रमोऽयं नानामृगद्विजाकीर्णो नित्यपुष्पफलाकुल आसीत् ऋषिसंकुलश्च। कन्दर्पसदृशाकारं कमनीयाम्बुजेक्षणं लोकसुन्दरं रामं दृष्ट्वा मुनिर्विस्मयादनिमिषेक्षणः सन् उत्तस्थौ। सर्वगुहाशयस्थं चिद्घनमलेपकं सर्वगतं वरेण्यं प्रभुं मुनिरात्मकथां श्रावयामास। रामनामप्रभावादसौ स्वयं ब्रह्मर्षित्वमवाप्तवान्। अमुष्य द्विजत्वं जन्मनैवासीत् न तु कर्मणा। चोरैः संगम्य धनुर्बाणधरो जीवान् क्लेशयति स्म। महति कानने एकदाऽमुना सप्त मुनयो दृष्टाः। तेषामनुग्रहेणासौ बाह्यं विस्मृत्यैकाग्रमनसाञ्जसा मरेति व्यत्यस्ताक्षरपूर्वकं रामेति नाम जजाप, सर्वसंगविहीनः सन् रामनाम्नः प्रभावात् किरातेषु वर्धितोऽपि जीवानामन्तकोपमोऽसौ महर्षित्वमवाप।

शुकाभिधो रावणानुचरो वाल्मीकीयरामायणेऽपि वर्णितः। अध्यात्मरामायणानुसारमसौ पूर्वजन्मनि ब्राह्मण आसीत्, एकान्तसेवी विपिनवासी च। वानरैस्ताडितो दशाननमुपयाति। तमुपदिशति च। रामो मानुषो नास्ति साक्षादादिनारायणः। रामश्च सीता च जगतस्तस्थुषश्च पितरौ। क्षणनाशिनि संसारे मलमांसास्थिदुर्गन्धभूयिष्ठेऽहङ्कृतालये जडात्मके काये कैवास्था? भोगस्तु श्वशूकरतनावपि, निरयेष्वपि सम्भवः विवेकाढ्यं देहं द्विजत्वं च लब्ध्वाऽज्ञानीव भोगानुधावनं कथम्? शुकमुखोद्गीतमज्ञाननाशनं वाक्यं श्रुत्वा रावणः क्रोधताम्राक्षो भूत्वा चुकोप। समापन्नविनाशकाले हिताहितं नरो न संशृणुते।

(३)

अध्यात्मरामायणप्रणयनकर्तुश्चिकीर्षितं वाल्मीकीयरामायणप्रणेतुर्ध्येयाद् भिन्नार्थमासीदतस्तयोर्वर्णनवैभिन्न्यं विस्मापनं नास्ति। आचार्यग्लाजेनापो जटायुशबरीस्वयंप्रभादीनां निधनोत्तरां गतिमुद्दिश्य विहितमध्यात्मरामायणकारवर्णनं प्रति विदुषां ध्यानं समाकर्षन् भागवतपुराणस्य प्रभावं संकेतयति। पुराणेऽस्मिन् न केवलं त्रिभुवनकमनीयरूपस्य स्मितरुचिरविकासिताननाब्जस्य हरेर्भक्ता एवारिबुद्ध्या तस्य ध्यानानुगतमनस्कास्तामसा अपि भवबन्धाद् विमुच्यन्ते। अखिलात्मनः कैवल्यादभिमानस्त्वतर्क्यो मनोयोग एव साफल्यविधायकः। वैरानुबन्धेन, भक्त्या, भयेन वा सकलजगत्स्थितिसंयमादिहेतौ मुमुक्षुर्मनो युञ्ज्यात्। असौ सर्वभूतात्मभूतात्मा कथञ्चिदपि पृथक् नेक्षते। देवर्षिनारदस्य कथनानुसारन्तु वैरानुबन्धेन मर्त्यो यथा भगवत्तन्मयतामियात्तथा न भक्तियोगेन। मायामनुजं वैरेणाप्यनुस्मरन्तो बहवः पूतपाप्मानस्तमापुः। अघं हित्वा बहवः कामाद् द्वेषाद् वा तद्गतिं गताः। अध्यात्मरामायणेऽपि रघुनन्दनस्य शत्रूणां विमोक्षणं ग्रन्थकारेणावर्णि। रावणस्य देहोत्थं ज्योतिर्देवानां पश्यतां रघुश्रेष्ठं प्रविवेश। विष्णोः कारुण्यभाजनानां देवानां विस्मयमपाकर्तुं देवर्षिर्नारदो ध्यानयोगस्य महिमानं निजगाद। रावणोऽपि नित्यं क्रोधसंयुतो राममन्तरितं हृदि भावयन् भयात्सर्वत्र तं पश्यन्

स्वप्नेऽपि राममेवानुपश्यति स्म । निर्धूताशेषकल्मषोऽसावन्ते रामसायुज्यमाप । पापिष्ठोऽपि स्नेहाद् भयाद् वा नित्यं रघुकुलतिलकं स्मरन् यदि सम्परेतः स्यात्, स भवशतजनितानेक-दोषैर्विमुच्यते । वाली कनिष्ठस्य भ्रातुर्भार्यायां बलात् रमते स्म । स महापातकी आसीत्तथापि रघूत्तमशराभिहतो सुखाकरेण शीतलकरेण विमृष्टः कपिदेहं विमुच्यानन्यलभ्यं परमहंसगणैर्दुरापं पदं प्राप । अन्तकाले भगवन्तं स्मरन् यः कलेवरं त्यजति स भगवद्भावं यातीति भगवद्-गीतावचनानुसारमन्येऽपि प्रणतार्तिहारिणं भवप्रवाहोपरममात्मारामं स्मरन्तः परां गतिमापुः ।

गृध्रराजो जटायुर्वाल्मीकीयरामायणे यशस्करं सुदुष्करं कर्म कृत्वा रणे निपातितः पुण्यां शुभामात्मनो गतिं जगाम । अध्यात्मरामायणे तु भक्तेर्महिमानं दर्शयन् ग्रन्थकारो बहुभिः श्लोकैस्तस्य भगवत्पदावाप्तिं निजगाद । म्रियमाणेन तेन रामो मायामनुजरूपधृगित्यदर्शि । रतिपतिशतकोटिसुन्दराङ्गं शतपथगोचरभावनाविदूरं यतिपतिहृदये सदा विभान्तं प्रभुमन्त-काले दृष्ट्वैवासौ सारूप्यमाप ।

शबरी वाल्मीकीयरामायणानुसारं रामाय प्रत्युपस्थिता सती रामसन्दर्शनादेव स्वस्या-स्तपःसिद्धिप्राप्तिं शशंस । देववरे पूजिते तस्या जन्म सफलं जातं, स्वर्गवासिश्च निष्पन्ना । विपिनवासिनी सा रामचक्षुषा पूयते । रामप्रसादादक्षयाँल्लोकानाप्नोति च । संशितव्रतां शबरीं राम उवाच —"त्वयाऽहं भक्त्याऽर्चितोऽस्मि । यथासुखं यथाकामं गच्छ ।" तदनु सा दिव्या-भरणसंयुता दिव्यमाल्यानुलेपना दिव्याम्बरधरा तत्रात्मसमाधिना जगाम यत्र सुकृतात्मानो महर्षयो विहरन्ति । अध्यात्मरामायणे शबरीं रामः 'सीता कुत्र गते'ति पृच्छति । विश्वभाव-नस्य सर्वज्ञस्य लोकानुसृतित्वं निर्दिश्य तपस्विनी सुग्रीवसख्यार्थं रामं नोदयामास । तदनु साऽविद्याकृतबन्धनं निर्धूय मोक्षमाप । मनोवागगोचरं विभुं मर्त्यलोकत्यागात्पूर्वं दृष्ट्वा सा कृतकृत्या बभूव ।

हनुमतः सौभाग्यवर्णनादध्यात्मरामायणस्य भगवदङ्घ्रि ध्यायतामध्येतॄणां चेतसि अत्यु-त्तमो रसः सञ्चरति । सर्वलोकसुखावहो रामोऽभिषिक्तः । वसुधा सस्यसम्पन्ना जाता, महीरुहः फलवन्तो, गन्धहीनानि पुष्पाणि गन्धवन्ति चकाशिरे । प्रहृष्टधीर्हनुमान् रामं नत्वा प्राह— "त्वन्नाम स्मरतो मम मनो न तृप्यति । अतस्त्वन्नाम स्मरन् सततं भूतले स्थास्यामि । यावत्ते नाम लोके स्थास्यति तावन्मम कलेवरमपि तिष्ठतु ।" दास्यभक्तधौरेयेण हनुमताऽभिकांक्षितो वरोऽयं रामेणादायि । तदनुसारं वज्राङ्गो महावीरो यथासुखं मुक्तः सन् लोकेऽस्मिन् स्थातुं शक्नोति; कल्पस्य समाप्तावखिलाधिपतेः सायुज्यं प्राप्स्यते ।

शुकाख्यः पण्डितो रावणस्य परामर्शदाता बभूव । राक्षसस्य वज्रदंष्ट्रस्य दुष्टताकारणाद् ब्राह्मणोऽयमधमां गतिमाप । वाल्मीकिरामायणे राक्षसोऽयं निर्दिश्यते । दुर्मुखवचनानन्तरं

महाबलो वज्रदंष्ट्रो मांसशोणितरूषितं घोरं परिघं प्रगृह्य सुसंक्रुद्धो ब्रूते—"ससुग्रीवं सलक्ष्मण रामं परिघेण हत्वा हरिवाहिनीं विक्षोभ्य आगमिष्यामि ।" उपायकुशलो भूत्वा राजाऽतन्द्रितः सन् परान् जयेत । कामरूपधराः सुभीमाः परःसहस्राः राक्षसाः काकुत्स्थमुपसङ्गम्य ब्रुवन्तु । तव यवीयसा भ्रात्रा प्रेषिताः स्म । स सेनां समुत्थाप्य क्षिप्रमुपयास्यति । ततो वयं शूलशक्तिगदाधराश्चापबाणासिहस्ता आकाशे गणशः स्थित्वा हरिवाहिनीं हनिष्यामः । अश्मशस्त्रमहावृष्ट्या यमक्षयं प्रापयामः ।" अध्यात्मरामायणे शुको रावणं बहुधोपदिशति । जीवेन सह पुण्यपापे समायातः । अज्ञानीव भोगान् किं मुधाऽनुधावसीति ? तदनु पञ्चमसर्गे शुकस्य पूर्वचरित्रं वर्ण्यते । असौ देवानामभिवृद्धयर्थमविच्छिन्नां यज्ञविततिं चकार । शुकापकरणोद्यतस्य वज्रदंष्ट्रस्य छद्मना वञ्चितः शुकोऽगस्त्यमुनेः शापभाजनं भवति । रघूत्तमं दृष्ट्वा शापाद् विमुच्यते । रावणं तत्त्वज्ञानं बोधयित्वा परं पदमवाप्नोति ।

अध्यात्मरामायणे तत्त्वोपदेशस्य खलु प्राधान्यं विद्यते । तमपोह्य रामायणस्यानुशीलनमयौक्तिकं स्यात् । भक्तिज्ञानयोरैक्यं ग्रन्थकार उच्चैस्तमां जुघोष । ग्रन्थस्यास्याध्यात्मपक्षं प्रति विदुषां ध्यानमाकष्टुं ग्लाजेनापोऽचेष्टिष्ट । परिपक्ववेदान्तमतेन राघवेन्द्रस्यानपायिनीं भक्तिं समन्वेतुं ग्रन्थकारो भूरिशो रामायणेऽस्मिन् यत्नं विदधे । समन्वयकार्यमिदं ग्रन्थकृतः प्रमुखं चिकीर्षितं लक्ष्यते । विद्यारण्यस्य पञ्चदश्यामेवंविधेष्वपरवेदान्तसिद्धान्तप्रतिपादकेषु ग्रन्थेषु वा वेदान्तस्य यः परिपाको विद्यते तस्यैव प्रतिपादनमध्यात्मरामायणेऽपि कविरचिकीर्षत् । जैनबौद्धादीनां देशनाः किल उपेक्ष्यन्ते, न्यायवैशेषिकादयोऽपि व्यपोह्यन्ते ।

भवतु तावत् । अमोघवीर्येण परेश्वरेण सञ्चोदितायाः प्रकृतेर्गुणैः प्रक्षोभ्यमाणानामुच्चावचयोनिषु भ्राम्यमाणानां बहुविधजीवानां हन्त उभौ ग्रन्थौ भवभेषजोपममनवद्यं रसमभिसिञ्चतः । गुणेष्वसक्तधियि राघवेन्द्रेऽनुषङ्गबद्धधियां भरतलक्ष्मणहनुमदादीनां तपसामपरिग्रहादीनाञ्च चेतोवृत्तिभावन्यः कथा उभयोरेव ग्रन्थयोः काव्यमहिमानं किल स्फोटयन्ति । आपातरमणीयभोगान्वेषणधियां मनःसु मर्यादापुरुषोत्तमस्य रघुनन्दनस्य त्यागविग्रहाणां भरतलक्ष्मणहनुमदादीनां जनकनन्दिन्याश्च सुदुस्त्यजैश्वर्यपराङ्मुखत्वकथा उभयोरेव ग्रन्थयोः पीयूषरसं स्रावयन्ति,—भवार्णवतितीर्षूणां भियं लघयन्ति च । न केवलं भक्त्यावेशितधियैव काव्यौत्कर्ष्यबुद्धयाऽपि उभावेव ग्रन्थौ विपश्चितः सभाजयन्ति । संस्कृतवाङ्मयेऽध्यात्मरामायणकारस्तु स्वां स्वामभिज्ञामनुसरतां जीवानामध्यात्मपक्षं द्रढयितुमद्वैतपथमनुसृत्य अयतिष्ट । वाल्मीकीयरामायणे तु प्राधान्येन कथारस उररीकृतः । तुलनात्मकाधीतिव्याजेन पठितौ ग्रन्थाविमौ पाठकान् उपकुरुतस्तमाम् ।

आधुनिकसन्दर्भे वेदान्तस्योपयोगः

पं० केदारनाथत्रिपाठी

भारतीयास्तिकदर्शनानि न पाश्चात्त्यदर्शनानीव चिन्तकानां मस्तिष्कमात्रप्रभवाणि, किन्तु वैदिकदर्शनानीति हेतोः श्रुतीनामेवाभिप्रायनिरूपणपराणि लोकोपयोगायेति न तिरोहितं विदुषाम्। कापिलं गौतमीयं काणादं वा दर्शनं भवेत्, सर्वमेव श्रुतिमुपजीवति तत्प्रामाण्यञ्च समर्थयति। मीमांसावेदान्तापराभिधानयोः पूर्वोत्तरमीमांसयोस्तु दर्शनयोः किमु वक्तव्यम्। ते तु साक्षाच्छ्रुत्यर्थव्याख्यानपरे एव स्तः। श्रुतयश्च न देवानां मुक्तानां च कर्तव्योपदेशपराः किन्तु संसारिणामेव मानवानाम्। देवाः पशुपक्षिसरीसृपस्थावराश्च भोगयोनितया न श्रुत्युक्त-विधिप्रतिषेधयोरधिक्रियन्ते। मुक्ता अपि च कर्मबन्धविनिर्मुक्ततया न पुनः कर्मस्वधिक्रियन्ते इत्यस्ति शास्त्रीया व्यवस्था।

एवं श्रुतयो हि प्रवृत्तिनिवृत्तिरूपं धर्मं प्रतिपादयन्ति। प्रवृत्तिश्च श्रौती अभ्युदयफलं जनयति। निवृत्तिलक्षणस्तु श्रौतो धर्मो निःश्रेयसापरपर्यायां मुक्तिमिति। एवमुभयविधं धर्ममभिप्रेत्यैव महर्षिकणादः सूत्रयामास—"यतोऽभ्युदयनिःश्रेयससिद्धिः" इति। एवमुभयार्थाः श्रुतीरुपजीव्य पूर्वमीमांसादर्शनं वेदान्तदर्शनञ्च प्रवृत्ते इत्यत्र नास्ति सन्देहः।

तत्र मीमांसादर्शनं स्वर्गपुत्रपशुग्रामवृष्ट्यादिफलसाधनोपयोगितया साक्षादेवाधुनातनसन्दर्भेऽपि समुपयोगि भवतीति नेहापि तत्प्रयोक्तृजनसम्पर्किणां जनानां सन्देहः। यदि तु क्वचित् कर्मकर्तृसाधनवैगुण्याद् वैदिककर्माणि नेष्टसम्पादकानि दृश्यन्ते चेत् तदापि न तेषामनुपयोगित्वं घोषयितुमुचितमित्यवश्यं प्रत्येतव्यम्। दृश्यते हि लौकिकेष्वपि कृष्यादि-कर्मसु कदाचिदनुत्पादकत्वं तत्तत् फलानि प्रतीति प्रतियन्ति प्रमातारः। न च तावता कृष्यादिकर्मणामनुपयोगित्वं कश्चिदभ्युपैति। निवृत्त्यात्मकधर्मपरस्य निःश्रेयसोपयोगिनो वेदान्तस्य विषये तु तदीयलोकोपयोगित्वमनिश्चीयमानं नूनं संशीतिपदवीमध्यास्त इति तदर्थोऽयं विचारः प्रवर्तते।

मानवा एव सर्वेषां लौकिकानां शास्त्रीयाणाञ्च विधिनिषेधानां लक्ष्यभूता इत्यधस्ता-दुक्तम्। अपरे च प्राणिनोऽप्राणिनश्च विषयास्तेषामेव कृते साक्षात् परम्परया वोपयुज्यन्ते। मानवजीवनस्य सम्पूर्णतायै सर्वस्वभूताश्चत्वारः पुरुषार्था धर्मार्थकाममोक्षाः निर्धारिताः श्रुति-स्मृतीतिहासपुराणादिभिः। इयं हि भारतीया सार्वभौममान्यता। एतेषु च मोक्ष एव परम-

पुरुषार्थोऽधस्तनं पुरुषार्थत्रयमतिशेत इत्यपि मन्यामहे वयम्। यैस्तु पाश्चात्त्यचाकचिक्यान्धीभूतैर्मोक्षस्य पुरुषार्थत्वमेव न मन्यते, ते तु चार्वाकवदर्थकामावेव पुरुषार्थत्वेन स्वीकुर्वन्ति। केचित्तु तेभ्यो विशिष्टाः शिष्टा धर्ममपि कथञ्चित् पुरुषार्थमुररीकुर्वन्ति। अर्थकामवत् लोकधारणार्थं धर्मोऽप्यावश्यक इति मन्यन्ते। अस्यां स्थितौ मोक्षतत्साधनोपदेशपरस्योपनिषदपरपर्यायस्य वेदान्तस्य कीदृश उपयोगोऽधुनातनसन्दर्भे विद्यत इति प्रश्नो जागर्त्येव।

तत्र प्रथमं तावत् मोक्षस्य पुरुषार्थत्वमेव विचारणीयमस्ति। मोक्षो हि दुःखस्यात्यन्तिकनिवृत्तिः परमानन्दस्वरूपतापत्तिर्वा मतभेदेन वर्ण्यते। तत्र मात्रया दुःखनिवृत्तिर्मात्रयाऽऽनन्दावाप्तिर्वा अर्थकामाभ्यामपि भवत्येव। धर्मात्तु ततोऽप्यधिकतरा दुःखनिवृत्तिरानन्दावाप्तिर्वा स्वर्गादिरूपा भवतीति धर्मतत्त्वविद्भिरुच्यते। तदुक्तम्--

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्॥ इति

एवञ्च यदि क्षुद्रदुःखैरुद्विग्नो जनस्तन्निवृत्तयेऽर्थकामौ महद्दुःखनिवृत्तये धर्मं वाऽऽश्रयते तदा जन्मजरामरणादिभिरर्थादितोऽनिवारणार्हैः अनिर्बन्धोपनतैर्दुःखैः भृशमुद्विग्नोऽविमूढो जनः कथं न परमपुरुषार्थाय मोक्षाय यतेतेति। स्फुटीकृतञ्चैतत् श्रीमद्वाचस्पतिमिश्रैस्तत्त्वकौमुद्याम्, यथा--एवं हि शास्त्रविषयो न जिज्ञास्येत यदि दुःखं नाम जगति न स्यात्, सद्वा न जिहासितम्, जिहासितं वाऽशक्यसमुच्छेदम्। अशक्यसमुच्छेदता च द्वेधा, दुःखस्य नित्यत्वात् तदुच्छेदोपायापरिज्ञानाद्वा। शक्यसमुच्छेदत्वेऽपि सुकरस्योपायान्तरस्य सद्भावाद्वेति। किन्तु न तावद् दुःखं नास्ति, नाप्यजिहासितं नाप्यशक्यसमुच्छेदम्, नापि लौकिकैर्वैदिकैर्वोपायैः स्वर्गसाधनयागादिभिरत्यन्ततः शक्यसमुच्छेदमिति तदत्यन्तोच्छेदाय वेदान्तस्य तज्जन्यज्ञानस्य चोपयोगित्वमनपलपनीयमेव।

एवं यो ह्यविद्यावृतान्तःकरणः स एव जनः संज्ञया शून्यीकृत इवातुरः स्वं छिद्यमानं जन्मजरामरणादिदुःखनिगडैर्बद्धमात्मानं नानुभवति परमपुरुषार्थत्वेन मोक्षस्य स्पृहणीयतां, नापि च तदुपायतया वेदान्तजन्यज्ञानाय प्रयतते। किन्तु कश्चिदेव भाग्यवान् जन एतत्सर्वमनुभवन् ऐहिकपुण्यवशात् प्राक्तनपुण्ययोगाद् वेश्वरानुगृहीतो वेदान्तज्ञानाधिकारितां प्राप्तस्तदर्थं यत्नवान् भवतीति। तथाह्युक्तं श्रीहर्षमिश्रैः —

ईश्वरानुग्रहादेषा पुंसामद्वैतवासना।
महाभयकृतत्राणा द्वित्राणां यदि जायते॥ इति

यद्यप्येतद्दृष्ट्या वेदान्तो न कदाचिदपि निजोपयोगितां व्यभिचरति तथापि व्यावहारिके क्षेत्रे तस्य कश्चिदुपयोगो वर्तते न वेत्यस्ति तावद् विमर्शनीयम्। यतो न हि

परमार्थोपकरणभूतान् व्यवहारानपोह्य परमार्थोऽपि साधयितुमर्हः। अन्ततः प्रमाणप्रमेयव्यवहारा गुरुशिष्यादिव्यवहाराश्च परमार्थसिद्धावावश्यका एवेति व्यवहारनिर्वाहः सर्वथाऽपरिहार्यः।

वस्तुतो व्यवहारपरमार्थयोरस्ति परस्परं सम्बन्धः, व्यवहारात् परमार्थसिद्धिः परमार्थाच्च व्यवहारनिर्वाह इति। "शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः। परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत्॥" इति, बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि। शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे॥" इति च वेदान्तश्लोकयोरेतदभिव्यक्तावेव तात्पर्यमिति। यथा च व्यवहारपरमार्थयोर्न विरोधस्तथा बहुधा संसाधितं प्रत्यक्षादिविरोधपरिहाराधिकरणेषु वेदान्त-ग्रन्थानाम्। अतएव च परमार्थतो भविष्यत्युच्छेत्स्यमानेनापि देहादिना यावदवस्थिति सर्व एव व्यवहाराः प्रवर्तन्त एव। प्रत्युत य एव व्यवहाराः परमार्थदृष्टिशून्यानां पामरजनानां रागद्वेषादिक्लेशोपजननपूर्वकं बन्धाय भवन्ति त एव वेदान्तदृष्टीनां तत्त्वज्ञानिनां रागद्वेषादि-परिहारद्वारा मुक्तये भवन्तीति भगवद्गीता-योगवासिष्ठादिग्रन्थेषु भूयसा निदर्शितम्।

न केवलमविरोध एव सदा व्यवहारेण वेदान्तानां किन्तूपयोगोऽपि भूयान् वर्तत इति विभावयामः। तथा हि—ब्रह्मजिज्ञासायां त एव जना अधिकारिणो भवन्ति, येषां नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमदमादिषट्कसम्पत्तिः, मुमुक्षुत्वं चेति साधनचतुष्टयसम्पन्नता वर्तेत। तत्र यः पुरुषः "किं नित्यं किं वाऽनित्यम्" इति विवेकं न धारयति, स देहादिकमेवात्मत्वेन भावयन् कथं न "यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्। भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥" इति चार्वाकाचारमनुहरेत्?

एवं यो ह्यैहिकामुष्मिकविषयभोगे सदाऽनुरक्तस्तद्भोगलम्पटो भवेत् स स्वार्थान्धः कथन्नानर्थमृच्छेदिति प्रत्यक्षमीक्षामहे। एवं मनोनिग्रहात्मकस्य शमस्य, इन्द्रियसंयमात्मकस्य दमस्य, ऐहिककर्मवशात् प्रारब्धकर्मवशाद्वा प्राप्तदुःखानां धैर्येण सहनात्मिकायास्तितिक्षायाः शास्त्रेषु गुरूणां महापुरुषाणाञ्चोपदेशेषु श्रद्धायाः, जगन्नियामके परमात्मनि सदा चित्ता-वस्थापनरूपस्य समाधानस्य च ब्रह्मजिज्ञासोपयोगिनां महत्त्वं व्यवहारक्षेत्रेऽपि को नाम बुद्धिमान् जनो नाङ्गीकरोति। स्वरूपसन्त एते मुमुक्षुगुणा यथा ब्रह्मजिज्ञासायां तथा लोक-व्यवहारेऽप्युपयोगिनः कल्याणकारिणश्च भवन्तीति स्फुटमवधारयितुं शक्यते। श्रीमद्भगवद्-गीताऽपि "लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसि" इत्युपदिशन्ती लोकोपयोगित्वं मुमुक्षुव्यवहाराणां प्रदर्शयति।

किं बहुना, जीवन्मुक्ता अपि लोकानामादर्शभूताः स्वीयाचारैर्लोकस्य महान्तमुपकारं कुर्वन्तीति शंकराचार्यरामकृष्णविवेकानन्दप्रभृतीनामितिवृत्ततो विज्ञायतेतमाम्। एवं "यस्य सर्वमात्मैवाभूत् तत्र को मोहः कः शोकः एकत्वमनुपश्यतः" इति श्रुत्युक्तात्मैक्यभावना

समस्तवेदान्तसारभूता रागद्वेषादिजनिकाया अहङ्कारममकारभावनायाः समाजे परिहारं जनयन्ती निजां लोकोपयोगितां नावेदयतीति को ब्रूयात् ? या चेदानीं सर्वमानवेषु समदर्शित्व-भावना साटोपमावश्यिका समुद्घोष्यते, सापि वेदान्तोक्तसर्वात्मैक्यभावनामेवोपजीवति।

यश्च वेदान्तोपरि क्रियमाण आक्षेपो यद् वेदान्तः समाजे सर्वकर्मसंन्यासं शिक्षयन् सर्वाणि धर्मकर्माणि वारयति, सर्वत्र निष्कर्मण्यभावं च प्रसारयतीति, सोऽपि निराधार एव। यतो हि कञ्चिदेव पुरुषधौरेयमधिकृत्य श्रुतिर्ब्रूते यत् "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति। सामान्यतस्तु क्रमेणैवाश्रमादाश्रमान्तरं गच्छन्नन्ते संन्यासं गृह्णीयादित्येव तदुपदेशः। संन्यासावस्थायामपि धर्मोपदेशादिना समाजमुपकुर्वन्त्येव प्रायः संन्यासिनः। आचारोऽपि ब्रह्मज्ञानिनो न शास्त्रीयलौकिकाचाराद् विपर्येति। तथा चोक्तं पञ्चदश्याम्—"बुद्धाद्वैत-सतत्त्वस्य यथेष्टाचरणं यदि। शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे" इति।

किञ्चात्मारामो हि तत्त्वज्ञानी सर्वमपि समाजं सत्प्रभावैरुपकरोतीति नात्र सन्देहः। अत्र तपोमूर्तयः श्रीकरपात्रस्वामिमहाभागा दृष्टान्तीकर्तुं शक्यन्ते। गृहीतसंन्यासा अपि ते समस्ते देशे धर्मोपदेशैः संस्कुर्वन्ति लोकम्।

एवं वेदान्तदर्शनस्य यावदधिकाराधिकरणस्थम् "यावदधिकारमवस्थितिराधिकारि-काणाम्" इति सूत्रमपि अपान्तरतमःप्रभृतीनामीश्वराणां सत्यपि कैवल्यहेतौ सम्यग्दर्शने परमेश्वरेण लोकस्थितिहेतवे तेषु तेष्वधिकारेषु नियुक्तानां यावदधिकारमवस्थितिमधिकारा-वसानेऽपवर्गञ्च प्रतिपादयति। यदि च वेदान्तः कदाचिल्लोकानुपयोगी स्यात् न तर्हि भगवान् बादरायणस्तथा सूत्रयेत्।

एवं लोकव्यवहारप्रवृत्तिस्तु आ मानवेभ्य आ च कीटपतङ्गेभ्यः आहारनिद्राभय-मैथुनादिरूपा स्वाभाविकीति तत्रानासक्त्युपदेशे एव सार्थक्यं वेदान्तादिशास्त्राणाम्। अन्यथाऽनुवादमात्रं मन्दप्रयोजनानि शास्त्राणि स्युः। अतएव च भौतिकदृष्ट्याऽतीव समृद्धेऽप्यस्मिन् विज्ञानयुगे वैज्ञानिका अपि स्वत आविर्भाविताभ्यः संहारकसामग्रीभ्यो भीताः सन्तो जगद्रक्षायै अध्यात्मनिष्ठामावश्यकीं मन्यन्त इति।

तस्मादधुनाऽप्युदयादिद्वारेण परमनिःश्रेयसाधिगतिसाधनोपदेशद्वारा वेदान्तोपयो-गित्वं नापह्नोतुं शक्यत इति शम्।

वाराणसी-वैदुषी

पं० बटुकनाथशास्त्री खिस्ते

[वाराणसीस्थानां महाराष्ट्रजविबुधोत्तंसानामैतिहासिकक्रमबद्धं विवरणं यद् वाराणसेय-बृहन्महाराष्ट्रमण्डलस्य सुवर्णजयन्त्यवसरे स्मारिकायां प्रकाशितमासीत् तदेवात्राविकलं प्रकाश्यते । पद्यैरनवद्यैरेभिः कविवरेण श्रीशास्त्रिणा तत्तद्विदुषां वैदुष्यप्रकाशनेन सह स्वनवनवोन्मेषशालिन्याः कवनप्रतिभायाः सम्यक् परिचयोऽपि दत्तः । —सहसम्पादकः]

१—गङ्गोत्तुङ्गतरङ्गचुम्बितपदां वाराणसीं भासयन्
सार्धं ढुण्ढिविनायकेन च जगन्मात्राऽन्नपूर्णाख्यया ।
विद्वद्वृन्दविनोद - मोदितमनाश्चन्द्रार्ध - चूडामणि-
र्भक्ताभीष्टविधानकल्पविपटी पायात् स विश्वेश्वरः ॥

२—काशीयं प्रथितैव पुण्यनगरी विद्याविहारस्थली
विश्वेषां विदुषां प्रबन्धरचनादाक्षिण्य-दीक्षाकरी ।
प्राचीनात् समयादुपेत्य बहुशो दूरात् प्रदेशादपि
प्रेम्णा पण्डितमण्डलीभिरनिशं संसेव्यमाना बभौ ॥

३—प्राप्तः पैठनपत्तनात् सुविदिताद्देशान् महाराष्ट्रतः
श्रीरामेश्वरभट्टभट्टविबुधोत्तंसः पुरा काशिकाम् ।
शिष्या यस्य महेशठक्कुरमुखाः ख्याता धरामण्डले
वाग्देवीसदनायमानवदनः स प्राप सम्माननाम् ॥

४—तत्सूनुस्तु ततोऽधिकः प्रतिभया श्रीभट्टनारायणः
शास्त्राम्भोनिधिमन्दरः श्रुतिमतप्रस्थापने सादरः ।
भक्त्या टोडरमल्ल-मन्त्रिमणिना विश्वेश्वरस्थापने
यत्साहाय्यमकारि धार्मिकजनानन्दानुबन्धावहम् ॥

५—वादे शास्त्रविधेर्न यस्य पुरतो विद्यानिवासादयो
मूर्धन्या अपि धीधनाः समभवन् दक्षाः स्वपक्षाऽवने ।
यस्मै भारतधर्मनिर्णयविधेः सर्वाधिकारं ददौ
सम्राट् तद्गुणगौरवादकबरो धन्यः स मान्यः क्षितौ ॥

६—तद्वंशे कमलाकरादिविबुधा विद्यानवद्यक्रम-
प्रोन्नीताऽमितसत्प्रबन्धरचनाः ख्यातिं परां लेभिरे।
गागाभट्टसुधीस्तदीयकुलजो राज्याभिषेकोत्सवं
चक्रे श्रीशिवभूपतेर्भरतभूधर्माध्वदीप्तद्युतेः॥

७—शेषाऽशेषवचोविचारचतुरः शेषाऽन्वयाब्धेः शशी
श्रीकृष्णस्तनयोऽपि तस्य सनयो वीरेश्वराऽऽख्योऽभवत्।
यच्छिष्यः प्रथमानसद्गुणगणः काव्यार्थचर्चाचणो
दिल्लीवल्लभलालितो भुवि जगन्नाथो जनैर्गीयते॥

८—आयातस्त्रिपुरारिराजनगरीं धर्माधिकारीति यः
ख्यातः पण्डितमण्डले मतिमतां वंशः प्रशंसोन्नतः।
तन्मुक्तामणिरग्रणीः श्रुतिविदां लेभे निबन्धोद्भवां
कीर्तिं कामपि नन्दपण्डितवरो दिङ्मूलकूलङ्कषाम्॥

९—हिन्दूनां जजियाकरं शमयितुं बद्धप्रतिज्ञाभर-
श्चक्रे शाहजहानमप्यनुगुणं यो दाक्षिणात्यो यतिः।
विद्याम्भोधिरशेषवन्दितपदः श्रीमत्कवीन्द्राभिधा-
ऽऽचार्योऽसौ धवलीचकार यशसा शम्भोः पुरीं पावनीम्॥

१०—वेदार्थाशयवेदिनामचरमः श्रीखण्डदेवः सुधीः
काशीवासविकासिताऽमितगुणो नाम्नाऽपदेवः परः।
श्रीशम्भुः कविमण्डनोऽपि सुकृती नव्यार्थभव्याशयं
प्रज्ञापल्लवितं ततान विमलं श्रीजैमिनीयं नयम्॥

११—भारद्वाजकुलोद्भवो दिनकरो नैयायिकाग्रेसरो
भ्राता तस्य दिवाकरोऽपि विविधग्रन्थानुबद्धादरः।
पुण्यस्तम्भकरान्वयोदित — महादेवाभिधस्तार्किको
वैदुष्येण विनिर्ममे शिवपुरीसौभाग्यसंवर्धनम्॥

१२—यः सूत्राणि निनाय पाणिनिमुने रम्यां नवां पद्धतिं
शास्त्रे व्याकरणे प्रगल्भधिषणानुद्बोधयामास यः।
श्रीभट्टोजिसुधाकरः परिहरन् तामिस्रमन्तर्गतं
कौमुद्या निजया स राजतितमां श्रीमान् महाराष्ट्रजः॥

१३—श्रीनारायणदीक्षितेन सुधिया विश्वेश्वरस्थापनं
भूयोऽस्मिन्नगरे व्यधायि सदने सन्तोषहेतोः सताम् ।
श्रीमद्भास्कररायदीक्षितवरः काले तदा काशिका-
मायातोऽखिलशास्त्रवित् परशिवाकारावतारो नवः ॥

१४—शिष्यः श्रीहरिदीक्षितस्य सुयशोराशिप्रकाशीकृता-
ऽशेषाऽऽशावलयोऽद्भुतामितगुणग्रामाभिरामाशयः ।
नागेशो विविधप्रबन्धघटना-सत्सम्प्रदायश्रिया-
मालम्बः शुशुभे स्मरारिनगरे श्रीमान् सतीगर्भजः ॥

१५—बालम्भट्ट इति प्रथामुपगतः श्रीपायगुण्डे-कुला-
ऽलङ्कारः समजायत श्रुतयशा नागेशशिष्याग्रणीः ।
शिष्यैर्यः परिवारितः स्वसदने रात्रिन्दिवं पाठयन्
स्नेहापूरितमानसः प्रविदधे विद्याप्रदीपं स्थिरम् ॥

१६—विद्यामाप्य ततः प्रगल्भधिषणः श्रीरामशास्त्री निजं
न्यायाधीशपदं यथार्थमकरोत् पुण्याभिधे पत्तने ।
निर्भीको विगतस्पृहश्च शरणायातान् स्वशिष्यान् बहून्
व्युत्पाद्याऽखिलवाङ्मये मतिमतामाद्यश्चिरं विद्युते ॥

१७—श्रीनागेश — गुरुक्रमादुदितधीर्जातोऽष्टपुत्रान्वये
काशीनाथसुधीशिरोमणिरिहाऽऽयातः समुद्यत्प्रभः ।
विद्यां तस्य गुणैर्निजैर्विशदयन् कालेंकरोपाभिधो
राजारामगुरूत्तमो विरुरुचे विद्यार्थिकल्पद्रुमः ॥

१८—शिष्यं सोऽयमवाप सर्वविदुषां मूर्धन्यमाशैशवात्
नाम्ना बालसरस्वतीति विदितं विद्वत्परीक्षावशात् ।
विश्वेशं यममन्यताऽखिलजनः शिष्यप्रशिष्यक्रमै-
र्यस्याशेषहरित्सु सौरभमयी वाग्वल्लरी वर्धते ॥

१९—येन व्याकरणे परिष्कृतिकला लोके प्रतिष्ठापिता
धर्माध्वा परिशोधितश्च विमलैर्यागैर्धरित्रीतले ।
नास्तिक्यं प्रविलीनमेव तरसा यद्वादचर्चोत्सवैः
कीर्त्तिस्नातदिगन्तरः स विदितः श्री[illegible]स्त्री गुरुः ॥

२०—शिष्येष्वस्य दिगन्तरालविलुठत्सत्कीर्तिमुक्तास्रजः
प्रौढा दिग्गजसन्निभाः समभवन् विद्यावतां धूर्धराः।
आद्यस्तेषु समस्तवादिवदनाम्भोजातशीतद्युति-
र्भारद्वाजसदन्ववायमिहिरो दामोदरो वर्ण्यते॥

२१—विद्वद्वन्द्यनृसिंहशास्त्रितनयः साहित्यसारस्वत-
क्षीराम्भोधिसुधाकरः श्रुतिलतासंवर्धनाम्भोधरः।
श्रीगङ्गाधरशास्त्रिपण्डितवरो वादाहवे जित्वरः
काशीं वर्धयति स्म शिष्यनिवहप्रज्ञाप्रकर्षोदयैः॥

२२—अन्तेवासिमिलिन्दवृन्दकलितः शङ्काटवीपाटन-
व्यासक्तः श्रितबालशास्त्रिचरणाम्भोजद्वयीमण्डनः।
भूत्या भासितदिङ्मुखो नयविदामग्रेसरः सोऽप्यभूत्
तात्याशास्त्रिमनीषिकुञ्जरवरः काशीपुरीनन्दनः॥

२३—पाश्चात्त्याः शितबुद्धयोऽपि गणिते प्रज्ञाप्रकर्षं मुहुः
श्रुत्वा यत्सविधे समेत्य विजहुः शङ्काकलङ्कान्निजान्।
ज्योतिर्मण्डलचण्डरश्मिरपरः सम्राट्समभ्यर्चितो
बापूदेव इहाऽजनिष्ट स विदां मान्यो महाराष्ट्रभूः॥

२४—यस्याऽऽसीत् प्रतिभा जगद्विजयिनी न्यायाब्धिकुम्भोद्भवः
सीतारामसुधीरसौ समभवद् वाराणसीनन्दनः।
बापूदेवपदानुगोऽप्यमितधीर्वेतालवंशांशुमान्
दैवज्ञः स विनायकोऽत्र शुशुभे विद्याविनोदोद्यतः॥

२५—साहित्यार्णवकर्णधारपदवी यस्मिन् यथार्थाक्षरः
पाकः कोऽपि गतो गिरां परिणतिं शिष्येषु यत्सम्भवः।
मानोन्मीलितमानवल्लिकुलभूः श्रीरामशास्त्री गुरु-
स्तत्तुल्यप्रतिभोऽनुजोऽपि ददृशे श्रीलक्ष्मणाख्यः कविः॥

२६—श्रीरामाङ्घ्रिनिषेवणाप्त - कविता - सम्पत्समृद्धाशयः
खिस्तेवंशसमुद्भवः समजनि श्रेयान् स नारायणः।
नित्यानन्दगुरोरधीत्य विदितो गोपालशास्त्री परः
प्रज्ञावान् फडकेऽप्यनन्तविबुधः काश्यामभूमान्यः॥

२७—खिस्ते श्रीलमुकुन्दशास्त्रिसुकृती नारायणस्यानुजो
होशिङ्गान्वयसम्भवः कविजगन्नाथोऽथ वेतालजः।
मान्यः श्रीमदनन्तरामसुकविः श्रीवैद्यनाथस्तथा
विद्वांसोऽत्र गुणाऽधिका विदधिरे वाग्देवतावैभवम् ॥

२८—मोकाटे कुलजोऽलसद् गणपतिर्दामोदरादाप्तधी-
रम्बादासबुधोत्तमोऽपि महितो न्यायादिविद्याविधौ।
श्रीराजेश्वरपण्डितेन्दुरधुना वाराणसीवासिनां
जोत्स्नां ज्ञानमयीं किरन्वितनुते काञ्चित्परां निर्वृतिम् ॥

२९—श्रीराजेश्वरलब्धबुद्धिविभवौ स्फूर्जद्विचारक्रमौ
काश्यां श्रीहरिराम-रामविबुधौ नैयायिकाग्रेसरौ।
कुर्वाते स्म सभां प्रभावमहितौ सद्यो महाराष्ट्रजौ
दैवाद्दिव्यपदं गतौ निजगुणैः स्मर्तव्यभावे स्थितौ ॥

३०—वाग्देवी-करुणाकटाक्षकलया प्रादुर्भवत्प्रातिभ-
ज्योत्स्नाधौतहृदां श्रुतिस्मृति-सदाचारैकचर्चाविदाम्।
व्यद्योतिष्ट तपोमयैः सुचरितैः श्रीमन्महाराष्ट्रभू-
पुत्राणां सुयशोविवर्धनकरी बालेन्दुमौलेः पुरी ॥

३१—इत्येषा सविशेषशास्त्रविदुषां केषाञ्चिदेवोदिता
चर्चा चारुचरित्रचित्रितभुवां काशीपुरीवासिनाम्।
यानद्यापि सरस्वती भगवती कौतूहलान्दोलितै-
र्वीणानिक्वणितैः स्मरत्यनुदिनं सङ्गीतभङ्गिक्रमैः ॥

३२—इत्येषा निर्विशेषाऽपि शेमुषीशालिनां कथा।
प्रतिपच्चन्द्रलेखेव परितोषाय कल्पताम् ॥

——

ब्रह्मचिन्तनपरम्परायाः विकासः

डॉ० राजेन्द्रप्रसाद द्विवेदी

जीवनकर्मणोरनवरतं क्रमरूपोऽयं संसारः। आत्मानं देहेनैकीकृत्य स्वर्गनरकयोर्मार्गं सरति पुमान् येन स संसारः। संसारद्वारैव मानवो देहमात्मानं मत्वा सकलं सांसारिकं व्यवहारं सम्पादयति। संसरतीत्यत्र समुपसर्ग एकीकरणबोधकस्तथा चानया व्युत्पत्त्या नामरूपात्मकजगतः काले परिवर्तनमिति विषये नास्ति सचेतसां विप्रतिपत्तिः। परन्त्वेकस्मिन्नेव धरातले विभिन्नताया लीलां सम्यग्रूपेण संप्रेक्ष्य जिज्ञासा समुदेति कोऽयं संसारः, केयं विभिन्नता, किमिदं परिवर्तनं, कथञ्च भोगवैलक्षण्यमिति वा। समुत्पन्नेष्वेषु प्रश्नेषु सांसारिकीं विचित्रतां ज्ञातुमिच्छा यत्र प्रबला भवति तत्रैव दर्शनस्योद्गतिरिति। दर्शनशब्दो दृश्धातोः करणे ल्युड्विधानेन व्युत्पन्नः। तथा च दृश्यते तत्त्वमनुसन्धीयतेऽनेनेति दर्शनम्। दृश्धातुरत्र ज्ञानसामान्यवाचकः। अतः पदार्थानां मूलतत्त्वं येन ज्ञायते तच्छास्त्रं दर्शनशास्त्रमित्यभिधीयते। अयमाशयः—पदार्थानां द्विविधा शक्तिर्भवति कर्मरूपा ज्ञानरूपा च। कर्म ज्ञानेन संवलितं वस्तुप्रकाशकं भवति। तथा चाचेतनमपि कर्म ज्ञानसंयोगेन चेतनवद् भूत्वा व्यवहारार्थं स्वाशयं प्रकटयति। ज्ञाने ज्ञानात्मकस्वरूपस्य पूर्णा स्थितिः परन्तु कर्मणि ज्ञानस्याल्पत्वान्न तस्य प्रतीतिः। एवं ज्ञानस्य कर्मण्यपि संयोगः, कर्मणो ज्ञानपूर्वकोपलब्धत्वात्। अतः प्रत्येकपदार्थे यत्र कर्मणः सत्ता विद्यते ज्ञानस्य स्थितिर्भवति। तथा च सत्ताऽपि स्वयमेव ज्ञानपूर्विका, सतः प्रतीतिविषयत्वात्। परन्तु यत्र ज्ञानस्य पूर्णत्वं तत्रैव परमार्थत्वमिति दर्शनेषु प्रायेण गीयते। अनेनैव कारणेन चेतनपदार्थेषु ज्ञानसंवलितकर्मसद्भावात् तेषां ज्ञानमयत्वमिति यत्केनापि हेतुना आच्छादितत्वादावृतत्वमनाच्छादितत्वात् प्रकाशकत्वमानन्दमयत्वं चेति। तदेव ज्ञानं दर्शनशास्त्रस्य प्रतिपाद्यं यदुपलब्ध्याऽज्ञानस्य बाधः, कर्मणोऽपि निरासः, यतो ज्ञानादज्ञानस्य कर्मणश्च तथाविनाशप्रसङ्गात्। उक्तं च महामुनिना मनुना मनुस्मृतौ[1]—

'सम्यग्दर्शनसम्पन्नः कर्मभिर्न निबध्यते।'

---

१. मनुस्मृतिः—६/७४

सुखात्मिकामानन्दात्मिकामेतां स्थितिं प्राप्तुं प्रेक्षावतां प्रवृत्तिर्दरीदृश्यते, तस्याः प्रयोजनीयत्वादसन्दिग्धमयत्वाच्च ।[1] आस्तिकनास्तिकभेदाभ्यां विद्वांस आचार्याः तत्त्वज्ञानसिद्धयै प्रवृत्ता दृश्यन्ते । 'नास्तिको वेदनिन्दकः' इत्युक्त्या अन्यतरस्यास्तिकस्य व्यपदेशो भवति यो हि सर्वथा वेदानुगामीति बुध्यते । नास्तिकदर्शनेषु चार्वाकजैनबौद्धा गण्यन्ते, आस्तिकदर्शनेषु च न्यायवैशेषिकसांख्ययोगमीमांसाश्चेति । विभाजनस्य सर्वथा वेदानुगामित्वमेव कारणम् । नास्तिकदर्शनप्रवर्त्तका यद्यपि तानेव तर्कान् स्वग्रन्थे तत्त्वसिद्धयर्थं स्वीकुर्वन्ति ये वेदप्रसूता आस्तिकदर्शनेषु कथिताः सन्ति, परन्तु तर्कक्रमे न ते परम्पराविचारवन्त इति तेषां विरुद्धाचारत्वादनास्तिकत्वमिति पठ्यते । यः सम्प्रदायो वेदमेव परमप्रमाणरूपं प्रतिपादितवान् स आस्तिको विपरीतश्च नास्तिक इति । अत इदं स्पष्टं यद्वेदेषु दर्शनतत्त्वं बीजरूपेण संगृहीतमस्ति । समुपलब्धेषु ग्रन्थेषु प्राचीनतमो ज्ञानरत्नाकरोऽयं विद्यावारिधिः सर्वजिज्ञासोपशामक इति भूयो भूयोऽवगाहनात्प्रतिभाति ।

वेदो हि भारतीयज्ञानपरम्पराया मौलिक उत्स इति । मन्त्रद्रष्टारो वैदिकर्षयो दिव्यदृष्टिसम्पन्नाः सृष्टिलयप्रवाहविज्ञानवेत्तारश्चासन् । सुखदुःखहर्षविषादात्मके क्रमे आसक्तस्य प्रपञ्चस्य सद्गत्यर्थं मननशीला एकान्तसेविनो महर्षयः नानाविधनामरूपात्मकस्य चराचरस्य जगतः कारणं ब्रह्मैवेत्यजानन् । विकारभूतं किमपि वस्तु तज्जन्यमिति ब्रह्मण एव कारणत्वं सिध्यति । एतदेव परब्रह्म ध्रुवमलमक्षयस्थानं च सर्वेषाम् । अस्यां परब्रह्मावस्थायां समस्तस्य गुणधर्मस्य प्रविलयो भवति । इमामवस्थां सम्प्राप्य जीवः सर्वबन्धनैर्विमुक्तो भवति । किमन्यत् अनादिकालप्रवृत्तरागद्वेषादिकं च परित्यजति । एतस्य कैवल्यस्य लाभार्थं साधकाः दयितपुत्रदारसम्बन्धमपहाय गुरुशुश्रूषापराः शरीरमरण्येषु पातयन्ति । एतस्य शरीरपातस्यैकमेवोद्देश्यं तत्तु ऐकान्तिकमात्यन्तिकं च कैवल्यमस्ति ।[2] न्यायदर्शनभाष्येऽपि भाष्यकारः मुक्त्यवस्थायां जीवस्य ब्रह्मभावं स्वीकरोति तथा च सांख्यसिद्धान्तेन सहोपनिषद्विषयस्य न कोऽपि विरोधः ।

इदं हि ब्रह्म सर्वशक्तिसमर्थं सर्वजनकं कारणं चेति वेदेषु स्वीकृतमस्ति । वाण्यपि या निःसृत्य वस्तु वस्त्वन्तरं च बोधयति साऽपि ब्रह्मैव ।[3] न तस्याः कदापि नाश इति । इममेव सिद्धान्तमनुसृत्य व्याकरणेऽक्षरस्य शब्दस्य वा नित्यत्वं प्रतिपादितमस्ति । ब्रह्मणः

---

१. यदसन्दिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरः—भामती पृ० २

२. सांख्यकारिका पृ० १७३

३. वाग्वै ब्रह्म—ऐ० ६।३, २।१५, ४।२१

शक्तिरपि तथा समर्था यस्याः प्रभावेण तज्जन्यसंयोगोऽपि पवित्रत्वस्य कारणं भवति। वाक्संयोगात् श्रोत्रमपि शुचित्वं स्थायित्वं च प्राप्नोति, ब्रह्मसंसर्गात्। तथा च श्रुतिः—श्रोत्रं वै ब्रह्म, श्रोत्रेण हि ब्रह्म शृणोति। श्रोत्रे ब्रह्म प्रतिष्ठितम्।[1] अत्र सृष्टिप्रारम्भकाले ब्रह्मणस्तथा-वर्णनात् अविद्याशक्तेः प्रभाव-न्यूनत्वमधिगम्यते। तपःपूता ये तत्त्वजिज्ञासव आसन् तेष्वज्ञानासद्भावात् सर्वमपि वस्तु सद्रूपेण तद्दृष्टौ प्रकटितमासीत्। ज्ञानन्तु सर्वथा प्रकाश-मयमानन्दमयं च। न तस्मिन् कथमप्यन्धकारः, विरोधत्वात्। अतो ज्ञानसम्पन्नास्ते जना ब्रह्मणः सत्तां ज्ञात्वा सर्वाण्यपि वस्तूनि सद्रूपेणाधिगतवन्तः। यदा चित्तवृत्तयः एकीभूताः परमतत्त्वेन सह संयुक्ता भवन्ति तदा सतः संसर्गेण सद्भूताः ता अपि ब्रह्मभावमाप्नुवन्ति। अस्यामेव स्थितौ वस्त्वन्तररूपेण यत् सामान्यजनाः पश्यन्ति तदेव ब्रह्मतामापन्नाः जनाः ब्रह्मेति जानन्ति। इदमेव कारणं प्रधानं येन वेदवैदिक-साहित्यधीसंयुक्ता ते देवस्वरूपा ऋषयः ब्रह्मरूपमेव सर्वमिति स्वीकृतवन्तः। ब्रह्मणः प्रकाश-त्वमपि तेन प्रतिपादितम्। चन्द्ररूपेण बृहस्पतिरूपेण वेद एव ब्रह्म प्रकाशदायकमिति।[2] ब्रह्मणि प्रकाशस्य तेजसो वा ग्रहणमन्धकारघनीभूताश्चैतन्यांशेनाप्ययुक्तहृदया नानुमानं सत्तां वा स्वीकुर्वन्ति। न तेन ब्रह्मप्रकाशतायां कापि क्षतिरपितु जीवाचेतनतैव प्रकटी-भवति। ब्रह्म सततं तेजःस्वरूपमग्निवदिति। यथाऽग्नौ सर्वे एव दोषाः पवित्रतां प्राप्नुवन्ति तथैव ब्रह्मण्यपि अज्ञाननाशाज्जीवाः सायुज्यमधिगच्छन्ति।[3]

ब्रह्मणः सृष्टिरपि वेदेषु गीयते। 'ब्रह्म देवान् अजनयत्' (तै० २।८, ८।९) इति श्रुत्या देवानां सृष्टिकर्तृ अपि ब्रह्मैव। इयं सृष्टिः संकल्परूपा समुत्पन्ना। ब्रह्मणोऽति-रिक्तस्य सत्ता यद्यपि वैदिकयुगे स्वीकृता दृश्यते परन्तु सापि तदुत्पन्नेति। 'ब्रह्म वै भूतानां ज्येष्ठं तेन कोऽर्हति स्पर्द्धयितुम्' (तै० २।८।८।१०) इति श्रुतिबलात् सर्वतो ब्रह्मणः स्पर्धा-राहित्यं सबलत्वं च प्रतिपाद्यते। इदं हि ब्रह्म अक्षरममृतममलं च, न तस्य कथमपि क्षीणत्वं क्षयत्वं चेति—यदमृतं तद्ब्रह्म (गो० पू० ३।४) यद् ब्रह्म तदमृतम् (जै० उ० १।२५।१०) इति श्रुतिप्रतिपादनात्। ब्रह्म त्रिकालाबाध्यं ऋतस्वरूपं चेति ब्राह्मणग्रन्थेषु कथ्यते—सत्यं ब्रह्म, (श० १४।८।५।१) ब्रह्म वा ऋतम् (श० ४।१।४।१०) इति श्रुतिप्रमाणात्। 'तस्माद् ब्रह्मणा द्यावापृथिवी विष्टब्धेऽइति' (श० ८।४।१।३) दर्शनात् तद्ब्रह्मैव जगतः कारणमिति स्पष्टं भवति। परन्तु चैतन्यस्वरूपस्य प्रकाशमयस्य सत्यस्य ब्रह्मणो लवरूपेण

---

१. ऐ० २।४०

२. ब्रह्म वै बृहस्पतिः, कौ० ७।१०, ऐ० १।१३, २।४१

३. ब्रह्म वा अग्निः, कौ० ९।१, ऐ० ७।२२

निःसृताप्यपरा सत्ता ब्रह्मरूपैवेति नात्र संदेहावसरस्तथा च तत्रैव प्रतिपादितम्—कतम एको देव इति स ब्रह्म त्यदित्याचक्षते (श० १४।६।६।१०) इति'। एवञ्च ब्रह्म नित्यं कालापरिच्छिन्नं, शुद्धं रागद्वेषाद्यशुद्धिरहितम्, बुद्धं स्वप्रकाशनिरतिशयानन्दं, मुक्तम् विद्यारूपबन्धशून्यम्, स्वभावमनन्याधीनसत्ताकम्, अनात्मनामधिष्ठानस्वरूपभूतमिति सुस्पष्टं ज्ञायते।

एवं ब्रह्मणः समुत्पन्नानां वस्तूनामपि ब्रह्मत्वमेव वेदेषु प्रतिपादितमस्ति। परन्तु ऐक्यमिदं प्रत्यक्षप्रमाणेन विरुध्यते। तथाहि आत्मानात्मनोस्तादात्म्यारोपसम्भवे तयोः विवेकज्ञानमुपयुज्यते; तयोस्तु, तमःप्रकाशवत् अत्यन्तविरुद्धत्वेन प्रतीयमानत्वात् तदसंभवः। आत्मा हि सच्चिदानन्दस्वरूपः प्रतीयते। अनात्मा तु जडदुःखरूपो भवति। अनात्मनां सर्वेषामात्मनि तादात्म्येन वैदिकमतस्यासम्भवेन आत्मवदनात्मनां सत्यत्वमेव प्रतिभाति। आत्मा तु नानित्यो नाशुद्धो न जडो नापि कर्मवश्यः। परन्तु तेन सहैक्यं सर्वेषामपि वस्तूनां यत्प्रतिपादितं तस्मात्तेष्वपि तथाधर्मता स्यात्। न च तथा भवति। तेन आत्मस्वरूपस्य ब्रह्मणः कथं सच्चिदानन्दस्वरूपत्वमिति चेत्, सत्यम्, शरीरेन्द्रियमनःप्राणादयो ये पदार्था नित्यत्वधर्मरहिता अशुद्धाश्चैतन्यहीनाः कर्मवश्याश्च न ते आत्मानः। आत्मस्वभावविरुद्धस्वभावत्वात्। अविद्यान्धकारप्रच्छन्नत्वाद् ब्रह्मभूतस्यापि वस्तुनोऽसत्यत्वमनानन्दत्वमप्रकाशमयत्वं च प्रतिभाति।[1]

शरीरादयो यद्यपि अहंकारास्पदत्वेन प्रतीयन्ते तथापि न ते सत्स्वरूपाः। 'अहं गौरः' इत्यादिप्रत्ययो गौरादिदेहस्वामित्वविषयकः, 'अहं कर्त्ता दुःखी' इत्यादिधीस्तु प्रमैव, परन्तु नेदं पारमार्थिकम्। अहंकारास्पदत्वेन प्रतीयमाना इमे इदंकारास्पदत्वं भजन्ते। इदंकारास्पदत्वं च नेदमित्याकारकप्रतीतिमात्रविषयत्वं किन्तु चिद्भास्यत्वं जडत्वमेव। आत्मनो ब्रह्मणो वा तु चिन्मयत्वमजडत्वमेव। यच्च जातेऽपि अहमित्यात्मज्ञाने दुःखानुभवोऽस्तीति मन्यते तदपि न तर्कसहम्, शुद्धे चित्स्वरूपे आत्मनि दुःखसम्बन्धस्य तिमिरसम्बन्धस्येव सूर्येणात्यन्तासम्भवात्। यद्यपि अनाद्यविद्यावशादयं प्रभेदः प्रतीयते तथापि नायं तन्नाशे सम्भवो ब्रह्मणः एव सर्वकार्योत्पादकत्वात्। तथा च श्रुतिः—'अयमेव ब्रह्म योऽयं पवते।[2] आत्मबोधे सर्वस्यैव तस्मिन्नेव लयो भवति। क्षणमात्रार्थमुत्पन्नस्येदंकारास्पदस्यानात्मनः नाशस्तु ध्रुवमेव। तच्च जगद् व्यावहारिकं सत्। ब्रह्म पारमार्थिकम्। शुक्तिरूपादिप्राप्ति-

---

१. श० १४।५।४।५

२. ऐ० ८।२८

भासिकं सदिति। व्यावहारिकस्य प्रातिभासिकस्य च पारमार्थिके सत्त्वाल्लयो भवति। यतः तदतिरिक्तस्य न कथमपि संभावना वेदेषु विद्यते।[1]

एवंरूपेण सृष्टिस्वरूपप्रतिपादने संदेहरूपेण पारमार्थिकसत्ताभूतसमर्थकारणस्य स्वीकरणं 'नासदासी' दित्यादिश्रुत्या क्रियते। अनन्तरं ब्रह्मणः सर्वज्ञत्वं सर्वशक्तिमत्त्वं च तत्रैव दृश्यते। चिन्तनपरम्परायां बीजभूतस्य सिद्धान्तस्य तत्रैव विस्तारोऽपि सम्यग्रूपेणावलोक्यत एव। विशेषतो वेदे ब्राह्मणग्रन्थे च ब्रह्मस्वरूपस्य प्रकारता प्रकटितैव। ब्रह्मणः सर्वात्मत्वं प्रतिपादयन्त्यः श्रुतयः ब्रह्मविषयिणीं धारणामुत्थाप्योल्लेख्य च विस्तृतिं ददुः। यद्यपि ब्रह्मविचारचिन्तनस्येयं सरणिः पूर्णतः स्पष्टा तथापि उत्तरकालीनाऽवधिरेतस्मिन् विषये सूक्ष्मतरा स्पष्टतरा च दृश्यते। उपनिषदि तु ब्रह्मधारणापरम्परा चरमसीमोत्कर्षे तिष्ठति। कारणमपि तु तत्र सार्वजनीनं दुःखानुभवस्याधिक्यमेव। एवं वेदेऽध्यात्मसारभूतस्य ब्रह्मणो विषये विवेचना पर्याप्तरूपेण प्रकाशवत्स्पष्टा दृश्यते।

ब्राह्मणारण्यकग्रन्थेषु ब्रह्मस्वरूपविवेकः

(ई० पू०–१२००—४००)

चिन्तनस्येतिहासे रचनात्मक आलोचनात्मकश्च कालः क्रमेणायाति। एवमेव धर्मेतिवृत्तौ सम्पन्नताया उज्ज्वलतायाश्च युगानन्तरं शुष्कतायाः कृत्रिमतायाश्च काल आगच्छति। यदैव वयमृग्वेदादारभ्य यजुःसामाथर्ववेदाभिमुखाः भवन्तो ब्राह्मणग्रन्थेषु आगच्छामो वातावरणे परिवर्तनं दृश्यते। यत्र प्रथमकाले नवीनता सरलता चासीत् द्वितीयक्षणे ग्रन्थेषु रूक्षत्वं कृत्रिमत्वं च प्रतीयते। धर्मस्य भावना तु सर्वथा विस्मृता, बाह्यरूपाधिक्यं महत्त्वं गतम्। प्रार्थनापुस्तकानामावश्यकता परित्याज्या संजाता। प्रार्थनामन्दिराणां स्थापना आरब्धा। मन्त्राणि वेदेभ्यो गृहीत्वा यज्ञपरकानि च कृत्वा उपयोगमारब्धम्। पुरोहिता एव शासका अभूवन्। यज्ञवेदीनिर्माणार्थं यजुर्वेदेभ्यो विशेषमन्त्राणि संगृहीतानि। तानि च यत्र संकलितानि ते एव ब्राह्मणग्रन्था इति। ब्राह्मणग्रन्थाः क्रियाकलापविधानप्रतिपादकाः यज्ञसम्बन्धिजटिलसंस्कारेषु ब्राह्मणपुरोहितानां पथप्रदर्शकाः सन्ति। अनुष्ठानेष्वनिवार्यता, आश्रमव्यवस्थासु मान्यता, पुरोहितानां च सर्वोच्चपदस्थता तस्यैव युगस्य आविर्भावोऽस्ति। ते एव गूढार्थज्ञा देवतावत्पूज्याश्च बभुवुः।[2] ब्राह्मणकाले इमे एव पौरोहित्यकर्मरता ब्राह्मणा वेदाध्ययने वैदिकज्ञाने च संसक्तमानसा भूत्वा यज्ञपद्धत्या मोक्षसुखप्राप्तिमार्गं वर्णितवन्तः।

---

१. तै० २।८।८।१०

२. शतपथ० २।२।२।६

अस्मिन् काले वेदस्योद्घोषं प्राप्य कर्मद्वारा तदानन्दस्य प्रापणहेत्वर्थं तेषां चेष्टा दृश्यते। कर्मणि ब्रह्मत्वमारोप्य तस्य लाभे एव तल्लाभ इति मत्वा कर्मणा ब्रह्मसाम्यं ब्राह्मणकाले प्राप्यते।

अनन्तरं तस्यैव युगस्योत्तरकाले वेदस्येश्वरीयज्ञानमयत्वमङ्गीकृतम्। तज्ज्ञानं दैवीप्रेरणया ऋषिभिः प्राप्तम्। शब्दानां नित्यत्वं च तत्रैव स्वीकृतम्।[1] वागेव वेदानां जननी, वाक्यं चाभिव्यक्तं सत् जीवितेन शब्देन सम्बद्धय भावं जहाति शाश्वततां च प्राप्नोतीति ते प्रतिपादितवन्तः। अत्र तथाव्याख्याप्रसङ्गाद् दार्शनिकज्ञानं यथार्थं जीवितं च सञ्जातम्। वादविवादानासक्तमानसा जीवितविषयासम्बद्धविषयजिज्ञासाशून्या ये केचन विचारका वेदाभिव्यक्तान्तर्दृष्ट्या जीवनस्य यन् मुख्यं सत्यं निर्दिष्टवन्तस्तदुपेक्षा परवर्तियुगेनासम्भवाऽभूत्। सृष्टिरचनाप्रक्रियायामेको देवः शतपथब्राह्मणे प्रजापतिरूपेण वर्ण्यते यः केवलसत्तात्मक आसीत्। तेनैव कठोरतपसा श्रमेण च सन्तत्यर्थं जीवितप्राणिन उत्पादिताः। तदेव अनन्तरं ब्रह्मरूपेण स्वीकृतम्।[2] कर्मकाण्डप्रधानेष्वेषु ब्राह्मणेषु ज्ञानस्यापि प्राधान्यं स्वीक्रियते। ज्ञानहीनं कर्म न सम्यक् फलदायकमिति तत्र विवेचितमस्ति। तदा तु पुनः पुनर्जन्म मृत्युश्च प्राप्येते जनैरिति अमरताप्राप्त्यर्थं ज्ञानमावश्यकमिति तत्र कथितमस्ति। अमरता चात्मन एव भवति। तदेव सर्वेषां लक्ष्यं यः सर्वेषु पदार्थेषु व्याप्त इच्छामुक्तश्चास्ति।[3] इत्थं ब्राह्मणयुगे ब्राह्मी स्थितिरात्मरूपेण स्वीकृता दृश्यते यत्र अमृतत्वमिच्छाशून्यत्वं सर्वधर्मत्वं चापि वर्तते।

'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति मन्त्रात्मके वेदे कर्मणोऽङ्गित्वमङ्गीकृतम्, यज्ञाङ्गभूतानां देवाहुतिमन्त्राणां निसर्गत एव कर्मप्राधान्यात्। ब्राह्मणग्रन्थेष्वपि यागादिक्रियाप्रसङ्गेन कर्मण एव मुख्यत्वं प्रतिपादितम्। इयमेव परम्परा परवर्तिनि श्रौतगृह्यसूत्रे दृश्यते। परं नायं पन्था मुमुक्षूणां मुक्तये साधीयान्, स च 'स्वर्गकामो यजेत' इत्युक्त्या स्वर्गायैव अलं न तु मोक्षाय 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इति पुण्यक्षये पुनरावृत्तिदर्शनात्। निवृत्तिपथानुयायिनां प्राणिनां कृते तु कश्चित्कर्मव्यतिरिक्तो भिन्न एव मार्ग आरण्यकेषूपनिषत्सु च प्रतिपादितः। आरण्यकोपनिषत्समाम्नायो ब्राह्मणात्मकस्य वेदस्यैवाङ्गमतस्तत्प्रामाण्यं च स्वतःसिद्धम्। यथा चेष्टाप्रतिपादकं यागादिकं कर्म ब्राह्मणेषु विधीयते तथैव बन्धमोक्षादिकं संसृतिनिवर्तकं ज्ञानं ब्राह्मणाङ्गभूतेषु आरण्यकोपनिषद्ग्रन्थेषु उपदिश्यते, न हि ज्ञानादृते

---

१. तैत्तिरीय० २।८।८।५

२. शत० २।५।१।१–३

३. शत० १०।४।३।१८, ११।२।७।१, ११।४।३।२०

मुक्तिरिति श्रवणात् । तज्ज्ञानमादौ साक्षात्कृतधर्माणामृषीणामाश्रमेष्वपरिग्रहाणां मुमुक्षूणां कृते समुद्गतम् । गृहस्थेषु कर्मविरतिर्मा भूदिति धिया महर्षिभिरस्य प्रसृतिः अरण्येष्वेव व्यधीयत । अरण्ये शान्तचित्तस्योपलब्धिसम्भवात् । परं बृहदारण्यकोपनिषदि गार्गीयाग्यवल्क्यसंवादेऽस्य चर्चा जनकराजसभायामपि श्रूयते ।

वेदस्यान्तिमभागरूपो वेदसिद्धान्तप्रतिपादकोपनिषद्ग्रन्थो वेदान्त इति कथ्यते । वेद-ब्राह्मणारण्यकग्रन्थेषु यः सिद्धान्तः प्रतिपादितस्तस्य मार्गस्य सोपसर्गविवेचनमुपनिषत्सु दृश्यते । उपनिषत्प्रतिपादकोऽयं मार्गः संसृतिशीलानां प्राणिनां मोहावरणनिवृत्तये कर्मसाचिव्यमपेक्षते । शुद्धबुद्धस्यैव प्राणिनो मोक्षयोग्यत्वात्, अनेकजन्मसंसिद्धस्ततो याति परां गतिमिति भगवद्वचनाच्च । मनसो निर्वासनीभावाय प्रथमं क्रियायोगमाश्रितानामेव मुमुक्षूणां कालक्रमेण मोक्षो नान्येषामिति । एवञ्च क्रियानिरपेक्षा मुक्तिशक्यैवेति ब्राह्मणानां यज्ञकर्मणा यद्ब्रह्म-स्थितिप्राप्तिर्वर्णिता सा सर्वथा उपयुक्तैवेति । काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तकादि-क्रियया चित्तशुद्धिर्भवति । काम्यानि कर्माणि न शुद्धौ गृहीतानि । यत्किञ्चित् फलकांक्षया क्रियमाणानि कर्माणि काम्यानि कथ्यन्ते, स्वर्गप्राप्तीच्छया क्रियमाणानि ज्योतिष्टोमयज्ञादीनि । ननु ज्योतिष्टोमादीनां धर्मसाधनत्वेन पुण्यदायकत्वेन शुभकर्मतया च कथं तेषां वेदान्तविद्या-धिकारित्वे प्रतिबन्धकत्वमिति चेत्, सत्यम्, ज्योतिष्टोमादीनां शुभकर्मत्वेऽपि तत्फलभोगार्थं जन्ममरणहेतुतया मोक्षावरोधकत्वेन निषिद्धकर्मवत् तेषामपि वेदान्तविद्याया अधिकारित्वे प्रति-बन्धकत्वम् । निषिद्धकर्माणि च गोहत्यादीनि ब्रह्महत्यादीनीति यावत् । एवं परित्यक्तकाम्य-निषिद्धिकर्मा पुण्यपापराहित्येन च निर्मलस्वान्त एव मनुष्यो मोक्षाधिकारी नान्यः । नित्यानि कर्माणि तु कल्मषनाशायावश्यकानीति । प्रतिदिनं गृहमार्जनं स्नानं दन्तधावनं यदि क्रियते तदा न विशेषपुण्यलाभोऽपितु मालिन्यजन्यकीटाणुनाशाय तानि नित्यं निष्पाद्यन्ते । येषां करणे विशेषपुण्याभावेऽपि अकरणे प्रत्यवायस्तानि सन्ध्यावन्दनपञ्चमहायज्ञादीनि नित्यानि । एवमेव प्रतिदिनकृतज्ञाताज्ञातपापापनोदार्थं प्रतिदिनं क्रियमाणानि यानि सन्ध्यावन्दनादीनि तानि कर्तव्यतया शुद्ध्यर्थमावश्यकान्येवेति । पुत्रे जाते 'वैश्वानरं द्वादशकपालं निर्वपेत्, इत्यादि-स्थलेषु विहितानि जातेष्ट्यादीनि ग्रहणस्नानादीनि च नैमित्तिककर्माण्युच्यन्ते । 'प्रायः पापं विजानीयात् चित्तं तस्यैव शोधनमि' त्युक्त्या पापक्षालनार्थं क्रियमाणानि चान्द्रायणादीनि प्रायश्चित्तकर्माणि कथ्यन्ते । एवमेवोपासनक्रियाऽपि मुक्तये अङ्गरूपा । 'सर्वं खल्विदं ब्रह्म' इत्यादिशास्त्रीयप्रमाणैः सकलचराचरप्रपञ्चस्य ब्रह्मणो रूपत्वे निश्चिते सगुणे ब्रह्मणि चिरकाल-पर्यन्तमात्मनो मनोवृत्तिं स्थिरीकर्त्तुं क्रियमाणानि शाण्डिल्यविद्यादीनि उपासनानि । छान्दोग्योप-निषदि 'सर्वं खल्विदं ब्रह्म' [illegible] शाण्डिल्यः' एतत्पर्यन्तं

शाण्डिल्यर्षिणा ब्रह्मोपासना उक्तेति ।[१] शतपथब्राह्मणेऽपि 'आत्मानमुपासीत मनोमयम्' इत्युक्तम् । मनोमयमयं पुरुषः भारूप इत्युच्यते । बुद्धिशुध्यर्थं नित्यनैमित्तिकप्रायश्चित्तकर्माणि, एवं च चित्तैकाग्रतायै उपासनादिक्रिया क्रियते । 'तमेतमात्मानम्' इत्यादिश्रुतिः, तपसा कल्मषं हन्ति' इत्यादिस्मृतिश्चात्र प्रमाणम् । एवमुपासनादिक्रिया मुक्तिप्राप्तौ मार्गरूपा इति शंकराचार्येण प्रतिपादितमस्ति ।[२] इत्थं ब्राह्मणग्रन्थप्रतिपादितसाधनं मार्गभूतं सदुपनिषत्सु सूक्ष्मरूपेण ब्रह्मावगतये पन्था भवति ।

—क्रमशः

—:o:—

तस्मै ज्येष्ठाय ब्रह्मणे नमः

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति ।
स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥
यस्य भूमिः प्रमा अन्तरिक्षमुतोदरम् ।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥
यस्य सूर्यश्चक्षुः चन्द्रमा च पुनर्णवः ।
अग्निं यश्चक्रे आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥
यस्य वातः प्राणापानौ चक्षुरङ्गिरसोऽभवन् ।
दिशो यश्चक्रे प्रज्ञानीः तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥

अथर्ववेदः १०, ७, ३१-३४

---

१. छान्दोग्योप० ३।१४।१–२

२. ब्रह्मसूत्र० १।४

महाकविकालिदासस्य काव्येषु मधुमासः

डॉ० रामाशीषपाण्डेयः

एकस्मिन् वर्षे षड् ऋतवः भवन्तीति भारतीयाः सर्वथा परिचिताः सन्ति। ज्येष्ठाषाढ़मासयोर्ग्रीष्मः, श्रावणभाद्रपदमासयोः पावसः, आश्विनकार्तिकयोः शरद्, मार्गशीर्षपौषयोः हेमन्तः, माघफाल्गुनयोः शिशिरः, चैत्रवैशाखयोर्मधुमासश्चेति विश्रुतम्।[1] ऋतूनां मधुमासस्य श्रेष्ठत्वं सर्वविदितं यतो भगवता श्रीकृष्णेनापि श्रीमद्भगवद्गीतायाम्— 'ऋतूनां कुसुमाकरः[2]' इति प्रकटितम्। मधुमासोऽयं शिशिरात्यये शिशिरमतिक्रम्य प्रकटयति स्वकीयं हृद्यं रूपम्। शिशिरर्तौ प्रकृतिप्राङ्गणे समुपस्थितेषु लतापादपेषु पाण्डुराणि जीर्णानि शीर्णानि पत्राणि दृष्टिं न विलोभयन्ति सौन्दर्यसाधकानां रामणीयकप्रेक्षकाणाम्। वसन्तागमनेन पुनः सर्वत्र नवीनताया दर्शनं भवति। जीर्णशीर्णपत्राणां स्थाने कोमलानि किसलयानि प्रादुर्भवन्ति पुनश्च लताः पुष्पिता यान्ति, पादपा हरितपुष्पैः किसलयैश्चालङ्कृता दृष्टिं रञ्जयन्ति। अस्मिन् समये पशुपक्षिणः कीटादयश्चालौकिकमानन्दं स्फूर्तिं प्रेरणञ्चावाप्नुवन्ति। अतएवायमृतुः सत्यमेव ऋतुसम्राड्रूपेणावलोक्यते काव्यरसिकैः।

काव्येषु प्रकृतिवर्णनं काव्यशोभाधायकमित्यस्मिन् विषये न केवलं भारतीयाः कवयोऽपितु विदेशीयाश्चापि समानमार्गगामिनो दृश्यन्ते। भारतीयलक्षणग्रन्थानुसारेण तु काव्येषु ऋतुवर्णनमपेक्षितम्।[3] संस्कृतसाहित्यस्य प्रस्तृते प्राङ्गणे काव्येषु महाकाव्येषु रूपकादिषु च यथानुरूपमृतुवर्णनमुपलभ्यत एव। मानवस्तु प्रकृतेरुपासकः, प्रकृतिरपि प्राणिनां भावोद्दीपका। भावप्रधानो मानवः भावाभिव्यक्तये उपादानभूतस्यानिवार्यतत्त्वस्य प्रकृतेरात्मस्वरूपस्यावलोकनं मुहुर्मुहुर्विदधाति।

---

१. मधुमासश्चैत्रमासस्य कृतेऽपि प्रसिद्धः परं मधुशब्दस्यार्थः वसन्त इति चैत्रवैशाखाभ्यां निष्पन्नो मधुमासः इत्यवधेयम्।

२. श्रीमद्भगवद्गीता—१०/३५

३. नगरार्णवशैलर्तु चन्द्रार्कोदयवर्णनैः— काव्यादर्श—(दण्डी)

महाकविकालिदासः प्रकृतेरनन्योपासकः कविसम्राडिति सः प्रायेण सर्वेषु स्वरचितेषु दृश्यश्रव्यात्मकेषु काव्येषु प्रकृतेरुपादानभूतस्य वनपर्वतप्रभृतिप्रकृतितत्त्वस्य वर्णनं कृतवानिति नास्ति सन्देहलवः। यथासमयं समागतानामृतूनां वर्णनमपि कवेरस्य काव्येषु परमाह्लादं जनयति। कुसुमाकरस्य वर्णनं तु सातिशयं सौन्दर्यं बिभर्ति। कविवरस्य काव्येषु अस्ति कश्चिद्वागिति शब्दानामादिभूतानां यथाक्रमाणां कुमारसम्भवमेघदूतरघुवंशानां काव्यानां विषये न विप्रतिपत्तिः। तथा च यथासंख्यागतानामभिहितानां त्रयाणामुत्तरोत्तरं पौर्वापर्यमिति विनिश्चिन्वन्ति विद्वांसः। तेषु कुमारसंभवं महाकाव्यं मेघदूतं खण्डकाव्यं रघुवंशञ्च महाकाव्यमिति। एकमपरमपि खण्डकाव्यमृतुसंहारनामकं कविवरस्यादिमकीर्तिकौशलमिति विचारितं स्वीकृतञ्च विद्वद्वर्यैः। भावभाषाद्यवलोकनेन प्रतीयते सत्यमेवेदं कविवरस्यादिमं काव्यम्। काव्यभेदानुसारेण खण्डकाव्यान्तर्भूतं षट्सर्गात्मकमिदम्। अत्र षड् ऋतवो वर्णिताः सन्ति ग्रीष्म-वर्षा-शरद्धेमन्त-शिशिरवसन्ताः। कालिदासस्य काव्येषु ऋतुसंहारकुमारसम्भवरघुवंशादिषु श्रव्य-काव्येषु ऋतुराजस्य कुसुमाकरस्य स्वरूपं वर्णनञ्चावलोकनीयमिति प्रस्तूयते—

वसन्तकाले सूर्यो दक्षिणत उत्तरदिशं प्रति प्रस्थानं करोति। उत्तरायणे गते सूर्ये वसन्तस्यागमनं महाकविना वैलक्षण्येनोपस्थापितम्। कुमारसम्भवमहाकाव्ये सूर्यस्योत्तरायण-प्रस्थानमवलोकनीयम्—

कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य।
दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिःश्वासमिवोत्ससर्ज॥ कु० ३/२५

उष्णरश्मौ सूर्ये दक्षिणायनकालं विलङ्घ्य कुबेरगुप्तामुदीचीं दिशं गन्तुं प्रवृत्ते सति दक्षिणा दिक् मुखेन गन्धवहं व्यलीकनिःश्वासमिव व्यक्तवतीति प्रयाणस्योत्तरायणम् रघुवंश-महाकाव्येऽपि सूर्यस्य दक्षिणतश्चोत्तरदिशं प्रति गमनं वर्णितमस्ति—

जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः।
दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयं नगमत्यजत्॥ रघु० ९/२५

कुबेराधिष्ठितां दिशं जिगमिषू रथयुजा परिवर्तितवाहनो रविः हिमस्य निग्रहैर्दिन-मुखानि प्रभातानि विमलयन् मलयाचलमत्यजदिति स्पष्टम्-यतः सूर्यः दक्षिणदिशं परित्यज्य उत्तराशां गतः।

वसन्तस्यागमनप्रसङ्गः कविना वर्ण्यते। आदिभूते ऋतुसंहारकाव्ये समुपस्थितस्य वसन्तस्य सौन्दर्यवर्णनं यथा—

प्रफुल्लचूतांकुरतीक्ष्णसायको द्विरेफमालाविलसद्धनुर्गुणः।
मनांसि वेद्धुं सुरतप्रसङ्गिनां वसन्तयोद्धा समुपागतः प्रिये॥ ऋतु० ६/१

धनुर्बाणयुक्तोऽयं वसन्तः योद्धृस्वरूपः सुरतप्रसंगिनां मनांसि वेद्धुमागतः। तस्य तीक्ष्णबाणः प्रफुल्लचूतांकुरः धनुर्गुणस्तु द्विरेफमाला। अत्र वसन्तः कामदेवस्वरूपः कविना वर्णितः, यतो हि कामदेवस्य पञ्चबाणेषु चूतांकुरोऽप्येकः।[1] कामदेवस्य पञ्चबाणेषु चूतांकुरस्य वर्णनं कुमारसम्भवेऽपि विद्यते।[2]

रघुवंशमहाकाव्ये तु वसन्तस्य पदार्पणप्रसंगे कविना नितरां चारुत्वं प्रदर्शितम्—

कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकूजितम्।
इति यथाक्रममाविरभून्मधुर्द्रुमवतीमवतीर्य वनस्थलीम्॥ रघु० ६/२६

आदौ कुसुमजन्म ततो नवपल्लवास्तदुभयानन्तरं षड्पदानां भ्रमराणां कोकिलानाञ्च कूजितम्। इत्यनेन प्रकारेण यथाक्रमं द्रुमवतीं वनस्थलीमवतीर्य मधुर्वसन्तः आविरभूदित्यहो वसन्तस्यागमनम्।

प्राप्ते वसन्तसमये युवतयो वसन्तपुष्पेभ्यः स्वकीयं शरीरं मण्डयन्ति। आभूषणरूपेण तेषां प्रयोगं कृत्वा शृंगारप्रियेति प्रमाणमुपस्थापयन्ति—

कर्णेषु योग्यं नवकर्णिकारं चलेषु नीलेष्वलकेष्वशोकम्।
पुष्पञ्च फुल्लं नवमल्लिकायाः प्रयान्ति कान्तिं प्रमदाजनानाम्॥ ऋ० ६/५

कर्णेषु कर्णिकारपुष्पाणां चञ्चलनीलालकेष्वशोकपुष्पाणां नवमल्लिकायाः पुष्पाणाञ्च योजनं प्रमदाजनानां कान्तिं प्रयाति। ऋतुसंहारे एकतः कर्णिकारपुष्पाणां कर्णेषु समायोजनं भवति, अपरतस्तैः किं दग्धं न कृतमिति तत्रैव ६/२० श्लोके विद्यते।

कुमारसम्भवमहाकाव्यस्य तृतीयसर्गे महाकविना वर्णितम् यत् पार्वती अशोक-सिन्धुवार-कर्णिकारपुष्पाणामुपयोगं शृङ्गारार्थं करोति—

अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम्।
मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती॥ कुमा० ३/५३

अन्यस्मिन् स्थले महाकविः कर्णिकारस्य वर्णनप्रसङ्गे प्रतिपादयति यत्—

वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः॥ कुमा० ३/२८

कर्णिकारमुत्कृष्टवर्णत्वे सति निर्गन्धत्वात् चेतः पीडयति स्म यतो हि विश्वसृजः प्रवृत्तिः गुणानां सामग्र्यविधौ प्रतिकूला भवति।

---

१. अरविन्दमशोकञ्च चूतञ्च नवमल्लिका।
नीलोत्पलञ्च पञ्चैते कामदेवस्य सायकाः॥

२. कुमा० ३/२७

रघुवंशमहाकाव्येऽपि नार्यः कर्णिकारपुष्पाणि कुन्तले धारयन्ति—

हुतहुताशनदीप्तिवनश्रियः प्रतिनिधिः कनकाभरणस्य यत् ।
युवतयः कुसुमं दधुराहितं तदलके दलकेसरपेशलम् ॥ रघु० ९/४०

प्रियैर्दत्तं कनकाभरणस्य प्रतिनिधिः प्रज्वलिताग्निप्रभं दलकेसरपेशलं कर्णिकारकुसुमं युवतयः कुन्तले धारयामासुः ।

ऋतुसंहारकाव्यस्य ६/५ श्लोके अशोकपुष्पाणामुपयोगः प्रमदाजनस्य कुन्तलालंकृतये वर्णितः । तत्रैव ६/१९ श्लोके विद्रुमरागताम्रं पुष्पचयं दधानाः सपल्लवा अशोका नवयौवनानां हृदयं सशोकं कुर्वन्ति—

आमूलतो विद्रुमरागताम्रं सपल्लवाः पुष्पचयं दधानाः ।
कुर्वन्त्यशोका हृदयं सशोकं निरीक्ष्यमाणा नवयौवनानाम् ॥

बसन्तकाले अशोकवृक्षाः पुष्पान्विता भवन्ति । कविवरस्य कुमारसम्भवेऽपि सपल्लवानां पुष्पसमन्वितानामशोकवृक्षाणां वर्णनमाकर्षकम्—

असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि ।
पादेन नापैक्षत सुन्दरीणां सम्पर्कमासिञ्जितनूपुरेण ॥ कुमा० ३/२६

काव्यपरम्परायामशोकस्य पुष्पोद्गमः सुन्दरीणां पादाघातात् प्रसिद्धः[1] । अत्र तु अनवसरे समुपस्थिते वसन्ते अशोकः सुन्दरीणां नूपुररवयुक्तेन पादेन सम्पर्कं नापैक्षत, स्कन्धात्प्रभृति सपल्लवानि पुष्पाणि सद्यः असूत ।

रघुवंशमहाकाव्ये सपल्लवाः पुष्पिताश्चाशोकवृक्षाः वर्णितास्तथा तेषां पल्लवानां पुष्पाणाञ्चोपयोगं नार्यः शृङ्गारार्थं कुर्वन्ति—

कुसुममेव न केवलमार्तवं नवमशोकतरोः स्मरदीपनम् ।
किसलयप्रभवोऽपि विलासिनां मदयिता दयिताश्रवणार्पितम् ॥ रघु० ९/२८

वसन्तकाले नार्यो न केवलमशोकपुष्पाणामुपयोगं कुर्वन्ति अपि तु अशोककिसलयानामपि कर्णेषु समायोजनं कृत्वा विलासिनां मदकारणानि भवन्ति ।

शैत्यावसाने वसन्तागमने सूर्यरश्मयः किञ्चित् प्रखरा भवन्ति । परिणामतो विलासिनीनां पत्रकविशेषकेषु स्वेदागमो भवत्येवेति द्रष्टव्यम्—

सपत्रलेखेषु विलासिनीनां वक्त्रेषु हेमाम्बुरुहोपमेषु ।
रत्नान्तरे मौक्तिकसङ्गरम्यः स्वेदागमो विस्तरतामुपैति ॥ ऋतु० ६/७

१. पादाहतः प्रमदया विकसत्यशोकः शोकं जहाति वकुलो मुखसीधुसिक्तः ।
आलोकितः कुरबकः कुरुते विकासमालोडितस्तिलक उत्कलितो विभाति ॥

पत्रकविशेषकेषु स्वेदोद्गमस्य वर्णनं कुमारसम्भवे यथा—

हिमव्यपायाद्विशदाधराणामापाण्डरीभूतमुखच्छवीनाम्।
स्वेदोद्गमः किम्पुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु॥ कु० ३/३३

मधुमासे चूताङ्कुरबाहुल्ये पुंस्कोकिलाश्चूतरसासवमत्ता रागहृष्टाः प्रियां चुम्बन्ति, पद्मस्था द्विरेफा गुञ्जारयुक्तेन ध्वनिना प्रियायाः प्रियं चाटु कुर्वन्ति—

पुँस्कोकिलश्चूतरसासवेन मत्तः प्रियां चुम्बति रागहृष्टः।
कूजद्द्विरेफोऽप्ययमम्बुजस्थः प्रियं प्रियायाः प्रकरोति चाटु॥ ऋतु० ६।१४

पुनश्च—

पुंस्कोकिलैः कलवचोभिरुपात्तहर्षैः
कूजद्भिरुन्मदकलानि वचांसि भृङ्गैः।
लज्जान्वितं सविनयं हृदयं क्षणेन
पर्याकुलं कुलगृहेऽपि कृतं वधूनाम्॥ ऋतु० ६/२१

हर्षोन्मत्तैः पुँस्कोकिलैर्वचोभिर्भृङ्गानां कूजनैश्च कुलगृहेऽपि वधूनां लज्जान्वितं हृदयं क्षणेन पर्याकुलं भवति। कुमारसम्भवे पुनः चूताङ्कुरास्वादकषायकण्ठः पुँस्कोकिलो मधुरं कूजति। तत्कूजनञ्च मनस्विनीनां मानविघाते स्मरस्य वचनं भवति—

चूताङ्कुरास्वादकषायकण्ठः पुँस्कोकिलो यन्मधुरं चुकूज।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य॥ कु० ३/३२

रघुवंशमहाकाव्येऽपि कविना प्रतिपादितं यत् कोकिलाभिर्निवेदिते सतीव वधूजनः रमते स्म तद्यथा—

त्यजत मानकलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः।
परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः॥ रघु० ६/४७

अन्यभृताभिः कोकिलाभिः सुरभिगन्धिषु कुसुमितासु वनराजिषु प्रथममुदीरिता मिताश्च गिरः प्रविरला मुग्धवधूकथा इवेति।[1] पुष्पिताः मलयमारुतकम्पिताश्च सहकारलताः कलिकामजितां जितरागद्वेषाणामपि मनः अदमयन्।[2]

वसन्ते पशुकीटेष्वपि कामभावनायाः समाचारः विशेषतो भवतीति दर्शनीयम्—

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः॥ कुमा० ३/३६

१. रघु० ६।३४
२. रघु० ६।३३

द्विरेफः कुसुमैकपात्रे भृङ्गीमनुसरन् मधु पपौ, पुनः कृष्णसारो मृगः श्रृङ्गेण स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत।

रक्तपुष्पावनम्रैर्मरुतावधूतैः किंशुकवृक्षैः पृथिवी रक्तपरिधानावृता नववधूरिव विभाति—

आदीप्तवह्निसदृशैर्मरुतावधूतैः सर्वत्र किंशुकवनैः कुसुमावनम्रैः।
सद्यो वसन्तसमये हि समाचितेयं रक्तांशुका नववधूरिव भाति भूमिः॥ ऋतु० ६/१९

कुमारसम्भवे पुनः बालेन्दुवक्राण्यतिलोहितानि तानि पलाशानि प्रियेण वसन्तेन सद्यः समागतानां वनस्थलीनां नखक्षतानीव विभान्ति—

बालेन्दुवक्राण्यविकासभावाद् बभुः पलासान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्॥ कुमा० ३/२९

वसन्तकाले किंशुके निहितं मुकुलजालं नखक्षतमिवेति रघुवंशेऽपि वर्णितम्—

उपहितं शिशिरापगमश्रिया मुकुलजालमशोभत किंशुके।
प्रणयिनीव नखक्षतमण्डलं प्रमदया मदयापितलज्जया॥ रघु० ९/३१

शिशिरापगमश्रिया किंशुके उपहितं मुकुलजालं मदेन यापितलज्जया प्रमदया प्रणयिनि उपहितं नखक्षतमिवाशोभत। यद्यपि नखक्षतादीनां श्रृङ्गारानुभावानां नायिकायां नायकेन सम्पादनं विश्रुतं तथापि मदयापितलज्जया प्रमदयाऽपि प्रणयिनि प्रियतमे नखक्षतमुपयुक्तम्।

वसन्तपरिधानम्

महाकविना वसन्तवर्णनप्रसङ्गे वसन्तपरिधानमपि विशेषेणोपवर्णितम्। पुरुषाणां कृते नारीणाञ्च कृते परिधानं पृथक् पृथग् भवति। वसन्ते जनाः गुरूणि वासांसि परित्यज्य तनूनि वासांसि धारयन्ति। प्रथमं स्त्रीपरिधानम्—

कुसुम्भरागारुणितैर्दुकूलैर्नितम्बबिम्बानि विलासिनीनाम्।
रक्तांशुकैः कुकुंमरागगौरैरलंक्रियन्ते स्तनमण्डलानि॥ ऋ० ६/४

नार्यो वसन्ते दुकूलवस्त्रं कुसुम्भरागारुणितं पुनश्च ऊर्ध्वांशुकं रक्तं कुङ्कमरागगौरं धारयन्ति। कुमारसम्भवे ३।५४ श्लोकेऽपि रक्तांशुकस्य वर्णनमस्ति। पुरुषवस्त्राणि तु लाक्षारसरञ्जितानि, सुगन्धीनि, कालागुरुधूपितानि च भवन्ति[1]।

---

१. ऋ० ६।१३

वसन्ते प्रयुक्तान्याभरणानि

ऋतुसंहारस्य ६।६ श्लोके सितचन्दनार्द्रहारः, वलयः, अङ्गदम्, काञ्चीत्याख्यान्याभरणानि वर्णितानि सन्ति। काञ्चीगुणायास्तु कुमारसम्भवस्य ३।५५ श्लोकेऽपि वर्णनं विद्यते। पुनः ऋतुसंहारस्य ६।७ श्लोके मौक्तिकानि रत्नानि च वर्णितानि। ६।२४ श्लोके हेमरसनायाः गात्रयष्टिनामाभूषणस्य च वर्णनमस्ति।

वसन्ते विलेपनम्

वसन्ते प्रायेण चन्दनस्य विलेपनं विश्रुतम्। कालिदासेनापि ऋतुसंहारस्य ६।११ श्लोके प्रियङ्गुकालीयककुङ्कुमाक्तस्य चन्दनस्य कस्तूरीयुक्तस्य चन्दनस्य च वर्णनमर्थानुरूपं सम्पादितम्।

वसन्ते मधुपानम्

वसन्ते मद्यपानमानन्दवहमिति ज्ञायते वर्णनप्रसङ्गात्—

ललितविभ्रमबन्धविचक्षणं सुरभिगन्धपराजितकेसरम्।
पतिषु निर्विविशुर्मधुमङ्गना स्मरसखं रसखण्डनवर्जितम्॥ रघु० ६/३६

अङ्गना ललितविभ्रमबन्धविचक्षणं सुरभिगन्धपराजितकेसरं मन्मथवर्धकं मधु पतिभिः सह परस्परमतीवानुरागपूर्वं पपुरिति। एवं कुमारसंभवेऽपि वसन्तवर्णनप्रसङ्गे—

गीतान्तरेषु श्रमवारिलेशैः किञ्चित्समुच्छ्वासितपत्रलेखम्।
पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किम्पुरुषश्चुचुम्बे॥ कुमा० ३/३८

किम्पुरुषः स्वेदोद्बिन्दुभिः ईषद्विश्लेषितपत्रभङ्गं पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखमचुम्बत्। अनेन प्रकारेण वसन्ते मद्यवर्णनं ऋतु० ६।१०, रघु० ६।३१, ३६, ४२, कुमा० ३।३८ श्लोकेषु प्राप्यते।

वसन्ते क्रीडनम्

महाकविना वसन्तवर्णनप्रसङ्गे दोलनस्य वर्णनं रघुवंशस्य ६।४६ श्लोके चारुतया कृतम्।

स्त्रीणां भावविकाराः

वसन्तागमनेन स्त्रीणां भावविकाराः प्रकटिता भवन्ति। ऋतुसंहारस्य ६।६ श्लोके समन्थरजृम्भणम्, ६।११ श्लोके भ्रूक्षेपः जिह्मवीक्षितं, मिश्रालसविभ्रमवाक्यञ्चोपलभ्यते।

वसन्तपुष्पाणि

वसन्ते अपरिमितानि कुसुमानि विकसितानि भवन्ति यतो हि वसन्तः कुसुमाकरः। रघु० ६।२, ऋतु० ६।१८ श्लोकयोः कुरबकस्य, रघु० ६।३० श्लोके वकुलस्य, ऋतु० ६।२३ श्लोके कुन्दस्य, रघु० ६।३, ऋतु० ६।१, २, १४, १५, १७, २२, २६, २७, २८, कुमा० ३।२७, ३०, ३२ श्लोकेषु पुष्पान्वितस्य चूतस्य, रघु० ६।४० ऋतु० ६।५, २०, कुमा० ३।२८, ५३ श्लोकेषु कर्णिकारस्य, रघु० ६।४१, ४४, कुमा० ३।३० श्लोकेषु तिलकस्य, रघु० ६।४२, ऋतु० ६।५ श्लोकयोर्नवमल्लिकायाः, ऋतु० ६।६, १६ कुमा० ३।२६, ५३, रघु० ६।२८ श्लोकेष्वशोकस्य, कुमा० ३।५२ श्लोके सिन्धुवारस्य, ऋतु० ६।१, रघु० ६।२७ श्लोकयोः कमलस्य, ऋतु० ६।१६, २०, २८, कुमा० ३।२६ रघु० ६।३१ श्लोकेषु पलासस्य, कुमा० ३।३१ श्लोके प्रियालद्रुमस्य पुष्पस्य च वर्णनं प्राप्यते।

वसन्ते पशवः

महाकविना वसन्तवर्णने पशवश्चापि वर्णिताः। कुमा० ३।३१, ३६ प्रभृतिश्लोकेषु मृगस्य, कुमा० ३।३७ ऋतु० ६।२८ श्लोकयोः गजस्य वर्णनं विद्यते।

वसन्ते कीटाः

कीटेषु भृङ्गस्य वर्णनं विशेषरूपेण कविना कृतम्। ऋतु० ६।१, १४; १७, २१, २४, २८ कुमा० ३।२७, ३०, ३६, ५६, रघु० ६।२६, २७, २६, ३०, ३४, ३५, ४१, ४४ श्लोकेषु भृङ्गस्य वर्णनं प्राप्यते।

वसन्ते पक्षिणः

कालिदासेन वसन्तवर्णनप्रसङ्गे पक्षिणश्चापि वर्णिताः। तत्र रघु० ६।२६, ३४, ४३, ४७ कुमा० ३।३२ ऋतु० ६।१४, २०, २१, २२, २४, २५, २७, २८ श्लोकेषु कोकिलस्य, कुमा० ३।३७ श्लोके चक्रवाकस्य, रघु० ६।१७ श्लोके हंसस्य च वर्णनं सम्पादितम्।

महाकवेः रूपकेष्वपि वसन्तस्य वर्णनमुपलभ्यते परमत्र श्रव्यकाव्यान्तर्भूतं वसन्तसौन्दर्यमुपन्यस्तम्। कविवरस्य काव्येषु निबद्धस्य वसन्तवर्णनस्य प्रभावः परवर्तिकाव्येष्वपि दृश्यते, अतएव कालिदासोत्तरकाव्येषु वसन्तसौन्दर्यमनुसन्धेयमिति दिक्।

'एको रसः करुण एव'–एकमनुशीलनम्

पण्डितश्रीआद्याचरणझाः

संस्कृतकाव्यजगतो विभूतिर्भवभूतिः स्वकीये प्रसिद्धे उत्तररामचरितनामके नाटके समुद्घोषितवान् यत् "एको रसः करुण एव निमित्तभेदादन्यः पृथक् पृथगिवाश्रयते विवर्तान्"।

रससिद्धान्तप्रतिपादकेषु विविधेषु मूर्धन्यग्रन्थेषु नायं सिद्धान्तः प्रतिपादितः, रसाभिव्यक्तिरसानुभूति-साधारणीकरणादि-समीक्षायां सर्वथा नवीनेयमुद्घोषणा रससिद्धान्तवादिनामग्रे।

अत्र विचार्यते यत् भवभूतिसदृशो मर्मज्ञो मनीषी न केवलमर्थवादमनुसृत्यैव किमपि प्रतिपादयितुं शक्नोति तत्त्वान्वेषणं विनेत्यपि निश्चप्रचम्। अतस्तत्रावश्यं रससिद्धान्तवादिभी रससमीक्षकैश्च गम्भीररूपेण चिन्तनीयोऽयं विषयः।

समीक्षाक्रमे सर्वप्रथमं "काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा। क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः" ध्वन्यालोककारस्येयं कारिका समक्षमायाति। सर्वप्रथमपद्यरूपे "मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः। यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।" इत्येवंरूपेण परिणतः। न केवलं ध्वन्यालोककारेण किन्तु महाकविकालिदासादयोऽपि वेदोत्तरं सर्वप्रथमं वाल्मीकिरामायणनिर्माणे महर्षिणा प्रोक्तमुक्तश्लोक एवोत्समिति मन्यन्ते। रससिद्धिप्रतिपादके प्राचीनतमे महर्षिभरतप्रणीते नाट्यशास्त्रेऽतिविस्तृतरूपेण साङ्गोपाङ्गतया रसवर्णनं दृश्यते। नाट्यशास्त्रस्य पर्यालोचनया स्पष्टं ज्ञायते यत् मूलरूपेण रसवादसिद्धान्तस्यास्तित्वं भरतात्पूर्वमेव चिरादासीत्। यथाऽभिनवभारत्यां रसार्णवमन्थने प्रवीणा अभिनवगुप्ताचार्याः प्रोक्तवन्तो यत् "ता एता ह्यर्था एकप्रघट्टकतया पूर्वाचार्यैर्लक्षणत्वेन पठिताः, मुनिना तु सुखसंग्रहाय यथास्थानं विनिवेशिताः।"

नाट्यशास्त्रस्य प्रथमाध्याये सप्तदशश्लोकेन प्रतीयते यदथर्ववेदादेव रसानां संग्रहो जातः–यथा–"जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च। यजुर्वेदादभिनयान् रसानाथर्वणादपि।" अथर्ववेदादनन्तरं वात्स्यायनस्य कामसूत्रे रसनिर्वचनीयप्रकरणे प्रमुखतामाधत्ते।

परिणामतः रससिद्धान्तपरम्परायां शृंगाररसस्य प्राधान्यं प्रायः सर्वत्र प्रतिपादितं वर्तते। नात्र किञ्चिद्वैमत्यं यत् सम्भोगविप्रलम्भोभयभेदयोरनुस्यूतः शृङ्गाररसोऽतिविस्तृतरूपेण व्याप्तो वर्तते। किन्तु तत्र तत्रभवतो भवभूतेरुक्तिरपि समूला सरहस्या च वर्तते नात्र कश्चन सन्देहः। वाल्मीकिरामायणे बालकाण्डे स्वयं महर्षिणा प्रोक्तम्—

"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः। शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा। समाक्षरैश्चतुर्भिर्यः पादैर्गीतौ महर्षिणा सोऽनुव्याहरणाद् भूयः शोकः श्लोकत्वमागतः॥"

रघुवंशेऽपि कालिदासेन प्रोक्तं—"श्लोकत्वमापद्यत यस्य शोकः"। उक्तोद्धरणेन करुणरसस्थायिभावेन शोकेन समुद्भूतः श्लोक एवायं काव्यात्मकं पद्यं यस्य विस्तारमेव 'रामायण'-मिति मन्यन्ते रसज्ञाः। अत्र विचार्यते सूक्ष्मदृष्ट्या यत् भवभूतेरुक्तौ किं रहस्यम् ?

सर्वप्रथमं काव्यनिर्माणे करुणरसाभिव्यक्तिर्जाता, स एव रस आद्यो रसस्तदङ्गत्वेनैवान्ये रसा दृश्यन्ते व्यवह्रियन्ते च। तत्र शृङ्गारेऽपि करुण एव कथं कारणमित्यनुशीलनीयम्—

'कारुण्यं करुणा: घृणा कृपा दयाऽनुकम्पा स्यादनुक्रोशः।' इत्यमरकोषरीत्या करुणशब्दस्यैते पर्यायवादिनः शब्दाः। तत्र सम्भोगविप्रलम्भोभयभेदात्मके शृङ्गारे विप्रलम्भ एव सम्भोगशृङ्गारस्योत्कर्षाधायकः। विप्रलम्भे च वियोगजनितं कारुण्यमेव तिष्ठति-इति पूर्वोक्तदृष्टान्तेन सिद्धम्। तत्प्रमादे "संगमविरहविकल्पे वरमिह विरहो न संगमस्तस्याः। संगे सैव तथैका विरहेऽपि तन्मयं जगत्॥" इति प्रसिद्धम्। परिणामतः शृंगाररसः करुणमूलक एवेति निश्चितम्। यद्यपि शृङ्गारस्य स्थायिभावो रतिर्वर्तते किन्तूपर्युक्तसूक्ष्मविवेचनेन तत्र तत्त्वतः करुण एव।

हास्यरसस्य स्थायिभावः हासो वर्तते, हास्यं च तदैव जायते यदा किमप्यद्भुत पश्यति दर्शयति, शृणोति श्रावयति, अनुभवति अनुभावयति वा। तत्राद्भुते विषये कस्मिन्नपि वस्तुनि च हृद्गतं यत्कारुण्यं यश्चानुक्रोशः स एव हास्यरूपे परिणमति। हसन्तो जनास्तद्गतविषयमनुभवन्तोऽट्टहासं मृदुहास्यं वा कुर्वन्ति। अतो हास्योऽपि करुणमूलक एव।

रौद्ररसस्य स्थायिभावः क्रोधः। क्रोधः कदा जायते इत्यत्र गम्भीरदृष्टया चिन्ता विधेया। स्वाभिभावितं स्वाधीनस्थं जनं वा प्रति कश्चित् तदैव क्रुध्यति यदा सोऽभिभावितोऽधीनस्थो वाऽनुकूलं कार्यं न विदधाति। तदनुकूलकार्यं प्रति योऽनुरागः या चात्मीयता तदेव कारुण्यम् तन्मूलक एव क्रोधः। अथ च स्वप्रतिपक्षद्वाराऽन्यद्वारा वा स्वेच्छाप्रतिकूलाचरणेन कथनेन प्रदर्शनेन वा क्रोध उत्पद्यते। सोऽपि क्रोधो यत्र निजानुभूतिप्रतिकूलता जायते तत्रैव भवति। फलतः कारुण्यानुरागोद्भूतः क्रोधो रौद्रस्य कारणम्।

वीररसस्य स्थायिभाव उत्साहः। कस्मिन्नपि कार्ये तदैवोत्साहो जायते यदा तत्र स्वत्वं स्वानुरागिता चायाति। समागते चोत्साहे वीरभावत्वमाप्नोति जनः। फलतो वीर-भावेन तत्कार्यविषये तस्यानुरागः कारुण्यं वर्तते। एतेन सूक्ष्मेक्षणेन वीरोऽपि करुणमूलक एवेत्यनुभूयते।

भयानकरसस्य भयं स्थायिभावः। तच्च भयं कस्मादपि यदा जायते तत्र यदर्थं भयं जायते तस्मिन् तस्य स्वत्वमूलकं कारुण्यं निश्चितरूपेण वरीवर्ति। यदि कस्यचित् प्राणे करुणा मोहः स्वत्वं वा नास्ति तर्हि स न सिंहात्, न व्याघ्रात्, न सर्पान्नापि कस्मादपि वा बिभेति। यदि जीविकां प्रति न मोहो न कारुण्यं तर्हि नाधिकारिजनाद् भयं विद्यते। फलतो भयस्य मूलतत्त्वेऽपि करुण एव।

बीभत्सरसस्य स्थायिभावो जुगुप्सा। जुगुप्सा घृणा, तदैव जायते यदा स्वानभिमतं वस्तु पश्यति, शृणोति, अनुभवति वा। तत्राभिमत-विषयेऽनुरागः कारुण्यमात्मीयतैवान-भिमतवस्तुविषये जुगुप्सायाः मूलस्त्रोतः। परिणामतो बीभत्सोऽपि करुणमूलक एव।

अद्भुतरसस्य विस्मयः स्थायिभावः। कस्मिन्नपि विषये तदैव विस्मयो जायते यदा तत्र तादात्म्यं स्वत्वं चानुभूयते। तत्स्वत्वं च तद्विषये कारुण्येन दययाऽनुकम्पयाऽनु-क्रोशेनैव। तदद्भुतमेव दृष्ट्वा कोऽपि विस्मयते हर्षमनुभवति। यत्राद्भुते नानुरागो न तत्र विस्मयः। फलतोऽद्भुतोऽपि करुणमूलकः।

शान्तरसस्य स्थायिभावो निर्वेदः। यदा विषयादिकं प्रति विरागो जायते आत्मानं प्रत्यनुरागो जायते तदैव शान्तरसस्याविर्भावः। तत्रानुरागे कारुण्यमेव कारणम्। अतः शान्ते मूलभूतः करुण एव। एतस्य विस्तृतं विवेचनमग्रे करिष्यते। वत्सलरसोऽपि केषांचिन्मते वर्तते। वात्सल्यभाव एव तत्र कारणम्। वात्सल्यं तु सर्वथा सर्वदा कारुण्यमूलकमेव। तत्र ममत्वं हृद्यत्वं स्वत्वं तादात्म्यं च यत्तदेव तत्र मूलम्। एवं वत्सलोऽपि करुणमूलक एव।

षष्ठशताब्द्यां महान्तः सन्तः श्रीमन्तो रूपगोस्वामिमहाभागाः स्वकीये विश्वविश्रुते मार्मिकग्रन्थे–उज्ज्वलनीलमणौ भक्तिरसामृतसिन्धौ च भक्तिमेव रसराजत्वेन स्वीकृतवन्तः। तेषां व्याख्याकाराः जीवगोस्वामिप्रभृतयोऽपि तथैव प्रतिपाद्य समुपलब्धान् वर्णितांश्च रसान् भक्तिरसस्यैवाङ्गत्वेन व्याख्यातवन्तः। षोडशशताब्द्यां कविकर्णपूरोऽपि "अलङ्कारकौस्तुभे" भक्तिरसकल्पनामेव प्राधान्येन प्रतिपादितवान्।

स च भक्तिरसो रतिमूलात्मक एव। रतिरेव तस्य स्थायिभावः। रतावनुरागे च कारुण्यमेव कारणम्।

कारुण्यं विनाऽनुरागस्योत्पत्तिरेव नास्ति। फलतोऽनुरागस्वरूपा रतिः स्थायिभावेन संजाता, भक्तिस्तु सर्वथा करुणमूलिकैव। अतएव भक्तेश्चरमसीमायां प्राप्ताः भक्ताः

हसन्ति नृत्यन्ति रुदन्ति, अश्रुधारं प्रवाहयन्ति चेति विविधरूपेणेश्वरेण सह तादात्म्यं संस्थापयन्ति ।

भक्तिरसाङ्गित्ववादे पुनश्च वैष्णवसम्प्रदायस्य महाराससन्दर्भे सम्भोगविप्रलम्भोभयविधश्रृङ्गारस्य महती प्रधानता संजाता । सूक्ष्मदृष्ट्या सर्वत्र यत्र-तत्र करुण एवादृश्यरूपेण सूक्ष्मतत्त्वरूपेण परमाणुवत् स्थितः ।

ज्ञायते यत् करुण एव चरमो रसस्तथा ये चान्यभावाः रसादयस्ते करुणस्यैवाभिव्यक्तयः, करुणबोधस्यैव परिणतावुद्दीपकाः सन्ति ।

भरतस्य नाट्यशास्त्रेऽन्यत्र च प्रतिपादितं यत् "रसो वै सः, रस एवानन्दस्वरूपश्चिदानन्दो ब्रह्मस्वरूपः । सर्वलोकं च चिन्मात्रं त्वत्ता मत्ता च चिन्मयम्, रसो वै सः, रसं लब्ध्वा आनन्दीभवति ।" तथा "आनन्दात् हि इमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दमनुसंविशन्ति" इत्यादितैत्तरीयोपनिषदः प्रमाणैरानन्दमयं ब्रह्म । रसस्यानन्दमयत्वेन ब्रह्मात्मकत्वम् ।

एतस्मिन्नाधारे एव कथितं यत्—

"स्वं स्वं निमित्तमासाद्य शान्ताद्भवः प्रवर्तते । पुनर्निमित्तापाये च शान्त एवोपलीयते, सर्वज्ञं सर्वगं शान्तं सर्वेषां हृदये स्थितम् । निष्फलं निर्गुणं शान्तं निर्विकारं निरामयम् ।"—इति ।

एभिः प्रमाणैः शान्तरसमङ्गित्वेन स्वीकृत्यान्यरसानङ्गत्वेन बहुभिराचार्यैः सिद्धान्तितम् । तेषां मतेन तत्त्वज्ञानोत्थनिर्वेदप्रधानः शान्तरस एव सुखमयः । 'शान्ताकारं भुजगशयनं, शान्तं शाश्वतमप्रमेयमधुरमि' त्यादिस्तुतावपि भगवतः शान्तरसस्यैव वर्णनं दृश्यते ।

भवभूतिसिद्धान्ते निर्वेदस्थायिमूलकस्य शान्तरसस्यापि पूर्वोक्तप्रतिपादितदिशा करुण एव बीजम् ।

यद्यपि महति विस्तृते रसाभिव्यक्त्यनुभूतिसाधारणीकरणादिसिद्धान्तेऽतिसंक्षिप्तोक्तविवरणमपर्याप्तमिति निश्चितं किन्तु स्वल्पेनाप्यनेन तत्त्वान्वेषणेन करुणरसस्य व्यापकता महत्ता चावश्यं समक्षमायातीत्यत्र न सन्देहः ।

यदि नाट्यशास्त्रीयपारम्परिकसिद्धान्तमेव लक्ष्मणरेखामाधारीकृत्य विवेचनं स्यात्तर्हि करुणरसस्य भक्तिरसस्य शान्तरसस्याङ्गित्वेन प्रतिपादनं महत्कठिनम्, किन्तु सहृदयहृदयानुभूत्यास्वादात्मके रसे पाणिनिसूत्रवत् न काऽपि लक्ष्मणरेखैव निर्देशिका ।

फलतः रसाभिव्यक्तिवादसिद्धान्ते "एको रसः करुण एवे" ति मतं सहृदयानुभवगोचरमेवेति ।

साहित्यं धर्मः

□

श्री के० लक्ष्मणशास्त्री

□

धर्मशब्दस्यार्थनिर्णये बहवः बहूनभिप्रायान् प्राचीकटन्। केचन अभ्युदय-निःश्रेयससुखं येन सिद्ध्यति स धर्म इति धर्मपदार्थं निरणयन्। निःश्रेयसशब्दस्यार्थस्तु नैकैरनेकविध उक्तः। पदार्थानां साधर्म्यवैधर्म्यज्ञानमेव निःश्रेयससिद्धिरिति मान्याः प्रशस्तपादभाष्यकारा अवदन्। एतेषां मते धर्मो द्रव्यनिष्ठः कश्चन गुण इति स्फुटीभवति।

अन्ये केचन विद्वांसस्तु "चोदनालक्षणोऽर्थो धर्म" इति लक्षणमूचिरे। परलोकसाधनौपयिकं न किञ्चिदस्तीति लोकायतमतं निराकर्तुमेव "चोदनालक्षणोऽर्थो धर्म" इति सिद्धान्तः स्वीकृतः। एतन्मतानुसारं वेदविहितः स्वर्गादिसाधनरूप एव धर्म इति वक्तुं शक्यते। तादृशसाधनं तु यागादिरूपमेव। यागादयस्तु कर्माणि। अतोऽस्मिन् मते कर्मैव धर्म इति स्पष्टं ज्ञायते।

पौराणिकास्तु सनातनो विष्णुरेव धर्म इति "धर्मो विष्णुस्सनातनः" इति व्यवृणवन्। एतन्मते धर्मः द्रव्यरूपो भवति। अतएव श्रीमद्भागवतपुराणे—

'धर्मः प्रोज्झितकैतवोऽत्र गदितः निर्मत्सराणां सताम्'

इत्युक्तम्। एतन्मतानुसारेण धर्मः साध्यरूप इति स्पष्टमवबुध्यते। भगवान् याज्ञवल्क्यः —

'अयं हि परमो धर्मः यद्योगेनात्मदर्शनम्'

इत्युवाच। तन्मते धर्मः परमात्मदर्शनस्य साधनमिति स्पष्टमवगम्यते।

मीमांसकमूर्धन्यः कुमारिलभट्टाचार्यः केषुचित्सन्दर्भेषु धर्मशब्दः द्रव्यवाच्यपि भवतीति अङ्गीचकारेति—

'द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते'

इति स्वीयश्लोकवार्तिकद्वारा ज्ञापयामास।

भिन्नभिन्ना अभिप्रायाः धर्मशब्दार्थमधिकृत्य प्रकटिताः। अतः धर्मः द्रव्यं, अथवा गुणः, उत क्रिया इति निर्णेतुं न शक्यते।

अतः एकत्र समाविष्टानामनेकपदार्थानां समुदायनिष्ठो द्रव्यगुणक्रियात्मको धर्मविशेष एव साहित्यमित्यभिज्ञा वदन्ति—

'शब्दार्थौ सहितौ काव्यम्' इति।

एतेन शब्दार्थयोर्द्वयोरपि काव्ये प्राधान्यमस्तीति ज्ञायते।

विद्यास्थानान्यनेकानि सन्ति। तेषु अर्थापेक्षां विनैव केवलं शब्दप्रधानानि कतिचन सन्ति। तानि—

१. अक्षरग्रहणमात्रपर्यवसायि वेदाध्ययनम्,

२. विषहरमन्त्रपठनम्,

३. परिनिष्ठितरूपसाधन एव प्रवर्तितं व्याकरणशास्त्रम्, इत्यादीनि। एषु नास्त्यर्थापेक्षा।

एवमेव अन्यानि कानिचिद्विद्यास्थानान्यर्थमात्रप्रधानानि सन्ति। तेषु शब्दानां प्राधान्यं नास्ति। नैयायिकैः प्रतिपादितेषु विषयेषु हेत्वाभासादि दोषरहितत्वमेवापेक्षितं भवति। तेषां मते अर्थप्रतिपादकशब्दा अवैयाकरणिका अपि, तैरपभ्रष्टशब्दैरपि शाब्दबोधो भवतीति पश्यामः। दधिशब्दस्य तृतीयैकवचनरूपमजानानेन श्रद्धालुना धार्मिकेण "दधि-शब्दतृतीयान्तेन जुहोमि" इति उच्यते इति लोके प्रतीतिरस्ति। एतादृशा अर्थप्रधानाः सौशब्द्यमनपेक्षिता ज्योतिश्शास्त्रश्लोकाः —

"अङ्गारपूर्वे गमने च लाभं सोमे शनिर्दक्षिणमर्थलाभम्"

इत्यादयो बहवो दृश्यन्ते। इत्थमायुर्वेदेऽपि तत्र तत्रैतादृशाः श्लोका दृश्यन्ते।

शब्दार्थोभयप्राधान्यं साहित्ये एव अस्ति। साहित्यशास्त्रे शब्दार्थयोरुभयोरपि विशिष्टं कार्यं निर्वोढव्यमस्ति। अलौकिकप्रतिभापूर्णविच्छित्तिविशेषेण शोभमानो मनोहरः ललित-ललितोचितपदसन्निवेशश्चारुवाक्येऽपेक्षितो भवति। तदेव काव्यमिति साहित्यमीमांसा-कोविदानां सिद्धान्तः।

हितं नाम रस इति नाट्यशास्त्रादौ निरुक्तम्। तदनुसारं 'साहित्यं रसवत्' इत्यर्थो भवति। 'सहितानां भाव एव साहित्यम्' इति पूर्वोक्तमतानुसारमेव निर्णीतम्। एतेन साहित्यं 'भिन्नवृत्तिधर्मः' इति निर्गलितोऽर्थः। अतः पूर्वोक्तद्रव्यगुणकर्मस्वेकं प्रतिपादयतो धर्मस्य साहित्यरूपधर्मस्य च कस्सम्बन्धः? इति प्रश्न उदेति। अतः साहित्यं धर्मः कथं भवति? इति बहवः संशेरते। अतः साहित्यमपि धर्म एवेति प्रतिपादनमेवास्य लेखस्य मुख्यो विषयः।

द्रव्यगुणकर्मणां साहित्यस्य च सुमहान् सम्बन्धोऽस्ति। स एव प्रतिपाद्यप्रतिपादक-रूपस्सम्बन्धः —

"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च,"
"चतुर्वर्गफलप्राप्तिः"

इत्यादिप्रमाणैर्धर्मार्थकाममोक्षरूपांश्चतुर्विधपुरुषार्थान् काव्यं बोधयतीति प्रतिपाद्यते—

१. मनुस्मृत्यादीनि धर्मशात्राणि,

२. कौटिल्यादिकृतान्यर्थशास्त्राणि,

३. वात्स्यायनादीनि कामशास्त्राणि,

इत्यादिषु भिन्नभिन्नान् पुरुषार्थान् बोधयत्सु सत्सु साहित्यं किम्प्रयोजनकम् ? साहित्ये प्रतिपादिता धर्मार्थकामा अन्यथासिद्धाः किल ! अतः साहित्यं त्याज्यमिति केचिदाक्षिपन्ति।

अत्रोच्यते—साहित्ये न कोऽप्यपूर्वो विषयः धर्मार्थकामरूपः प्रतिपाद्यते, परन्तु तस्मिन् प्रतिपादनक्रम एव विशिष्टोऽस्ति। वेदः प्रभुसम्मितत्वेन धर्मं प्रतिपादयति। शास्त्राणि पुराणानि यद्यपि धर्मप्रतिपादकानि तथापि तानि सुहृत्सम्मितानि। काव्यान्यपि धर्ममेव बोधयन्ति। सः "रामादिवद्वर्तितव्यं, न रावणादिवत्" इति। एतादृशबोधनक्रमः कान्तासम्मितत्वेन काव्येऽस्ति। अतः काव्याद् धर्मप्राप्तिः सुलभतरा भवतीति सिद्धान्तः।

"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि, काव्यादेव"

इत्यभियुक्तोक्तिः।

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिबन्धनम्॥"

इत्यालङ्कारिकमूर्धन्येन भामहेनोक्त्वा, काव्यान्न केवलं चतुर्वर्गफलप्राप्तिः, तदपेक्षया अन्यान्यपि कानिचिल्लौकिकश्रेयांस्यपि सिद्ध्यन्तीत्युक्तम्।

काव्याद् धर्मप्राप्तिर्भगवन्नारायणचरणारविन्दस्तोत्रादिभिः सिद्ध्यति। 'एकश्शब्दस्सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग् भवति' इत्यादि वेदवाक्यैरपि धर्मप्राप्तिः प्रसिद्धैव। अर्थप्राप्तिस्तु प्रत्यक्षसिद्धैव। अर्थद्वारैव कामप्राप्तिः सिद्ध्यति। धर्मार्थकामेषु फलापेक्षारहितत्वं मोक्षप्राप्तेर्हेतुर्भवति। अतश्चतुर्वर्गफलप्राप्तिः काव्यात् सुलभतरेति ज्ञायते।

तादृशचतुर्वर्गफलप्राप्तिः वेदशास्त्रेभ्यः परिणतबुद्धिभिरेव कष्टतरं लब्धुं शक्यते। काव्यात्तु सुकुमारबुद्धिभिरपि अतिसुखतरं सा लभ्यते। तादृशफलसिद्धिः परमानन्दसन्दोहजननी

भवति। परिणतबुद्धयः वेदशास्त्राण्युत्सृज्य काव्येषु कुतः प्रयतन्ते ? इति न वक्तव्यम्। यतः, कटुकौषधात् शाम्यः रोगो यदि मधुरौषधेन शाम्यति तर्हि कटुकौषधं त्यक्त्वा मधुरौषध एव सहजा प्रवृत्तिः सर्वेषां भवति खलु। अतः काव्यमेव सर्वैरुपादेयं भवति। अयमेव विषयोऽग्निपुराणे—

'नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सदुर्लभा॥'

इत्युक्तम्। तत्रैव "त्रिवर्गसाधनं नाट्यमि" त्यप्युक्तम्।

विष्णुपुराणेऽपि "काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च। शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः॥" इत्युक्तम्। अत एव चतुर्वर्गसाधनेषु काव्यं परमोपादेयमित्यवगन्तव्यम्।

'रसो वै सः' इति श्रुतिप्रमाणेन 'परब्रह्मस्वरूपः ब्रह्मानन्दसन्धायी रसः' इत्यर्थस्सिध्यति। तादृशरसानुभूतिः काव्यादेव भवतीति आत्यन्तिकसुखस्वरूपं निश्श्रेयसमपि रसानन्दसब्रह्मचारि। अतो निश्श्रेयसप्राप्तिरपि काव्यादेव सिध्यति। केवलं व्युत्पन्नानामेवोपयुक्तानि वेदशास्त्राणि। काव्यानि तु व्युत्पित्सूनां व्युत्पत्तिं सन्धाय, तद्द्वारा चतुर्वर्गफलप्राप्तिं ललितरीत्या साधयन्ति। अतः काव्यमेव अर्थात्साहित्यमेव सर्वैरुपादेयमिति मुक्तकण्ठं वक्तुं शक्यते।

महाकाव्यतत्त्वविमर्शः

डॉ० रहस्यविहारी द्विवेदी

लक्ष्यग्रन्थानन्तरमेव लक्षणग्रन्था निर्मीयन्ते। लक्षणकारः प्रायेण स्वसमक्षं समुपस्थितं काव्यादर्शं शास्त्रीयया भाषया प्रस्तौति। यानि काव्यानि दृष्ट्वा काव्यशास्त्री लक्षणं निर्धारयति तानि तु मौलिकीभिरुद्भावनाभिः परिपूर्णानि भवन्ति, किन्तु यानि निर्धारितं काव्यनिकषमनुसृत्य लिख्यन्ते तानि रूढिग्रस्तानि भवन्ति। अतो यो महाकाव्यकारो रहस्यमिदं वेत्ति स लक्षणग्रन्थेषु सङ्केतितानामादर्शानां परिखासु नेत्रे निमील्य न व्रजति। प्रथमतस्तु लक्षणानुरोधमपहाय विरचितानि काव्यानि गतानुगतिकैरालोचकैः शङ्कादृशा दृश्यन्ते, किन्तु यदा एतानि काव्यानि कालनिकषे सुवर्णायमानानि भ्राजन्ते तदा परिवर्तनमिदं सम्मान्यमनुकरणीयं च भवति। यदा कदा अपूर्वतानाम्ना येऽसंस्कृता उदात्तकलाविरहिताः प्रयोगाः क्रियन्ते ते सहृदयहृदयसंवेद्या न भवन्ति व्रजन्ति च ते हासास्पदम्।

एकतो नवप्रज्ञामण्डितैः कविभिर्यत्र महाकाव्यसंरचनायामविश्रान्तः प्रयासोऽकारि, तत्रैवापरतो युगानुरूपं प्रणीतानि महाकाव्यानि ध्यात्वा काव्यशास्त्रिभिर्लक्षणानि अकारिषत। महाकाव्यस्य विविधाभिः परिभाषाभिः सिद्ध्यतीदं यत् काव्यस्यान्यप्रकारतो महाकाव्यस्य परिभाषाऽधिकं परिवर्तमानाऽसीत्। यतो हि मानवजीवनेन महाकाव्यं घनिष्ठतया सम्बद्धं भवति, जनजीवनपद्धतिश्च युगप्रभावात् परिवर्तमाना भवति।

प्रथमतः काव्यशास्त्राचार्यस्य भामहस्य काव्यालङ्कारे महाकाव्यलक्षणस्य सुस्पष्टं निर्धारणं प्राप्यते। भामहः स्वीचकार यत् स सत्कवीनां मतानि दृष्ट्वा स्वकीयया च धिया महाकाव्यादिलक्षणमकुरुत (काव्यालं० ६।६४)। भामहस्येदं कथनमनुसृत्य वाल्मीकीयरामायणस्याध्ययनं क्रियते चेत्तदा तत्र महाकाव्यलक्षणस्य प्रायः सर्वाण्यपि सूत्राणि समुपलभ्यन्ते।[1] कवेः कल्पनाराज्ये महाकाव्यभवनस्य निर्माणात्प्राक् तन्मानचित्रं विद्यमानं

१. द्र०—सागरिका १३।२ अङ्के प्रकाशितं शोधपत्रं 'रामायणे कण्ठतोऽपि कृतं महाकाव्यलक्षणम्।'

भवति यदाश्रयेण स विधिवत् तत्सर्जने सफलो भवति। अतोऽन्येष्वपि महाकाव्येषु सूत्राणि एतानि यथायथं प्राप्यन्ते।

भामहकृतं महाकाव्यलक्षणमित्थम्--

"सर्गबन्धो महाकाव्यं महतां च महच्च यत्।
अग्राम्यशब्दमर्थ्यञ्च सालङ्कारं सदाश्रयम्॥
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैश्च यत्।
पञ्चभिः सन्धिभिर्युक्तं नातिव्याख्येयमृद्धिमत्॥
चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृत्।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्॥"

(काव्यालं० १।१९-२१)

सङ्क्षिप्तमिदं महाकाव्यलक्षणं तथापि प्रायेणात्र महाकाव्यसम्बन्धीनि सर्वाण्यपि तत्त्वानि परिगणितानि सन्ति। लक्षणेऽस्मिन् परवर्तिकाव्यलक्षणवत् रूढिबद्धता नास्ति। महाकाव्यानुरूपमेवाभिव्यापकमिदं लक्षणम्।

अत्र भामहः "सर्गबन्धो" "महच्चे"ति बन्धाकारयोः, "महतां", "सदाश्रयं" चेति नायकस्य, "अग्राम्यशब्दमर्थ्यं "सालङ्कारं", "नातिव्याख्येयं", चेति अभिव्यञ्जनायाः, "मन्त्रदूतप्रयाणाजिनायकाभ्युदयैः", "ऋद्धिमत्", "चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृदि"ति च वर्ण्यविषयस्य, "पञ्चभिः सन्धिभिर्युक्तमि"ति रचनाविधानस्य, "युक्तं लोकस्वभावेने" ति औचित्यस्य, "रसैश्च सकलैः पृथगि"ति चास्वाद्यताया निरूपणमुद्दिश्य प्रतिपादितवान्।

आकारस्य विषये भामहेन न कश्चित् परिधिर्निर्धारितः केवलं "महदि" त्येवाभाणि। परवर्तिभिः काव्यलक्ष्यविधायिभिरस्य न्यूनाधिकतया परिधिर्निर्धारितः – "अष्टसर्गान्नतु न्यूनं त्रिंशत् सर्गाञ्च नाधिकमि"ति-ईशानसंहितायाम्, "नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह"ति-साहित्यदर्पणे च विश्वनाथेन।

महाकाव्यस्यातिसङ्क्षिप्ततायां विस्तरत्वे चोभयत्र दोषः स्वीकृतोऽभवत्, यतो हि समभिव्यापकत्वात् महाकाव्यं सङ्क्षेपेण प्रस्तोतुं न शक्यते, विशालं चापि तन्न स्यादन्यथा, अतिसमयसाध्यत्वात् सहृदयस्य धैर्यं क्वचिदेव स्थास्यति।

उत्तरवर्तिनामाचार्याणां महाकाव्याकारसीमाभीष्टैवासीत् तर्हि सर्गसीम्नः स्थाने छन्दःसङ्ख्यायाः सीमा निर्धारणीयासीत्। यथा–गते दशके (१९६१ तः १९७० ई० यावत्) प्रणीतं "गङ्गासागरीयं" दशसर्गात्मकमपि पञ्चशतपद्यात्मकं किन्तु तस्मिन् समय

एव विरचितस्य "श्रीतिलकयशोऽर्णवस्य" केचनसर्गाश्चतुःशतपद्यात्मकाः सन्ति । एतादृशी स्थितिर्न केवलं साम्प्रतिकेषु महाकाव्येषु अपितु बृहत्त्रय्या महाकाव्येष्वपि दृश्यते— "नैषधीयचरितस्य" प्रत्येकं सर्गः "किरातार्जुनीयस्य" प्रत्येकं सर्गात् प्रायेण द्विगुणितं विद्यते । अस्यामवस्थायां "गङ्गासागरीयं" "श्रीतिलकयशोऽर्णवस्य" तुलनायां सपादसर्गीयं तिष्ठति, द्वाविंशसर्गात्मकं च नैषधीयचरितं चतुश्चत्वारिंशत्सर्गात्मकं सिद्ध्यति । वस्तुतः सर्ग-संख्यायाः पद्यसंख्याया वा पारिसीमनं लक्षणे न युक्तम् । महाकाव्यप्रतिपाद्यविषयानुरोधेन कविधिया प्रस्तुतीकृतं सानुपातिकं नियमनमेवात्र स्वीकार्यं स्यात् ।

महाकाव्यस्य नायको महान्, अभ्युदयवान् सज्जनश्च स्यादिति भामहोऽकथयत्[१] । एतावदेव कथनेन नायकविषयकं समग्रमपि वैशिष्ट्यं भामहेन समाकलितम् । 'तत्रैको नायकः सुरः, सद्वंशः क्षत्रियो वाऽपि धीरोदात्तगुणान्वितः । एकवंशभवा भूपाः कुलजा बहवोऽपि वे'ति । (साहित्यदर्पणे ६।३१६) विश्वनाथेन, 'तत्र त्रिवर्गसक्तं समिद्धशक्तित्रयं च सर्वगुणम् । रक्तसमस्तप्रकृतिं विजिगीषुं नायकं न्यसेदि'ति च (काव्यालङ्कारे १८।८) रुद्रटेनाभाणि । रघुवंशकिरातादिमहाकाव्यनायकस्वरूपप्रतिपादनदिशा विश्वनाथादीनां नायकस्वरूपविवेचनं समीचीनं प्रतीयते किन्तु अधुनातनेष्वनेकेषु महाकाव्येषु प्रस्तुतीकृतानां नायकानां परीक्षणं क्रियते चेत् तदा नायकस्वरूपेऽस्मिन्नव्याप्तिता दृश्यते । स्वातन्त्र्यानन्तरं प्रणीतानां श्रीस्वामि-विवेकानन्दचरित-गान्धिचरित-श्रीतिलकयशोऽर्णवसुभाषचरितप्रभृतिमहाकाव्यानां नायका विश्वनाथदिशा न देवा नैव क्षत्रिया न चैकवंशभवा भूपाः । सीताचरित-गङ्गासागरीयमहा-काव्ययोर्नायकः सीता, गङ्गा च रुद्रटानुसारं विजिगीषुर्नास्ति, तथापि भामस्य महत्सन्निकष एते नायकाः स्वकीयं वैशुद्ध्यं प्रमाणयन्ति ।

आदिकविना वाल्मीकिना नायकस्वरूपं विस्तरेण प्रस्तुतीकृतम् । वाल्मीकिः तपः-स्वध्यायनिरतं वाग्विदांवरं त्रिलोकज्ञं नारदं स्वकाव्यनायकमपृच्छत् (वा० रा० बा० १।१) । किन्तु वाग्विदो नारदात्प्राक् स्वकाव्यार्हं नायकरूपं सकौतुकं स्वयमेव प्रस्तावीत् । तत्प्रस्तावमनुसृत्य नारदेन तत्समीहितो नायकः प्रत्यपादि, महाकाव्यतत्त्वदृशा कविना प्रस्तावितस्य नायकसामान्यस्वरूपस्य महत्त्वमस्ति । अतोऽत्र तदेवाविकलं प्रस्तूयते—

'को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥
चारित्र्येण च को युक्तः सर्वभूतेषु को हितः ।
विद्वान् कः कः समर्थश्च कस्यैकप्रियदर्शनः ॥

---

१. 'चतुरोदात्तनायकमि' त्युक्त्वा दण्डिनाऽपि भामहाभिमतं पुष्टीकृतम् । (काव्याद० १।१५) ।

आत्मवान् को जितक्रोधो द्युतिमान् को नसूयकः ।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।
महर्षे ! त्वं समर्थोऽसि ज्ञातुमेवं विधं नरम् ॥'

(वा० रा० बा० १।२–५) ।

प्रस्तावेऽस्मिन् प्रधानतया त्रीणि तत्त्वानि समपेक्षितानि—

१—साम्प्रतं लोके विख्यातः, २—उदात्तगुणमण्डितः, ३—नरश्च ।

वाल्मीकिः साम्प्रतं लोके विख्यातं कञ्चिन्महापुरुषमतोऽवारीत् । यतो नायकविषये विदितवृत्तः सामाजिकोऽनायासमेव कवनीयं वस्तु हृदयङ्गमं करोति, कविरपि स्वकाव्यनायकस्य युगानुरूपं लोकनायकत्वं केवलं निराधारां कल्पनामाश्रित्य न कवयति । वाल्मीकिः स्वयमप्येवमकरोत् । वाल्मीकेरयमादर्शं आधुनिकेषु तिलकयशोऽर्णव-प्रभृतिमहाकाव्येष्वपि दरीदृश्यते । आधुनिकेषु महाकाव्येषु प्रायः समेऽपि लोकनेतारो महाकाव्यनायकत्वेन प्रस्तुतीकृताः सन्ति । ते चाऽत्र वाल्मीकेर्निकेषे कञ्चनायमाना दीप्यन्ते ।

पात्रचित्रणविषये साम्प्रतिकेनालोचकेन वङ्किमचन्द्रचट्टोपाध्यायेन महत्त्वपूर्णमेकं तथ्यं समुद्घाटितम्[1] । तदनुसारं देवचरित्रस्यापि प्रणयनं प्रायेण मानवोचितं भवेत् । देवपात्राणां मानवोचितं वर्णनं मानवीयमनोवृत्तीनां समुद्बोधनाय समधिकं सक्षमं भवति । अतस्तत्सरलतयाऽऽस्वादतां व्रजति, तत्पात्रानुकृतिरपि मानवव्यवहारोपयोगिनी भवति[2] । वस्तुतः पात्राणां प्रतीतिः स्वभाविकी एव स्यात्, साऽसम्भवा कल्पनामात्रं वा न स्यात् । एवं देवपात्राणामधिकांशतो मानवीयकरणं महाकाव्यस्य महत्त्वपूर्णं तत्त्वमस्ति ।

प्रकृतिविभागं कुर्वताऽऽनन्दवर्धनेन भामहेन च दिव्याऽदिव्या दिव्यादिव्याश्चेति त्रिधा प्रकृतय इति व्यलेखि । दिव्यप्रकृतिभिरेव पातालगमनसमुद्रलङ्घनादिवर्णनं कार्यमिति तयोरभिमतम्[3] । एतत्तूचितमेव, परञ्च प्रकृतीनां (पात्राणाम्) अलौकिकानि कार्याणि सह्-

---

१. द्र०–प्रकृत और अप्रकृत, वङ्किमग्रन्थावली पृ० ५६-५७ ।

२. परब्रह्मपरमेश्वररूपेण रामस्योद्गाता हिन्दीकविर्गोस्वामी तुलसीदासः तथ्यमिदं गभीरतयाऽन्वभवत्, आदिकवेर्वाल्मीकेर्नरं नारायणत्वेन प्रस्तुतीकुर्वन् सः—"सुनहु प्रिया व्रत रुचिर सुशीला, हम कछु करब ललित नरलीला ।" (रामचरित मा० अरण्य०) एवं समाधानं दत्त्वा मानवोचिते वर्णने प्रवृत्तोऽभवत् ।

३. (क) द्र० ध्वन्या० ३।१० वृत्तिः, (ख) द्र० का० प्र० ७।६२ वृत्तिः ।

दयानां श्रद्धाविषयास्तु भवितुमर्हन्ति किन्तु मानवजनासुलभत्वान्न तान्यनुकरणीयानि भवन्ति । फलतो दिव्यप्रकृतीनां सामान्यानि मानवोचितान्यपि कार्याणि प्रति सामाजिकेऽयं विश्वासः स्थिरीभवति यद्देवपात्रस्य समग्रं चरितं केवलं श्रद्धया पठितव्यमेवास्ति न तदनुकरणीयम् । एवं सति महाकाव्यकारस्य महदुद्देश्यं न पूर्तिं व्रजति ।

प्रसङ्गेऽस्मिन् "युक्तं लोकस्वभावेने"ति भामहस्य कथनं व्यापकमुचितञ्चासीत् । विषयेऽस्मिन्नानन्दवर्धनसदृशेनाचार्येण व्यवस्थाऽदायि, अतः स्वयं तेनान्यैश्च कतिपयैरालोचकैर्योगभोगयोर्देवत्वमनुजत्वयोः सङ्गम आदर्शीभूतस्यापि कालिदासीयस्य "कुमारसम्भवस्य" सम्भोगश्रृंगारवर्णनमनुचितं प्रत्यपादि । भामहसमर्थितस्य लोकस्वभावस्य महनीयाग्रहस्यात् सुदूरं गत्वा पार्वतीपरमेश्वरौ महाकाव्येऽपि सर्वात्मना देवाविति भक्तिभरितो व्यामोहः । वस्तुतो यावद्देवपात्रं मानवीयं निर्माय न प्रस्तूयते तावन्न तत् महाकाव्योपयोगि । अस्यां दिशि आधुनिकमहाकाव्येषु गणपतिसम्भवकारस्य स्व० प्रभुदत्तशास्त्रिणः प्रयासो नूनमेव श्लाघ्यः । मानवपात्रे देवत्वप्रतिष्ठा देवपात्रे च मनुजत्वप्रतिष्ठैव कवेर्बुद्धिचातुर्यं पात्रचित्रणस्यौचित्यं चास्ते ।

अभिव्यञ्जनाविषये वाल्मीकिः स्वादर्शं कण्ठत एवमभाषिष्ट—"उदारवृत्तार्थपदैर्मनोरमैः—तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम्—(वा० रा० बाल० २।४२, ४३)। भामहेनात्र चतुर्णां तत्त्वानां स्पष्टतयोल्लेखो व्यधायि—१—शब्दः, २—अर्थः, ३—अलङ्कारः, ४—अनतिव्याख्येता च । "अग्राम्यशब्दमर्थ्यं च सालङ्कारमि"ति कथनेन सह "नातिव्याख्येयमि"ति विशेषणं नियुज्य भामहेन महनीयमेकं तथ्यं स्फुटीकृतम् । शब्दार्थौ हि रसनिष्पत्तिसाधनीभूतौ, साधने त्रुटिश्चेत् साध्यं कथं निदुर्ष्टं स्यात् । एतदर्थं ग्राम्यत्वदोषरहितं समलङ्कृतमपि महाकाव्यं नातिव्याख्येयं भवेदिति सर्वात्मना समुचितम् । "काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत् । उत्सवः सुधियामेव हन्त ! दुर्मेधसो हताः ।" (काव्यलङ्कारे २।२०) इत्येवमुक्त्वा भामहः पुनरपि तथ्यस्यास्य दृढं पुष्टिमकरोत् । आनन्दवर्धनोऽपि "प्रसन्नगम्भीरपदाः काव्यबन्धाः सुखावहाः । ये च येषु प्रकारोऽयमेव योज्यः सुमेधसा ।" (ध्वन्यालोके ३।३६) एवमवादीत् । रुद्रटायापि कठिनं काव्यं न रोचते[1] । इदमेव काव्यस्य सार्थक्यं यत् कवयिता स्वलोकशास्त्राद्यवेक्षणजन्यं ज्ञानं सुगमतया सरसतया

---

१. ननु काव्येन क्रियते सरसानामवगमश्चतुर्वर्गे ।
लघु मृदु च नीरसेभ्यस्ते हि त्रसयन्ति शास्त्रेभ्यः ॥
तस्मात् तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तम् ।
उद्वेजनमेतेषां शास्त्रवदेवान्यथा हि स्यात् ॥ (काव्यालं० रु० १२।१,२)

च प्रस्तौतु। प्रथमस्तु कठिनं काव्यं विदुषां कृत एवोपयोगि पुनः क्लिष्टता रसानुभूतेर्बाधिका भवति। आवर्जकतायै सक्षमोऽपि कविः परिमितमात्रायामेवालङ्कृतीनां योजनं कुर्यात्—"अलङ्कृतीनां शक्तावप्यानुरूप्येण योजनम्। प्रबन्धस्य रसादीनां व्यञ्जकत्वे निबन्धनम्।" (ध्वन्यालोके ३।१४)।

महाकाव्यं लोकस्वभावेन युक्तं स्यादिति भामहस्याभिमतम्। लोकस्वभावो न केवलं लौकिकाचारव्यवहारावबोधकोऽपितु तन्महनीयं तत्त्वं पुरस्करोति यदानन्दवर्धनेनौचित्यनाम्ना प्रसिद्धिङ्गतम्। लोकस्वभावस्य पालन औचित्यं तदुल्लङ्घनेऽनौचित्यम्। यद् यादृशं यादृशमुचितं वा भवेत् तद्भिन्नवर्णनेऽनौचित्यमापतति, तदेव रसभङ्गस्य प्रमुखो हेतुः—

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत् परा॥

(ध्वन्या० ३।१० कारिकायाः परिकरश्लोकः)

भामहस्य लोकस्वभाव एवानन्दवर्धनस्यौचित्यमस्ति[1]।

"रसैः श्रृंगार-करुण-हास-रौद्र-भयानकैः। वीरादिभी रसैर्युक्तं काव्यमि"ति (वा० रा० बा० ४।६) गदता वाल्मीकिना श्रव्ये रसस्य महत्त्वं कण्ठतः स्वीकृतमासीत्। ततो "रसैश्च सकलैः पृथगि"ति निगदन् भामहः (यं वादवादिनो विद्वांसोऽलङ्कारवादिनं वदन्ति) आचार्यपरम्परायां प्रथमतः श्रव्यकाव्ये प्राणभूतस्य रसस्य महत्त्वं प्रतिपादितवान्। भामहस्येयं स्थापना तदा सञ्जाता यदा रसस्य प्रतिष्ठा विशेषतो रूपकेष्वासीत् श्रव्यकाव्यस्य प्राणतत्त्वस्य विवेचनं प्रचलदेवासीत्। भामहेन रसस्याङ्गाङ्गिभावस्य काचिच्चर्चा न कृता। रसैश्च सकलैः पृथगित्यत्र "पृथक्" शब्दस्य प्रयोगात् काव्येऽकाण्डप्रथनाऽकाण्डच्छेदन-प्रभृतिरसदोषा निवारिताः। सन्दर्भेऽस्मिन्—आनन्दवर्धनेन नूतनमेकं तथ्यं समुपस्थापितम्—

"प्रसिद्धेऽपि प्रबन्धानां नाना रसनिबन्धने।
एको रसोऽङ्गी कर्तव्यस्तेषामुत्कर्षमिच्छता॥" (ध्वन्या० ३।२१)

अनेनानन्दवर्धनेन कस्यचिदप्येकस्य रसस्याङ्गित्वमूरीकृतम्। महाकाव्ये कस्याप्येकस्य रसस्याङ्गित्वं तूचितमेव किन्तु "श्रृंगारवीरशान्तानामेकोऽङ्गी रस इष्यते" (सा० द० ६।३१७) इति गदता विश्वनाथेन श्रृङ्गारवीरशान्तेष्वेव त्रिषु रसेषु महाकाव्यस्याङ्गी रसः संकुचितः। निर्विवादमेतत् तथ्यं यदादिकाव्यं वाल्मीकीयरामायणं दृष्ट्वैव महाकाव्यस्य संकल्पना

---

१. द्र० ध्वन्या० ३।१४ कारिकायां वृत्तिः।

प्राप्ता, तदपि विश्वनाथोक्तदिशा महाकाव्यं न भविष्यति । यतो हि रामायणस्याङ्गी रसः करुणो विद्यते । अत्राचार्यप्रवर आनन्दवर्धनः प्रमाणम्—

"प्रबन्धे चाङ्गी रस एक एवोपनिबद्धयमानोऽर्थविशेषलाभं छायातिशयं च पुष्णाति, कस्मिन्निवेति चेद् यथा रामायणे यथा वा महाभारते । रामायणे हि करुणो रसः स्वयमादिकविना सूचितः "शोकः श्लोकत्वमागत" इत्येवं वादिना, निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयता ।" (ध्वन्या० ४।५ वृत्तिः)

विश्वनाथस्य रसत्रय्यां करुणस्योल्लेखो नास्ति । गोस्वामितुलसीदासप्रणीते हिन्दीभाषामहाकाव्ये रामचरितमानसे भक्तिरसोऽङ्गीति मन्यते सुधीभिः । शृङ्गार-वीर-शान्तेतरत्वादङ्गिरसदशा रामचरिमानसमपि कथं महाकाव्यं स्यात् ? अङ्गिरसनियमनेन विश्वनाथकृतमहाकाव्यलक्षणेऽव्याप्तिता प्रतीयते । एतत् तत्समयं यावत् प्रसिद्धानां केषाञ्चन महाकाव्यानामङ्गिरससंसूचनायैवालम् । प्रसङ्गेऽस्मिन्निदमपि ध्यातव्यमस्ति यत् "करुणादावपि रसे जायते यत्परं सुखम्, सचेतसामनुभवः प्रमाणं तत्र केवलमि"ति (सा० नि० ३।४) तेनैव प्रतिपादितत्वात् करुणं प्रति न तस्यौदासीन्यमिति सिद्धयति, यद्यपि तत्सूच्यां करुणे न्यस्तेऽपि न कश्चिल्लाभो भविता । यतो हि राष्ट्रभक्तिरसादेरभिनवा प्रतिष्ठा युगप्रभावाद्यथा सम्प्रति विद्यते तथैवान्यस्यापि कस्यचिदपि भवितुमर्हति । अतः आनन्दवर्धनानुसारं वर्ण्यविषयानुरोधेन कश्चिदेकोऽङ्गी रसो भवेदेतदेव लक्षणं प्रस्तोतव्यम् ।

मुक्तकेषु रसः सकलप्रयोजनमौलिभूतो भवतु नाम, किन्तु महाकाव्यं नूनमेव केनचित् महदुद्देश्येन लिख्यतेऽतस्तत् केवलमङ्गुलिगणनीयानां सहृदयानां मनोरञ्जनाय न भवति । तत्र मानवमात्रस्य कल्याणं निहितं भवति । तस्मिन् शृङ्गारादिरसस्याभिव्यक्तिः कान्तोचितमाकर्षणमुद्दिश्य भवेन्नाम किन्तु सा प्रयोजनमौलितां न व्रजति ।

भामहेन काव्यवस्तुनश्चतुर्धा विभागः कृतः—

"वृत्तदेवादिचरितशंसि चोत्पाद्यवस्तु च ।
कलाशास्त्राश्रयञ्चेति चतुर्धा भिद्यते पुनः ॥" (काव्या० १।१७)

अनुत्पाद्यमुत्पाद्यं च द्विविधं काव्यवस्तु निरूप्यानन्दवर्धनोऽनुत्पाद्ये वस्तुन्यपि रसादीनां व्यञ्जकत्वमुद्दिश्य कविकल्पनया संस्करणं समपेक्षत—

विभावभावानुभावसंचार्यौचित्यचारुणः ।
विधिः कथाशरीरस्य वृत्तस्योत्प्रेक्षितस्य वा ॥
इतिवृत्तवशायातां त्यक्त्वाऽननुगुणां स्थितिम् ।
उत्प्रेक्ष्याप्यन्तराभीष्टरसोचितकथोन्नयः ॥ (ध्वन्या० ३।१०।११)

महाकाव्यरचनाविधाने भामहेन पञ्चसन्धीनां (मुख-प्रतिमुख-गर्भ-विमर्शोपसंहृतीनां) समन्वयस्योल्लेखो व्यधायि। प्रायः सर्वेऽप्याचार्या नाट्यसन्धिसमन्वयस्य चर्चामकुर्वन् प्रथमतस्तु पञ्चसन्धीनां कल्पना रूपकदशा कृताऽसीत्, पुनः महाकाव्ययोजनायामपि आसामुपयोगित्वं स्वीकृतम्। नाट्यसन्धिक्रमेण वस्तुविन्यासे क्रमबद्धता भवति। अत आसामावश्यकता प्रतिपादिता। विषयेऽस्मिन्नानन्दवर्धनस्य स्थापना नूनमेव स्वागतार्हा-"सन्धिसन्ध्यङ्गघटनं रसाभिव्यक्त्यपेक्षया, न तु केवलया शास्त्रस्थितिसम्पादनेच्छया।" (ध्वन्या० ३।१२)। सन्ध्यङ्गानि यथालाभमत्र विधेयानी" ति विश्वनाथोऽवदत्। (सा० द०, पृ० ५५१-चौ०)

सन्धिसन्ध्यङ्गानां सम्यक् संघटनार्थमेव आनन्दवर्धनेनेतिवृत्तस्याननुगुणां स्थितिं त्यक्त्वा रसोचितकथोन्नयः स्वीक्रियते। लब्धप्रचारेऽपि अनवलोकिते वस्तुनि रसाभिव्यक्तये आक्षेपग्रस्तस्थलानां परिमार्जनाय वा परिवर्त्तनं परिवर्धनं वा कविः कर्तुं शक्नोति यथा रामायणस्य प्रख्याते वस्तुनि सनातनकविविरचिते "सीताचरिते" दृश्यते, किन्तु प्रत्यक्षतः सहृदयजनदृष्टं कञ्चित् सत्पुरुषमाश्रित्य महाकाव्यं कुर्वाणः कविः सन्धिसन्ध्यङ्गघटनाय सत्येतिवृत्ते तद्विपरीते कल्पनाश्रितमात्रे परिवर्तने कथं प्रवृत्तः स्यात्। यथा "तिलकयशोऽर्णवे" आफलोदयकर्मणि कृतप्रयासोऽपि तन्नायको लोकमान्यस्तिलकः स्वातन्त्र्यफलमलब्ध्वैव दिवङ्गतः। यथा वा "गान्धिचरिते" आफलोदयकर्माऽपि तन्नायकः महात्मागांधी गोडशेनाथूरामेण हतः[1] सन् स्वर्गमगात्। "सुभाषचरिते"ऽपि तन्नायको दुर्घटनायां मृतो वर्णितः। "श्रीनेहरूचरितेऽ"पि तन्नायकस्य जवाहरलालस्य मृत्युरेव वर्णिता। एतेषु महाकाव्येषु नायकाभ्युदयमात्रस्याप्रबन्धं चर्चा न दृश्यते, कारागृहेऽपि स्थिता एते वर्णिताः। एतेषु महाकाव्येषु न केवलं सन्ध्यङ्गाना पितु सन्धीनामपि सम्यङ् निर्वाहो न दृश्यते तथापि एतेषां महाकाव्यत्वे नास्ति शंका।[2] वस्तुतः सन्धीनां संघटनं सर्वात्मना शोभनम्, यदि प्रख्यातकथावस्तुन आत्मनो रक्षा भवेत्। सन्धिसंघटनाय प्रत्यक्षदृष्टे वस्तुनि परिवर्तनमनौचित्यकरमिति प्रतीयते, तत्रेतिहासरक्षणमपि आवश्यकं वर्तते। आनन्दनिष्यदिष्वपि अन्यान्यमहदुद्देश्य-समन्वितेषु महाकाव्येषु आस्वादं गृह्णन्नितिहासपराङ्मुखः क्वचिदेव सहृदयो मिलेन्नाम। उत्पाद्यकथावस्तुनि सन्धिसन्ध्यङ्गघटनमनिवार्यं स्यान्नाम। सम्भवत उत्पाद्यवस्तुसमन्वितमेकमपि महाकाव्यं नास्ति। आधुनिकानि प्राचीनसाहित्यमाश्रित्य प्रणीतानि गणपतिसम्भव-रुक्मिणीहरण-सीता-

---

१--२—नायकवधौचित्यविषये "संस्कृत महाकाव्योंका समालोचनात्मक अध्ययन (१९६१ से ७० ई०), इति विषये जबलपुरविश्वविद्यालये प्रस्तुतो लेखकस्यास्य शोधप्रबन्धे द्रष्टव्यः—४३९ तः ४४० पृ० यावत्, महाकाव्यत्वसिद्धये समग्रः शोधप्रबन्धोऽवलोकनीयः।

चरित-गंगासागरीयादिषु इदानीन्तनवस्तुसम्पृक्तेषु च शिवराज्योदयक्षत्रपतिचरितादिषु शोभनं सन्धिसंघटनं पूर्ववदेव दृश्यते। व्यवस्थेयं महाकाव्ये वर्ण्यविषयानुरोधेन तु स्वागताहाँ महाकाव्यतत्त्वदृशाऽनिवार्यतां न व्रजति।

महाकाव्यकथावस्तुनि वर्णनीयविषयेषु भामहेन मन्त्रणा-दूतसम्प्रेषणादीनां स्पष्टतयोल्लेखोऽकारि। "ऋद्धिमदि"ति कथनेन बहुविधानां नागरप्राकृतिकानां वर्णनानां समाहारः प्रस्तुतीकृतः। दण्डिविश्वनाथप्रभृतिभिर्विषयेऽस्मिन् विस्तरेण सूची व्यधायि-"नगरार्णवशैलर्तु चन्द्रार्कोदयवर्णनैः, उद्यानसलिलक्रीडामधुपानरतोत्सवैः। विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः, मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि" (काव्यादर्शे-१।१६,१७ तथाच साहित्यद० ६।३२२, २३) प्रकृतिवर्णनादिकं भारतीयजनमानसेऽहर्निशं विराजमानाया निसर्गश्रिया मण्डिताया भारतवसुन्धराया अशकलिताकलनायोपगित्वाद् विभावरूपेण रसनिष्पत्तये च वर्णनीयमभवत्। वाल्मीकिकालिदासादिषु तत् स्वाभाविकं काव्यवस्तुसम्पृक्तं च विद्यते। शनैः शनैः प्रकृतिवर्णनं रूढिबद्धं निष्प्राणं च सञ्जातम्। भारतीयकवेः प्रकृतिसान्निध्यं स्वाभाविकमस्ति न तदारोपितमात्रम्। यतोहि—अस्य राष्ट्रस्य सभ्यतायाः संस्कृतेर्ज्ञानस्य वा विकाशोऽरण्यानां निभृतसात्विकाश्रमेष्वभवत्। काव्यशास्त्रिणां समग्रां सूचीं मनसि निधाय यत्र वर्णनं विद्यते तत्र प्रकृतिवर्णनादिकमस्वाभाविकं कथावस्तुनोऽसम्पृक्तं दृश्यते अतो महाकाव्यलक्षणे सूचीस्थानां भामहस्य—"ऋद्धिमच्" छन्दः समीचीनो व्यापकश्चास्ति। दण्डी तु "न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः।" (काव्यादर्शे १।२०) इत्यप्युक्त्वा स्वसूचीबद्धानां वर्णनानामनिवार्यतां शिथिलयति। विश्वनाथोऽपि "यथायोगमेव" वर्णनं वाञ्छति (सा० द० ६२४)।

महाकाव्यतत्त्वेषु पुरुषार्थचतुष्टयस्य चर्चाऽपि बहुधा प्राप्यते। "कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरमि" ति (बा० रा० बाल० ३।८) वाल्मीकिर्निगदितवान् किन्तु भामहः—"चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृदि" ति—उक्त्वा महाकाव्ये पुरुषार्थेषु अर्थस्य प्राधान्यं स्वीकुरुते। दण्डी "चतुर्वर्गफलायत्तमि" ति (काव्यादर्शे १।१५) वदति। "चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेदि" ति (सा० द० ६।३१८) उक्त्वा विश्वनाथः कस्याप्येकस्य प्राधान्यं स्वीकरोति। एतेनात्र सिद्धयति यत् महाकाव्ये चतुर्णामपि पुरुषार्थानामेकस्य वा प्राधान्यमवश्यं स्यात्।

भामहेन प्रायो महाकाव्यस्य मूलभूतानि तत्त्वानि प्रतिपादितान्यासन्। तथापि युगानुरूपं परवर्तिभिः काव्यशास्त्रिभिर्मङ्गलाचरणादिबाह्यव्यवस्थासम्बद्धा नियमा विनियोजिताः। "आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुखमि"ति दण्डिप्रभृतिभिरुक्तम्।

आशीर्वादनमस्क्रियाभ्यां सह वस्तुनिर्देशोऽपि कथं मङ्गले हेतुरिति विषये किञ्चिद् वक्तव्यम्। वस्तुनिर्देशं कुर्वाणः कविः महाकाव्यारम्भे तत्प्रारूपं भवननिर्माणात् प्राङ् मानचित्रमिव प्रस्तौति। तदनुसृत्यादितः समाप्तिं यावत् स्वकाव्यवस्तुनो यथायथं व्यवस्थितं पल्लवनं करोति। महाकाव्यस्य क्रमबद्धता, वस्तुनिर्देशस्य निर्विघ्नतारहस्यम्। वाल्मीकीयरामायणस्यादिमः सर्गो वस्तुनिर्देश एव। नमस्क्रियया सहापि वस्तुनिर्देशो भवितुमर्हति। यथा कालिदासस्य रघुवंशारम्भे (सोऽहमाजन्म० १।५–८) श्रीहर्षस्य नैषधीयचरितादौ च दृश्यते। महाकाव्यत्वसिद्धये मङ्गलाचरणाभावेऽपि प्रकृतिवर्णनपरं प्रथमं पद्यमपि वस्तुनिर्देशात्मकं मङ्गलमिति कथनं न युज्यते। यतो हि मङ्गलाचरणरहिता किन्त्वन्यप्रमुखवैशिष्ट्यसमन्विता काचित् कृतिर्महाकाव्य-पदाच् च्युता न भवति। नमस्क्रियाशीर्वादयोरभिस्वीकृतिर्धर्मप्राणदेशस्य भारतस्य श्रद्धाभरितस्य विश्वासस्य सत्परिणामः। फलितमेतद् यन्मङ्गलाचरणमुचितं त्वस्ति किन्तु न तदनिवार्यं तत्त्वम्।

एवञ्च खलनिन्दा, एकस्मिन् सर्गे एकस्यैवच्छन्दसः प्रयोगोऽन्ते च तत्परिवर्तनम्, अग्रिमायाः कथायाः सर्गान्ते सूचना, महाकाव्यनाम, सर्गनाम चेत्यादिकं किमपि महत्त्वपूर्णं तत्त्वं नास्ति यद्विना महाकाव्यत्वं प्रभावितं भवतु।

महाकाव्ये संवादयोजनाविषये भामहादिभिर्न स्पष्टतया व्यलेखि। आधुनिकभारतीयाचार्येषु स्वर्गीयो 'रामचन्द्रशुक्लो' महाकाव्यस्य चत्वारि तत्त्वानि प्रामुख्येन स्वीकृतवान्[1] – (१) इतिवृत्तम्, (२) वस्तुव्यापारवर्णनम् (३) भावव्यञ्जना, (४) संवादश्च। एतेषु प्रथमतस्तृतीयं यावत् बहुचर्चितानि तत्त्वानि किन्तु "संवादः" महाकाव्यस्य महनीयमेकं तत्त्वमासीत् यत् प्रशस्तमहाकाव्येषु सर्वत्र समुपलभ्यमानमपि अनुल्लिखितमासीत्। यदि नाट्यसन्धिभिर्वस्तुविन्यासे व्यवस्थाऽयाति तर्हि नाटकीयैः संवादैर्विषयवस्तुनः प्रभावः परिवर्धते। वस्तुतः बीजबिन्दुप्रभृतीनां सुभगः सन्निवेशः संवादेष्वेव भवति। संवादैः पात्रचित्रणं हृदयस्पर्शि प्रेरकञ्च भवति यत् महाकाव्यसंरचनाया एकं विशिष्टं प्रयोजनमस्ति। संवादाभावे काव्यास्वादावसरे सहृदयस्य समक्षं कवेरपि सत्ता समुपस्थितेव तिष्ठति। अतो वर्णनीयस्य पात्रस्य व्यक्तित्वमनावृतरूपेण सहृदयसमक्षं नायाति। संवादांशानामेव महत्त्वमेतद् यदद्य वयं कथयामः – "गीतायां स्वयं भगवताऽभाणि," "रामायणे च स्वयं रामेणाभाणि" व्यासोऽथवा वाल्मीकिर्वदति–इति सहृदयशिरोमणयो न वदन्ति, तत्र वदन्तु नाम कवेर्नाम कदाचित् काव्यशास्त्रदत्तदृष्टयः समालोचकाः।

---

१. द्र०–तुलसीदास पृ० ३६६–सं० १९५३ ई०।

कविः समग्रां रचनामेवं प्रस्तौतु यत् कविस्थाने वर्णनीयस्यैव पात्रस्य व्यक्तित्वमनावृतरूपेण स्फुटं भवतु सत्पात्रस्य व्यक्तित्वं चैवं प्रतीयेत यत् तज्जीवनपद्धतेरनुकरणं मानवमात्रस्य कल्याणाय भवतु। संवादांशैरेतद् विशेषतः साध्यमस्ति। रामप्रमुखानां महाकाव्यनायकानां संवादवाक्यानि प्रायेण समुचितकार्य-निर्धारणावसरे सहृदयानां जिह्वाग्रे नरीनृत्यमानानि दृश्यन्ते। अतः संवादः महाकाव्यस्यानिवार्यं तत्त्वमिति सिद्ध्यति।

महाकाव्यसंरचनायां शास्त्रीयनियमानुपालनं गतानुगतिकतामात्रं नास्ति। तद्गतनियमनिर्वाहादेवाद्य महाकाव्यस्य स्वरूपं सुरक्षितं दरीदृश्यते। सुखदमेतदाश्चर्यं यत् स्वातन्त्र्यानन्तरं शताधिकानि महाकाव्यानि प्रणीतानि विलसन्ति। एतासु रचनासु परम्परां प्रति श्रद्धाया आधुनिकतां प्रति आकर्षणस्य च मधुरतरः सङ्गमो दृश्यते।

काले-काले परिवर्तमानं स्वरूपं दृष्ट्वा तस्य सर्वाङ्गशुद्धा लक्षणप्रस्तुतिः कठिना तथापि पूर्वाचार्याणां मतान्यनुसृत्य आधुनिकानि च महाकाव्यानि दृष्ट्वा मुख्यानां तथ्यानां सङ्कलनमेवं कर्तुं शक्यते—

"सर्गैर्वृत्तैश्च बद्धं सहृदयहृदयाह्लादिशब्दार्थरम्यं
संवादैश्चोच्चशिल्पैः सततरसमयं ग्रन्थिमुक्तं समृद्धम्।
पात्रं स्याद् यस्य मुख्यं परमगुणयुतं लोकविख्यातवृत्तं
भव्यं लोकस्वभावं महदपि महतां तन्महाकाव्यमास्ते॥

●

अभिनव-साहित्य-परिचयः

१. शब्दविमर्श (हिन्द्याम्)

लेखकः—डॉ० अमरनाथ पाण्डेयः, अध्यक्षः—संस्कृतविभागस्य, काशीविद्यापीठम्, वाराणसी। प्राप्तिस्थानम्—चौखम्भा विश्वभारती विद्याभवन, चौक, वाराणसी। आकारः—D. D., पृष्ठानि—१२०, मूल्यम्—१६.००।

ग्रन्थेऽस्मिन् शुद्धाशुद्धशब्दानां विमर्शोऽकारि श्रीपाण्डेयमहाभागेन। अत्र हि १—शब्दार्थविवेचनम्, २—विविधाकारा एकार्थकाः शब्दाः, ३—संस्कृत-हिन्दीभाषयोरन्यभाषाशब्दाः, ४—शब्दानामितिहासः, ५—हिन्द्यां लिंगविषयिण्योऽशुद्धयः, ६—वर्णदेशना तथा ७—समन्वयः इति नामभिः सप्तविभागाः सन्ति। ग्रन्थस्यारम्भे परमोपयोगिनी भूमिका तथाऽन्ते सहायकग्रन्थानामनुक्रमणिका लिखिते स्तः। पुस्तकेनानेन शुद्धभाषणलेखनयोः प्रेरणा लभ्यतेऽवगम्यते च पूर्वैरनुसृतो वाङ्मयस्य वास्तविको मार्गः।

संस्कृत-हिन्दीविदुषां विशेषतः प्रौढच्छात्राणां कृते पुस्तकमिदं परमोपयोगि। आशास्यते श्रीपाण्डेयमहोदया एतत्पुस्तकस्य बृहदाकारताप्रदानेऽवश्यमेव दृढसंकल्पाः सम्भूय इतोऽप्यधिकमुपकरिष्यन्ति जिज्ञासूनिति ।

२. भारतम् (गीतिकाव्यम्)

प्रणेता प्रकाशकश्च-- श्रीरामकैलासपाण्डेयः, अनुवाँ, जंघई, इलाहाबाद ।
आकारः—D. D., पृष्ठानि—२८, मूल्यम्–२.०० ।

लघुकायेऽस्मिन् ग्रन्थे आदौ 'भारतशतकम्' नाम्ना उपजातिच्छन्दसैकं खण्डकाव्यमुट्टङ्कितमस्ति यत्र आभरताज्जवाहरं यावन्नैके भारतभक्ताः, राजानः, कवीन्द्रास्तीर्थानि, नद्यः, वीरांगनाश्च सरलया सरसया च भाषया वर्णिताः । सहैव भारतस्य प्राचीनाऽधुनिकी च स्थितिः समालोचिता । एतदतिरिक्तं १—वीणापाणिं प्रति, २—सूक्तिप्रशस्तिः, ३—राधेयाष्टकम्, ४—गीता, ५—भारतम्प्रति, ६—अर्जुन, ७—हे कालिकास, ८—राणाप्रतापः, ९—शिववीरः, १०—महात्मगान्धिमहोदयः, तथा ११—जवाहरश्चेति विषयकाणि विभिन्नच्छन्दःसु ललितानि गीतानि प्रस्तुतानि यानि सहृदयहृदयान्यावर्जयितुं नितान्तं समर्थानि ।

३. साहितीजगती

रचयिता—श्री के० हनुमन्तरावः, प्राप्तिस्थानम्–K. V. Seshubai O U B/F 7 University Campus, Hyderabad--7 (A. P.) आकारः—डवल क्राउन, पृष्ठानि–१७६, मूल्यम्–३.२५ ।

विवेचनात्मकनिबन्धानां संग्रहरूपेऽस्मिन् ग्रन्थे साहिती-जगती, साहित्यप्रयोजनम्, कवित्वम्, इतिवृत्तञ्च, काव्ये अस्पष्टता, वाङ्मयसमालोचनम्, साहित्यं समाजश्च, महाभारते केचन सन्देहास्तथा रामायण परिशीलनमिति नामभिरष्टौ शीर्षकाणि सन्ति । ग्रन्थान्ते उपयुक्तग्रंथानामनुक्रमणिकाऽस्य गौरवं समेधयति ।

संस्कृतसाहित्यमनुशीलयद्भिर्विद्वद्भिरुच्चच्छात्रैश्चायं ग्रन्थोऽवश्यमवलोकनीयः । भाषाऽस्य सुगमा, धारावाहिनी चास्ते । यत्र-तत्र स्वमतपोषणाय विचाराय चाङ्ग्लभाषाऽपि समाश्रिता विद्यते ।

४. श्रीजवाहरज्योतिर्महाकाव्यम्

रचयिता—पं० रघुनाथप्रसादचतुर्वेदः, प्राप्तिस्थानम्—२–दशभुजी गणेश, मथुरा ।
आकारः—D. D., पृष्ठानि—१६०, मूल्यम्—२.५० ।

एकविंशतिसर्गेषु निबद्धेऽस्मिन् प्रबन्धकाव्ये प्रायोऽनुष्टुपछन्दांस्येव दृश्यन्ते । श्लोकानां सम्पूर्णसंख्या ११८७ मिता विद्यते । भाषासारल्यमस्य विशेषेणोल्लेख्यम् । एतेन सुनिश्चितमिदं यत् न केवलं साधारणसंस्कृतज्ञ ... ... बोद्धुं शक्ष्यति किन्तु हिन्दी-

भाषाभिज्ञोऽपि जनोऽस्यार्थबोधाद् वञ्चितो न भविष्यति। भारतस्य प्रधानमन्त्रिणः स्व० श्रीजवाहरलालनेहरूमहाभागस्य काव्यनायकस्य प्रामाणिकं सम्पूर्णजीवनचरितं तत्पूर्वजैः सह सम्यक् प्रस्तुतमस्मिन् प्रबन्धे।

ग्रन्थस्य कर्गद-मुद्रणाऽऽवरणादीनि, मध्ये-मध्ये च मनोहारीणि विचित्राणि चित्राण्य-कस्मादेवावलोकनाय प्रोत्साहयन्ति नश्चेतः। श्रीचतुर्वेदमहोदया एतत्पुस्तकद्वारा भारतभूमे रत्नस्य श्रीनेहरूमहोदयस्येतिवृत्तं सुरगिरा समुपस्थाप्य बहूपकृतवन्तोऽस्य देशस्य संस्कृतजगत इत्येतदर्थं तेषां दीर्घायुष्याय भूतभावनं प्रार्थयन्तो वयं भूयो भूयो धन्यवादान् प्रकटयामः।

५. श्रीनिवासशतकम्

प्रणेता—श्रीविठलदेवुनि सुन्दरशर्मा, परिशोधनसहायकः, संस्कृतपरिषद्-उस्मानियाविश्वविद्यालयः, हैदराबाद-500007। प्राप्तिस्थानम्—श्रीमती विठलदेवुनि नागरत्नम्मा 2-1-428, नल्लाकुण्टा, हैदराबाद-500044। आकारः—डबल क्राउन, पृष्ठानि—४४।

अष्टोत्तरशतपद्यपरिमितेऽस्मिन् स्तोत्रकाव्ये भगवतः श्रीनिवासस्य 'हे श्रीनिवास! परिपालय मां विमूढम्' इतीयमेव वसन्ततिलकावृत्ते निबद्धा पङ्क्तिश्चतुर्थचरणत्वेन (मुकुटचरणत्वेन) प्रारम्भात् समाप्तिं यावत् परिकल्पिता। मनोज्ञया भावसम्पदा, निरर्गलया च धारया परिपुष्टमिदं शतकं मुकुटनियममनुसृत्य विरचितेषु संस्कृतशतकेषु प्रथममिति मन्ये। शतकमिदं संस्कृतशतकवाङ्मयेऽवश्यमेव कमपि सहयोगं प्रदास्यतीति दृढं विश्वसिमः।

६. महाभाष्यम् (प्रथमाह्निकम्)

वृत्तिकारः—डॉ० राजकिशोरमणित्रिपाठी, संस्कृतविभागः—गोरखपुरविश्वविद्यालयः। प्राप्तिस्थानम्—मोतीलाल बनारसीदास, पो० बा० नं० ७५, चौक, वाराणसी। आकारः—D. D., पृष्ठानि—१६०। मूल्य —१२.००।

प्रथमाह्निकस्य महाभाष्यस्य विस्तृतं व्याख्यानं श्रीत्रिपाठिमहोदयेन विवेचनात्मकपद्धत्या समुपस्थापितम्। पं० क्षितीशचन्द्र-चट्टोपाध्यायस्यानुवादमाधारीकृत्य नागेशाभिमतमादायानुवादष्टिप्पणी च विहिते स्तः। वृत्तिलेखनस्य यत् 'असम्बद्धप्रवक्तारः सम्बद्धे मौनमास्थिताः। टीकाकृतो भृशं वन्द्याः प्रेरका अत्र कर्मणि।' इति प्रयोजनमुक्तमनेन तत्सफलयितुं भूयान् प्रयासो दृग्गोचरी भवति। वस्तुतः ग्रन्थस्यास्य भागत्रयं वर्तते—१—महाभाष्यम्, २—हिन्दीरूपान्तरम्, तथा ३—टिप्पणी। टिप्पण्यां त्रिपाठिमहोदयेन पूर्ववर्तिनां विविधटीकाकाराणां वाक्यानि समुद्धृतानि येनान्येषामपि मतानि सुगमतयाऽवगन्तुं शक्यन्ते। ग्रंथग्रन्थिस्फोरणस्य स्तुत्यः प्रयासोऽत्र वृत्तिकारेणाऽकारि। हिन्दीभाषामाध्यमेन लिखिता वृत्तिः संस्कृतानभिज्ञानामेव न किन्तु छात्राणामपि कृतेऽत्यन्तमुपयोगिनी। विस्तृतभूमिकायां त्रिपाठिमहोदयेनाऽऽवश्यकनिर्देशोऽपि कृतो विद्यते। आशास्यते महोदयेनानेनैवमेव अवशिष्टस्यापि भाष्यभागस्य वृत्तिं विलिख्य संस्कृतजगत उपकारः साधयिष्यते इति।

७. विद्याधर-ग्रन्थावली

सम्पादकः—पं० विद्याधरशास्त्री। प्रकाशकः—राजस्थान साहित्य अकादमी, उदयपुर। आकारः—रायल अठपेजी, पृष्ठानि—३६०, मूल्यम्—२८.००।

राजस्थान-प्रदेशस्थबीकानेरवास्तव्यस्य बहुमुखीप्रतिभाशालिनः कविवरश्रीविद्याधर-शास्त्रिणो गद्य-पद्य-काव्य-नाटक-स्तोत्र-सूत्रादीनां नानाविधरचनानां संग्रहोऽत्र व्यधायि। अनेन महात्मना प्राचीना नवीना च पद्धतिरनुसृता स्वकृतिषु। संग्रहेऽस्मिन् षोडशसर्गात्मकं हरिनामामृतं महाकाव्यम्, हृद्गीतापरनामधेयं विश्वमानवीयं नवसर्गात्मकं काव्यम्, विभिन्नविषयकं नीतिरत्नम्, वैचित्र्यलहरी, मत्तलहरी, आनन्दमन्दाकिनी, श्रीविक्रमार्को महनीयकीर्तिः, शिवपुष्पाञ्जलिः, नानाविषयिणी लीलालहरी, हिमाद्रिमाहात्म्यम्, मातृवन्दन-मित्यादिविषयिणी काव्यवाटिका, साहित्यदर्शनादिसूत्राणि, पूर्णानन्दं दुर्बलबलञ्च नाटक-मित्यादिशीर्षकोपेतानां काव्यानामुपन्यासो विद्यते। तत्र हरनामामृते महाकाव्ये सम्पूर्ण-जीवनस्य विभिन्नपक्षाणां विविधावस्थानाञ्च मनोहारिणी कथाऽऽस्ते। सम्पूर्णेऽस्मिन् महाकाव्ये मानवहृदयस्य विपन्ना संवेदना प्रत्यक्षीभवति। विश्वमानवीये काव्ये नैको नायकः, न चैकैव कथा, न वैको रसः किन्तु विभिन्नैश्छन्दोभिः प्राकृतिकं वर्णनं नाना-रसाश्च उपन्यस्ताः। मानवस्य विश्वव्यापकस्वरूपस्य तन्नवयुगव्यापिन्याः क्षमतायाश्च प्रतिपादनमत्र विद्यते। देवत्वापेक्षया मानवत्वं श्रेष्ठतया प्रतिष्ठापयताऽनेन महाकविना संस्कृत-साहित्याय नूनमेव काचन नवीना दिक् प्रदर्शिता। नीतिरत्नादिष्वन्येष्वपि शीर्षकेषु श्रीशास्त्रिणा नव-नवोन्मेषशालिन्याः स्वप्रतिभायाः सम्यक् परिचयो दत्तः। सर्वत्र काव्ये भाषायाः सुगमत्वं प्रवाहमयत्वञ्च विशेषेणोल्लेख्यं वरीवर्ति।

श्रीशास्त्रिवर्य एतदर्थं भृशं धन्यवादार्हः। जगन्नियन्ता तं चिरजीवनं विधाय निरन्तरं संस्कृतवाङ्मयस्य परिवर्धने प्रोत्साहयन्त्विति नः शुभाशंसा। ग्रन्थावलीयमवश्यमेव प्रत्येकं संस्कृतज्ञरसिकैरवलोकनीया संग्राह्या चास्ते।

—विद्याधरद्विवेदी



समीक्षणार्थं प्राप्तानि साहित्यानि—

१—शास्त्रदीपिका
२—बृहत् संस्कृत-हिन्दी शब्दकोष
३—अभिमन्युचरितम्

—:०:—

निवेदना—स्वेषां नूतनकृतीनां परिचयाय समालोचनाय चाभिनवसाहित्यप्रणेतृभिरे-कैकस्य पुस्तकस्य प्रतिद्वयं प्रेषणीयमिति सानुरोधं निवेद्यते।

लेखक-परिचयः

परमार्थसुधायाः द्वितीयवर्षस्य चतुर्ष्वपि त्रैमासिकेष्वङ्केषु येषां महानुभावानां लेखाः प्रकाशितास्तेषां संक्षिप्तः परिचयो निम्नलिखितासु पङ्क्तिषु प्रकाश्यते—

डॉ० सत्यनारायणशर्मा	प्रधानसम्पादकः। रांचीस्थ-सेंटजेबियर्सकालेजे, तिरुपतिविश्वविद्यालयान्तर्गते थियोसोफिकल-कालेजे तथा शर्मण्यदेशस्य गटिंगनविश्वविद्यालये भूतपूर्वो व्याख्याता। सम्प्रति शर्मण्यदेशस्य मूईंस्तरविश्वविद्यालये व्याख्याता।
डॉ० चन्द्रकान्तशुक्लः	व्याख्याता—संस्कृतविभागे, राँची महाविद्यालयः विहार।
श्रीजगन्नाथवेदालङ्कारः	अध्यापकः, अरविन्द आश्रम, पाण्डिचेरी।
डॉ० शिवशङ्करोऽवस्थी	विलन्दपुर, गोरखपुर।
डॉ० नारायणशास्त्री काङ्करः	सुमेरुकर्ण मार्ग, रामगंज, जयपुर-३ राजस्थान।
डॉ० रामाशीषपाण्डेयः	संस्कृतविभागाध्यक्षः, मारवाड़ी महाविद्यालये, रांची (विहार)
डॉ० रेवाप्रसाद-द्विवेदी	साहित्यविद्याप्राध्यापकाध्यक्षः, काशी-हिन्दू-विश्वविद्यालयः, वाराणसी।
डॉ० उमाशंकरशर्मा	प्रवक्ता—आङ्गलविभागे, काशीविद्यापीठम्, वाराणसी।
डॉ० गजाननशास्त्री मुसलगाँवकरः	भूतपूर्वः मीमांसाविभागाध्यक्षः, संस्कृतमहाविद्यालयः, काशीहिन्दूविश्वविद्यालयः, वाराणसी।
श्रीरामकृष्णशास्त्री 'अव्ययः'	सम्पादकः—(सुप्रभातम्) १२२, श्रीरघुनाथपुरम्, जम्मू-१८०००१।
श्रीहरिअरविन्दः	श्रीरामशङ्कर-साङ्गवेद-विद्यापीठ कोडरा, चन्दहर, बस्ती (उ० प्र०)
श्री मा० चि० दीक्षितः	प्रवक्ता—संस्कृतविभागे, कर्णाटक विश्वविद्यालयः, धारवाड़।

डॉ० जगन्नाथपाठकः	प्रवक्ता, गंगानाथझा केन्द्रीय संस्कृतविद्यापीठ, मोतीलाल नेहरू पार्क, इलाहाबाद ।
आचार्य-पट्टाभिरामशास्त्री	जयपुरस्थमहाराजासंस्कृतकालेजस्य भूतपूर्वोऽध्यक्षः, काशीहिन्दूविश्वविद्यालये, कलकत्ता-विश्वविद्यालये, वाराणसेय-संस्कृतविश्वविद्यालये च भूतपूर्वो मीमांसा-साहित्यविभागाध्यक्षः ।
डॉ० प्रभुनाथद्विवेदी	प्रवक्ता—संस्कृतविभागे, एम० एल० के० स्नातकोत्तरमहाविद्यालयः, बलरामपुर गोण्डा (उ० प्र०)
डॉ० विश्वनाथमिश्रः	प्राचार्यः—शार्दूल-संस्कृत-विद्यापीठम्, बीकानेर (राजस्थान)
मुसलगाँवकरोपाह्वा श्रीमती विमला	अध्यापिका—काशीहिन्दूविश्वविद्यालयः, वाराणसी ।
डॉ० राजेन्द्रमिश्रः	प्रवक्ता—संस्कृतविभागे, प्रयागविश्वविद्यालयः, प्रयाग ।
पं० केदारनाथत्रिपाठी	अध्यक्षः—दर्शनविभागस्य, का० हि० विश्वविद्यालयः, वाराणसी ।
पं० बटुकनाथशास्त्री खिस्ते	साहित्यविभागाध्यक्षः, सं० सं० विश्वविद्यालयः, वाराणसी ।
डॉ० राजेन्द्रप्रसादद्विवेदी	प्रवक्ता—संस्कृतविभागे, राँचीविश्वविद्यालयः, विहार ।
श्री आद्याचरणझाः	भूतपूर्व-संस्कृतशिक्षोपनिर्देशकः (विहार)
श्री के० लक्ष्मणशास्त्री	आन्ध्रप्रदेशे भूतपूर्वः संस्कृतशिक्षानिदेशकः, 69 आदर्शनगर, हैदराबाद (आन्ध्रप्रदेशः)।
डॉ० रहसविहारी द्विवेदी	अध्यापकः, संस्कृतविभागे, जबलपुर विश्वविद्यालयः, जबलपुर (म० प्र०)

अमृतं मधुरं सम्यक्
संस्कृतं हि ततोऽधिकम्।



निखिलेऽपि महीमण्डले

संस्कृत - प्रसाराय

"कानोडिया ओभरसीज कारपोरेशन, कलकत्ता"

(Kanoria oversees Corporation, Calcutta)

इति संस्थानेन

श्रद्धा-भक्ति-प्रसूनानि विनिवेद्यन्ते



देवभोग्यमिदं यस्मात्
देवभाषेति कथ्यते।

ब्रह्म संपद्यते तदा

(१)

न बिभेति परो यस्मात् न बिभेति पराच्च यः ।
यश्च नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ॥

(२)

यश्चाभावं न कुरुते सर्वभूतेषु पापकम् ।
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥

(३)

संयोज्य मनसाऽऽत्मानम् ईर्ष्यामुत्सृज्य मोहिनीम् ।
त्यक्त्वा कामं च तदा ब्रह्मत्वमश्नुते ॥

(४)

यथा श्राव्ये च दृश्ये च सर्वभूतेषु चाव्ययम् ।
समो भवति निर्द्वन्द्वो ब्रह्म संपद्यते तदा ॥

(५)

यदा स्तुतिञ्च निन्दाञ्च समत्वेनैव पश्यति ।
काञ्चनं चायसं चैव सुखं दुःखं तथैव च ॥

(६)

शीतमुष्णं तथैवार्थमनर्थं प्रियमप्रियम् ।
जीवितं मरणं चैव ब्रह्म संपद्यते तदा ॥

महाभारते, शान्तिपर्वणि ३२६, ३३-३८

परमार्थसुधा

त्रैमासिक-संस्कृत-पत्रिका

परमार्थसुधा

(त्रैमासिक-संस्कृत-पत्रिका)

वर्षस्तृतीयः ❋ अङ्कः प्रथमः

आश्विन–कार्तिक–मार्गशीर्षमासाः

संवत्सरः-२०३५

सम्पादकः — श्रीसत्यनारायणशर्मा

सहसम्पादकः — श्रीवासुदेवद्विवेदी शास्त्री

प्रकाशकः

श्रीसोहनलालः

मन्त्री, परमार्थन्यासः

मुडहू, राँची (विहार)

★

प्राप्तिस्थानं, पत्र-लेख-मूल्यादि-प्रेषणसङ्केतश्च—

श्रीविद्याधरद्विवेदी

व्यवस्थापकः – परमार्थसुधा

सार्वभौम-संस्कृत-प्रचार-कार्यालयः

डी० ३८।११०, हौजकटोरा, वाराणसी

(उत्तर-प्रदेशः), दूरभाषः – ६६०२१

★

वार्षिकं मूल्यम्–दश रूप्यकाणि

विदेशेषु – दश डालराणि

★

मुद्रकः

बैजनाथ प्रसाद

कल्पना प्रेस

रामकटोरा रोड, वाराणसी।

विषया लेखकाश्च

परमार्थसूक्तयः

संज्ञानमहत्त्वम्

(१)

संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ ।
इलस्पदे समिध्यसे स नो वसून्या भर ॥

(२)

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ॥

(३)

समानो मन्त्रः समिति समानी
समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभि मन्त्रये वः
समानेन वो हविषा जुहोमि ॥

(४)

समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥

—ऋग्वेदात्—१०/१९१

प्रतीच्ये जगति बन्दीपदविमर्शः

श्रीसत्यनारायणशर्मा

[१]

बन्दीति पदं न केवलं कवियशःप्रार्थिभिरेव, अवाप्तसारस्वतप्रसादैः प्रतिष्ठितशेमुषीकैरपि कालिदासप्रभृतिभी रससिद्धैः कविभिरर्थविशेषे प्रयुयुजे। ननु शब्दोऽयं पुराकाले श्रोतॄणां वाचकानां वा मनसि किम्प्रकारकमर्थं द्योतयाम्बभूव? पदप्रयोगमसुमुद्दिश्य प्रतीच्ये जगति या विवेचना विहिता सा शब्दशास्त्राधिजिगमिषूणां कृते उपयोगितां बिभर्त्ति। आंग्लदेशस्य राजधान्या लन्दननगरादूनविंशतिशतकस्य मध्यभागे प्रकाशिताया इलायुधस्याभिधानरत्नमालाया अनुक्रमणिकायां विवृतमतानुसारं बन्दीति शब्दः पारस्यदेशाद् भारतमाजगाम। जर्मन्यां समधीतशब्दशास्त्र आचार्यस्थीमोऽप्युपपत्तिमिमां हेतुनिर्देशपुरःसरमन्वमोदिष्ट। भारतं प्राप्य पारसीकः शब्द परिष्कृतो बभूव।

पारस्यदेशेन भारतस्य प्राक्कालिकः सम्बन्धो विवृतिनिरपेक्षः। महाकवेः कालिदासस्य कृतौ पराक्रमविशेषोदयदुर्जयस्य रघोः पारस्यविजयाहवो वीक्ष्यते। रघुवंशस्य चतुर्थसर्गानुसारमरिन्दमो रघुः पारसीकान् जेतुं स्थलवर्त्मना प्रतस्थे, तत्त्वज्ञानेनेन्द्रियाख्यान् रिपूनिव। जैत्रोऽयं यवनीनां मुखपद्मानां मधुमदं न सेहे; महीं श्मश्रुलैः शिरोभिराच्छादयामास। शेषा आयुधिका अपसारितशिरस्त्राणा युधि अकुतोभयममुं शरणं ययुः।

ननु पदस्यास्य प्रयोगपरम्परा सुधीभिर्विचार्यताम्। रघुवंशप्रणेतुः पूर्ववर्त्तिनि साहित्ये पदमिदं पृथग्विधमर्थं खलु प्रकटयति, किन्तु कतमः पारसीकः शब्द आर्यावर्त्ते रूपमिदमवाप? परिचारकस्य दासस्य वाऽर्थमपि निर्दिष्टौ पारसीकशब्दौ द्योतयतः। बन्दीकृतस्यापि। प्रतीच्यवात्तु मुद्रितेषु संस्कृतशब्दाभिधानेषु सङ्केतितोऽर्थोऽपर्याप्तः। प्राचीनतमवाङ्मये व्यवहृतो बन्दीति शब्दो दासस्य सेवकस्य वा भावं प्रकटयतितरामित्याचार्यथीम औहिष्ट। रुद्धस्य कारास्थस्यार्थापेक्षया दासार्थो बलीयानिव प्रतिभाति।

महाकवेः कालिदासस्य कुमारसम्भवे द्वितीयसर्गे एकषष्टितमे श्लोके सुरबन्दीनामिति पदं ग्रन्थकृता प्रयुयुजे। शितिकण्ठस्य तनूजः सैनापत्यमुपेत्य वीर्यविभूतिभिः सुरबन्दीनां वेणी

विस्रंसयिष्यतीति । अत्र सुरबन्दीति पदमधिकृत्य कश्चिदपि टीकाकारो निर्भ्रान्तं व्याख्यातुं न शेक इत्याचार्यथीमोऽमंस्त । पदस्यास्य ननु कोऽर्थः ? कारागृहस्थलं प्रकटयितुं तत्पुरुषस्य स्थाने कर्मधारयसमासः स्यात् । स्त्रीलिङ्गस्य स्थानेऽपि पुंल्लिङ्ग आहर्त्तव्यः । सन्दर्भेऽस्मिन् थीमः पाणिनीये सूत्रे स्मारयति । कुमारश्रमणादिभिरिति । द्वितीयाध्यायस्य प्रथमपादान्तर्गतं सप्ततितमं सूत्रमिदम् । एतदनुसारं कुमारशब्दः श्रमणादिभिः समस्यते ; तत्पुरुषश्च स्यात् । षष्ठाध्यायस्य द्वितीयपादान्तर्गतं द्विचत्वारिंशत्तमं सूत्रमस्ति—कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूः पण्यकम्बलो दासीभाराणां च । ननु सुरशब्दस्य स्त्रीलिङ्गमश्रुतम्, तर्हि टीकाकृतां व्याख्या कथं तर्कसहा ? देव्यस्तु सन्तीति को न जानीते ? परं सुरीणां निर्देशः कुत्रापि नो श्रूयते । रघुवंशमहाकाव्ये प्रयुक्तः स्वर्गबन्दीति शब्द आलक्षयितव्यः । नलकूबरशापयन्त्रितपौलस्त्यबलात्कारकेशाकर्षैरदूषितानां स्वर्गबन्दीनां वेणीबन्धमोक्षणं कविरवीवर्णत् ।

ननु कुमारसम्भवस्य द्वितीयसर्गे यासां सुरबन्दीनां वाष्पशीकरवर्षिभिः श्वाससाधारणानिलैश्चामरैः संसुप्तस्तारकासुरो वीज्यते ताः काः ? आचार्यथीमस्योहानुसारमिमा नाकस्याप्सरसो यासामायताक्षीणामधीरविप्रेक्षितैर्मृणालिकापेलवाङ्गैः कोकनदसुगन्धिभिराननैः पयोधरोत्सेधैश्च पुष्पधन्वाऽहार्यनिश्चयानां तापसानां तपो भिनत्ति स्म । अप्सरोभ्यः पदप्रयोगपारदृश्वा कविः कालिदासः सुरस्त्री, सुरवधूः, सुराङ्गना, सुरयुवती, अमरवधूः, सुरकामिनीजनः, सुरलोकसुन्दरीत्यादिशब्दान् पौष्कल्येन प्रायुनक् । कुमारसम्भवेऽमरवधूनां हस्तैः सदयालूनपल्लवा नन्दनद्रुमाश्छेदपातानामभिज्ञाः क्रियन्ते । चतुर्थसर्गानुसारमविषह्यदुःखधमिता रतिर्मन्मथं निजगाद—अहं पतङ्गवर्त्मनाऽगत्य पुनरप्युत्सङ्गाश्रयिणी भविष्यामि, दिवि सुरकामिनीजनैर्यावन्न विलोभयिष्यसे ।

आचार्यथीमस्य मते कुमारसम्भवे प्रयुक्तः सुरबन्दीति शब्दो रघुवंशे प्रयुक्तः स्वर्गबन्दीति शब्दश्चाप्सरसः समानार्थकौ तर्कणीयौ । बन्दीति पदं रससिद्धः कविरसावर्थद्वये प्रयुयुजे । कामिन्यो बन्दीभूताः । व्यसनकृशास्ता रुदन्ति देवविप्रयोगव्यसनताडिताः । असुरविमर्दनानन्तरं देवप्रतिसङ्क्रमानसास्ताः स्ववेणीमोक्षं द्रक्ष्यन्तीति । वर्णनमिदं बन्दीपदपरामर्शाय गुर्वर्थम् । त्रिविष्टपस्थप्रियं द्रष्टुमुपगूहितुञ्च द्रढीयसी काङ्क्षा किल स्पष्टा । रघुवंशेऽपि स्वर्गबन्दीनां वेणीबन्धविमोक्षणं निगद्यते । देवा अदूषिताः स्वप्रेयसीः पुनः प्राप्स्यन्ति । प्रियः स्वहस्तेनैव प्रियाया वेणीं मोचयतीति रघुवंशस्य चतुर्दशसर्गे स्पष्टीभवति । वायुवशेन भिन्ना प्रासादे कालागुरुधूमराजिर्वनान्निवृत्तेन रामेण स्वयं मुक्ता वेणिरिवाबभासेति ।

महाकवेः कालिदासस्य कृतिषु अप्सरसो नाकशासनायत्तत्वं पारतन्त्र्यञ्च निरदेशिषाताम् । कुपितं तपोधनं वीक्ष्य तस्य तपो भङ्क्तुं पुरन्दरेण प्रेषिता हरिणीनामाप्सरा निर्व्यली-

कतया स्वस्याः परायत्ततां प्रतिपादयाम्बभूव । तपःप्रतिबन्धजातमन्यवे तृणबिन्दवे प्रमुखाविष्कृतचारुविभ्रमा सा हरिणी स्वस्या असहायत्वं ज्ञापयामास । 'भगवन्, परवानयं जनः प्रतिकूलाचरितं मे क्षमस्वेति ।' विक्रमोर्वशीयेऽपीदं द्रष्टव्यम् । रूपलावण्यरसनिर्झरी उर्वशी यस्या वपुराभरणस्याप्याभरणमासीत्, प्रसाधनविधेरपि प्रसाधनविशेष आसीत्, उपमानस्याप्युपमानमासीत् स्वस्य प्रेमिणं निवेदयाम्बभूव—परवशोऽयं जन इति । पुरूरवा अवीविदत—नहि कर्तुमात्मप्रियाणि प्रभवति परवत्ता ।

ननु बन्दीतिशब्दस्यार्थो रुद्ध इति भवितुमर्हति किम् ? मैवम् । कामचारिकार्थोपपत्तये थीमेनात्र व्याकरणप्रामाण्यमदायि । भट्टिकाव्येऽष्टमसर्गे श्लोकोऽयं लभ्यते—

यानैः समचरन्तान्ये कुञ्जराश्वरथादिभिः ।
सम्प्रायच्छन्त बन्दीभिरन्ये पुष्पफलं शुभम् ॥

श्लोकेऽस्मिन् रुद्ध इत्यर्थस्य सङ्गतिर्न भवति । प्रसङ्गविरुद्धोऽयम् । सम्प्रदानस्थाने करणकारकोऽत्र विद्यत इति विचारार्हम् । पाणिनीयाष्टाध्याय्याः प्रथमाध्याये तृतीयपादे पञ्चपञ्चाशत्तमं सूत्रमत्र नो विस्मर्त्तव्यम् । दाणश्च सा चेच्चतुर्थ्यर्थे । पातञ्जलमहाभाष्ये—आक्षेपभाष्यम्—सा चेत्तृतीया चतुर्थ्यर्थे इत्युच्यते । कथं नाम तृतीया चतुर्थ्यर्थे स्यात् ? समाधानभाष्यम् —एवं तर्हि । अशिष्टव्यवहारे तृतीया च विधीयत आत्मनेपदं च । दास्या सम्प्रयच्छते । वृषल्या सम्प्रयच्छते । यः शिष्टव्यवहारो ब्राह्मणीभ्यः सम्प्रयच्छतीत्येव तत्र भवितव्यम् । काशिकायामपि द्रष्टव्यम्—कामुकः सन् ददातीत्यर्थ इति । भट्टिकाव्यस्य श्लोकोऽयं बन्दीपदस्यार्थमवगमयितुं साहाय्यं खलु विदधाति ।

दशशिरसोऽशोकवाटिकायामपि बन्द्योऽवलोक्यन्ते । भट्टिकाव्यस्याष्टमसर्गानुसारं समाहृता बन्द्यस्तत्र पुष्पधन्वानं प्रादमयन्त । ननु समाहृता इति पदं किं व्यनक्ति ? शब्दप्रयोगोऽयं नास्ति दोषभाक् । अस्य निर्दोषत्वख्यापनार्थं प्रमाणानां नैयून्यं नास्ति । रघुवंशस्याष्टादशसर्गस्य "अधिविविदुरमात्यैराहृतास्तस्य यूनः प्रथमपरिगृहीते श्रीभुवौ राजकन्या" इति श्लोकपङ्क्तिमुद्धरन्नाचार्यथीमः समाहृतस्याहृतस्य वा प्रयोगनिर्दोषत्वमचिख्यपत् । परं भट्टिकाव्यस्य श्लोकेऽस्मिन् समाहरणं समानयनं भवितुं नार्हति, दशशिरसो विवेकधियस्तनूभूतत्वात् । अपरस्मिन् प्रसङ्गे समाहरणं समानयनं भवितुं पार्यते । वाल्मीकीयरामायणे लङ्काधिपस्य निवेशनस्य चित्रमित्थमूहितुं विवशीकरोति । तदस्ति राक्षसीभिः पत्नीभिराहृताभिश्च राजकन्यकाभिरावृतम् । कथमाहृताभिः ? विक्रम्याहृताभिः । अन्यत्रापि ताः सर्वा युद्धकामेन रावणेन हृताः स्त्रियः सन्ति । अस्मिन्नेव काण्डे राक्षसेन्द्रेण नागकन्या प्रमथ्य बलाद् हृता इत्यवलोक्यते ।

हेतुनाऽमुना बलाद्धृता रमण्यो बन्द्य उच्यन्ते स्मेत्याचार्यथीम औहिष्ट। शब्दोऽयं पारवश्यं कैङ्कर्यञ्च द्योतयति स्म। सम्भ्रान्तकुलोद्भवत्वमपि। कुमारसम्भवस्य द्वितीयसर्गे पर्यायसेवामुत्सृज्य पुष्पसम्भारतत्परा ऋतवोऽपि यं सेवन्ते स्म, इत्थम्भूतेभ्यः शत्रुभ्यो गोत्रभित् सुरसैन्यानां गोप्तारं सेनान्यं पुरोधाय बन्दीमिव जयश्रियं प्रत्यानेष्यतीति बृहस्पतिवचनमपि बन्दीति पदस्यार्थं वेदयते।

[२]

स्वश्रिया क्षोणीभृतामनुषङ्गः प्रथितयशस्कस्य कवेः कालिदासस्य कृतिषु अकामवर्जं वीक्ष्यते। युवाऽप्यङ्कगतां श्रियमभोक्ता; इयन्ति वर्षाणि तया सह दुश्चरमसिधारं व्रतं वर्तयसीवेति ब्रुवता रघुनन्दनेन रघुवंशस्य त्रयोदशसर्गानुसारं पदातेः पश्चादवस्थापितवाहिनीकस्य चीरवाससोऽर्घ्यपाणेर्भरतस्य त्यागवृत्तिर्लक्षयाञ्चक्रे। ननु असिधारं व्रतमिदं किम्? यादवानुसारमन्तर्निवृत्तसङ्गो युवा युवत्या सार्धं मुग्धभर्तृवदाचरेदित्यसिधारं व्रतम्।

आहृताः समाहृता अपहृता लुण्ठिता मुनिगाः कामिन्यो दासीकृता एव स्युरिति कथम्? अपहारस्य दास्यस्य च संस्कारानुगताद् बहुप्रचलितादविनाभावसम्बन्धाद् वैभिन्न्यमिदं झटिति श्रोतॄणां चेतसि नाभासते। सन्दर्भेऽस्मिन् आचार्यथीमो रघुवंशमहाकाव्यस्य षष्ठसर्गस्थं श्लोकं निरदिक्षत् यत्र चापभृतां पुरोगो बन्दीकृतानां रिपुश्रियां साञ्जनवाष्पसेके पद्धती इव द्वे ज्याघातानां रेखे भुजाभ्यां बिभर्तीति प्रतीच्यवाचि श्लोकोऽयं सुष्ठु नैवानूदित इत्यप्यसौ स्मारयति। काव्यस्यास्य अपरश्लोकमपि अनुसन्धातारः पश्येयुः। चतुर्थे सर्गे रघोरद्भुतः पराक्रमो वर्णयाम्बभूवे। गजसाधनः कालिङ्गो नृणां पती रघुं प्रत्यभियुक्तवान्। द्विषां नाराचदुर्दिनं विषह्य काकुत्स्थो जयश्रियमाप। गृहीतप्रतिमुक्तस्य कलिङ्गाधिपतेर्धर्मार्थविजयशीलोऽसौ श्रियं जहार, न तु मेदिनीम्।

विक्रमोर्वशीयेऽपि कविर्मघोनोऽरिणाऽपहृतामुर्वशीमुद्दिश्य बन्दीकृतेति पदं प्रयुयुजे, अन्यत्र तु हृतेति पदम्। बन्दीति पदं परिचारिकायाः कामचारिकायाश्च भावं व्यञ्जयतीत्याचार्यथीमस्य मतम्। कालिदासस्य कृतौ सुरबन्दीति पदस्य स्थाने सुरदासीति पदस्य संभावनामसावौहत।

ननु अप्सरस इति पदात् किं प्रत्येतव्यम्? ताः सन्ति नाकस्यानिन्द्यसुन्दररमण्यो, नृत्यगीतविशारदाः। न केवलं कालिदासादयो नैगमा, बौद्धमहाकविरश्वघोषोऽपि स्वोपज्ञे सौन्दरानन्दकाव्ये ताभ्यः स्वर्गस्त्री, दिवौकसः स्त्रियो, नन्दनचारिणी योषितस्त्रिदिवचरा अङ्गना इत्यादीनि पदान्याददे। काव्यस्यास्य सप्तमं, दशमं, सप्तदशं वा सर्गं सुधियो निशामयेयुः। दशमसर्गानुसारं नन्दो विस्मयफुल्लदृष्टिरैन्द्रं वनमद्राक्षीत्। अप्सरसः सन्ति तत्रापरिक्षीणयौवनाः सदा युवत्यो मदनैककार्याः दिव्याश्च ता निर्दोषपरिग्रहाश्च। दिवौकसां तासः फलस्या-

श्रयणभूतास्ताः। कासाञ्चिदासां चलकुण्डलानि वदनानि वनान्तरेभ्यो रेजुः। तत्कथम्? व्याविद्धपर्णेभ्य आकरेभ्यः कादम्बविघट्टितानि पद्मानीव। तोयदेभ्यस्तडित्पताकेव वनान्तरेभ्यो निःसृतास्ताः प्रेक्ष्य चले जले चन्द्रमसः प्रभेव नन्दस्य तनू रागेण विवेपे। तासां दिव्यं वपुर्ललिताश्च चेष्टास्तस्य चेतो जहार। यथा विभाते उदितस्य सहस्ररश्मेर्दीप्तिर्दीपप्रभामपाकरोति तथाऽप्सरसां श्रीर्मनुष्यलोकस्याङ्गनानां द्युतिम्। तत्कथम्? व्याख्याति। महद् रूपं स्वणु रूपं हन्ति। महान् शब्दोऽल्पतमं शब्दं हन्ति। सुमृद्वीं रुजां गुर्वी रुजा हन्ति। अणोर्विनाशाय सर्वो महान् हेतुर्भवति। अप्सरसो रूपलावण्यमयदर्शनं साधारणजनैः सोढुमशक्यम्। ताः खलु धर्मचर्यया ह्रियन्ते, न बलान्न सेवया न सम्प्रदानेन न रूपवत्तया वा। महता पुण्यपण्येन लभ्यते तासां सन्निधिः। एकषष्टितमे श्लोके दैवतैः समं दिवि निवासो रम्या अजराश्च योषितः स्वस्य शुभस्य कर्मण एव परिपाको भवतीति निगद्यते। जराविरहिते त्रिविष्टपे सदा युवत्यो रमण्य इमे देवानां देवसखानाञ्च मुदमनारतमेधयन्ते। परिचारिका दास्यो वाऽन्यवृत्तिका भवन्ति। मृच्छकटिके कुपितः संस्थानको वसन्तसेनां प्रति गब्भदासीति शब्दं प्रायुनक्। चारुदत्तस्त्वन्यविध आसीत्। इत्थम्भूते व्याहारेऽसौ विनयातिपातं धाष्टर्यञ्चाद्राक्षीत्। अविज्ञानादपरिज्ञातपरिजनोपचरेणापराद्धोऽस्मीति वचोभिरपराधं क्षामयाञ्चक्रे। वाक्करनागलाभिधोऽनुसन्धाताऽप्सरसोऽर्थमधिजिगमिषुर्व्रीडाबन्धनविमुक्तेत्यर्थं भावयामास। ननु स्त्रीणां भूषणं लज्जेति सार्वत्रिकः सिद्धान्तो नास्ति। मनुष्यलोकेऽपि सा योषितां मनोहारितां स्फाययितुं सर्वत्र मण्डनतया नाङ्गीक्रियते।

उत्तरकालिके साहित्ये तु देवगणिका, गीर्वाणतरुणगणिका, स्ववारयोषादीनि पदानि व्यवह्रियन्ते। प्रयोगाणामेतेषामाधानमप्सरसां व्यक्तित्वपरिज्ञानार्थं प्रामाण्यमुपस्थापयतीति चेन्न। दशकुमारचरिते तु केवलं सुरसुन्दरी, देवयोषा चेति पदे ग्रन्थकारेण प्रायोजिषाताम्।

अपरञ्च दास इति पदं सर्वत्र गर्ह्यमिति नाकलयितव्यम्। दास्यस्य महिमानं पुराणर्षयोऽञ्जसा निजगदुः। भगवदङ्घ्रिगतमनस्कानां जातनिर्वेदानामनहङ्कृतीनां दास्यं स्वयमनवद्यो भगवान् पुराणेष्वङ्गीकुरुते। इदं पाउलथीमोऽपि नोपैक्षिष्ट। कुमारसम्भवे शशाङ्कमौलिः स्तनभिन्नवल्कलां शैलाधिराजतनयां प्रति जातानुरागः सन्निजगाद—अवनताङ्गि! अद्यप्रभृति तपोभिः क्रीतस्तव दासोऽस्मि। किन्तु दासीति पदं साहित्ये एतावत् सम्भावनार्हं नो बभूव। रसोपासकः कविः कालिदासोऽनुवर्तितपारस्यदेशीयपद्धतिकासु भारतीयराजसभासु शब्दममुं जग्राहेत्याचार्यथीम ऊहितवान्। बन्द्य इमे सङ्गरे पराभूतानां राज्ञः सुत्वो दयिता वाऽऽसन्। सन्दर्भेऽस्मिन् कौटिलीयमर्थशास्त्रमपि द्रष्टव्यम्। परिचारिका दास्यो वा भर्तुर्वेश्मनि व्याप्रियन्ते, ताः सौकर्येण लभ्या अयत्नसाध्याश्च भवन्ति। परं बन्द्यस्तु केवलं क्षितिभृतां विलाससेविका बभूवुः। नर्तनेन गीतेन च तांस्तेषां चेतांसि रञ्जयन्ति स्म।

नृत्यगीतकलायां निष्णातेभ्यस्ताः कलामधिगच्छन्ति स्म। नृत्यगीते भारतीयसंस्कृतौ भृशं समाद्रियन्ते स्मेति प्रसङ्गेऽस्मिन्नो विस्मर्त्तव्यम्। मनोमलघ्नकीर्त्तिर्महार्घो भक्तिपरिप्लुतान्तरो देवर्षिर्नारदो नृत्यगीतविशारदोऽस्तीति शुश्रुमः। माहेश्वरसूत्राणि धूर्जटेर्नृत्तावसाने प्रकटयाम्बभूवुः। इच्छाशरीरिणो माधवस्य वंशीवादनेन विमोहिता गोपीः कः खलु श्रीमद्भागवतपुराणरसिको विस्मरिष्यति? निवृत्त्यै अवतीर्णस्य नृत्ये वंशीवादने चानुरक्तधियामात्मसमर्पणं भक्तिभावितानां चेतांसि द्रावयति। रघुवंशमहाकाव्ये एकोनविंशतितमे सर्गे महीभृतः सङ्गीतप्रियत्वं सङ्गीतसाधना च ग्रन्थकृता कविसुलभशैल्यामवर्णिषाताम्। अङ्कपरिवर्त्तनोचिते उभे तस्याङ्कमशून्यतां निन्यतुः। के पुनरुभे? हृदयङ्गमस्वना वल्लकी वल्गुवाग् वामलोचना च।

ननु बन्द्यश्चेद् विजयचिह्नमसुसूचंस्तर्हि दास्याः समकक्षतामिमाः केन हेतुना प्रापुः? सन्दर्भेऽस्मिन् भट्टिकाव्यस्याष्टमसर्गस्य श्लोकमाचार्यथीमः स्मारयति। सेतुबन्धे सुरवहू, सुराङ्गणा, सुरसुन्दरी, सुरबन्दी चेति पदानि व्यवहृतानि। हालस्य कृतौ बन्दीति पदं राज्ञो बन्दीरूपे नैव प्रयुयुजे। कादम्बर्यां कलत्राणि बन्दीगृहीताः परपोषिता इति निरदेशि। याज्ञवल्क्यस्मृतौ द्वितीयाध्याये बन्दीपदं वर्त्तते।

बन्दिग्राहाँस्तथा वाजिकुञ्जराणाञ्च हारिणः।
प्रसह्य घातिनश्चैव शूलान् आरोपयेन्नरान्॥

बन्दिपदे इकारस्य ह्रस्वत्वं स्पष्टीकुर्वन्नाचार्यथीमः कालिदासस्य कृतावुपलब्धानि दूतिरिति पदानि समुददिक्षत्। विक्रमोर्वशीये प्रयुक्तं बन्दिग्राहमपि। बन्दिचौरपदेऽपि इकारस्य ह्रस्वत्वमवधार्यम्।

ननु शब्दाभिधानेषु शब्दोऽयं केन प्रकारेण व्याख्यातः? बन्दीति पदं व्याचिख्यासुस्तस्य द्वितीयमर्थं निर्दिशन् मङ्खो व्याचष्टे— नारी चापि हठाद्धृता। रङ्गनाथोऽपि मङ्खानुसारं विक्रमोर्वशीये व्यवहृतस्य बन्दीकृतेति पदस्य हठगृहीतेत्यर्थं विदधे। वाल्मीकीयरामायणस्य तिलकाभिधटीकायामपि बलाद्धृता इत्यनेन बन्दीकृतानां ग्रहणं भवति। अमरकोषे तु प्रग्रहोपग्रहौ बन्द्यामिति निर्दिष्टम्। हलायुधे बन्दी प्रग्रहश्च समानार्थकौ स्तः। हेमचन्द्रस्याभिधानरत्नमालायां ग्रहकप्रग्रहहोपग्रहा बन्दीति पदस्य पर्यायत्वेन सूच्यन्ते। अमुष्यानुशासनानुसारं बन्दिचौरो माचलस्यार्थेऽपि प्रयुज्यते। मङ्खकोषस्य प्रणेतुर्मते बन्देर्मुख्यार्थोऽस्ति पणबन्धः। बन्दी तु पणबन्धः स्यादिति। मर्यादापालनधनादिनिर्वाहणार्थं स्वकपुत्रादिनिवेशनं पणबन्ध इति। पाणिनीयसूत्रस्य तृतीयाध्यायस्य चतुर्थाधिकरणेऽष्टमसूत्रमधिकृत्य काशिकाकारस्य वृत्तिरत्र विषयेऽवलोकयितव्या। शब्दोऽयं सन्धिपदस्यापि पर्यायभूतः। कौटिलीयार्थशास्त्रस्य सप्तमाधिकरणे सूचितानां सन्धिविग्रहासनयानसंश्रयद्वैधिभावानां प्रथमा सन्धिः। एतदनुसारं पणबन्धः सन्धिरित्यभिधीयते।

(३)

बन्दीति पदं बह्वर्थकम्। विभिन्नेष्वर्थेषु कल्पनाविलासप्रवणाः कवयः शब्दममुं प्रयुयुजिरे। कथासरित्सागरानुसारं दस्युपतिं वसुभूतिं प्रति हतपितृका मुषितधना पद्मिष्ठा स्वकामनभिलषितावस्थां ज्ञापयाञ्चक्रे। सा तेन वेश्म नीत्वा बन्दीकृता सती सुभूतिनाम्ने सूनवे प्रदातुं परिकल्पिताऽऽसीत्। अत्र बन्दीकृतेति शब्दप्रयोगः कादम्बर्यां व्यवहृतेन कलत्राणि बन्दीगृहीताः परपोषिता इति प्रयोगेण समः। रघुवंशमहाकाव्यस्य षष्ठसर्गे 'रिपुश्रियां साञ्जनवाष्पसेके बन्दीकृतानामिव पद्धती द्वे' इति श्लोकपङ्क्तावपि बन्दीकृतानामिति पदं भिन्नार्थकं भवितुं नार्हति। कथासरित्सागरे शूद्रकनृपतिप्रसङ्गेऽपि बन्दीकृतारिललनेति सामासिकं पदं खलु लभ्यते। जयिनो बन्दीकृतारिललनाधूतचामरमारुतैः प्रतापज्वलनोऽनिशं जज्वालेति। कुमारसम्भवस्य द्वितीये सर्गे वर्णितस्य तारकासुरस्य वेश्मनि सुरबन्दीनां वाष्पसीकरवर्षिभिः श्वाससाधारणानिलैश्चामरैः संसुप्तासुरसेवनमपि अरातेर्ललनानां दुरवस्थामेव प्रकटयति। अरिललना सुरबन्दी चात्र समानार्थद्योतकपदे। रघुवंशे प्रयुक्तयो रिपुश्रियां बन्दीकृतानामिति पदयोरपि एवम्भूतोऽर्थोऽवगन्तव्यः।

कथासरित्सागरे सङ्गरे बन्दीकृतस्य क्षितिपतेर्निर्देशो वर्त्तते। अत्र कथाप्रसङ्गे बन्दीकृतस्येति पदस्यार्थे विप्रतिपत्तेरनवकाशः। अर्थोऽस्ति हृतस्वातन्त्र्यो रुद्धश्च। राजशेखरस्य बालरामायणानुसारमपहृता वैदेही ध्वान्तबन्दीकृता सुधांशुलेखेव रराज। महावीरचरिताख्ये काव्ये महाकविना भवभूतिना प्रयुक्तं सीताबन्दीग्रह इति पदमपि द्रष्टव्यम्। रावणमधिकृत्य बन्दीकृतामरपतिर्बन्दीकृतमहेन्द्रश्चेति पदे प्रायोजिषाताम्। इमे अस्य पुंल्लिङ्गत्वमपि संसूचयितुमलम्। आचार्यथीमस्य मते कारारुद्ध इत्यर्थोऽत्र समीचीनो न प्रतिभाति। पराहतः पराभूत इत्यर्थस्तु सङ्गतः। वाक्पतिगौडवहे अप्सरोभ्योऽमररमणी, सुरवहू, सुरसुन्दरी, सुन्दरीति पदानि व्यवाहार्षीत्। प्रतिपक्षिणो नृपतेरन्तःपुरस्त्रीरुद्दिश्य पडिवक्खणरिन्दबन्दी, पडिवक्खबन्दी, विवक्खबन्दीति शब्दास्तेन प्रायोजिषत।

आचार्यथीमस्योहनानुसारं विजितस्यार्थे प्रयुक्तं बन्दोकृत इति पदमपहृतस्यार्थे प्रयुक्ताद् बन्दीकृत इति पदाद् विकाशनमाप। कथासरित्सागरस्य युद्धबन्दीकृत इति पदं पराभूतस्य विजितस्य वार्थेऽवगन्तव्यम्। हालस्य कालिदासस्य च कृतिषु लब्धं बन्दीपदं पुँल्लिङ्गस्य दासार्थकस्य पारस्यशब्दस्य स्त्रीलिङ्गरूपं नास्तीति आचार्यथीमः सदार्ढ्यमनुसन्दधे। इदन्तु अनाश्रितं स्वतन्त्रं पदमस्ति। अस्य पुँल्लिङ्गप्रतिरूपं नोपलभ्यते।

नानाटीकाभिर्विश्रुतो मल्लिनाथः बन्दीकृतामिति पदे बन्दीकृतस्य स्त्रीलिङ्गरूपमचिख्यपत्। कुमारसम्भवस्य द्वितीये सर्गे शत्रुभ्यो बन्दीमिव जयश्रियं प्रत्यानेष्यतीत्यत्र जयश्रियं

बन्दीमिव इति शब्दान् व्याचिख्यासुरिन्द्रो बन्दीकृतां श्रियमिव शत्रुभ्यः सकाशाज् जयश्रियं प्रत्याहरिष्यतीति व्याकरोति। भट्टिकाव्येऽष्टमसर्गस्थं बन्दीभिरिति पदं व्याख्यातुं बन्दीकृताभिः स्त्रीभिरिति निरूपयति। तस्मिन्नेव सर्गेऽसौ बन्द्य इति पदं बन्दीकृताः स्त्रिय इति स्पष्टयति। कुमारसम्भवे 'चामरैः सुरबन्दीनां बाष्पशीकरवर्षिभिर्'—इत्यत्र सुरप्रग्रहस्त्रीणामित्यर्थं रघुवंशस्य षष्ठसर्गे 'रिपुश्रियां साञ्जनबाष्पसेके बन्दीकृतानामिव पद्धती द्वे' इत्यत्र बन्दीकृतानां प्रगृहीतानामित्यर्थं कृतवान्। प्रग्रहोपग्रहौ बन्द्यामित्यमरकोषवचनं न विस्मर्त्तव्यम्। तत्रैव दशमे सर्गे 'मोक्ष्यध्वे स्वर्गबन्दीनां वेणीबन्धानदूषितान्' इत्यत्र स्वर्गबन्दीनामिति पदं हृतस्वर्गाङ्गनानामिति पदेन मल्लिनाथसूरिणा व्याख्यातम्।

ननु लोकभाषायान्तु बन्दीति शब्दो बहुधा व्यवह्रियतेऽर्थविपर्यासमविशङ्कमानैः। आचार्यथीमस्य दृष्टौ रुद्धस्यार्थे प्रचलितात् पारस्यदेशीयशब्दाच्छब्दोऽयं लोकभाषायामनुप्राविशत्। इदानीन्तनैष्टीकाकृद्भिः शब्दोऽयमविप्रतिपन्नमनसा प्रयुज्यते स्म। सोमदेवसूरिकृतस्य यशस्तिलकचम्पोष्टीकायां बन्दीगृहं कारागार इति स्पष्टीकृतम्। आङ्ग्लदेशीयेन संस्कृतविदुषा एम० विलियम्सनेनापि बन्दीपाल इति पदं निर्दिष्टम्। कारागारार्थं बन्दीगृहमिति प्रदप्रयोग आचार्यथीमस्य दृष्टौ समञ्जसो नास्ति। प्रयोगस्यास्य अयाथार्थ्यमनायासेनैव दृग्गोचरीभवति। अमरकोषस्य 'प्रग्रहोपग्रहौ बन्द्यां कारा स्याद् बन्धनालय' इति श्लोकपङ्क्तौ काराया विभक्तिस्त्वन्याऽस्तीति न विस्मरेयुः शब्दशास्त्रविचक्षणाः।

महावीरचरितस्य सप्तमाङ्के लङ्कापुर्याः प्रध्वंसमनु श्रीरामस्य भक्तो विभीषणो ज्ञापयति—अजस्रगलदस्रसंप्लवकिणाङ्कगण्डस्थलाः क्ष्मातलविवर्त्तनातिमलिनाम्बरा मोचितानियमैकवेणीभृतः सुरलोकबन्दिस्त्रियः सस्मिताः प्रयान्ति। रघुवंशस्य स्वर्गबन्दी, महावीरचरित एवापरस्मिन् स्थले प्रयुक्तोऽमरपुरीबन्दीति शब्दः विभीषणस्य वचसि बन्दिन्निति समपद्यत। अन्यस्मिन् श्लोके बन्दीति शब्दो कविना व्यवहृतः। कार्त्तस्वराभिर्दृश्याभिः शृङ्खलाभिर्बन्दीभिरेधिताः कारा अलङ्कृता इति। अत्र बन्दीति पदं हृतस्वातन्त्र्यमेव लक्षयति। कुमारसम्भवस्य 'मोक्ष्यते सुरबन्दीनां वेणी वीर्यविभूतिभिर्' इति श्लोकपङ्क्तौ 'चामरैः सुरबन्दीनां वाष्पशीकरवर्षिभिर्' इति पङ्क्तौ च व्यवहृतौ सुरबन्दीति शब्दावपि कालं प्राप्य अश्रुतपूर्वार्थेन सम्भृतावित्याचार्यथीमस्तर्कयाञ्चकार।

अवशिष्टोंऽशः ४१ तमे पृष्ठेऽवलोकनीयः।

आगमिकः पराद्वैतसिद्धान्तः

डॉ० बलजिन्नाथपण्डितः

सर्वेषु तावद्विभिन्नेषु वैदान्तिकेष्वद्वैतवादेषु शाङ्कर एव वादः प्रायशोऽधिकतरं विद्वत्प्रियः। तदनुसारं ब्रह्मैवेकं परमार्थतया सत्तत्त्वम्। सकलमितरज्जीवेश्वरजगदात्मकं विश्वं स्वप्नसङ्कल्पादिवदविद्यावशतो विकल्पात्मके प्रत्यये केवलमवभासमानं सदपि वस्तुतो नास्त्येव। उक्तं च तथा माण्डूक्यकारिकासु—

स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः॥ (मां० का० २–३१)

आचार्यशङ्करेणापि सुस्पष्टमीश्वरस्यापि मायोपाधिवशादवभासमानत्वेनापारमार्थिकत्वमेवोद्घोषितं ब्रह्मसूत्रशाङ्करभाष्ये —

तदेवमात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं, सर्वज्ञत्वं, सर्वशक्तित्वं च; न परमार्थतो विद्ययापास्तसर्वोपाधिस्वरूप आत्मनीशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते। (ब्र. सू. शां. भा. २–१–१४)

जीवेश्वजगदवभासकारणभूतासावविद्या परमार्थतया स्वयमप्यसती तुच्छप्रायाऽनाद्याऽनिर्वाच्या चेति शाङ्करं मतम्। तमिमं शाङ्करमद्वैतवादं नागार्जुनादिबौद्धाचार्योपदिष्ट–शून्यवादकल्पमवकलय्यान्ये रामानुजादिसरणिसारिणो विचारकाः प्रच्छन्नमिव बौद्धवादमवघोषयन्तो विशिष्टाद्वैतादीन् वादान् प्रतिपन्नाः। परं ते वादा नैव प्रस्थानत्रयीं सम्यगनुसरन्तीति न विद्वद्भिस्तथा समादृताः। वल्लभीयो विशुद्धाद्वैतवादी यद्यप्यनुरुध्यत एवोपनिषदमद्वैतवादं, तथापि तत्र ब्रह्मणश्चिदंशस्यानन्दांशस्य च तिरोभावाविर्भावौ तावदङ्गीक्रियमाणौ सन्तौ तस्मिन् परिणामशीलत्वमावहतः। किञ्च ब्रह्मणो गोलोकस्थमाधिदैविकं स्वरूपं तस्य विशुद्धस्याध्यात्मिकस्य स्वरूपस्यापेक्षयोत्कृष्टतरं मन्यमाना विशुद्धाद्वैतिनः स्वर्गवादसमीपमवतीर्यांशतो भेदाभेदवादमाश्रिता इव सिद्ध्यन्ति। ततो नार्हत्यसौ वादः शाङ्कराद्वैतवादस्य तुलनामध्यारोढुमिति भूयसां विदुषां मतिः।

परमसौ शाङ्करोऽद्वैतवादः पूर्वोक्तप्रकारेण ब्रह्मणः परमेश्वरत्वमपि तावदौपाधिकमेव प्रतिपादयन्नैवोपनिषदो गीतादिशास्त्राणां चोपदेशाननुरुध्यते सम्यक्। यावद् ब्रह्मणः स्वा-

भाविकं परमेश्वरत्वं नाङ्गीक्रियते तावदस्य बन्धमोक्षादेः, कर्मफलभोगादेः, सृष्टि-स्थिति-प्रसर-संहारादेश्च विश्वव्यवहारस्योपपत्तिः कथमपि कर्तुं न शक्येत। अनुपपन्नेऽस्मिन् वन्ध्या-सुतादिकल्पे व्यवहारे वेदान्तानामपि श्रवणमननादीनि व्यावहारिकाण्येव सन्ति नितरामनु-पपन्नान्येवापद्येरन्। ईश्वरत्वस्यौपाधिकत्वे निगमागमादिसिद्धि आस्तिकतावादोऽप्युपहन्येत।

तदेतच्छङ्काजालं सुतरां शमयितुं वास्तविकं चाद्वैतं निरवद्यतया निर्णेतुमभेदप्रधान-शैवागमनिष्ठाः केचन सिद्धाः पराद्वैतसिद्धान्तं प्रतिपादितवन्तः। तेषु सिद्धेषु प्रमुखास्तावत् पञ्च वसुगुप्त-कल्लट-सोमानन्दोत्पलदेवाभिनवगुप्ताख्याः। यथोत्तरं मुनीनां प्रामाण्यमिति-न्यायेन तेषु सिद्धेषु प्रधानतमस्तावदभिनवगुप्ताचार्य एव। तत्सिद्धान्तानुसारमिदं सर्वं जगत् सृष्टेः प्रागपि परमेश्वरे सततं विद्यमानमेव। परमेश्वरस्तावच्छुद्धचिन्मात्रस्वरूपः। जगतस्त-दन्तर्विद्यमानतायामङ्गीक्रियमाणायां न तस्मिन् कापि स्वगतभेदादिदोषापत्तिः शङ्कनीया। सर्वं हि तत्र चिन्मात्रतयैव वर्तमानं चिन्मात्रमेवेत्यद्वैतमेव सर्वथा। यथा बीजस्यान्तरङ्कु-रोत्पादनशक्तिरूपतया विद्यमानोऽङ्कुरो बीजात्मैव, न च मनागपि भेदभावमाश्रितस्तथा विश्वं परमेश्वरे विद्यमानं चिन्मात्रमेव सर्वथा। पारमेश्वरी त्वसौ चित् स्वस्वभावतयैवानन्द-मयी। ततः परमेश्वरश्चिदानन्दघनः। तस्यानन्दस्यानन्दत्वमनवच्छिन्नचमत्कारात्मकत्वम्। चमत्कारस्य य उद्रेकः स तस्येच्छाशक्तिः। तस्यां सर्वमपि स्रष्टव्यमिष्यमाणतया विद्यमान-मेव। परं नासौ पारमेश्वरीच्छा जीवभावोचिताऽपूर्णम्मन्यताप्राणा भिन्नविषयोन्मुखी, अपि तु स्वस्वभावाभिव्यक्त्युन्मुखतात्मिका "एकोऽहं बहु स्यां प्रजायेय" इत्याद्युपनिषच्छास्त्रोपदेश-सिद्धा परमेश्वरस्य स्वभावभूता परमेश्वरता। सैव च परब्रह्मणः परब्रह्मत्वप्रयोजिका तस्य प्राणप्रतिष्ठाकल्पा विशेषता। तां विना ब्रह्मणः शून्यप्रायत्वं जाड्यं च प्रसज्येत। तदुक्तं तन्त्रा-लोकेऽभिनवगुप्तपादैः—

अस्थास्यदेकरूपेण वपुषा चेन्महेश्वरः।
महेश्वरत्वं संवित्त्वं तदत्यक्ष्यद् घटादिवत्॥ इति। (सं० आ० ३–१००)

असाविच्छात्मिका पारमेश्वरी शक्तिः परमेश्वरादभिन्ना। शिष्यावबोधसिद्धय एव परमेश्व-रस्तस्य पारमेश्वरी शक्तिश्चेति द्वयं कल्पितं गुरुभिः। परमेश्वरः सततं विश्वोत्तीर्णतया शुद्धचिन्मात्रतया विद्यमानः सञ्छिव इति वा कथ्यते। स एव च विश्वात्मकतयावभासमानः संस्तदपेक्षया शक्तिरिति चाभिधीयते। अतएवोपदिष्टं सर्वमङ्गलागमे—

शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमिष्यते।

शक्तयोऽस्य जगत् सर्वं शक्तिमांस्तु महेश्वरः॥

प्रतिपादितं च शक्तिशक्तिमतोरभिन्नत्वं विस्तरतः श्रीसोमानन्दपादैः शिवदृष्टौ । तद्यथा—

न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी ।
शिवः शक्तस्तथा भावान्निच्छया कर्तुमीदृशान् ॥
शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते ॥ (शि० दृ० ३–२,३)

तथा—

न हिमस्य पृथक् शैत्यं नाग्नेरौष्ण्यं पृथग् भवेत् । (तदेव ३–७)

तस्य विश्वसिसृक्षास्वरूपायामिच्छाशक्तौ सर्वमपि षट्त्रिंशत्तत्त्वस्वरूपं विश्वं स्वात्मतयावभासमानं विद्यते सदा । यदा सैव पारमेश्वरी विलसनशक्तिः स्वात्मनि बहिर्मुखतां विमृशति तदा तस्यां स्वात्मतयाऽहंरूपतया विद्यमानमेव विश्वं विश्वात्मकतया बहिरिदंरूपतया भिन्नतयावभासितुं प्रारभते । इत्थं स्वस्माद् भेदात्मकतया विश्वस्य भासनैव तस्य सृष्टिः । ब्रह्मैवेत्थं स्वेनैव स्वभावेन स्वेच्छया विश्वरूपतया स्वयमेव बृंहितमवभासते । एतद्बृंहणस्वभावत्वमेव तस्य ब्रह्मत्वम् । उक्तं चैतदाचार्याभिनवगुप्तपादैः परात्रिंशिकाविवरणे—

“अन्तर्गतविश्ववीर्य-समुच्छलत्तात्मक-विसर्ग-विश्लेषा नंदशक्त्येकघनं ब्रह्म बृहद् व्यापकं बृंहितं च । न तु वेदान्तपाठकाङ्गीकृत-केवलशून्यवादाविदूरवर्ति-ब्रह्मदर्शन इवेति” (प० त्रिं० वि० पृ० २२१)

अत्र विषये शुष्कतर्कक्लिष्टबुद्धयो बाला ब्रह्मणो जगद्रूपतयावभासमानतायां तस्य विकारित्वमाशङ्कन्ते । परं निराकृतं तदागमशास्त्रशरणैः स्वानुभूतिघनैः सिद्धपदवीसुप्रतिष्ठितैराचार्यवर्य्यैः प्रतिबिम्बवादाश्रयणेन—

यथा हि निर्मलो दर्पणः प्रतिबिम्बात्मकरक्तनीलादिबहुतरवर्णवैचित्र्य-सम्भेदेनावभासमानोऽपि न स्वस्वरूपे कमपि परिणामं विकारं वाधिगच्छति; प्रत्युत स्पष्टप्रतिबिम्बग्राहकतया स्वस्य नैर्मल्यं दर्पणत्वं च नितरामभिव्यनक्ति, एवमेव परमेश्वरः सृष्टयादिकृत्यवैचित्र्यं स्वस्मिन् प्रतिबिम्बकल्पतयाऽवभासयन्नपि शुद्धात् स्वस्मात् स्वरूपभूताच्चिदात्मकत्वान्मनागपि नैव च्यवते । प्रत्युतासौ स्वस्य पूर्णं नैर्मल्यमेव परमेश्वरत्वमेव च सुतरामेवं व्यनक्ति सुस्पष्टम् ।

अत्र दर्पणन्यायेऽप्युदेत्येका शङ्का— दर्पणस्तावत् प्रतिबिम्बावभासनकृत्ये स्वस्मादन्यन्नीलपीतादिवस्तुजातं बिम्बभूतमवश्यमपेक्षते । अद्वैतस्वरूपस्य परब्रह्मणः पुनः किमत्र बिम्बस्थानीयं स्यादिति । अत्रोच्यते—दर्पणो जडः सन्नशक्तः परिमितश्च । ततोऽसावन्यदपेक्षते, न च स्वत एव प्रभवति प्रतिबिम्बावभासने । परमेश्वरस्तु स्वतन्त्रः । ततः स्वेच्छयैव

स्वशक्तीनामेव प्रतिविम्बजातं स्वस्मिन्नेव चित्प्रकाशेऽवभासयन् विजयते। शक्तिश्च तस्य स्वरूपभूता सती यद्यपि वस्तुत एकैव, तथापि बहुविधकार्यजननापेक्षया बहुधा विकल्प्यते। ततस्तासां भिन्नभिन्नतया विकल्प्यमानानां पारमेश्वरीणां शक्तीनां विविधाकारं यत् प्रतिबिम्बजातं तदेव शिवादिधरण्यन्त-तत्त्वषट्त्रिंशकतयावभासमानं विश्वम्। ततः परमेश्वरात्मकशक्तिरूपतया विश्वमपि परमेश्वरात्मकमेवेत्येक एव परमेश्वरः सर्वत्र प्रकाशते सर्वाकारतया स्वस्वातन्त्र्यमहिम्नेति सर्वं भिन्नभिन्नाकारतयावभासमानमप्येकमेव तत्त्वं परमेश्वराख्यं वस्तुतः। तदेतत् सर्वत्र जडचेतनादौ शुद्धाशुद्धभूमिकादौ च विजृम्भमाणमेकत्वमेव पराद्वैतम्। यस्मिन्नद्वैते स्वयं प्रकाशमाने सति यन्महिम्नैव सर्वमप्यापेक्षिकं द्वैतमद्वैतं चावभासते तदेव पराद्वैतम्। तस्य निरूपणं कुर्वद्भिराचार्याभिनवगुप्तपादैरुक्तं मालिनीविजयवार्तिके—

इदं द्वैतमिदं नेति तदिदं च द्वयाद्वयम्।
इति यत्र समं भाति तदद्वयमुदाहृतम्॥ (मा० वि० वा० १–६२६)

श्लोकस्य चतुर्थपादे स्थितमद्वयपदं सुस्पष्टीकर्तुमग्रे स्पष्टमुक्तम्—

सर्वानुग्राहकं पक्षमालिलम्बिषसे यदि।
परमाद्वयदृष्टिं तत् संश्रयेः शरणं महत्॥ (तदेव १–६३१)

अस्त्ययं न्यायः प्रतिविम्बावभासस्य—यद्बिम्बे वामं तत् प्रतिबिम्बे दक्षिणं भाति, यच्च प्राङ्मुखं तत् प्रत्यङ्मुखं दृश्यते। इत्येवमादि बहुतरं विपरीतमवभासते प्रतिबिम्बे बिम्बापेक्षया। एतद्वैपरीत्यावभासत्वमेव प्रतिबिम्बस्य प्रतीपत्वं प्रतीतिनिपातद्योत्यम्। परमेश्वरस्य याः शक्तयस्ता अभेदरूपतयाऽहमिति स्वात्मविमर्शोचितेन रूपेण तस्य भान्ति। परं ता एव प्रतिबिम्बिताः सत्यस्तत्तत्तत्त्वाकारतया बहिराभासमानाश्च सत्यः प्रतीपतया द्योतमाना इदमितिभेदात्मकेन विमर्शेन विभ्रष्टव्यतामुपगच्छन्ति। तदित्थं परे ब्रह्मण्येव तच्छक्त्यैव तदिच्छानुसारमेव दर्पणनगरन्यायेनावभासमानमपीदं विश्वं नैव कथमपि परब्रह्मणो विकारित्वकलङ्कपङ्काङ्कनक्षमं न चापि कथञ्चिदपि स्वगतभेदादिशङ्कातङ्करं मन्तव्यं सुधीभिः। तदत्र सृष्टौ स्थितौ वा यद्यद् भाति, तत्तत् सर्वथा साक्षाद् ब्रह्मैव। नात्र काचन भागत्यागादिकल्पना कथमपि कर्तुमुचिता। समुन्मीलितसत्यज्ञानविज्ञानदृष्टयो हि सिद्धजनाः सर्वं परब्रह्मतयैव साक्षात् पश्यन्ति। तत एव स्तुतमाचार्योत्पलदेवमहोदयैः—

भवदावेशतः पश्यन् भावं भावं भवन्मयम्।
विचरेयं निराकांक्षः प्रहर्षपरिपूरितः॥ (शि० स्तो० ६–५) इति

अन्तर्भक्तिचमत्कारचर्वणामीलितेक्षणः।
नमो मह्यं शिवायेति पूजयन् स्यां तृणान्यपि॥ (तदेव ५–१५) इति च

आचार्याभिनवगुप्तपादैरपि स्पष्टं प्रतिपादितमिदं साक्षात् पराद्वैतं मालिनीविजय-वार्तिके—

अज्ञातपर्यायपदस्थितीन् प्रति
प्रयुज्यते पादप एष भूरुहः।
कुम्भो घटश्चेति तथैवमुच्यते
महेश्वरः सर्वमिदं जगत्त्विति ॥ इति। (मा० वि० वा० १–१२६)

तन्त्रालोकेऽपि च—

इदं द्वैतमयं भेद इदमद्वैतमित्यपि।
प्रकाशवपुरेवायं भासते परमेश्वरः॥

अस्यां भूमौ सुखं दुःखं बन्धो मोक्षश्चितिर्जडः।
घटकुम्भवदेकार्थाः शब्दास्तेऽप्येकमेव च॥

इति (तं० आ० १३–१८, १६)

अस्यां भूमौ = पराद्वैतदशायामिति; तेऽप्येकमेव = ते शब्दा अप्येकं परमेश्वरं तत्त्वमेवेति चार्थः।

स एव पराद्वैतसिद्धान्त एवोपनिषत्सारभूतो निर्णयः। एष एव सिद्धान्तः पुरुष-सूक्त-वागम्भृणीयसूक्तोपबृंहितः, गीतादिशास्त्रेषु प्राप्तपरिपोषः पारमेश्वरेष्वागमेषु सुप्रति-पादितः, सैद्धेषु दर्शनग्रन्थेषु सुस्पष्टतामुपयातः, मुख्यतमो निगमागमदर्शनसिद्धान्तः। तदयमेव पारमार्थिकोऽद्वैतसिद्धान्तः। परमत्र सिद्धान्ते पारमेश्वरानुग्रहपवित्रीकृताः केचन विरलविरला एव महानुभावाः सम्यग् रज्यन्तः कृतकृत्यतां लभन्ते। इतरे पुनः शङ्कातङ्क-कलङ्क-सङ्कुलतामेवोपयान्त इतस्ततस्तर्कगहनाटवीषु च परिभ्रमन्तः क्लिश्यन्ते केवलम्। शिवा-नुग्रहदरिद्रतयैवाद्यतने युगेऽयं सिद्धान्तः सर्वोत्कृष्टः सन्नपि न तथा बाहुल्येन शास्त्रचिन्तकप्रियो यथा शङ्कररामानुजादीनां वादाः। पारमेश्वरी लीलैवात्र मूलकारणम्। तत एवोक्तमेतद्विषयेऽभिनवगुप्तपादैः —

केतकीकुसुमसौरभे भृशं भृङ्ग एव रसिको न मक्षिका।
भैरवीय - परमाद्वयार्चने कोऽपि रज्यति महेशचोदितः॥ इति

(मा० वि० वा० २–१५१)

आचार्यगौडपादशङ्करादिभिरपि स्वीकृतप्रायोऽयं पराद्वैतसिद्धान्तः सुभगोदय-सौन्दर्य-लहरी-प्रपञ्चसारादौ। निर्दिष्टश्चायं शिवेन दक्षिणामूर्तिना स्वे स्तोत्रे, व्याख्यातश्च तट्टी-

कायामाचार्यशङ्करेण। यत् पुनस्तैराचार्यैर्माण्डूक्यकारिका-ब्रह्मसूत्रभाष्यादौ परब्रह्मण ईश्वरत्वमप्यविद्यात्मकोपाधिवशेनावभासमानतयाऽपारमार्थिकमिति प्रतिपादितं, तदापेक्षिकेश्वरविषयं, विश्वोत्तीर्णस्य परिपूर्णस्यानपेक्षिकस्यानुत्तरस्यैव पारमेश्वरस्वरूपस्य वस्तुतः पारमार्थिकसत्यत्वं प्रतिपादयितुम्, आपेक्षिकस्येशितव्याद्यपेक्षस्य निखिलस्यापि तत्त्वेश्वरभुवनेश्वरादिव्रातस्य तदपेक्षयाऽपारमार्थिकत्वं प्रकटयितुं, तर्ककर्कशगिरां बौद्धतार्किकाणामाक्षेपांश्च सम्यक् प्रशमयितुं तथोक्तं मन्तव्यं सुधीभिः। ततो गौडपादशङ्करादीनामपि गुरूणां पराद्वैतसिद्धान्त एव वस्तुतोऽभीष्ट इति विदाङ्कुर्वन्तु तावदनुभूतिधनाः सहृदयाः सुधियः। यच्च किमपि तेषामाचार्याणां स्ववचनविरोधावहमिव बौद्धाभिमतशून्यवादप्रवणत्वमिव वाऽऽपाततो भाति, तत्तेषां प्रतिपादनकलायां शब्दप्रयोगचातुर्ये च मनागप्रौढतामात्रं व्यञ्जयन्नावधेयं, न चापि तन्मात्रमादाय तर्ककर्कशकषाप्रयोगैः स्वात्मा परश्च वृथा खेदनीयो महानुभावैः सहृदयैर्विद्वद्भिरिति शिवम्।

द्वैतमापेक्षिकं नूनमद्वैतं च तथाविधम्।
पराद्वैतं विजयते भित्तिभूतं द्वयोरपि॥

शिवनाथस्य प्रीत्यर्थं विदुषां चापि तुष्टये।
बलजिन्नाथरचितो निबन्धः कल्पतामयम्॥

'वेणीसंहार'नाटकस्य नायकत्वविवेकः

डॉ॰ चन्द्रमौलिद्विवेदः

यदेतद्वाङ्मयं विश्वमर्थमूर्त्या विवर्तते।
सोऽस्मि काव्यपुमानम्ब! पादौ वन्देय तावकौ॥

सर्वसहृदयहृदयान्तःकरणकर्षणपटु वेणीसंहारनाटकं कविशिरोमणिना श्रीभट्टनारायणेन निर्मितमिति विदितचरमेवास्ते सर्वेषाम्। विश्रुतेऽपि परमरमणीयार्थप्रतिपादकशब्दसहेऽस्मिन् नाटकेऽधुनापि न जहाति प्रश्नोऽयं सहृदयान् यत् कोऽस्य प्रधाननायकः? साहित्यजगति सार्धसहस्रवर्षपूर्वमेवेदं नाटकं प्रादुर्भूतम्, ततः प्रभृत्यद्यावधि नैके विचारकाः स्वस्वलेखनी-मत्र प्रायुङ्क्तेति नास्त्यविदितं विद्वत्सु।

मनीषिभिर्बहुधा विचारितेऽप्यस्मिन् विषये मदीया व्यापृतिः केवलं पिष्टपेषणायैव सुतरां सिद्धा तथापि "भिन्नरुचिर्हि लोकः" इत्युक्त्या शास्त्रीयपरम्परामनुरुन्धानोऽयं जनो यत्किमपि वक्ष्यति तन्न भवति नवीनमिति न।

"रूपकं तत्समारोपाद् दशधैव रसाश्रयम्" इति दशरूपककारोक्त्या प्रथममिदं विचारसहं यन्नाटकप्रकरणभाणप्रहसनादिषु रूपकभेदेषु कतमं भेदमलं दधाति प्रस्तुतो वेणीसंहारः, यतोहि नायकादेर्निर्धारितत्वे रूपकभेदस्य निर्धारणमावश्यकम्, निर्धारिते च रूपकभेदे तत्तन्नायकरसवस्तुनो विवेचनं सुतरां सरलायत इति। ग्रन्थनाम्नैव नाटकमिद-मिति, नाविर्भवति तत्र मनागपि सन्देहलेशस्तथापि नाम्नैव नाटकं वा मान्याचार्यैः कृतं नाटकस्य सम्यग्लक्षणमपि सहत इति प्रश्न उदैति। यद्यपि कवेरिदमेवाभिप्रेतं यद् ग्रन्थोऽयं नाटकं स्यात् किन्तु पश्चाद्वर्तिन आधुनिका आलोचका नायकादिविवेचने सूक्ष्मातिसूक्ष्मां स्वकीयां प्रतिभां विनिवेशयन्तो विरुद्धनायकादिनिर्देशेन नाटकत्वमप्यस्य निवारयन्तीति अरुन्तुदं कष्टमेवात्र मां व्यापारयति। कवेरभिप्सिते नाटके लक्षितं नाटकलक्षणं सम्यक् स्थास्यति वा नेत्युपस्थाप्यते पूर्वं धनञ्जयेनोल्लिखितं नाटकस्य लक्षणम् यन्निकष-मादाय सर्वो नायकादिः सुस्थो भविष्यति। तद्यथा—

अभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान्।
कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः॥

प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकः ।
तत्प्रख्यातं विधातव्यं वृत्तमत्राधिकारिकम् ॥
पताकावृत्तमप्यूनमेकाद्यैरनुसंधिभिः ।
अङ्गान्यत्र यथालाभमसन्धिं प्रकरीं न्यसेत् ॥
एको रसोऽङ्गी कर्तव्यो वीरः श्रृंगार एव वा ।
अङ्गमन्ये रसा सर्वे कुर्यान्निर्वहणेऽद्भुतम् ॥
एकाहाचरितैकार्थमित्थमासन्ननायकम् ।
पात्रैस्त्रिचतुरैरङ्कं तेषामन्तेऽस्य निर्गमः ॥
पताकास्थानकान्यत्र विन्दुरन्ते च बीजवत् ।
पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परम् ॥ इति

"वस्तु नेता रसस्तेषां भेदकः" इत्युक्त्या निर्दिष्टनाटकलक्षणानुकूलो नायकवस्तुरसश्चेत्तदानीं नाटकम्, भिन्नश्चेत् प्रकरणादिः । तत्र नाटकीयरसविषये वीरश्रृंगारयोरेकतरस्यैव ग्रहणात्, नायकत्वेन भीमं मन्वानैरमन्वानैः सर्वैरपि विचारकैर्वीररस एवात्र स्वीक्रियते, न तु रौद्रादिरिति विदितमेव ।

वस्तु च महाभारतसम्बन्धित्वात् प्रख्यातमेव । केवलं नायकमेवादायात्र विवादो बहुधा प्रवर्तमानो दृश्यते । तत्र कृष्णार्जुनदुर्योधनभीमयुधिष्ठिरादिषु सत्सु बहुषु पात्रेषु केचन दुर्योधनं केचन भीमं केचन युधिष्ठिरं च नायकं मन्वते उपपादयन्ति च नैकविधा वाचोयुक्तीः । तत्रैतेषां त्रयाणामपि नायकत्वेनैवोपलब्धिरिति शास्त्रानुकूलम्, किन्तु सर्वेषामेव प्रधाननायकत्वं विसंवादि । निर्धारितश्च लक्षणग्रन्थे प्रधानपताकाप्रतिपक्षित्वेन नायकस्त्रिविधिः । तत्र चेत् कश्चन पताकानायकः कश्चन प्रतिपक्षिनायकः कश्चन प्रधाननायकस्तदानीं नास्ति तेषां नायकत्वे विरोधः, किन्तु प्रधानत्वेनैव ग्रहणे दोषः सुतरां स्फुट एव ।

तत्र दुर्योधन एतेषु कतमं भेदमलंकुर्यादिति विचार्यमाणे पताकानायकत्वं नायं कथमपि सोढुं शक्नुयात् यतो हि (तत्पक्षीयस्य) तत्पक्षपातिनः कस्यापि पात्रस्य प्रधान्येन नास्ति निर्देशो यस्य साहाय्यमयं विदध्यादिति सुस्पष्टम् ।

प्रधानप्रतिपक्षयोरेकतरस्मिन् तस्य निवेश्यत्वाद् ये केचन प्रधाननायकत्वमामनन्ति तेषां शास्त्रेण सह विसंवादस्तथा तैर्नोपस्थाप्यन्त एव दृढा युक्तयः । वस्तुतः सामान्यतयोक्तै रूढवंशत्वादिगुणैर्युक्तोऽपि "लुब्धो धीरोद्धतः स्तब्धः पापकृद् व्यसनी रिपुः" इति लक्षणानुसारेण लुब्धत्वादिविशेषगुणयुक्तत्वात्तस्य प्रतिपक्षनायकत्वं तदपेक्षया स्पष्टतरम् । न चायं प्रधानस्तस्य वध्यत्वेन "नाधिकारिवधः क्वापि" इति लक्षणविरोधस्योपस्थानात् । तस्य

राज्यं प्रति लोभः सर्वयोद्धृजनसंहारेऽपि विजयाकाङ्क्षेति स्तब्धत्वम्, द्रौपद्यास्तथाविधवस्त्रकेशाकर्षणप्रवर्तकत्वेन पापकृत्त्वम्, समुपस्थितायामपि महाभीतौ द्वितीयेऽङ्के स्वपत्न्यां भानुमत्यां तादृग्विलासित्वेन व्यसनम्, शान्तिमिच्छत्सु पाण्डवेषु द्वेषाधानेन रिपुत्वमेतत्सर्वं साधयति तस्य प्रतिपक्षित्वमेव।

सिद्धे च प्रतिपक्षनायके दुर्योधने भीमयुधिष्ठिरयोः कः प्रधाननायक इति प्रश्नः समुदेति। तत्र ये भीमं प्रधाननायकं स्वीकुर्वन्ति तेषाममी प्राधान्येन विकल्पाः —

१. वेणीसंहारे भीमस्यैव सर्वकार्यभरसहिष्णुत्वात्, तस्यैव प्रत्यङ्कमुपस्थानात्।
२. द्रौपद्या वारं-वारं तस्यैवार्यपुत्रनाम्ना निर्देशात्।
३. भीमसेनेनैव द्रौपदीवेण्याः संहृतत्वाद् वेणीसंहारनाटकनामनिर्देशात्।
४. ओजो बाहुल्यस्यावश्यकतया वीररसप्रधाने नाटके भीमसेनस्यैवौजोबाहुल्याच्च, भीमसेन एवात्र प्रधाननायक इति।

यदुच्यते वेणीसंहारे भीमसेनस्यैव सर्वकार्यभरसहिष्णुत्वम्, तदेतन्मात्रेणैव न तस्य नायकत्वं सेत्स्यति, यतो हि मुद्राराक्षसे चाणक्यस्यैव सर्वकार्यनिष्पादकत्वाद् रत्नावल्यां यौगन्धरायणस्यैव "स्वप्नवासवदत्तमि"ति नाटके उदयनस्याकिञ्चित्करत्वात्कथं च तत्र-तत्र न चाणक्यादीनां नायकत्वं मन्यते कथञ्च चन्द्रगुप्तोदयनादिर्नायकत्वेन स्वीक्रियते, मन्यतां च तत्रापि तेषां तेषां मन्त्रिणामेव नायकत्वम्। न चात्र भीमसेनो मन्त्री येन तस्य सर्वकार्यकारित्वेनापि अनायकत्वं मन्येतेति चेन्न मन्त्रित्वेन निराकृतत्वेऽपि पताकानायकत्वेन स्वीकरणाददोष एव। एवञ्च प्रत्यङ्कमुपस्थितिमात्रेणापि न तन्नायकत्वम्। नास्ति च तस्य प्रत्यङ्कमुपस्थितिरपि तृतीयचतुर्थाङ्कयोस्तददर्शनात्।

द्रौपद्या आर्यपुत्रनाम्नो निर्देशमात्रेणैव तस्य नायकत्वसाधनमलक्षणम्। पञ्चभर्तृकायास्तस्याः पञ्चापि भर्तॄन् प्रति आर्यपुत्रोक्तिर्न निवार्यते।

केवलं वेणीसंहारनाम्ना भीमसेनो नायक इत्यपि न सुवचः। गर्भितार्थप्रकाशनमात्रप्रयोजनकं नाटकानां नाम ग्रन्थादिमध्यान्तवस्तुवृत्तमादाय क्रियमाणं न नायकं निर्णेतुं क्षमं यथा मृच्छकटिकादिः। नहि एतन्नाम्ना निर्धारयितुं शक्यते यच्चारुदत्तस्तस्य नायकः।

न च तस्य नाटकस्य प्रधानं कार्यं वेणीसंहारोऽत एव वेणीसंहाररूपस्य फलस्य निष्पादकत्वेन तत्कृते पूर्वं कृतप्रतिज्ञो भीमसेनो नायकः सुवच इत्येतदपि विचारसहम्। फलमात्रनिष्पादकस्य नायकत्वमसिद्धमिति पूर्वमेवोपदर्शितम्। न च वेणीसंहाररूपफलस्योपभोक्ता भीमः द्रौपद्या वेणीसंहारफलाश्रयत्वात्। भवतु वा तत्कृते कृतप्रतिज्ञस्य भीमसेनस्यापि तत्फलाश्रयत्वं कथञ्चित्तथापि न वेणीसंहार एव प्रधानोऽधिकारः। अन्यथा "तन्निवृत्तमभिव्यापि" इत्युक्त्वा

तदभिव्यापि एव वस्तुवृत्तं निबन्धनीयम् । अर्थात् तावत्कालमेव नाटकं मञ्चे प्रचलेद् यावन्न द्रौपद्या वेणीसंहारो जाते न्न वेणीसंहारे तत्कालमेव दृश्यावरोधोऽपेक्षितः, किन्तु युधिष्ठिरस्य राज्याभिषेकपर्यन्तं नेनीयमानमितिवृत्तं वेणीसंहारस्य प्रधानकार्यत्वं न निर्वाहयति ।

वीररसप्रधानेऽस्मिन्नाटके निबद्धस्यौजोबाहुल्यमपेक्ष्यते तत्तु भीमसेन एव इत्यप्यपरीक्षितं वचः, तत्रैव तदनुजेऽर्जुने प्रतिपक्षिषु कर्णादिषु चौजोबाहुल्यस्योपनिबन्धनात् । प्रतिपक्षिणां कर्णाश्वथाम्नां पराजितस्यौजसो मर्षणीयत्वेऽपि अर्जुनस्यापराजितमोजोबाहुल्यं तस्यैव नायकत्वं साधयिष्यति । अपरञ्च ओजोबाहुल्यं न वीररसस्य गुणोऽपि तु समाच्छन्नौज एव । उक्तं च मम्मटेन—

दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थिति ।
बीभत्सरौद्ररसयोरतस्याधिक्यं क्रमेण तु ॥ इति

"चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य....." "केनारमत्सिंहनादप्रतिरसितसखो दुन्दुभिरताडितोऽयम्" इत्याद्युक्तिभिर्व्यज्यमानमोजोबाहुल्यं रौद्ररसानुगुण्यं वीररसाननुगुण्यमेव भजते ।

नाटके धीरोदात्तो नायकः सर्वमान्यः । विकत्थनचलचण्डत्वादिगुणोपेतस्य भीमसेनस्य धीरोद्धततायां निर्बाधायां डिमव्यायोगादिरूपकभेदानुकूलोऽयं न नाटकानुकूलतामावहति । चेन्नाटकमिदम्, तदानीं न कथमपि धीरोद्धतो भीमो नायकः शास्त्रविरोधात् । तस्य धीरोद्धतत्वस्य स्वीकारे न कस्यचिद् विमतिः । उक्तं च आचार्यविश्वनाथेन धीरोद्धतनायकस्य लक्षणमुपस्थाप्योदाहरणत्वेन यथा भीमसेनादिरिति । धन्या च तेषां वाक्चातुरी येऽत्रामनन्ति रसं वीरं नायकञ्च धीरोद्धतं भीमसेनम् ।

भीमसेनोऽपि नायकत्वेन स्वीक्रियेत चेत्तदानीं न प्रधानत्वेनापि तु पताकानायकत्वेनैव । सानुबन्धत्वेन भीमवृत्तान्तस्य पताकाख्यमितिवृत्तं, पताकानायकस्य फलान्तरराहित्यञ्च सर्वथा तस्य पताकानायकत्वं साधयतः । विमर्शे सन्धौ पताकानायकस्य निर्वाहोपस्थापनात् सर्वं च पताकानायकलक्षणं तस्यैव घटते । उक्तं च साहित्यदर्पणे—

पताकानायकस्य स्यान्न स्वकीयं फलान्तरम् ।
गर्भे सन्धौ विमर्शे वा निर्वाहस्तस्य जायते ॥

यथा महावीरचरिते सुग्रीवादेर्वेणीसंहारे भीमसेनादेरिति । एवञ्चाप्ताचार्यैः साहित्यदर्पणकारादिभिः स्वीकृतमपि भीमसेनादेः पताकानायकत्वमपलपतामाधुनिकानामालोचकानामसति बद्धमुष्टित्वमवश्यमेव सर्वथा नवीनमिति तेषां वदतोव्याघातः ।

अनेन प्रकारेण विवादास्पदेषु त्रिषु नायकेषु दुर्योधनभीमसेनयोः प्रधानतया निराकृतत्वाद् वशिष्टस्य युधिष्ठिरस्य प्रधाननाकत्वं मन्तुं समुचितम्, नाटकस्य प्रधाननायको-

पेतत्वात् न च प्रधाननायकं विना नाटकं कुत्राप्यवलोक्यते, तस्माद् युधिष्ठिर एवात्रप्रधान-नायकः। नाटकानुकूलनायकस्याभिगम्यादिधीरोदात्तत्वादिगुणोपेतं युधिष्ठिरं नायकत्वेन साधयितुं नैकं प्रमाणमुपतिष्ठते। तत्र किमपि प्रमाणं स्वयमेव कविनोपस्थापितमन्तःसाक्ष्यनाम्ना व्यवह्रियते, किमपि च बाह्यालोचकैरुपस्थापितं बाह्यसाक्ष्यनाम्नेति। तत्रान्तःसाक्ष्यम् यथा—

चत्वारो वयमृत्विजः स भगवान् कर्मोपदेष्टा हरिः
सङ्ग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता।
कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं
राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः॥

इत्यत्र चतुर्णां भीमादीनामृत्विक्त्वेनोपादानाद् युधिष्ठिरस्याध्वरदीक्षितत्वेन ग्रहात् कोऽस्त्यत्र प्रधानमिति स्वयमेव निर्णेष्यन्ति मनीषिणः।

प्राक्तनाचार्योपस्थापितं बहुसंख्यकं बाह्यसाक्ष्यमपि युधिष्ठिरमेव द्रढयति। दशरूपकता-ब्दीमलंकुर्वतोर्धनिकधनञ्जययोरनुसारेणापि वेणीसंहारस्य प्रधाननायको युधिष्ठिर एव स्वीकृतो दृश्यते यतो हि नैकस्थलानि वेणीसंहारस्योदाहरणत्वेनागृहीतानीति लक्षणानुकूलसर्वाङ्गं वेणीसंहारं लक्षयद्भ्यां ताभ्यामाचार्याभ्यां कथमपि लक्षणविरुद्धो नायको न स्वीकर्तुं शक्यते अत एव वारं वारं धीरोदात्तत्वेन युधिष्ठिर उदाहृतः। साहित्यदर्पणेऽपि—

"नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।
सुखदुःखसमुद्भूतिनानारसनिरन्तरम्॥"

इत्युक्त्वा तद्वृत्तौ "दुःखसुखसमुद्भूतत्वं रामयुधिष्ठिरादिवृत्तान्तेष्वभिव्यक्तम्" इत्युक्तम्। तथा च धीरोदात्तनायकस्य लक्षणोपस्थापनानन्तरमुदाहरणत्वेन "यथा रामयुधिष्ठिरादिरिति" निबद्धम्।

अर्थप्रकृतेर्बीजस्योदाहरणमुपस्थापयद्भ्यां दशरूपकसाहित्यदर्पणकाराभ्यां यद् दृढं प्रमाणमुपस्थापितं तेन समस्तः संशयः स्वयमेव गलति। यथा—

वेणीसंहारे द्रौपदीकेशसंयमनहेतुर्भीमक्रोधोपचितयुधिष्ठिरोत्साहो बीजम्।

वीरस्योत्साह एव स्थायी। नहि युधिष्ठिरसम्बन्धी उत्साहो वीररसं निष्पादयन् भीमं तन्नायकं निष्पादयिष्यति। भीमस्य क्रोधो वीररसस्य व्यभिचारी रौद्रस्यैव स्थायी आचार्यैः स्वीकृतः। तर्हि वीररसप्रधानेऽस्मिन् युधिष्ठिरोत्साहापेक्षया भीमक्रोधस्य गौणत्वात् भीमस्यापि गौणत्वं स्वतःसिद्धम्। कथं स प्रधानमिति व्यवहर्तुं शक्यते। यतो हि सम्पूर्णे नाटके भीम-स्योत्साहापेक्षया तत्क्रोधस्यैव प्राधान्येन दृष्टत्वात् क्रोधमूलस्य विकत्थनादेः सर्वत्रोपलम्भात् कथङ्कारं नायकत्वेन भीमं स्वीकृत्य प्रधानत्वेनाहो वीररसस्थायी मन्तुं शक्येत। न च

क्रोधस्य प्राधान्येऽपि उत्साहस्य नान्तरीयकतया गुणीभूतमुत्साहमेवादायात्र वीररसो व्यवहर्तुं प्रवर्यत्ते न रौद्रम् इति । "प्राधान्येन व्यपदेशा भवन्ति" इति न्यायोल्लङ्घनप्रसङ्गात् ।

एवंविधैर्बहुभिः प्रमाणैः प्रमाणितेऽपि प्रधानत्वमुपगते युधिष्ठिरे यदालोचका विचिकित्सन्ति तत्तु तत्स्वभाव एव मूर्धस्थो वक्तुं शक्यते ।

नायकत्वेन भीमं स्वीकुर्वता केनचिदालोचकेनातीवसंरम्भेण निष्प्रमाणं वितथं च वृत्तं कल्पयता कातरत्वेन युधिष्ठिरो बहुधा बुभूषितः, मुषितञ्च स्वप्रातिभिकं तत्त्वम् । न केवलं साधारणालोचकैरपि तु मान्याचार्यैरपि भारतीयपरम्परामनुरुद्ध्य वारं वारं यददर्शि तदप्यस्वीकुर्वन्तः स्वयमेव कमपि हेत्वाभासं परिकल्प्य यदौद्धत्यं नाटयन्ति तत्तु सहृदयहृदयमर्मविधम् ।

युधिष्ठिरस्य धीरोदात्तता पदे पद उपनिबद्धापि तं कातरत्वादिनापशब्देन व्यवहरतामालोचकानां न केवलं सिद्धान्तस्खलनमपि तु मतिमद्वर्गान्निपतनमपि । स्वकीयान् प्राणानप्यनपेक्ष्य कुलस्य शान्तिं चिकीर्षितुं बद्धपरिकरो युधिष्ठिरः साहित्यदर्पणकारादिभिर्धीरोदात्तत्वेन स्वीकृतोऽपि तत्कृते कातरादिपददानेन तस्य धीरोदात्तता यदपोह्यते नवीनैस्तत् कथम् । औदात्त्यं नाम सर्वोत्कर्षेण वृत्तिः । सा तु अतिशायिना शौर्यत्यागदयादिना सम्भाव्यते । यः शौर्येण त्यागेन दयया क्षमया वाऽन्यानतिशेते स एवोदात्तः न केवलं शौर्येण । कार्पण्यहेतुषु स्वसुखतृष्णासु निरभिलाषित्वमौदात्त्यम् तत्तु स्वसुखनिरभिलाषित्वं स्वप्राणानपेक्षित्वं युधिष्ठिरे सदपि अनौदात्यसूचकेन कातरत्वेन ये तमभिलक्षयन्ति ते स्वमात्रवेदिनः । न च दृश्यते कुत्रापि तस्य कातरत्वम् । षष्ठेऽङ्के अलक्ष्याभिव्यक्तिं भीमं भीममवलोक्यापि स न कम्पते न च पलायते । अपि तु तत्कृते—

"कः कोऽत्र भोः ! सनिषङ्गं धनुरुपनय, कथं न कश्चित्परिजनः । भवतु । बाहुयुद्धेन दुरात्मानं गाढमालिङ्ग्य ज्वलनमभिपातयामि । (इति परिकरं बध्नाति)" इति कविनोपनिबद्धम् । न कुत्रापि श्रुतं कातरस्येतादृशं कृत्यम् । कथञ्च स्वगुणा अन्येष्वारोप्यन्ते ।

यत्तु दुर्योधनेनाहतं भीमं विश्रुत्य स्वस्य वह्नौ निपातनं तत्तु तत्कातरत्वाभिव्यञ्जकमिति न समीचीनम् । न हि कातरः स्वप्राणान् जिहीर्षति । प्राणानपि हातुमुद्यते कथं कातरत्वव्यवहारः । नियुद्ध्य स्वप्राणत्यागापेक्षया वह्नौ प्राणत्यागे दृढप्रतिज्ञस्य तस्य प्रतिज्ञैव मूलम् । कथं च विस्मृतं तत्प्रसिद्धा प्रतिज्ञा यत् "चतुर्ष्वपि भ्रातृषु एकस्मिन्नपि मृते स्वप्राणान्न धारयामी"ति । नहि धर्मस्य सूक्ष्मं तत्त्वमवगन्तुस्तस्य मनागपि धर्मभ्रंशो येन रोषावेशात् स्वप्रतिज्ञां विहाय कामक्रोधाभिलिप्तो लौकिकः पुरुष एव योद्धुं समुद्येत् । एवमेवान्यत्रापि

युधिष्ठिरस्य सुकुमारक्रमोदितं तन्न तत्कातरत्वाभिव्यञ्जकत्वेन कल्पितुमुचितमपि तु शान्ति चिकीर्षोर्धर्मपरायणस्य तस्यानौद्धत्यपथेन स्नेहेन, वात्सल्येन, नीत्या, वा तत्कल्प्यम् ।

वीररसोचितो युधिष्ठिरस्योत्साहः प्रस्तुतश्लोके कविनैवोपनिबद्धो यथा—

यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं
यद्विस्मर्तुमपीहितं शमवता शान्तिं कुलस्येच्छता ।
तद् द्यूतारणिसम्भृतं नृपसुताकेशाम्बराकर्षणैः
क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिरं जृम्भते ।।

श्लोकोऽयं युधिष्ठिरस्योद्दीप्तत्वाभावात् सविचारवचनोपस्थापनात् क्रोधज्योतिषः कुरुवने समुज्जृम्भणात् युधिष्ठिरोत्साहमभिव्यनक्ति । चेत् "अत्रैवाहं निहन्मि कौरवान्" इत्यादिना प्रतिपादनं स्यात्तदा नोत्साहोऽभिव्यज्येत इति सहृदया आकल्पयन्तु ।

अतः प्रधाननायको युधिष्ठिरः, प्रतिपक्षिनायको दुर्योधनः, पताकानायकश्च भीमसेन एव शास्त्रानुमोदितः स्वीकरणीयो न स्वकल्पनापेक्षया विसंवादो नेय इति मदीयं निवेदनम् ।

गीतोक्त-कृष्णार्जुन विशेषण समीक्षणम्

श्रीरामपरसनतिवारी

विश्वविश्रुतेषु दार्शनिकग्रन्थेषु श्रीमद्भगवद्गीता खलु सर्वैर्विद्वद्भिः सर्वदा सर्वातिशायिरूपेण स्वीकृताऽस्ति। यतोहि अस्यां समेषां मान्यदार्शनिकसिद्धान्तानां यादृशी विवेचना विहिताऽस्ति न तादृशी अन्यत्र दृष्टिगोचरी भवति। एतस्माद् वैशिष्ट्यादत्रत्यैः मान्यैस्तत्तद्विद्वद्भिरस्या भाष्याणि विरचितानि। नहि एतावदेव परन्तु स्वाभिमतपुष्टये मान्यैर्विद्वद्भिः बहुकालादित उद्धृतानि उद्धरणानि तत्र तत्र उट्टङ्कितान्येव। यद्यपि निर्विशेषं न सामान्यमिति नियमः सार्वत्रिकः, परं श्रीमद्भगवद्गीतायां प्रयुक्ताः शब्दाः साभिप्रायाः सरहस्याश्च सन्ति। अत्र प्राधान्येन श्रीकृष्णार्जुनावधिकृत्य भिन्नभिन्नस्थले विभिन्नार्थबोधकानां साभिप्रायविशेषणानां गुम्फनं विद्यते। बहुशः कृष्णार्जुनयोः पृथग् विशेष्य-विशेषणवाचकशब्दानां प्रयोगो दृश्यते परं नात्र तेषां विवेचनमपेक्षितमस्ति, अपि तु विशेष्यसहितानां विशेषणवाचकशब्दानां विवेचनमभीप्सितम्।

महायोगेश्वरो हरिः—(११।६) प्रस्तुतेऽस्मिन् हरिशब्दो विशेष्यवाचको महायोगेश्वरश्च विशेषणवाचकः। महच्छब्दश्च योगेश्वरस्य विशेषणम्। ईश्वरविशेषणं च महायोगः। अत्र प्रयुक्तानि त्रीणि पदान्येव वैशिष्ट्यमावहन्ति। यद्यपि हरिशब्दोऽत्र विशेष्यरूपेण प्रयुक्तोऽस्ति परं विशेषार्थप्रतिपादकत्वेन विशेषणमपि भवितुमर्हति। महांश्चासौ योगस्तस्य ईश्वरः इति महायोगेश्वरः। गीतायाम् "समत्वं योग उच्यते (२।४८) योगः कर्मसु कौशलम् (२।५०)" इति भगवता व्यासेन परिभाषितो योगः। योगस्य परिभाषाद्वयं तुल्याभिप्रायकमस्ति। यतः समत्वयोग एव कर्मकौशलमस्ति। एतल्लक्षणानुसारेण कर्मसु कुशलः कोऽपि योगिशब्दवाच्यो भवितुमर्हति परं प्रस्तुते भगवतः विशेषणरूपेण प्रयुक्तः महायोगशब्दः सामान्ययोगिवारणाय। यतः सामान्ययोगिनां कृते विश्वरूपदर्शनमसम्भवम्। सर्वसामर्थ्यशालित्वेन निखिलजगन्नियन्त्रकत्वेन च भगवत ईश्वरत्वं सुव्यक्तमेव। एवं विशेष्यरूपेण प्रयुक्तो हरिशब्दोऽपि वैशिष्ट्यविशिष्टोऽस्ति। एतस्य इन्द्रचन्द्रादयः बहवोऽर्था यद्यपि भवन्ति परं "हरति पापानिति" अभीप्सितम्। एतेन संजयकथनेन धृतराष्ट्रं प्रति इदं ध्वन्यते यत् महायोगेश्वरत्वेनैतदधीनं हि विजयमतो दानादिभिः स्वपक्षीयो विधेयः, अथवा नीतिरियमसफला चेत् तदा अस्य शरणं व्रज सन्धिञ्च कुरु। एतदपि न रोचते तुभ्यं यदि पुत्रदारान् परित्यज्य पापहारित्वेन तस्य शरणं व्रज, स तव श्रेयसे भविष्यति। मैवम् भवान् विचारयतु यत् मोहितोऽर्जुनो न योत्स्यति, अतोऽस्माकं विजयो निश्चितः। समेषां प्राणिनां पापहारकः कृष्णः पापमूलं तस्य मोहमपाकरिष्यत्येव इत्यादयो बहवोऽर्था ध्वन्यन्ते। अष्टा-

दशाध्यायस्य पञ्चसप्ततितमे श्लोके श्रीकृष्णस्य विशेषणरूपेण योगेश्वरशब्दः प्रयुक्तोऽस्ति। योगेश्वरशब्दस्य तात्पर्यं स्पष्टमेवाऽस्ति। परमत्र महच्छब्दस्य विशेषणोऽभावो विद्यते। प्रस्तुते महच्छब्दस्याप्रयोगे इदमेव कारणं प्रतीयते यत् प्रथमतः श्रीकृष्णोऽर्जुनाय विशेषसारथिरूपेण सखारूपेण चासीत्। मित्रत्वेनैव स व्यवहरति "सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत" इत्यादि। भगवता निजमाहात्म्यानुरूपं स्थलानुरूपं च पार्थस्य सामादिनीत्या बोधनाय विश्वरूपं प्रदर्शितम्। विश्वरूपप्रदर्शनकाले स महायोगेश्वर आसीत्। अष्टादशेऽर्जुनं युद्धाय प्रवर्तितुमेव श्रीकृष्णस्य परं लक्ष्यमस्ति। अस्यैव उपायत्वेन विश्वरूपादिदर्शनत्वं यद्यप्यस्ति तथापि प्रस्तुते निवृत्तस्य प्रवर्तकत्वेन महद्विरहितयोगेश्वराभिधानस्यैव औचित्यमस्ति। हरेः स्थाने प्रस्तुते निरूढस्य श्रीकृष्णस्य प्रयोगोऽपि पार्थसारथित्वेनैवास्ति न तु पापहारित्वेन। कृष्णशब्दस्य नानार्थकत्वे यद्यपि प्रयोगो दृश्यते परमत्र रूढिरेव। तत्प्रतिपादिततयाऽत्र अनुभवप्राधान्यात् समेषां समादरणीयः योगान्तरतो वैशिष्ट्यं वहतीति ध्वन्यते। अपरञ्च क्लैव्यं गतवतोऽर्जुनस्य हृदयान्मोहमपसार्य कर्मयोगे प्रवृत्तिं विधाय युद्धाय तं चोदितवान्, तस्यैव मुखात् "करिष्ये वचनं तव" इत्यपि कथनाय बाध्यं कृतवान्। एतेनायं सर्वशक्तिमानस्ति यं कमपि यस्मिन् कस्मिन् कर्मणि प्रवर्तने क्षमो वर्तते। अस्माभिरपि स एव समाश्रयणीयः, अस्माकं समीहितं पूरयिष्यति, इति ध्वन्यते। अष्टादशस्य अष्टसप्ततितमेऽपि श्लोके योगेश्वरः कृष्णः प्रयुक्तोऽस्ति। योगेश्वरकृष्णस्य तात्पर्यं स्पष्टमेव। प्रस्तुते संजयवाक्ये योगेश्वरस्य, एकादशेऽपि संजयस्यैव वाक्ये महायोगेश्वरस्य प्रयोगोऽस्ति। एतेन प्रतीयते यत् संजयः धृतराष्ट्रं स्मारयति यदयं स एव महायोगेश्वरो येन विराड्रूपमर्जुनाय दर्शितम्, इदानीं प्रच्छन्नमहद्विशेषणो योगेश्वरः। त्यक्तधनुष्कोऽपि अर्जुनः सम्प्रति धानुष्को जातः महायोगेश्वरश्च सम्प्रति कर्मणि प्रवर्तकत्वेन योगेश्वरोऽस्ति। अनेन उभे अपि कर्मणी कृते। अतएव पाण्डवानां विजयः सुनिश्चित इति ध्वन्यते।

कपिध्वजः पाण्डवः—(१।२०) प्रस्तुतेऽर्जुनार्थपरकस्य विशेष्यभूतस्य पाण्डवशब्दस्य विशेषणरूपेण कपिध्वजस्य प्रयोगोऽस्ति। कपिशब्दस्य यद्यपि सन्ति सूर्यादयो बहवोऽर्थाः तथापि प्रस्तुते 'कपि' इत्यस्य सामान्यमर्कटरूपमर्थं विहाय हनुमद्रूपविशेषार्थं बोधयति। अर्जुनस्य हनुमद्विशिष्टध्वजत्वेन ध्वन्यते यत् त्रेतायां यथा अधर्मरतरावणं तत्सैन्यञ्च विजित्य धर्मसंस्थापने हनुमतो महाभूमिकाऽऽसीत् तथैव प्रकृतेऽपि अधर्मरतान् कौरवानर्जुनो जेष्यति धर्मं संस्थापयिष्यति च। अथ वा यथा हनुमतः साहाय्येन भगवता रामेण आसुरीसम्पद्रता दानवा हतास्तथा अर्जुनो हनुमत्साहाय्येन कौरवान् हनिष्यत्येव। अथ वा कृष्णस्य सारथित्वमर्जुनस्यालौकिकपराक्रमत्वञ्च हनुमताधिष्ठिते ध्वज एव च समेषां विपक्षिणां दृष्टि-

रासीत्। इदमेव कारणमस्ति येन संजयप्रस्तुते तं कपिध्वज एव प्रतिपादयति। अनेन लिङ्गेनार्जुनस्य पराक्रमातिशयत्वं विपक्षिणां वैकल्यकारित्वञ्च व्यज्यते।

परन्तपो गुडाकेशः—(२।६) परान् शत्रून तापयति इति परन्तपः। एतस्य शब्दार्थो गुडाकाया आलसस्य ईशो जेता इति गुडाकेशः, अथ वा गुडा अविरता केशाः शिरोरुहा यस्य सः गुडाकेशः। प्रस्तुतमिदं संजयस्य वाक्यं धृतराष्ट्रं प्रति। परन्तपविशेषणेन गुडाकेशविशेष्येन च व्यज्यते यः शत्रुसन्तापकारकोऽनलसश्च क्षात्रधर्मे संलग्नश्चासीत् सोऽयमर्जुनः सम्प्रति युद्धायोपस्थितान् स्वबान्धवान् विलोक्य कातर्यं प्राप्तवान् का कथा अन्येषां युद्धकर्मणि आगतानाम्। परन्तपत्वे अनलसत्वेऽपि चार्जुनस्य युद्धपरित्यागस्तस्यातिसहृदयतां व्यनक्ति। गीतायामेव सर्वाधिकरूपेणार्जुनस्य परन्तपविशेषणस्य प्रयोगोऽस्ति। येनेदमपि ध्वन्यते यत् यदा अर्जुनः पारं गमिष्यति तदा नास्ति कल्याणं कौरवाणाम्, यतः शत्रुसन्तापी सः। वा अस्मत्पक्षीयैर्वीरैर्विजेतुमपि न शक्यते परन्तपत्वेन। तेनेदमपि व्यज्यते-यत्सेनया सह युद्धाय सन्नद्धोऽपि अर्जुनः सन्धिवार्तायां विहितायां स्वल्पलाभेनापि तुष्टो भवितुं शक्नोति। अस्माभिरयमवसरः सफलो विधेयः।

भरतर्षभोऽर्जुनः-७।१६—भरतवंशोत्पन्नराजसु ऋषभः श्रेष्ठ इति भरतर्षभः। प्रस्तुते अर्जुनस्य प्रयोगो रूढित्वेनैव। भरतस्य यादृशं वैशिष्ट्यं पराक्रमादि च तस्य व्यञ्जनपुरःसरमृषभत्वेन तस्मादपि अर्जुनस्य ज्यायस्त्वं व्यज्यते। तस्मादप्यधिकं ध्वननमृषभत्वेन त्वं मदुक्तोपदेशग्रहणक्षमोऽसि इति। अथ वा भरतेषु श्रेष्ठस्त्वमेव कर्मयोगात् विच्युतश्चेदन्येषां भरतानां का कथा!

परन्तपो भारतः (७।२७)—परन्तपस्य तात्पर्यं पूर्वचर्चितमेवाऽस्ति। भरतस्य वंशोत्पन्नत्वेनार्जुनस्य कृते भरतस्य प्रयोगोऽस्ति। प्रस्तुते श्लोके श्रीकृष्णः प्रतिपादयति अर्जुनं प्रति यत् सर्वे प्राणिन इच्छाद्वेषभावेन बद्धा मोहमुपगच्छन्ति, त्वन्तु प्रकृत्यैव परन्तपोऽसि। परन्तपे मोहस्याभावः कथं नु भवेत्। अतः त्वदीयोपस्थितशोको नैवाश्चर्यक इत्येव व्यज्यते।

धनुर्धरः पार्थः (१८।७८)—धनुः धरतीति धनुर्धरः। पृथेः पृथ्व्या ईश्वरः[1] पार्थः। प्रस्तुते उभे एव विशेष्यविशेषणभूते पदे सर्वाधिकमहत्वपूर्णे स्तः। यतः शोकसंतप्तो विसृष्टगाण्डीवोऽर्जुनो योगेश्वरस्य भगवतः श्रीकृष्णस्य कर्मयोगमाहात्म्येनेदानीं युद्धाय दृढपरिकरः सन् धनुर्धरो जातः। अतएव विजयश्रीः पाण्डवानेव वरीष्यति नात्र शंकापंकावलेशः। पश्चाद्भाविविजयमाशङ्क्यैव अप्राप्तराज्यस्य पाण्डुपुत्रस्य पृथ्वीपतित्वं ध्वन्यते पार्थशब्देन। इतः प्राक् पार्थस्य एतादृग्विशेषणविशिष्टाभावात्, अत्र च तत्प्रयोगात् तस्य मोहात् सुप्तं क्षात्रत्वं सोत्साहत्वेनोत्थितमस्तीदानीमिति धनुर्धरपदेन व्यज्यते।

१. द्र०—शब्दकल्पद्रुम, वाचस्पत्यम्।

यूरोपीयवाङ्मये मध्यवर्तियुगः

महाकविर्दान्ते, बोक्कासियो च

डॉ० उमाशङ्करशर्मा

खीष्टसंवत्सरस्य (५००-१४००) सहस्राब्दपरिमितः समयो यूरोपीयवाङ्मये मध्ययुगसञ्ज्ञां भजते। अयन्तु विरहितविवेकवर्त्मा सहठविस्मृतविविधानुभवप्रतिष्ठयवनसंस्कृति-साहित्योपलब्धिः सरभससमुत्सादितरोमीयवैभवाचारपद्धतिर्निष्कासितलोकानुरञ्जननाटकरूपकादिसृतिः साभ्यसूयमुपेक्षितरङ्गमञ्चाभिनयप्रयोगो दुर्बलराजतन्त्रकलेवरः प्रावर्तत युगः। कथावशेषतां गते रोमीयसाम्राज्ये प्रतिदिशं प्रवर्तिते माण्डलीकशासनकदम्बे भ्रंशमानपरम्परितसमन्वयनसूत्रे विपद्यमानसामाजिकप्रबन्धे प्रवर्धमानपरस्परबलोन्मदभूपबलसम्प्लवजर्जरे महाद्वीपे खीष्टधर्म एव निर्बाधोपचीयमानप्रभावः सम्पूरयन्निव सामाजिकसांस्कृतिकशून्यतापरिखां सर्वथा न केवलं लोकं किन्तु राजतन्त्रमपि स्वप्रभावनियन्त्रितं स्वाभिलषिताऽऽदर्शानुरूपं विदधानो लातीनीं (Latin) धर्माध्यायवाचमिव प्रतिष्ठापयन् धर्माचार्यधुरन्धरं 'पोप'महाभागं परमेश्वरादिष्टप्रतिनिधिमिवाङ्गीकुर्वन् निरङ्कुशतामेव व्यक्तिविनोदसहचरीमुपसेवमानो धर्मचक्रप्रवर्तनमकरोत्।

स च मध्ययुग आञ्चलिकानां बहुविधानां वाचामुद्भवभूरासीत्। नैकप्रकारा महाप्राणवत्योऽल्पप्राणा वा भाषाः प्रादुर्भवन्त्यः प्रावर्धन्त। यथा यथा समाजः समवर्धत वाणिज्यसम्भृताः पुरोऽभिनवाः समुद्रतीरे सरित्परिसरे वा समजायन्त; प्राचीना पद्धतिः क्रमेण व्यपद्यत, पार्थिवाभ्युदयचेतसः प्रशिथिलधर्मगुणाः स्वास्थ्यमिवानुभवन्तो याथार्थ्योपदिष्टा वचोभिरर्थैर्वा धर्माचार्यान् प्रीणयन्तः समर्जितैश्वर्यभूमयो नैगमा नवाढ्याः प्रदर्शनमात्रमेव धर्मव्यपदेशेन भूरिफलाय स्वीचक्रुः। धर्मध्वजिनः पाषण्डचाराः प्रतिदिशमुदयं लेभिरे। धर्माध्यक्षपोपपीठं रोमनगरं केन्द्रमिवारोचताभिनवानां भोगसर्गाणां बलप्रयोगद्यूतोत्कोचवञ्चनगर्भाणाम्। समाजसुधारका धर्मोपदेशकाश्च व्याख्याने निबन्धादौ च रक्तबीजजनुषामिव धर्मोपग्रहाणां समाजप्रतीपानां धर्मसाधूनां पर्यटतां धर्मध्वजिनां भिक्षूणाञ्च निकृतिपरान् पापाचारान् साधिक्षेपमवर्णयन्। ब्रह्मचर्यनियमदीक्षितानां तेषां तुरगब्रह्मचारिणां धर्मपौरोहित्यानुष्ठानसमर्पितासूनामपि शतभोगेप्साविकारोद्वेलितचेतसां कलुषकथाकच्चरैः कदर्थितस्तात्कालिक-

इत्थं विरहितसमीक्षकप्रतिभे दम्भविनिर्जितेऽपि तस्मिन् मध्यवर्तियुगे नैकान्त-विरहस्तत्रासीद् विविधाशासम्भृतानां मनोरथानाम्। निशान्तकाल इव प्रतिभासित-प्रत्यूषवैभवः शीतस्पर्शस्पर्शनसञ्चरणोल्लासितरोमहर्षततिः शैशवमिवासीदाधुनिकाख्यस्य युगस्य स दुर्व्यसनललितः समयः। स्वस्मिन्ननन्तधृतबहुविधभविष्यमाणरोचिष्णुप्राणोल्लसित-वैभवो गर्भ इव समुपचीयमानमनोरथनिर्भरः स मध्यवर्तिकालो मेघालोक इव लोकलालसस्य सूतिरिव स्पन्दमानजीवनस्य भूमिरिव मुष्टिनिक्षिप्तबीजस्य प्रावर्तत समेधमानः। नूनं तदुर्वरत्वं न केनापि विस्मर्यते। "अजायत पुष्कला तत्र वाङ्मयसृष्टिः। कथाऽऽख्यायिकाव्यङ्ग्यादि-व्यपदिष्टो यक्षकिन्नरादिवर्णनोपेतो बहुविधः साहित्यनिष्यन्दः पुनर्जन्मेव रूपकवाङ्मयस्य। प्रतीकगर्भान्योक्तिप्रतिष्ठा च रचना प्रकटीकरोतीव भूमिमिव भविष्यमाणसाहित्यसमीक्षणस्य[1]।" याथार्थ्येन सिद्धान्तविमर्शिनी सरणिः सुदूराकृष्टरया साम्प्रदायिके प्रदर्शनशर्करिले धर्मा-धिकरणकलिले विपद्यमाना धर्मग्रन्थरहस्योद्घाटनकर्मणि व्यापृतेवारमत। साम्प्रदायिकाऽऽवेश-निर्भरे तस्मिन् समये सम्प्रदायाभिमानमुखरे समाजे तदनुगा बुद्धिरपि प्रायेण साम्प्रदायि-कीमेव सम्पादयन्ती पद्धतिं कृतकृत्यतामिवालभत। तात्कालिके सन्दर्भे वाङ्मयसमीक्षा तु कस्यापि सन्मार्गानुबोधभरस्य स्वविवेकानुशीलिता व्यवस्था या गीतादौ रचनाकौशले देह-भाजामुत्कृष्टप्रातिभोल्लासोपलब्धौ लौकिके पारमार्थिके वा जगति विरलतयैव प्रासरत्।

मध्यवर्तियुगे साहित्यगर्हणं भर्त्सनन्तु खीष्टधर्मध्वजिनां तत्प्रचारकाणाञ्च हस्तेऽमो-घतममस्त्रमिवाशोभत। प्रचारव्रतदीक्षितजीवनैः प्रायेण संयमातिशय्योन्मदै रमणीयार्थवि-लसितमपि महाकविप्रतिभोल्लासविजृम्भितमपि सद्यःपरानन्दसन्दोहप्रतिपादकमपि निखि-लमेव सार्वजनीनमपि सुदीर्घकालानुभतिप्रतिष्ठमपि विवेकनिकषपरीक्षितमपि नवरसपेशलमपि यवनरोमदेशीयं पुरातनं सार्वकालिकार्थभास्वरं साहित्यवाङ्मयं सदुर्वादं निर्भर्त्स्य सर्वथा धर्मघ्नमाध्यात्मिकपथप्रतीपमनात्मनिर्भरं निरर्गलविनिपातद्वारं प्रभुप्रसादविमुखञ्च साधिक्षेपं विनिन्द्य ज्वलदनलमुखे प्रक्षिप्तं बहिष्कृतञ्चाध्ययनाध्यापनप्रयोगतः। तद्यथा, तरतूलि-यनमते सर्वथा मिथो विरुद्धप्रकृतिः प्रतिकूलमार्गा प्रतीपलक्ष्या च यवनखीष्टपद्धतिद्वयी।

1. They were ages indeed of great literary activity, when romance and the lyric of both secular and religious love were born, when drama was reborn, when fable, satire, fary tale, allegory and narrative in a dozen other forms flourished, enriching the ground for a luxuriant future criticism".

Literary Criticism—Brooks. Page 154.

लौकिकवाङ्मयन्तु नितरां विवेकविपन्नतैव जगत्कर्तृदर्शनस्य पुरतः। स्वपक्षप्रतिपादनाय प्लेतोसमुदीरितां वाचं समुद्धरति यद् बहिष्कार्यो नगरराज्यात्कविलोक इति। इत्थमेव जेरॉम-आगस्ताइन-ग्रीगरीप्रभृतयो लब्धप्रतिष्ठाः खीष्टपण्डिता व्यनिन्दन् पुरातनमखीर्ष्टीयं वाङ्मयम्। जेरॉमस्तु साहित्यं नाम शैतानस्य भोज्यमिति मनुते। ग्रीगरी सडिण्डिमघोषं समुद्घोषयति यद् येन मुखेन स्तूयते सविनयमीश्वरपुत्रः (Christ) कथं तदेवाखीस्तीयमनीश्वरभावसम्भरं वचो व्याहर्तुं यतताम्। सन्तआगस्ताइनः 'कान्फेशन'नामके विश्रुते ग्रन्थे प्रहरन् लौकिकं वाङ्मयं प्रस्तौति—"तद्विधैर्वैयाकरणैरात्मविस्मृतोऽहं बलान्नियुक्त एनियाख्यस्य देशाटनादिवृत्तं ज्ञातुं रोदितुञ्चात्मघातेन प्रेमार्थं परलोकगतायाः दिदोमहिष्याः कृते। हा स्वकीयां दुःखपीडां शुष्कयैव दृशा सहमानो मरणनिर्विशेषां व्यसनाधिबाधामन्वभवमेतत्कृते त्वच्चरणकृपाविरहितो हे नाथ, हे मज्जीवन[1]!" तथापि नाट्यवर्जं पुरातनवाङ्मयं नैकविधप्रभावेण क्रमशो लोकमन्वरञ्जयत्। सत्यपि खीष्टीयसम्प्रदायप्रदिष्टव्यवधानेऽहरहो वर्धमानो लोको न प्राभवत् सर्वथा विहातुं यवनरोमीयसंस्कृतिव्यवहारपरम्पराम्। आगस्ताइनः स्वयमेव घोषयति यत् "सत्यं श्लाघ्यं सर्वतो ग्राह्यमिति"। अखीष्टीयेऽपि वाङ्मये स्वागतार्हा उपदेशाः परमेश्वरप्रकाशदीप्तयो दृश्यन्ते। जेरॉमः खीष्टपण्डितोऽपि स्वधर्मानूकूलस्य पुरातनवाङ्मयविस्तरस्य सङ्ग्रहेऽभिरक्षणे च रुचिं न्यदर्शयत्। तन्मतेन विवेक एव प्रभुः पुरातनवाङ्मयात्सर्वश्रेष्ठस्योपयोगनिर्भरस्य संग्रहे, स्वधर्माभीष्टमतः सर्वथा संग्रहणीयम्। इत्थं यवनरोमीया साहित्यपद्धतिर्मन्थरगत्यैव निर्व्यलीकं खीष्टजगति प्रतिष्ठामलभत समाद्रियत च प्राग्वाङ्मयसम्बधिनी साहित्यशास्त्रावधारणा। व्यवहारे शिक्षणादौ च प्रयोज्यमानार्थसम्पादयित्री तदुपयोगिता सर्वथा सडिण्डिमघोषमङ्गीकृता।

तिमिरभरेऽपि तस्मिन् युगे सूक्ष्मानुसन्धानरता समर्पिततत्त्वान्वेषणप्राणा व्याकृतिः समधिगतवती सत्फलमेकं यत् काव्यादौ काऽप्यन्योक्तिगर्भार्थसम्पत्तिरभिधेयार्थानतिशेते, सहचारिणी वार्थवैशद्यं चमत्कृतिञ्च जनयति। प्राचां दार्शनिकानां विमर्शेषु खीष्टविदुषां बाइ-

---

1. "I was forced [by the so-called grammarians] to learn the wanderings of one Aeneas, forgetful of my own, and to weep for dead Dido, because she killed herself for love : the while with dry eyes, I endured my miserable self dying among these things, far from Thee, O God my life."

St. Augustine– Confessions—1, 13.

विलटीकासु मध्ययुगीनधर्माचार्यप्रबन्धेष्वपि तदेव भासमानं तत्त्वं बहुधा व्याख्यातमासीत्—यत् पुरो भासमानमिन्द्रियसन्निकर्षजन्यबोधप्रतिष्ठितं जगज्जगत्कर्तुः प्रतीकार्थगर्भं पुस्तकमिव, दृश्यमानं निखिलं विश्वमावरणमिवान्तर्निहितार्थविशेषस्य, उपरितनवल्कलमिव तदन्तर्गतस्य वपुषो धूम इवान्तरग्ने गर्भस्योल्वमिव किमप्यर्थभूयिष्ठं तत्त्वं सङ्केतयति प्रमाणयति चान्तरङ्ग-प्रतिष्ठाम्। तदेव सन्तबोनावेन्चरो निर्दिशति "विस्पष्टमेतद् यन्निखिलं विश्वं दर्पणोपमं दिव्यज्ञानप्रकाशमयूखविभ्राजमानं—एतत्तु महद्धीरकखण्डप्रतिममन्तःप्रकाशविजृम्भितम्[1]"। तदेव टामस एक्विना विमृशति, तद्यथा—"जगत्पतिरेव कर्ता दिव्यपुस्तकस्य (बाइबिलनाम्नः), न केवलं शब्दमात्रेण (लोकवत्) सोऽर्थं व्यनक्ति किन्तु शब्दसङ्केतितपदार्थेनापि। शास्त्रान्तरेषु शब्द एव पदार्थं व्यनक्ति किन्तु परमेश्वरनिर्मितौ तत्सङ्केतितपदार्थोऽपि ध्वनयति विशेषार्थम्—शब्दसङ्केतग्रहस्तु स्थूलमभिधेयं प्रकटीकरोति तत्सङ्केतितपदार्थो व्यञ्जितार्थस्तु दिव्यार्थं प्रकाशति"।[2]

नवसिद्धान्तवादिभिः 'तामिस्रयुग' इति व्यपदिष्टोऽपि स्वच्छन्दविधिवर्तिनां समीक्षकाणा-मन्येषां जिज्ञासूनाञ्च कृते सोऽयं मध्ययुगो विविधरहस्योम्भिताश्चर्यशतसूतिरिवासीत्। तेषां मते

1. It is clear that the whole world is like a mirror, bright with reflected light of the divine wisdom, it is like a great coal radiant with light. —The philosophy of St. Bonaventure (Newyark. 1938) PP. 229–30.
2. The author of Holy Scripture is God, in whose power it is to signify His meaning, not by words only (as man also can do), but also by things themselves. So whereas in every other science things are signified by words, this science has the property that the things signified by the words have themselves also a signification. Therfore the first signification whereby words signify things belongs to the first sense, the historical or literal. That signification whereby things signified by words have themselves also a signification is called the spiritual sense, which is based on the literal and presupposes it.

The Basic Writings of St. Thomas Aquinas.

[Newyark, 1945] 1–16. trans:—Anton Pegis.

तु मध्ययुगो हि समुद्गस्थलं पिहितमुखमिवान्तर्घृतसत्यं सुवर्णपात्रं निरन्तरं समाह्वयतीव रहस्योद्भेदनायेति। तथापि ध्रुवमेतद्यन् महाकविदान्तेवर्जं नान्यः कोऽपि सत्साहित्ये तत्समीक्षणे वा प्राभवत् कृती परम्परान्धकारनिर्भरे तस्मिन् मध्ययुगे (ई० ५००—१४५०)। प्रत्यहं संवर्धमाना लोकभाषाः सर्वविधसामाजिककृत्येषु सहजं प्रयुक्ता नवसङ्केतभरैर्नवशब्दैर्नव्यार्थमयैर्वाक्यखण्डैर्ध्वनिनिर्भराभिर्लोकोक्तिभिरुपचीयमानवैभवाः प्रसादयन्त्यो नितरां हरन्त्योऽपि चेतांसि न सार्वजनीनवागासनप्रतिष्ठामलभन्त। वैदुष्यप्रदर्शनपद्वी कठिनाभ्यासायासानुनीताऽपि मानिनीव कृच्छ्राद् वशवर्तिनी लातीनीवाक् (Latin) अरक्षितसामान्यजनसंस्तवा विपुलार्थभणितिरपि व्याकृतिवर्मयन्त्रिता सरसापि दुरारूढबन्धा सौन्दर्यमण्डनापि जरत्कुमारीव हृदयोद्वेगभूमिर्नैव नवोदितस्य महाकवे-(Dante) र्मनोरथमारुरोह। अनभ्यासजडस्थितिं नैवान्वकम्पयत लोकं स्निग्धया दृष्ट्या वैदग्ध्यरसिका निर्दोषापि विरलतरजनानुध्यातगुणा सा लातीनी वाक्। शतविधमनोरथान्दोलितहृदया नवयौवनैकमण्डना सहजलावण्यभूरपि जनभाषा वैदुष्यावलेपदिग्धैः शास्त्रकारैर्धर्माचार्यैः साहित्यपण्डितैरपि देशकालादिविवेकविधुरैर्नाभिनन्दिता समुत्कृष्टसाहित्यरचनाविधौ धर्मकृत्ये वा। तस्मिन्नेव काले स्वसमयोपलब्धविद्याभ्यासपटुः सुरुचिर्बहुविधदेशाटनसंवर्धितदेशकालपात्रादिविवेकः सौभाग्यमिव वसुधाया दिष्ट्याभिमतस्निग्धसखिलोकः स्वावसथं फ्लोरेन्सनगरमागत्य महाकविवर्जिलकाव्यामृतानुशीलनचमत्कृतस्तमेवादर्शमारुरुक्षुर्दान्तेमहाशयः कवियशोऽवाप्तये प्रयत्नभरोऽभवत्। स च सर्वथा औचित्यैकरमो हठापसारितपूर्वाग्रहो व्यपनीतविरोधनिवहो लोकं निषेवितुकामो लोकभाषामेव स्वरचनावाचं विधातुं समकल्पयत्। इत्थं बहुविधं परीक्षमाणो जनवाचस्तद्विपन्नतां सुकुमारविचारसम्भारवहनायोग्यतामसंस्कृतवेषभूषां प्राकृतानुषङ्गिकग्राम्यादिदोषवपुश्च वीक्षमाणस्तदबाधसम्पर्कगुणानुकृष्टस्तत्संस्कारे हि मनो बबन्ध। दे वलगारी इलोक्वेन्शिया (De Vulgari eloquentia—लोकभाषा) नाम्नि स्वनिबन्धे बहुविधान् संशयान् निराकर्तुं प्रयतमानो विमृशति महाकविः — यदनहैव प्रथमजातस्य द्विपद आदमाभिख्यस्य हिब्रूनाम्नी वाग् यूरोपीयजनानां कृते। अन्येषु भाषाकदम्बकेषु रोमीयामेव स मनुतेतराम्। इटलीप्रभवेषु वचस्स्वपि क्लिष्टरूक्षासंस्कृतग्राम्यादिदोषान्विकृता नैका मण्डलीयवाचः। इत्थमन्ते नृपकुलरक्षितां सभ्यलोकानुसेवितपरम्परां स्वीकरोति सिसलीराज्यभाषां सायासोज्जीवितसुरुचिसंस्कारमण्डनां स्वकाव्यस्य समुत्कर्षाय। प्रतिशब्दं परीक्षमाणो निष्पाद्य तां गम्भीरार्थभूयसीं लालित्यवैभवां व्यङ्ग्यभङ्गिविचक्षणां तस्यामेव मध्ययुगमूर्धन्यमानां स्वकृतिं 'डिवाइन कामेडी' (Divine Comedy) विरचय्य न केवलं पूर्वसूरिस्पृहणीयं लोकोत्तरं यशः किन्तु गोस्वामितुलसीदास इव हिन्दि... मान्यमावादिद्योतिहं काव्यावाचस्तमेव प्रतिष्ठापयन्

प्राधान्यपदे तद्धूर्वहां वाचं गौणस्थानीयां प्रकल्पमानः "का भाषा का संसकृत" इति दिशा निर्बाधमिवाकरोत् काव्यश्रियं विनिर्मुक्तवाग्विशेषदास्यपङ्काम् ।

सोऽयं युगधर्मप्रतीपो महाकविरभिधेयार्थव्यतिरिक्तं कस्मिन्नपि प्रतीकान्योक्तिध्वनिमूलकान्यार्थे निबद्धानुरागस्तद्विधद्वितीयार्थभूयिष्ठमेव मनुते । अत एव स्वमहाकाव्य- (Polysemous)मनेकार्थसम्भरमिति प्रमाणयति । [De Vulgari eloquentia] 'डे वल्गारी इलोक्वेन्शिया' भाषाविवादसम्बन्धिनी तदीयान्यतमा कृतिः । प्रमाणमिवैषा याथार्थ्यदृष्टेः नवप्रयोगानुष्ठानस्य वाक्स्वरूपविज्ञानस्य च । होरेशमतानुसारं काव्यं नाम मनःप्रसादाय, उपदेशाय च । नूनं कृतिरियं तदेवानुसरति, प्रेमैव प्रतिपाद्यो विषयः, स च देशप्रेम, स्त्रीजनप्रेम, परमेश्वरप्रेमेति त्रिधा विभक्तोऽपि प्रेमैव[1] । इत्थं मध्ययुगे वर्तमानोऽपि महाकविर्न प्राचो न च ख्रीष्टधर्माचार्यान् निषेवते । प्रथमोऽयमालोचकानां यो विगणयन्नधिक्षेपं धर्माध्यक्षाणां वितरति काव्यश्रिये प्रेमाख्यं विषयं तज्जीवनसञ्जीवनम् । काव्यभेदेषु च गीतिरेव तन्मनोरथमधिरोहति । अस्मिन् युगे तु गीतिरेव स्वीक्रियते काव्यपदेन । एवञ्चापि दान्तेमहोदयो मध्ययुगीनोऽपि समीपतरोऽद्यतनानाम् ।

कविपदन्तु निरन्तराध्यवसायवतो वाक्यप्रयोगकौशलभरस्य नित्यौचित्यविवेकिनोऽभ्यासनिरतस्यैव जनस्य भागधेयम्— भाषामात्रन्न काव्यम्, सहृदयः कविरसंस्कृतामपि शर्करिलामन्तःसलिलां नवसस्याङ्कराढ्यां विधातुं समर्थः[2] । महाकविरयं मध्यबिन्दुः प्राचीनाधुनातनयोः । अस्मादेव लब्धाज्ञाभिलेखा इव समाज्ञापिता इव प्रतिदिशं भविष्यालोकचक्षुषः सुधियो विद्वांसो देशवाचं प्रतिष्ठापयितुं प्रतिपदं लोकजीवने प्रयत्नभरा अभूवन्, इत्थं यूरोपीयमहाद्वीपे सर्वदिक्षु सर्वतोदिक्का नवनवा अभ्युदयभासः प्रत्यहं मनोरथमन्वरञ्जयन् । अचिरेणैव कालेन प्रयत्नभरा जनभाषाः सर्वत्र स्वदेशभाषासनमलञ्चक्रुः । अद्य तु पुस्तकेषु हि दृश्यते लातीनी भाषा, तत्रापि विरलतैव तद्भागधेयम् ।

इत्थं नूनं महाकविर्दान्ते सौभाग्यलालितो लब्धदैवानुग्रहश्चासीद् यत्तस्मिन्नन्धकारबहले युगेऽपि बुधम्मन्यैर्दार्शनिकैरभिष्टुतः संकीर्तितमहाकवियशाः प्रचारितात्मविचारनिष्यन्दरचनाकदम्बको दिवमगात् । तत्तु निस्संशयमवश्यम्भाविनोऽन्धयुगावसानवेलारम्भस्योदयः । तत्पथपथिकस्तदनन्तरमेव 'डेकामेराँ' (दशदिवसीयम्) रचनया सर्वत्र सङ्क्रान्तयशोमरीचि-

1. व्यापारयन् स्वकाव्ये शौर्यं शृङ्गारमीशभक्तिमिह ।
ग्राम्यादिदोषरहितां जनभाषामाश्रयेत् सुकविः ॥

2. अध्यवसायात्काव्ये वचसि तदुचिते च कौशलं तन्वन् ।
अभ्यासभरः कश्चित् कविरिति विज्ञायते लोके ॥

बोक्कासियो (Boccaccio, 1313–75) न शशाकात्मानं निरोद्धुं स्वीकर्तुं वा धर्मदुर्मदान्धपुरोहितजनाभिमतामुक्तिं यद् धर्मप्रतीपाः काव्यकाराः काव्यसम्पदश्च विमुखीकृत्य लोकमीश्वराच्छतसुखविनिपातगह्वरे वर्त्मनि नियोजयन्ति—इति। नाविदितं तस्य यल्लोकाय न रोचते धर्माडम्बरः, काव्यादीनां पठने श्रवणे मन्त्राभिनयद्वारा तद्दर्शने च सहजैव वृत्तिर्लोकस्य। एवं सहजनिष्यन्दमानां लोकापगां को नाम जनो निरोद्धुं क्षमते; अतो विरोधिजनप्रयुक्तमेवास्त्रं युक्त्या तद्विरोधनिवारणाय प्रयुञ्जन् रिरक्षुः काव्यं बोक्कासियो प्रस्तौति यत् "प्रकारान्तरेण सत्काव्यं सद्धर्ममार्गमेव निष्कण्टकीकरोति प्रेरयति च धर्माचरणे लोकान्, तच्चोपदेशसम्भरमनःप्रसादमेवोररीकृत्य प्रयोजनप्राधान्येन धर्माप्रतीपमेव सत्काव्यमिति। तच्च,

उपदेशत्वात्प्रायो ज्ञानत्वाच्चोदनाप्रवृत्तेश्च।
उद्देश्यसाम्यमुभयोः सदृशं काव्यञ्च धर्मञ्च॥[1] इति।

नैवानृतवादिनः कवयः। नाभियोक्तारः काव्यप्रकृतिं विन्दन्ति। नूनमसंस्तुतहोमरवर्जिल-होरेशादिवागवतारा ईदृगभियोगरमाः। सत्काव्यन्तु शिक्षणसम्पृक्तं सत्प्रेरणं नाम। मूलतः काव्यं सत्, कविप्रतिभानिस्स्यन्दं सहृदयानाह्लादयति। प्रायेण सत्कवयः स्वकाव्यामृतप्रभावादुदारोरस्कानां जगतीपतीनां सख्यमाश्रयन्तः कालमरमयन्। सम्राडगस्तः (Augustus) वर्जिलाख्यस्य महाकवेः परममित्रमासीत्। दौर्भाग्यविडम्बितः स्वनामधन्यो महाकविर्दान्ते संरक्षितो वर्धितश्च सङ्कटावसरे फ्रेडरिकनामभाजा नरपतिना। पैत्रार्कस्य (Petrarch) महाकवेः पालका राजेश्वराः खीष्टधर्माध्यक्षाः पोपमहोदयाश्चासन्। एवं काव्यं सुप्रतिष्ठं सत्; नैतदतो विरहितविवेकानां परं सहृदयभाजां तद्विमर्शवताञ्च कृते विरचितमस्ति। तद्यथा—

तिमिरसखानिव घूकान् रमयति मन्दान्न काव्यधाम यदि।
सहृदयहृदयैकभुवस् तस्य रसज्ञा ध्रुवं विरलाः॥[2]

चतुर्विधाः काव्यद्विषः, तत्राद्याः पशुनिर्विशेषा इन्द्रियलम्पटाः प्राणिनो येषां मनो मनोहरस्वादुपदार्थसेवनादुदीर्णरागाञ्चितकामदोहादपरं किञ्चिन्नाधिकं मनुते स्पृहणीयं पार्थिवे जगति। ते तु सुराऽऽस्वादसुरतसौविध्ये जीवने मोघं हि काव्याय कालातिपातः—इति प्रवदन्ति। दाम्भिका द्वितीयाः, ते चानवाप्तयथार्थविद्याधिगमा विरहितदर्शनविमर्शाः पण्डितम्मन्याः काव्यं कवि-

1. Poetry and the Scripture are the same. Since theology is the poetry of God, Poetry is theology. —[V. Hall on Voccaccio.]

2. Since Poetry is noble, it is obviously not written for the ignorant. It is obscure only to the common herd. The learned understand it.
—[V. Hall— on Voccaccio.]

लोकञ्च 'अवरम्' इति मत्वा निगृह्णन्ति । तृतीयास्तु शास्त्रव्यवसायिनो वणिग्वृत्तयो विपश्चितो ये सुवर्णैकप्रयोजनवतीमुररीकुर्वाणा विद्यां तत्प्रयोजनविरहे तु भारायमाणामेव मन्यमानास्तां निन्दन्ति । प्राकृतबुद्धयो 'वाक्कीलाभिधाः' नूनमिमेऽधिक्षिपन्तः समुपहसन्ति कविलोकं, सप्रतिभमपि यं भैक्ष्यमेवानुगृह्णाति, दारिद्र्यमेवोपकरोति, दौर्भाग्यमेवाभिनन्दति । यशोऽवकाशः, शान्तिरेकान्तश्च प्रीणयन्ति कविहृदयं, कोलाहलो हेमसम्मर्दो विवादश्च वाक्कीलमनोरथभूमयः, कथमनयोरेकत्र संस्थितिः । इत्थं धर्मान्धाश्चतुर्थकोटिमावहन्ति । अत्युग्रा इमे कालुष्योपहतदृष्टयः सङ्कुचितविवेकधियः काव्यद्विषो धर्मशास्त्रिणः । लोके स्ववैदुष्यावलेपं प्रदर्शयन्तो विकत्थमाना बुधम्मन्यास्तत्सतीर्थ्याः 'काव्यमसत् कालुष्यसम्बलितं मोहपूरं कामसम्भरं नास्तिककथोपन्यासगर्भं वितथलक्ष्मेति जल्पन्ति । तेषां मते लोकमोहनाः कुपथे नियोजयन्ति कवयः। प्राचीनकाव्यसंग्रहस्तत्पाठो वा महते पापाय ।

अतो हि समुत्तरितं बोक्कासियोमहोदयेन यत् पूर्वे हि कवयो लोकशिक्षकाः । अन्योक्तिसंवृत्तं प्रतीकगर्भञ्च प्रतिपादितं सत्यं काव्येषु बाइबिले धर्मग्रन्थेऽपि । स एव पन्थाः कथोपन्यासे । यद्यपि कुकवयोऽपि सन्त्येव, स्वकाव्यदोषेण लोकहितमपि विघातयन्ति तथापि नैतदुपयुज्यते यदस्मादेव हेतोः सुकवयः सत्काव्यानि च निराकृतिमर्हन्ति । वस्तुतस्तु अकृतव्यूहा विरहितपूर्वाग्रहा मतिरेव काव्याऽकाव्यनिर्णये प्रमाणम् । सैव हंसायतामसतः काव्यवस्तुनः सत्काव्यक्षीरं पृथक्कर्तुम् । लक्ष्यसाम्यञ्च धर्मसत्काव्ययोः । सत्काव्यं नियोजति लोकं सद्वर्त्मनि, शिक्षयति विवेकं ज्ञातव्यं विमृशति, सैषा हि प्रकृतिर्धर्मस्येति ।

दिवङ्गते (1375) बोक्कासियोमहाभागे विलयमिवाप तामिस्रयुगः । शताब्दपूर्वमेव समुच्छिद्य दुर्भेद्यान्धकारपटलं मोघीकृत्य दुर्बोधमधर्मशास्त्रिजनदुराग्रहं तज्ज्योतिरुदभासत यत्प्रकाशे संवर्धनं लेभे नवीनो समङ्करितो मध्ययुगगर्भादाधुनिको युगः ।

[अष्टमपृष्ठस्यावशिष्टो भागः]

कुमारसम्भवस्योत्तरार्धे नवमसर्गादारम्य सप्तदशसर्गं यावन्नास्ति अभिज्ञानशाकुन्तलादीनां प्रणेतुः कालिदासस्य कृतिरिति बहुभिर्विपश्चिद्भिर्मन्यते। तत्र बन्दिस्थितानां सुदृशामेष सुरलोकवेणीप्रमोक्षं करोतु इति व्याहारे बन्दीति पदं स्पष्टमेव कारागृहद्योतकम्। बन्दी बन्दश्चेति पारस्यदेशीयशब्दौ प्रकृतसन्दर्भे परीक्षणीयौ स्तः। कालिदासेन व्यवहृतं भिन्नार्थप्रतिपादकं बन्दीपदं समाश्रित्य बन्दीगृहं बन्दीपालो बन्दीति पदानि काव्यजगति प्रविविशुरित्याचार्यथीमस्य मतम्। इत्थं महाकवेः सुरबन्दीति शब्दो बन्दिस्थितानामिति पदस्य निर्मितेः पूर्वपीठिका बभूव।

ननु सुरबन्दीति पदं मध्यमपदलोपिसमासः कथं न स्यात्? सुरलोकस्य बन्दी। सुरलोकस्यासुरबलेन बन्दीकृताः योषिताः। त्रिविष्टपे सेव्यसेवकभावयोरनवस्थानादत्र षष्ठीतत्पुरुषग्रहणमनुपपन्नम्। पुरन्दरपुरवदेवापरिमितरत्नप्रभवे संस्कृतवाङ्मये वल्गुवचसामप्सरसां व्यक्तित्वमलोकग्राह्यम्। दिवौकस उद्यानपरम्परासु रम्भोरूणामप्सरसां विहरणं पार्थिवदृष्टिभिर्नावगन्तव्यम्। निःश्रेयसार्थिनस्तु स्वर्गलोकमपि उपेक्षन्त एव। अशाश्वतताहेतोः। क्षीणे पुण्ये मर्त्यलोकप्रवेशशासनात्। परं यावन्नरो निर्वृतिं नाभ्युपैति, परममुपशमाश्रयं कैवल्यधाम नाप्नोति, तावत्तु नाकस्य अघौघवर्जितं धाम जीवनाध्वनि वर्त्तमानानां चेतांसि किल नियच्छति। भवतु तावत्, त्रिविष्टपस्य शोभा देवैरपि अप्सरोभिरपि।

'द्वन्द्वं ध्रुवं तद् विकलं न शोभते
अन्योन्यहीनाविव रात्रिचन्द्रौ।'

इति शम्।

आचार्याणां रसचर्चानिष्यन्दः

डॉ. शिवदत्तशर्मा चतुर्वेदः

काव्यसमालोचनाया इतिहासे रस-सिद्धान्तो निर्विवादरूपेण विशिष्टं स्थानं धारयति। एतदनुसारेण रस एव काव्यस्यात्मा, अलङ्कारगुणरीत्यादयस्तस्यैव पोषकाः, सिद्धान्तस्यास्य पूर्णतया विकासस्तु भरतस्य नाट्यशास्त्र एव विलोक्यते, परमस्य प्रारम्भः भरतात् पूर्वमेव सञ्जात इति नानुमातुं दुश्शकम्। भरतादनन्तरं ये काव्यालोचका न ते सर्वे रससिद्धान्तपोषका एव, बहवस्तत्र रससिद्धान्तपरिपन्थिनोऽपि दृश्यन्ते।

रसशब्दो वैदिके वाङ्मयेऽनेकेष्वर्थेषु प्रयुक्तो दृश्यते-क्वचिज्जलार्थे, क्वचिद्दुग्धार्थे, सोमवल्लीनां साररूपे पेये चेत्येवमादिष्वर्थेषु वेदे प्रयुक्तो दृश्यतेऽयं रसशब्दः। परन्तु तैत्तिरीयोपनिषदि सहृदयदर्शकाणां नाट्यदर्शनवेलायां श्रव्यकाव्यानन्दप्राप्तिवेलायां वा योऽयमनिर्वचनीयालौकिकानन्दस्तत्प्रतिपादकोऽपि रसशब्दः प्रयुक्तः। तथा च—

"रसो वै सः", "रसं ह्येवायं लब्ध्वानन्दीभवति"

सन्दर्भेऽस्मिन्नुपर्युक्तार्थव्यतिरिक्तेऽप्यर्थे रसशब्दस्य सुस्पष्टं प्रयोगः सञ्जायते। रससिद्धान्तप्रतिपादनेतिहासे तदिदं तैत्तिरीयं वचनं प्रथमं सूत्रम्। अत्र तावदानन्दरूपस्य परब्रह्मणो रसाभिन्नता सुस्पष्टं प्रतिपादिता। जीवात्मा च परब्रह्मणोंऽशभूतः, अतः अंशस्यांशिनं प्रति स्वाभाविकमाकर्षणं सुप्रसिद्धं विज्ञानसिद्धञ्च। तेन योऽयं मनुष्यः, स रसमेव लब्ध्वाऽऽनन्दं प्राप्नोतीत्युपनिषदर्थस्तैत्तिरीयोपनिषद इमं रसशब्दप्रयोगमाधारीकृत्यैव भरतादिभिराचार्यैर्दृश्यश्रव्यकाव्यानन्दप्राप्तिविषये रसशब्दः प्रयुक्तः। रसस्य द्वितीयोत्त्थाने आदिकविर्महर्षिर्वाल्मीकिरेव प्रतिष्ठितो दृश्यते। यो हि वेदातिरिक्तं लौकिकभाषायां छन्दोऽवतारयामास। सुप्रसिद्धा सा घटना यत्र निषादेन कामासक्तवृक्षस्थितक्रौञ्चद्वन्द्वमध्ये एकस्य बाणेन कृतो वधः, अपरा च शोकाकुलरोदनाय विवशीकृता। प्रत्यक्षदर्शी च वाल्मीकिर्विनाऽऽयासं तत्रैव निजगाद पद्यम्—

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥

एतच्छ्लोकोच्चारणानन्तरमाश्चर्यचकितो वाल्मीकिर्महर्षिर्विचारयामास यत् कोऽयं विलक्षणो वाक्यविन्यासः अकस्मादेव मन्मुखाद् विनिःसृत इति। स्वयमेव च समाधानमपि तेन विहितं यत्—"शोकार्तस्य प्रवृत्तो मे श्लोको भवति नान्यथा" शोकश्चायं क्रौञ्चद्वन्द्ववियोगोत्थ एव। समर्थयामास कविकुलगुरुः कालिदासः—

"निषादविद्धाण्डजदर्शनोत्थः, श्लोकत्वमापद्यत यस्य शोकः"[१]।

काव्यजगतः प्रथमसमुन्मेषभूतेऽस्मिंस्तावद् वाल्मीकिपद्ये उत्तरकालिकैः प्रयुक्तो दृश्यते भूयान् विचारसंरम्भः। विचारकेन्द्रन्त्विदं यत् सर्वप्रथमेऽस्मिन्ननुभवमूलके काव्ये शोक एव कारणत्वेन स्वीकृतो दृश्यते सर्वत्र। स चास्ति करुणरसस्थायिभावः, स एव स्थायिभावः शोकः, अतिसंक्षिप्तोऽप्यस्मिन् पद्ये स्वीयविभावानुभावसंचारिपरिपुष्टः अखण्डं काव्यत्वं धारयति। एतेनैव स्थायिभावस्य रसरूपतायाः शाब्दिकी परिणतिरेव काव्यमित्यत्र न दृश्यते कापि संशीतिः। वाल्मीकिहृदये दयाभावस्य क्रौञ्चवियोगालम्बनस्यानुभव एवैतत्काव्यजनकः। यतो हि महर्षिसमनुभूतः पश्चात्तापः, एतत्काव्यश्रवणानन्तरमन्येषामपि मनसि तादृशमेवानुभवं जनयितुमीष्टे। अस्य शोकस्य च करुणरसस्थायिभावत्वात् संसिद्धमिदं यद् रसानुभव एव काव्यस्य जनकः, अमुमेवार्थं ध्वन्यालोककारोऽपि प्रकाशयामास—"काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥"[२]

वाल्मीकेः प्राथमिकरचनयाऽनया तद्घटनात्मकभूमिकया संसिद्धमिदं यद् गभीरानुभवस्य मनोहरा शाब्दिकी परिणतिरेव रसो भवति, यदि सा पाठकस्यापि हृदये तादृशमेवानुभवं जनयितुमीशीत।

वाल्मीकेरनन्तरं भरत-नाट्यशास्त्रमेव रसस्य स्वरूपसमुल्लासकं विलोक्यते। अनयोर्मध्यकाले सामाजिकानां रसानुभवाय नाट्याचार्यैर्नाट्यस्य नियमाः सूत्रेषु व्यरच्यन्तेति पाणिनि-सूत्रेषु शिलालिकृशाश्वेति नामद्वयस्य नटसूत्रप्रसङ्गे समुल्लेखात् प्रत्ययविधानाच्च समुन्नीयते। पाणिनिसमुद्धरणेनानेन शक्यमनुमातुं यत् पाणिनिसमक्षं कान्यपि नटसूत्राण्यासन्, यानि हि नटा आम्नायरूपेणाभ्यासिषुः। लक्षणग्रन्थास्तु पूर्वं लक्ष्यग्रन्थैर्विनाऽनुपपन्न

१. रघुवंशे १४/७०
२. ध्वन्यालोके १/५

एव । अतस्तस्मिन्नन्तरालेऽवश्यं बहुसंख्यकानां नाटकानां रचना जाता येषामभिनयेन नटाः सामाजिकानां मनोरञ्जनमकुर्वन् । यद्यपि समुपलब्धनाटकेषु सर्वप्राचीनानि भासस्यैव नाटकानि सन्ति, ततः पूर्वतनस्य कस्यापि नाटकस्याद्यत्वे समुपलब्धिर्नास्ति, तथापि पाणिनि-कृतो नटसूत्रोल्लेख एव तस्मिन् काले नाटकग्रन्थानां स्थितिमनुमापयति । व्याकरणमहा-भाष्यस्याप्युद्धरणेन तस्मिन् काले नाटकस्य सत्ताऽनुमीयते—

"ये तावदेते शोभनिका नामैते प्रत्यक्षं कंसं घातयन्ति प्रत्यक्षञ्च बलिं बन्धयन्ति" इति[1] ।

रसस्य सम्पूर्णं स्वरूपन्तु सर्वतः प्रथमं भरतनाट्यशास्त्रे एव दृश्यते । नाट्यशास्त्रे रससिद्धान्तः विकसिते स्वरूपे सङ्गीतेतिहासनाट्यादिभिः सम्यक् पुष्टः वर्णितो दृश्यते । सप्तत्रिंशदध्यायात्मके विस्तृते कलेवरे समुपनिबद्धस्य नाट्यशास्त्राख्यस्यास्य ग्रन्थस्य प्रयोजनं दर्शकाणां चेतस्सु नाट्याभिनयदर्शनेन कथं रसानुभूतिरिति प्रतिपादनमेव तस्मादेवाऽयमाकरग्रन्थः परा उपनिषत्काव्यप्रतिपादकानाम् । भरतेन षष्ठेऽध्याये कारिकाया-मेकस्यां नाट्यशास्त्रे वर्णनीयविषयाणां सङ्ग्रहः कृतः । तद्यथा—

"रसा भावा ह्यभिनया धर्मो वृत्तिप्रवृत्तयः ।
सिद्धिः स्वरास्तथा तोद्यं गानं रङ्गश्च संग्रहः[2] ॥"

भरतानुसारमिमे एकादश सिद्धान्ताः सम्मिलिताः सन्तः नाट्यस्वरूपं सङ्घटयन्ति । तत्र रस एव मुख्यः —

"तत्र रसानेव तावदादावभिव्याख्यास्यामः ।
न हि रसादृते कश्चिदर्थः प्रवर्तते[3] ॥"

रसातिरिक्तान्यन्यानि भावादारभ्य रङ्गपर्यन्तं दश तत्त्वानि रसोद्भावनाय साधनभूतानि । रसस्योत्पत्तिश्च प्रसिद्धे रससूत्रे भरतेन प्रदर्शिता । भरतानुसारं रसा अष्ट-संख्यका एव । रसतत्त्वं विवृण्वान आचार्यः कथयति यद् दशविधरूपकेषु रङ्गमञ्चे चतुरैर्नटैः प्रदर्शितेषु दर्शका आत्मनो देशं कालं परिस्थितिञ्च विस्मृत्यालौकिक आनन्दे सद्यो निमग्ना भवन्ति । अवस्थायां तस्यां यादृश आस्वादः स एव रसपदवाच्यतां प्रतिपद्यते ।

---

१. महाभाष्ये

२. ना० शा०—६ अ०

३. तत्रैव

भामहः ----

भरतनाट्यशास्त्र-प्रदर्शित-रससिद्धान्तस्योत्तरकालिकैः काव्यतत्त्वसमालोचकैः दृश्य-काव्यातिरिक्ते श्रव्यकाव्यक्षेत्रे महत्त्वं नोररीकृतम्। यद्यपि नाट्यविषये कोहलमातृगुप्त-हर्षादीनां प्रबन्धा व्यरच्यन्त, येषु रससिद्धान्तस्य व्याख्यानमजायत, परं तेषां ग्रन्था अद्य नोपलभ्यन्ते। केवलं समुपलभ्यमानेषु ग्रन्थेषु तेषां प्रभूतान्युद्धरणान्यद्यत्वे तेषामैतिहासिकीं सत्तां बोधयन्ति। भरतादनन्तरं भामहाचार्यः काव्यालोचनक्षेत्रे प्राविशत्। तेन मेधावि-प्रभृतीनां केषाञ्चन काव्यालोचकानामुल्लेखो विहितः। परं तान्यपि पुस्तकानि कालचक्रे विलुप्तानि। भामहस्तु रससिद्धान्तस्य सर्वथा विरोधी। तन्मतानुसारेण केवलमलङ्कारा एव काव्यस्य काव्यत्वं सम्पादयितुं पर्याप्ताः। नाट्यातिरिक्ते काव्ये रसस्य तेन महत्त्वपूर्णं स्थानं न निर्धारितम्। रसवत्प्रेयऊर्जस्विप्रभृत्यलङ्कारान्तर्भूत एव रसस्तेन स्वीकृतः।

दण्डी ----

भामहानन्तरं काव्यालोचनक्षेत्रे प्राविशदाचार्यो दण्डी। यद्यपि काव्ये रसस्य स्थान-निर्धारणे स भामहान् नातिदूरे भवति, परं यत्र भामहेन काव्येऽलङ्काराणां मूर्धन्यता प्रतिपादिता दण्डी न तथा स्वीकरोति। स तु तत्स्थानं गुणेभ्यो ददाति। गुणप्रकाशिकां रीतिञ्च काव्यात्मत्वेन समुद्घोषयति। रसविषयेऽपि दण्डी भामह इव सर्वथा प्रतिकूलो नास्ति। तेन अष्टानां रसानां सुन्दरासु कारिकासु प्रतिपादनं विहितम्—

"प्राक् प्रीतिर्दर्शिता सेयं रतिः श्रृङ्गारतां गता।
रूपबाहुल्ययोगेन तदिदं रसवद्वचः॥
इत्यारुह्य परां कोटिं क्रोधो रौद्रात्मतां गतः।
भीमस्य पश्य शत्रुत्वमित्येतद्रसवद्वचः॥
इत्युत्साहः प्रकृष्टात्मा तिष्ठन् वीररसात्मना।
रसवत्त्वं गिरामासां समर्थयितुमीश्वरः॥
इति कारुण्यमुद्रिक्तमलङ्कारतया स्मृतम्।
तथाऽपरेऽपि बीभत्सहास्याद्भुतभयानकाः॥
वाक्यस्याग्राम्यतायोनिर्माधुर्ये दर्शितो रसः।
इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम्॥"[1]

अथ च स रसानामपि काव्ये गुणानामिव महत्त्वं प्रोक्तवान्, रसं प्रति दण्डिनो दृष्टिकोणः भामह इव विरोधी नास्ति।

१—काव्यादर्शे २—२८१, २८३, २८५, २८७, २९२।

वामनः —

एतदनन्तरं समयाति वामनाचार्यः। तन्मतानुसारं 'रीतिरेव काव्यस्यात्मा'। सा च त्रिविधा वैदर्भी गौणी पाञ्चाली च। तत्र वैदर्भरीत्यां दशगुणानां समावेशोऽतः वैदर्भरीतिसम्पन्नं काव्यं सर्वश्रेष्ठं भवति। दण्डी कथयति यत् काव्यशोभावर्धकाः केवलमलङ्कारा एव। सामान्यतया वामनो भामहं दण्डिनञ्चानुचकार। परं पाञ्चालीनाम्नीं रीतिमेकामाविष्कृतवान्। तेन गुणालङ्कारयोर्विभाजिका रेखाऽपि दत्ता। रसविषये स स्वपूर्वाचार्यानेवानुचकार। परं कान्तिनामकस्य गुणस्य प्रतिपादने—

'दीप्तरसत्वं कान्तिः[1]' इतिवदता तेन कान्तिलक्षणे रसस्य सत्तां स्वीकृत्य तस्य चर्चा कृता। इतोऽधिकं रसविषये न किमपि तेनोक्तम्। तेन रसस्य स्वरूपविषये श्रेष्ठतायाञ्च पराङ्मुखत्वमेवाङ्गीकृतम्। परं नाटकस्य सर्वश्रेष्ठकाव्यता समर्थिता। अनेन नाटकश्रेष्ठत्वकथनेन तन्मते रसस्यापि श्रेष्ठत्वं ध्वनितमिव। रसस्य नाटक एव पूर्णस्वरूपोदयवर्णनात्।

उद्भटः —

उद्भटाचार्यस्य समये काव्यक्षेत्रे रसस्याधिकं प्रतिष्ठा जाता। परं पुनरपि स रसं काव्यस्यात्मानं नाङ्गीकृतवान्, तथापि रससिद्धान्तेतिहासे उद्भटस्य प्रथमं स्थानम्। तेनालङ्कारस्य समाहितापरपर्यायस्याविष्कृतिः कृता। तेन नाट्ये शान्तरसस्य स्थापनाय अनेके तर्का दत्ताः। उद्भटेन च तस्य पूर्णतया समर्थनं विहितम्। उद्भटस्य समर्थनेनैव रससिद्धान्तोऽलङ्कारसम्प्रदायस्य रीतिसम्प्रदायस्य च प्रतिद्वन्द्वितायामात्मानं स्थापयामास।

रुद्रटः —

आचार्यो रुद्रटः प्रथमतया रसस्य श्रेष्ठत्वं श्रव्यकाव्ये प्रतिपादयामास। इतः पूर्वं दृश्यकाव्य एव रसस्य श्रेष्ठता स्वीकृताऽऽसीत्। परं रुद्रटेन स्वीये काव्यालङ्कारग्रन्थे प्रोक्तं यत् काव्यस्य रसमयीभाव एव चरमा सफलता। रुद्रटो रसस्य प्रतिपादनेऽत्यन्तमुत्सुक आसीत्। तेन रसनिरूपणे भरतस्य सीमाया अपि उल्लङ्घनाय प्रयतितम्। भरतो नाट्ये अष्टावेव रसान् स्वीचकार। रुद्रटस्तु शान्तरसस्य प्रेयोरसस्य च मेलनेन रसस्य संख्यां वर्धितवान्। तन्मते दश रसाः। तस्य रसनिरूपणन्तु इतोऽप्यग्रे पादन्यासं करोति। स तु काव्यालङ्कारे प्रतिपादयति यत् सर्वेऽपि व्यभिचारिभावाः सात्त्विकभावाश्च स्वीयचरमाऽवस्थायां पृथक्-पृथग् रसा एव भवन्ति। अलङ्कारेषु रसस्यान्तर्भावस्तस्य सर्वथाऽनभिमतः, काव्यस्य सार्थकतामपि स रसश्रेष्ठत्वे एव ब्रवीति।

१—काव्यालङ्कार-सूत्रे ३-२-१४

रुद्रभट्टः –

रुद्रभट्टेन श्रृङ्गार-तिलकस्य रचना कृता। तस्मिंश्च प्रयोजनं रसस्पष्टीकरणमेव। दृश्यकाव्यातिरिक्तं श्रव्यकाव्येष्वपि रसस्य श्रेष्ठत्वप्रतिपादनम्, तस्य स्वरूपप्रकाशनम्, नवरसानां विभावानुभावव्यभिचारिपुरस्सरं वर्णनम्, शोभनासु कारिकासु श्रृङ्गारतिलके रुद्रभट्टेन विहितम्। तस्य ग्रन्थावलोकनेनेदं सम्यग् ज्ञायते यद् भामहोद्भटवामनानां सिद्धान्तापेक्षया कालेऽस्मिन् रससिद्धान्तः सहृदयेषु कविषु च भूयसा प्रचारितः समभवत्।

आनन्दवर्धनाचार्यः –

एतावत्पर्यन्तं काव्यविवेचनायामलङ्कारगुणरीतीनां क्रमशः प्राधान्यप्रतिपादनं ग्रन्थकाराणां सम्मतमासीत्। रसस्याप्रधानमेवासीत् स्थानम्। अलङ्कारविशेषे गुणैकदेशे वा, रीत्येकदेशे वा, रसस्य चर्चामात्रं प्रस्तूयते स्म। यदा चानन्दवर्धनाचार्यो ध्वन्यालोकग्रन्थं निर्मितवान्, तदा काव्यालोचनस्य सर्वे मानदण्डाः परिवर्तिताः। नूतनैव सरणिः समुद्घाटिता। ज्ञातं सहृदयैर्यदेतावत्पर्यन्तं या काव्यपरीक्षा जाता सासीदन्धगजन्यायेनैव। आनन्दवर्धनाचार्यद्वारा ध्वन्यालोकग्रन्थे ध्वनेः स्वरूपप्रकाशनानन्तरं काव्यालोचनक्षेत्रे प्रज्वलत्प्रकाशप्रमेव प्रसृता। तदा प्रभृत्येव रसस्य काव्यालोचनक्षेत्रे अलङ्कार-गुण-रीतिभ्यः सर्वतोऽप्यधिकं महत्त्वं समजायत। ध्वनिरेव काव्ये सर्वतोऽधिकं महत्त्वपूर्णं तत्त्वमित्यस्त्यानन्दवर्धनाचार्यस्योन्मुक्ता घोषणा। तेन हि ध्वन्यालोकप्रारम्भे एवोद्घोषितं यत्—

'काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः[१]'

एतेन ध्वनिस्तावत्काव्यस्यात्मभूतं तत्त्वं यद् विना काव्यं स्व-स्वरूपमेव नासादयति, का पुनस्तस्य श्रेष्ठत्वगाथा। ध्वनिसिद्धान्तानुयायिभिराचार्यैर्ध्वनेर्वस्त्वलङ्काररसरूपेण भेदत्रयं विधाय रसरूपस्य ध्वनेः सर्वोत्कृष्टत्वं संसाध्यान्येषामलङ्कारगुणरीत्यादीनां तत्त्वानां रसस्य सौन्दर्यवर्धने एव सार्थकतेति सुस्पष्टं प्रकाशितम्। अस्य ध्वनिसिद्धान्तस्य परिपोषक आनन्दवर्धनः काश्मीरेषु समुत्पन्नः सोऽयं न कदाप्यात्मानं ध्वनिसिद्धान्तप्रतिष्ठापकं स्वीचकार, अपि तु तन्मते ध्वनिर्बुधैः समाम्नातपूर्व आसीत्। एतेन आनन्दवर्धनादनेकशतकेभ्यः पूर्वमेव आचार्यभरतकाल एव ध्वनिसिद्धान्तप्रतिष्ठापना जाता इति तावत् सुस्पष्टमवगन्तुं युक्तम्। आनन्दवर्धनेन स्वयमेवोक्तं यत्—'प्रथमे हि विद्वांसो वैयाकरणाः,व्याकरणमूलत्वात् सर्वविद्यानाम्[२]'। एतेन वैयाकरणानां स्फोटसिद्धान्ते स्वीयाऽऽस्था प्रकाशिताऽऽनन्दवर्धनाचार्येण। वैयाकरणा हि स्वसिद्धान्तप्रधानप्रतिपाद्यस्फोटरूपव्यङ्ग्यव्यञ्जने कण्ठताल्वाद्यभिघातजन्ये

१—ध्वन्यालोके–१ उ०
२— „ „

शब्दराशौ ध्वनिरिति व्यवहारं कुर्वन्ति । ध्वनिसिद्धान्तानुयायिनोऽपि वैयाकरणमतानुसारिणो भूत्वा स्वसिद्धान्तप्रधानप्रतिपाद्यप्रधानीभूतव्यङ्ग्यपुरस्कारके शब्दार्थराशौ ध्वनिकाव्यमिति व्यवहारं प्रवर्तयन्ति । यद्यपि ध्वनिशब्दस्य विग्रहश्चतुर्धा क्रियते-१—ध्वन्यतेऽनेनेति ध्वनिः, २—ध्वननं ध्वनिः, ३-ध्वन्यतेऽस्मिन्निति ध्वनिस्तथा, ४-ध्वन्यत इति ध्वनिस्तथापि ध्वनिरेव काव्ये प्रधानभूततत्त्वमिति सर्वत्र सङ्कलितः सामान्योऽर्थः ।

भरत आनन्दवर्धनश्च —

रसप्रतिपादनशैल्यामाचार्यभरतादल्पीयानेव भेदस्तावदानन्दवर्धनाचार्यस्य । भरतः काव्यद्वारा सहृदयहृदयेषु विभावानुभावादीनामुपस्थितिमभिधाव्यञ्जनयोः केनाप्येकतरेण व्यापारेण प्रतिपादयन् तस्य सहृदयहृदयेष्वानन्दोद्बोधकतां ब्रूते । आनन्दवर्धनस्तु सहृदयहृदयेषु काव्यानन्दसमुल्लासे व्यञ्जनैवैको व्यापार इति प्रतिपादयाञ्चक्रे । अपरत्र भरतः सर्वोत्तमं काव्यं तन्मनुते यत्र विभावादयः सहृदयदर्शकहृदयेषु लोकोत्तरमानन्दमुत्पादयन्ति । परमानन्दवर्धनस्य मते तद्धि काव्यं श्रेष्ठतमं यत्र दृश्ये श्रव्ये वा वस्त्वलङ्काररसात्मकस्य ध्वनेः साफल्येन प्रस्तुतीकरणं जायते । एतदतिरिक्तं काव्यं रसात्मकत्वेन वर्णयन्नानन्दवर्धनो रसस्य काव्ये सम्पूर्णतया प्रतिष्ठां कृतवान् । रसस्य च ध्वनेर्भेदत्रये प्राधान्यं व्यवस्थापयन् ध्वनिसिद्धान्तस्य मूलमाधारं विशदीचकार । शान्तरसविषये तस्य स्वातन्त्र्यप्रतिपादने श्रेष्ठत्वप्रतिपादने च ध्वनिकारः सविशेषं पराक्रान्तवान् । ध्वन्यालोकस्य चतुर्थोद्योते रामायणमहाभारतयोः शान्त एव प्रधानो मूलभूतो रस इति तावद् भूयसा प्रमाणान्युद्धृत्य तर्कांश्चोपस्थाप्य व्याख्यातवान् । तेन तावत्पर्यन्तं शान्तरसस्य यथावत् स्वरूपं सन्देहदोलाधिरूढमिवासीत् यस्य स्पष्टता जाता । यद्यपि एतावत्स्पष्टप्रतिपादनानन्तरमपि उत्तरकालिका बहव आचार्याः काव्ये शान्तरसतिरस्कारे प्रायतन्त, परं तस्य समर्थनं न कुत्रापि दृश्यते ।

आनन्दवर्धनाचार्यस्य ध्वनिस्थापनानन्तरं संस्कृतकाव्यालोचनक्षेत्रे ये तावदाचार्याः प्रादुरभवन्न ते सर्वेऽपि ध्वनिसिद्धान्तं स्वीकृतवन्तः । केचिदांशिकरूपेण ध्वनिकारसिद्धान्तं समर्थयाञ्चक्रुः, अन्ये तु पूर्वरूपेण तं खण्डयामासुः । ध्वनिविरोधिष्वाचार्येषु प्रतीहारेन्दुराजो भट्टनायको, धनञ्जयः, श्रीशङ्कुको, महिमभट्टः, कुन्तक, इत्यादय आचार्याः परिगण्यन्ते ।

प्रतीहारः —अनेन भामहोद्भटादीनलङ्कारवादिनोऽनुकुर्वता ध्वनिविरोधप्रसङ्गे ध्वनेस्त्रयोऽपि प्रकाराः पर्यायोक्तश्लेषरसवदलङ्कारेष्वन्तर्भाविताः ।

भट्टनायकः —भट्टनायकस्तावन्नाट्यशास्त्रस्य सुप्रसिद्धो व्याख्याकारः । तेन आचार्यभरतप्रदर्शितदिशा रसस्य काव्यात्मत्वं समर्थितम् । तेन स्वीयसिद्धान्ता भावविभावादीनां नाट्यशास्त्रे विवेचनाधारेण प्रतिष्ठापिताः ।

७

तथा हि नाट्यशास्त्रे—"वागङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्तीति भावाः । विभाव्यन्तेऽनेनेत्यतो विभावाः । अनुभावयति वागङ्गसत्त्वकृतमभिनयम्" । इति भावविभावादीनां लक्षणादिकं लक्ष्यते । एतदाधारेणैव प्रतिपादितवान् भट्टनायको यत् काव्ये शब्दस्य त्रयो व्यापारा अभिधा, भावकत्वं, भोजकत्वञ्च । शास्त्रान्तरेषु तु अभिधैव केवलं व्यापारः । काव्ये त्रिभिर्व्यापारैर्दर्शकाणां पाठकानां चेतस्सु रसानन्दानुभवः सञ्जायते । ध्वनिस्वीकारे तस्य सम्मतिर्नास्ति, केवलं रसस्वीकारेणैव काव्यप्रयोजनस्य सम्पूर्णताया हृदयङ्गमत्वात् ।

धनञ्जयः—

भट्टनायकानन्तरं सुप्रसिद्धेन दशरूपकग्रन्थनिर्मात्रा दशमशताब्दीसमुद्भूतेन तत्रभवता धनञ्जयेन स्वीये ग्रन्थे यत्र नाटकेषु रसस्य मुख्यता मुक्तकण्ठतया स्वीकृता तत्रैव ध्वनेरस्वीकारोऽपि विहितः । ये तावदाचार्या ध्वनिविषये विमतिं धारयन्ति तेषां विमतेर्मूलमिदं यद् ध्वनिकारेण सम्प्रस्तुतं शब्दस्य काव्यानुभवगम्यं व्यञ्जनाव्यापारं विस्तरभयात् ते स्वीकर्तुं न संनह्यन्ति । धनञ्जयोऽपि भट्टनायकमनुसरन् ध्वनिस्वीकारस्य प्रयोजनभूतमर्थं तात्पर्यशक्त्या प्रत्यपीपदत् । भट्टनायकस्य मतं तिरस्कुर्वद्भिर्ध्वनिवादिभिः प्रतिपादितमासीद् यत् भट्टनायकाभिमतौ भावकत्वभोगौ ध्वननव्यङ्ग्याभ्यामभिन्नौ । तस्मादयं शब्दमात्रे भेदो न वस्तुनि । पक्षस्याऽस्य निराकरणं कुर्वन् धनञ्जयो ध्वनिं तात्पर्यशक्त्या योजयामास । तन्मते ध्वनेः प्रयोजनं तात्पर्यशक्त्यैव प्रपूर्यते । इयं शक्तिर्न केवलं श्रोतृबुद्धौ वक्तुरभिप्रायमात्रं प्रकाशयति प्रत्युत श्रोतारं तदनुसारं कर्मण्यपि नियोजयति ।

सैषा कर्मणि योजना श्रोतुर्नान्यत् किमपि, अपि त्वलौकिकाऽऽनन्दानुभव एव । इत्थं काव्यं तात्पर्यशक्तिद्वारा रसास्वादस्य भावकं सम्पद्यते[1] । अतः काव्यस्य प्रधानीभूतप्रयोजनलाभाय ध्वनिर्नावश्यकः, व्यञ्जनावृत्तिर्नावश्यकी । भाव्यभावकभाव एव काव्यरसयोः सम्बन्धो न तु ध्वनिकाराभिमतो व्यङ्ग्यव्यञ्जकभावः ।

अभिनवगुप्तः—

उपरिष्टादवलोकितमस्माभिर्यदानन्दवर्धनाचार्यस्य ध्वनिस्थापनानन्तरं प्रतीहारभट्टनायकधनञ्जयादय आचार्या ध्वनितिरस्कारे कटिबद्धा इव दृश्यन्ते । ध्वनिसिद्धान्तो मनोवैज्ञानिकाधारेण ध्वनिकारेण यद्यपि सुष्ठुतया प्रतिष्ठापितः परं शोभनोऽपि सिद्धान्तो यावत्साधुसमर्थनं न प्राप्नोति तावत्तस्य प्रतिष्ठा न जायते । शास्त्रान्तरेष्वपि ऐतिहासिकीं दृष्टिं यदि वयं पातयामस्तदा ज्ञायते यत् सर्वाण्यपि तानि शास्त्राणि प्रबलसमर्थनेनैव प्रतिष्ठां प्रापितानि । व्याकरणशास्त्रमेवावलोक्यताम् भगवता पाणिनिना व्याकरणसूत्राणि प्रणीतानि ।

१—दशरूपके ४ प्रकाशे—३५-४२ श्लोकाः ।

तत्समर्थनञ्च महाभाष्यं विरचय्य भगवता पतञ्जलिना सम्पादितम्। तेनैव पाणिनिव्याकरणस्याद्यापि दृश्यते प्रतिमाप्रतिष्ठा। वेदान्तसूत्राणामुपरि भगवता शङ्कराचार्येण भाष्यरचना कृता। तेनैव तेषामपि प्रतिष्ठाऽद्यापि दृश्यते। तथैवाऽस्माकं काव्यशास्त्रेऽपि ध्वनिसिद्धान्तस्य प्रबलं समर्थनं कुर्वन्नाविर्बभूव तत्र भवानभिनवगुप्तपादाचार्यः। ततः पूर्वं भट्टनायकादयो रसं काव्यस्यात्मानं स्वीकृत्यापि ध्वनिविषये विप्रतिपन्ना आसन्। अभिनवगुप्तस्तु ध्वनिसिद्धान्तस्यासीत्प्रबलसमर्थकः। तेन ध्वन्यालोकस्योपरि लोचननाम्नी व्याख्या नाट्यशास्त्रस्योपरि चाभिनवभारती नाम्नी व्याख्या विरचिता। यो हि ध्वनिसिद्धान्तः प्रबलैः समालोचकैः कम्पित इवाऽभवत्तस्याकाट्यैस्तर्कैः प्रबलाभिश्च युक्तिभिस्तथा समर्थनं विहितमभिनवगुप्तेन येन तदीयं स्थानं काव्यशास्त्रेऽत्यन्तं महत्वपूर्णं समजायत। उत्तरकालिका अचार्यास्तद्विषये महतीं श्रद्धां धारयामासुस्तदीयानि वाक्यानि च प्रमाणरूपेण समुपस्थापयाञ्चक्रुः। तेन ध्वनिविरोधिनां, विशेषतया भट्टनायकस्य रसास्वादप्रक्रिया सपरिकरं खण्डिता। तस्यायं सिद्धान्तो यद् रसध्वनिरेव काव्यस्यात्मभूतं तत्त्वमस्ति। इतराण्यपि सर्वाणि तत्त्वानि तस्य सौन्दर्यवर्धनायैवोपयुज्यन्ते।

नाट्यशास्त्रस्योपर्यभिनवगुप्ताचार्यस्याभिनवभारतीनाम्नी व्याख्या रसविषये ऐतिहासिकतथ्यविषये सङ्गीतविषये नाट्यशास्त्रीयविषयेषु च प्रभूतं प्रकाशं पातयति। उद्धरणबहुलं तदीयं निर्माणम्। यत्र हि उपर्युक्तविषयेषु चिरन्तनानामर्वाचीनानाञ्च सिद्धान्तोद्धरणपुरस्सरं वचनान्यप्युद्धृतानि। प्रथमतयाऽभिनवभारत्यामेव भट्टतौतस्य श्रीशंकुकस्य भट्टनायकस्य च रससूत्रव्याख्यायां रसास्वादनपद्धतौ च ये विस्तृता मतभेदास्ते संक्षेपेण सौन्दर्येण च समुद्धृत्य समालोचिता विलोक्यन्ते। भट्टनायकस्य सिद्धान्तं विकासोन्मुखीकृत्य नवीना धारा रसविषये प्रवाहिताऽभिनवगुप्तेन, या ह्यद्य यावदालङ्कारिकाणां सर्वसम्मत्या स्वीकृता दृश्यते। अनुपमयोपस्थापनप्रणाल्या विलक्षणेन काव्यविषयकाधिकारेण च तेन प्रतिपादितं यद् ध्वनी रसश्च काव्यस्य मूलभूते तत्त्वे स्तः। अन्यकाव्यतत्त्वानामलङ्कारादीनां ध्वनिना रसेन च सह सम्बन्धस्यापि सम्यग्विस्फोरणं तेन कृतम्। इतः पूर्वं भरतादारभ्य या काव्यालोचना जाता सा रूढिग्रस्ता, पारम्परिकी, प्रभावशून्येव च दृश्यते। तत्र केवलं रसपरिपूर्णमेव पद्यादि काव्यत्वेन स्वीकृतमासीत्। यत्र तु सहस्रशः पद्येषु विभावानुभावादीनां रससमर्पकाणां सम्मेलनं नाजायत तत्र चमत्कृतिबाहुल्यसद्भावेऽपि काव्यत्वं न मन्यते स्म पूर्वैराचार्यैः। तेन सौन्दर्यबहुलान्यपि बहूनि काव्यानि काव्यत्वेन नाभिमतान्येवाऽभवन्। सोऽयं सुमहान् दोष आनन्दवर्धनाभिनवगुप्ताभ्यां काव्यात्मभूतस्य ध्वनेस्त्रैविध्यं स्वीकृत्य सुतरां दूरीकृतः। तत्रापि रसध्वनेरेव मौलिभूतं स्थानमित्यन्यदेतद्। शान्तरसविषयेऽभिनवगुप्ताचार्यः प्रतिपादितवान् यन्निर्वेदस्थायिभावः शान्तो रसः काव्यस्य सर्वेष्वपि भेदेषु वर्णयितुं शक्यते। न केवल-

मिदमेवापि त्वन्येषु रसेषु शान्तरसस्यास्ति मौलिभूतं स्थानमित्यपि तेन युक्तिपुरस्सरं समुपस्थापितम्। भरतनाट्यशास्त्रे शान्तरसविषये पृथक् सन्दर्भः विलिखितो दृश्यते। तदुपरि चाभिनवगुप्ताचार्यस्य व्याख्या सुतरां महत्त्वपूर्णा।

कुन्तकाचार्यः —

अभिनवगुप्तेन यद्यपि प्रबलाभिर्युक्तिभिः प्रमाणैश्चानन्दवर्धनप्रतिपादितध्वनिसिद्धान्तस्य पूर्णरूपेण प्रतिष्ठापना विहिता तथाप्यनन्तरवर्तिभिराचार्यैः कुन्तक-भामह-प्रभृतिभिर्ध्वनिसिद्धान्तस्यातितीक्ष्णा समालोचना विहिता। द्वयोरप्यनयोर्ध्वनिप्रतिद्वन्द्विनोराचार्ययोः समालोचकेषु चर्चा समजनि। कुन्तकस्य वक्रोक्तिवादो वक्रोक्तिमाधारीकृत्य प्रवृत्तः। यद्यपि कुन्तकात् पूर्वमपि भामहादिभिर्वक्रोक्तितत्त्वस्य काव्ये सौन्दर्याधायकत्वं प्रत्यभिज्ञातमासीत्, तथाहि—

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥

इत्यादिभिः सन्दर्भैरवगम्यते यत् प्राचीनैरप्याचार्यैर्भामहप्रभृतिभिर्वक्रोक्तितत्त्वस्य तादृग्रूपमवगतमिति। कुन्तकेन तु वैज्ञानिकपद्धत्या विश्लेषणं विधाय वक्रोक्तेः काव्यजगति पूर्णा प्रतिष्ठापना कृता। तस्येदं मतं यत् सामान्याभिधाव्यापारात् काव्यशब्देषु संस्थितो व्यापारो भिन्न एव, यो हि भावसौन्दर्यसमर्पकः काव्यस्य प्राणभूतं तत्त्वम्। तत्र शब्दार्थयोः साहित्यमनिवार्यम्। रसो व्यङ्ग्यार्थश्च तन्मतेऽलङ्कार्यावेव। तेन तस्य रसविरोधित्वं ध्वनिविरोधित्वं वा सर्वथा न संसिद्धं परन्तु प्राधान्यविषये तु तस्य मतभेद एव।

महिमभट्टः—

महिमभट्टेन तावत् 'व्यक्तिविवेक'–ग्रन्थं निर्माय ध्वनिविरोधे पादन्यासः कृतः। महानुभावोऽयं ध्वनेर्जीवातुभूतां व्यञ्जनावृत्तिं तिरस्कुर्वन् ध्वनिमपि न स्वीचकार, परन्तु रसस्य सत्तां सर्वोपरि मेने। अभिधावृत्तेरूर्ध्वं काव्यानुमितिं स्वीकृत्य व्यञ्जनायाः सर्वमपि विषयमनुमितिकुक्षौ निक्षिप्तवान्। ग्रन्थारम्भे तदीया प्रतिज्ञा विद्यते यत्—

अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम्।
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्[1]॥

महिमभट्टस्य सोऽयमनुमितिवाद उत्तरकालिकैर्विश्वनाथजगन्नाथप्रभृतिभिराचार्यैर्बहुशः खण्डितः। पुनरपि काव्यक्षेत्रे रसस्वरूपप्रतिपादनप्रक्रियाऽदसीया महत्त्वपूर्णं स्थानं धारयति।

१—व्यक्तिविवेके– प्रथमः

भोजः —

रसविषये भोजदेवस्य सिद्धान्तो दिङ्मात्रेणास्माभिः प्रदर्शितपूर्वः । अनेकसंख्यकान् रसान् तिरस्कृत्य श्रृङ्गारस्यैवैकस्य रसत्वं सिद्धान्तितं भोजराजेन श्रृङ्गारप्रकाशे । अहङ्कारमेव तावद् रसरूपेण परिणतं सोऽभिप्रैति । एकोनपञ्चाशद् भावा रीतयश्च श्रृङ्गारस्यैवोत्थानभूता इत्यपि सर्वतः प्रथमं तेनैव प्रतिपादितम् । तस्येयं तत्र युक्तिर्यत् श्रृङ्गाराप्लावितमनस्को दर्शक एव तावत् समस्तानामपि भावानामनुभवं प्राप्नोति । स्थायिभाव एव विभावानुभावादिभिः परिपुष्टः सन् रसरूपतां प्राप्नोतीति सर्वसम्मतोऽयं सिद्धान्तोऽपि भोजराजस्य नाभिमतः । तस्येयं युक्तिरत्र यत् यदि स्थायिभावा विभावानुभावादिपरिपुष्टाः सन्तो रसत्वं प्राप्तुं शक्नुवन्ति तर्हि किं तावदपराद्धमितरैर्भावैः । अनेन च प्रकारेण रसानामष्ट नव वा संख्याप्यसमीचीना । भावानां यदिदं स्थायिसात्त्विकव्यभिचारिनाम्ना भेदत्रयेषु वर्गीकरणं न दृश्यते तन्न सहते भोजराजः । तन्मते भावाः केवलं भावा एव न तु विभिन्नेषु ते संस्थाप्याः । ते च केवलं रसेनैवोद्भाव्यन्ते । रसानामपि वर्गद्वयमुत्पाद्योत्पादकरूपेण यद् भरते दृश्यते तदपि भोजराजस्य नानुमोदनावहम् । अहङ्कारस्यैव रसरूपतापरिणतिर्भावानाञ्चोत्पादकत्वं तदभिमतम् ।

शारदातनयः —

शारदातनयस्योपरि भोजस्य विद्यते भूयान् प्रभावः । तस्य मतन्तु संक्षिप्य कारिकासु लिखितमेव, श्लोका अप्यनेके उद्धृताः, भोजस्य नामाप्यनेकत्र गृहीतम् । तथाहि--

उक्तास्ता वृत्तयः साङ्गा भोजसोमेश्वरादिभिः ।
तस्मादासां स्वरूपन्तु दिङ्मात्रं समुदाहृतम् ॥
भोजादिभिरलङ्कारा गुणा दोषाश्च दर्शिताः ।
अतो विरम्यते तेषां रूपं कथयितुं मया ॥
भट्टाभिनवगुप्तार्यपादैरेतत्प्रकाशितम् ।
इतः परं विशेषास्तु भोजसोमेश्वरादिभिः ॥
मुदितञ्च द्रुतञ्चैव दोषाः सप्तैव गीतिजाः ।
ईदृक्स्वरूपं भोजाद्यैः स्वप्रबन्धेषु नोदितम् ॥
एतान्युक्तानि श्रृङ्गारप्रकाशे भोजभूभृता ।
इष्टस्यार्थस्य रचना वृत्तान्तस्यानुपक्षयः ॥
आदौ विष्कम्भकं कुर्यादिति भोजेन दर्शितम् ।
इयमङ्कादिवाह्याङ्कमुखगर्भाङ्कसाम्यतः ॥
कथाविच्छेदहेतोस्तु चूलिका भोजकल्पिता ।
एकाङ्कश्च भवेद् भाण इति [illegible] ॥

भाणस्य लक्षणं चेद्दृग्भोजेनापि प्रकाशितम् ॥
इति प्रकरणे शुद्धविष्कम्भो भोजनिर्मितः ॥
भवेयुर्वा न वेत्यस्यां लास्याङ्गान्याह कोहलः ।
वीथ्या श्रृङ्गाररूपत्वाद्विधेयानीति भोजराट्[1] ॥

उदाहरणैरेभिः स्पष्टं सिद्ध्यति यत् महाराजभोजस्य शारदातनयोपरि कियान् प्रभाव इति । भोजराजस्य सरस्वतीकण्ठाभरण-श्रृङ्गारप्रकाशनामानौ द्वौ ग्रन्थौ संस्कृतकाव्यशास्त्रस्य विश्वकोशायेते । न केवलं भोजरचनासु सङ्कलनप्रवृत्तिरेव दृश्यते अपि तु भोजेन काव्यशास्त्रे सर्वथा प्रतिपादितपूर्वः नूतनो सिद्धान्तः समर्पितः । काव्यस्य श्रृङ्गार एव एको रस इति सर्वथा नूतनं श्रृङ्गारवादं समुपस्थापयता भोजराजेन क्रान्तिकारिणी विचारधारा काव्यजगति प्रवर्तिता । ये हि नाम समालोचका आधुनिकाः संस्कृतकाव्यशास्त्रोपरि रूढिबद्धताया दोषमापादयन्ति ते विलोकयितुं प्रार्थ्यन्ते यद् भोजस्य रचनासु तैरवधानं देयम् । शारदातनयस्य भावप्रकाशनं विलोकयन्तु ते यत्र काव्यप्रजापतेराचार्यस्य भरतस्यापि मतानि तूलोत्क्षेपमुत्क्षिप्यन्ते । "भग्नावरणा चिदेव रसः" इति सिद्धान्तस्थानेऽभिमानस्य रसजनकतां व्याजहार भोजः । शारदातनयस्तु भोजमप्यनादृत्याभिमानवादं च गौणीकृत्य भावप्रकाशने भाववादं प्रतिष्ठापयामास । भावा एव रसानुभवस्य काव्यानुभूतेर्वा जनका इति ।

क्षेमेन्द्रः —

महाराजभोजानन्तरं क्षेमेन्द्रस्यौचित्यवादः काव्यशास्त्रे महत्त्वपूर्णं स्थानं धारयति । औचित्यतत्त्वस्य चर्चाऽऽनन्दवर्धनादेव प्रारब्धा । तथाहि—

"अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा[2] ॥"

इति औचित्यतत्त्वस्य काव्येऽपरिहार्यतां व्याजहार श्रीमानानन्दवर्धनाचार्यः । क्षेमेन्द्रेण त्वौचित्यतत्त्वस्य काव्ये प्राधान्यं दर्शयता औचित्यविचारचर्चानाम्न ग्रन्थस्यैव निर्माणं कृतम् । तन्मते न केवलं गुणालङ्काररीतिरसादीनामेवौचित्यान्तर्गतत्वेन काव्यशोभाधायकत्वं वर्णितमपि तु शब्दवाक्यक्रियापदकारकलिङ्गसंख्याप्रभृतिषु सर्वेष्वपि भाषाभेदेषु काव्यान्तर्भूतेषु औचित्यस्यापरिहार्यता प्रतिपादिता । रसचर्वणायामपि औचित्यस्योल्लङ्घनं सर्वथा वैरस्यमुत्पादयति । क्षेमेन्द्रेण नवसंख्यका रसाः पूर्णतया स्वीकृताः । परन्तु काव्यतत्त्वेषु सर्वश्रेष्ठता रसं विहायौचित्यस्योपरि निक्षिप्ता ।

---

१. भावप्रकाशने पृ०—१२, १५२, १६४, २१३, २१६, २१६, २४२; २४५, २५१ ।
२. ध्वन्यालोके—तृतीय उद्योत ।

रसविवेचनासारांशः

यद्यपि संस्कृतकाव्यालोचनसाहित्ये मुख्यतया विभिन्नतत्त्वप्राधान्यप्रतिपादिका अष्टधारा व्याख्याताः परन्तु उत्तरकाले शनैः शनै रसतत्त्वप्राधान्यवाद एव व्यवस्थापितो मनीषिभिः। तेन च सर्वेष्वपीतरेषु मतवादेषु स्वीयमाधिपत्यं प्रतिष्ठापितम्। उत्तरकालिका आचार्याः स्वीयेनापूर्वेण तर्ककौशलेन प्रतिभावैचित्र्येण च रसप्राधान्यमेव व्यवस्थापितवन्तः, रक्षितवन्तश्च रसत्वप्राधान्यवादं विरोधिनां स्थूलहस्तावलेपैः। रससिद्धान्तप्राधान्यप्रतिष्ठापनेन सहैव काव्ये प्रधानीभूततत्त्वस्य गवेषणाऽपि पर्यवसिता। आचार्यमम्मटप्रमुखाः उत्तरकालिकाः काव्यालोचकमूर्धन्याः काव्यशास्त्रीयविवेचनायां न किमपि नूतनं तत्त्वं निवेषितवन्तोऽपि तु प्रकाशितपूर्वाणामेव तत्त्वानां सम्यक् सङ्कलन-सम्पादन-प्रस्तुतीकरणादिकं विधाय काव्याध्वनि राजमार्गं निर्मितवन्तः। काव्यप्रकाश उत्तरकालिकेषु ग्रन्थेषु प्रकाशस्तम्भायते।

●

अभिनव-साहित्य-परिचयः

१. शास्त्रदीपिका

सम्पादकः— डॉ० किशोरदासः स्वामी, अध्यक्षः—दर्शनविभागस्य। प्राप्तिस्थानम्—श्रीसाधुवेला संस्कृतमहाविद्यालयः, ७।२३ सकरकन्दगली, वाराणसी। आकारः— रायल अष्टपृष्ठात्मकम्। पृष्ठानि—३६०। मूल्यम्—४०·००।

महर्षिणा जैमिनिना कृतस्य सूत्रात्मकस्य मीमांसादर्शनस्य व्याख्यात्मकं 'शास्त्रदीपिका' नामकं ग्रन्थरत्नं कुमारिलमतानुयायिना श्रीपार्थसारथिमिश्रेण विरचयाम्बभूवे। निर्णयसागरतः प्रकाशितचरमासीत् परन्त्विदानीमेतदनुपलब्धत्वान्नैकेषु विश्वविद्यालयेषु तर्कपादान्तस्यास्य पाठयत्वेन निर्धारितत्वाच्च सर्वदर्शनाचार्येण डॉ० किशोरदासस्वामिना विदुषां विद्यार्थिनाञ्च सौविध्याय महता मनोयोगेन श्रीचन्द्रप्रभया हिन्दीटीकया संवलितं तर्कपादान्तमिदं प्रकाश्य संस्कृतजगते महानुपकारो व्यधायि।

यद्यपि मूलं दुरूहं वर्तते परमधिकारिणा विदुषा तद्दुरूहतामपाकृत्य बोधोपयोगित्वाय श्लाघनीयो यत्नः कृतः। यथा बाह्यतो मनोहारित्वं तथैवान्तरमपीति विश्वसिमि। भूमिका परिशिष्टञ्चास्य मनोहारित्वे उपयोगित्वे चानुकूल्यं बिभृत इति।

—गोविन्दपाण्डेयः

२. बृहत् संस्कृत-हिन्दी शब्दकोश (प्रथमखण्डः)

सम्पादकः—पं० गोपालचन्द्रो वेदान्तशास्त्री। प्रकाशकः—कोश-भवन के अधिकारी ४३/१७ सदानन्द बाजार, वाराणसी। आकारः—क्राउन अष्ट-पृष्ठात्मकम्। पृष्ठानि—४००। मूल्यम्—३०·००।

ग्रन्थेऽस्मिन्नकारादिक्रमेण शब्दाः समुपस्थापिताः सन्ति येषां सपरिश्रमं हिन्दी-भाषामाध्यमेन विस्तृतं सोदाहरणञ्च विवेचनं समपादि। शब्दार्थानां सम्यक् परिपुष्टये बहु-ग्रन्थेभ्यः प्रमाणान्यप्याकलितानि। ४०० पृष्ठात्मकेऽस्मिन् प्रथमखण्डात्मके कोशग्रन्थे केवलमनाम्नोऽक्षरादारभ्याऽवितारिशब्दं यावद् विमर्शो व्यधायि श्रीशास्त्रिवर्येण। एतन्मतानुसारेण केवलं विविधप्रकारकाणां सहस्राधिकशब्दानामर्थज्ञानेनैव न विशिष्टो लाभः प्रत्युत विशिष्टशब्दानां विशिष्टा अर्था अपि ज्ञातव्या भवन्ति। तस्मात्तेषां विशदं व्याख्यानमपि नितरामपेक्षितत्वादत्र समुपन्यस्तम्। सत्यमेवैतद् ग्रन्थरत्नं भारतीयकोशग्रन्थानां किमपि नैयून्यं प्रपूरयति संवर्धयति च कोशग्रन्थसम्पादनपरम्पराम्। आशास्यते ग्रन्थमिममनुशील-यद्भिर्विदग्धैः सम्प्रेरितो महाभागः श्रीशास्त्रिवर्योऽवश्यमेव सम्पूर्णं विधाय सन्तोषयिष्यति जिज्ञासूनिति तस्य दीर्घायुष्याय पौनः पुन्येन सम्प्रार्थ्यते विश्वनाथः।

३. अभिमन्यु-चरितम् (खण्डकाव्यम्)

सम्पादकः—डॉ० रमागोविन्दत्रिपाठी, अध्यक्षः—पुराणेतिहासविभागस्य, जो० म० गोयनका-संस्कृत-महाविद्यालयः, वाराणसी। प्रकाशकः—विश्व-वाणी प्रकाशन, मातेश्वरी धाम, दुर्गाकुण्ड, वाराणसी। आकारः—डबल क्राउन। पृष्ठानि—१२१। मूल्यम्—३·००।

सप्तसर्गात्मकेऽस्मिन् खण्डकाव्ये ५८६ संख्यकेषु पद्येषु कवनकलापारङ्गतेन रचयित्रा श्रीजयगोपालशर्मणा महाभारतादिषु प्रथितमभिमन्योश्चरितमुपनिबद्धं यद्धि ग्रन्थनाम्नैव सुस्पष्टम्। किन्तु रसगुणालङ्काररीतिप्रभृतीनां काव्यतत्त्वानां नैकच्छन्दसाञ्च यथोचितं सन्निवेशात् सुप्रथितेऽपि कथावस्तुनि वैदग्ध्या विच्छित्तिविशेषः समारोपितः। अत एवात्र 'सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः' इति सदुक्तिः सङ्गच्छते।

छन्दःसु वसन्ततिलकोपजाति-मन्दाक्रान्ता-भुजङ्गप्रयात-पञ्चचामरप्रभृतीनि विशेषेणोल्लेख्यानि। वस्तुतश्चतुर्थसर्गं यावदेवाऽभिमन्योरैहिकमितिवृत्तमस्ति, तत्पश्चात्तु तद्वधेन शोकसन्तप्तस्यार्जुनस्य जयद्रथवधप्रतिज्ञोपनिबद्धा तथाऽन्ते विजयश्रिया सभाजयन्नर्जुनं कविः काव्यं समापयति।

खण्डकाव्यस्यास्य भाषा भावानुकूला, सुगमा प्रवाहमयी चास्ते। करुण-वीर-शान्त-रसानां यथास्थानमुपन्यासः सहृदयानां चेतांसि समावर्जयितुमलम्। प्रसादगुणमहिम्नाऽर्थाऽवबोधः सर्वत्र निर्बाधः। काव्यमिदं सुसम्पाद्य डॉ० त्रिपाठिमहोदयाः काव्यपीयूषपान-लोलुपान् सचेतसो रसिकान् बहूपकृतवन्त इति भूयो-भूयो धन्यवादैः सभाजयितव्याः।

—विद्याधरद्विवेदी

समीक्षणार्थं प्राप्तानि पुस्तकानि

१—साहित्यसुधालहरी (निबन्धसमुच्चयः)
२—मयूखदूतम् (खण्डकाव्यम्)
३—लक्ष्मीशतकम् (स्तोत्राणि)
४—मङ्गलमालिका ,,
५—शौरिशौर्यम् (रूपकम्)
६—अकिञ्चनकाञ्चनम् (लघुप्रेक्षणम्)
७—नाट्यपञ्चगव्यम् (लघु-रूपकसङ्कलनम्)
८—आर्यान्योक्तिशतकम्
९—नवाष्टकमालिका (स्तोत्रम्)
१०—विद्योत्तमानाटकम्
११—अनुसूयाचरितनाटकम्

निवेदना—स्वासां नूतनकृतीनां परिचयाय समालोचनाय चाभिनवसाहित्यप्रणेतृभिरेकैकस्य पुस्तकस्य **प्रतिद्वय**मवश्यं प्रेषणीयमिति सानुरोधं निवेद्यते ।

कार्यालय-समाचाराः

१—आदिवासिक्षेत्रे संस्कृतप्रचारकार्यम्—

ऐषमः कार्यालयसञ्चालकैः श्रीपण्डितवासुदेवद्विवेदिशास्त्रिमहोदयैः परमार्थसुधा-सम्पादकानां डॉ० सत्यनारायणशर्मणां तथा तत्सञ्चालकयोः श्रीसोहनलालबहल-श्रीरोशनलालशर्मणोश्च सहयोगेन विहारप्रदेशस्य रांचीसमीपवर्तिनि आदिवासिक्षेत्रे संस्कृत-प्रचारकार्यं सम्पादितम् । अस्मिन् प्रसङ्गे सितम्बरमासस्य २२ तारिकात आरभ्य नवम्बरमासस्य ६ तारिकापर्यन्तं रांची-बुन्डू-मुडहू-खूँटी-चक्रधरपुर-चाईबासा-डाल्टनगञ्ज-प्रभृतिस्थानेषु भ्रमणं विधाय तत्रत्यैर्नागरिकैस्तथा शिक्षासंस्थाभिश्च सह सम्पर्कं संस्थाप्य तेषु तेषु स्थानेषु विशेषतश्च आदिवासिसमाजे संस्कृतप्रचारसम्बन्धे चर्चा कृता तदनुकूलवातावरण-निर्माणाय प्रयत्नो विहितस्तथा केषाञ्चन सहयोगिनामपि सङ्ग्रहो व्यधायि । अस्यां यात्रायां मुख्यं निवासस्थानं मुडहूनगरे आसीत्तथा मुख्यसहयोगिनश्च श्रीरोशनलालशर्माण आसन् येषां साहाय्येन सर्वमिदं प्रचारकार्यं सम्पन्नम् ।

२—श्रीमातृजन्मशताब्दीसमारोहप्रसङ्गे संस्कृतप्रचारकार्यम्—

सर्वेषामपि संस्कृतज्ञानां सुविदितमिदं यदतीते मासत्रयात्मके काले पाण्डिचेरीस्थस्या-रविन्दाश्रमस्य प्रेरणया तथा विश्वहिन्दूपरिषदश्च सहयोगेन श्रीमातुर्जन्मशताब्दी सङ्गे सम्पूर्णेऽपि देशे एकशतसंख्यकानि संस्कृतसम्मेलनानि सम्पन्नानि तथा एकोत्तरशततमात्मकं सम्मेलनं विश्वसंस्कृतसम्मेलननाम्ना प्रयागक्षेत्रे २४ जनवरीदिनाङ्के महता समारोहेण सम्पन्नम् । एतस्मिन्नभूतपूर्वे संस्कृतप्रचारात्मके देशव्यपिन्यनुष्ठानेऽपि उभयसंस्थयोर-नुरोधेन श्रीद्विवेदिमहोदयैः सहयोगो प्रदत्तः । अस्मिन् प्रसङ्गे १६ नवम्बरत आरभ्य २५ जनवरीपर्यन्तं-दिल्ली-जबलपुर-कानपुर-भिवानी-बीकानेर-रांची-प्रयागप्रभृतिषु स्थानेषु भाषणादिना साहाय्यं विहितम् ।

३—अ० भा० संस्कृतसम्मेलने सहयोगप्रदानम्—

उत्तरप्रदेशस्य पूर्वाञ्चलवर्तिनो देवरियाजनपदस्य संस्कृतानुरागिभिः सम्प्रति एकस्य अ० भा० संस्कृतसम्मेलनस्य मार्चमासस्य द्वितीये सप्ताहे अनुष्ठानाय प्रयत्नो विधीयमानोऽस्ति । तदिदानीं श्रीद्विवेदिमहोदया एतस्यैव सम्मेलनस्य सफलतायै प्रयतमाना वर्तन्ते ।

—विद्याधरद्विवेदी



नगरे नगरे ग्रामे ग्रामे विलसतु संस्कृतवाणी
सदने सदने जन-जन-वदने जयतु चिरं कल्याणी।
सत्य–शील–सौन्दर्य–समीरा ज्ञानजला गतिसारा
छल-छल कल-कल प्रवहतु दिशि दिशि पावन-संस्कृतधारा॥



Shri Hari Prasad Lohia

Alliance Mills (Lesses) Pvt. Ltd.

18 Netaji Subhas Road

CALCUTTA--1

द्वारा

सुरभारती--सेवायै



सादर-समर्पणम्



भद्रैषां लक्ष्मीर्निहिताधि वाचि

(१)

वृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।
यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ॥

(२)

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥

(३)

यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम् ।
तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते ॥

(४)

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः ॥

(५)

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥

(६)

यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।
यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम् ॥

(७)

सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सखायः ।
किल्विषस्पृत्पितुषणिर्ह्येषामरं हितो भवति वाजिनाय ॥

—ऋग्वेदात्—१०/६/७१

परमार्थसुधा

(त्रैमासिक-संस्कृत-पत्रिका)

वर्षस्तृतीयः * अङ्कस्तृतीयः

चैत्र–वैशाख–ज्येष्ठमासाः

संवत्सरः-२०३६

परमार्थसुधा

त्रैमासिक-संस्कृत-पत्रिका

भद्रैषां लक्ष्मीर्निहिताधि वाचि

(१)

वृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।
यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ॥

(२)

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥

(३)

यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम् ।
तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते ॥

(४)

उत त्वः पश्यन्न ददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम् ।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः ॥

(५)

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु

परमार्थसुधा

(त्रैमासिक-संस्कृत-पत्रिका)

वर्षस्तृतीयः * अङ्कस्तृतीयः

चैत्र-वैशाख-ज्येष्ठमासाः

संवत्सरः-२०३६

सम्पादकः — श्रीसत्यनारायणशर्मा

सहसम्पादकः — श्रीवासुदेवद्विवेदी शास्त्री

प्रकाशकः
श्रीसोहनलालः
मन्त्री, परमार्थन्यासः
मुडहू, राँची (विहार)

●

प्राप्तिस्थानं, पत्र-लेख-मूल्यादि-प्रेषणसङ्केतश्च—
श्रीविद्याधरद्विवेदी
व्यवस्थापकः – परमार्थसुधा
सार्वभौम-संस्कृत-प्रचार-कार्यालयः
डी० ३८।११०, हौजकटोरा, वाराणसी
(उत्तर-प्रदेशः), दूरभाषः – ६६०२१

●

वार्षिकं मूल्यम्–दश रूप्यकाणि
विदेशेषु – दश डालराणि

●

मुद्रकः
बैजनाथ प्रसाद
कल्पना प्रेस
रामकटोरा रोड, वाराणसी।

विषया लेखकाश्च



परमार्थसूक्तयः

कस्मै देवाय हविषा विधेम

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥२॥

यः प्राणतो निमिषतो महित्वैक इन्द्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥३॥

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥४॥

येन द्यौरुग्रा पृथिवी च दृळहा येन स्वः स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥५॥

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥६॥

—ऋग्वेदात् १०।१०।१२१

पाणिनियुगे लिपिज्ञानमुद्दिश्य प्रतीच्ये जगति पर्यालोचनम्

श्रीसत्यनारायणशर्मा

ज्ञानालोकस्योपासनार्थं लेखनक्रियाया महत्त्वमक्षुण्णमप्रतिहतञ्च विद्यते। आचार्यसन्निधिरुपकरोति, परं ग्रन्थाभावे ज्ञानार्जनसाधनाया मुकुलप्रस्फुटनं दुष्करायत एव। साभ्यतिकसांस्कृतिकप्रगत्योदु ष्करत्वं नास्त्यतदर्थं लिपिज्ञानाभावे। मानवसभ्यताया इतिवृत्ते लेखनक्रियायाः स्थानस्य गरिमाणं न कोऽपि निराकर्त्तुं शक्नुते। खिस्तप्राक्तनभारतस्य साभ्यतिकसांस्कृतिकप्रगत्योर्महार्घत्वन्तु मुक्तकण्ठेन सर्वे पश्चिमीयविद्वांसः स्वीचक्रुः, परमूनविंशतिशतक एवंविधा विद्वांसोऽप्यवलोक्यन्ते स्म ये पाणिनीयकाले पाणिनीयकालात्पूर्वञ्च भारतवर्षे लेखनकार्यस्यास्तित्वं प्रति सशङ्का आसन्। अस्मिन् सन्दर्भे निर्दिश्यते आचार्यमोक्षमूलरस्यापि मतं यदसौ ब्राह्मणानामारम्भिकधर्मसम्बन्धिसंस्कृतसाहित्येतिहासाख्ये पुस्तके प्रकटीचकार। परं मतमिदं पाणिनीयव्याकरणस्य सुविख्यातोऽध्येता शर्मण्यदेशीयो विद्वान् थिओदोर गोल्डष्टय् कर एकषष्ट्यधिकाष्टशताधिकसहस्रतमे खिस्तीयाब्द एव स्वके निबन्धे सुतीक्ष्णयुक्तिभिः खण्डयाञ्चकार। असौ महर्षिं पाणिनिं तस्याष्टाध्यायीञ्चोद्दिश्य यल्लिलेख तत्र प्रकटितमतमद्यापि प्रतीच्यजगतो विद्वद्भिरादृियते, अनुसन्धित्सूनां सुरगवीव्याकरणमहार्णवे प्रविविक्षूणां मनांसि आप्याययति च। कात्यायनं पतञ्जलिञ्चोद्दिश्य लिखिते पुस्तके, यस्य प्रकाशनं भारते वाराणस्यां बभूव, आचार्यकीलहोर्नो भूमिकायां विद्वांसमिमं भूरिशः प्रशंसन्नस्य पाणिनीयाष्टाध्यायीपरिशीलनं श्लाघमानो विदुषोऽस्य महाभाष्यानुशीलनस्य धैर्यं, सूक्ष्मतां, सर्वाङ्गीणताञ्च प्रख्यापयामास। शतवर्षानन्तरमप्याचार्यगोल्डष्टय् करेणाधिगतं पाणिनीयव्याकरणस्य पातञ्जलमहाभाष्यस्य च ज्ञानं पश्चिमीयजगति न कोऽप्यतिशेत इति कीलहोर्नाख्यो विद्याविशिष्टोऽध्यापकः सदार्ढ्यं मेने।

यस्मिन् युगे यवनदेशेऽफलातूनोऽरस्तू वा जिजीव तदा सांस्कृतिकदृष्ट्याऽद्भुतामनतिशायिनीं प्रगतिं दर्शयतो भारतस्य निवासिनो विद्वांसो लेखितुं न शेकुर्लिपेरस्तित्वाभावा

दिति निष्कर्षणमाचार्यगोल्डष्टयूकरं विस्मापयते स्म । विदुषोऽस्य दृष्टौ कल्पनेयं सुदुष्करा यल्लेखनज्ञानविरहितैका जातिः साभ्यतिकक्षेत्रे ईदृशीमद्भुतामुन्नतिं पुराकाले कृतवती। सूत्राणां वेदविभागब्राह्मणानाञ्च युगेभ्योऽपि प्राक् संहितायुगे भारते सभ्यजीवनस्य दर्शनं बोभूयते । हेम्नो भूषणान्यासन्, स्ववयो रक्षार्थमायुधान्यपि निर्मीयन्ते स्म, चेतसः श्रान्त्यपनोदनार्थमात्मप्रसादनार्थं शिवेतररक्षणार्थञ्च सङ्गातयन्त्राणि खलु निचीयन्ते स्म, शर्मसम्पादयित्री कला आराध्यते स्म, द्रुतगामिस्यन्दनाः सञ्चाल्यन्ते स्म, व्याधिनिवारणार्थमौषधानि प्रस्तुतीक्रियन्ते स्म; कालविभाजनस्य विलक्षणसूक्ष्मत्वमासीद् विस्मयावहं, सम्पत्तेरादानप्रदानार्थं क्रयविक्रयप्रथापि नासीदविदिता । किमिदं तर्कानुमतमस्ति यद् युगादस्माद् बहुशतकानन्तरं भारतवर्षस्याप्रतिमो वैयाकरणो यो व्याकरणशास्त्रस्य सर्वाधिकपाण्डित्यद्योतिनीं कृतिं रचयामास, लिपिज्ञानानभिज्ञो बभूव ? इत्थमाचार्यो गोल्डष्टयूकरः पुराकालिकभारते लिपिज्ञानानस्तित्वमतं ध्वंसमानो बहुविधतर्कैः स्वमतं साधयति । सामाजिकव्यवस्थाविकसनदृढीकरणस्य यद् रूपं पाणिनीयसूत्रेष्ववलोक्यते तत् प्रति चक्षुषी निमील्यैव खल्वित्थमूहितुं पार्यते ।

पाणिनीयव्याकरणस्याध्येतारो जानन्त्येव यच्चतुर्थपादस्य प्रथमाध्याये ऊनपञ्चाशं सूत्रमस्ति यवनानीति । शब्दस्यास्य वार्त्तिककारो महर्षिः पतञ्जलिश्चोभावेव यवनानां लिपिरित्यर्थं चक्रतुः । आचार्यो गोल्डष्टयूकरः स्वके निबन्धे स्वमतं द्रढयितुं सूत्रमिदमुद्धरन् पृच्छति — किमिदं सम्भवं यद् गान्धारनिवासी पाणिनिर्यद्यसौ म्यूलरमतानुसारं दारियुसकालानन्तरं संसारेऽस्मिन्नुवास, पारस्यदेशे लेखनक्रियासीदिति ज्ञानादनभिज्ञो बभूव ? यदि नहि, तर्हि किमसौ स्वव्याकरणरचनासु ज्ञानस्यास्योपयोगं नाकरिष्यत्, यद्यसौ प्रागेव लेखनक्रियानिष्णातो नासीत्; पारस्यलिपिज्ञाननिरपेक्षः । गोल्डष्टयूकरस्य मतानुसारं यवनानीति सूत्रं पारस्यदेशीयलिपिं सूचयति या दारियुसकालात्पूर्वमपि प्रचलिताऽऽसीत् । भारतीयानां लिप्या लिपेरस्या यदसादृश्यमासीत्तदष्टाध्यायीप्रणेतारं यवनानीतिसूत्ररचनायै किल प्रेरयामास ।

ननु लिपिकार एकल एव शब्दोऽस्ति किं यः पाणिनेर्लेखनक्रियाज्ञानमभिसूचयति ? मैवम् । अष्टाध्याय्यां तृतीये पादे द्वितीयाध्याय एकविंशतितमे सूत्रे शब्दोऽयं लभ्यते । आचार्यो गोल्डष्टयूकरोऽत्र विषये मोक्षमूलरस्य मतं प्रबलयुक्तिभिरचखण्डत । न केवलं लिपिकारः, अष्टाध्याय्यां सन्ति बहवः शब्दा यैः पाणिनीययुगे लेखनक्रिया प्रचलिताऽऽसीदिति मतं दृढीभवति । अपरशब्दानामभावेऽप्येक एवैवंविधः शब्दस्तु भ्रान्तिनिरसनार्थमलम् । ननु मोक्षमूलरो नासीदत्र अविनेयः, असौ स्वकं पक्षपातराहित्यं निबन्धावसाने स्पष्टयाम्बभूव—'अपि वा मया ब्राह्मणेषु सूत्रग्रन्थेषु च कतिपये शब्दा अनवलोकिता येषु पाणिनिप्राक्वने भारते वर्षे लिपिज्ञानास्तित्वस्य प्रमाणानि प्राप्यन्ते । तेषां गोपनं नासीन्मदीये मनसि ।

आचार्यो गोल्डष्टयूकरस्तु पाणिनीयकृतौ न केवलमेकमेव सूत्रमेवंविधमद्राक्षीत्, स्वके निबन्धेऽसौ बहूनि पदानि व्याकुर्वाणः स्वमतं दृढीकरोति यन्महामुनिः पाणिनिर्नासीत् केवलं लेखनकलावित्तस्य व्याकरणरचनाकौशलं लिखिताक्षरप्रयोगं विना सम्भवं नाभविष्यत् ।

पुराकालिके भारतीयवाङ्मये पुस्तकमसिपत्रादिशब्दानामभावो, वैदिकसूक्तेषु तेषामनुपस्थितिर्लेखनकलानभिज्ञतां सूचयतीति मोक्षमूलरस्यापत्तिं निराकरिष्णुर्गोल्डष्टयूकरो बहुविधतर्कानुपन्यास्यत् । पाणिनेरुद्देश्यमासीद् व्याकरणस्य रचना । चिकीर्षितमिदमवाप्तुकामेन मुनिना ऐतिह्यदृष्ट्योपयोगिशब्दा अपि अनायासेनैव प्रयुयुजिरे, परमनुमितिरियं नास्ति तर्कसम्मता यत् सूत्रेष्वनुपलब्धशब्दानां भाषास्वप्यभावः स्यात् । महर्षिपाणिनेश्चिकीर्षितमादर्शव्याकरणस्य विधिरासीन्न तु तदानीन्तनलोकसंस्थितेश्चित्रणम् ।

गोल्डष्टयूकरः पुस्तकलेखनीलेखनक्रियादिशब्दानामभावारोपं निरस्यन् स्वके निबन्धे पाठकानां ध्यानं लिपिशब्दस्य मूलं लिब्धातुं प्रत्याकर्षति । अधि इङ् अथवा वच् धातोः प्रयोगो लिखितकृतीनामुपस्थितिं न प्रमाणीकरोत्यत्रासौ मोक्षमूलरस्य तर्काद् विसंवदतीति चेन्न । इदमप्यसौ उररीकुरुते यदनुवाकप्रश्नमण्डलपाठवर्गसूक्तादिशब्दानां लातीनिशब्देन लिबरेण सह यवनदेशीयशब्देन बिब्लोसेन वा साम्यं नास्ति ययोरर्थौ स्तः क्रमशो विटपाभ्यन्तरस्य वल्कलं पैपिरसनाम्नो द्रुमस्याभ्यन्तरवल्कलञ्च । परं प्राचीनभारतीयवाङ्मये पुस्तकार्थद्योती पुस्तकखण्डद्योती वा कश्चिदपि शब्दो नोपलभ्यते यस्य लातीनियवनशब्दैः तुलना सम्भवा स्यादित्यूहनमसौ सदाढर्यं प्रत्यादिदेश ।

आचार्यमोक्षमूलरस्यैव कथनेन सन्दर्भेऽस्मिन्नसौ तस्य मतं खण्डयति । मोक्षमूलरो ब्राह्मणानां मौखिकपरम्परया ग्रन्थसंरक्षणसिद्धान्तं समर्थयते परं पटलशब्दकारणात्सूत्रप्रणेतॄणां लेखनकार्याभिज्ञतामनुमन्तुं किञ्चिदुत्सहते स्म । ब्राह्मणानां विभाजने पटलशब्दाभावः सूत्राणां विभाजने पटलशब्दप्रयोगो ब्राह्मणयुगे लेखनक्रियाभावं दर्शयतीति मन्वानो मोक्षमूलरोऽत्र पूर्णतया काण्ड इति शब्दं विसस्मार । पटलशब्दमसौ लिबेरशब्दस्य बिब्लोसशब्दस्य च समानार्थकं मेने । तस्मात् पुस्तकार्थकं तैत्तिरीयसंहितायां तैत्तिरीयब्राह्मणेषु च ग्रन्थविभाजनमुद्दिश्य प्रयुक्तं काण्ड इति शब्दं प्रति गोल्डष्टयूकरः पाठकानामवधानं समैहिष्ट । पश्चाद्वर्तिनि काले तु काण्डशब्दस्य पुष्कलः प्रयोगो दृश्यते । काम्येष्टिकाण्डः, पौरोडाशिककाण्डः, आग्नेयकाण्डो, होत्रकाण्डोऽध्वर्युकाण्डो, यजमानकाण्डस्सत्रकाण्डो वा । काण्डशब्दः प्रतीच्ये जगति पुस्तकार्थं प्रयुक्तशब्दवदेव शब्दः ।

[२]

पाणिनिकालिके भारते वर्षे लिपिज्ञानमुद्दिश्याचार्यो मोक्षमूलरसूत्रग्रन्थशब्दयोर्यमर्थञ्चकार तं प्रत्यादिशन्नाचार्यो गोल्डष्टयूकरस्तु सूत्रग्रन्थशब्दाभ्यां पुराकालिके भारते पाणिनियुगे पाणिनि-

प्राक्तनयुगे च लेखनक्रिया प्रचलिताऽऽसीदिति तथ्यं पुष्णाति। मोक्षमूलरस्तु नियमपङ्क्तिग्रथनं निबन्धरचनायां विचारगुम्फनमतिरिच्य नान्यत्पश्यन् ग्रन्थतोऽर्थतश्चेति शब्दद्वयं व्याचिख्यासुर्विवृणुते 'परवर्त्तिनि भारतीयसाहित्ये तु ग्रन्थशब्दः पुस्तकाय प्रयुज्यते स्मेति सत्यं, ग्रन्थस्य नासीदेवंभूतोऽर्थः।' प्रस्तुतं गोल्डष्टयूकरस्सूत्रशब्दस्य मोक्षमूलरेण विश्लेषणमतर्कसहं मत्वा प्रत्याचचक्षे। सूत्रेति शब्दस्य व्यवहारस्तु ग्रन्थाय सूत्राय द्वाभ्यामेव शास्त्रेषु दृश्यते। कतम आसीत्प्राक्तनः? काशिकावृत्तौ महर्षेः पाणिनेरष्टाध्यायीमुद्दिश्य गणसूत्रमित्येकवचनात्मकमभिधानं प्रयुज्यते; पञ्चसूत्राणि चोद्दिश्य बहुवचनस्य प्रयोगोऽपि लभ्यते-पञ्चभिश्च सूत्रैरात्मनेपदमिति। महर्षिपतञ्जलिः पाणिनीयव्याकरणभाष्यस्योपोद्घाते बहुवचनं प्रयुयुजे, सूत्राणि चाप्यधीयान इष्यते वैयाकरण इति। परं स्वयं महर्षिः पाणिनिस्तु सूत्रेतिशब्दं नियमसमाहारायैव प्रयुयुजे, न तु नियमविशेषाय। दर्शनीये स्तश्चतुर्थाध्यायस्य द्वितीयपादे पञ्चषष्टितमं सूत्रं सूत्राच्च कोपधाच्चतुर्थाध्यायस्य तृतीयपादे दशाधिकशततमं सूत्रञ्च यत्रासौ भिक्षुनटसूत्रयोरिति लिलेख। चतुर्थाध्याये द्वितीयपादे षष्टितमे सूत्रे पञ्चमाध्याये प्रथमपादेऽष्टपञ्चाशसूत्रे समसनहेतुत्वान्नास्ति वचननिर्धारणं सुस्पष्टं परं वार्त्तिके काशिकायाञ्च यो हि शब्दप्रयोगो लभ्यते तमनुस्मरन्नाचार्यो गोल्डष्टयूकरोऽत्रापि सूत्रेति शब्दस्यैकवचनत्वमेव निष्पादयति। कल्पसूत्रमधीते, कल्पसूत्रम्, अष्टाध्याय्याः परिमाणमस्य सूत्रस्याष्टकं पाणिनीयमिति। पातञ्जलमहाभाष्येऽप्येकवचनप्रयोगो वीक्ष्यते—शोभना खलु पाणिनेः सूत्रस्य कृतिः। इत्थं गोल्डष्टयूकरः प्रमाणपुरस्सरं संशयच्छेदितया सूत्रेति शब्दस्य मौलिकार्थं निश्चिनोति। पुस्तकाय प्रयुक्तः शब्दोऽयं पटलकाण्डवदेव वस्तुन्याधारितो, न त्वदृश्यभावाधारितः। लन्दनस्थे पेरिसस्थे च प्राचीनग्रन्थसंग्रहागारे प्राचीनतालपत्रीयसंस्कृतपाण्डुलिपयस्सूत्रेणैवोपनिबद्धाः सन्ति। ग्रन्थरक्षणस्य पुरातनपरम्परामिमां भारतीया दीर्घकालं यावद् ररक्षुरिति नास्त्यविदितमैतिह्यरसाकाङ्क्षिणाम्। पद्धतेरपरिवर्त्तनमवलोक्यते विभिन्नासु सभ्यतासु पारम्पर्येण, न तु श्रैष्ठ्यात्। कतिचिच्छतकपुरातनानां हस्तलिखितग्रन्थानां स्वरूपमिदं परिचाययति अजनाभवर्षस्य सभ्यतायाः प्राचीनतमयुगस्यापि ग्रन्थनिबन्धनपद्धतिम्। जर्मनभाषायां व्यवहृतस्य बांदशब्दस्य व्यवहारं सूत्रेति शब्दवदेव दिदृक्षमाणोऽनुसन्धाताऽसौ सूत्रग्रन्थयोर्भावसाम्यं पुष्णाति।

सूत्ररचनायाश्चिकीर्षितमासीत्केवलं स्मृतिसौलभ्यमिति धारणां गोल्डष्टयूकरोऽञ्जसा निराकुरुते। मोक्षमूलरस्य मतानुसारमेवंविधसाहित्यसृष्टिः केवलं भारतीयगुरुकुलेषु किल सम्भवा। समग्रग्रन्थकण्ठस्थीकरणानन्तरं भाष्यसाहाय्येनार्थोपलब्धिः। मोक्षमूलरेण विहितस्य सूत्ररचनाहेतुनिर्देशस्यासमीचीनतां निर्दिशन् गोल्डष्टयूकरो नैजं मतं निरदिक्षत्। पुराकालिकभारतीयविदुषां छात्राणाञ्चाद्भुतस्मृतिसामर्थ्यमत्र नास्ति विचारणीयम्। यस्मिन् युगे वेदाः कण्ठस्थीक्रियन्ते स्म, तदा सूत्ररूपेण शब्दानां सङ्कुचने किं प्रयोजनमासीत्? शब्दविस्तरं

परित्यज्याल्पैरेव शब्दैर्भावप्रकटीकरणानन्दस्य हेतुर्नासीत् स्मृतिसौलभ्यं, ग्रन्थलेखनोपयोगिपत्राणामपर्याप्तिरेव हेतुभूता। अतस्तु सङ्क्षिप्तीकरणस्यैवंविधः प्रयासः। वैदिकसूक्तानां यज्ञीयब्राह्मणानाञ्च सूत्ररूपत्वं नासीत् सम्भवं, परं व्याकरणस्य दर्शनस्य वा रचना रूपेऽस्मिन् सम्भाव्याऽऽसीत्। नहि सर्वे सूत्रकाराः सामग्रीणामभावात् सूत्राणि रचयितुं विवशीकृताः। अनुकरणपरायणा अपि ग्रन्थकाराः सूत्राणि रचयाञ्चक्रुः। सूत्राणां रूपवैभिन्न्यमधिजिगमिषन्नसौ प्रतीचीनविद्यानुरागी पाणिनीयसूत्रे प्रौढगभीरसङ्क्षेपमद्राक्षीत्, बौद्धानां सूत्रेषु खलु श्रमावहं वाक्प्रपञ्चम्।

सूत्रशब्दवद् ग्रन्थशब्दोऽपि लिखितपुस्तकार्थं प्रयुज्यते स्म। आचार्यो बेवरो यः स्वके भारतीयसाहित्येतिहासव्याख्यानसंग्रहे महर्षिं पाणिनिं ख्रिस्तस्य द्वितीयशतके स्थापयितुं येते स्वके भारताध्ययनमित्याख्यस्य ग्रन्थस्य चतुर्थे भागे पाणिनीयग्रन्थशब्दस्य पुस्तकपर्यायतां स्पष्टत एव स्वीचकार, बटलिङ्करोथयोः ग्रन्थपदस्य रचनार्थत्वमुद्धरन्। उद्धरणस्य हेतुं निर्दिशन् गोल्डष्टयूकरो हास्यरसोत्पादनार्थं पूजार्थमिति शब्दं प्रयुयुजे। मोक्षमूलरोऽष्टाध्याय्याश्चत्वारि सूत्राण्युद्धरति येषु ग्रन्थशब्दो विद्यते, परं चतुर्थाध्यायस्य तृतीयपादस्य सप्ताशीतितमे सूत्रे ग्रन्थशब्दमुद्दिश्यापत्तिं विदधाति। कैय्यटमतमुद्धरन् कृते ग्रन्थ इति सूत्रमपि प्रक्षिप्तांशं मन्यते। गोल्डष्टयूकरोऽत्रासहमतिं दर्शयंल्लिखति—स्मृतिसाहाय्येनानुक्रमणिकया वा कुत्रापि महाभाष्ये चतुर्थाध्यायस्य तृतीयपादस्य षोडशाधिकशततमसूत्रोपरि कैय्यटेन स्वमतं प्रकटितमिति नानुपश्यामि। यद्येवमपि स्यात् तर्हि कैय्यटस्य शङ्काया विशिष्टं महत्त्वं नास्ति यतः पतञ्जलिश्चतुर्थाध्यायस्य तृतीयपादस्य पञ्चाधिकशततमसूत्रस्य वार्त्तिकस्य भाष्यं कुर्वन् सूत्रमिदं स्पष्टतो द्विवारमुद्धरति येन भृशं प्रमाणीभवति यदिदं तस्य युगेऽविद्यत, मनसा कल्पितञ्च नाम नासीत्।

महाभारते ग्रन्थशब्दस्य यः प्रयोगो दृश्यते सोऽपि पुस्तकाभिधेयः। महाभारतस्य पुरातनत्वमुद्दिश्य मोक्षमूलरो वेबरश्च द्वावेवाश्वलायनयुगे महाभारतस्यास्तित्वं स्वीचक्रतुः। द्वावेव गृह्यसूत्रात्पदमुद्धरतो यत्र महाभारतमिति पदं विद्यते। महाभारतस्य वर्तमानरूपस्याश्वलायनपूर्वस्थितिं द्वावेव प्रत्याचक्षाते। गोल्डष्टयूकरोऽप्यत्रासङ्गतिं किल नाद्राक्षीत्, परं महाभारतस्य प्राचीनरूपेऽपि ग्रन्थशब्दस्य व्यवहारो लिखितपुस्तकाय बभूवेदमसौ सदार्ढ्यं समर्थयाञ्चक्रे। महाभारतस्य शान्तिपर्वणि इमे श्लोका द्रष्टव्याः—

यदेतदुक्तं भवता वेदशास्त्रनिदर्शनम्।
एवमेतद्यथा चैतन्न गृह्णाति तथा भवान्॥
धार्यते हि त्वया ग्रन्थ उभयोर्वेदशास्त्रयोः।
न च ग्रन्थस्य तत्त्वज्ञो यथावत्त्वं नरेश्वर॥

यो हि वेदे च शास्त्रे च ग्रन्थधारणतत्परः ।
न च ग्रन्थार्थतत्त्वज्ञस्तस्य तद्धारणं वृथा ॥
भारं स वहते तस्य ग्रन्थस्यार्थं न वेत्ति यः ।
यस्तु ग्रन्थार्थतत्त्वज्ञो नास्य ग्रन्थागमो वृथा ॥

अत्र गोल्डष्टयूकरस्य मते भारवहनं स्पष्टतो ग्रन्थस्य लिखितरूपं निर्दिशति ।

[३]

पुराकालिकभारतीयविदुषां कण्ठस्थीकरणप्रवृत्तिकारणादन्यहेतोश्च यैर्विद्वद्भिः पाणिनियुगे पाणिनिपूर्वयुगे च लेखनक्रियाया अस्तित्वमसमर्थितं तेषां मोक्षमूलरवेबरप्रभृतीनां मतं खण्डयन् गोल्डष्टयूकरस्तदानीं लेखनक्रियाया अस्तित्वं प्रमापयितुं ग्रन्थसूत्रादिशब्दानां यद् विवेचनं कृतवान् तद् भवद्भिः श्रुतमेव ।

वर्णशब्दस्यार्थो विवृतिनिरपेक्षः । शब्दोऽयं नास्ति नवीनः, महर्षिपाणिनिना तु बहुव्यवहृतः । पाणिनियुगे लेखनक्रियाया अस्तित्वसमर्थनाय शब्दोऽयं प्रमाणपदवीं भजते। मोक्षमूलरस्तु शब्दस्यास्य प्रामाण्यं विजहौ । वर्णस्य वर्णार्थन्तु अमुना स्वीकृतं परं लिखिताक्षरेण सहास्य सम्बन्धं निराकरिष्णुरसौ ध्वनिना सह वर्णस्य वर्णत्वं साधयितुं चिचेष्टे। स्वमतपुष्टीकरणाय कस्यचिद् यवनदार्शनिकस्य वाक्यमाशिश्रिये । तर्कपद्धत्याऽनयाऽप्रभावितो गोल्डष्टयूकरस्तु अविचलितमतिस्तस्थौ। वेबरोऽपि वर्णेति शब्दं न विसस्मार परं शब्दोऽयं लिपिज्ञानस्य पुराकालेऽस्तित्वं न प्रमाणयतीति मेने । स्वके भारताध्ययनमित्याख्ये पुस्तके स्पष्टत एव स औद्दिष्ट-ध्वनिवैशिष्ट्यं प्रकटयति शब्दोऽयं, लेखनक्रियया नास्त्यत्र कोऽपि सम्बन्धः ।

वेबरमोक्षमूलरयोर्वर्णशब्दार्थप्रतिपत्तिं गोल्डष्टयूकरः सशङ्करूपेण प्रत्यादिशति। स्पष्टार्थं समुपेक्ष्य सादृश्यमौपम्यं वा यत्र प्रतिपद्यते तत्रासौ नितरां सन्दिहानः । वैशिष्ट्येन सह वर्णस्य सम्बन्धस्थापनप्रयासः किमर्थम् ? भारतीयविद्यासम्पदि कृतभूरिपरिश्रमस्य वेबराख्यस्य विदुषोऽप्यूहनममुष्मै त्वरया प्रेरितं प्रतिबभौ ।

गोल्डष्टयूकरो दाढर्येण वर्णशब्दस्य लिखिताक्षरार्थं मौलिकार्थमिति समर्थयाम्बभूव । महर्षिपाणिनिस्तस्य पूर्ववर्त्तिन ऋषयश्च लेखनक्रियां विविदुरिति अक्षराणां सञ्ज्ञेयं पुष्टीकरोति । अत्र कारशब्दोऽपि विचार्यः । अकार, इकार, उकारादयः । वर्णवदेवासौ । आचार्यः कात्यायनोऽत्रायोगं पश्यति, आचार्यः कैय्यटो वर्णस्यार्थमेव विस्तारयति । कात्यायनवदेवासौ कारवर्णयोस्तात्पर्येऽन्तरं दर्शयति । अकार अवर्णो वा, इकार इवर्णो वाऽन्योन्यार्थावलम्बिनौ । अष्टाध्याय्यां, कात्यायनस्य वार्त्तिके, महाभाष्ये च शब्दाविमौ बहुसङ्ख्यकस्थानेषु प्रयुक्तौ ।

तेषां निरीक्षणेन स्पष्टीभवति कारशब्दस्य सर्वस्वरैर्व्यञ्जनैश्च संयोगोऽकारयुक्तैर्वर्णशब्दस्य संयोगस्तु केवलं स्वरैः स्वररहितव्यञ्जनैर्वा ।

ननु उच्चरितस्य लिखितस्य च भेदोऽप्यत्रावधार्यः । उच्चारणार्थं व्यञ्जनानां स्वरसाहाय्यमपरिहार्यं भवति । हकारादिष्वकार उच्चारणार्थो नानुबन्धः । अकारस्येकारस्योकारस्य वा अवर्णेवर्णोवर्णसमानार्थत्वम् । उच्चरितस्वरो लिखितस्वरवदेव भवति । परं व्यञ्जनयुक्तकारशब्दानां प्रयोगः सूत्रेष्वकाररहितव्यञ्जनेभ्यो दृश्यते । अस्माद्धेतोः कारशब्दस्योच्चरिताक्षरत्वं गोल्डष्टयूकरस्य दृष्टावुपपन्नम् । अष्टाध्याय्यां सप्तमाध्याये चतुर्थपादे त्रिपञ्चाशसूत्रे महर्षिः पाणिनिर्वर्णद्वयं निर्दिशति; यीति । अत्र स्वरवियुक्तयवर्णस्योच्चारणमशक्यम् । अतएव गोल्डष्टयूकरो दार्ढ्येण वर्णस्य लिखिताक्षरत्वं समर्थयामास ।

कारवर्णयोः पुराकालिकप्रयोगस्य स्पष्टीकरणार्थं विद्वानसौ काशिकावृत्त्याऽपि स्वमतं पुष्णाति । कारशब्दस्य प्रयोगो लिखितायोच्चारिताय वाऽक्षराय भवति । यदि कार उच्चरितः स्वनः स्यात्तर्हि शब्दस्यासौ समानार्थकः । काशिकायां शब्दसमानार्थक एव । वर्णस्य प्रयोगो न दृश्यते कुत्राप्येवंविधः ।

उच्चरितध्वनौ एकाक्षरादधिकोऽपि सम्भाव्यते, अतः कारस्य प्रयोगः सम्मिश्रध्वनिभ्योऽपि लभ्यते । कैय्यटोऽपीदं निरदिक्षत् । महर्षिः पाणिनिर्वषट्कार इति प्रयोगं कुरुते प्रथमाध्याये द्वितीयपादे पञ्चत्रिंशसूत्रे । एवंविधः प्रयोगो वर्णशब्दस्य कुत्रापि न लभ्यते ।

कारशब्द इत्थं करणवत् । मुनिना कात्यायनेन पतञ्जलिना च वर्णस्य प्रयोगः पाणिनिसूत्रवदेवानुच्चार्यव्यञ्जनाक्षरेभ्य एव कृतः । अनुच्चार्यव्यञ्जनवर्णा अतएव लिखितरूपेणैव विवेच्यन्ते स्म । षष्ठाध्यायस्य चतुर्थपादस्योनपञ्चाशसूत्रमुद्दिश्य कात्यायनो विमृशति । सूत्रेऽस्मिन् येत्यक्षरमुद्दिश्य यकाराय सङ्घातशब्दस्याकारविरहिताय वर्णस्य प्रयोगो विहितः । सप्तमाध्यास्य तृतीयपादस्य पञ्चाशसूत्रस्य वार्त्तिकेऽपि ठकारप्रसङ्गे स्वरयुक्ताय सङ्घातशब्दोऽनुच्चार्याकारविरहिताय व्यञ्जनाय च वर्णशब्दः प्रयुज्यते । सप्तमाध्यायस्य तृतीयपादस्य चतुश्चत्वारिंशत्तमसूत्रस्य वार्तिकेऽप्यकारयुक्तककाराय सङ्घातशब्दः स्वररहिताय व्यञ्जनाय वर्णशब्दं प्रयुयुजे वार्त्तिककारः ।

उपदेशपदमुद्दिश्य पतञ्जलिकृतपरिभाषातोऽपि वर्णपदस्य इत्थम्भूत एवार्थः सम्पद्यते । "अथ क उपदेशः । उच्चारणम् । कुत एतत् । दिशिरुच्चारणक्रियः । उच्चार्य हि वर्णानाह । उपदिष्टा इमे वर्णा इति ।" अत्र महर्षिः पतञ्जलिर्वर्णानुपदिष्टवर्णेभ्यः पृथक्करोति । इत्थं वर्णपदस्य पाणिनिसूत्रे लिखितरूपत्वमुपपद्यते ।

ऊर्ध्वशब्दस्यापि प्रयोगो दर्शनीयः । पश्चादर्थे पदमिदं बहुधा प्रयुज्यते । मनुस्मृतौ नवमाध्याये सप्तसप्ततितमे श्लोके ऊर्ध्वं संवत्सरादिति पाठोऽस्ति । छान्दोग्ये च तत ऊर्ध्वं वक्ष्यामीति । ऊर्ध्वपदस्यार्थोऽस्ति उपरि । सन्दर्भेऽस्मिन् गोल्डष्टयूकरः पुराकालिकभारतीयपाण्डुलिपीर्निर्दिशति । पत्रसमूहस्याधोभागे दृश्यतेऽद्यापि प्राचीनतमभारतीयपाण्डुलिपीनामुपक्रमः। भारतीयपुस्तकेषु यदुपरि विद्यते तदस्ति पश्चाद्वर्ति । उदयपदमप्यत्र स्मरणीयम् । मौलिकार्थस्तु भवति उद्गमनमूर्ध्वगमनं वा, परं ग्रन्थेषु पश्चादर्थेऽपि शब्दोऽयं प्रयुज्यते स्म । पश्चादर्थे केवलं ग्रन्थेष्वेव, नान्यत्र । प्रातिशाख्येषु प्रयोगोऽयं बहुत्र दृश्यते । पाणिनीयव्याकरणस्याष्टमाध्याये चतुर्थपादे सप्तषष्ठितमं सूत्रं खलु द्रष्टव्यम् । अधिकपदमपि पश्चादर्थेऽवलोक्यते । अधस्तनस्य प्रयोगः पूर्वार्थेऽपि भवति स्म, उपरिष्टादिति शब्दस्य पश्चादर्थे। उदाहरणानि कात्यायनस्य प्रातिशाख्ये, प्रातिशाख्योपरि उव्वटभाष्ये, जैमिनीयन्यायमालाविस्तरे चान्वेष्टव्यानि ।

पाणिनीयसूत्रेषु कुत्राप्येवंविधः शब्दो नास्ति येन लेखनक्रियाज्ञानस्य प्रमाणं प्राप्तुं शक्नुम इति मोक्षमूलरस्य मतमाचार्यो गोल्डष्टयूकरोः पाणिनीयपाणिनिकालिकपाणिनिपरवर्त्तिशब्दप्रयोगैः खण्डयाञ्चकार । लिपिज्ञानाभावे इत्थम्भूतस्याद्वितीयस्य व्याकरणस्य रचना न समभविष्यत् ।

संस्कृतस्य यशस्विनो नाटककाराः

प्रो० दिनेशप्रसादपाण्डेयः*

संस्कृतनाटकानामुद्भवः

अतिप्राचीनकालादेव सामान्यजनमनोरञ्जनार्थं नृत्यगीतयोः प्रचलनमासीत्। तत्र च कथासंवादाभिनयानां सामञ्जस्येन क्रमात्क्रमं नाटकानां विकासो जातः, परन्तु मूलतः नाटकानामुत्पत्तिः कदा कथं केन च कृता इत्यस्मिन् विषये विद्वत्सु अनेकमतानि प्रचलितानि सन्ति। अस्मिन् सम्बन्धे प्रायश एकादश वादाः सन्ति तेषु च वैदिकसाहित्ये देवतावादः संवादसूक्तवादः, पुत्तलिकानृत्यवाद इत्येते त्रयो वादा अतिप्रसिद्धाः सन्ति। तत्र च देवतावादे इदं मन्यते यद् भारतीयपरम्परानुसारं देवदानवमानवानां मनोरञ्जनार्थं नाटकस्योत्पत्ति चतुर्भ्यो वेदेभ्यः किञ्चित् किञ्चित् उद्धृत्य अखिलविश्वस्रष्टा ब्रह्मैव कृतवानस्ति। इत्थं विरचितो नाट्यवेदः पञ्चमवेद इति नाम्ना प्रसिद्धो जातः।

संवादसूक्तवादेऽपि इदं मन्यते यत् ऋग्वेदे अनेकानि संवादसूक्तानि प्राप्यन्ते यत्र नाटकेषु प्रयुक्तानि कथोपकथनानीव सूक्तेष्वपि कथोपकथनानि बहुशः प्रयुक्तानि सन्ति। तद् यथा प्रथममण्डले—मरुत्संवादः अगस्त्यलोपामुद्रासंवादः, दशममण्डले उर्वशीपुरूरवासंवादः, यमयमीसंवाद, इन्द्राणीवृषाकपिसंवादः, सरमापणिसंवादश्चेत्येवमादयः बहवः संवादाः सन्ति। एतादृशेषु सूक्तेष्वेव नाटकानां मूल उत्सोऽस्तीति मैक्समूलरादयः पाश्चात्त्यविद्वांसोऽपि मन्यन्ते। डॉक्टरपिशेलादिभिर्विद्वद्भिरुद्भावितेषु पुत्तलिकानृत्येष्वपि नाटकोत्पत्तिमूलं मन्यते। अतिप्राचीनभारते पुत्तलिकानृत्यानामति प्रचार आसीत्। रामायणमहाभारतयोस्तथा सरित्सागरादिग्रन्थेषु पुत्तलिकानृत्यस्य बहुश उल्लेखो दृश्यते। पुत्तलिकानृत्यं च कलाकुशलः कश्चित् सूत्रसाहाय्येन कारयति स्म। इत्थं च सूत्रं धारयति सः सूत्रधार इति कथ्यते। संस्कृतनाटकेष्वपि सूत्रधार इत्येकं प्रमुखपात्रं भवति।

* भूतपूर्वः संस्कृतविभागाध्यक्षः, राँची विश्वविद्यालयः (विहार-प्रदेश)

प्रथमनाटककारस्तत्कृतीनाञ्च परिचयः

संस्कृतनाट्यप्राङ्गणेऽनेके कवयः सन्ति तेषु प्रमुखनाटककाराणामेव चर्चात्र क्रियते। संस्कृतनाट्यसाहित्ये कविताकामिन्या हासस्वरूपस्य भासस्य नाम सर्वप्रथमं महता समादरेण गृह्यते। कविकुलगुरुः कालिदासोऽपि स्वमालविकाग्निमित्रनाटके प्रस्तावनायामेव कथयति— प्रथितयशसां भाससौमिल्लककविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कुतो मे बहुमानः। एतेन सर्वथा स्पष्टं भवति यत्कालिदासोऽपि तस्य महत्त्वं दक्षतां च स्वीकरोति। भासस्य समयः ईश्वीयपूर्वं चतुर्थशताब्दीति विद्वद्भिरङ्गीक्रियते। चिरकालं यावत् भासस्यैकापि रचना प्राप्ता नासीत्, परं द्वादशाधिकोनविंशतिशततमे ईश्वीयवर्षे त्रिवेन्द्रमनगरे महामहोपाध्याय-पण्डित-गणपतिशास्त्रिणां प्रयासेन भासस्य त्रयोदशनाटकानां प्रकाशनमवलोक्य विद्वत्सु महानानन्दो जातः। एतानि सर्वाण्यपि नाटकानि अतिलोकप्रियाणि अभिनेयानि च। एतानि सर्वाणि नाटकानि मूलस्रोतोदृष्टया त्रिषु वर्गेषु विभाजयितुं शक्यानि। तत्र रामकथामवलम्ब्य द्वे नाटके स्तः—प्रतिमानाटकम् अभिषेकनाटकञ्च। महाभारतकथामवलम्ब्य लिखितानि नाटकानि सप्त १—मध्यमव्यायोगः २—कर्णभारः ३—उरुभङ्गम् ४—बालचरितम् ५—पञ्चरात्रम ६—दूतवाक्यम् ७—दूतघटोत्कचनाटकम् च। तदानीन्तनप्रचलितलोककथामवलम्ब्य रचितानि चत्वारि नाटकानि सन्ति १—प्रतिज्ञायौगन्धरायणम् २—स्वप्नवासवदत्तम् ३—अविमारकं तथा ४—दरिद्रचारुदत्तम्।

प्रतिमानाटके सप्ताङ्काः सन्ति येषु रामवनवासादारभ्य रावणवधं यावत् कथा वर्णिताऽस्ति। अभिषेकनाटके षडेवाङ्काः सन्ति। अस्मिन् किष्किन्धातो युद्धकाण्डं यावत् कथानकं सङ्गृहीतमस्ति। बालचरितनाटके भगवतः श्रीकृष्णस्य बालचरितं वर्णितमस्ति। कर्णभार एकाङ्किनाटकमस्ति। अस्मिन् कर्णेनेन्द्राय कवचकुण्डलयोर्दानं वर्णितमस्ति। उरुभङ्गं मध्यमव्यायोगो दूतवाक्यं दूतघटोत्कचञ्चेति चत्वार्यपि नाटकानि एकाङ्कीन्येव सन्ति। उरुभङ्गे द्रौपदीं प्रति दुर्योधनेन कृतस्यापमानस्य प्रतिकारस्वरूपेण भीमसेनकृता दुर्योधनस्योरुभङ्गात्मिका कथा वर्णितास्ति। मध्यमव्यायोगे भीमो दानवरूपे उपस्थिताद् घटोत्कचादेकस्य ब्राह्मणबालकस्य प्राणरक्षां करोति। दूतवाक्ये महाभारतयुद्धारम्भात् पूर्वमेव श्रीकृष्णस्य दौत्यं वर्णितमस्ति। पञ्चरात्रनाटके त्रयोऽङ्काः सन्ति येषु पञ्चसु रात्रिषु एव द्रोणद्वारा पाण्डवानामन्वेषणं वर्णितमस्ति।

प्रतिज्ञायौगन्धरायणे चत्वारोऽङ्काः सन्ति येषु छलेन कारावासं प्रापितस्योदयनस्य मन्त्रिणो यौगन्धरायणस्य बुद्धिकौशलेन कारावन्धात्तस्य मुक्तिरेव वर्णितास्ति। स्वप्नवासवदत्तेऽपि षड् अङ्काः सन्ति तेषु राज्ञा उदयनेन स्वप्ने प्राप्ताया वासवदत्ताया अतिरोचकं वर्णनमस्ति।

अविमारकमपि षडङ्कैर्गुम्फितमेकं नाटकं यत्र अविमारकनामकराजकुमारस्य कुरङ्गीनामिकया राजकुमार्याश्च प्रणयकथा वर्णितास्ति। भासस्य नाटकेषु सर्वाधिकप्रियं स्वप्नवासवदत्तमेव। अत्र च घटनाचक्रवर्णनसङ्गेन सर्वमान्या सत्योक्तिर्गुम्फिता वर्तते-गुणानां च विशालानां सत्काराणां च नित्यशः। वक्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः। तथा च—

कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च॥

चारुदत्तमपि चतुर्भिरङ्कैः समन्वितं नाटकम्। अत्र उदारचेतसं दीनदरिद्रब्राह्मणं प्रति वसन्तसेनानाम्न्या वेश्यायाः प्रगाढप्रेम्णो वर्णनमस्ति। भासनाटकचक्रे एतान्येव त्रयोदश नाटकानि विद्यन्ते यानि इदानीमुपलब्धानि यद्यपि जनश्रुतिरस्ति यदनेन न्यूनातिन्यूनं त्रिंशत् नाटकानि लिखितानि सन्ति। भासस्य नाटकेषु बहुशश्चेतोहराणि पद्यानि समाविष्टानि सन्ति। अस्य भाषातिसरला प्रवाहमयी च वर्तते। शौरसेनीप्राकृतस्य बहुलः प्रयोगो दृश्यतेऽत्र।

भासोत्तरवर्तिनो नाटककाराः

(क) प्राग्युगीनाः, (ख) मध्ययुगीनाः, (ग) आधुनिकयुगीनाश्च।

कालिदासः

भासादनन्तरं महाकविकालिदासस्य नाम सर्वथोल्लेखमर्हति। कालिदासः संस्कृत-साहित्यस्य ज्योतिर्मण्डले सर्वाधिकभासमाननक्षत्रस्वरूपस्तिष्ठति। विश्वसाहित्ये अत्यल्पा एव कवयस्तस्य तुलामर्हन्ति। तस्यातिक्रमणं तु कश्चिदपि कर्तुं न शक्नोति। तत्काव्यमाधुरीप्रभाविता गेटेप्रभृतयो महाविद्वांसोऽपि तस्य प्रशंसां कुर्वन्ति स्म। तस्मै न कदाचित्स्वार्थमयी आत्मश्लाघा रोचते स्म। तस्य विचारः सर्वदा उदार आसीत्, अत एव स मालविकाग्निमित्रे नाटके सबलमुद्घोषितवान्—

पुराणमित्येव न साधु सर्वं न चापि सर्वं नवमित्यवद्यम्।
सन्तः समीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेय—बुद्धिः॥

कविकुलगुरुः कालिदासः कुत्र कदेमां भारतभूमिमलञ्चकारेति विद्वत्सु विवाद्यमेवास्ति। केचिन्मन्यन्ते यत्तस्य समयः ईश्वीयचतुर्थशताब्द्यां भवितुमर्हति परन्तु अन्ये बहवो विद्वांसस्तस्य समयः ईशापूर्वं प्रथमशतके द्वितीयशतके वा भवेदिति मानयन्ति। एतदेव मतं बहुभिः समर्थितम्। तस्य त्रीणि नाटकानि प्रसिद्धानि सन्ति मालविकाग्निमित्रम्, विक्रमोर्वशीयम-भिज्ञानशाकुन्तलञ्च।

मालविकाग्निमित्रनाटके शुङ्गवंशीयनृपस्य अग्निमित्रस्य स्वपत्न्या राजमहिष्या धारिण्याः परिचारिकया मालविकया सह आदर्शप्रेम वर्णितमस्ति। विक्रमोर्वशीयस्य कथावस्तु ऋग्वेदस्य दशममण्डलीयाख्यानात् मत्स्यपुराणीयाख्यानाद्वा गृहीतमस्ति।

परन्तु प्राचीनमाख्यानमपि स्वनाटके नाटकीयकलामण्डितं भवत् सर्वेषां मनो हरति। अस्मिन् कथानके नृपः पुरूरवा उर्वशीं केशिनामकाद् दैत्याद्रक्षति। अस्मिन् रक्षणव्यापारे उर्वश्या हृदि तं प्रति प्रेमोद्भवो जातः। एतादृशस्य प्रेम्णश्चित्रणं कालिदासेन अतिमनोरमशैल्या कृतं वर्तते।

अभिज्ञानशकुन्तलं भारतीय एव नहि अपितु समस्तविश्वसाहित्येऽपि अनुपमं सर्वमनोरमं महार्हरत्नमिव प्रतिभाति। अस्य कथावस्तु महाभारतात् पद्मपुराणाद्वा गृहीतमस्ति परन्तु इदं नीरसं शुष्कमाख्यानं स्वतूलिकया परिष्कृत्य कालिदासः तथा उपस्थापयति यथेदं देशे विदेशे सर्वत्र सर्वप्रियं विद्वन्मनोहारि च भवति। मूलकथावस्तुनि कालिदासेन कृतेष्वनेकेष्वपि परिवर्तनेषु राजनामाङ्कितमुद्राकल्पना तथा दुर्वाससः शाप इत्येतद्द्वयं परिवर्तनं बहुमहत्त्वपूर्णमस्ति। एताभ्यां परिवर्तनाभ्यां वस्तुतो नाटके प्राणसञ्चारः कृतो वर्तते। नग्नप्राया आश्रमवासिनी वल्कलपरिधानधारिणी तन्वी अपि शकुन्तला कालिदासतूलिकयालङ्कृता विविधबहुमूल्यालङ्काराणामभ्यस्तं महाराजदुष्यन्तमपि समाकर्षति स्वसौन्दर्येण। सा तं प्रति अनाघ्रातं नव-विकसितं पुष्पमिव प्रतिभाति। द्वयोर्मध्ये प्रेमोद्भवो जातः किन्तु तत्प्रेम वासनारहितं सात्त्विकमादर्शप्रेमाभवत्। यदा स्वगृहागतामपि शकुन्तलां दुर्वाससः शापप्रभावेण दुष्यन्तो विस्मृत्य परित्यजति तदापि सा तं प्रति आक्रोशं न प्रकटयति किन्तु मौनमङ्गीकृत्य महर्षिमरीच्याश्रमे तपःसाधनानिरता समयं यापयति। कालान्तरे कालचक्रप्रभावाद् द्वयोर्मेलनं जातम्। इत्थं कथावस्तु सर्वमनोरञ्जकं हृदयावर्जकं च भवति। एतदर्थमेव सर्वेषां विश्वसाहित्यनाटकग्रन्थानां मूर्ध्नि विराजते अभिज्ञानशकुन्तलम्। अत एव कथ्यते—

काव्येषु नाटकं रम्यं नाटकेषु शकुन्तला।
तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम्॥

चतुर्थाङ्कीयश्लोकचतुष्टयेऽपि अधोऽङ्कितः श्लोकः सर्वसुन्दरसुरभिकुसुममालायां मध्यमणिरिव विराजते। तद् यथा—

पातुं न प्रथमं व्यवस्यति जलं युष्माष्वपीतेषु या
नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥

अत्र कालिदासो न केवलं साहित्यिकसौन्दर्यं प्रदर्शयति अपितु स्वकीयं गृहस्थाश्रमव्यवहारकौशलमपि प्रकटयति। इत्थमिदं विदुषां हृदयावर्जकभावेन सर्वप्रियया भाषया निखिलचेतोहारिण्या शैल्या च विश्वस्य सर्वानन्यान् नाटकग्रन्थानतिशय्य तिष्ठति। महाकविना गेटेमहोदयेन शकुन्तलायां स्वर्गमर्त्ययोर्मेलनमवलोकितम्।

शूद्रकः

संस्कृतनाट्यसाहित्ये सर्वाधिकरोचकं सामाजिकनाटकं शूद्रकेन कृतं मृच्छकटिकम्। रचयितुः सम्बन्धेऽत्यधिको विवादश्चलति विद्वन्मण्डले। केचित्कथयन्ति यदस्य रचयिता राजा शूद्रक एवास्ति। अन्ये कथयन्ति यदस्य रचयिता कश्चिदन्यो यतोऽस्य प्रस्तावनायामेव लिखितं यत् शूद्रकः अश्वमेधयज्ञं कृत्वाग्निप्रवेशं कृतवान्। यदि शूद्रक एवास्य रचयिताऽभविष्यत् स कथं स्वकीयमग्निप्रवेशमवर्णयिष्यत्। एवमेवान्यानि अपि कतिपयानि मतानि सन्ति। किन्तु अष्टमशताब्द्याः काव्यालङ्कारसूत्रवृत्तिकारेण अस्मान्नाटकात्पद्यमेकमुद्धृत्य तत्पद्यकर्ता शूद्रक एवेति घोषितम्। अन्येऽपि अन्यान्यप्रमाणैरेतदेव मतं समर्थयन्ति। अस्य रचनाकालविषयेऽपि अतिविवादो वर्तते किन्तु बहवो विद्वांसः विभिन्नप्रमाणानि उद्धृत्य मन्यन्ते यदस्य समयः ईशापूर्वं द्वितीयशताब्दी एव भवितुमर्हति। अस्मिन् उज्जयिनीनिवासिनः दरिद्रस्यापि सम्मानितब्राह्मणस्य चारुदत्तस्य परमरूपवतीं प्रेमसर्वस्वस्वीकारिणीं गणिकां वसन्तसेनां प्रति प्रगाढप्रेम वर्णितमस्ति। धनलोलुपाया गणिकाया अपि वसन्तसेनाया दरिद्रचारुदत्तस्य पवित्राचरणैस्तं प्रति आकर्षणं स्वात्मसमर्पणञ्च सर्वथा प्रशंसास्पदमस्ति। अस्य नाटकस्य प्रशंसा पण्डितजवाहरलालमहोदयेन स्वकीये "भारत की खोज" नाम्नि पुस्तके मुक्तकण्ठेन कृतास्ति। तन्मतानुसारमाङ्ग्लभाषाया अमरनाटककारस्य शेक्सपीयरस्य मैकवेथ तथा ओथेलो इत्येते नाटके अपि एतस्य समक्षं निम्ने एव प्रतीयेते। हास्यरसस्याभिव्यञ्जनायामपि एतन्नाटकं सर्वश्रेष्ठं प्रतिभाति। अस्मिन्नाटके यथार्थजीवनस्य गतिशीलतायास्तथा रसमयतायाश्च एकोऽपूर्वसमाहारो वर्तते।

कस्यचिन्निर्धनजनस्य समाजे कीदृशी कष्टमयी दशा भवतीति बहु सुन्दरं वर्णितमस्ति। यथा--

सङ्गं नैव हि कश्चिदस्य कुरुते सम्भाषते नादरात्
सम्प्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते।
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम्॥

मन्ये तुलसीदासेनापि "नहिं दरिद्रसम दुख जगमाहीं" इति कथने अस्मादेव श्लोकात् प्रेरणा गृहीता। संस्कृतनाट्यसाहित्ये महाराजहर्षवर्द्धनस्य नाम सर्वथोल्लेख्यमस्ति। अस्य तिस्रो नाट्यकृतयः सन्ति-प्रियदर्शिका रत्नावली नागानन्दश्च। तत्र प्रथमे द्वे नाटिके तृतीयो नागानन्दः नाटकम्। जयदेवेनायं कविताकामिन्या हर्षः कथितः। नटिकानाटकयोरन्तरं नास्ति। नाटिकासु स्त्रीपात्राणां शृङ्गाररसस्य च प्राधान्यं भवति। भारतस्येतिहासे यथा

हर्षवर्धनः सफलराजत्वेन प्रसिद्धस्तथैव स स्वविद्याबुद्धिवैभवेन संस्कृतसाहित्येऽपि प्रख्यातिमगात् । महाराजहर्षवर्धनस्य समयः ईश्वीयसप्तमशताब्द्या पूर्वार्द्धम् । ततश्च भट्टनारायणस्य वेणीसंहारः । अस्य समयोऽष्टमशताब्द्या पूर्वार्द्धमेव भवितुमर्हति । वीररसप्रधानवेणीसंहारनाटकस्य कथावस्तु महाभारताद् गृहीतमस्ति, यद्यपि भट्टनारायणेन स्वकाव्यकौशलेनात्र महापरिवर्तनं कृतमस्ति । अत्र युधिष्ठिरं केचिद् भीमं केचनान्ये दुर्योधनमेव नायकं मन्यन्ते । तेषु च युधिष्ठिरविषये एव बहुमतं प्राप्तमस्ति । रौद्ररसस्यैकः श्लोकः सर्वैरभिनन्दनीयो वर्तते—

मथ्नामि कौरवशतं समरे न कोपात् दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरु सन्धिं करोतु भवतां नृपतिः पणेन ॥

स्वभ्रातुर्युधिष्ठिरस्य भक्तोऽपि भीमः वीरताप्रदर्शने कथयति—

अद्यैकं दिवसं ममासि न गुरुर्नाहं विधेयस्तव ।

विशाखदत्तस्य मुद्राराक्षसम्

वीररसप्रधानकूटनीतिकनाटकेषु विशाखदत्तेन कृतं मुद्राराक्षसनामकं नाटकं प्रथमं गणनीयमस्ति । वेणीसंहारे भीमस्याक्रोशस्य दर्पस्य च परिणादः श्रूयते किन्तु अस्मिन्नाटके असयो न चलन्ति किन्तु उभयदलीयकूटनीतिविशारदयोर्बुद्धिकर्त्तरिकाः परस्परं व्याघातं कुर्वन्ति ।

विशाखदत्तेनानेका रचनाः कृताः किन्तु केवलमुपलब्धं मुद्राराक्षसमेव । मुद्राराक्षसस्य समयो विभिन्नप्रमाणानि आधृत्य षष्ठशताब्दी मन्यते । अस्य कथावस्तु कूटनीतिपूर्णं विद्यते । राक्षसो नन्दवंशस्य प्रधानमन्त्री आसीत् । नन्दवंशस्य ध्वंसादनन्तरं चन्द्रगुप्त एव भारतस्य सम्राडभवत् चाणक्यस्य बुद्धिकौशलेन । कूटनीतिनिपुणस्य चाणक्यस्य नीत्या नन्दवंशमुन्मूल्य चन्द्रगुप्त एव राज्यसिंहासनं गृहीतवान् । चाणक्यस्य बुद्धिर्विद्युदिव प्रतिक्षणं भासते । चाणक्यो निरन्तरं कामयते स्म सर्वं विनष्टं यदि भवेद् भवेन्नाम मम बुद्धिभ्रंशो न भवेत् । स कथयति —

ये याता किमपि प्रधार्य हृदये पूर्वंगता एव ते
ये तिष्ठन्ति भवन्तु तेऽपि गमने कामं प्रकामोद्यमाः ।
एका केवलमेव साधनविधौ सेनाशतेभ्योऽधिका
नन्दोन्मूलनदृष्टवीर्यमहिमा बुद्धिस्तु मागान्मम ॥

भवभूतिरचितम्—उत्तररामचरितम्

भवभूतिना रामकथाविषयकं नाटकद्वयं रचितम्—महावीरचरितमुत्तररामचरितञ्च तथा कथासरित्सागरकथाविषयकं मालतीमाधवम् । भवभूतिर्विदर्भदेशे पद्मपुरनामक-

ग्रामस्य निवासी आसीत्। अस्य पितुर्नाम नीलकण्ठस्तथा मातुर्नाम जतुकर्णी आसीत्। भवभूतिर्महान् पण्डित आसीत्। स स्वयमेव कथितवानस्ति यत्सः पद-वाक्यप्रमाणज्ञ आसीत्। अथ च तस्य वैदुष्यप्रभाविता वाग्देवी वश्येवानुगन्त्री आसीत्। तस्य नाटकेषु प्रथमं नाटकं महावीरचरितमस्ति। अस्मिन् नाटके कवेर्ध्यानं रामस्य महावीररूपवर्णने अधिकमासीत्। एतन्नाटकानुसारं रामः सीतास्वयंवरस्य पश्चाज् जनकपुरत एव वनं जगाम। तत्रैव सीताहरणमभवत्, सुग्रीवसाहाय्येन रामो लङ्कामभियातवान्, तत्र च विजयं प्राप्य पुष्पकेन अयोध्यामागतवान्। महावीरचरितमभिलक्ष्य भवभूतेरभीष्टानुसारं जनसमाजे समादरो नाभवत्। तेन स अन्तस्तप्तो रुष्टश्चान्यन्नाटकं मालतीमाधवं रचितवान्। भवभूतिः स्वविद्याबुद्धिकौशलस्य अभिमानी आसीत्। तेन कथितम्—

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान्प्रति नैष यत्नः।
उत्पत्स्यते मम तु कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥

भवभूतेः साधना उपर्युक्तनाटकद्वयस्य अवमानननाभिरवरुद्धा न जाता। तस्याभिमतमभवत्—

सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः॥

अस्या एव साधनायाः फलमासीत् उत्तररामचरितम्, यत्सर्वथा अनर्घमसमानान्तररञ्चासीत्। अस्मिन् नाटके रामराज्याभिषेकोत्तररामकथाया वर्णनमस्ति। अत एव सार्थकं नाम उत्तररामचरितमिति।

करुणरसप्रधानमुत्तररामचरितं भवभूतेः प्रौढतमा रचनाऽस्ति। अस्य सम्बन्धे सत्यमेव कथ्यते—उत्तरे रामचरिते भवभूतिर्विशिष्यते। अत्र भाषा-भावयोः पूर्णसमन्वयो येन लोकोत्तररचनेयमिति बहुभिः स्वीकृतम्। अत एव केचित् कथितवन्तः-कवयः कालिदासाद्या भवभूतिर्महाकविः।

काव्यरचयितृषु यथा माघो भारविपथमनुसृतवान् तथैव नाटककारेषु मुरारिर्भवभूतिमनुगतवान्। मुरारेः समाङ्कीयनाटकमनर्घराघवम्। स अद्भुतकाव्यकौशलनेन बालवाल्मीकिनाम्ना विख्यातोऽभवत्। मुरारेः समयोऽष्टम ईश्वीय आसीत्। अस्मिन् नाटके पद्याधिक्यं वर्तते। मुरारेः प्रगाढपाण्डित्यस्य प्रशंसा विद्वत्सु क्रियते। कश्चित् तु एवं कथितवान्—
मुरारिपदचिन्तायां भवभूतेस्तु का कथा। भवभूतिं परित्यज्य मुरारिमुररीकुरु॥

जयदेवः

प्रसन्नराघवनाटककारो जयदेवोऽयं गीतगोविन्दकारात् सर्वथा भिन्न एवास्ते। अस्य एकमेव नाटकं प्रसन्नराघवं रामकथामाधृत्य रचितं सप्ताङ्कैः सुशोभितमस्ति। अस्य शब्दयोजना सर्वथा मनोहारिणी। यथा सीताया ऊरुवर्णने—

कदली कदली करभः करभः करिराजकरः करिराजकरः।
भुवनत्रितयेऽपि बिभर्ति तुलामिदमूरुयुगं न चमूरुदृशः॥

तुलसीदासः स्वरामचरितमानसेऽस्य कतिपयश्लोकानां भावं यथावद् गृहीतवानस्ति। यथा प्रसन्नराघवे—

चन्द्रहास ! हर मे परितापं रामचन्द्र—विरहानल—जातम्।

रामचरितमानसे—

चन्द्रहास हरु मम परितापम्। रघुपति विरह अनल संजातम्।

इत्थं प्रसन्नराघवकारो जयदेवः समस्तदृष्ट्या प्रशंसार्हः।

कृष्णमिश्रस्य प्रबोधचन्द्रोदयम्

एकादशशताब्द्यां विद्यमानस्य कृष्णमिश्रस्य प्रबोधचन्द्रोदयो गतानुगतिकमार्गं परित्यज्य एकं नवीनमेव मार्गमनुसृत्य रचितमस्ति। नाटकमिदं रूपकात्मकं (Allegorical) वर्तते। अस्य पात्राणि देहधारिणो मानवा नहि अपितु निराकारा मानवीयवृत्तय एव सन्ति। यस्य कस्यचिद् वर्णनं तेन मूर्तरूपेण कृतमस्ति। यथा क्रोधवर्णनम्—

अन्धीकरोमि भुवनं बधिरीकरोमि धीरं सचेतनमचेतनतां नयामि।
कृत्यं न पश्यति न येन हितं शृणोति धीमानधीतमपि न प्रतिसन्दधाति॥

राजशेखरः

अयं सुख्यातकविर्दशमशतकस्यारम्भे विद्यमान आसीत्। अस्य नाटकचतुष्टयं प्रसिद्धमस्ति-कर्पूरमञ्जरी, विद्धशालभञ्जिका, बालभारतं, बालरामायणञ्च। तेषु च कर्पूरमञ्जरी केवलं प्राकृतभाषायां रचितम्। अन्यानि सर्वाणि संस्कृतप्राकृतमिश्राणि।

उपर्युक्तनाटककारानतिरिच्य केचनान्येऽपि नाटककाराः सन्ति येषां कृतयो बहु प्रसिद्धा न सन्ति। अस्मिन् विंशशतकेऽपि केचन कवयः विद्वत्प्रियनाटकानां रचनाः कृतवन्तः सन्ति। यथा वाराणसेयेन दर्शनकेसरिणा नारीजागरणम्, रांचीस्थेन डॉक्टरवनेश्वरपाठकेन कालिदासीयम्, डॉ० रामाशीषपाण्डेयेन च रचितं कर्णार्जुनीयम्। अन्येषामपि केषाञ्चित् नामानि ग्रहीतुं शक्यानि। समयाभावात् तथा न क्रियते।

करुणरसस्यानन्दमयत्वम् : विप्रतिपत्तिः समाधानञ्च

डॉ० राजेन्द्रप्रसाददूबे*

(क) रसस्यास्वादोऽनिवार्यरूपेण आनन्दात्मक इति स्वीकृते करुणादीनां रसानां कथमास्वादनमानन्दमयं भवतीति एष प्रश्नः काव्यशास्त्रे मौलिको विवेचनात्मकश्चाऽस्ति।

(ख) भारतीयाचार्यैः काव्यशास्त्रविद्भिः सूक्ष्मेक्षिकया यो विचार उपस्थापितस्तदध्ययनेन समग्ररूपेणाऽनेकविधं समाधानं दृष्टिपथमारोहति।

(ग) 'नियतिकृतनियमरहिता' नानाचमत्कारमयी काव्यस्य सृष्टिर्भवतीति प्रचलित एष सिद्धान्तः। अतएव लौकिककार्य-कारण-सम्बन्धस्य नानिवार्यत्वमस्मिन् विषये। दुःखाद् दुःखोत्पत्तिर्लोकनियमाधीना, काव्ये तु कवेरलौकिकप्रतिभासंसर्गेण दुःखं सहजमेव सुखमुत्पादयतीति इदमेव काव्यस्यालौकिकत्वम्।

(घ) संसारस्य दुःखमोहादिसम्पूरितत्वेऽपि जीवस्तस्य भोगो राग-विद्या-कलासञ्ज्ञैः त्रिभिस्तत्त्वैः स्वानुकूल्येन परिवर्त्य अन्ते आनन्दात्मक एवेत्यनुभवति। रागः सुखित्वाभिमानम्। विद्या रागस्य तदुपादानं ययाऽविद्यावच्छिन्नचैतन्यस्य ज्ञानमभिव्यज्यते। कला तु आत्मनोऽभिज्वलनात्मको हेतुः। एवमेव प्रेक्षकोऽपि तत्त्वत्रयबलात् शोकभयादिभिर्निष्पन्नैः करुणभयानकादीनां स्वात्मस्थतत्त्वत्रयेण सुखात्मकं चर्वणं करोति, आत्मनो नित्यानन्दरूपत्वात्, आनन्दात्मिकाप्रवृत्तित्वाच्च।

(ङ) भट्टलोल्लटसिद्धान्तं प्रतीतिवादं खण्डयन् भट्टनायकः 'स्वगतत्वेन हि प्रतीतौ करुणे दुःखित्वं स्यादिति अभिव्यनक्ति। एवं सति प्रतीतिरेव असिद्धा भवति। तस्मात्काव्ये दोषाभावगुणालङ्कारमयत्वलक्षणेन नाट्ये चतुर्विधाभिनयरूपेण निबिडनिजमोहसङ्कटतानिवारणकारिणात्मनाऽभिधातो द्वितीयांशेन भावकत्वव्यापारेण भाव्यमानो रसो भोगेन परं भुज्यते। फलतः शोकादिकटुभावा व्यक्तिसन्निविष्टरागद्वेषसंसर्गमुक्ताः सुखदचर्वणयोग्या भवन्ति।

* प्राध्यापकः संस्कृतविभागो, राँचीविश्वविद्यालयः (बिहार-प्रदेश)

(च) यत्र अभिव्यक्तिवादे रसो नोत्पद्यते न वा भुज्यतेऽपितु अभिव्यज्यते तत्र तु संवेदनमेवानन्दमयं भवति । न कथमपि तत्र शङ्का दुःखस्य सम्भाव्यते । रतिशोकादिस्थायिभावानां व्यापारः केवलं तस्यैव चित्रताकरणे एव भवति । इदमेव कर्म शृङ्गारकाव्यवत् करुणकाव्यस्यापीति ।

(छ) करुणरसेनाधिगतश्चमत्कारः काव्यनाट्ययोः समवेतकौशले आश्रितो न प्रेक्षकस्य श्रोतुर्वा हृदि आह्लादोत्पादकः प्रत्युत रचनाकारस्य कलानैपुण्येनाभिव्यक्तः शोकोद्वेगमानन्दे परिणमयति । कलासर्जनस्य सौन्दर्यानन्दसृष्टिसिद्धान्तप्रतिपादकत्वात् ।

(ज) कवितायां शब्दार्थयोरेव ऐकान्तिकमुपयोगित्वं तथापि न तयोः स्वातन्त्र्यम् । भावाभिव्यक्तौ एतयोर्निमज्जनम् । कस्यचिन्नैपुण्यमावहतः कवेः मायावीकरस्पर्शेणैतन्निर्जीवतायां प्राणाः सञ्चार्यन्ते । एतौ अहल्येव शापविमुक्तौ चेतनां धारयन्तौ तिष्ठतः । इदानीं प्रेक्षकाः पाठका वा न तौ पाषाणखण्डसमूहं कथयन्ति अपितु ताजमहल एवेति कथयन्तस्तत्सौन्दर्यं प्रति आकृष्टमानसा आनन्दमनुभवन्ति ।

अतएव सहृदयहृदयाह्लादकत्वं करुणादीनामपि भवतीति स्पष्टतरम् ।

निरुक्ताचार्यास्तेषाञ्च मतसमीक्षणम्

□*

डॉ० रामविलासचौधरी-

□

भारतीये वाङ्मयेऽक्षयनिधेः श्रुतेः संरक्षणे संवर्धने च सततं प्रयतमानं दृश्यतेतमामृषिकुलम्। तत्र प्रतिभाधनै ऋषिभिः श्रुतिपरम्परया रक्षणाद् वेदस्य श्रुतित्वं विदितम्। पुरातनास्ते साक्षात्कृतज्ञानात्मकवेदरूपविधाना बभूवुः। ते परवर्तिभ्यो ज्ञानपिपासुभ्यः प्रवचनेन मन्त्रान् सम्प्रादुः किन्तु तद्रूपे तज्ज्ञानगौरवग्रहणे तेषामक्षमत्वात्प्रारब्धा वेदवेदाङ्गग्रन्थानां निर्माणपरम्परा। अत्र यास्को ब्रूते—साक्षात्कृतधर्माणः ऋषयो बभूवुः। ते अवरेभ्यः असाक्षात्कृतधर्मेभ्यः उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तः अवरे बिल्मग्रहणाय इमं ग्रन्थं समाम्नासिषुः वेदं च वेदाङ्गानि च।" (नि० १।२०)। फलतो विकसिते वैदिक-वाङ्मये वेदानामध्ययने वैदिक-कर्मणाञ्च सम्पादने वेदाङ्गानां ज्ञानममन्यतापरिहार्यम्। तत्र वेदार्थावगतौ निरुक्तं जातमुपकारकतमम्। यास्कमते निरुक्तस्याध्ययनं विना वेदार्थज्ञानमसम्भवम्—"अथापि इदमन्तरेण मन्त्रेषु अर्थप्रत्ययो न विद्यते (नि० १।१५)।"

निरुक्ते वैदिकशब्दानामर्थावगतेः प्रक्रिया निर्दिष्टाः। वेदभाष्यकारः सायणाचार्यः ऋग्वेदभाष्यभूमिकायां निरुक्तमेवं परिभाषते—"अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्"। (ऋग्वेदभाष्यभूमिका पृ० ४५)

निरुक्तं वैदिकशब्दसङ्ग्रहरूप-निघण्टुग्रन्थस्य यथोचितं व्याख्यानरूपं भाष्यभूतं वा पुस्तकम्। यास्कात्पूर्वमनेके निरुक्तकारा अभूवन् येषां श्रमं समुपलब्धिञ्चोपयोजयति यास्को निजे ग्रन्थे। क्वचिन्निजमतसमर्थने क्वचिच्च तन्मतखण्डने स तेषां नामानि मतानि चोल्लिखति। यद्यपि सम्प्रत्युपलभ्यमानं निरुक्तं केवलं यास्ककृतं किन्तु दुर्गाचार्यमते निरुक्तं बहुसंख्यकम्। यथोक्तन्तेन—"वेदाङ्गानामेकैकमनेकप्रभेदम् तद् यथा निरुक्तं चतुर्दशप्रभेदम् व्याकरणमष्टभेदम्।" प्रकृते यास्कचर्चिताचार्याणां नामानि मतानि च निरुक्तक्रमेण प्रस्तूयन्ते—

* व्याख्याता-संस्कृतविभागे, पटनाविश्वविद्यालयः (बिहार-प्रदेश)

१—औपमन्यवः—आचार्योऽयं निरुक्ते बहुचर्चितो दृश्यते। ग्रन्थारम्भ एव निघण्टु-शब्दनिर्वचनक्रमे स उल्लिख्यते—(क) ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्ते इत्यौपमन्यवः (नि० १।१), (ख) दण्डः दमानात् इत्यौपमन्यवः (नि० २।२), (ग)। ऋषिः स्तोमान् ददर्श इति औपमन्यवः (नि० २।११)।

२—औदुम्बरायणः—निरुक्तेऽयमेकदैव प्रारम्भे भवति चर्चितः—इन्द्रियनित्यं वचनमौदुम्बरायणः (नि० १।१)। नेदमनेन निश्चीयते यदयं निरुक्ताचार्यो मीमांसादर्शनाचार्यो वा।

३. वार्ष्यायणिः—निरुक्ते प्रथमाध्यायेऽयमेकदा स्मर्यते यास्केन—षड् भावविकाराः भवन्तीति वार्ष्यायणिः (नि० १।२)। पतञ्जलिरपि निजे भाष्य एतत्प्रकरणमुद्धरति तेनास्य प्राचीनत्वं समादृतत्वञ्च विश्वस्तम्।

४- शाकटायनः—अयं हि लब्धप्रतिष्ठो वैयाकरणः। एतन्मते नामान्याख्यातजानि। उपसर्गाणामर्थ वषय एतन्मतं विस्पष्टम्—न निबद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः। (नि० १।३)। सम्भाव्यत एतद्विरचितं निरुक्तमपि। यास्केनैकत्रोच्यते—अथानन्वितेऽर्थेऽप्रादेशिके विकारे पदेभ्यः परेतरार्थान् संचस्कार शाकटायनः। एतैः कारितञ्च यकारादिञ्च अन्तःकरणानामास्तेः शुद्धं च सकारादिञ्च (नि० १।१३)। एतेन स्फुटं यत् शाकटायनेन निरुक्तिग्रन्थो व्यरचि यस्मिन् सत्यशब्दस्य निरुक्तिर्दर्शिता।

५—गार्ग्यः—गार्ग्यमतं शाकटायनमतविरोधिरूपे स्थानत्रये चर्चितम्—(क) उच्चावचाः पदार्था भवन्तीति गार्ग्यः (नि० १।३)। (ख) तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्ग्यो वैयाकरणानाञ्चैके (नि० १।१२)। (ग) अथात उपमा एतत्साहश्यमिति गार्ग्यः। पाणिनिरपि गार्ग्यं बहुधा समुल्लिखत्यष्टाध्याय्याम्।

६—कौत्सः—मन्त्रार्थसिद्धान्तप्रतिपादनक्रमे तन्नाम सङ्केतितम्—यदि मन्त्रार्थप्रत्ययायानर्थकं भवतीति कौत्सः (नि० १।१५)। अस्य सिद्धान्तो जैमिनेः पूर्वमीमांसामतेन साम्यति। सम्भवतः कौत्स आसीन्मीमांसाचार्यो न व्युत्पत्तिकारो यतो नान्यत्र तन्मतमुपस्थाप्यते।

७—आग्रायणः—निरुक्ते स्थानत्रयेऽयमुल्लिख्यते—(क) कर्णः कृन्ततेः। निकृत्तद्वारो भवति ऋच्छतेरित्याग्रायणः (नि० १।९)। (ख) नासत्या सत्यस्य प्रणेतारो इत्याग्रायणः (नि० ६।१३)। (ग) इन्द्र इदं करणात् इत्याग्रायणः (नि० १०।८)।

८—और्णवाभः – अनेकशब्दानां निर्वचनक्रमेऽयमुल्लिख्यते—(क) उर्ण्य ऊर्णोतेर्वृ णोतेरित्यौर्णवाभः (नि० ३।१६)। (ख) नासत्यौ-सत्यौ एव नासत्यो इति और्णवाभः

(नि० ६।१३) । (ग) होतारम्-ह्वातारम् । जुहोतेर्होता इत्यौर्णवाभः (नि० ३।१) । (घ) अश्विनौ-अश्वैः आश्विनौ इत्यौर्णवाभः (नि० १२।१) । (ङ) त्रिधा निधत्ते पदम्—समारोहणे विष्णुपदे गयाशिरसि इत्यौर्णवाभः (नि० १२ । ९) । एतेन विस्पष्टं यदौर्णवाभकृतं किमप्यासीन्निरुक्तं यत्रेमा निरुक्तयो दर्शिताः । अन्तिमनिर्देशेनेदमपि व्यक्तं यदौर्णवाभोऽपि "इदं विष्णुः विचक्रमे" (ऋ० १-२२-१०) इति मन्त्रं व्याख्यातवानासीत् ।

९. शाकपूणिः—आचार्योऽयं बहुधोल्लिख्यते निरुक्ते । एतद्विषये सन्ति बहूनि प्रमाणानि यैः निश्चीयते एतद्विरचितं निरुक्तं किन्त्वधुना तदनुपलब्धमेव । विंशतिवारं यास्केन शाकपूणिमतं चर्चितम् । अत्र दीयन्ते कानिचिदुदाहरणानि—(क) तडित्-विद्युत् तडिद् भवतीति शाकपूणिः (नि० ३।२) । (ख) महान्-मानेनान्यं जहातीति शाकपूणिः (नि० ३।१३) । (ग) ऋत्विक्-ऋग्यष्टा भवतीति शाकपूणिः (नि० ३।१९) । (घ) शिताम योनिः शिताम इति शाकपूणिः (नि० ४।८) । (च) अप्सराः—स्पष्टं दर्शनाय इति शाकपूणिः (नि० ५।१८) । (छ) त्रेधा पृथिव्याम् अन्तरिक्षे दिवि इति शाकपूणिः (नि० ७।२८) । शाकपूणिमते द्रविणोदेध्म - तनूनपात्-नाराशंस—द्वार-त्वष्टा-वनस्पति-प्रभृतयोऽग्नेः पर्यायरूपा दर्शिताः । एतेनानुमीयते यच्छाकपूणिरपि निजं निरुक्तं व्यरचयद् यत्र वैदिक-शब्दा व्याख्याताः । दुर्गोऽपि निजे निरुक्तभाष्ये तथ्यमिदं समर्थयति ।

१०—चर्मशिरा—विधवाशब्दनिरुक्तिक्रमेऽयमाचार्य उल्लिख्यते-विधवा विधातृका भवति विधवनाद्वा विधावनाद्वा इति चर्मशिरा (नि० ३।१५) ।

११—तैटिकिः—निरुक्ते वारद्वयमयं संस्मृतः—(क) शिताम—श्यामतो यकृत्त इति तैटिकिः (नि० ४।३) । (ख) वीरिटम् तैटिकिः अन्तरिक्षम् एवमाह (नि० ४।३) ।

१२—गालवः—निरुक्तस्य चतुर्दशाध्याये शितामशब्दव्याख्याक्रमे विभिन्नैराचार्यैः साकं गालवश्चर्चितः—शितिमांसतो मेदस्त इति गालवः (नि० ४।३) ।

१३—स्थौलाष्ठीविः—निरुक्तकारोऽयमपरो यास्केन वारद्वयं संस्मृतः—(क) अग्निः कस्मात् ? अक्नोपनो भवतीति स्थौलाष्ठीविः न क्नोपयति न स्नेहयति (नि० ७।१४) । (ख) वायुः एतेः इति स्थौलाष्ठीविः । अनर्थको वकारः (नि० १०।१) ।

१४—क्रौष्टुकिः द्रविणोदशब्दस्य व्याख्याक्रमे तन्मतमेकदा समुद्धृतम्—तत्को द्रविणोदः ? इन्द्र इति क्रौष्टुकिः (नि० ८।२) । बृहद्देवतायां शौनकोऽपि क्रौष्टुकिं चर्चति—सोमप्रधानमेतन्तु क्रौष्टुकिः मन्यते स्तुतिम् (बृ० ४।१३७) ।

१५—कात्थक्यः—निरुक्तस्याष्टमे नवमे चाध्याये विभिन्न-देवानां प्रकृतिविषये एतन्मतमुद्धृतम् । नासौ निरुक्ते शब्दव्युत्पत्तिक्रमे क्वचनोल्लिख्यते । एतन्मतमेवमुपस्थापितम्—(क) इध्मः—यज्ञेध्मा इति कात्थक्यः (नि० ८।५) । (ख) तनूनपात्—आज्यम्

इति कात्थक्यः (नि० ८।५)। (ग) नाराशंस--यज्ञ इति कात्थक्यः (नि० ८।६)। (घ) द्वारः--यज्ञे गृहद्वार इति कात्थक्यः (नि० ८।७)। (च) वनस्पतिः—यूप इति कात्थक्यः (नि० ८।१०)। (छ) देवीजोष्ट्री--शास्यं च समा चेति कात्थक्यः (नि० ६।४१)। (ज) देवी ऊर्जाहुती--शास्यं च समा चेति कात्थक्यः (नि० ९।४२)।

१६—शतवलाक्षमौद्गल्यः--मृत्युशब्दनिरुक्तिक्रमे समुल्लिखितो यास्केनायमाचार्यः-मृत्युः मारयतीति सतः मृतं च्यावयतीति वा शतवलाक्षो मौद्गल्यः (नि० ११।६)।

निरुक्त इमे षोडश आचार्या नाम्ना निर्दिष्टास्तथान्ये ऐतिहासिक-नैरुक्त-नैदान-याज्ञिकादयः सम्प्रदाया अपि समुल्लिखिताः ।

निरुक्तं वैदिकशब्दानां निर्वचनपुस्तकमिति तत्र निर्वचनं प्रति यास्कस्यापूर्वाभिरुचिः सर्वत्र दृश्यतेतमाम् । न केवलं भारतीये वाङ्मयेऽपितु विश्वस्य प्राचीने प्रबुद्धप्रदेशे ग्रीक-देशेऽपि प्रादुर्भूता व्युत्पत्तिप्रणाली यास्कस्य व्युत्पत्त्यभिरुचेर्न धत्ते साम्यम् । ग्रीकदेशे व्युत्पत्ति-प्रणाली न स्वतन्त्ररूपेणाभूद् विकसिता किन्तु दर्शनशास्त्रस्य शाखारूपेणैव ।

निरुक्तं प्राचीन-भाषायाः सर्वप्रथमं क्रमबद्धरूपं निरुक्तिपुस्तकमिति नूनमेवाभि-नन्दनीयम् । आधुनिकविचारकैस्तत्रैतिहासिक-भौगोलिक-दृष्टिकोणस्याभावो दृश्यते किन्तु यत्र तत्र यास्कस्य तद्गतदृष्टेराभासः परिलक्ष्यत एव—शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते (नि० २।२)।

निर्वचनं प्रति यास्कस्योद्दामाग्रहः तीव्रमनोभावश्च संलक्ष्यतेऽत्र--न त्वेव न निर्ब्रूयात् । अर्थात्तन्मते सर्वे शब्दाः व्युत्पत्तिजन्याः । फलत इन्द्रशब्दस्य चतुर्दश निर्व-चनानि, जातवेदसः षट्, अग्नेः पञ्च, यास्कस्य निर्वचनाकर्षणभावाभिव्यञ्जकानि ।

व्युत्पत्ति-कर्तृरूपे यास्को न केवलं शब्दानां नैजां व्युत्पत्तिं प्रस्तौत्यपितु अन्येषामप्या-चार्याणां व्युत्पत्तिं प्राप्तपर्यायशब्दांश्चोपस्थापयति । अत्र पारमार्थिकी वैज्ञानिकमनोवृत्तिस्तस्य गोचरीभवति । सन्दिग्धस्थितौ अनेकस्वरूपदशायाञ्च व्यापकनिर्वचनानि दीयन्ते ।

निर्वचनक्रमे यास्कस्य साधनानि प्रधानतो वैयाकरणस्य मूलतथ्यानि (धात्वादीनि) आसन् । एवं तस्य षड् व्युत्पत्तयो जातवेदसो विचारणीयाः—जातवेदाः कस्मात् ? जातानि वेदजातानि वैनं विदुः जाते जाते विद्यते इति वा जातवित्तो वा जातधनः जातविद्यो वा जातप्रज्ञानः (नि० ७।१६)। अत्र विद्धातुः ज्ञान-सत्ता-प्राप्त्यर्थे प्रयुक्तः । वैयाकरणा उद्घोषयन्ति—

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात् ॥

प्रभापुञ्जो भगवान् श्रीशंकरः

प्रो० गौरीशङ्करपाठकः*

शिवपुराणस्य वायवीयसंहितायाः पूर्वखण्डे श्रीशिवस्य स्वरूपवर्णनप्रसङ्गे कथितम् ।

एक एव तदा रुद्रो न द्वितीयोऽस्ति कश्चन ।
संसृज्य विश्वभुवनं गोप्तान्ते सञ्चुकोच यः ॥
विश्वतश्चक्षुरेवायमुतायं विश्वतोमुखः ।
तथैव विश्वतोबाहुर्विश्वतः पादसंयुतः ॥
द्यावा भूमी च जनयन् देव एको महेश्वरः ।
स एव सर्वदेवानां प्रभवश्चोद्भवस्तथा ॥
हिरण्यगर्भं देवानां प्रथमं जनयेदयम् ।
विश्वस्मादधिको रुद्रो महर्षिरिति हि श्रुतिः ॥
वेदाहमेतं पुरुषं महान्तममृतं ध्रुवम् ।
आदित्यवर्णं तमसः परस्तात् संस्थितं प्रभुम् ॥
अस्मान्नास्ति परं किञ्चिदपरं परमात्मनः ।
नाणीयोऽस्ति न च ज्यायस्तेन पूर्णमिदं जगत् ॥
सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी च भगवाँस्तस्मात् सर्वगतः शिवः ॥
सर्वतः पाणिपादोऽयं सर्वतोऽक्षिशिरोमुखः ।
सर्वतः श्रुतिमाँल्लोके सर्वमावृत्य तिष्ठति ॥
सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितः ।
सर्वस्य प्रभुरीशानः सर्वस्य शरणं सुहृत् ॥

* व्याख्याता-संस्कृतविभाग, एस. के. बागे महाविद्यालयः, कोलेबीरा, राँची (बिहार-प्रदेश)

अचक्षुरपि यः पश्येदकर्णोऽपि शृणोति यः।
सर्वं वेत्ति न वेत्तास्य तमाहुः पुरुषं परम्॥
अणोरणीयान् महतो महीयानयमव्ययः।
गुहायां निहितश्चापि जन्तोरस्य महेश्वरः॥
तमक्रतुं क्रतुप्रायं महिमातिशयान्वितम्।
धातुः प्रसादादीशानं वीतशोकः प्रपश्यति॥
वेदाहमेनमजरं पुराणं सर्वगं विभुम्।
निरोधं जन्मनो यस्य वदन्ति ब्रह्मवादिनः॥

शम्भुखण्डज्योतिषः स्वरूपमस्ति। न अखिलब्रह्माण्डवितीर्णद्योतनस्य प्रथमाधिपतिर्विद्यते। स्वरसम्मोहकस्य तथा उद्घोषस्य परमकेन्द्रमस्ति। काष्ठाऽव्यापकविस्फोटस्य तथा जननशक्तेर्दिव्यस्तम्भो वर्तते। यद् आदितत्त्वं सदैव जिजीविषितसत्तां करोति तदेवात्मरसस्य तदेकमात्रनिर्णेता विद्यते। सः सम्मिश्रितात्मशक्तिर्विद्यते। तस्मिन् कालचिरप्रबोधना विस्तीर्णा, भूतभविष्यद्वर्तमानकालत्रयाणां दीर्घसंज्ञा तस्य प्रद्योतितव्यक्तित्वे सम्मिश्रिता विद्यते। इत्थं जीवनप्रद्योतनस्य आधारतत्त्वत्रयस्यापि तस्मिन् सञ्चयोऽस्ति।

यथा जननपालनसंहरणानि मौलिकवत् प्रक्रियात्रयमेकमेवापूर्वतत्त्वस्याशात्रयं विद्यते। अस्य परमज्योतिर्मयादिपरमात्मन दार्शनिकस्य तथाध्यात्मिकस्य स्वरूपशक्तिरभ्यस्तव्या। शिवशब्दः कल्याणकारको विद्यते। तस्मिन् सार्वजनिकोत्थानस्याकाङ्क्षा वर्तते। अयं मोदस्य प्रत्ययोऽस्ति। शुद्धब्रह्मानन्दस्य अस्मिन् जीवनस्य शुचिसम्पन्नतां प्रति सङ्केतोऽस्ति। वस्तुतोऽयं सः सततं परमार्थिकस्वरूपोऽस्ति, यस्मिन् स्वकटुता पाशविकता दारिद्र्यं तथा विभीषिकापरस्यान्तकोत्कर्षणविकासयोगक्षेमं तथा कल्याणप्रवर्तितं जायते।

शिवतत्त्वमनन्तवैज्ञानिकतत्त्वमपि विद्यते। अयं मानवात्मविज्ञानस्यान्तिमपरिधिरस्ति। रहस्योद्घाटककेन्द्रजनित्वेन कार्यमिदमेकं सार्वकालिकमेवं सर्वव्यापिप्रवृत्तिर्विद्यते।

अयमेकः परिक्रमोऽस्ति यस्मिन् ज्ञानस्य सर्वोत्कर्षोपलब्धिर्निहिताऽस्ति। अन्यथा शिवानुयायिनां निगूढप्रबोधनं तथाध्यात्मिकं योत्कर्षस्य कार्यं तत्त्वमिदं विद्यते।

शिवस्य व्यक्तित्वसत्ता प्रत्येकं जडचेतनाणुपरमाण्वोः परिव्याप्ताऽस्ति। अयं प्रकृत्या अगणितरूपेण क्रियाणामधिपतिर्विद्यते। अन्यथा इत्थं कथं यत् सः स्वयंप्रकृतिरस्ति जन्ममृत्युप्रद्योतश्चान्धकारो जडस्तथा चेतनब्रह्माण्डस्योभयेषां पक्षाणां सत्ताऽस्मिन्नेव

माध्यमरूपेण तिष्ठति। अस्याः प्रतिद्वन्द्वस्याध्यात्मिकस्वरूपस्य एतावती व्यापकव्यञ्जना विश्वस्यान्यधार्मिकदर्शनेषु अथवा सांस्कृतिकपरिवेशेषु नोपलभ्यते। अस्य प्रमुखहेतुरार्थ-धर्मस्यानेकमुदीर्घपरिधिरस्ति तथा शैवस्यार्यावर्तिकेण सह पवित्रमैत्री वर्ततेऽपि शैवे भारत-दर्शनस्याखिलतत्त्वानि प्रहितानि सन्ति। एतदर्थं समाजशास्त्रस्य नियमानां वास्तविकता प्रमाणितयन्त्रेऽपि शिवचेतना भारतस्य मूलभूतैकप्राणव्यञ्जना विद्यते।

टॉयनवी जिमरस्तथा ब्राउनप्रभृतयो वैदेशिका विद्वांसः पूर्णतः शिवतत्त्वस्य बहु-मुख्या अन्तश्चेतनायाः स्वीकुर्वन्ति। तद् ब्रह्मांडस्योतं तथा जीवनपरिक्रमायाः मूल-केन्द्रं कथ्यते। इदमनन्तज्योतिस्समूहस्य आदितत्त्वस्य नवीनभारतीयाध्यात्मिक पारं पर गतात्मसात् कर्त्तव्यम्।

शिवं शान्तं शुद्धं प्रकटमकलङ्कं श्रुतिनुतं महेशानं शम्भुं सकलसुरसंवेद्यचरणम्।
गिरीशं गौरीशं भवभयहरं निष्कलमजं महादेवं वन्दे प्रणतजनतापोपशमनम्॥

कारकस्वरूपविचारः

श्रीचन्द्रकुमारत्रिपाठी*

कारकनिरूपणविचारप्रसङ्गे—कर्ता कर्म च करणं च सम्प्रदानं तथैव च। अपादाना-धिकरणमित्याहुः कारकाणि षट्॥ इत्यभियुक्तया कारकाणां षट्त्वं सिद्धयति। तत्र किं नाम कारकत्वमिति जिज्ञासायां क्रियाजनकत्वम् कारकत्वम्। क्रियानिरूपितोपलक्षितत्वं जनकत्वमिति अवगन्तव्यम्। जनकत्वं चात्र कारणत्वरूपं विवक्षितम्। करोति क्रियां निर्वर्तयतीति व्युत्पत्त्यर्थावगमात्। ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यत्र ब्राह्मणस्य न कारकत्वम्। पुत्रेण अन्यथासिद्ध्या तत्त्वाभावात्। अत एवैषां क्रियायामेवान्वयः। क्रियाजनकत्वमिति ज्ञाते का सा क्रिया इत्याकाङ्क्षोद्बोधेन क्रियाया जनकाकाङ्क्षया च तत्रैवान्वयस्यौचित्यात्। सर्वेषां च कारकाणां स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वं बोधनीयम्। असन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकत्वेन स्वज्ञानपूर्वकालत्वेनैव जनकत्वम्। एवं स्तोकं पचतीत्यादौ फलस्यापि। घटं करोति स्मरतीत्यादौ बौद्धघटादेः पूर्वकालत्वेनैव स्मृत्यादिनिष्पादकत्वं बोद्ध्यम्।

कर्तृकारक विचारः

कर्तृकारकम्—'स्वतन्त्रः कर्ता' इति सूत्रस्य क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्। कारकाधिकारात् क्रियाजनने स्वातन्त्र्यमिह विवक्षितम्। अत एव 'विवक्षातः कारकाणि भवन्ती'ति भाष्यात् स्थाली पचतीत्यादिप्रयोगेषु स्थाल्यादीनां कर्तृत्वसिद्धिः। स्वातन्त्र्यं च कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वम्। पक्वस्तण्डुलो देवदत्तेनेत्यत्र फलस्य प्राधान्येऽपि देवदत्तस्य कर्तृत्वसिद्धये 'कर्तृप्रत्ययसमभिव्याहारे' इति। णिचो वाचकत्वमभिप्रेत्य चैत्रेण मैत्रस्तण्डुलं पाचयतीत्यादौ णिचो द्योतकत्वेन विक्लित्त्यनुकूलव्यापारस्य पच्धातुवाच्यतया प्रयोज्यव्यापारस्य मुख्यविशेष्यताश्रयत्वरूपप्रधानत्वाभावेन तदाश्रयस्य कर्तृत्वानापत्तिरपि निरस्ता। एवं च विक्लित्त्यनुकूलव्यापारवाचकपच्धातुनिरूपितं कर्तृत्वं प्रयोज्यकर्तरि सुलभम्। पाचिनिरूपितं कर्तृत्वं च प्रयोज्यकर्तरि सुलभम्। अत एव शब्देन्दुशेखरे देवदत्तेन यज्ञदत्तः पाचयतीत्यादौ ण्यन्तधातुतत्प्रकृतिधातु-एतदुभयवाच्यव्यापारयोः स्वस्वार्थं प्रति प्राधान्यात् प्रयोज्यव्यापाराश्रयस्यापि कर्तृत्वसिद्धिः। द्योतकत्वे तु नैतत् सिद्ध्येत्। 'कारके' इति सूत्रभाष्यात् स्वक्रियाकारकप्रवर्तकत्वं स्वातन्त्र्यमिति लभ्यते प्रकृतसूत्रभाष्याच्चेति।

पूर्वोक्तकर्तृलक्षणे हरिसम्मतिमपि दर्शयति—धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते इति। धातुना उक्ता क्रिया यस्य तादृशे कारके नित्यं कर्तृता इष्यते। अर्थात् यन्निष्ठक्रियाया धातुवाच्यत्वेनैव विवक्षा स कर्ता इति भावः। अत एव यदा यदीयो व्यापारो धातुनाऽभिधीयते तदा स कर्ता इति स्थाली पचति, अग्निः पचति, तण्डुलः पच्यते स्वयमेवेत्यादि सङ्गच्छते।

---

*व्याख्याता, राजकीयसंस्कृतमहाविद्यालयः राँची (विहार-प्रदेश)

अयं च त्रिविधः—शुद्धः, प्रयोजको हेतुः, कर्मकर्त्ता च। मया हरिः सेव्यते, कार्यते हरिणा, गमयति कृष्णं गोकुलम्। मदभिन्नाश्रयको हरिकर्मकसेवानुकूलो व्यापारः। हर्यभिन्नाश्रयक उत्पादनानुकूलो व्यापारः। गोकुलकर्मकगमनानुकूलकृष्णाश्रयकव्यापारानुकूलो व्यापार इति क्रमशः शाब्दबोधः।

उक्ते कर्तरि प्रथमा स्यादनुक्ते तृतीया भवेदिति वचनात् कर्तृकारके विभक्तिद्वयस्य प्रयोगो भवति। किमधिकम् उक्तेषु सर्वेषु कारकेषु प्रथमैव प्रयुज्यते। तथा च वार्तिकम्-अभिहिते प्रथमेति। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः। क्वचित्तु निपातेनेनाभिधानम्-यथा-विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतमिति। सम्बोधने चेति सूत्रेणापि प्रथमाविभक्तिर्विधीयते। अथ च 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इति सूत्रेणापि प्रथमा विधीयते

प्रातिपदिकार्थे प्रथमा विधानात् तत्र प्रातिपदिकार्थः क इति जिज्ञासायां विस्तरेण प्रतिपाद्यते।

प्रातिपदिकार्थविचारः

प्रत्ययेन नियमतः प्रकृतेरपेक्षितत्वात् सुब्विभक्तीनां प्रातिपदिकप्रकृतिकतया ताभिः प्रकृतिभूतप्रातिप्रदिकस्य स्मरणेन अर्थबुबोधयिषया शब्दप्रयोग इति नियमेन तदर्थः क इति जिज्ञासायां प्रातिपदिकार्थनिरूपणमुचितमिति अधो निर्दिश्यते।

एकं दिकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः॥

एकं जातिर्लाघवेन तस्या एव वाच्यत्वौचित्यात्। एकस्या जातेर्वाच्यत्वमुपेक्ष्य अनेकव्यक्तीनां वाच्यत्वे गौरवात्। गामानयेत्यादौ गोव्यक्तेरानयनकर्मत्वेन बोधाय व्यक्तौ लक्षणास्वीकारेऽपि, व्यक्तेर्वाच्यत्वं स्वीकृत्य लक्षणया व्यक्त्यन्तरबोध इति कृत्वा नोभयसमानत्वं, व्यक्तिपक्षे स्वसमवेताश्रयत्वं संसर्ग इति गौरवम्। स्वं वाच्यव्यक्तिः ततः समवेता गोत्वादिजातिः तदाश्रयत्वं समवायेन तदधिकरणत्वं व्यक्त्यन्तरे इति समन्वयः। जात्या सह तु आश्रयत्वमेव संसर्ग इति लाघवम्। व्यक्तिशक्तिवादिनापि जातेर्वाच्यत्वमभ्युपेयमेव। अन्यथा शुद्धव्यक्तेर्वाच्यत्वस्वीकारे व्यक्तीनामानन्त्याद् व्यभिचाराच्च शक्तिग्रहानुपपत्तेः।

अन्वयव्यतिरेकाभ्यामेकरूपप्रतीतितः।
आकृतेः प्रथमज्ञानात् तस्या एवाभिधेयता॥

इति भट्टपादोक्तिरपि जातेर्वाच्यत्वपक्षेऽस्ति । 'नागृहीतविशेषणा बुद्धिर्विशेष्य उपजायते' इति न्यायेनापि जातिरेव वाच्या । व्यक्तिबोधस्तु लक्षणया । वस्तुतस्तु "न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः" इति भाष्याद् विशिष्टं वाच्यम् । अत आह द्विकमिति जातिव्यक्तीतित्रिकं जातिव्यक्तिलिङ्गानि प्रातिपदिकार्थाः । सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम् । उक्तगुणानामुपचयत्वं पुंस्त्वम् ।

पूर्वोक्तानामुपचयत्वं स्त्रीत्वं तत्तच्छब्दनिष्ठं तत्तद्वाच्यं च । तमेव विरुद्धधर्ममादाय टादिशब्दा भिद्यन्ते । केषाञ्चित् अनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात् । एवं च पदार्थपदे पुंस्त्वमेव, व्यक्तिपदे स्त्रीत्वमेव, वस्तुपदे नपुंसकत्वमेव । द्व्येकयोर्द्विवचनैकवचने' इति शास्त्रप्रामाण्यात् संख्यापि प्रातिपदिकार्थः । अन्यथा द्वित्वादौ वर्तमानं यत्प्रातिपदिकं ततो द्विवचनादि इत्यर्थस्यासङ्गत्यापत्तेः । अतः संख्यासहितं पूर्वोक्तं त्रयमपि प्रातिपदिकार्थः । प्रत्ययवर्जिते दधि पश्येत्यादौ प्रत्ययमजानतोऽपि बोधात् प्रकृतेरेव वाचकत्वं कल्प्यते । लिङ्गानुशासनस्य प्रकृतेरेव दर्शनात् । अतः कारकसहितं चतुष्कं प्रातिपदिकार्थ इति ।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

इत्यनुभवाद् विष्णुमुच्चारयेत्यादौ अर्थोच्चारणासम्भवाद् विना शब्दविषयं शाब्दबोधासङ्गतिश्चेति सोऽपि प्रातिपदिकार्थः इत्थं षोढा प्रातिपदिकार्थः ।

प्रातिपदिकनिष्ठशक्तिनिरूपकोऽर्थः प्रातिपदिकार्थः । घटादिशब्दानां व्यक्तौ शक्तिस्वीकारे आनन्त्यव्यभिचारापत्तिरिति जातावेव शक्तिः । व्यक्तौ लक्षणा । व्रीहीनवहन्तीत्यादौ जातेरमूर्त्ततया अवहननान्वयायोगात् स्वाश्रयकर्मकत्वसम्बन्धेन जातेरेवान्वयोऽवहनने इति मीमांसकाः । नित्यो घट इति प्रयोगवारणाय व्यक्तावपि शक्तिरिति नैयायिकाः । अन्यथा नित्यत्वस्य पदार्थे घटत्वेऽबाधात्स प्रयोगो दुर्वार एव स्यात् ।

वागादिशब्दे टाबादीनामभावेऽपि लिङ्गप्रतीत्या प्रातिपदिकस्य शक्तिरिति । टाबादीनां तु द्योतकत्वमिति प्राचीनाः ।

दधि पश्यतीत्यादौ विभक्त्यभावेऽपि कारकसंख्ययोः प्रतीत्या तत्रापि प्रातिपदिकस्य शक्तिरिति शाब्दिका महाभाष्यकारादयः ।

एवं च—जातिर्द्रव्यं च लिङ्गं च संख्या कारकमेव च ।
अमी पञ्चैव नामार्थास्त्रयः केषाञ्चिदग्रिमाः ॥

अत एव लिङ्गस्य संख्यायां कारकस्य च व्यक्तौ विशेषणत्वम् । द्योत्यार्थस्य विशेषणताया एव औचित्यात् । प्रत्ययवाच्यत्वे तु "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः" इति न्यायार्थप्राधान्यमेव स्यात् । टाप्सुबाद्यतिरिक्तत्वेन सङ्कोचे तु सङ्कोच एव दोष इति सुधियो विभावयन्तु ।

'सरूपाणामेकशेष एकविभक्तौ' 'स्त्रियाम्' इत्यादिसूत्रभाष्येषु पञ्चानां पक्षाणां प्रतिपादितत्वेन तत्र क्तिकादिपक्षेष्वेव लिङ्गस्यापि प्रतिपादनात् 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इति सूत्रे प्रातिपदिकार्थातिरिक्तत्वेन तस्य दृश्यमानत्वात् वैयाकरणेष्वन्यतमो भट्टोजिदीक्षितः स्वनिर्मितसिद्धान्तकौमुद्यां नियतोपस्थितिकः प्रातिपदिकार्थ इति पारिभाषिकं प्रातिपदिकार्थं निश्चिनोति ।

निपूर्वकयम्धातोर्व्यापकत्वमर्थः कर्तरि क्तस्य आश्रयोऽर्थः ततश्च नियतेत्यस्य व्यापकताश्रयीभूतेत्यर्थः । व्यापकतायाश्च निरूपकांशे नित्यसाकाङ्क्षतया प्रातिपदिकनिष्ठव्याप्यता निरूपिता सा, ततश्च प्रातिपदिकनिष्ठव्याप्यतानिरूपिता या व्यापकता तद्वती या उपस्थितिः तद्विषयीभूतोऽर्थः प्रातिपदिकार्थः। तदाह यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेन उपस्थितिः स प्रातिपदिकार्थः । एवञ्च प्रातिपदिकोच्चारणनिष्ठव्याप्यतानिरूपितव्यापकतावदुपस्थितिविषयताश्रयत्वं प्रातिपदिकार्थत्वमिति निष्कृष्टलक्षणं पर्यवसन्नम् ।

नागेशास्तु प्रवृत्तिनिमित्तं तदाश्रयश्च प्रातिपदिकार्थ इति स्वीकुर्वन्ति । स्वावच्छिन्नविषयताश्रयत्वं स्वतादात्म्यमिति एतदन्यतरसम्बन्धेन तत्तत्पदप्रवृत्तिनिमित्तविशिष्टस्तत्तत्प्रातिपदिकार्थः । प्रवृत्तिनिमित्तलक्षणं च पक्षधरमिश्रकृतप्रकाशग्रन्थे—वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितीयप्रकारताश्रयत्वम् । वाच्यत्वनिवेशात् आकाशपदाप्रवृत्तिनिमित्ते आकाशपदजन्योपस्थितीयप्रकारतावति शब्दाश्रयत्वे नातिव्याप्तिः । वाच्यवृत्तित्वनिवेशाद् गवादिपदवाच्यावयवसंयोगरूपविशेषाकृतौ नातिव्याप्तिः ।

वाच्योपस्थितीयप्रकारतावत्वनिवेशात् आधाराधेयभावसम्बन्धेन हर्यादिपदवाच्याश्ववृत्ति हर्यादिपदवाच्येन्द्रादौ च नातिव्याप्तिः । स च प्रातिपदिकार्थो मुख्य इव आरोपिततदाश्रयोऽपि । अत एव गोपी इत्यादौ स्वादिप्रकृतेर्लाक्षणिकत्वेऽपि न दोषः । अत एव लिङ्गग्रहणं सार्थकम् । अन्यथा 'स्वमोर्नपुंसकात्' इत्यादिशास्त्रप्रामाण्येन लिङ्गस्यापि प्रातिपदिकार्थतया तद्वैयर्थ्यं स्पष्टमेव । अत एव स्त्रियामिति सूत्रे स्त्रीत्वे द्योत्ये इत्यर्थ इति भाष्ये सिद्धान्तितम् ।

आयुर्वेदशास्त्रस्य त्रिदोष एव आधारस्तम्भः

श्रीरघुनन्दनमिश्रो वैद्यः*

वातपित्तश्लेष्माण एव देहसम्भवहेतवः। तैरेवाव्यापन्नैर्मध्योर्ध्वसन्निविष्टैः शरीरमिदं धार्यते आगारमिव स्थूणाभिः तिसृभिः अतश्च त्रिस्थूणमाहुरेके।

अस्य शरीरस्य वात-पित्त-कफा एव हि त्रिभिः स्तम्भैरिव भवनस्य आधारशिलास्ति। अनेन कारणेन केचन विद्वांसः त्रिस्तम्भस्य आगार इति कथयन्ति।

भारतीयज्ञानपरम्परासु सर्वशास्त्रस्य ज्ञानश्रृंखला एकस्मिन् सूत्रे संबद्धास्ति वा तस्यैवमनुसरणं करोति। यस्मात् प्रकृतेरेतादृशं किञ्चिदपि द्रव्यं नास्ति यत् सत्त्वरजःस्तमोभिर्विनास्ति, तथैव मनुष्याणामपि प्रकृतिः वात-पित्तकफैर्विना न भवति। यथा—

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥

महर्षिरग्निवेशो वातप्रकृतिं पित्तप्रकृतिं कफप्रकृतिं प्रकृतिं न मन्यते, तस्य मतेन त्रयाणां दोषाणां समानावस्था हि प्रकृतिर्नाम। इयमेव प्रकृतिर्वैद्यसमुदायानामेव अभीष्टास्ति। अतएव अनेन सह प्रकृतिशब्दस्य संयोजनं न कृत्वा वातलं पित्तलं श्लेष्मलमिति कथनमधिकमुपयुज्यते। येन प्रकारेण सोम-सूर्य-वायव एवास्य जगतो धारणं कुर्वते तथैव वात-पित्त-कफाश्चैव इदं शरीरं धारयन्ति। यथा—

विसर्गादानविक्षेपैः सोमसूर्याऽनिलास्तथा।
धारयन्ति जगद्देहं वातपित्तकफास्तथा॥

शरीरे वायुप्रकृतौ वायोः, पित्तप्रकृतौ सूर्यस्य, कफप्रकृतौ सोमस्य च यथा प्रतिनिधित्वं भवति, तथैव महागुणेषु वायू रजोगुणस्य पित्तं सतोगुणस्य कफः तमोगुणस्य प्रतिनिधित्वं करोति, तथैवभ्य वातपित्तकफस्यान्तरे ईषत् परिवर्त्तनेऽपि मनुष्येषु रोगाः सञ्जायन्ते। वातपित्तकफा दूषिता भवन्ति तेनैव दोषाः प्रवदन्ति शरीरधारणाद् धातुं प्रवदन्ति मनीषिणः।

---

* प्राचार्यः, जानकी देवी मोदी आयुर्वेद-महाविद्यालस्य, राँची (बिहार-प्रदेश)*

सर्पस्य शरीरे विषं तिष्ठति किन्तु सर्पस्य हानिर्न भवति, तथैव तद्दोषप्रकृतिकाः पुरुषाः स्वदोषेण न आक्षिपन्ते । यथा—

विरुद्धैरपि नत्वेते गुणैर्घ्नन्ति परस्परम् ।
दोषाः सहजसात्मत्वाद् विषं घोरमहीनिव ॥ च. चि.

प्रकृतौ यथा सत्त्वमूर्ध्वं तिष्ठति रजोमध्ये तिष्ठति तमः अधस्तिष्ठति तथैव कफः शिरसि तिष्ठति पित्तं वक्षसि तिष्ठति वायु कोष्ठे निम्नांशभागे च तिष्ठति । यद्यपि इदं स्थानं मुख्यतममस्ति किन्तु शरीरस्य प्रत्येकसूक्ष्मांशे त्रयो दोषाः तिष्ठन्ति । यथा प्रकृतेः सूक्ष्मात् सूक्ष्मतरं बृहदो बृहत्तरं वस्तु सत्त्वरजस्तमाः सन्ति तथैव शरीरस्य कश्चिदपि भागो दोषेभ्यो रहितो नास्ति । यस्मिन् यस्मिन् शरीरे यस्य यस्य दोषस्याधिकत्वं ते तत्तद् संज्ञकाः पुरुषा भवन्ति इति ।

वातादिगुणाश्च यथा—वायुः शुद्धः शीतः लघुर्गतिशीलः खरश्चास्ति । पित्तमुष्णं तीक्ष्णं, द्रवमम्लं चास्ति । कफो गुरुः शीतो मन्दः स्निग्धो मधुरः स्थिरश्चास्ति । एते दोषाः समानगुणभूयिष्ठैः औषधाहारविहारैः संवर्द्धन्ते, विपरीतगुणभूयिष्ठैः औषधाहारविहारैः हीयन्ते । बाल्यावस्थायां कफस्य बृद्धिर्भवति' यौवने मध्यमवयसि पित्तस्य, वृद्धावस्थायां च वायोः प्राबल्यं तिष्ठति । अनेन प्रकारेण दिनस्य प्रारम्भकाले कफस्य, मध्याह्नकाले पित्तस्य, संध्याकाले रात्रौ च वायोर्वृद्धिर्भवति । भोजनानन्तरं सद्यः कफस्य प्रपचनकाले पित्तस्य पाकान्ते चः वायोः प्राबल्यं भवति । इयं त्रिदोषस्य सरणिः ।

शरीरे आभ्यन्तरकोष्ठे वा पित्तादन्योऽग्निर्नास्ति । पित्तमेव अग्निः स एव पाचकाग्निः स एव जाठराग्निरिति संज्ञा । कार्यकारणात् त्रिदोषाणां पञ्च पञ्च भेदाः पञ्च पञ्च स्थानानि सन्ति । यथा—वायोः—प्राणापानोदानव्यानसमानभेदात् पञ्च प्रकाराः भवन्ति, अस्मिन् प्राणवायुः शिरसि तिष्ठन् कण्ठे वक्षसि च गतिं करोति । उदानवायुर्वक्षसि तिष्ठन् गले नासिकायां नाभौ च गतिं करोति । व्यान-वायुः हृदये तिष्ठति किन्तु सम्पूर्ण-शरीरे गतिं करोति । प्राणादिवायोरपेक्षया व्यान-वायोर्गस्तिः तीव्रतरा अस्ति । समानवायु-र्जठराग्निपार्श्वे आमाशये तिष्ठति । अयमग्नेः प्रदीपनं करोति । अपान-वायुर्मुख्यतः कटौ निम्नभागे वस्तौ श्रोणौ गर्भाशये बृहदन्त्रान्तभागे तिष्ठति । सर्वेषां आभ्यन्तरिक-स्रावाणां विक्षेपणं हि अस्य कार्यम् ।

पञ्चप्रकारकं पित्तं यथा—पाचकः रञ्जकः साधकः आलोचको भ्राजकश्च । अस्य स्थानम् यथा—

पाचकं पित्तमामाशयः पक्वाशश्च मध्यभागे पित्ताशये तिष्ठति यस्य समीपवर्तिनी ग्रहणी अस्ति । रञ्जकं पित्तमामाशये तिष्ठति । साधकं पित्तं हृदये तिष्ठति । भ्राजकं पित्तं त्वचायां तिष्ठति, आलोचकं पित्तं दृष्टौ तिष्ठति ।

पञ्चप्रकाराः कफा यथा—अवलम्बकः क्लेदको बोधकस्तर्पकः श्लेषकश्च। स्थानं यथा—अस्मिन् अवलम्बको वक्षसि, क्लेदक आमाशये बोधको जिह्वायां तर्पकः शिरसि श्लेषकश्च शरीरस्य सर्वसन्धिस्थानेषु तिष्ठति। अनेन प्रकारेण उर्ध्व-मध्य-निम्नभागेषु स्थित्वा शरीरस्य धारणं कुर्वन्ति त्रिस्थूणा (त्रिस्तम्भ) इव। यथा वातपित्तश्लेष्माणो देहसम्भवहेतव इति। आचार्याणां मते रक्तमपि शरीरस्य धारकमस्ति। रक्तस्यैवान्या संज्ञा जीव इति। तेन त्रिदोषसिद्धान्तवादेऽपि रक्तस्यापि प्रधानत्वम्। किंच रक्तेऽपि त्रिदोषः अस्ति। यथा—

नर्ते देहः कफादस्ति न पित्तान् न च मारुतात्।
शोणितादपि वा नित्यं देह एतैस्तु धार्यते॥
कालान्तरेणाभ्युदितं तु पित्तं कृत्वा वशे वातकफौ प्रसह्यः।
पचत्यतः शोणितमेव पाको मतोऽपरेषां विदुषां द्वितीयः॥

उपसंहारः

शरीरे वायोः कार्यं यथा—एकस्य साम्राज्यस्य मन्त्रिणा विना कार्यं सम्पन्नं न भवति तथैव शरीररूपिणि साम्राज्येऽपि केवलं पित्तकफाभ्यां साम्राज्यस्य कार्यं न भविष्यति, अस्य शरीरसाम्राज्यस्य वायोः सहयोगे सर्वं कार्यं सम्पन्नं भविष्यति। आचार्याः पित्तं कफञ्च पङ्गु कथयन्ति। यथा—

पित्तं पङ्गु कफः पङ्गु पङ्गवो मलधातवः।
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत्॥

अस्मिन् वायोः प्रधानत्वं यथा—तथा च स हि भगवान् प्रभवश्चाव्ययश्च भूतानां भावाभावकरः सुखासुखयोर्विधाता मृत्युर्यमो नियन्ता—प्रजापतिरदितिर्विश्वकर्मा विश्वरूपः सर्वगः सर्वतन्त्राणां विधाता भावानामणुर्विभुर्विष्णुः क्रान्ता लोकानां वायुरेव भगवानिति। च. सू.।

अस्मात् कारणाद् वायुरेव सर्वदोषाणां धातूनां मलानां च धारकः निस्सारकः। अतो निर्विवादसत्यमेवोक्तं यत् त्रिदोष आयुर्वेदशास्त्रस्य आधारस्तम्भः। सोमसूर्यवायवोऽपि त्रिदोषः सत्त्वरजस्तमोऽपित्रिदोषः सर्वं खलु त्रिदोषमयं जगत्। स एव त्रिधातुः विकृतस्वरूपा त्रिमला इति। त्रिधातुस्वरूपा प्रकृतिः, प्रकृति, त्रिधातुरूपावातपित्तकफाश्च। यथा—

अध्यात्मलोको वाताद्यैर्लोको वातरविन्दुभिः।
पीड्यते धार्यते चैव विकृताऽविकृतैस्तथा॥ च. चि.

भारतीयदर्शनेषु साम्यवादः

प्रो० शिवचन्द्रभट्टाचार्यः*

जगति बहुलप्रचारः साम्यवादो भारतीयदर्शनेषु कीदृशरूपेणाङ्गीभूत आसीदिति अस्माकं प्रतिपादनीयो विषयोऽस्ति। तत्रादौ साम्यस्वरूपं निरूप्यते, साम्यस्वरूपे हि निरूपिते विषयोऽयं स्पष्टतामुपयास्यति।

अस्ति हि नैयायिकादिभिर्निरूपितं साम्यम्। तन्मते हि विभिन्नानामेकरूपतैव साम्यम्। "तद्भिन्नत्वे सति तद्गतधर्मवत्व" मिति सादृश्यनिर्वचनं नैयायिकैः कृतमस्ति। सादृश्यं साम्यं चैकार्थवाचकम्। मुखादौ चन्द्रसाम्यं च कविभिरुक्तम्। तत्र परस्परभिन्नयोश्चन्द्र-मुखयोरानन्दजनकत्वधर्मेणैकरूपता। साम्यम्-यथा चन्द्रो हर्षजनकस्तथा मुखमपि हर्षजनकमिति हर्षजनकतांशे परस्परभिन्नयोश्चन्द्र-मुखयोरेकरूपता सादृश्यं वा साम्यं वा अभेदो वा यथेच्छं विभिन्नैः शब्दैः शक्यते कथयितुम्। तदेवं साम्यं विभिन्नानामेकरूपता, भिन्नानामैक्यं वा भिन्नानामभेदो वास्ति। अभेदश्च भेदाभावः, स च एकरूपतात्मक इति नैयायिकादिभिः प्रदर्शितम्।

तथाहि नैयायिकमते घटभेदाभावो घटत्वं चैकमेव वस्तु अस्ति। तत्र घटत्वात्मकं वस्तु विभिन्नघटानामेकरूपतैव भवति। अतः साम्यं भिन्नानामभेद इति नैयायिकादिमतानुसारेण सुवचमस्ति।

एवम् भेदाभावरूपम्, अभेदरूपं वा साम्यमस्ति। तच्च साम्यं "वैषम्याभाव" इत्यपि कथयितुं शक्यते। वैषम्यं हि भेदः, तदभावः साम्यति। एतावता इदमेवायातं यद् भेदो वैषम्यम्, अभेदश्च साम्यमिति। वैषम्यं च अनुचितं, वस्तुगतमनौचित्यं वैषम्यादतिरिक्तं न भवति। तथाहि-पथ उच्चावचत्वे "विषमः पन्था" इति कथ्यते, जनाश्च विषमं पन्थानं समीचीनं न मन्यन्ते, भित्तिगात्रस्य असमानत्वे (वैषम्ये) तस्यासौष्ठवं जनैः स्वीक्रियते, गृहकोणस्य असमानाकारत्वे (विषमकोणत्वे इति यावत्) साधुत्वं तस्य परिगणितं न भवति। तदिदं वैषम्यमनुचितमसौष्ठवं साम्याभावरूपमस्ति, तद्विपरीतं साम्यमुचितं सौष्ठवं भवति। स्थूलवस्तुगतं वैषम्यमसौष्ठवमनुचितमित्याख्यायते। एवं दृश्यमानेषु एकरूपेषु वस्तुषु यद्येकरूपश्चेतनो भवति, तदा निष्पक्षपातित्वरूपं चेतनगतं साम्यमभिधीयते, यथा

*व्याख्याता—राजकीय-संस्कृत-महाविद्यालयस्य, रांची (बिहार-प्रदेश)

यदि चेतनस्य पितुः पुत्रत्वेन एकरूपे पुत्रद्वये समानः स्नेहो भवति, तदा पितुः वैषम्याभावः पुत्रेषु समपक्षपातः, साम्यं वा कथ्यते, बाह्यवस्तुगतैक्यमनुसृत्य चेतनस्य यदेकरूपता तदेव साम्यं निष्पक्षपातित्वरूपं, वैषम्याभावरूपञ्च तत् ।

पुत्रयोर्द्वयोः पुत्रत्वेन समानयोर्यदि एकतरस्मिन् स्नेहः, तदभावनिबन्धना पितुरन्यतरस्मिन् विभिन्नरूपता भेदो वा तदा पितुर्वैषम्यं पक्षपातित्वं दोषो गण्यते । तत्र हि पुत्रेण एकेन "पिता मे स्निग्धः" अन्येन "पिता मे अस्निग्धः" इति एकस्यैव पितुर्भेदो विभिन्नरूपता वैषम्यं वा अनुभूयते । इति भेद एव चेतनगतं वैषम्यमस्ति, यस्य नामान्तरं पक्षपातित्वमिति । तस्य विपरीतं निष्पक्षपातित्वमभेदरूपं साम्यं चेतनस्याङ्गीक्रियते ।

तदेतत् साम्यं चेतनगतं निष्पक्षपातित्वमपि आख्यायते, अचेतनगतं तु केवलं साम्यमित्यभिधीयते ।

चेतनगतं निष्पक्षपातित्वरूपमपि साम्यं द्विधा सम्पद्यते । कथमिवेति उच्यते-पक्षपातो हि वैषम्यं पक्षविशेषे अधिकपातरूपमस्ति । पक्षविशेषे अधिकपाताभावश्च निष्पक्षपातित्वं सर्वत्र समपातेन कुत्राप्यपातेन वा इति द्विधा सम्पन्नं भवति । तत्र प्रथमं विशिष्टाद्वैतं, द्वितीयं च अद्वैतमिति अस्माभिः स्वीक्रियते । तदेव साम्यमभेदरूपं दार्शनिकैः सर्वत्र कीदृशमङ्गीक्रियते इति वयमिदानीं प्रदर्शयामः —

दर्शनमात्रस्य जगतो मूलानुसन्धानमेकं मुख्यकार्यमस्ति । जगतो मूलकारणे च दार्शनिकैः साम्यमेव व्यवस्थापितमस्ति । तथाहि भारतीयदर्शनेषु सर्वाधिकप्राचीनं सांख्यदर्शनमस्ति । सांख्यदर्शने जगतो मूलकारणमचेतना प्रकृतिरस्ति । सा च सृष्टिमूलभूता जगतो मूलकारणभूता वा सांख्यमते सत्त्व-रजस्तमोगुणानां साम्यावस्थात्मिका प्रकृतिरस्ति । तस्याश्च प्रतिक्षणं परिणामो भवति, स च परिणामो द्विविधः, सदृशपरिणामो विसदृशपरिणामश्च, तत्राद्यो दीपशिखायाः प्रतिक्षणं परिवर्तनशीलायाः समानाकारदीपसन्ततिवदस्ति । अपरश्च दुग्धादीनां दध्यादिपरिणामवत् । तत्राद्यपरिणामस्थले साम्यं, द्वितीयपरिणामस्थले वैषम्यमस्ति, प्रकृतेः परिणामो हि तदीयः पक्षपातः, पक्षः द्वावेव भेदः अभेदश्च । अथवा साम्यं वैषम्यं च, अथवा विकारोऽविकारश्च । जगत् तदभावश्चेति यथेच्छमुक्तशब्दैर्वक्तुं शक्यते । यतो हि साम्यं प्रकृतिर्वैषम्यं जगत् । तत्र वैषम्यरूपस्य जगतो विसदृशपरिणामेन आत्मत्वेनाङ्गीकारः प्रकृतेर्वैषम्यपक्षपातः, सदृशपरिणामेण साम्यस्याभेदापरपर्यायस्य आत्मत्वेनांगीकारः साम्यपक्षपातो भवति प्रकृतेः । तेन च भेदाभेदरूपसाम्यवैषम्यात्मके उभयस्मिन् पक्षे जगन्मूलायाः प्रकृतेः समानपातेन (उभयोः स्वात्मत्वेनाङ्गीकारेण) एकतरस्मिन् साम्ये वैषम्ये वा अधिकपातनभावेन निष्पक्षपातित्वरूपं साम्यं निर्वहति ।

अन्यथा तु साम्यमात्राङ्गीकारेण यदि प्रकृतिः सत्त्वादीनां साम्यरूपा तदा किमपराद्धं वैषम्येण, येन वस्तुत्वाविशेषेऽपि अभेदात्मकसाम्यस्यैव स्वात्मत्वेन प्रकृतिकर्तृकाङ्गीकारः

न तु वैषम्यस्य इति महद् वैषम्यं जगन्मूलस्य प्रकृतेरापतति, यत् सर्वथाऽनुचितमस्ति। द्वन्द्वात्मके भेदाभेदरूपे साम्य-वैषम्य-युगले समपक्षपातित्वं स्वीकृत्य जगन्मूलस्य निष्पक्षपातित्व-रूपसाम्यं निर्वाह्यते। एषा सांख्यानां साम्यदृष्टिरस्ति।

इदानीं मीमांसकमतमालोच्यते-मीमांसकैः जगत्कर्त्तरि वैषम्यापातभिया जगतः कर्त्तैव न स्वीक्रियते। तन्मते प्राणिनिवहकर्म एव जगतो मूलकारणम्। अदृष्टाख्यकर्मद्वारा जीवानां जगत्कर्तृता अस्ति, अतो नानाभेदात्मकं जगत् विषमं, कर्मवैषम्याज् जायते, तत्र यद्यपि स्फुटं साम्यदृष्टिर्न दृश्यते। तथाहि तन्मते कार्यकारणरूपेण विभक्तजगतः साम्यं वैषम्यमस्ति कारणम्। कर्मवैषम्ये जगद् वैषम्यं जगद्भेदो भवति। वैषम्यमेव तत्र कार्य-कारणयोः समानरूपतास्ति।

"वैचित्र्यं विना वैचित्र्यं न जायते" इति तैरङ्गीकृते नियमे, "कारणवैचित्र्यात् कार्य-वैचित्र्य" मिति नियमे वा तेषां कार्यकारणयोर्वैचित्र्यात्मकसाम्यदृष्टिरेव मूलभूतास्ति। मीमांसक-मते कारण-कार्यगतं वैषम्यमेव तदुभयोः साम्यरूपेण परिणतम्। एषा खलु मीमांसकानामपि साम्यदृष्टिरस्ति।

नैयायिक-वैशेषिकादिभिः साम्यमिच्छद्भिस्तत्त्वान्वेषणपरैरनिच्छतामपि तेषां वैषम्यमा-पतितम्, तदपाकरणाय प्रयासे पुनः साम्यभङ्गप्रसङ्गो भवति। नानाभेदवादिनो हि न्याय-वैशेषिक-सांख्य-मीमांसकाद्वैतवादिनः सन्ति। द्वैतमेव भेद; स एव च वैषम्यमिति प्रागा-ख्यातम्। तेन च द्वैतवादिनः सर्वे एव वैषम्यवादिनो भवन्ति, वैषम्यवादित्वेऽपि तेषां साम्यवादित्वं व्याहतं न भवति। साम्यमनुसरद्भिरेव तैर्वैषम्यमङ्गीकृतम्। एकरूपतैव साम्यं, विभिन्नरूपतैव वैषम्यम्। प्रकारान्तरेणापि शक्यते वक्तुं —भेद एव वैषम्यम्, अभेदः साम्यम्। तत्र केवलं भेदस्वीकारे भेदैकपक्षे अधिकपातरूपं वैषम्यमापतति, अनुचितं च तत्। अतो वस्तूनामेकरूपतात्मकं साम्यमपि तैः स्वीकृतम्, सांख्ये वैशेषिके च दर्शने वस्तूनां साधर्म्य-वैधर्म्यप्रकरणं दृश्यते। साधर्म्यमेव साम्यम्, वैधर्म्यं च वैषम्यमिति तेषामपि ग्रन्थेषु साम्यदृष्टिरुपलभ्यते। वस्तुतस्तु भेदाभेदापरपर्याययोः साम्य-वैषम्ययोः परस्परं द्वन्द्वं विराजमानं दृश्यते सर्वत्र जगति। तत्रैकतरस्य प्राबल्ये अन्यतरेण किमपराद्धम्? यत्तस्य दौर्बल्यमिति महद्वैषम्यप्रश्न आपतति, तदपाकरणाय पुनः साम्य-वैषम्ययोर्भेदाभेदयोर्वा साम्यं जगन्मूलगतमस्ति, येन भेदाभेदयोरेकतरस्य प्राबल्यात्मकं वैषम्यमनुचितस्वरूपं वा जगति कदापि कुत्रापि नापतति।

तस्मात् पुनर्भेदवादिनो दार्शनिका यथा विजयन्ते, तथैवाद्वैतवादिनः।



पुराणं भाषाविज्ञानञ्च

श्रीमहेशशर्मा*

भाषाविज्ञानस्याध्ययने पुराणं कियदुपकारकमिति विषयमधिकृत्य विचार्यते।

महर्षियास्कः वेदाङ्गान्यतमस्योपयोगितां महत्त्वञ्च वर्णयन् प्राह—तदिदं विद्यास्थानं निरुक्तं व्याकरणस्य कात्स्न्र्यम्। तथैव पुराणेतिहासयोर्महत्त्वमुपयोगितां च प्रतिपादयता मया-एतद् वक्तव्यं यत्—तदिदं विद्यास्थानं पुराणं भाषाविज्ञानस्य कात्स्न्र्यमिति।

पुराणरत्नाकरस्यालोडनं विलोडनं वा यदि क्रियेत तदा शतानि सहस्राणि च निर्वचन-प्रधानानि शब्दरत्नानि मिलिष्यन्ति येषां साक्षात् सम्बन्धो भाषाविज्ञानेनानुभूयते। तेषां शब्दानां सङ्ग्रहो यदि भाषावैज्ञानिक-कोशरूपेण भवेत् तदा मन्ये भाषाविज्ञानस्य क्षेत्रं विस्तृतं समृद्धं पूर्णं वा स्यात्।

यदि स्वामिदयानन्दोपेक्षितस्य पुराणस्य भाषाविज्ञानतत्त्वान्वेषणकामनयाऽध्ययनं भवेत् तदा एतद्ज्ञातुं शक्यते यत्—पुराणे केवला कथा, वार्ता एव नास्ति, किन्तु भाषा विज्ञानस्य महान्ति तत्त्वानि निर्वचनप्रधानानि शब्दरत्नानि च निहितानि सन्ति अस्मिन् पुराण-रत्नाकरे। परन्तु तदर्थमवगाहनमपेक्षितम्। अतः पुराणरत्नाकरस्यावगाहन-निमज्जन-प्रसङ्गेऽस्माभिर्मन्दर-मैनाकादिवत् प्रवर्तितव्यम्, न वानर-वकादिवत्।

तेषां भाषावैज्ञानिकतत्त्वानामुपलब्धये पुराणरत्नाकरस्य मन्थनमावश्यकं प्रतिभाति। समुद्रमन्थने कृते सति चतुर्दश रत्नानि एव प्राप्तानि। अत्र तु असंख्येय-शब्दरत्नानि प्राप्तानि सन्ति।

मन्ये, भाषाविज्ञानस्य मूलस्रोतः पुराणं रामायणं महाभारतं च वर्तते। तत्र सगर-सागर-पृथ्वी-अहल्या-कल्माषपाद—मान्धाताऽक्षपादाऽश्मक—नारीकवच—मरुन्—मारुत—मरुत्त-सहस्राक्ष-गोत्रभित्-परीक्षित-विपाशा-शतद्रुप्रभृतीनि निरुक्तिमूलानि शब्द-रत्नानि विविधदेश-कालेनेतिहास-भूगोल-सम्बद्धानर्थान्-विविधतथ्यानि च सूचयन्ति।

शब्दानां तानि पौराणिकनिर्वचनानि पठित्वा एतदनुभूयते यन्महर्षियास्क एव शब्दानां निर्वचने निरुक्तौ वा नैव पारङ्गत आसीत्, किन्तु भगवान् व्यासोऽपि निर्वचन-शास्त्रस्य निरुक्तिविद्याया वा पारदृश्वाऽऽसीत्।

---

*प्राचार्यः—राजकीय-संस्कृत-महाविद्यालयस्य, राँची (बिहार-प्रदेश)

आदिकविवाल्मीकिरपि शब्दसागरस्य मैनाक आसीत् । आदिकाव्येऽपि सैव निर्वचन-सरणी राजते यथा व्यास-साहित्ये । तथा च सहस्राक्ष-मरु-मान्धातृ-रावण-सागर-सरमा-वैश्रवण-ककुत्स्थ-जनक-निषाद-यक्ष-राक्षस-मैथिल-मैथिली-मिथिला-विदेह-निमि-प्रभृतिशब्दरत्ननिर्वचनैस्तत्रस्थैर्ज्ञायते ।

यदि तेषां महर्षीणां निर्वचनप्रधानैः आदिकाव्यपुराणप्रसिद्धभाषावैज्ञानिकशब्दरत्नैः भाषाविज्ञान प्रासादस्यालङ्करणं क्रियेत, तदा भाषाविज्ञानस्य तादृशं पौराणिकशब्दरत्नजटित-मपूर्वं प्रासादं दृष्ट्वा अस्माकं भाषावैज्ञानिकशब्द-रत्नान्वेषणतत्पराणामन्तकरणेः कोऽपि अनिर्वचनीयः प्रसादः स्यात् ।

वस्तुतो भाषाविज्ञानस्य क्षेत्रं ब्रह्मवद् विस्तृतं वर्तते । यथा ब्रह्म सर्वत्र व्याप्तं तथैव भाषायाः विज्ञानमपि सर्वत्र व्याप्तम् । यत्र व्याकृता स्फुटिता वा भाषा नास्ति, तत्राव्याकृता मूकभाषा सङ्केतो वा वर्तते । अतः पुराणं ब्रह्म, विज्ञानं ब्रह्म, सत्यं ज्ञानमानन्दं ब्रह्मवत् भाषा-विज्ञानमपि सर्वत्र व्याप्तं वर्तते ।

नाटके काव्ये वा तादृशी व्यापकता नास्ति यादृशी भाषाविज्ञाने । फलतः संस्कृत-जगति प्रचलितसूक्तौ किंचित् परिवर्तनं कृत्वा एवं वक्तुं शक्यते यत्—

न स शब्दो न सा विद्या न स न्यायो न सा कला ।
जायते यन्न भाषाङ्गं भाषाक्षेत्रं महत्तमम् ॥

भगवान् पतञ्जलिः प्राह यत् 'एकः शब्दः सम्यगज्ञातः ।' परन्तु शब्दस्य सम्यग्ज्ञानं संस्कृतमाध्यमेनैव स्यात् । अन्यथा तिमन्–सिलाटै–वकेन–धेनु–उधंग प्रभृतिशब्दानां विज्ञानं नैव स्यादस्मिन् हिन्दीयुगेऽपि ।

तदर्थं संस्कृतशरणमेवाधिगच्छेदस्मिन् वैज्ञानिकयुगेऽपि । तदेव विदित्वा शतद्रु-विपाशादिशत-सहस्रशब्दानां विज्ञानं प्राप्नोति । नान्यः पन्था विद्यते शब्दानां विज्ञानाय । पौराणिकनिर्वचनप्रकाशे एव तेषां पुराणप्रसिद्धभाषावैज्ञानिकशब्दानां वास्तविकार्थो-ज्ञातुं शक्यते । फलतः अस्माभिरनुभूयते—

यथा यथा हि पुरुषः पुराणमवगाहते ।
तथा तथा हि भाषायाः विज्ञानं सम्प्रकाशते ॥

तथा चास्तीक-धेनु-रघु-क्षत्रिय-श्रोत्रिय-जरासन्ध हयग्रीव-कार्तिकेय-वृन्दारण्य-शिशुपाल-वाजसनेयी—कृष्णयजुर्वेद-तैत्तरीयशाखा-भरद्वाज-शुक्र-सौम्य-शान्तनु-फाल्गुन-शकुन्तला-वैश्रवण-रावण-मेघनाद-क्रौंचरन्ध्रगौरीशंकरापर्णा-पार्वती-प्रभृतिशब्दानां विज्ञानमर्थात् शिष्टं विशिष्टं निर्वचननिरुक्तिजन्यं ज्ञानं पुराणपरिज्ञानं विना नैव सम्भाव्यते ।

संस्कृतस्य विशिष्टविद्वांसोऽपि यदि श्रीहर्ष-तुलसीवत् पुराणमन्थनपरायणा नहि सन्ति तदा भ्रमन्ति। यथा ममैकं मित्रं रघुवंशस्य टीकायां गोत्रभिच्छब्दस्य व्याख्याने भ्रमिं प्राप्य गोत्रनामकराक्षसं भिनत्तीति व्याख्यां कृतवान्। परन्तु तत्र पुराणकथानकाज्ञानमेव कारणमासीत्। इन्द्रस्यैकं नाम पक्षच्छिदपि वर्तते। "क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्रौ।" प्रसङ्गेण सह गोत्रभिच्छब्दस्य समन्वयः करणीयो विद्वद्भिः।

पुराणज्ञानबलादेव कवितार्किकः श्रीहर्षः देवी पवित्रितचतुर्भुजवामभागा वागालपदिति सूक्तिं स्वोक्तिं वा प्रमाणितवान् कश्मीरनगरे देव्याः सकाशात् प्रमाण-पत्रग्रहणप्रसंगे। तत्र पुराणप्रमाणबलेनैव मुखरां सरस्वतीमपि मूकां कृतवान्, तस्याश्च विष्णुपत्नीत्वं प्रमाणितवान्।

देवीभागवतस्य सत्यव्रतोपाख्यानं द्रष्टव्यम्। तत्र शूकरोऽनेन मार्गेण गतो न वेति प्रश्नस्योत्तरप्रदानप्रसङ्गे सत्यव्रतः प्राह—"पश्यति न सा ब्रूते" इमां सूक्तिमेवानुसरति मानसकवेः सा सूक्तिः— 'स्याम गौर किमि कहौं बखानी। गिरा अनयन नयन बिनु बानी॥ कथनस्यायं भावो यत् या सूक्तिः भाषायां सर्वश्रेष्ठमहाकाव्यस्य सर्वोत्तमा सूक्तिरस्ति साऽपि पुराणपुरुषस्य व्यासस्योच्छिष्टा एव वर्तते। शुकमुखात् स्पृष्टा वा वर्तते। यश्चोच्छिष्टप्रसादः राष्ट्रभाषाभक्तैरस्माभिर्विष्णोश्चरणामृतमिव शिरसा धार्यते बहुधा च वर्ण्यते।

अतो भाषावैज्ञानिकैः स्वीकर्तव्यं यत् यथा निरुक्तं व्याकरणस्य पूरकमस्ति, तथैव पुराणं भाषाविज्ञानस्योपजीव्यं, मूलस्रोतः, पूरकं वाऽस्ति।

परःसहस्रं तादृशाः शब्दाः सन्ति, येषामर्थविज्ञानं व्याकरणेन नैव भवति। किन्तु तदर्थावगमनं पुराणेन भवति। व्याकरणस्य क्षेत्रं सीमितं लक्ष्मणरेखया वाऽवरुद्धमस्ति। लक्ष्य-लक्षणे व्याकरणं व्याकरोति। प्रकृति-प्रत्ययविचारे व्याकरणं प्रचलति। भाषाविज्ञानं तु दूरं पश्यति, दीर्घं पश्यति, सूक्ष्मं च पश्यति, ऐतिहासिकं भौगोलिकं चार्थं सूचयति।

महती सूक्ष्मेक्षिका भाषाविज्ञानस्य। एतदपि वक्तुं शक्यते यद् व्याकरणं वदनलेखनक्रियासु विशुद्धिं ददाति। भाषा-विज्ञानं तु दूरवीक्षणमस्ति। दूर-दर्शनं ददाति। अतो व्याकरणं शब्दशास्त्रमस्ति, किन्तु भाषाविज्ञानं दर्शनमस्ति। अर्थदर्शनं करोति कारयति च। तेषां विशिष्टशब्दानामर्थज्ञानस्यान्वय-व्यतिरेकौ भाषाविज्ञानेन यथा स्तः, न तथा व्याकरणेन।

यत्राष्टौ व्याकरणानि विज्ञानमप्राप्य निवर्तन्ते; तत्र भाषाविज्ञानं पुराणं वागच्छति। आस्तीकजरत्कारुप्रभृतिशब्दानां यथार्थज्ञानं व्याकरणेन नैव भवति, परन्तु पुराणं भाषाविज्ञानं वा तत्रेतिहासं भाषयति, दर्शयति वा। अतः सत्यमुक्तं भाषाविज्ञानं दर्शनमस्तीति। इतिहासमुपभ्रावति भाषाविज्ञानम्। पुराणमितिहास एव। अतो भाषाविज्ञानस्य यथा स्वाभाविकसम्बन्धः पुराणेनेतिहासेन वा न तथा व्याकरणेन। शब्दसिद्धिर्हि नैव विषयो भाषाविज्ञा-

नस्य किन्तु अमुकनाम किं मूलकमिति अर्थविचारमूलकं भाषाविज्ञानमथ च शब्दसिद्धि-मूलकं व्याकरणमिति सूत्ररूपेण वक्तुं शक्यते।

आधुनिकभाषाविज्ञानस्य भवनं यदधुना दृश्यते, तदार्षभाषाविज्ञानरहितं पूर्वजरिक्थ-रहितं वा प्रतिभाति किं वाऽऽधाररहितं निराधारगन्धर्वनगरमिव क्षणिकशोभाधायकं प्रतिभाति।

अस्य प्रतीयमानस्य भवनस्य मूले पुराणस्य शिलान्यासो यदि अभविष्यत्, तदा नूनमत्र दृढत्वं स्थायित्वं वाऽभविष्यत्।

"दृढत्वमेतद्विषयश्च बोधः प्रयाति पौराणनिषेवणेन।"

भाषाविज्ञानस्याजस्रं स्रोतः पुराणपर्वतात् प्रवहति। तस्य स्रोतसोऽज्ञानमेवात्र बन्धः। तस्य बन्धस्य भङ्गो यदा भवेत् तदा भाषाविज्ञानस्य धारा तथैव मनोहरा दर्शनीया च स्यात् यथा मन्दाकिन्या धारा। अन्यथा विनशनप्रदेशे सरस्वतीव सा क्षीणा क्षीणतरा, अन्ततो विनष्टा स्यात्।

अतः पुराणप्रथितस्वपुरातननिधिं जानन्तु भाषावैज्ञानिकाः। पुराणरत्नाकरगर्भस्थानि भाषावैज्ञानिकशब्दरत्नान्येवादाय आधुनिकभाषाविज्ञानस्य भाण्डागारं प्रवर्धयन्तु भूषयन्तु च। यथा शुक्तिः स्वगर्भे मौक्तिकं रक्षति, तथा पुराणरत्नाकरस्य एकैकं शब्दरत्नं स्वगर्भे महान्त-मितिहासं रक्षति। पुरातनं वृत्तान्तं प्रकाशयति। तन्नामकरणकारणं च सूचयति। यथा मेघः समुद्रस्य जलमादाय विश्वस्मिन् वितरति, तथा भाषाविज्ञानरसलुब्धा रसिकाः पुराणरत्ना-कराद् भाषावैज्ञानिकशब्दरत्नान्यादाय विश्वस्मिन् वितरन्तु। भाषाविज्ञानस्य भवनं वाऽलं-कुर्वन्तु, प्रसादयन्तु च।

पुराणपद्धत्यै तादृशा भाषावैज्ञानिकशब्दा नेपथ्यरहिता निरावरणाः सन्त आत्मसमर्पणं करिष्यन्ति, यथा प्रेमपद्धत्या जाया आत्मनः समर्पयन्ति। उतत्वः पश्यन्न सुतरामेकः शब्दः सम्यग् विज्ञातो तदैव भवेत्, यदा पुराणस्य पुरातनस्रोतसा सह परिचिता भविष्यन्ति भाषा-विज्ञानरसरसिकाः।

एवंप्रकारेणाधस्तादेतन्निरूपितं यत् पुराणं भाषाविज्ञानस्योपजीव्यं पूरकं मूलस्रोतो वा वर्तते। पुराणरत्नाकरेऽसंख्यानि भाषावैज्ञानिकशब्दरत्नानि सन्ति, तानि प्राप्तुं तस्य रत्नाकरस्यावगाहनं मन्थनं च कर्तव्यं भाषावैज्ञानिकैरिति सत्यं प्रतिपादितं "तदिदं विद्या-स्थानं पुराणं भाषाविज्ञानस्य पूरकमिति।

अधुना कानिचित् पुराणप्रसिद्धानि निर्वचनप्रधानानि भाषावैज्ञानिकशब्दरत्नानि विदुषामग्रे परीक्षितुमुपस्थाप्यन्ते, येषां महत्त्वमुपरि बहुधा प्रतिपादितम्।

१—सगरः —गरेणा सह प्रादुर्भूतत्वात् ।

२—सागरः —येषां स सगरो नाम सागरो येन खानितः ।

३—पृथिवी —प्रथनात् पृथिवी इति यास्कः । पृथोः सम्बन्धात् इति वयम् ।

४—अहल्या —हलं नामेह वैरूप्यं हल्यं तत्प्रभवं भवेत् । यस्य नास्तीह वै हल्यमहल्या तेन सा स्मृता (आदिकाव्ये)

५—कल्माषपादः —शापजलस्य पादयोः प्रक्षेपात् चित्रितौ पादौ यस्य ।

६—अक्षपादः —तत्त्वचिन्तने निमग्नो हि गौतमः एकदा गच्छन् अन्यत्रमनाः कूपे पपात । अतः तस्य पादे अक्षि प्रदत्तं भगवता । अतः अक्षपादो हि गौतमः ।

७—अश्मकः —बहुदिनानि अयं गर्भ एवोवास । अन्ततः अश्मना ताडितो गर्भः मात्रा । ततः तज्जन्म जातम् । अश्मना ताडितः गर्भे यः स अश्मकः ।

८—नारीकवचः —पृथिवीं निःक्षत्रियां कुर्वन् परशुरामः एकं क्षत्रियं हन्तुमधावत् तं काचिन् नारी वस्त्रावर्ते ररक्ष । अतः नारी एवं कवचं यस्य सः ।

९—मरुत् —गर्भस्थं रुदन्तं बालं भ्रूणहा इन्द्रः प्राह मा रोदीः । अतः एतन्नाम जातम् ।

१०—मान्धाता —धेट् पाने इति धातुरत्र। कः मां धास्यति इति पृष्ट इन्द्रस्तन्मुखे देशिनीं ददन् प्राह-"मां धास्यसि । अतः एतन्नाम जातम् ।

११—मरुत्तः —अस्य जन्मकाले मरुतः बहुधा कीर्तिताः शार्दूलैः शुभाशंसकैः । अतः एतन्नाम जातम् ।

१२—सहस्राक्षः —गौतमस्य शापात् सहस्रमक्षीणि अस्य ।

१३—गोत्रभित् —पर्वतपक्षच्छेदनादिन्द्र एतन्नाम्ना प्रथितः । गोत्रान् गिरीन् भिनत्ति यः ।

१४—उपेन्द्रः —१ द्वितीयः इन्द्रः वामनः २ उपगतः इन्द्रो यस्य गोवर्धनधारणकाले, अत उपेन्द्रः श्रीकृष्णः ।

१५—परीक्षितः —१ गर्भे विष्णुना परितः ईक्षणात् परीक्षित इति श्रीमद्भागवतम् अथवा येन गर्भे विष्णुः परित ईक्षितः ।
२ परिक्षीणेषु वंशेषु जातत्वादिति देवीभा० ।

१६—विपाशा —विगतः पाशो यस्यां नद्यां वसिष्ठस्य सा विपाशा ।



LOVE IN KALIDASA

Dr. S. S. Pandit*

The present article deals with the concept of Love, specially between man and woman, in Kalidasa, and its significance for us. But before coming to Love, the most fundamental emotion of life, I would like to say a few words on Beauty; for Love and Beauty are inter-related, and the existence of one generally depends on the existence of the other. It is another matter that Beauty comes within the purview of Love, but its contrary is not always true. Some writers hold that Beauty is born out of Love, while others believe that it is Love which is born out of Beauty. Yakshini in MEGHADUTAM is a fine example of feminine beauty:

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ॥

(There she lives who is, as it were, the first creation of Brahma amongst women, slim, youthful (or fair in complexion) with pointed teeth, a lower lip red like a ripe 'bimba' fruit, thin at the waist, with her eyes like those of a frightened female deer, with a deep navel, slow in gait on account of heavy hips and bending a little low by the weight of her breasts.)

So is Malavika In MALAVIKAGNIMITRAM :

दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव
मध्यः पाणिमितो नितम्बि जघनं पादावरालङ्गुली
छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथाऽस्या वपुः ॥

* Lecturer in English, St. Xavier's College Ranchi (Bihar)

(Her face has long eyes and lustre of the autumnal moon, the arms slope down by the shoulders. Her chest is compact with thick and swellng breasts; her sides smooth as though planed off. Her waist can be measured by the palm of the hand and her hips are broad and the feet have curved toes and her body is fashioned to suit exactly the fancy af the mind of a dancing master.)

Real Beauty does not require any external adornment: 'किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।' [ABHI, I, 20] (what does not adorn one who is sweet and charming ?) Kalidasa asserts that a thing of beauty is always beautiful:

यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम् ।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ॥

(Parvati's face looked as beautiful with matted locks as it did when her beautiful hair was adorned with sweet smelling flowers. The lotus flowers look beautiful not only when they are surrounded with black bees; they also look beautiful amidst water-plants.)

This idea has been made clearer in description of the physical beauty of Shakuntala the daughter of Nature:

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै—
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥

(Her faultless beauty is a flower not yet smelt, a tender leaf not yet plucked with the nails, a gem not yet cut, the, fresh wine which has not yet been tasted; indeed the fruit of merits not yet divided. I know not whom the Ordainer will approach as the enjoyer of this Beauty.)

But physical beauty is not all. Love cannot find a permanent seat in the lover's heart if he is attracted by the physical beauty only.

Love is 'मूकास्वादवत्' (like the taste of something to a dumb). It is vary difficult to be expressed in words. Love is life's essence, without wnich life is meaningless, dull and dreary. Love has not much to do with physical beauty. Love born out of physical beauty cannot be called Love in real sense of the term; it is sex which may not have anything to do with Love. It is to be regretted that our sense of values about Love has been infected by the western sense of values and we have forgotten, to a great extent, our old and traditional norms of Love. An example of Love in the western sense is to be found in the attitude of Love of Charles Sherif, a typical modern English young man, in C. P. Snow 's early novel, THE SEARCH (1934): '. . . I' d got used to sex without love, I found it so difficult to imagine love and sex together for myself . . . .' (Penguin Edition, 1965, P. 235)

True Love is beyond description. With the advance of time and age it grows stronger. In the words of William Shakespeare,

"Love is not love
Which alters when alteration finds,
Or bends with the remover to remove. . .
Love is not Time' s fool, though rosy lips and cheeks
Within his bending sickle' s compass come;
Love alters not with his brief hours and weeks,
But bears it out ev'n to the edge of doom." (Sonnet No 116)

Such love has been termed 'shiva' or 'kalyan'in Sanskrit. What Bhartrihari, the great Sanskrit poet, tells about the duty and function of a true friend can be aptly said of Love: पापान्निवारयति योजयते हिताय [NITISHATAKAM, Verse 67] (dissuades from sin, persuades to good action)

Love is deepened by hardships and sufferings borne for the sake of Love. It grows a hundredfold in its intensity by obstacles. The ties of true love become stronger during the separation of the lover and the beloved. To quote Kalidasa :

स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा--

दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ (MEGH, 109) (They say Love withers away during separation--a thoughtless assertion: affection becomes accumulated as its desire for the object loved is intensified from non-enjoyment.)

Such Love is ideal Love and it can be attained by penance and sacrifice and is purified by 'वियोगाग्नि' (the fire of separation) But Love caused by the attraction of physical beauty is temporary and its ultimate result is sorrow and suffering. To Kalidasa physical beauty is a means, not an end in itself; it is to attract one 's love: प्रियेषु सौभाग्यफला हि चारुता। [KUMAR, V, 1] (The object of Beauty is to win the lover's heart.) Parvati, being proud of her physical beauty, had gone to win Shiva as her husband but the result was injury and insult:

तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता॥

(KUMAR, V, 1.)

(Seeing that Kamadeva was burnt to ashes by Shiva in her presence, Parvati, whose wish was unfulfilled, realised from the very core of her heart that her beauty was useless; for Beauty is that which wins the lover' s heart.)

When the power of her physical beauty failed to attain the desired object, she decided to win Shiva as her husband by penance and sacrifice, and, at last, her efforts proved fruitful. In ABHIJNANA SHAKUNTALAM, King Dushyanta was charmed by the physical

beauty of Shakuntala, but his love for her proved temporary. He had to lose her and could get her back again only after many years of separation, sacrifice and penance.

Blind Love, to Kalidasa is not ideal; it is fleeting having no firm footing. Shakuntala had to suffer the pangs of separation from her husband because her love for Dushyanta was blind. Being absorbed in thoughts about her lover Dushyanta, she conpletely neglected her duty—duty to take proper care of her guest Durvasas. Bodily Love separated from duty and responsibility is not ideal Love as presented in Indian classics. Moreover, love is not Sex; it is spiritual communion between the lover and the beloved.

This is how love has been presented in the works of Kalidasa, and this love is pure, sacred and selfless. A true lover is interested in winning his beloved' s mind and heart. If two souls join together on mental and spiritual planes, then there is real fulfilment of Love, and the lover who succeeds in achieving perfect communion of oneness with his beloved thinks little about physical union. Love, tc Indian classical writers in general and Kalidasa in particular, "is the hastening gravitation of spirit towards spirit'' and not of body towards body. It brings eternal bliss and "travels heavenwards".

In recent literature the concept of Love is based on foundations alien to those found in Kalidasa. By Love we understand the physical union of the Lover and the beloved.The worst thing is that the so-called intellectuals, in the name of ciuilization and modernity, make no distinction between Love and Sex. Kalidasa tells us what the true and real meaning of Love is. True Love rids man of the very idea of self and takes him into the world of eternal bliss. This bliss teaches man to make brother of everybody: वसुधैव कुटुम्बकम् (universal brotherhood).

Without Love one cannot live happily; his very existence becomes doubtful and shaky. Matthew Arnold, the Victorian English poet, also expressed his alarm a century ago. He said,

"Ah, love, let us be true
To one another for the world, which seems

To lie before us like a land of dreams,
So various, so beautiful, so new,
Hath really neither joy, nor love, nor light,
Nor certitude, nor peace, nor help for pain;
And we are here on a darkling plain
Swept with confused alarms of struggle and flight,
Where ignorant armies clash by night." (DOVER BEACH)

Arnold thinks that lovers must be true and faithful to each other if they are to live in the modern world in which things fall apart.

Kalidasa 's works present patterns of Love which are sublime and integrated. They retain the aesthetic and the physical contents of Love as it is ordinarily understood, specially in the west. today, but emphasise the spiritual and transcendental meaning of Love as well. There is no denial of Love as it is in our day-to-day affairs of life, but they also stress that this is not the full meaning and purpose for which this instinct of Love is bestowed upon man. Love is a means of making not only the physical life more meaningful and complete, but it is also a spiritual hunger which enriches the life of the soul and makes it achieve spiritual fulfilment.

In fact, Love in Kalidasa is depicted as a power which transforms man into a god. It is true that this interpretation is based on idealistic foundations. It is also true that it does not take into account the realities of life, realities which have been uncovered by Freud and other western writers. However, it is necessary to recognise the value of the patterns of Love as described by Kalidasa in his works. These interpretations may be unfashionable but they can reinvigorate the muddy waters of modern literature.

I would like to conclude by stating that if we understand Love as it is depicted in the works of Kalidasa then it will give us a more wholesome vision of life and will lead to a greater happiness both for the individual and the society as a whole than before.



सूचना

[अस्मिन्नङ्के प्रथमनिबन्धानन्तरमत्र यावद् ये शोध निबन्धाः प्रकाशितास्ते विहारप्रदेशीय-**छोटानागपुर-प्रमण्डलीय-संस्कृत-सम्मेलने** पठिताः सन्ति। तत्र सम्मेलने पठितानामन्येषां शोध-निबन्धानां मध्ये १—'रसनिष्पत्तिः-आचार्यमम्मटश्च' तथा २—महाकविकालिदासस्य काव्येषु परिवारकल्याणम्' इत्येतन्नामकौ निबन्धौ पूर्वमेव प्रकाशितौ। 'परमार्थसुधा'परिवारो राँचीस्थ-संस्कृत-सेवासङ्घस्य मन्त्रि-महोदयान् प्रति एतदर्थमाभारं प्रकटयति यत्तैः शोधनिबन्धान् सम्प्रेष्य पत्रिकेयमनुगृहीतेति। —सहसम्पादकः]

●

पूर्वतोऽनुवृत्तम्—

घनावली श्यामापि नयनाभिरामा भवति।

जनः भीत्या वशीभवति न तु शक्त्या।

स्वल्पोऽपि दृढः संकल्पः अनल्पाय फलाय कल्पते।

भोजनानन्तरमेव सर्वा योजनाः प्रचलन्ति।

साहसमेव जीवनस्य रसः।

पराधीनता हीनतायाः जननी भवति।

आशा खलु सर्वा अपि दिशः प्रकाशयति।

योगो भोगो वा उद्योगेनैव सिद्ध्यति।

विश्वासवतां निराशतायाः किं कारणम्?

आत्मानुशासनमेव आत्मविकाशस्य **मूलं सूत्रम्**।

नवीनता प्राचीनता वा सर्वत्र समीचीनतां नावहति।

मूर्खः सहायकोऽपि सुखदायको न भवति।

पाटवं सर्वत्र सौष्ठवं सम्पादयति।

परद्रोहः खलु अन्तिमा सीमा निजमोहस्य ।

बुद्धिमन्तोऽपि विश्वासानां दासा भवन्ति, हा हन्त !

वस्तुतः कर्षका एव आनन्दसुधावर्षकाः ।

गर्वः सर्वमपि खर्वीकरोति ।

मनःशुद्धिः बुद्धेरपि गरीयसी भवति ।

अप्रियसङ्गः रङ्गे भङ्गः ।

सर्वत्र आत्मीयताबुद्धिः परमा आध्यात्मिकी सिद्धिः ।

मुहूर्तमपि धूर्तस्य सङ्गतिः हानिकरी भवति ।

हृदयस्य दाहः वारिप्रवाहेण न शाम्यति ।

वर्षायां छत्राणि इव जीवने समाचारपत्राणि परमावश्यकानि ।

शैशवे कृतोऽभ्यासः पाश इव मनुष्यं न मुञ्चति ।

यदि देशे दैन्यं तदा सैन्येन किम् ?

ये साहसमहोदधेरन्तःकणान् स्पृशन्ति त एव अनर्घान् मणिगणान् प्राप्नुवन्ति ।

अव्यवस्था एव संस्थाया विनाशं करोति ।

कदाचित् अकार्य्यमपि अनिवार्य्यं भवति ।

एकक्षणस्यापि अपायो जीवनं प्रति अन्यायो भवति ।

धर्मतो भ्रष्टः सर्वतो नष्टः ।

आयासं विना इतिहासस्य निर्माणं न भवति ।

यथा कान्तानां तथा सिद्धान्तानामपि बन्धनं दुर्बोधनीयं भवति ।

भोजने आज्यं परमं राज्यम् ।

प्रीतेः विचित्रा रीतयो भवन्ति ।

शिशूनां वाणी कं वा प्राणिनं न सुखाकरोति ।

उद्यमैः दरिद्रा अपि इन्द्रा भवितुमर्हन्ति ।

क्रोधः खलु बोधस्य सुमहान् अवरोधः ।

दम्भः मानवस्य आरम्भमेव दूषयति ।

एकस्तु दोषः तत्रापि रोषः ।

सुस्पष्टा वाचः काच इव सर्वमर्थं सम्यक् प्रकाशयन्ति ।

गृहप्रबन्धा इव निबन्धा अपि अनायास-साध्या न भवन्ति ।

बुधानपि क्षुधा बाधते ।

सतां सङ्गः सर्वमपि अमङ्गलं हरति ।

वृषीसु उपवेशनेन कृषिः साधीयसी न भवति ।

सौजन्यं पर्जन्य इव परमाह्लादकं भवति ।

वेदः स्वेदश्च अविच्छेदेनैव जगत्कल्याणं कुरुतः ।

सुष्ठु प्रयुक्ता वाणी कस्य वा कल्याणं न साधयति ।

सर्वदा एकस्थाने स्थितिः अपरा मृतिरेव ।

क्वचिद् दूषणानि अपि भूषणानि भवन्ति ।

यदेव अभ्यस्तं भवति तदेव प्रशस्तं भवति ।

अल्पभोजनं दीर्घजीवनम् ।

धर्मतो भ्रष्टः सर्वतो नष्टः ।

धर्मस्य मर्मज्ञा विरलाः ।

अन्धा वरं, परं धर्मान्धा न वरम् ।

कुष्माण्ड-ब्रह्माण्डयोः किं सादृश्यम् ।

मक्षिकाः सर्वभक्षिका भवन्ति ।

विषयाः किसलया इव स्निग्धा अपि विषदिग्धा इव विनाशका एव ।

यथा मूलं तथा चूलम् ।

शैशवानि कुतूहलवैभवानि ।

निदाघतप्ताः छायास्विव कुटुम्बिनो जायासु विश्रान्तिं लभन्ते ।

मनसो ग्लानिः महती हानिः ।

अश्लीलचित्राणि कपटमित्राणि इव प्रच्छन्नविनाशकानि ।

राष्ट्रभाषा राष्ट्रोन्नतेर्बलवती आशा भवति ।

हंसानां शुक्लता प्रशंसां नापेक्षते ।

निद्रया विना इन्द्रस्यापि न सुखम् ।

सर्वत्र समबुद्धिरेव आत्मशुद्धेः प्रधानं साधनम् ।

कुलीनानां शालीनता स्वाभाविकी ।

कुलीना दीना अपि शालीनतां न परित्यजन्ति ।

ये चलन्ति ते एव स्खलन्ति ।

महान्तः एकेनापि उपकारेण भाराक्रान्तमिव आत्मानं मन्यन्ते ।

काले प्रयुक्तानि सूक्तानि मुक्ताभरणानीव वाचं चमत्कुर्वन्ति ।

प्रवासे सर्वेषां विश्वासो न कर्तव्यः ।

दीनानां दैन्यं पीना न जानन्ति ।

मात्सर्य्यं नाम सुमहत् अनार्य्यत्वम् ।

आर्य्यस्वभावानां मात्सर्य्यं कुतः ?

यदि शिक्षा केवलमुदरपूरणाय तर्हि भिक्षायां को दोषः ?

एकस्तु व्यालः तथापि विशालः तत्रापि करालः ।

यदेव घातकं तदेव पातकम् ।

अवस्थाभेद एव व्यवस्थाभेदस्य हेतुर्भवति ।

मनुस्यः आत्मनैव गौरवं गच्छति आत्मनैव रौरवं गच्छति ।

अहन्ताया अङ्कुराण्यपि भयङ्कराणि भवन्ति ।

सुभाषितानि मर्त्यलोकस्य अमृतानि ।

प्रीतिः नौका इव मनुष्यं तारयति च मारयति च ।

क्वचित् हास एव नाशस्य कारणं भवति ।

कुशलानां प्रतिकूला अपि अनुकूला भवन्ति ।

आर्याः खलु अकार्येषु न प्रवर्तन्ते । —क्रमशः

द्वितीयवर्षीयचतुर्थाङ्कादग्रे—

ब्रह्मचिन्तनपरम्पराया विकासः

डॉ० राजेन्द्रप्रसादद्विवेदी*

उपनिषत्साहित्यकालात् पूर्वं ब्रह्म 'नासदासीन्न सदासीत्तदानीमिति'[1] रूपेण कल्पितावस्थायां सृष्टिकार्ये दृष्टं भवति। अत्र ब्राह्मी स्थितिः कुत्रचिद्बहुत्वरूपा कुत्रचिच्चैकत्वरूपा उपलभ्यते। 'एकं सद्बहुधा विप्रा वदन्ति' इत्यादिश्रुतिदर्शनात्। ब्रह्म एकरूपे अनेकरूपे च प्रारम्भकाले दृश्यते। अस्य व्यासिशक्तिरपि अत्र स्वीकृतास्ति। अनन्तरं ब्राह्मणसाहित्ये इदं ब्रह्म सर्वसमर्थदेवरूपेण कार्यं करोतीति लभ्यते। अस्य आनन्दमयत्वं प्रकाशमयत्वम् अमृतत्वं च तत्र दृश्यते। परन्तु उपनिषत्समाम्नाये ब्रह्मविषयकधारणा उत्कर्षं प्राप्य विश्वजनीना भवति। अध्यात्मदर्शनस्य विश्वज्ञानकोशरूपेण यदि काचिदस्ति तत्तु उपनिषदेव। परन्तु गफमहोदयः ह्यूममहोदयश्च उपनिषद्गूढार्थहीनौ तस्या उत्कृष्टत्वमुपहसतः।[2] किन्तु उपनिषदि यत्प्रतिपादनं कृतमस्ति तद्विश्वनिर्माणसम्बन्धिसिद्धान्तस्य प्रथम आयासो निश्चयमेव रोचको महत्त्वपूर्णश्च वर्तते।

दर्शनशास्त्रस्य मूलभूतसमस्या एव उपनिषदो विषयः तच्च सत्यस्यान्वेषणम्। आत्मस्थितिज्ञानाभावे वयमसन्तुष्टाः सन्तः प्रथमं व्याकुलमनसः पृच्छामः—कुतो वयमुत्पन्ना निवसामः गमिष्यामश्च। कश्च दुःखं सुखं वा शास्ति। किं तत्र कारणं कालः उत प्रकृतिः अथवा पुरुषः परब्रह्म इति। केन प्रेरितं सन्मनः स्वाभिलषितप्रयोजनं प्रति अग्रसरं भवति। "केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः। केनेषितः वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति।"[3] अत्र प्रारम्भिकरूपेण प्रतिपादितस्य कारणस्य ज्ञाने इन्द्रियाणामसामर्थ्यं प्रतिपाद्यते। कथं तानि एव कार्यरूपाणि कारणानि भवितुमर्हन्ति। निश्चितमेव कापि एतादृशी सत्ता स्यात् यस्यां परमसत्तायां स्वयम्भूत्वं स्यान्न यदन्यतरसत्तामपेक्षते। यदभ्यन्तर एव मनोऽपि आश्रयं गृह्णाति। ज्ञानमनइन्द्रियाणि तेषां विषयाश्च सर्वाणि च प्रतिबन्धरूपाणि अव्यापकानि न सत्यानन्दप्रदायकानीति। सांसारिकसुखभोगा-

---

* प्राध्यापकः—स्नातकोत्तरसंस्कृतविभागस्य, राँची।

१. ऋग्वेद (नासदीय सूक्त) १०।१२६

२. दी थरटीन प्रिंसिपल उपनिषद्स पृ० २ (ह्यूम)

३. केनोप० १।१

देयस्तु क्षणमात्रस्थायिनः जरायां देहावसाने च विनाशशीला न नित्याः। स्थायिआनन्द-प्रदायकास्तु नित्यपदार्था एव। धर्मस्य क्षेत्रेऽपि नित्यजीवनप्राप्त्यर्थं प्रार्थना क्रियते। एवम् कालाघातरहिता एकैतादृशी सत्ताऽवश्यमेव स्यात् या आनन्दप्रदायिनी अभिलाषपूरयित्री चास्ति। उपनिषत्कारा ऋषयो यथार्थसत्ताप्राप्तिमार्गं प्रयच्छन्ति तत्कृते च मानवः प्रार्थयते—असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्मा अमृतं गमय।[1] एवं सज्ज्योतिरमृत-स्वरूपस्य कस्यचित् तत्त्वस्य ज्ञानं पारमार्थिकं भवति। परन्तु न तन्मनसा मनुते, चक्षुषा दृश्यते, श्रोत्रेण च श्रूयते। तदेव ब्रह्म इति केनोपनिषदि प्रतिपाद्यते—"यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इति श्रुतिप्रति-पादनात्।[2] एकस्य सतः सर्वत्र व्यापकत्वमत्र स्वीक्रियते परन्तु तस्य रूपं प्रति न कापि आकृतिरुदाह्रियते। सद्रूपेणात्मनो ब्रह्मपर्यायस्य जीवनाधारार्थे प्रयोगो दृश्यते स च अहं-स्वरूपक इति इन्द्रप्रजापत्योः संवादेन छान्दोग्ये समर्थ्यते। तथा च श्रुतिः—आत्मा अपहतपाप्मा विजरो विमृत्युः विशोको विजिघित्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः।" (छान्दो० ८।७।३)

एवं निर्वक्तुं द्रष्टुं चाशक्यं ब्रह्म इति प्रथमं दृश्यते उपनिषदि। अनन्तरं तस्य आत्मरूपेण व्यापकता प्रतिपाद्यते। स चात्मा कर्त्ता परिवर्तनेषु सामान्यतया वासी जाग्रत-स्वप्नसुषुप्तिमृत्युपुनर्जन्मसु मुक्तावपि च समभावेन स्थाता एक आवश्यकोऽवयव इति च बृहदारण्यके वर्ण्यते। स आत्मस्वरूपं कीदृशमिति विचार्यमाणे आत्मब्रह्मशब्दयोरेकत्वं च 'अयमात्मा ब्रह्म' (बृहदा० २।५।११) इत्यादिश्रुत्या बोध्यते। ब्रह्मशब्देन च 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्ब्रह्म (तै० १।५।१) इति श्रुतौ जगज्जन्मादिकारणस्य आत्मनः जगज्जन्मादिकारणत्वं सिध्यति। अत आत्मनः प्रमाणे चक्रकदोषस्य सम्भावना निरस्ता भवति। ब्रह्म तु पूर्वं निर्विकल्परूपेण प्रतीयते। पश्चात् आत्मरूपेण तस्यावगमो व्यापकगुणसमन्वितं भवति। व्यापकतायाः प्रदर्शनक्रमे बृहदारण्यके उक्तम्—अयमेवात्मा श्वासकाले श्वासः वचने वाणी दर्शने चक्षुः श्रवणे श्रोत्रं विचारे च मन इति कथ्यते।[3] 'अहमेव इदं सर्वोऽस्मि' (बृहदा० ४।३।२३) इति श्रुत्या आत्मनः विश्वत्वं ब्रह्माण्डत्वं च दृश्यते। तथाप्ययमात्मा न दृष्टिविषयकः। तथाहि साक्षी आत्मा चेतनां प्रकाशयति। न कदापि चेतनाया विषयो भवति। नायं स्वयमेव

१. बृहदा० १।३।२७

२. केनो० १।१।६

३. बृहदा० १।४।७ कौषी० अ० ३

विचारोऽपि तु समस्तविचार एतत्कृत एव, न चायं दृश्यः किन्तु द्रष्टैव। तस्मात् तदाकृतिप्रत्यक्षं न सम्भवति।

तैत्तिरीयोपनिषदि भृगुः पितरं वरुणमासाद्य ब्रह्मस्वरूपविषये पृच्छति। लक्षणं प्राप्य स अन्नं ब्रह्मेति व्यजानात्। प्राणो ब्रह्मेति व्यजानात्। मनो ब्रह्मेति व्यजानात्। विज्ञानं ब्रह्मेति व्यजानात्। आनन्दो ब्रह्मेति व्यजानात् (तैत्तिरीयो० ३।१—६) अन्नं तु नैव ब्रह्म भवितुमर्हति भूतत्वात्परिवर्तनशीलत्वाच्च। ब्रह्मणः प्राणत्वस्वीकारेऽपि नैव समाधानम्, प्राणमयजगति चैतन्यघटकविषयस्य जीवनतत्त्वेनाप्रतिपादनात्। ज्ञानात्मिका चेतना तु जीवनप्रकृतिभ्यां विलक्षणा समस्तप्राणधारकप्रक्रियामूर्धन्यरूपा भवति। मनस्त्वमपि ब्रह्म नैव सम्भवति बौद्धिकविषयाणां मनोजन्यज्ञानानिर्वाच्यत्वात्। ननु विज्ञानं बुद्धिर्वेति ब्रह्म इति चेन्नैवम् बौद्धसम्प्रदायविशेषाभ्युपगमात्। एवं ब्रह्म अत्र सर्वथा इत्थमित्यभिधानहीनं भवति। यथार्थसत्ता विचाराद् भिन्ना तुरीयावस्थाबोध्या ऐक्यप्रतिपादिकास्ति। आनन्दमयता तस्या एव परिणामो यत्र ज्ञाताज्ञेयज्ञानानामेकाकारता भवति। अत्रागत्य ब्रह्मसम्बन्धी विचारः पूर्णतामेति यत आनन्दस्य शाश्वद्बोध एव तज्जिज्ञासाहेतुः। इयमेव परमसत्ता। अयमानन्दः क्रियाशीलः सुखानुभवात्मको नित्यश्चास्ति। अयमेव आत्मा सर्वभूतोपकारको जनकश्च 'स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानां राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिताः, एवमेव अस्मिन् आत्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः' इति श्रुतिदर्शनात् (बृहदा० २।५।१५)।

उपनिषत्काले ब्रह्म आत्मा च समानार्थकः।[1] कुत्रचित् ब्रह्मणोऽन्यत्र च आत्मनः प्राचीनत्वं गीयते।[2] वस्तुनि तेजस्त्वन्तु आत्मचैतन्यमेव भवति। चैतन्यहीने पदार्थे नात्मत्वमिति उपनिषत्सम्मतिः।[3] 'सत्यस्यात्मेति वा अहमेतमुपासे....एवमुपास्ते सत्यस्य आत्मा भवति' (वासुदेवो० ३।३) इति श्रुतिप्रतिपादनात् आत्मनः सत्यत्वं प्रतीयते। अयमेव आत्मा देवानां जनयिता च 'आत्मा देवानां जनिता प्रजानाम्' इति श्रुतिदर्शनात्। आत्मा एव सर्वतः प्रियो भवति। न तद्वत् कश्चिदपि पदार्थः प्रिय इति बृहदारण्यके दृश्यते— "स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति।" एवमेव पुत्रः वित्तं क्षत्रं लोकः देवः सर्वमपि आत्मनः प्रियत्वे प्रियो भवति। तस्मादयमेव आत्मा द्रष्टव्यः श्रोतव्यः मन्तव्यो निदिध्यासितव्यश्चेति।[4] मायया आत्मा

१. तद्ब्रह्म अमृतं स आत्मा—छान्दोग्यो० ८।१४।१, २।५।१६ (बृहदा०)
२. आत्मा वा इदमेक एवाग्र आसीत्—ऐतरेयो०—१।१
३. तत्तेजम् आत्मचैतन्यस्वरूपम्—नृसिंहोत्तरतापनी० ।३
४. आत्मा वारे........बृहदा० २।४।५

—क्रमशः

अभिनव-साहित्य-परिचयः

१. **नाट्यपञ्चगव्यम्**—रचयिता—डॉ० राजेन्द्रमिश्रः प्राध्यापकः—संस्कृतविभागस्य, प्रयागविश्वविद्यालयः, प्रयाग। प्रकाशकः—वैजयन्तप्रकाशनम्, द्रोणीपुरम्, जौनपुरम् (उ० प्र०)। आकारः—रायल। पृष्ठानि—५८। मूल्यम्—३-००।

अभिराजराजेन्द्रमिश्रप्रणीतं 'नाट्यपञ्चगव्यम्' पञ्चानां (कवि सम्मेलनम्, राधामाधवीयम्, फण्टूसचरितभाणः, नवरसप्रहसनम्, कचाभिशापम्) गव्यत्वेनारोपितानां भाणप्रहसनादिलघुरूपकप्रभेदानां संग्रहात्मकं ग्रन्थरत्नमिदं संस्कृतवाङ्मयार्णवस्य यशःसौरभं वितन्वत् सचेतसां चेतःसु कमप्यपूर्वं विच्छित्तिविशेषं जनयतितराम्।

साग्रहं सानुरोधञ्चानुरुन्धे यदस्यानुशीलं याथातथ्यायावश्यं विधेयं सचेतोभिः।

२. **अकिञ्चनकाञ्चनम्**—आकारः—डबलडिमाई। पृष्ठानि—३४। मूल्यम्—३-००। अन्यत्पूर्ववदेव।

यूनानदेशीयः कश्चन लोभाभिभूतचेता राजा सद्गुणविमुखः स्वकीयकोषागारं सुवर्णभरभरितं कर्तुमनास्तच्चिन्तापरायणो बभूव। एकदा रात्रौ स्वप्ने केनचिद् दिव्यपुरुषेण प्राप्तवरः प्रसन्नः सन् यं कमपि अस्पृशत् स च स्वर्णमयः पदार्थः सञ्जातः। क्रमेण स्पृष्टाया अतिशयवात्सल्यभाजनभूतायाः कन्यायाः स्वर्णमयीत्वं निर्जीवत्वञ्चाभिवीक्ष्य शोकसंतप्तोऽभूत्। तद्दशामनुस्मरन् तस्य बाल्यकालिकः सुहृद् भगवन्तमाराध्य तादृग्दुर्दशापतितं राजानं विमोचयामास। इतः परं लोभस्य परिणामं विज्ञाय ततः पराङ्मुखीभूय प्रजासंरक्षणे दत्तावधानो जातश्चायं राजेति वृत्तमधिकृत्य भारतीयनाट्यशास्त्रीयां पद्धतिमनुसरन् स्वप्रतिभयोद्भासितामिमां कृतिं व्यरचयदयं महाकविः।

३. **नवाष्टकमालिका**—आकारः—डबलडिमाई। पृष्ठानि—४८। मूल्यम्—३-००। अन्यत्सर्वं पूर्ववदेव।

भक्तिभावप्रवणमानसेनाभिराजराजेन्द्रमिश्रेण संदृब्धेयं 'नवाष्टकमालिका' जनान्तरसञ्चितकालुष्यकुलमुद्धूयामलान्तःकरणे शुचिताङ्कुरं समेधयन्ती तत्तद्देवाधिदेवानां परमां कृपालुतां प्रकटयति।

अत्राचिन्त्यानन्दचिन्मयभगवत्सगुणस्वरूपाणां गणपति गौरीशारदाशङ्करविष्णु–रामकृष्णहनुमतां वाल्मीक्यादिमहाकवीनाञ्च स्तोत्रकदम्बकं विरचय्याव्याजधिया स्वस्य दैन्यादिकभावभरमात्मनिवेदनञ्च विजृम्भयन् स्तवनकर्मप्रवीणान् निसर्गसर्जनपटून् सुतरामुच्छलदुज्ज्वलभक्तितुन्दिलान् विदधाति सहृदयान् प्रणेतृवरः काव्यपथमधिरुह्य ।

—गोविन्दपाण्डेयः

४. **लक्ष्मीशतकम्**—प्रणेता—विद्याभूषणः श्री चि० मा० वेङ्कटराघवाचार्यः । प्राप्तिस्थानम्—2-2-647-77--D, Srinivasa Nagar, Bagh Amberpet. HYDERABAD--13 । आकारः—डबलक्राउन । पृष्ठानि—३२ । मूल्यम् – ०-५० ।

महिमशालिन्याः श्रीनृसिंहवामाङ्कगताया महालक्ष्म्याः स्तवनं द्व्याभिर्दशाधिकशतसङ्ख्याकाभिरार्याभिः सुललितपदेषु ग्रथितम् । कवयितुरुक्त्यनुसारेण स्वप्ने लक्ष्म्यादेशेन शतकमिदं विरचितम् । सर्वा अप्यार्याः प्रायो यथाऽनुप्रासादिकैरलङ्कारैरलङ्कृतास्तथैव भावगाम्भीर्यमपि बिभ्रतीति मणिकाञ्चनयोगोऽत्र वरीवर्ति । किन्तु सम्यक् प्रूफसंशोधनाभावादनेकत्र जाता अशुद्धयोऽकस्मादेव समुद्वेजयन्ति । श्रीलक्ष्मीशतकेन सहात्र श्रीकृष्णपञ्चामृतम्, श्रीशपादाब्जपञ्चकमाचार्यपञ्चकञ्चेति स्तोत्राण्यपि नानाछन्दोभिरुपनिबद्धानि यानि भक्तिभावनाभरितचित्तानां भक्तानां चेतांस्यावर्जयितुं सुतरां समर्थानि ।

५. **मङ्गलमालिका**—प्रणेता प्राप्तिस्थानञ्च पूर्वोक्ते एव । आकारः—डबलक्राउन । पृष्ठानि—८ । मूल्यम्—भक्त्या पठनम् ।

श्रीकृष्णमङ्गलम्, श्रीवैनतेयमङ्गलम्, श्रीहनूमन्मङ्गलं तथा श्रीत्यागराजमङ्गलमिति नामभिः शीर्षकैस्तत्तद्देवताचतुष्टयस्य स्तुतयोऽत्र विराजन्ते । अनुष्टुप्प्रमुखेषु वृत्तेषु गुम्फितानां चतुर्णां स्तोत्राणां मध्ये प्रथमे एकादश, द्वितीये चतुर्दश, तृतीये विंशतिश्चरमे च द्वादश श्लोकाः सन्ति । लघुन्यपि स्तोत्रसङ्ग्रहेऽस्मिन् भावप्रकर्षो हठादेव पौनःपुन्येन तानि पठितुं प्रेरयतीत्यहो कवित्वम् ।

६. **विद्योत्तमानाटकम्**—रचयिता—पं० विष्णुदत्तत्रिपाठी । प्रकाशकः—पं० कृष्णदत्तत्रिपाठी, अमरकंटक-राजकीय-संस्कृत-पाठशाला, अमरकंटक, शहडोल, मध्य-प्रदेश । आकारः—डबलक्राउन । पृष्ठानि—५५ । मूल्यम्—०·७५ ।

पञ्चष्वङ्केषु विभक्तेऽस्मिन् नाटके जनश्रुत्या प्रसिद्धं विद्योत्तमा--कालिदासयोराख्यानमितिवृत्तरूपेण गृहीतम्। भाषायाः सारल्यातिशयात्संस्कृतानभिज्ञोऽपि सम्पूर्णं वस्तु सुगमतयाऽत्रत्यमवगन्तुं पारयिष्यति। पुरुषपात्राणां स्त्रीपात्राणाञ्च सङ्ख्याबाहुल्यादभिनये रङ्गमञ्चोपस्थापने च किञ्चित्काठिन्यमिव प्रतिभाति। संस्कृतस्य प्रचार-प्रसारदशा साम्प्रतं यादृशं सुगमतमं मनोरञ्जकं च पुस्तकमपेक्षितं विशेषतो रूपकक्षेत्रे तद्दृष्ट्येदं सर्वथोपयुज्यते। निश्चितमेव रचनयाऽनया प्राथमिकोऽपि छात्रः मनो रञ्जयितुं तथाऽभिनवग्रन्थप्रणेता सत्प्रेरणां लब्धुं प्रभविष्यतीति दृढं विश्वसिमः।

७. अनुसूयाचरितनाटकम्—लेखकः प्रकाशकश्चोपर्युक्तौ। आकारः—डबलक्राउन। पृष्ठानि—१०४। मूल्यम्—१·२५।

नवसङ्ख्याकेष्वङ्केषु प्रस्तुतेऽत्र प्राधान्येनानसूयाया एव चरितमुपनिबद्धम्। भाषा सुगमतमा भावानुरूपिणी च विद्यते। पुरुषपात्राणि स्त्रीपात्राणि च बहूनि सन्ति। नाटकेऽस्मिन् क्लिष्टेनेतिवृत्तेन वर्णाश्रमव्यवस्था सविस्तरं व्याख्याता। ग्रन्थाध्ययनेन पुरातनी सामाजिकव्यवस्था स्मृतिपथमायाति। आश्रमाणां धर्मा अत्र पृथक्-पृथक् विभिन्नपात्रद्वारेण विशेषतः प्रतिपादिताः। नाटककर्तुर्भारतीयसंस्कृतिं पुनरुज्जीवयितुमत्र सफलः प्रयासो वर्तते।

—विद्याधरद्विवेदी



समीक्षणार्थं प्राप्तानि पुस्तकानि

१—काव्यप्रकाशदर्पणः

२—साहित्यमञ्जरी

३—संस्कृते नारीशब्दचित्रावली

४—कादम्बरीनाटकम्



सरस्वती श्रुतिमहती महीयताम्

—महाकविकालिदासः



ACHHRURAM KALKHOF & Co.

(SHELLAC) RIVATE LIMITED

25/26 STEPHEN HOUSE

Calcutta-1



इतिनामकेन विश्वविश्रुतेन लाक्षाप्रतिष्ठानेन

सुरभारती-सेवायै



सादर-समर्पणम्



प्रज्ञाया महत्त्वम्

(१)

न लोके दीप्यते मूर्खः केवलात्म-प्रशंसया ।
अपि चापिहितः श्वभ्रे कृतविद्यः प्रकाशते ॥

(२)

असदुच्चैरपि प्रोक्तः शब्दः समुपशाम्यति ।
दीप्यते त्वेव लोकेषु शनैरपि सुभाषितम् ॥

(३)

मूढानामवलिप्तानामसारं बहु भाषितम् ।
दर्शयत्यन्तरात्मानमग्निरूपमिवांशुमान् ॥

(४)

एतस्मात कारणात् प्रज्ञां मृगयन्ते तथाविधाम् ।
प्रज्ञालाभो हि भूतानामुत्तमः प्रतिभाति मे ॥

(महा० शान्तिप०–२८७, ३१–३४)

विद्वन्मोदावहा सूचना

एतत्पत्रिकायाः प्रधानसम्पादकानां श्रीमदाचार्यसत्यनारायणशर्ममहोदयानां शर्मण्यदेशीयाऽऽकाशवाणीतः प्रसारितानां संस्कृतप्रवचनानां सङ्कलनात्मकस्य ग्रन्थचतुष्टयस्य प्रकाशनं पूर्वं यथा सम्पन्नं मन्ये तेन मनीषिणोऽपरिचिता न भवेयुः । सौभाग्यादस्माकमेतेषां साहित्यदर्शनव्याकरणादिविषयकबहुविधप्रवचनानां बहुमूल्यं सङ्कलनमेकं 'प्रवचन-पराग' इति नाम्ना प्रकाश्यमानं वर्तते ।

पुस्तकरत्नमिदं न चिरादेव प्रकाशितं सम्भूय प्रदीपयिष्यति साहित्यरसिकानां हृदयमन्दिराणीत्याशास्यते ।

—व्यवस्थापकः

परमार्थसुधा

त्रैमासिक-संस्कृत-पत्रिका

परमार्थसुधा

(त्रैमासिक-संस्कृत-पत्रिका)

वर्षस्तृतीयः * अङ्कश्चतुर्थः

आषाढ–श्रावण–भाद्रपदमासाः

संवत्सरः-२०३६

सम्पादकः — श्रीसत्यनारायणशर्मा

सहसम्पादकः — श्रीवासुदेवद्विवेदी शास्त्री

प्रकाशकः
श्रीसोहनलालः
मन्त्री, परमार्थन्यासः
मुडहू, राँची (विहार)

●

प्राप्तिस्थानं, पत्र-लेख-मूल्यादि-प्रेषणसङ्केतश्च -
श्रीविद्याधरद्विवेदी
व्यवस्थापकः – परमार्थसुधा
सार्वभौम-संस्कृत-प्रचार-कार्यालयः
डी० ३८।११०, हौजकटोरा, वाराणसी
(उत्तर-प्रदेशः), दूरभाषः – ६६०२५

●

वार्षिकं मूल्यम्–दश रूप्यकाणि
विदेशेषु – दश डालराणि

●

मुद्रकः
बैजनाथ प्रसाद
कल्पना प्रेस
रामकटोरा रोड, वाराणसी।

विषया लेखकाश्च



परमार्थसूक्तयः

तन्मे मनः शिवसंकल्पमस्तु ।

(१)

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवेति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥

(२)

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥

(३)

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥

(४)

येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ॥

(५)

यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥

(६)

सुषारथिरश्वानिव यन्मनुष्यान्
नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं यविष्ठं
तन्मे मनः शिवसंकल्पमस्तु ॥

—ईशोपनिषद्

अष्टावक्रगीताविषयकः प्रतीच्यविद्वद्विमर्शः

•

श्रीसत्यनारायणशर्मा

•

सैकतभूमौ मृग्यमाणेन वारिणा सदृशं खलु लोकेऽस्मिन् आमोहक्षपावसानं सुखम्। सर्वविधान् जागतिकसमुच्छ्रयान् पतनान्ताम् दर्शं दर्शं विवेकिनस्तु सर्वतोभावेन विरज्यन्ते, शाश्वतिकं पदं जिगमिषन्तः। अमृतौघसिन्धुसन्निधिं लिलक्षयिषवो बहवो मनीषिणो जगतो हितकाम्यया दुःखविप्रमोक्षस्य पन्थानं कालेऽदीदृशन्, अरक्षिषुश्च मोहमकरेभ्यः श्रेयोऽभिकाङ्क्षिणः। अष्टावक्रगीताऽपि कस्यचिदवाप्तशाश्वतिकानन्दस्य महामनीषिणः कृतिः। ननु परमार्थदृशः कृतिरियं कस्मिंश्चित् खैस्तशतके प्रणिन्य इति प्रश्नस्य समीचीनमुत्तरमद्यावधि न कोऽपि गवेषकोऽलब्ध। श्रीमद्भगवद्गीताया माहात्म्यवैपुल्यादपरगीतास्तु दीर्घकालं यावद् विदुषामूहापोहविषयत्वं न भेजुरित्यत्र विषये विस्मयोऽहैतुकः।

भारतीयविपश्चितामैतिह्यविषयिकाऽजिह्मचिन्तनसरणिस्तु सुविदिता। स्वामिनो नित्यस्वरूपानन्दस्य मतेऽष्टावक्रगीता श्रीमद्भगवद्गीताया युगस्य किल कृतिरासीदित्यूहितुं पार्यते, ग्रन्थयोरेतयोः सादृश्यात्। सादृश्यमिति पदमन्यथा नावगन्तव्यम्। भागवती गीता तु हायनानां सहस्रेषु भूरिशो जनानां चेतसामेनांसि अपौहिष्ट, अधिगन्तव्यानां चरमावधिमदीदृशच्च; अष्टावक्रजनकयोः संवादभूता गीता त्वेतद्विपरीतं क्षेत्रविशेषमेव जनानामुपाकार्षीत्। नानादर्शनमतावतरणहेतुभूता नानाऽऽचार्याः परमप्रेम्णा भागवतीं गीतामेव श्रद्दधानान् ग्राहयामासुः। पुरुषार्थचतुष्टयस्य सिद्ध्यर्थमुपनिबद्धत्वात्। अजातवादमुपदिशन्तीभ्यो गौडपादविरचिताभ्यो माण्डूक्यकारिकाभ्योऽष्टावक्रगीता प्राक्तनी मन्तव्येति निर्बन्धेन स्वामी नित्यस्वरूपानन्दोऽवतिष्ठते। प्रातिभासिकव्यावहारिकसत्ययोर्विभेदोऽजातवादं नानुतिष्ठति। अमुष्य मतेऽष्टावक्रगीतायां सिद्धान्तानामेतेषां बीजं दरीदृश्यते।

ननु किमष्टावक्रगीता भगवद्गीतायाः प्रणयनयुगस्य रचनास्तीति प्रस्तावः स्वीकर्तव्यः? रिचर्ड हाउशिल्दस्य दृष्ट्या तु कालस्थापनमिदमतर्कसहम्। भारतीयविद्वांसो भगवद्गीतायाः

प्रणयनकालमुद्दिश्य यन्मतं प्राचीकटन्, तस्योल्लेखोऽप्रासाङ्गिकः स्यात्। प्रतीच्यानुसन्धातारः शब्दप्रयोगाच्छैलीप्रयोगाच्च ग्रन्थस्यास्य कालं ख्रिस्ताच्छतकत्रयपूर्वं तावदवेदिषुः। ग्रन्थोऽयं साम्प्रतिकरूपे ऊतसत्कीर्त्तेराचार्यशङ्करस्य युगेऽविद्यत इति तु स्पष्टम्। ननु अष्टावक्रगीतायां यत्र तत्र यत्साम्यमवलोक्यते तस्य हेतुः कुत्रान्वेष्टव्यः? वासुदेवार्जुनयोः संवादभूताया गीताया अष्टावक्रगीतायामुद्धरणमनवेक्ष्य किं चिन्तयितव्यम्? हाउशिल्द एवंविधं साम्यं दर्शयितुमष्टावक्रगीतायाः कतिचिच्छ्लोकान् निरदिक्षत्। प्रथमाध्यायस्य षोडशः श्लोकः श्रीमद्भगवद्गीतायाः सप्तमाध्यायस्य सप्तमं श्लोकं स्मारयति—

त्वया व्याप्तमिदं विश्वं त्वयि प्रोतं यथार्थतः।
शुद्धबुद्धस्वरूपस्त्वं मा गमः क्षुद्रचित्तताम्॥

एवमेव अष्टावक्रगीतायास्तृतीयाध्यायस्य पञ्चमः श्लोकः श्रीमद्भगवद्गीतायाः षष्ठाध्यायस्य ऊनत्रिंशत्तमेन श्लोकेन साम्यं बिभर्त्ति—

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
मुनेर्जानत आश्चर्यं ममत्वमनुवर्त्तते॥

भवतु तावत्। हाउशिल्दः कथमपि अष्टावक्रगीतायाः कालं वासुदेवार्जुनयोः संवादभूताया गीताया युगे स्थापयितुं नोदसहिष्ट। एकत्रिंशदधिकनवशताधिकसहस्रतमे खैस्ताब्दे आबेग इत्याख्योऽनुसन्धाताऽपि अष्टावक्रगीतां भगवद्गीतातो बहोः कालात्पश्चात् प्रणीतां प्रत्यपीपदत्। वेदान्तसिद्धान्तानां विकसनयुगस्य कृतिरियं, न तु तेषां बीजभूतेति मन्वानोऽष्टावक्रगीताऽनुवादको हाउशिल्दो विश्वस्यात्मविनिर्गतत्वप्रतिपादकस्य ग्रन्थस्यास्यातिपुरातनत्वमतं किल नाद्रियत।

गौडपादस्य कारिकातोऽष्टावक्रगीतायाः प्राग्भवत्वमपि अनुसन्धित्सव इमे नाङ्गीकृतवन्तः। ब्रह्मसूत्रभाष्यप्रणेतुः प्रथितबुद्धिवैशद्यस्य शङ्कराचार्यस्य गुरोर्गुरुर्गौडपादः षष्ठे सप्तमे वा शतके स्थापयितुं पार्यते। माण्डूक्यकारिकाया अनुवादमाचार्यपाउलडयसन एकविंशत्यधिकनवशताधिकसहस्रतमे खैस्ताब्दे प्रतीच्ये जगति प्रसिद्धीकृतवान्। न केवलं मायावादस्य प्रतिपादकाद् ग्रन्थादमुष्मादष्टावक्रगीता प्राक्तनीति मतं हाउशिल्दस्य दृष्टौ नादरमर्हति असौ शाङ्करयुगादपि गीतामिमामर्वाक्तनाममंस्त।

अष्टावक्रगीतायाः प्रथमाध्यायस्य द्वितीयः श्लोकोऽस्ति—

मुक्तिमिच्छसि चेत्तात विषयान् विषवत्त्यज।
क्षमार्जवदयातोषसत्यं पीयूषवद् भज॥

ननु श्लोकममुमनुसन्धाताऽसौ प्रक्षिप्तांशभूतं साधयितुमयतत । न केवलं द्वितीयं श्लोकमेव ग्रन्थारम्भश्लोकस्य मौलिकतामप्यसौ अशङ्किष्ट । समुपलब्धासु बहुषु पाण्डुलिपिषु श्लोकस्यास्यादर्शनात् । लाइप्सिगस्थेषु हस्तलिखितग्रन्थेषु तु कुत्रापि श्लोकोऽयं नास्ति । विश्वेश्वरस्याध्यात्मप्रदीपिकाख्यायां टीकायामपि श्लोकोऽयं न वर्त्तते । द्वितीयस्य श्लोकस्यापि चाणक्यस्य राजनीतिशास्त्रे सद्भावो विवेकचूडामणेः श्लोकेन तस्य सादृश्यञ्च विचारमुद्दीपयति ।

मोक्षस्य काङ्क्षा यदि वै तवास्ति, त्यजातिदूराद् विषयान् विषं यथा ।
पीयूषवत् तोषदयाक्षमार्जवप्रशान्तिदान्तीर्भज नित्यमादरात् ॥

ननु शङ्कराचार्यस्य विवेकचूडामणेः श्लोकोऽयं कालं प्राप्य जनश्लोकतामुपययावित्याशङ्क्यते । अष्टावक्रगीतायां यदि श्लोकोऽयं मूलग्रन्थकर्त्रा व्यरचि तर्हि ग्रन्थस्यास्य रचनाकालः शाङ्करकालादर्वाक्तनो भवितुं शक्नोति । विवेकचूडामणेरर्वाक्तन इत्याशयः ।

अत्र विषयेऽपरः प्रश्नोऽप्यनुपेक्ष्यः स्यात् । ब्रह्मसूत्रादीनां भाष्यकार आद्यशङ्कराचार्य एव विवेकचूडामणिं प्रणिन्ये, अन्येषु शङ्कराचार्येषु कस्यचिच्छङ्कराभिधस्य तत्त्वनिष्ठस्य वा कृतिरियम् ? शाङ्करग्रन्थाननुसन्दधन्नाचार्यहक्करस्तु विवेकचूडामणेराद्यशङ्कराचार्यकृतित्वं प्रत्याचष्ट इति प्रागेव प्रपञ्चितम् । इति शम् ।

[२]

ब्रह्मण आनन्दरूपतामाद्यशङ्कराचार्यः स्वतन्त्रकृतिषु नाजिज्ञपत् । अपरञ्च अविद्यायास्त्रिगुणात्मकत्वमनिर्वचनीयत्वञ्च बादरायणसूत्रभाष्यप्रणेत्राऽमुना न प्रत्यपादिषाताम् । एवंविधैराचार्यशङ्करस्याभ्यूहैः श्रोतारः पूर्वमेव परिगतार्थाः कृताः सन्ति । जड इति पदमनुसन्धातुरस्य मते भाष्यकारः खलु कुत्रापि न प्रायुनक् । एवमेव स्फुरतेरपि अदर्शनमेव निभाल्यते । अविद्याकामकर्मादीति पदप्रयोग आद्यशङ्करस्य शैलीं किल स्मारयति, किन्तु विवेकचूडामणिन्तस्य कृतित्वरूपेणोपपादयितुमयमलं नास्ति । विवेकचूडामणौ तु सदात्मनः सदानन्दत्वं ग्रन्थकारो व्यक्तं व्याचष्टे । जगतः प्रसूतेर्हेतुभूताया अव्यक्तनाम्न्या अनाद्यविद्याया मायायास्त्रिगुणात्मकत्वन्तस्या अनिर्वचनीयरूपत्वञ्च ग्रन्थेऽस्मिन्नवर्णयिषाताम् । कार्यानुमेयाऽविद्येयं सन्नास्ति, असदपि नास्ति, उभयात्मिकाऽपि नास्ति । अनिर्वचनीयरूपा सा । भक्तेरपि माहात्म्यनिर्देशो ग्रन्थस्यास्य आद्यशङ्कराचार्यकृतित्वसाधनमनुसन्धातुरस्य दृष्टौ किल बाधते । मोक्षस्य हेतुभूतासु सामग्रीषु भक्तेरेव गरिमाणं व्याचक्षाणो विवेकचूडामणिप्रणेता भक्तिं स्वस्वरूपानुसन्धानमित्यभिदधातीत्यपि नो विस्मर्त्तव्यम् । भवतु तावत् । अष्टावक्रगीतायान्तु जडेति पदं चतुर्षु स्थानेषु प्रयुक्तम् । स्फुरतेरपि प्रयोगो विहितः भक्तेस्त्वदर्शनम् ।

ननु ग्रन्थस्यास्य त्रयोदशाध्याये देहस्थयोगिनः कर्मनैष्कर्म्यनिर्बन्धभावाः संसूच्यन्ते। सुरेश्वराचार्यस्य नैष्कर्म्यसिद्धेर्वेदान्तिषु प्रथितत्वाच्छब्दोऽयं हाउशिल्दमपि विचारार्थं नोदयामास। श्रीमद्भगवद्गीतायान्तु तृतीयाध्यायेऽष्टादशाध्याये च शब्दोऽयं गुर्वर्थतां बिभर्ति। कर्मणामनारम्भान्नैष्कर्म्यमश्यते, सन्न्यसनादेव सिद्धिरधिगम्यत इति दृशोर्भ्रान्ति निराकरिष्णुर्गीतोपदेष्टा योगिनो विगतस्पृहत्वमसक्तबुद्धित्वञ्च नैष्कर्म्यसिद्ध्यर्थं हेतुभूते प्राचिख्यपत्। ननु नैष्कर्म्यमिदं किम्? रामानुजाचार्यमते तु ज्ञाननिष्ठैव नैष्कर्म्यम्। सर्वेन्द्रियव्यापाराख्यकर्मोपरतिपूर्विकां ज्ञाननिष्ठां न प्राप्नोतीत्यर्थो विहितः। श्रीमद्भागवतपुराणेऽपि नैष्कर्म्यमिति पदं बहुत्र वीक्ष्यते। ग्राहान्मोचितो गजेन्द्रोऽरूपमुरुरूपं जगतामधीशं भक्तिगद्गद्गिरा तुष्टाव। गिरां मनसश्च विदूराय भगवते नमोवाकं गृणन्नसौ परमात्मनो नैष्कर्म्यप्रतिलभ्यत्वं निर्दिदेश। तत्रैव स्वयंज्योतिषे नमस्कुर्वाणोऽसौ नैष्कर्म्यभावं सस्मार। अपरस्मिन् प्रसङ्गे लोलायुषां मनुजानां नैष्कर्म्यभावापत्तिः प्रशस्यते, आपवर्ग्यं मानुष्यमवाप्य यो भोगादिषु विषज्जते स आत्मध्रुक् गर्ह्यते च। अमोघदृशे व्यासाय नारदो देवर्षित्वमुपेत्य सात्वतं तन्त्रं व्याख्यातवान्। तन्त्रेऽस्मिन् कर्मणां नैष्कर्म्यभावः प्राधान्यं भजते। सोऽपि भगवद्भाववर्जितश्चेन्न शोभते।—

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्।
कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्॥

महाभारतेऽपि पदस्यास्य प्रयोगान्नैष्कर्म्यभावापत्तेः प्रत्नत्वं स्फुटीभवति। अद्वैतवेदान्तवीथिषु शब्दोऽयं प्रचचार। ननु अष्टावक्रगीतायां पदमिदं कुत आजगाम? अद्वैतवेदान्तसारोऽयं ग्रन्थः किं नैष्कर्म्यसिद्धिप्रणयनादर्वाक् व्यरचि? हाउशिल्दस्तु सम्भावनामिमां गरीयसीममंस्त। वार्त्तिककारादष्टावक्रगीताकारः पदमिदं गृहीतवान्, अपरेषां शाङ्करशिष्याणां ग्रन्थान् जानीते स्म वेति यथोचितप्रामाण्याभावान्नोपपद्यते।

शाङ्करग्रन्थेषु प्रकृतेर्गुणत्रयस्य निर्देशाभावादष्टावक्रगीतायां सदानन्दस्य वेदान्तसाराख्ये ग्रन्थे च तेषां सांख्योपपन्नानां गुणानां सद्भावादनुसन्धितसुरसौ अष्टावक्रगीतायाः कालं सदानन्दस्य युगे स्थापयितुमुदसहिष्ट।

आब्रह्मस्तम्बपर्यन्तमिति पदस्य प्रयोगोऽपि अमुष्य दृष्टौ कालान्वेषणार्थं विचारमर्हति। पदमिदं बहुत्र लभ्यत इति नास्त्यविदितं सुरगवीसमुपासकानाम्। अष्टावक्रगीताकारोऽपि पदमिदं यदि प्रयुयुजे तर्ह्यत्र को विशेषः। द्वितीयाऽध्यायस्यैकादशः श्लोकोऽस्ति—

अहो अहं नमो मह्यं विनाशो यस्य नास्ति मे।
ब्रह्मादिस्तम्बपर्यन्तं जगन्नाशेऽपि तिष्ठतः॥

एवमेव चतुर्थाध्यायस्य पञ्चमे श्लोके पदमिदं पुनरपि वीक्ष्यते—

आब्रह्मस्तम्बपर्यन्ते भूतग्रामे चतुर्विधे ।
विज्ञस्यैव हि सामर्थ्यमिच्छाऽनिच्छाविवर्जने ।।

एकादशाध्यायेऽन्तर्गलितसर्वाशस्य गतक्लेशस्य ज्ञानिनः स्वरूपं निर्धार्यते । तस्य निरायासत्वं गलितस्पृहत्वञ्च निर्दिश्य निर्वासनत्वं सूच्यते--

आब्रह्मस्तम्बपर्यन्तमहमेवेति निश्चयी ।
निर्विकल्पः शुचिः शान्तः प्राप्ताप्राप्तविनिर्वृतः ।।

ननु प्रयोगस्यास्योपक्रमः कुत्रान्वेष्टव्यः ? वार्तिककारः सुरेश्वरोऽपि शब्दममुं प्रयुयुजे । नारदपाञ्चरात्रेऽपि प्रयोगोऽयं विहितः । नारदपाञ्चरात्रार्थं भण्डारकरः षोडशशतकस्यारम्भं व्यजिज्ञपत् । अस्माद्धेतोः हाउशिल्दो गीताया अस्या बहुपुरातनत्वं सन्देग्धि । अमुष्य मते शब्दममुमष्टावक्रगीताकारः पूर्वसूरिभ्यो जग्राह ।

विवेकचूडामणिमसौ चतुर्दशशतकस्य कृतिं मन्तुं प्रास्तावीत् । अतोऽष्टावक्रगीतायाः प्रणयनार्थं किल कालोऽयमवगन्तव्यः । हाइनरिख त्सिमराख्योऽपरोऽष्टावक्रगीताऽध्येताऽपि त्रयोदशशतकादिमामर्वाचीनाममंस्त । न केवलं प्रथमाध्यायस्य चत्वारः श्लोका एकादशोऽध्यायश्च चतुर्दशशतके तदूर्ध्वं वा व्यरचिषत अपि तु समग्रग्रन्थस्य रचनायै हाउशिल्डः कालमिमं प्रस्तवीति । मूलग्रन्थस्य प्रक्षिप्तांशस्य च मध्ये सुदीर्घकालव्यवधानमसौ प्रत्याचष्टे । अतएव वेदान्तसारप्रणेतुः सदानन्दस्य जीवन्मुक्तिविवेकस्य प्रणेतुर्विद्यारण्यस्य वा युगेऽष्टावक्रगीता रचिताऽऽसीदित्यसावमंस्त । इति शम् ।

[३]

अध्रुवेऽस्मिन् परिणामिनि जगति ध्रौव्यं ननु कुत्राधिजिगमिष्टव्यम् ? विवेकिनस्तु सर्वमेवात्र दुःखान्वितम् । अष्टावक्रगीताकारो विप्रवादबाहुल्यमवगणय्य सुखबोधशैल्यां प्रकृतेः परस्य निरञ्जनस्य मोहविडम्बनामवर्णदिति विदितमेव सुधियाम् । ग्रन्थकारोऽयमेवाप्तवेदान्तविज्ञानफलः सार्वत्रिकनीरसतामविह्वलमनस्कतां समवाप्य ऊनविंशतितमाध्यायानरचदिति श्रद्दधानानां वेदान्तार्थप्रपित्सूनां मतं हाउशिल्देनावगणितमिति चेन्न । स्वसिद्धान्तानसंशयात्मा सन् लोकानां हितकाम्ययाऽष्टावक्रगीताकारो विंशत्येकमितैः खण्डैर्व्यवारीदिति श्लोकानां शैल्या किल ज्ञायते । ग्रन्थोपसंहृतौ प्रयुक्तमवधूतपदं वै ध्यानमर्हति । सन्दर्भेऽस्मिन् हाउशिल्द आत्मबोधस्य द्विपञ्चाशत्तमं श्लोकं स्म निर्दिशति । अधिगतपरमार्थस्तु सर्वं विजानन्नपि लोके जडवदाचरति, वायुवत्सर्वसङ्गमुक्तः सन् ।

ग्रन्थोऽयं वेदान्तशास्त्ररूपेण व्यरचि। वेदान्तविज्ञानसुनिश्चितार्थत्वं श्लोकेषु दरीदृश्यते। संसरतो ज्ञानादन्तर्विकारराहित्यं सम्पद्यते चिन्मात्ररूपिण इति कैवल्यस्य पन्थाः पौनःपुन्येन आदर्शितः। संसरणस्य सिद्धान्तोऽयं देहात्मवादिनोऽतिरिच्य सर्वैरेवाचार्यैः खलु भारते वर्षे सबहुमानं प्रतिपन्नः। वेदेषु पुनर्जन्मनः सिद्धान्तमनवलोक्य लोम्मलादयः प्रतीच्यजगतो गवेषका आर्यागमनाद् भूतपूर्वतामस्य अमंसत। संहितासु सिद्धान्तस्यास्य अदर्शनाच्छतपथब्राह्मणे मृतेः पुनर्भवनिर्देशाच्च।

श्रीमद्भगवद्गीतायां स्थितप्रज्ञवर्णनप्रसङ्गस्य श्लोकाः शिवार्थिनेऽद्भुतं महत्त्वं बिभ्रति। एवमेव अष्टावक्रगीतायामपि विंशतितमेऽध्याये जीवन्मुक्तेर्यद् वर्णनं विहितं, तत्परमं कल्याणमावहति। स्प्रो कहोफ इत्याख्यो जर्मनदेशीयोऽनुसन्धाता उपनिषदादिषु जीवन्मुक्तेः सिद्धान्तमुद्दिश्य निबन्धमररचदिति निर्देशोऽपि सन्दर्भेऽस्मिन्नप्रासङ्गिको भवितुं नार्हति। निरुपाधेः कूटस्थनिर्विभागस्य गुरुः, शिष्यः, शास्त्रं वा क्व ? व्यवहारः परमार्थता चोभौ खलु प्रविलीयेते। श्रीमद्भगवद्गीतायाः स्थितप्रज्ञवर्णनं न केवलं काव्यदृष्टचा, दार्शनिकदृष्टचाऽपि अष्टावक्रगीताया जीवन्मुक्तिश्लोकानतिशेत इति तु निश्चप्रचं, परमष्टावक्रगीताया वर्णनस्यापि नैजो महिमा विद्यते इति कः खलु सुधीः प्रत्याख्यातुमुत्सहिष्यते !

मुमुक्षोर्निराकुलत्वं काङ्क्षमाणोऽष्टावक्रगीताकारोऽर्थगर्भाणि पदजातानि असकृदुदीरयति। पौनरुक्त्यमिदं शिष्याणां हितानुसन्धित्सया। हाउशिल्दोऽष्टावक्रगीताया एवंविधानि स्थलानि अध्येतॄनुपकर्तुं समचैषीत्। अष्टादशाध्याये क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकितेति श्लोकपङ्क्तिर्वीक्ष्यते। सा पुनरपि ऊनविंशतितमेऽध्याये प्रयुज्यते शब्दान्तरप्रयोगमन्तरैव। तृतीयाध्यायस्य 'विश्वं स्फुरति यत्रेदं तरङ्ग इव सागरे' इति पङ्क्तिरग्रे पञ्चदशाध्याये पुनरावर्त्तते। सप्तमाध्यायस्य 'अतो मम कथं कुत्र हेयोपादेयकल्पने' श्लोकपङ्क्तिः पञ्चदशाध्याये शिष्यस्य चिन्मात्ररूपत्वं दर्शयता ग्रन्थकर्त्रा पुनरपि प्रयुयुजे। पौनरुक्तचेऽस्मिन् यल्लघुपरिवर्त्तनं जातं तन्नादरमर्हति।

ग्रन्थस्यास्य भाषायाः सारल्यन्तस्य गीताभिधानं चरितार्थीकरोति, यत्र तत्र समसनदैर्घ्येऽपि। समाधानासमाधानहिताहितविकल्पना, नानाविधपरामर्शशल्योद्धारः, मनःप्रवाहसम्मोहस्वप्नजाड्यविवर्जितः, कर्त्तव्यदुःखमार्त्तण्डज्वालादग्धान्तरात्मनः, स्वभावभूमिविश्रान्तिविस्मृताशेषसंसृतेः, मित्रक्षेत्रधनागारदारादायादिसम्पद इत्यादिषु पदेषु यत् समासदैर्घ्यं निभाल्यते तद् ग्रन्थस्य अर्थावगमविधिं कुत्रापि न बाधते।

ननु दार्शनिकग्रन्थेषु आलङ्कारिकत्वं न शोभत इति केषाञ्चिन्मतं हेगलादीनाम्। मतमिदं नादरमर्हति। औपम्यादिभिर्यद्यर्थावगमः झटिति स्यात्तर्हि तत्र को दोषः, दर्शन-

शास्त्रस्य शैली शुष्कीभूतैव स्यादिति दुराग्रमष्टावक्रगीताकारोऽपि अपरवेदान्तग्रन्थवद् उपमादीनां समाश्रयमग्रहीष्ट परमतत्त्वाधिजिगमिषूणां पाशग्रन्थिं छेत्तुं जगतो मृषात्वं रूपयितुञ्च । ग्रन्थारम्भ एव विषयान् विषवत्त्यक्तुं मुमुक्षुरुपदिश्यते क्षमार्जवदयातोषसत्यानि च पीयूषवद् भक्तुम् । सप्तदशाध्याये विषया निम्बपल्लवैरुपमीयन्ते, स्वारामोऽवधूतस्तु सल्लकीपल्लवप्रोतेन इभेन । एवमेव ग्रन्थस्योपोद्घातेऽहम्मानो महाकृष्णाहिर्निगद्यते, कर्तृत्वभावविलोपस्तु तद्विपरीतममृतमिति । तत्रैव देहाभिमानं ज्ञानासिना नाशयितुं शिष्योऽञ्जसा प्रेर्यते । रज्ज्वहिप्रभृतेरुपमा वेदान्तेषु स्म अभीक्ष्णं व्यवह्रियते । अष्टावक्रगीतायास्तोयतस्तरङ्गो यथा भिन्नो नास्ति तथैवात्मविनिर्गतं विश्वमिदमात्मनो न भिद्यत इत्यादिषु व्याहृतिषु वेदान्तविज्ञानविनिश्चितार्थानां यतीनामेव शैली किल अवभासते । इति शम् ।

[४]

व्यामोहसन्तमसं भेत्तुमासक्तिभरार्दितानां शृङ्खलाः पाटयितुमृषिपुङ्गवैर्यानि अनवद्यग्रन्थरत्नानि प्रणिन्यिरे तेष्वद्वैतसिद्धान्तग्रन्थावल्यामष्टावक्रगीता नितरां राजत उपदेशपद्धतेरार्जवात्प्रसादगुणान्वितत्वाच्च । तत्त्वप्रतिभानाय नैष्कामिकावस्थाऽवाप्तये च भारते वर्षे भूयोभिः सिद्धिमासुकामैर्लघुकायो ग्रन्थोऽयमनारतं हि संसेव्यते स्म । भारतीयसंस्कृतेरीश्वरगीतया योऽविनाभावो दरीदृश्यते विदुषामविदुषामुभयेषां वाऽलभ्यात्तन्तु कृतिरियं नाप्तवती परन्तृष्णोपहतात्मवृत्तीनामुपशमार्थं शास्त्ररसास्वादार्थं वा ग्रन्थोऽयं बहूनतिशेते । ऊनविंशतिशतकस्य द्वितीयांशे प्रतीच्ये जगत्यस्य प्रवेशादूर्ध्वमनुसन्धित्सुभिर्ग्रन्थस्यास्य कालमधिगन्तुं यच्चेष्टितन्तत्प्राक्तनयोः प्रवचनयोश्चर्चितम् ।

अष्टावक्रगीतायां श्रीमद्भगवद्गीतायाः श्लोकानां श्लोकार्धानां वाऽदर्शनाद् ग्रन्थस्यास्य प्राग्भवत्वं खलु न चिन्तयितव्यम् । श्रीकृष्णार्जुनसंवादे ब्रह्मणि सर्वकर्माणि आधाय जगत्याचरतो ज्ञाननिर्धूतकल्मषस्य योगिनो वर्णनप्रसङ्गे युक्तस्य मुक्तस्य च तस्य दृष्टिसम्यक्त्वं संसूच्यते । पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन्नसावात्मानमकर्मकृत् पश्यति, इन्द्रियाणि प्रमाथीनि इन्द्रियाणां नानाविधार्थेषु चरन्तीति मन्वानः । अष्टावक्रगीतायाः सप्तदशाध्याये तत्त्वस्वरूपं विवृण्वन्नुपदेष्टा स्वच्छेन्द्रियस्यावासयोगफलस्य वर्णनप्रसङ्गे एवम्भूतानि शतृप्रत्ययान्तानि धातुपदानि प्रयुयुजे । सल्लकीपल्लवप्रीतमिमं निम्बपल्लवा यथा न प्रीणयन्ति तथैव जागतिकविषयान् प्रति निराकाङ्क्षिणो मुनेर्भोगावासिरनवासिर्वा हर्षायाऽमर्षाय वा न भवति । पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् असावनारतमनुदिवसं यथासुखं तिष्ठति परदशां लिलक्षयिषुर्मुनिपुङ्गवस्तस्येहितानीहितेभ्यो

मुक्तिं व्यपदिशति । पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गृह्णन् वदन् व्रजन् सर्वत्र स्वस्थ आस्ते अविह्वलमनाश्च । अत ऊर्ध्वमष्टादशाध्यायेऽपि शमं वर्णयमानो ग्रन्थकारोऽवाप्तकल्याणस्य मुक्तपुरुषस्य धियो निरालम्बतां निराकुलत्वञ्च दिदर्शयिषन् पदानीमानि श्लोकद्वये प्रयुयुजे। क्रियमाणेऽपि कर्मणि त्यक्तभवकषायोऽयं त्यक्तकामबन्धोऽयं निर्लेप एवाऽऽस्ते । निस्तर्षमानसः स पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् सर्वभावेषु निराकुलो नामरूपविजृम्भितेषु नानुषज्जते । शीतलाच्छतरात्मनोऽस्य व्यवहारो यदृच्छया भवति । स्वात्मनोऽकर्तृत्वमभोक्तृत्वं मन्यमानस्य योगिनस्तस्य चित्तवृत्तयोऽनायासेनैव शममुपयान्ति हाउशिल्दस्य मतेऽष्टावक्रगीतायाः प्रणेता श्रीमद्भगवद्गीतां वेत्ति स्म । ननु ग्रन्थकारस्यास्य श्रवणयोरष्टादशाध्यायप्रणयनकाले वासुदेवार्जुनयोः संवादस्य पदसमवायो जुगुञ्ज इत्यूहितुं पार्यते ।

नानाविधगीतानां प्रणयनं देवविशेषस्य प्रतिपत्तिमुद्दिश्य विहितमथवा उपदेष्टृविशेषस्य देशनार्थम् । अष्टावक्रगीतायामीशितुरीशितव्यस्य च भावाभावादुपास्तिप्रक्रियाया अदर्शनं खलु विस्मयं नावहति । प्रत्यूहपिहिताशय आत्मा एव ग्रन्थस्यास्य उपदेष्टुर्मते द्रष्टव्यः, श्रोतव्यो, मन्तव्यो, निदिध्यासितव्यः । यदा मुमुक्षुरसंसक्तमनाः प्राप्ताप्राप्तमुपाश्नुते तदा क्षीणसंसरणः स कमुपासीत, अन्तर्गलितसर्वाशः । एवम्भूता गीता उपदेष्टुर्नाम्ना सञ्ज्ञिताः सन्ति । महाभारतान्तर्गते उतथ्यता, वामदेवगीता च । अष्टावक्रगीता वा । हाउशिल्दस्य मतेऽष्टावक्रगीतायाः प्रणेतुर्नाम कालयोगाद् विस्मृतिं ययौ । प्राक्कालिके भारते भूयो भूयो विपश्चितो देहधारिणां सौहित्यचिकीर्षया आयत्यामसुखं परिहर्त्तुकामाश्च ग्रन्थरत्नानि निरमासिषुः, न तु यशःप्रपित्सया सञ्चोदितेन मनसा । समुपलब्धसामग्र्यस्तु नाम्नोऽन्वेषणार्थमलं न सन्ति । ननु अष्टावक्रगीता, अवधूतानुभूतिः, ज्ञानानन्दसमुच्चय इति नामभिः प्रथितोऽयं ग्रन्थो नामरूपव्याकरणमृषात्वप्रतिपादनाद् यदि प्रणेतुर्नाम न सञ्ज्ञापयति तर्हि कोऽत्र विशेषः ?

ननु ग्रन्थस्यास्य एकविंशतितमाध्याये व्याकरणसूत्राणि अधिकृत्य नियमव्यतिक्रमस्य कोऽर्थः ? जर्मनदेशीयोऽनुसन्धाता हाउशिल्दस्तु अध्यायममुमुत्तरकालनिवेशितममंस्त ।

इति शम् ।

संस्कृतरूपकाणां चलच्चित्राविष्करणयोग्यता

ई. पी. भरतपिषारटिः *

नवनवैराविष्क्रियमाणैः शास्त्रीयोपाधिभिः अधिकाधिकमाकृष्यमाणं मानुष्यकमनुदिनमभिवृद्धिमाप्नोतीत्येतन्नास्माभिरवगणनीयम्। अद्यतनानां महर्षीणामपि जीविते दिनचर्यासु चायं शास्त्रीयातिप्रसरो दृश्यते। किमुत साधारणानामस्माकम्। अयं प्रसरो मानुष्यकनिग्रहादधिकमनुनुग्रहस्य कारणं भवति। यथाशक्ति यथायोग्यञ्च सर्वेऽपि एतमनुग्रहमंगीकुर्वन्ति च। भुवनस्य कोणे कोणे निवसद्भिर्मनुष्यगणैः सह सम्पर्कं सम्पादयितुं विविधविज्ञानानां विनिमयं साधयितुं तेषां विकासमाधातुं च वयं शास्त्रीयसिद्धीराश्रयामहे। एवं स्थिते वस्तुतत्त्वे संस्कृतभाषाप्रसारणार्थं तस्याः साधारणीकरणार्थं च तादृशी सिद्धिराश्रीयते चेत् को नामात्रदोषः? अवश्यमंगीकरणीयैव। ईदृशी चिन्तैव संस्कृतरूपकाणां चलच्चित्राविष्करणोद्यमे मां प्रेरयति स्म।

एतदर्थं प्रयत्ने समारब्धे सत्येव तस्मिन् विषये कीदृशाः क्लेशाः सोढव्याः स्युः, तदपोहनार्थं के के मार्गाः आलम्बनीयाः सन्ति, नाटकानां चलच्चित्रीकरणे के के व्युत्क्रमाः स्वीकरणीयाः, प्रयत्नोऽयं कियत्फलः स्यात् इत्यादिषु विषयेषु विशेषबुद्धिपूर्वं व्यापरीतुं मे अवसरोऽजनि। एतान् विषयानधिकृत्य पठनार्थं छायाग्रहणावसरेषु नटैः संविधायकैश्च सह तत्र तत्र गत्वा साक्षादनुभवमापाद्य, एतद्विषयकाणां यवनिकानाटकानामध्ययनेन, विविधानां चलच्चित्राणां साक्षाद् निरीक्षणेन च भावनामुद्दीप्य यन्मया सञ्चितं तदत्राविष्कर्तुमधुना प्रयत्नः क्रियते।

चलच्चित्रक्षेत्रे निर्माणं संविधानं यवनिकानाटकरचना छायाग्रहणं कलासंविधानमित्येते विषयाः प्रधानाः। एतेषु यथापूर्वमेकैकेषां प्राधान्यं भवति। नटानां प्राधान्यं न तैस्तुलयितुमर्हति। ते तु निर्मातृसंविधायकादीनां सन्दर्शकानां च मध्यस्था भूत्वा भावभूतस्यार्थस्य रूपं प्रदाय व्याचक्षते। अतस्ते व्याख्यातारो गण्यन्ते।

* प्राचार्यः, भारतविद्यापीठस्य, पत्रालयः-एरानेल्लूर, मण्डलम्-त्रिचूर, (केरल-प्रदेशः)

नाटकानां चलच्चित्राविष्करणे स्वीकरणीया व्युत्क्रमाः

इदमस्माकं ज्ञातमेव यत् पुराणेतिहासोपाख्यानानां रूपकीकरणे अथवा नाटकादिमाध्यमतया रूपान्तरापादने दृश्यकलामर्मज्ञाः कवयो बहुदूरं बहुप्रकारं च व्यतिययुरिति। तद् व्यतियानमावश्यकमेव। कुत इति चेत्, पुराणेतिहासेषु रसभावादीनां न तथा प्राधान्यमस्ति। यथातथकथावस्तुनिवेदनमेव तत्र प्रधानम्। पुराणादिषु सामाजिकाः केवलं कथाश्रवणेनैव तृप्तिमाप्नुवन्ति। तत्र श्रोत्रमेव जाग्रद् वर्तते। रूपकेषु न तथा। तत्र नयनं श्रोत्रमितीन्द्रियद्वयं सतृष्णं जागरूकं च वर्तते। एवं च रसभावप्रधानत्वाद् अधिकेन्द्रियसन्तर्पकत्वाच्च आख्यायिकातो रूपकं विलक्षणं विशिष्टं च भवति। अतएवाख्यायिकानां यथासम्भूतं चरितमप्रधानं कृत्वा सन्दर्शकानां श्रवणनयनसन्तर्पणानुरूपं कथावस्तु आवापोद्वापैः संकोचविकासैश्च संस्कृत्य इतिवृत्तरूपेण परिष्क्रियते। महाभारते प्रस्तुतस्य शकुन्तलोपाख्यानस्य कालिदासविरचितेतिवृत्तस्य च यन्महदन्तरं दृश्यते तत् सकलमेतद्वस्तुतत्त्वमवलम्ब्यैव समाकलितम्।

रूपकेषु सामाजिकानां श्रवणं नयनं च समानतया प्रवर्तते। यत् श्रवणेन समग्रतयाऽवगन्तुं न शक्यते तद् नयनेन दृश्यते। यथा मृच्छकटिके संवाहकः (द्यूतेच्छाविकारसंवरणं बहुविधं कृत्वा) इति निर्देशे विकारसंवरणं श्रवणेन न ज्ञातुं शक्यते। तद् आंगिकाभिनयं नयनेनैवास्वाद्यते।

जानामि न क्रीडिष्यामि सुमेरुपतनसन्निभं द्यूतम्।
तथापि खलु कोकिलमधुरः कत्ताशब्दो मनो हरति॥

इत्येतत् श्रवणद्वारा आस्वाद्यते। शकुन्तला (सभ्रूभंगम्) इत्यत्र भ्रूभंगो नयनेनैवास्वाद्यते। 'किं निमित्त' मिति श्रवणेन च। तथा च नाटके वाचिकस्यांगिकस्य च समप्राधान्यं वर्तते। चलच्चित्रे वाचिकमप्रधानं भवति। आंगिकाभिनयस्यैव तथाहि चलनस्यैव तत्र प्राधान्यं विद्यते। केषाञ्चन आंगलचलच्चित्राणां सञ्चालनकालः शतं निमिषाः स्युः। किन्तु तेषां समस्तमपि वाचिकं सम्भाषणं द्वित्रेषु पत्रपुटेषु संग्रहीतुं शक्यते। आंगलं सर्वमप्यनुकरणीयमिति न मेऽभिप्रायः। चलच्चित्रस्य वाचिकाभिनयावकाश आंगिकाभिनयावकाशादपि ह्रसीयानिति विशदयितुमेवात्रैतदुक्तम्।

आख्यायिकानां रूपकरूपाधाने यादृशा व्युत्क्रमाः कविभिः कृतास्तादृशाः चलच्चित्रोपयुक्ता अवसरोचिता व्युत्क्रमाः कुहचन कुहचन यवनिकानाटकरचनायामपि स्वीकरणीयाः स्युः। नाटकापेक्षयाऽवतरणविषये चलच्चित्रप्रदर्शनस्य नितरां स्वातन्त्र्यमस्ति। नाटकादिषु परिच्छिन्न एव रंगे काननदीपर्वतस्वर्गनरकादिकं सर्वमपि प्रदर्शनीयम्। स्वर्गादवतरणं विमानधूमशकटादिषु यानमित्यादिकमपि प्रत्यक्षतः प्रदर्शयितुं नाटकादिषु रूपकेषु सौकर्यं

नास्त्येव । अभिनय एव तत्र शरणम्, यवनिकाभिस्तत्तत्चित्राङ्किताभिः तत्तद्दृश्यानां प्रदर्शनमपि क्रियते यथासौकर्यम्, तथापि प्रदर्शयितुमभीष्टस्य वस्तुनः प्रबोधने नाटककला न पूर्णं विजयते । प्रत्यक्षदर्शनानुभूतिरिवाभिनयदर्शनानुभूतिः सम्पूर्णा न भवति । हिमालयस्याङ्काद् गङ्गायाः सोल्लासप्रपातस्य, समुद्रेण नौकायानस्य यन्त्रशालाया विविधभागदर्शनस्य विमानयात्राया वा अनुभूतिमुत्पादयितुं निपुणोऽपिनटो न शक्तो भवति । एतानि चलच्चित्रे प्रदर्शयितुं सुशकानि । आख्यायिकासु च सानुभूतिः शब्दैः साध्यते वर्णनेन । रूपकाणामेतद्विषये परिमितिः पारतन्त्र्यं च विद्यते ।

चलच्चित्रेषु सभ्यता

अधुनातनानां चलच्चित्राणामाविष्करणे सामान्यतः प्रधानं स्त्रैणसौन्दर्यप्रदर्शनं पुरुषाणां मुष्टियुद्धादिपौरुषप्रकटनं च । वस्तुतः चलच्चित्रेषु तत् सर्वथा न स्वीकरणीयं न च साकल्येन परिहरणीयं च । कुत इति चेत्, मनुष्यकथां विविधैरुपाधिभिराविष्कृतवन्तः सर्वेऽपि कलोपासकाः स्त्रैणसौन्दर्यप्रदर्शनं तत्तदवसरानुसारं कृतवन्तः । शाकुन्तले 'अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रिताऽस्मि । शिथिलय तावदेतदि'ति शकुन्तलाया अर्थना अनसूयाकृतं वल्कलशिथिलीकरणं च किमर्थम् क्रियते । तत्तदवसरानुसारमिति विशिष्य स्मरणीयम् । प्रथमांङ्के 'अधरः किसलयराग' इत्यादिना वर्णिता शकुन्तला सप्तमांङ्के 'वसने परिधूसरे वसाना नियमक्षाममुखी' भवति । करुणरसप्रधाने उत्तररामचरिते न तादृशा रंगा प्रायसो दृश्यन्ते । किन्तु अद्यतनेषु चलच्चित्रेषु न दृशो विवेको दृश्यते । अवसरोचितो वा न वा भवतु, कथमपि कस्या अपि प्रवेशस्यावसरः सृज्यते । नृत्यरंगः स्नानरंगः शयनागाररंग इत्यादिका ओतप्रोतरीत्या अवतार्यन्ते । तदेतदवलम्ब्यैव चलच्चित्रस्योत्कृष्टता परिकल्प्यते च ।

संस्कृतरूपकाणां चलच्चित्राविष्करणकरणेऽमंशो मुख्यतया विचारणीयः । अवसरानुरूपं क्वचन क्वचन अन्यूनानतिरिक्तया रीत्या महाकविना निर्दिष्टेन पथा अकृतकरूपेण स्त्रैणसौन्दर्याविष्करणं (न तु नग्नताविष्करणं) स्वीकरणीयमेव । तथैव पुरुषाणां पौरुषप्रकटनमपि । सर्वमपि अकृतकमवसरोचितमनतिरिक्तं च भूयादित्यत्र श्रद्धा देया । मनुजा बहुविधाः । मनुजजीवितं च विविधदशाभिर्विभक्तम् । शाकुन्तले मनुजजीवितस्य क्रमिकविकासोऽस्माभिर्दृश्यते । प्रथमाङ्के बाल्यस्य निष्कलङ्कता । ततः कौमारचापलम् । ततो यौवनप्रमादः । ततस्तत्फलानुभवः । तदनन्तरं तज्जन्यं हृदयमथनम् । अन्ते पक्वतामापन्नस्य जीवितस्य सन्तृप्तिः । एकैकस्यां यद्यत् स्वाभाविकं तत्तत् तत्र तत्र सम्भाव्यमेव । कौमारकाले वार्धक्यस्य शान्तिस्तथा वार्धक्ये कौमारचापलं च नोचितम् । एवं च चलच्चित्रेषु यथावसरं यथोचितं नातिवेलं च स्त्रीसौन्दर्यस्य चाविष्करणं नैव दोषो भवति ।

चलच्चित्राणि अशीतिः प्रतिशतं दृश्यानि भवन्ति । अतो रूपकाणां यवनिकानाटक-रूपाधाने द्वित्रेषु वस्तुषु नितरामवधानं देयम् । रंगस्य सर्वदा चलनात्मकता अनिवार्यैव । कश्चिदपि नटो रंगे निश्चलो निर्विकारो न तिष्ठेत् । कस्मिंश्चिद्रंगे पञ्चषा नटाः सन्तीति भावयामः। तेषु द्वयोरेव सम्भाषणं प्रवर्तते इत्यपि कल्पयामः । तदाऽन्ये न कदापि निश्चलं तिष्ठन्तु । तैरपि किमपि कुर्वद्भिर्भवितव्यम् । तादृशेष्ववसरेष्वेव यवनिकानाटकरचयितुः प्रतिभाया विलास आवश्यकः । तथैव रूपकेषु यद् नेपथ्ये कथासूचनं दीयते तद् रंगरूपेणाविष्करणीयं यवनिका-नाटकेषु । यथा-शाकुन्तले दुर्वाससः शापो यदि रंगेऽवतार्यते तर्हि स रंगो नितरां सजीवो भवेत् । तत्र परित्यागरंगेऽप्सरस्तीर्थमारात् आकाशात् ज्योतीरूपिण्या अप्सरस आपतनं शकुन्तलां गृहीत्वा उत्पतनं च चलच्चित्रे सुकरमेव । कुत्रचित् Flash back अपि रोचकं भवति । यथा शकुन्तलाया जननकथां द्वित्रैरेव वाक्यैः अनसूया राज्ञे निवेदयति । तानि वाक्यानि त्रिचतुरै रंगैराविष्कर्तुं शक्यन्ते । मेनकाया आकाशादवतरणं, विश्वामित्रस्य तपः मेनकाया नृत्यप्रकटनं, मुनेस्तपोभंगः, आलिङ्गनं, गर्भिण्यास्तस्या मालिनीतीरेण सञ्चारः, शिशोर्निकुञ्जे परित्यागः, सशिष्यस्य कण्वस्यागमनं, शिशोर्दर्शनं, गौतमीहस्ते रक्षार्थं समर्पणमेतानि सर्वाण्यपि चलच्चित्रे प्रदर्शनार्हाणि भवन्ति । एतेषु रंगेषु सम्भाषणस्यावश्यकता च विरला विद्यते । प्रायशश्चलनेनैव सर्वानाकर्षति । एवं च यवनिकानाटकरचयिता सर्वथा सर्वत्र सर्वदा जागरूकः प्रतिभामुपयुञ्जानश्च वर्तेत ।

संस्कृतरूपकाणां चलच्चित्रीकरणे कियन्तः क्लेशा अविमुखीकरणीयाः सन्ति, ते च किंप्रकाराः स्युः इत्येतदधिकृत्यापि किमपि कथनमत्रावश्यकमेव । प्रथमत एव सम्भाषणविषये सम्भावनीयान् क्लेशानधिकृत्यात्र विव्रियते ।

संस्कृतसाहित्यस्यार्थग्रहणे विभिन्नप्रान्तीयानां भारतीयानां समानता वर्तते । यथा—

सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥

इति पद्यस्य शब्दार्थबोधस्तज्जन्या भावदीप्तिश्च सर्वेषां हृदि समानतयैव जायते । किन्तु तदेव पद्यं विभिन्नप्रान्तवासिनो यद्युच्चरेयुस्तर्हि तदुच्चारणं एकैकस्यापि प्रान्तीयस्यैकैक-प्रकारं भविष्यति । स्वकीयमुच्चारणं श्रेष्ठमिति सर्वेप्यामनन्ति च । अस्मिन् विषये न कोऽपि प्रमाणं च भवति । पद्योच्चारणविषयेऽपि अयं प्रश्नः समुदेति । एतत् तत्त्वमधिकृत्य सम्यग् बोधवन्त एव संस्कृतचलच्चित्राणां संविधायकपदमलङ्कर्तुमर्हन्ति । तस्य सदसद् विवेकेन प्रान्तीयतायाः सीमानमुल्लंघ्य अखिलभारतपर्यन्तं विकसितव्यमेव । सामान्यतः सम्भाषणशुद्धियुक्ता

नटा एव स्वीकरणीयाः । संस्कृतं सम्यगुच्चारयितुमर्थमवगन्तुं च शक्ताः चलच्चित्रनटा विरला एव स्युः । तादृशा नटाः चलच्चित्रक्षेत्रे नूतनतया आनेतव्याश्च स्युः । 'डबिङ्' रीतिर्यविच्छ क्यं परिहरणीया । तत्र नियतमेव कृत्रिमता प्रतिभास्यति । किन्तु विदूरे दृश्यमानानां कथापात्राणां सम्भाषणविषये 'डबिङ्' रीतिः स्वीकरणीयैव । प्रान्तीयभाषाचलच्चित्रेष्वपि सा रीतिः साधारणी दृश्यते ।

छायाग्रहणम्

अस्मिन् प्रयत्ने छायाग्रहणस्यापि नितरां प्राधान्यमस्ति । बहिःकवाटमेव छायाग्रहणमधिकमावश्यकं भविष्यति । अन्तःकवाटग्रहणस्यावश्यकता विरला च । अतस्तदर्थं नटसंघैस्सह तत्र तत्र गत्वा उषित्वा च कालेन बहुनैव एकस्य चलच्चित्रस्य छायाग्रहणं साधयितुं शक्यते । अतोऽस्मिन्नेव विषये अतिमहान् व्ययः सम्भविष्यति । अथ च आहार्यशोभाधानविषये सामग्रीणां शतानि च सञ्चेतव्यानि । सितासितचलच्चित्राद् वर्णशबलचित्राणां प्रायश्चतुर्गुणो व्यय आपतति । एवं च शाकुन्तलस्य वर्णशबलचलच्चित्रावतरणार्थं विंशतिर्लक्षाणामाहत्यायोजितास्ति ।

संस्कृतचलच्चित्राणां व्याप्तिः

केचन जना आमनन्ति, संस्कृतं नाम दुर्ग्रहा भाषा । तन्माध्यममवलम्ब्य गृहीतस्य चलच्चित्रस्य दर्शनार्थं प्रेक्षका विरलाः स्युः । अतोऽयमुद्यमो नियतमेव विफलीभविष्यतीति । अयमदीर्घदर्शिनामसम्पन्नानुभवानामभ्यूह एव । कुत इति चेत् संस्कृतचलच्चित्रस्य प्रसरो न खलु एकस्मिन्नेव प्रान्ते परिमितो वर्तते । आसेतुहिमाचलमस्य व्याप्तिः स्यादेव । किञ्च रष्याऽमेरिका-जर्मनी-प्रभृतिविदेशेष्वपि तत् प्रसरिष्यति । चलच्चित्रेषु कथापात्राणां केवलं चलनेनैव कथागतेः स्पष्टमूह्यमानत्वात् प्रेक्षकाणां रसास्वादनविषये भाषायाः प्रतिबन्धो न प्रतिभायात् । आंगलीय-चलच्चित्राण्यस्माभिर्दृश्यन्ते खलु । तेषामुच्चारणमस्माभिः सर्वैः किमवगन्तुं शक्यते ? नैव । तथापि तद्दर्शनार्थं प्रेक्षकाः व्यग्राः दृश्यन्ते । कुतः, तत्र पात्राणां चलनादभिनयाच्च सर्वमप्यवगतं भवति । संस्कृतचलच्चित्राणां अन्यथापि सुगमता स्याद् यतः संस्कृतनाटकानि भूयिष्ठं पुराणकथाभिराकलितानि सन्ति । यथाकथञ्चित् ताः कथाः परिचिताः स्युः साधारणजनानामपि । अतः कथास्वादने भाषाप्रतिबन्धरूपः प्रश्नोऽपि न समापतति ।

यवनिकानाटकरचयितुः परतन्त्रता

यवनिकानाटकरचना न तथा सरला यथाऽस्माभिरुद्भाव्यते । रचनाविषये अन्येषां सर्वेषामपि कलास्रष्टॄणां प्रतिभाप्रसरस्य सर्वथा स्वातन्त्र्यमस्ति । किन्तु यवनिकानाटक-

रचयिता सर्वथा परतन्त्रो भवति। यन्नाटकं अथवा यामाख्यायिकामवलम्ब्य यवनिकानाटकं रचनीयं तद्ग्रन्थकर्तृभिः स नियन्त्र्यते। अवलम्बितग्रन्थस्य स्वभावं संविधानसौकर्यमवतरण-समयं च समालोच्य विविधैरावापोद्वापैः सङ्कोचविकासैश्च अवलम्बितग्रन्थस्य रूपमन्यथा-करणीयम्। तद्विषये तेन स्वतन्त्रेण च भाव्यम्। यवनिका-नाटकरचयितरि कवेः प्रभृति कायस्थपर्यन्तं सर्वैरपि भाव्यम्। आख्यायक-नट-चित्रकार-कवि-गायकादीनां सर्वेषामपि समाहारो यवनिकानाटककृदिति संक्षेपः।

यवनिकानाटकरचयितुः क्षमाया औचित्यबोधस्य च कुहचन कुहचन परीक्षणावसराः समापतन्ति। कविना आख्यायकेन वाऽऽविष्कृतानाममूर्तानां भावानामाविष्करणविषये यवनिका-नाटककृता सर्वथा जागरूकेण भवितव्यम्। मेघसन्देशं कालिदासो रचितवान्। तदेव काव्यं यवनिकानाटकरूपेण परिवर्त्यते चेत् स एव महाकविः स्वकाव्यरचनातोऽपि शत-गुणं क्लेशमनु-भवेत्। द्वित्रैरुदाहरणैरुक्तं स्पष्टीक्रियते।

पादन्यासक्वणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान्॥

अत्र लीलावधूतै रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्तानां पादन्यासक्वणित-रशनानां वेश्यानां तथा वर्षाग्रबिन्दूनां पतनस्य कटाक्षाणामामोचनस्य च प्रदर्शनं सुकरमेव। किन्तु मधुकरश्रेणिदीर्घान् नखपदसुखानिति विशेषणद्वयादनुभूयमानं सौन्दर्यं कथं मूर्तीक-रिष्यते। तत्र महाकवेः प्रतिभाऽपि बंभ्रमिष्यति। अन्यदुदाहरणम्—

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया समिल्लतां छेत्तुमृषिर्व्यवस्यति॥

इत्यत्र 'नीलोत्पलपत्रधारया समिल्लतां छेत्तुमृषिर्व्यवस्यति' इत्यनेन सूच्यमाना मुनेर्विवेकशून्यता मूर्तीकर्तुं शक्यते। एतान् भवानाविष्कर्तुं यवनिकानाटककृता स्वप्रतिभामु-पयुज्य अन्ये मार्गा मार्गणीयाः स्युः।

एवं विविधैरंशैरतितरां क्लेशावहः किल चलच्चित्ररंगः। चित्रशालासु प्रेक्षणावसरे प्रेक्षकाणां तत् सरसं सरलं ललितञ्च प्रतिभाति, किन्तु तन्निर्माणात् पूर्वं कियन्तः क्लेशाः संविधायकाद्यैः सोढव्याः स्युरित्यनुभववेद्यमेतत्। तथाहि-क्लेशः फलेन हि पुनर्नवतां विधत्ते इत्यादिभिरस्मिन् विषये महाकविरेवास्मान् प्रचोदयति। अस्मिन्नुद्यमे विजयो निश्चित एव। फलञ्च दूरव्यापकम्। संस्कृतप्रचार-प्रसारादीनामयमुपाधिरतितरां सफलः स्यात्। नितरां लाभकरश्च।

अध्यात्मविद्या विद्यानाम्

●

श्रीहरिअरविन्दः *

●

चराचरेऽस्मिन् विश्वे कमपि प्राणिनं प्रति दुर्व्यवहारो न कर्त्तव्यः, दुर्भावना वर्जनीया, वसुधैव कुटुम्बकं माननीयम्। सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः, सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग् जनः—इत्यादिसुशोभन-भावविभूतयोऽस्माकं दार्शनिकाः प्रातःस्मरणीया विद्वांसः समस्तानां जीवानां सुखं, नैरुज्यं, कल्याणं, दुःखनिवृत्तिं चाकामयन्त। समग्रदुःखक्षये तत्त्वज्ञानमेव मुख्यसाधनं तैरमानि। त्रिविधानां दुःखानां मूलभूतं कारणं मनुष्याणां 'जन्म' एवास्ति। अतएव जीवः कौमार-यौवन-जरावस्थासु नानाविधकर्तव्या-कर्तव्यकर्मणां करणेन नितान्तं दुःखमनुभवति। तत्त्वज्ञानेन चैतद्दुःखस्य निवृत्तिर्भवति। तत्त्वज्ञानाय तत्त्वज्ञं तन्निष्ठं पुरुषमुपसृत्य 'अध्यात्म' शास्त्रस्य श्रवणं कर्तव्यम्। ततस्तस्य मननं विधेयम्। तदनु निदिध्यासनं विधाय आत्मदर्शनं कृत्वा नरः कृतकृत्यो भवति, पुनर्न जायते। भूयः कष्टं नानुभवति। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिश्रुतिवाक्यान्याधारीकृत्य आत्मतत्त्वस्य यथार्थज्ञानं श्रवणमनननिदिध्यासनैरेव भवितुमर्हतीति ज्ञायते। 'पुनरपि जननं, पुनरपि मरणं, पुनरपि जननीजठरे शयनम्' इति महतो दुःखाद् यदि निवृत्तिर्लब्धुं शक्यते चेत् तदध्यात्मदर्शनस्य श्रवणादिभिरात्मदर्शनं विधायैव, नान्यथा—'नान्यः पन्था विद्यतेऽयनाय'। किञ्च-यदि कस्यापि पुरुषस्य आत्मानुभूतिर्जायते तस्य सर्वविधानि दुःखानि प्रणश्यन्ति—

आत्मानं च विजानीयादहमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय संसारमनुसंसरेत्॥

अध्यात्मशास्त्रेषु प्रामुख्यमावहति वेदान्तदर्शनम्, उपनिषत्सञ्ज्ञकम्। उपनिषत्सु ब्रह्मसूत्रेषु च ज्ञानस्य प्राधान्यम्। ऋते ज्ञानान्न मुक्तिः। आत्मानम् अधि, इति अध्यात्मम्।

पुरा खलु भारतवर्षेऽस्मिन् मानवा आत्मचिन्तनपरा वैराग्यमूर्त्तयः कठोरकष्टसहन-परायणाः त्यक्तसर्वविधकामाः सन्तो यदुपलब्धवन्तः, यच्च समग्रे निजजीवने सम्पादितवन्तः,

* प्राचार्यः, श्रीरामशङ्कर-साङ्गवेद-विद्यापीठ, कौडरा, चन्देहर, बस्ती।

येन च विश्वमिदं शान्तिसमन्वितं कृतवन्तः, तत् सर्वमध्यात्मचिन्तनमेवासीत्, नान्यत्। तादृशेनैव विश्वहिताय सम्पादितेन शुभकर्मणा तेऽस्मिन् भुवने "महर्षिः, महामुनिः" इत्यादि-शब्दनुतिभिः सश्रद्धं सादरमवन्द्यन्त, वन्द्यन्ते च। कथं न ते वन्दनीयाः ?—येषां प्रकाशात् खलु मानवा मानवा जाताः। विश्वेऽस्मिन् परस्परं प्रेमाऽऽदानप्रदानाय सम्प्रेरिताः। "स्वपार्श्वे किञ्चिदपि वस्तु यद्यस्ति तर्हि तेनान्यस्य यथाशक्यं परोपकारः कर्तव्यः। निजपार्श्वं वस्तु-रहितं विधायापि परस्योपकृतिः कार्या। परोपकारे स्वस्यैवोपकारः। परहिते स्वकीयं हितम्"—इत्यादि विश्वजनीनान् विचारान् प्रचार्य प्रसार्य तैरुपकृतं महदस्य भूतलस्य।

अस्मिञ्जगति कवयो नीतिज्ञाः, आलोचकाः, महात्मानः, मनीषिणो यस्मिन् कस्मिन्नपि देशे स्थले वा गृहीतजन्मानः कृतनिवासा वा भवन्तु, तैरवश्यमपि आत्मविषये जन्ममरणादि-विषये च विजिज्ञासा कृताऽऽलोक्यते। साधारणस्यापि मानवस्य हृदये कदाचित् प्रश्नोऽयं समुज्जृम्भते यत्–'कोऽहम् ? कुत आयातः ? कुत्र मया गन्तव्यम् ? लोके मया किं किं कर्तव्यम् ? मानवस्य किं च मुख्यं प्राप्तव्यम् ? जीवनस्य सार्थकता कथम् ?' इत्यादि। एत एव प्रश्ना मनुष्यं बलाद् यत्र विषये चिन्तनाय प्रेरयन्ति स विषयः "अध्यात्म" इति नाम्ना व्यवह्रियते जनैः। सुदृढं वक्तुमिदं शक्यते यदस्मिन् समग्रेऽपि भूमण्डले ये केचनापि महान्तः पुरुषाः प्रख्यातिं प्राप्नुवन्, तैः सर्वैरपि उपर्युक्तप्रश्ना बहुधा विचारिताः, निष्कर्षे च ते तं विषयं लब्धवन्तः, यो हि पिण्डब्रह्माण्डयोरैक्यं प्रतिपादयति। "स्वमिव अन्यानपि जानीते, अन्या-नपि स्वं विजानाति"—इत्येवंविधा विचारदृष्टिर्लाघवाद् गौरवं प्रति समुन्मुखीकरोति नरम्। दृष्टिरियं यदि केनापि युक्तिप्रकारेण सिद्धयति तर्हि सोऽयमध्यात्मचिन्तन-प्रकार एव।

भगवत्पदवाच्येन महात्मना बुद्धेन अनूनकेऽपीह विश्वम्भरामण्डले आत्मचिन्तन-दया-परोपकारादिविषयाः प्रसारिताः। सम्यगवबुध्य संसारम्, अत्रत्य-सर्वविषयांश्च तेन सार्व-जनीनाय हिताय तथाऽऽचरितं येन हि सर्वंसहेयं व्याप्ता, उपकृता, शान्तिमधिगता च। मोह-मुग्धं, युद्धसम्पृक्तं, परपीडनेन स्वमनोरथपूरणसंलग्नं निर्दयमपि सम्राजमशोकं स संग्राम-विरामाय विवशं दया-परोपकार-संवलितमानसं विहितवान् यदि, तर्हि तद्द्वारा भारतवर्ष-मुल्लङ्घ्य धरित्रीमण्डलस्थेषु नैकेषु देशेषु, द्वीपेषूपद्वीपेषु चाध्यात्मिकसन्देशं सम्प्रेष्य भुवन-स्यास्य परमं हितमकरोत्। सैव विचारसरणिर्गौतमस्य स्वकीयभ्रातरं नन्दनामकं बलादबला-लोलुपं ततः समावर्जयन्ती महत्पदलाभान्वितं चकार। सांसारिका एव विषयाः सर्वमधिकृत्य नैव वर्तन्त इति तया घटनया स्पष्टीक्रियते। यदि भौतिकविषयेभ्योऽपि गरीयान् विषयोऽन्यो न सम्भवेत् तर्हि कथं नाम नन्दो मुमुक्षुत्वाय प्रायतत ? किं न वनितादिष्वेव व्यरमत् ?

कथमिव भगवत्पादत्वं प्राप्त आचार्यशङ्करः ? तत्रापि आध्यात्मिकमेव चिन्तनं तथ्यम् । स हि संसारकार्यक्रमसरण्यां नित्यव्यापृतानत एव दुःखितान् जनानवलोक्य तानाध्यात्मिक-चिन्तनद्वारा शान्तिसुखप्राप्त्यै समुद्बोधयामास । स्वल्पीयस्यपि स्वजीवने सोऽनारतं समस्तेऽपि देशे, विदेशे चाध्यात्मिकीं पताकां फरफरायमाणामकरोत् । जनता विमार्गगामिनी सारोगा तथा चिकित्सिता यथा सा सुतरामुल्लाघतां प्राप्ता । छिन्नभिन्ना वैदिकसंस्कृतिः पुनरुज्जीविता । नास्तिकता गताऽऽस्तिकता ऽऽयाता ।

अस्मिन् देशे आध्यात्मिकलहर्योऽविरतं विहरन्ते । बुद्धशङ्करवदिह परस्सहस्रं महा-पुरुषा आध्यात्मिकचेतनाभिः समग्रमपि भूपिण्डं समाश्वासयितुं, सान्त्वयितुं, समुद्बोधयितुं, परमशान्तिप्राप्तिसमर्थं विधातुं च भारतभुवमलमकुर्वन् । परमहंसो रामकृष्णः सम्यगधिगता-ध्यात्मिकशक्तिः परममनीश्वरवादिनं नरेन्द्रनाथं मनःपरिवर्त्तनाय विवशीकृत्येश्वरवादिनं विवेकानन्दं विधाय; तमेवेश्वरदूततुल्यतां प्रापय्याऽखण्डक्षोणिमण्डले भ्रामयित्वाऽध्यात्मभाव-प्रचारं कारयामास, येन किं देशिनः किं विदेशिनः सर्वेऽपि महदुपकृताः सञ्जाताः ।

एवमेव पाश्चात्त्यभूमावपि नैकेऽध्यात्मप्रकाशाः समुद्योतिताः सन्तो विश्वस्मिन् विकीर्णाः । यीशुख्रीस्त-शुकरातेमामगजाली-प्रभृतीनां विलक्षणाध्यात्मिकचेतनापरिप्लुतान्तः-करणानां महात्मनां भावाः सम्प्रत्यपि कस्यचिदपि जनस्य चेतनां जागरयितुं सक्षमाः ।

मोक्षमूलरस्याऽऽजीवनं वेदार्थानुशीलनम्, लेवटल्स्टायस्याऽऽध्यात्मिकभावपूर्णकथा-रचना, गेटेमहाभागस्य संस्कृतप्रेम, महात्मनो गान्धिन आध्यात्मिकी जीवनपद्धतिः, स्वामिनो दयानन्दस्य जीवनोत्सर्गः, इत्यादिबहूनां महापुरुषाणां प्रयासा जगति महदुपकारार्थमप्रति-हतगतयः संसिद्धाः ।

वर्तमाने समये वयमालोकयामः—गन्त्रीषु, मृत्तरेषु, विमानेषु, ग्रामेषु, तीर्थेषु, मन्दिरेषु च विदेशीयानां जनानां समूहः समाकलितभारतीयवेषभूषः, मुण्डितो जटिलो वा, काषायवासा, रुद्राक्ष-तुलसी-माल्यधारी, गीता-रामायण-वेदादिकं पठन् दरीदृश्यते । शालग्रामशिलाक्रमणे व्ययितशतमुद्रांस्तानालोकमालोकं ज्ञातुं शक्यते यत् समुपलब्ध-निःशेष-सांसारिक-सुखानामपि जनानां मनो न सन्तोषाय कल्पते, यथा सर्वसङ्कल्पसन्न्यासी, सर्वभूतहिते रतः, सर्वभूतस्थ-मात्मानं सर्वभूतानि चात्मनि ईक्षते यः, स सुखी शान्तः शेते । अद्यत्वे पाश्चात्त्यदेशेषु जना यथाऽऽधिग्रस्ताः सन्तो भृशमात्महत्यायां प्रवर्तिताः प्राप्यन्ते, तत्र कारणमाध्यात्मिकभाव-राहित्यमिति कथने नात्युक्तिः ।

यद्यपि सार्वत्रिकः प्रचारोऽयं विलसतीह यद्भौतिकेऽस्मिन् विज्ञानशालिनि युगेऽलमध्यात्मचिन्तया, इत्यादि। नैतदुपयुक्तं, सुचिन्तितं वा। यतो हि येनाध्यात्मवादेन प्रभाविताः कवयो महाकवयो विश्वकवयो वाऽऽदर्शतामव्रजन्, व्रजन्ति, व्रजिस्यन्ति च; दुर्विचारका दुराचाराश्च जनाः सन्तोऽजायन्त, जायन्ते, जनिष्यन्ते च; स्वल्पशक्तिका जना राष्ट्रोद्धरणसमर्था अभूवन्, भवन्ति, भविष्यन्ति च; संसारपारावारनिमग्नाः परिपीडिताः शान्ति सुखं चालभन्त, लभन्ते, लप्स्यन्ते च; स वादो नैव कोऽपि वादः ? वयं तु भृशं विश्वसिमः, शान्तिमनुभवामः, सुखं च विन्दामहे चिन्तनेनानेन। शनैः शनैः समस्तविश्वनिवासिनो जना अमुं वादं विद्यां वा प्रति समाकृष्टमानसाः समुन्मुखाः सन्तीति तु वयं प्रेक्षामह एव तावत्।

आध्यात्मविद्याया मुख्यं लक्ष्यम्—परमा शान्तिः, परा निर्वृतिः, परमानन्दः, त्रिविधदुःखहानिः, इत्यादि।

सत्यम्, विज्ञानेन मनुष्याणां नानाविधकार्याणां, 'न्यूनतानां वा पूर्त्तिः क्रियते, येन तेषां कामाः केचन पूर्णा भवन्ति। परन्तु—न जातु कामः कामानामुपभोगेन शाम्यति'। अतोऽद्य अशेषेऽपि विश्वे शान्तिभावनायाः प्रचारो विधीयते। संयुक्तराष्ट्रसङ्घस्य जन्म एतदेवार्थमभूत् यत्—लोके परस्परं जन्यं न जायेत, आणविकास्त्रशस्त्राणामुपद्रवो न प्रसरेत्, देशेष्वखिलेषु शान्तिसाम्राज्यं विलसतु, इति। परन्तु क्वचिद् विमानानां बलान्नयनम्, क्वचिद् युद्धम्, प्रायः सर्वत्र गृहकलहः, सन्धिप्रस्तावाश्च दृश्यन्ते श्रूयन्ते चास्माभिः। एतस्यां स्थितौ यदि अध्यात्मभावनायाः सम्यगवबोधः प्रसार्येत, प्रत्येकं जनोऽपरं बन्धुत्वेन जानीयात्, तदनुरूपं च व्यवहरेत् तर्हि शान्तिः समुदेष्यति यत्र तत्र सर्वत्र।

साम्प्रतमनुदिनं नवनूतनानां वस्तूनामाविष्कारा विधीयन्ते। बहुतिथात् कालादारभ्यमाणैरेभिराविष्कारैर्न मानवस्तुष्टिमधिगतवान्, कामा न पूरिताः। नित्यमेव काचन न्यूनता दृग्गोचरायते। तस्याः पूर्त्तिर्जाता चेदन्यन्नैयून्यमापतति। पृथिवीयं सन्तोषाय नालमस्माकमिति नराश्चन्द्रतलं चुचुम्बिरे, परन्तु तत्रापि मनस्तुष्टये नामिलत् किमपि जेमनम्! शुक्रं मङ्गलं बृहस्पतिं वा परामृश्यापि शान्तिरुदेश्यतीति को जानीते ? अतो हेतोर्व्यासोक्तिं प्रति सहसा मनः श्रद्धत्ते—

यत्पृथिव्यां व्रीहियवा हिरण्यं पशवः स्त्रियः।
एकस्यापि न पर्याप्तमिति मत्वा शमं व्रजेत्॥

परन्तु विलक्षणस्यास्य ब्रह्माण्डस्य लोकानां दृश्यानां रहस्यानां चावलोकनाय ज्ञानाय वा या जिज्ञासा समुदेति सा पिशाचीवत् सर्वान् विवशीकुरुते।

तर्कये, परमखेदावहोऽयं विषयो यदनावश्यक-लोकान्तरोड्डयनेषु कृतापव्ययाः समृद्धा विकसिताश्च देशा दरिद्रेषु शरणभिक्षायै परदेशपदविनामितशिरस्केषु जनेषु, विकासरहितेषु विकासोन्मुखेषु वा देशेषु दयां कथमपि न कुर्वन्ति, न वा सहायताप्रदानेन तानुपकुर्वन्ति, प्रत्युत उपहसन्ति निर्दयं व्यवहरन्ति च । न जाने मार्क्समहाशयस्य साम्यवादः कुत्र कोणे न्यलीयत ? अन्ये वा समतावादिनः क्व पलायिताः ? गृहकलहार्थे सर्वेऽपि साम्यवादं प्रयुञ्जते, परन्तु नैतादृशः कोऽपि महापुरुषो दृश्यते (आध्यात्मिकशक्तिसम्पन्नः युगपरिवर्तनसमर्थश्च) यो हि विश्वस्मिन्नपि परिदूयमानमानसानां शरणार्थिनां दरिद्रदेशानां च समुद्धारकव्रती स्यात् ।

अत्रेतर्हि त्विदमावश्यकं यदध्यात्मचेतना सर्वेषां हृदयङ्गमा भवेत् । तयैव संसारस्य समुद्धारः सम्भवति । सैव क्षमाऽत्र कार्ये । यथा पुरा कुटीरनिवासी दरिद्रोऽपि जनः सन्तोषेण प्रसन्नतया जीवनं यापयति स्म, नाद्य तथा कोटिपतिरपि प्रसन्नाननो लक्ष्यते । चतुःपणार्जको जनः साधारणतयाऽन्यं नरं नरं न मनुते । अत्राध्यात्मभावनाहानित्वादेव सम्भवतीत्थम् ।

यावद् भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥

इति भावः कुत्रेदानीम् ? यदीदृशानां भावानां हृदयेन ग्रहणं भविष्यति तदाऽऽत्मवत्सर्वभूतेषु दर्शनं सम्भावयिष्यते, दरिद्रनारायणार्चनभावः परिपुष्टिं व्रजिष्यति, परस्परं बन्धुत्वव्यवहारश्चलिष्यति ।

आध्यात्मविद्या विद्यासु सर्वोत्तमत्वादियं सार्वत्रिकी सार्वकालिकी सर्वजनग्राहिणी च सती त्रिष्वेव कालेषु लोकोपकारिणी सिद्धयति । सा शिक्षयति—

शृण्वन्तु विश्वे अमृतस्य पुत्राः । उत्थातव्यं जागृतव्यं योक्तव्यं भूरि कर्मसु । योगः कर्मसु कौशलम् । सङ्गच्छध्वं, संवदध्वं सं वो मनांसि जानताम् । उत्तिष्ठत, जाग्रत, प्राप्य वरान् निबोधत । मित्रस्य चक्षुषा समीक्षामहे । सर्वा आशा मम मित्रं भवन्तु । इत्यादि

एतावद्भिरनेकैर्भावैर्मनुष्येषु परस्परं बन्धुत्वं प्रेमभावश्च पुष्पिष्यतः फलिष्यतश्चेत्यत्र नास्ति विचिकित्सा कापि । सर्वेषामेवाहितकरत्वान्निःशस्त्रीकरणाय जनाः प्रयतिष्यन्ते । आशास्तुं शक्यते च यदुन्नता देशा उन्नतिपथमारोढुकामानां देशानां सहायकत्वं यास्यन्ति ।

आध्यात्मिकशक्तिरेव महतीनामन्यासां शक्तीनां सम्यक् प्रयोगे क्षमा । पूर्णमपि ब्रह्माण्डमेकीकरणसामर्थ्यवती । संसारे समुत्पन्नानां नानाविधानां समस्यानां समाधाने विलक्षणं माध्यस्थ्यमावहति । भौतिकीनां शक्तीनां प्रयोगा विश्वस्मिन् बन्धुत्वभावसिद्धये नालम् ।

अध्यात्मविद्यैव, अध्यात्मदर्शनमेव तादृशकार्यकलापेषु स्वचातुर्यं प्रदर्शयति। किं वर्तमाने, किं वा भविष्येऽप्ययमेव वादः सर्ववादेषु ज्यायान्। सर्वे वादा हि स्व-स्व-मतपुष्टयै सर्वानपि चान्यान् वादान् तिरस्कुर्वन्ति, द्विषन्ति, वक्रदृष्टयैव समीक्षन्ते, परन्तु सर्ववादसमन्वयकर्त्ता सम्पूर्णेऽपि भूमण्डले कोऽपि वादः, किमपि दर्शनं यद्यस्ति तर्हि अयमध्यात्मवाद, इदमध्यात्म-दर्शनम्, इयं चाध्यात्मविद्या।

प्राचीनकाले यथाऽयं वादः सर्वजनहिताय, सर्वमतसमन्वयाय, दरिद्रनारायणसेवायै, स्व-पर-भेदनिरसनाय प्रावर्तत मध्ये-मध्ये क्षीयमाणोऽपि; तथैवेदानीमपि सर्वत्र देशेषु शान्त्य-हिंसा-समता-परोपकार-विश्वबन्धुत्वादिभावान् प्रसारयन् विलसति विश्वमञ्चे सर्वोच्चपदे। इयमेवास्माकं भारतीयानां गुरुता यद्वयमिमामेव आध्यात्मिकीं विद्यां गृहीत्वा विश्वपाठशालायां गुरुत्वपदमुररीकुर्मः। स्वामिना विवेकानन्दमहाभागेनोक्तमासीद् यदस्माकं पार्श्वे विदेशेभ्यो दानाय यदि किमपि वस्तु विद्यते तर्हि तदध्यात्मदर्शनम्, अध्यात्मविद्या, आध्यात्मिकभावाः, आध्यात्मिकभोजनं च, नान्यत् किमपि। वस्तुतोऽद्य कृत्स्नमपि विश्वमध्यात्मभावाशनेन स्वकीयां ज्ञानजिघत्सामपनिनीषुर्दृश्यते। तस्याऽखिलापि अशनाशा यदि शाम्येत, तदध्यात्मभाव-जेमनेनैव।

किञ्च यदि विश्वेऽस्मिन् जना आध्यात्मिकान् भावानविगणय्य, आणविकशस्त्रास्त्राण्येव वर्द्धयिष्यन्ते, परस्परं वैमनस्यं छलप्रयोगं कृश-देश-जिघृक्षुतामेवावगाहन्ते तर्हि तेषां विनष्टि-रवश्यम्भाविनी। यदि ते लौकिकसाधनैः सहाऽऽध्यात्मिकभावानामपि सम्यग्ग्रहणं प्रयोगं प्रसारं च न कुर्वते, ते चन्द्रादिग्रहाणां क्षारमेव लप्स्यन्ते नान्यत् किमपि। एतस्मात् कारणाज् ज्ञानाविज्ञानयोः सामञ्जस्यविधानपूर्वकं भावानामादानप्रदानैः सर्वं कार्यजातं सुखं सरलञ्च सम्पन्नं भविष्यति।

भारतीया हि जना अद्यत्वेऽपि (पूर्वत आरभ्य) आजीवनं ते यत्किमपि कुर्युः, तुरीयावस्थायां तु दधतेऽध्यात्मविषयिणीमाकाङ्क्षामवश्यमपि। यतः सर्वोपरि सर्वमान्यमिदं वस्तु। समग्रेऽपि जीवने नानाविधविलासनिमग्नमानसा अपि जगन्नाथादयः 'तत्वं परं चिन्त्यते' इत्यादिवाक्यैरध्यात्मविषयसरस्वतीमवगाहन्तो लभ्यन्ते।

इयमेवैका विद्या या मानवं पूर्णात्पूर्णतरं सम्पादयति, अपूर्णतायाः पूर्णतां प्रति नयति, दभ्रताया अदभ्रतां प्रापयति, सङ्कोचादौदार्यं प्रत्युन्मुखीकरोति। अध्यात्मदर्शनसम्बन्धिशास्त्रेषु मध्यमणिरूपमलङ्कुर्वता श्रीमद्भगवद्गीताशास्त्रेणापि समुद्घोषितमस्ति—

अध्यात्मविद्या विद्यानाम्

जैनपरम्परा तद्दर्शनञ्च

पं० कैलाशचन्द्रशास्त्री *

इयं भारतभूमिः चिरकालत एव विविधधर्माणां प्रसवभूमिः। अस्यां विविधा महर्षयो दार्शनिकाः धर्मतीर्थङ्कराश्च समभूवन्। अस्या इतिवृत्तमतिप्राचीनम्। अत्र श्रमणानां निवृत्तिपरम्परा वैदिकानाञ्च प्रवृत्तिपरम्परा ऋग्वेदकालेऽपि प्रचलिता आसीत्। प्रवृत्तिपरम्परा देवपरम्परानाम्नाऽपि कथ्यते। यज्ञविधिः आश्रमव्यवस्था च तदङ्गभूतौ। तथैव निवृत्तिपरम्परा मुनिपरम्परानाम्नाऽपि कथ्यते। श्रमणविधिः वानप्रस्थधर्मश्च तदङ्गभूतौ। ऋग्वेदे उक्तम्—'मुनयो वातरशनाः पिशङ्गा वसने मलाः।' वातो रशना मेखला येषां ते वातरशना मुनयः, अर्थात् दिगम्बराः। जैनधर्मेऽद्यापि दिगम्बरमुनयः समुपलभ्यन्ते। अस्य धर्मस्य परम्परा अतिप्राचीना। भगवान् महावीरस्तु अन्तिमस्तीर्थङ्करः।

मिथिलाप्रदेशे लिच्छविगणतन्त्रः प्राचीनकाले प्रचलित आसीत्। एतस्य ऐतिहासिकता विवादरहिता। तस्य गणतन्त्रस्याध्यक्षः चेटक आसीत्। तत्पुत्री त्रिशला महावीरस्य माता आसीत्। एवं भगवतो महावीरस्य लिच्छविगणतन्त्रेण सह कौटुम्बिकसम्बन्ध आसीत्। भगवता महावीरेण स्वकीय-तपश्चर्यया धर्मदेशनया च श्रमणपरम्परा पल्लविता पुष्पिता च कृता। भगवतो महावीरतः पूर्वं त्रयोविंशतिस्तीर्थङ्कराः सञ्जाताः। तेषामितिवृत्तं जैनपुराणेषु सुरक्षितं तिष्ठति। तेषु भगवान् ऋषभः प्रथम आसीत्। तेषामितिवृत्तं श्रीमद्भागवतपुराणेऽपि विस्तरतः प्रोक्तम्। तत्र लिखितम्––'भगवान् परमेष्ठिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने महादेव्यां धर्मान् दर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमन्थिनां शुक्लया तन्वाऽवततार। २० स्क०-५ अ०-३। तत्रैव इदमपि लिखितं यत् ऋषभस्य शतपुत्रा आसन्। तेषु च ज्येष्ठो भरतस्तन्नाम्नैवायं देशो भारतवर्षनाम्ना विख्यातः। यथा–येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत्। येनेदं वर्षं भारतमिति व्यपदिशन्ति। भागवते ५।४।९। सिन्धुघाटीप्रदेशे एका नग्ना पुरुषमूर्तिः कायोत्सर्गमुद्रया उपलब्धा। इमां मूर्ति केचन विद्वांसः तीर्थङ्करप्रतिमारूपेण सङ्कल्पयन्ति। पाटलिपुत्रे लोहानीपुरस्थाने एका कायोत्सर्ग-

* अधिष्ठाता– वाराणसीथ–स्याद्वादमहाविद्यालयस्य।

मुद्रया स्थिता नग्नमूर्तिरुपलब्धा। प्रसिद्धपुरातत्त्वविचक्षणाः स्वर्गीयाः काशीप्रसादजायसवालप्रमुखाः सर्वेऽपि विद्वांस इमां तीर्थङ्करप्रतिमारूपेणैव सम्मानयन्ति । एषा मूर्तिः अद्यावधि उपलब्धासु बौद्धप्रतिमासु ब्राह्मणप्रतिमासु च प्राचीनतमा इत्येतेषामभिप्रायः । कलिङ्गाधिपतेःखोखेलस्य हाथीगुम्फशिलालेखेऽपि लिखितं यत् स जिनप्रतिमां पूजयति स्म । एतैः सङ्केतैर्ज्ञायते यत् जैनधर्मस्य ऐतिहासिकपरम्पराऽनुश्रुतिश्चातिप्राचीना ।

जैनधर्मस्य द्वाविंशतितमस्तीर्थङ्करो नेमिनाथः श्रीकृष्णभगवतोऽनुज आसीदिति जैन-हरिवंशपुराणेऽन्यत्र च लिखितम् । मथुरातः प्राप्तासु नेमिनाथमूर्तिषु उभयपार्श्वे श्रीकृष्णस्य बलरामस्य च प्रतिकृतिरङ्किता दृश्यते । एतैर्ज्ञायते यद् भारतीयसंस्कृतिः निवृत्तिधर्मिश्रमण-परम्परया प्रवृत्तिधर्मिणी आसीत्। ब्राह्मणपरम्परया च स ङ्ग्रथिता रज्जुवत् शोभमानाऽऽसीत्। उभयपरम्परयोर्मध्ये आदानप्रदानमपि सञ्जातम् । एतत्तु विदुषामन्वेषणस्य विषयः ।

पुराकाले सर्वत्र यज्ञविधिः प्रचलिताऽऽसीत् । यज्ञे च पशुहिंसायाः प्राधान्यमासीत्। 'यज्ञे वधोऽवधः' इत्येतदपि सूत्रितमासीत् । अद्य क्वापि याज्ञिकी हिंसा नैव भवति । इत्येतद् भगवतो महावीरस्य बुद्धस्य च अहिंसापरकधर्मदेशनाया फलम् । 'मा हिंस्यात् सर्वभूतानि' इति श्रुतिरपि श्रूयते किन्तु अन्यत्र अपवादोऽपि श्रूयते यत् एवंविधायां परिस्थित्यां हिंसा कार्या इति । किन्तु जैनधर्मे स्वजीवनस्य सङ्कटेऽपि हिंसा विधेया नास्ति । आत्मरक्षा करणीया न तु परवधः कर्तव्यः । परवधस्याभिप्रायं त्यक्त्वा आत्मरक्षाकरणे यदि परवधः स्यात् स तु 'अपनिषिद्धः किन्तु परवधस्याभिप्रायेण परस्य वधकरणन्तु हिंसैव । जैनधर्मे हिंसाया लक्षणं' 'प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा' इत्युक्तम् । यश्चतसृभिः विकथाभिः, कषायचतु-ष्टयेन, पञ्चभिरिन्द्रियैः निद्राप्रणयाभ्याञ्च परिणतः स प्रमत्त इत्युच्यते । योगशब्दः सम्बन्ध-पर्यायवचनः । व्यपरोपणं वियोगकरणम् । प्रमत्तयोगाद् हेतोः प्राणव्यपरोपणं हिंसैव। प्राणवियोगपूर्वको हि प्राणिवियोगः ।

केचित् कथयन्ति प्राणेभ्योऽन्य आत्मा । अतः प्राणवियोगेऽपि नात्मनः किञ्चिद् भवति । अतो हिंसैव नास्ति कुतोऽधर्मः । तन्न युक्तम्, प्राणवियोगे सति, तत्सम्बन्धिनो जीवस्य दुःखं भवति । अत एवोक्तम्–दुःखमुत्पद्यते जन्तोर्मनः संक्लिशतेऽस्य ते । तत्पर्यायश्च यस्यां सा हिंसा हेया प्रयत्नतः । अत आत्मनो नित्यत्वाद् हिंसैव न भवतीति यदुच्यते तन्न सम्यक् । यस्य हिंसा सञ्जायते तस्य जीवस्य दुःखं भवति । तस्य जीवनमपि नष्टं भवति । उक्ते हिंसालक्षणे "प्रमत्तयोगात्" प्राणव्यपरोपणमित्येतदुभयं विशेषणमुपादीयते, यतोऽन्यतराभावे हिंसा न भवतीत्येतद्ज्ञापनार्थम् । यदा प्रमत्तयोगो नास्ति केवलं प्राणव्यपरोपणमेव, न तदा हिंसा। यथा कश्चिद् संयतः स्वदृष्ट्या मार्गं निरीक्ष्य गच्छन्, यदाऽग्रे पादं निक्षिपति तदैव कश्चिद्

जन्तुरकस्मादागत्य तत्पादनिक्षेपणस्थाने समापतति तदैव कश्चिद् जन्तुः तत्पादसंघट्टेन म्रियते च, एतस्यामवस्थायां साधुरहिंसक एव यतः स सावधानः किन्तु असावधानावस्थायां हिंसामकुर्वन्नपि हिंसकः। अतो जैनधर्मे जीवो म्रियतां वा जीवतु, योऽयत्नाचारी विद्यते स हिंसादोषभागवश्यं भवति, किन्तु यः स्वकीयाचरणे सावधानो यत्नपरो भवति तस्य जीवघातेऽपि दोषो नास्ति। एवं प्रकारेण जैनधर्मे हिंसा द्विविधा विहिता—भावहिंसा द्रव्यहिंसा च। यत्र भावहिंसा विद्यते तत्र अवश्यं हिंसा भवति। किन्तु भावहिंसाऽभावे द्रव्यहिंसायां सत्यामपि हिंसा न भवति। अतो लोके शास्त्रेऽपि च यैरुपालम्भः क्रियते—जले जन्तुः स्थले जन्तुराकाशे जन्तुरेव च। जन्तुमालावृते लोके कथं साधुरहिंसकः। इति। सोऽत्र अवकाशं न लभते यतो ज्ञानध्यानपरायणस्य अपमन्त्रस्य साधोः प्रमत्तयोगो नास्ति। प्रमत्तयोग एव हिंसाया मूलम्। अत एव सर्वैरपि मनुष्यैः सदा सावधानतया तथाऽऽचरणीयं यथा परेषां स्वल्पमपि दुःखं न भवेत्।

केनाऽपि जनेन महावीरः पृष्टः कथं मया वर्तितव्यं यतो हिंसा न भवेत्। महावीरेण भगवता उक्तम्—जदं चरे जदं तिट्ठे जदमासे जदं सरा। जदं भुंजीज्ज भासेज्ज तदो पावं न लिप्पए॥ अर्थात् त्वया यत्नपूर्वकं सावधानतया गन्तव्यम्। सावधानतया स्थातव्यम्। सावधानतया स्वकीयमासनं स्वीकर्तव्यम्। शयनेऽपि सावधानतया वर्तितव्यम्। सावधानतया भोजनं कर्तव्यम्। सावधानतया च वार्तालापो विधेयः। एवं यदि स्वकीयाऽऽचरणे सावधानस्तदा भवानहिंसक एव। यदि सर्वैरपि जनैरेवं व्यवहारः क्रियेत तदा सर्वेऽपि सुखिनः भविष्यन्ति। अतो ये स्वोदरपूरणार्थं परेषां जन्तूनां भक्षणं कुर्वन्ति ते न समीचीनाः। मांसवत् मद्यमपि त्याज्यम्। मद्यपानेन यादवा नष्टा इत्यद्यापि श्रूयते। मद्यपायिनां दुर्दशा तु सर्वैरपि ज्ञायते। पिता मद्यं सेवते तत्पुत्राश्च बुभुक्षिता म्रियन्ते।

एवमेव अनुचितसाधनैः परद्रव्यहरणमपि नैव कर्तव्यम्। राज्याय यथोचितः करो दातव्यः। नैव तत्र चौर्यं कार्यम्। धूमयाने नैव निःशुल्कं गन्तव्यम्। उत्तमविक्रेयवस्तुषु हीनवस्तुसम्मेलनं कृत्वा व्यपारो नैव कर्तव्यः। भगवता महावीरेण एतत्सर्वमचौर्यव्रतभङ्ग-कारकं प्रतिपादितम्। स्वकीय-धनधान्यादिसम्पत्तेः स्वकीयामावश्यकतां विज्ञाय तदनुसारेण परिमाणं विधेयम्। एतावदेवेष्टमन्यदनिष्टमिति नियमो विधेयः। भगवता गुणभद्राचार्येण प्रोक्तम्—

आशागर्तः प्रतिप्राणि विश्वं यस्मिन्नणूपमम्।
कस्य किं कियदायाति वृथा वो विषयैषिता॥ आत्मा० ३६।

प्रतिप्राणि तृष्णाया एतादृशो महान् गर्तो विद्यते यत्पूरणार्थमेतद् विश्वमपि परमाणु-तुल्यम् । यदि विश्वसम्पत्तेर्विभाजनं स्यात्तदा कियती कियती प्राप्तिः स्यादिति चिन्त्यम् । अतः सर्वैरपि स्वतृष्णां सीमितां कृत्वा लोकव्यवहारे तथा वर्तितव्यं यथा सर्वेषामपि सम्पोषणं स्यात् । एकोऽन्नं विना म्रियतेऽन्यश्चापरिमितभोजनं कृत्वा म्रियते इति किं समीचीनम् ? यः समाजाय प्रचुरं ददाति स्वयं चाल्पं गृह्णाति स एव महावीरमते सम्यक् समाजवादी अस्ति । अस्मिन् युगे मदीयदृष्ट्या महात्मगान्धी एव समाजवादी आसीत् । तेन महात्मना न किञ्चिदपि सञ्चितं नैव च स्वपुत्राणां चिन्ता कृता, किन्तु तत्सर्वमपि तदनुयायिभिर्विस्मृतम् । एवमेव च भगवता महावीरेण यदुपदिष्टं तत्सर्वमपि तदनुयायिभिर्नाङ्गीकृतम् । तन्नाममात्रमेव ते स्मरन्ति न तु कर्तव्यम् । अस्मिन् देशे एतदेव वैचित्र्यं यत् स्वपूज्यं पूजयन्ति न तु तद्-वचनं परिपालयन्ति । आपदि भगवन्तं स्मरन्ति न तु किञ्चित् पौरुषं कुर्वन्ति । भगवन्ना-मस्मरणेनैव सर्वं स्यादिति महती श्रद्धा वर्तते । वयं किमपि कुर्मो भगवत्प्रसादेन सर्वं क्षम्यं भवेदित्येषा श्रद्धाऽपि अस्मद्देशस्य दरिद्रतायाः कदाचारस्य च कारणम् । शुभस्याशुभस्य च स्वकर्मणः फलमवश्यमेव भोक्तव्यमित्येषा श्रद्धा न क्वापि दृश्यते । येऽशोभनमाचरन्ति तेऽपि शोभनफलमिच्छन्ति भगवत्प्रसादेन । अतो यथा ते सम्बद्धाधिकारिपुरुषेभ्य उत्कोचं दत्वा स्वकार्यं साधयन्ति तथैव भगवन्तमपि पत्रपुष्पादिरूपमुत्कोचं दत्वा स्वकार्यं साधयन्ति । अतोऽत्र भगवतोऽपि स्थितिस्तत्तुल्यैव विद्यते । ये भगवन्तमपि वञ्चयितुमभिलषन्ति ते किन्न कर्तुं क्षमाः । अतो धर्मस्यापि स्थितिर्विचित्रा विद्यते ।

जैनमते जिनभक्तिर्न जिनेन्द्रदेवस्य सम्प्रीत्यै क्रियते । यतो जिनेन्द्रा वीतरागा न ते स्तुत्या प्रसन्ना भवन्ति, नापि निन्दया रुष्टा भवन्ति । उक्तञ्च—

न पूजयाऽर्थस्त्वयि वीतरागे न निन्दया नाथ ! नितान्तवैरे ।
तथापि ते पुण्यगुणस्मृतिर्नः पुनाति चित्तं दुरिताञ्जनेभ्यः ॥ इति

तथापि भगवतः पुण्यगुणस्मरणेनास्माकं चित्तं पापकालुष्येन रक्षितं भवति, इत्येतद-र्थमेव भगवन्तं पूजयन्ति जैनाः । भगवतो गुणस्मरणेन तदुपदिष्टाचाराऽऽचरणेन च मनुष्यः स्वयं भगवानेव भवतीति जैनानां मतम् । आत्मैव परमात्माराधनेन परमात्मा भवति । परमात्मभवनमेव यस्मादाराधनाया मुख्यं फलम् । सांसारिकसुखावाप्तिस्तु आनुषङ्गिकफलम् । यथा कृषको धान्यार्थमेव कृषिं करोति न तु तुषार्थम् । धान्योत्पत्तौ सत्यां तुषावाप्तिस्तु स्वयमेव जायते । अनयैव रीत्या जनेन परमात्मपदप्राप्त्यै एव यत्नः करणीयः ।

जैनदर्शने सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रञ्च मोक्षप्राप्तेः कारणम् । आत्मनो विनिश्चयः सम्यग्दर्शनम् । आत्मनः परिज्ञानं सम्यग्ज्ञानम् । आत्मनः स्थितिः सम्यक्चारित्रम् । अतः स्वस्यात्मैवोपादेयः । शेषाः सर्वेऽपि बाह्यपदार्था हेयाः । तेषु आसक्तिरेव कर्मबन्धस्य

कारणम् । विरतिस्तु मुक्तेः कारणम् । अत आत्मज्ञानमेव सर्वोत्कृष्टं, तदर्थमेव यत्नः करणीयः, किन्तु न कोऽपि आत्मानं जानाति न परमात्मानम् । किमेषा भारतीयशिक्षा ! अस्मदीयशिक्षया आत्माऽपि बहिष्कृतः परमात्माऽपि दूरोत्सारितः । एतौ द्वावेव धर्मस्यालम्बनभूतौ । अतो धर्मोऽपि बहिष्कृतः । धर्मप्राणराष्ट्रे तत्प्राणा एव निष्कासितास्तदा किमवशिष्टमिति विचारयन्तु सुधियः ।

अहिंसया वर्तितव्यम । सत्यं वक्तव्यम् । चौर्यं नाचरणीयम् । परस्त्रीषु मातृवत् वर्तितव्यम् । अनावश्यकोऽर्थसङ्ग्रहो न कर्तव्यः । मदिरा न पेया । क्रोधो न कर्तव्यः । किमेते सम्प्रदायपरका धर्माः । एतैः सह किं कस्यचित् सम्प्रदायविशेषस्य सम्बन्धोऽस्ति ? एते तु मानवधर्माः । एतैर्विना मानवो मानव एव न स्यात् । जनसंख्यावृद्धिनिरोधाय निरोधस्य गर्भपातस्य च समाश्रयणं क्रियते, किन्तु यथाशक्ति ब्रह्मचर्येण वर्तितव्यमिति न कोऽपि समुपदिशति । स्वतन्त्रभारते नैतिकपतनस्य पराकाष्ठा सञ्जाता । किमेतेन नैतिकमूल्यरहितेन स्वातन्त्र्येण । यदि भारतं भारतमेव न स्यात्तदा किं भारतस्य वैशिष्ट्यम् । मनुस्मृतौ प्रोक्तम्—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥ इति ।

अधुना तु एतद्देशप्रसूता मानवाः स्वकीयं चारित्रं विस्मृत्य परकीयमेवाचारमाचरन्ति, काऽपि मर्यादा नास्ति । सर्वत्र उच्छृङ्खलतायाः साम्राज्यं विद्यते यस्मिन् देशे विविधा महर्षयः सञ्जाता यैः प्रभूता सद्विचारप्रचुरा ग्रन्थसन्ततिर्विरचिता तस्य देशस्य वर्तमाननैतिकदशां विलोक्य कष्टं भवति । अतो नैतिकशिक्षाया महती आवश्यकता । तदर्थञ्च संस्कृतशिक्षा आवश्यकी । यद्यपि भगवता महावीरेण बुद्धभागवता च लोकभाषया प्राकृतगिरा धर्मोपदेशः कृतः किन्तु जैनाचार्यैः बौद्धाचार्यैश्च गीर्वाणभारतीभाण्डारः समृद्धिं नीतः । उमास्वाम्याचार्येण सर्वप्रथमं तत्त्वार्थसूत्रं रचितम् । तस्य दशाध्यायेषु सर्वाऽपि जिनवाणी सूत्ररूपेण सङ्कलिता । तदनन्तरं तु प्रायः सर्वैरपि जैनाचार्यैः संस्कृतमवलम्ब्यैव ग्रन्थरचना कृता । संस्कृतसाहित्यस्य किमपि क्षेत्रं तद्रचनाभिरसंस्कृतं नास्ति । एकेन जैनाचार्येण तु मृगपशुपक्षिशास्त्रमपि विरचितम् । अन्येन च सङ्गीतसमयसारोऽपि रचितः । पशुपक्षिविषये सङ्गीतविषये च संस्कृतरचना विरला । ज्योतिषविषये आयुर्वेदविषये च बहवो जैनग्रन्था अमुद्रिताः सन्ति । जैनदर्शनविषये च प्रचुरा दार्शनिकग्रन्थाः समुपलभ्यन्ते । दार्शनिकेषु समन्तभद्र-सिद्धसेनाऽकलङ्क-हरिभद्र-विद्यानन्द-प्रभाचन्द्रप्रभृतयः प्रखरा दार्शनिकाः समभूवन् । यथा उद्योतकारेण न्यायसूत्रमवलम्ब्य न्यायवार्तिकं विरचितं तथैव भट्टाकलङ्केन तत्त्वार्थसूत्रमवलम्ब्य तत्त्वार्थवार्तिकं विरचितम् । यथा कुमारिलेन मीमांसाश्लोकवार्तिकं विरचितं तथा आचार्य-विद्यानन्देन तत्त्वार्थ-

श्लोकवार्त्तिकं विरचितम्। विद्यानन्दो जन्मना मीमांसक एवासीत्। जैनधर्मस्वीकारानन्तरं तेनाष्टसाहस्री विरचिता। तस्यां पूर्वं मीमांसादर्शनस्यैव समीक्षा विस्तारेण कृता। मीमांसको वेदस्यापौरुषेयत्वसमर्थकः। धर्मे चोदना हि प्रमाणमिति तस्य मतिः। 'चोदना हि भूतं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थमवगमयितुमलम्।' इति शाबरभाष्ये प्रोक्तम्। जैनास्तु वेदस्य प्रामाण्यं नैव स्वीकुर्वन्ति। अतो समन्तभद्रेण आप्तमीमांसाप्रकणे पुरुषस्याऽर्हतः सर्वज्ञता साधिता—

सूक्ष्मान्तरितदूरार्थाः प्रत्यक्षाः कस्यचिद्यथा।
अनुमेयत्वतो गन्मादिरिति सर्वज्ञसंस्थितिः॥

कुमारिलेण तन्त्रवार्तिके सर्वज्ञतायाः खण्डनं कृतम्। तेनैवोक्तम्—

धर्मज्ञत्वानिषेधस्तु केवलोऽत्रोपयुज्यते।
अर्थमन्यद्विजानस्तु पुरुषः केन वार्यते॥

कुमारिलस्य समीक्षा अकलङ्केन विद्यानन्देनाऽन्यैश्च जैनदार्शनिकैः स्वकीयग्रन्थेषु कृता। एवं दर्शनशास्त्रग्रन्थेषु रुचिराः प्रसङ्गा वर्तन्ते, येषां तुलनात्मकाऽध्ययनेन भारतीयदर्शनशास्त्रस्य विकासः कथं सञ्जात इति विज्ञायते।

कथंचित्तत् सदेवैके कथंचिदसदेव तत्।
तथोभयमवाच्यं च न्ययोगान्तं हि सर्वथा॥

केचिद् वदन्ति वस्तु सर्वथा सदेव। केचिद् वदन्ति सर्वथा असदेव। केचिद् वदन्ति नित्यमेव। केचिद् वदन्ति अनित्यमेव। केचिद् वदन्ति एकमेव। किन्तु यदस्ति तन्नास्त्यपि। स्वरूपेणैव सर्वस्य वस्तुनोऽस्तित्वं पररूपेण तु नास्तित्वम्। स्वपरादानापोहन-व्यवस्थापाद्यं हि वस्तुनो वस्तुत्वम्, यद्येवं न स्यात् सर्वं सर्वात्मकं भवेत्। घटो घटरूपेणैवास्ति न पटरूपेण, पटोऽपि पटरूपेणैवास्ति न घटरूपेण। यद्येवं न स्यात् तदा घटः पटो भवेत्। पटोऽपि घटो भवेत्। अतः सर्वं वस्तु भावाभावात्मकम्। यथा भावो वस्तुधर्मस्तथा अभावोऽपि वस्तुधर्मः। तुच्छाभावो नेष्यते जैनैः। जैनदर्शने द्रव्यपर्यायात्मकं वस्तु। न द्रव्यं पर्यायरहितं भवति। नापि पर्यायो द्रव्यं विना। द्रव्यं नित्यं, पर्यायोऽनित्यः। अत उभयोरैक्यात्मकं वस्तु नित्यानित्यात्मकम्। केचिद् वदन्ति प्रदीपः क्षणिकः, आकाशञ्च नित्यम्। किन्तु जैना वदन्ति—अपदोपमाव्योम समस्वभावं स्याद्वादमुद्रानतिभेदि वस्तु॥ इति अनेकान्तवादस्यैव फलितार्थौ सप्तभङ्गीवाद-नयवादौ स्तः। अनेकान्तवादे सर्वेषामेकान्तवाददर्शनानां समन्वयः क्रियते। एकान्तानां समूह एवाऽनेकान्तः। यद्यैकान्तो न स्यात्तदा सप्तसमूहात्मकस्य अनेकान्तवादस्याप्य-

भावः स्यात्। अस्मिन्ननेकान्तवादेऽन्यैर्दार्शनिकैर्ये दोषा विरोध-वैयधिकरण-सङ्कर-व्यतिकारादय आपादिताः, जैनदार्शनिकैः तेषां परिहारो विस्तरेण कृतः। "सूत्रकारबादरायणेनोक्तं नैकस्मिन्नसम्भवात्, आचार्यशङ्करेणापि स्वकीयभाष्ये तद् विस्तारितम्। बौद्धदार्शनिकैरपि धर्मकीर्तिशान्तरक्षितप्रभृतिभिस्तत्समीक्षाः कृताः। अकलङ्क-विद्यानन्दादिभिर्जैनदार्शनिकैस्तत्परिहारः कृतः। एतत् सर्वं दर्शनरसिकैः सावधानतयाऽध्येतव्यम्।

जैनदर्शने न केवलं वस्तुसिद्धिरनेकान्तद्वारेण क्रियते, जैनवैयाकरणैः शब्दसिद्धिरपि अनेकान्तरूपेण कृता। पाणिनिव्याकरणे रामशब्दस्य बहुवचनरूपसिद्धौ 'रामश्च रामश्च रामश्च' इति त्रयो रामशब्दाः संख्यया। तेषु च द्वयोर्लोपं कृत्वा तदनन्तरं रामा इति रूपम् किन्तु जैनवैयाकरणाः कथयन्ति एकस्मिन् रामशब्दे एकस्य द्वयोर्बहूनाञ्च रामाणां कथने योग्यताऽस्ति। यादृशः प्रत्ययः प्रयुज्यते तादृश एव अर्थबोधो भवति। इति जैनेन्द्रव्याकरणमनेकशेषमित्युच्यते।

इत्येवं संस्कृतसाहित्यं जैनाचार्यैः स्वकीयैः शास्त्रसन्दर्भैः सम्पोषितं सम्पूरितञ्च।

विभावना-विवेकः

पं० रघुनाथप्रसादश्चतुर्वेदः *

निबन्धेऽस्मिन् विभावनालङ्कारविषये किञ्चित् प्रास्तविकं प्रस्तूयते। अमुमलङ्कारमधिकृत्य संस्कृतसाहित्य-शास्त्रस्य मूर्धन्यान् ग्रन्थान् विलोकयता यदवगतं निश्चितं च तदेतदेव, यद् वस्तुनो भेदोपभेदानामाधिक्यं दधतामनेकालङ्काराणां ते भेदा विभिन्नानेकालङ्कारसङ्कीर्णतया प्रायः शिथिला एव सन्ति। अनेकालङ्काराणां प्रतीतिस्थले एकस्मिन् पद्ये गद्यांशे वा प्रतीयमानानामनेकालङ्काराणां मध्यादेकतरस्य निर्णयस्तत्साधकबाधकप्रमाणेष्वाधारितम्। एकस्य साधकेनापरस्य बाधकेन च विनाऽऽगततो भासमानेष्वलङ्कारेष्वेकतरस्य निर्णयो नहि कर्तुं शक्यते। एवंविधे संकीर्णस्थले बहवोऽलङ्कारास्तिलतण्डुलन्यायेन परस्परं संसृज्यापि पार्थक्येन भासमानाः प्रतीयन्ते चेत् तदा तत्र संसृष्टिनामालंकारो भवति, यदा च ते नीरक्षीरन्यायेनानया रीत्यैकीभूताः परस्परं मिश्रिताश्च यत्तेष्वेकतरस्य पार्थक्येन प्रतीतिरेव न जायते, तदा तत्र कस्याप्येकतरस्य सत्तामनिर्णेय संकरालंकारस्यैव प्राधान्यं कथयितुं शक्यते।

वस्तुतोऽलंकाराणां जीवनं तेषामपूर्वचमत्कृतावाधारितम्। अलंकाराणां भेदोपभेदेषु तदुदाहरणेषु च साहित्य-शास्त्रस्य मर्मज्ञा विपश्चितस्तद्विषयाभिज्ञाः सहृदयाः सामाजिकाश्च कस्याप्यपूर्वचमत्कारस्यास्वादं नैव कुर्वन्ति यदि तदा तस्यालंकारस्य ते बहुविधा भेदप्रभेदाः प्रायशोऽनुपयुक्ता असंगताश्च।

कुवलयानन्दकारैः श्रीमदप्पदीक्षितमहोदयैर्विलिखितान्यालंकारभेदप्रभेदानामिव विभावनालंकारस्यापि ये षट्भेदास्तैर्विलिखितास्तेऽपि स्वशिथिलतया चमत्कारशून्यतया च स्वकीये एकस्मिन्नेव भेदे समाविशन्ति। संस्कृतसाहित्यशास्त्रस्य मूर्धन्येन विदुषा पण्डितराजजगन्नाथमहोदयेनाप्येतदेव स्वीकृतं लिखितमपि।

अस्मिन् विषये श्रीपण्डितराजमहोदयैः स्वीये 'रसगंगाधर'ग्रन्थे विभावनालंकारविवेचनावसरे विलिखितम् यत् 'एवं चास्मिन्नलंकारे सर्वत्रापि कार्यांशे अभेदाध्यवसानरूपाति-

* दशभुजीगणेश, मथुरा।

शयोक्तिरनुप्राणकतया 'स्थिता'। श्रीपण्डितराजमहोदयस्यैतत्कथनानुसारं विभावनालंकारे सर्वत्रैव न केवलं तस्याः कार्यांशे एव नापि कारणांशेऽकारणांशे वा भेदाध्यवसानरूपातिशयोक्तिरनुप्राणकतया तिष्ठति। तिष्ठतु नाम सा तस्य तावत्यंशे, विभावनायाः केवलं कार्यांशे एवाभेदाध्यवसानमूलायाश्चातिशयोक्तेरवस्थानं ममाप्यभीष्टं परं तावदेव यावद् विभावनालंकारस्याभेदाध्यवसानरूपातिशयोक्तिकृतानुप्राणकतया सर्वथाशून्यं तत्कृतसंकीर्णतया नितान्तं विविक्तं विशुद्धं चोदाहरणं नैव दृग्गोचरतां याति। यदा च विभावनालंकारस्य केवलं कार्यांशे एवाभेदाध्यवसानमूलातिशयोक्तेः स्थितिः श्रीपण्डितराजजगन्नाथसदृशैः साहित्यशास्त्रस्य मूर्धन्यैरपि विपश्चिद्वर्यैः स्वीकृता तदा येषां पद्यानां कार्य-कारणरूपे उभयांशे तेषां सर्वांशे वाऽभेदाध्यवसानरूपातिशयोक्तिर्व्याप्ता, लक्षणानुसारं तत्र विद्यमानां तां रूपकातिशयोक्तिमनादृत्य विभावनालंकारप्रतिपादनस्यौचित्यं लेशमात्रमपि न प्रतिभाति। अतः श्रीपण्डितराजमहोदयस्य कथनानुसारं—

'शंखाद् वीणानिनादोऽयमुदेति महदद्भुतम्।'

'तिलपुष्पात् समायाति वायुश्चन्दनसौरभः।
इन्दीवरयुगाच्चित्रं निःसरन्ति शिलीमुखाः॥'

इत्यादिपद्ये विशुद्धरूपकातिशयोक्तेरुदाहरणे एव न तु श्रीमदप्पय्यदीक्षितमहोदयानां चतुर्थविभावनायाः यतोऽनयोः पद्ययोः कार्यकारणात्मके उभयांशे तयोः सर्वांशे वाभेदाध्यवसानं नितरां स्पष्टमेव प्रतिभाति। ततश्च 'एवञ्चास्मिन्' इत्यादिना विभावनायाः केवलं कार्यांशे एवाभेदाध्यवसानमूलाया अतिशयोक्तेः प्रतिपादनस्याव्यवहितोत्तरमेवैकस्मिन् स्वकीये एव विभावनालंकारस्योदाहरणे यदैतेऽध्यवसानमूलाया अतिशयोक्तेः साक्षात्कारं नैव कुर्वन्ति तदा ते तत्कालमेव पुनः कथयन्ति यत्—

"अथातिशयोक्तिर्न सर्वस्यां विभावनायामनुप्राणिका किन्तु क्वचित्–निरुपादानसंभारमभितावेव तन्वते। जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने॥ इत्यत्र विभावनायामतिशयोक्तेरध्यवसानमूलाया अननुप्राणकत्वात्।" इति

श्रीपण्डितराजस्यैतत्कथनानुसारं विभावनायां सर्वदैवाभेदाध्यवसानमूलाया अतिशयोक्तेरनुप्राणकता नैव विद्यते सातिशयोक्तिः पुनर्यत्र कुत्राप्येव तदनुप्राणकतया तिष्ठति यतस्तैरुदाहृते विभावनालंकारस्यास्मिन्निरुपादानसंभारमित्याद्युदाहरणे सा तदनुप्राणिका नैवास्ति। अतोऽभेदाध्यवसानरूपातिशयोक्तेरुपजीवकतया सर्वथा शून्यं विभावनालंकारस्येदमुदाहरणमवलोक्य ते नितान्तं स्पष्टैरेवाक्षरैः पुनः कथयन्ति यत्—

'निरुपादानसंभार'मित्यत्र निष्प्रत्यूहैव विभावना भवत्यतिशयोक्त्यनुप्राणतत्व-व्यभिचारः। एतेन विभावनायां सर्वत्रातिशयोक्तिरनुप्राणिका इति सर्वस्वकारोक्तिरपास्ता।

अनया रीत्या श्रीपण्डितराजमहोदयैरुपर्युद्धृतासु स्वरसगंगाधरपंक्तिषु सर्वत्रैवातिशयोक्तेरनुप्राणकतां स्वीकुर्वतां सर्वस्वकाराणामपि कथनमवास्तमेव। ततः श्रीपण्डितराजमहोदयैरेव यदा विभावनालंकारस्योदाहरणत्वेन विन्यस्ते स्वीये निरुपादानसंभारमिति पद्येऽतिशयोक्तिस्थले 'जगच्चित्रम्' इत्यंशे रूपककृता विभावनालंकारस्यानुप्राणकता दृष्टा ततस्तैः पुनरपि निगदितं यत्—

'मास्म भूत् सर्वत्र विभावनायामतिशयोक्तिरनुप्राणिका आहार्याभेदबुद्धिमात्रमेवानुप्राणकम् तच्च क्वचिदतिशयोक्त्या क्वचिच्च रूपकेण इति न दोषः।'

अनेन कथनेन श्रीपण्डितराजमहोदयैः पूर्वं प्रतिपादितायां विभावनायां सर्वत्रैवाभेदाध्यवसानरूपातिशयोक्तेरनुप्राणकतां निराकृत्याहार्यभेदबुद्धिमात्रस्यैवानुप्राणकता क्वचिदतिशयोक्त्या क्वचिच्च रूपकेण स्वीकृता। एषामेतत्कथनस्यैषोऽभिप्रायो विद्यते यद् विभावनालंकारेऽनयोरलंकारयोर्मध्याद्यस्य कस्याप्येकतरस्यैवानुप्राणकता तिष्ठति। सापि केवलं तस्याः कार्यांशे एवेति तैः पूर्वमेव प्रतिपादितम्, यदा चैवं विभावनायामभेदाध्यवसानरूपातिशयोक्ते रूपकस्य च क्वाचित्कीमनुप्राणकतां विना नितान्तं विशुद्धविभावनायास्ते स्थितिमेव नैव वदन्ति तदैतत् कथं कथयितुं शक्यते यद् विभावनालंकारस्योदाहरणान्यनयोरनुप्राणकतामुपजीवकतां च विना नितरां विशुद्धान्यपि सन्ति। श्रीपण्डितराजस्य कथनानुसारमपि यत्र क्वचिदतिशयोक्तिः क्वचिद् रूपकं विभावनायामनुप्राणकत्वेन तिष्ठत एव।

अस्मिन् विषये मयैतन्निवेद्यते यद् विभावनालंकारस्यानेकान्युदाहरणान्यतिशयोक्तिरूपककृतानुप्राणकतया सर्वथा रहितानि नितरां विशुद्धान्यपि सन्ति। विभावनायाश्चतुर्थविभावनायाश्चोदाहरणेषु यत्र प्रतीयमानमभेदाध्यवसानरूपातिशयोक्ते रूपकस्य चास्तित्वं केवलं तस्य कार्यांशे एवास्ति न तु सर्वांशे, परं श्रीमदप्पय्यदीक्षितमहोदयाः कार्यकारणयोरुभयांशे पद्यानां सर्वांशे वाभेदाध्यवसानवन्ति रूपकातिशयोक्तेर्नितिरां स्पष्टान्युदाहरणानि विभावनायाश्चतुर्थविभावनायाश्चोदाहरणेषु च सन्ति। तेषां च सर्वाधिकं वैशिष्ट्यं वैचित्र्यं चैतदेवावलोक्यते यत्ते रूपकातिशयोक्तेर्वर्णनावसरे—"पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति सिताः शराः" इति पद्यांशं पूर्वं रूपकातिशयोक्तेरुदाहरणतया न्यस्यन्ति अनन्तरं विभावनायाश्चतुर्थविभावनायाश्च वर्णनावसरे—

तिलपुष्पात् समायाति वायुश्चन्दनसौरभः ।
इन्द्रीवरयुगाच्चित्रं निःसरन्ति शिलीमुखाः ॥

इत्यादि केवलं पर्यायवाचकैरेव शब्दैर्यत् किंचित् परिवर्तितं तदेव पद्यं विभावनायाश्च—तुर्थविभावनायाश्चोदाहरणत्वेनोपस्थापयन्ति, न जाने तेषां सा कीदृशी दृष्टिरस्ति यस्यां भिन्न-भिन्नस्थलेषु न्यस्त एक एव पदार्थो विभिन्नरूपेण भासते ।

विभावनायां रूपकक्रतानुप्राणकतायाश्चोदाहरणं पण्डितराजजगन्नाथस्य "निरुपादान-संभारम्" इति पद्यं सुयोग्यविदुषां सहृदयसामाजिकानां पुरस्तादेव विद्यते । इदानीं तस्य केवलं कार्यांशे एवाभेदाध्यवसानं विदधत्या अभेदाध्यावसानरूपातिशयोक्तेरनुप्राणकताया उदाहरणमधो न्यस्यते तदपि विद्वद्भिरवलोकनीयम् ।

विनैव शस्त्रं हृदयानि यूनां विवेकभाजामपि दारयन्त्यः ।
अनन्तमायामयवल्गुलीला जयन्ति नीलाब्जदलायिताक्ष्यः ॥

अस्मिन् पद्ये दारयन्त्यःपदस्य मुख्योऽर्थो विदारणं द्वैधीभावसम्पादनं च तस्य गौणे प्रासङ्गिके वा कामादिजनितपीडाविशेषरूपेऽर्थेऽध्यवसीयते । एतदभेदाध्यवसानं दारणरूपे केवलं तस्य कार्यांश एव विद्यते, न तु कार्यकारणयोरुभयांशे, नापि पद्यस्य सर्वांशे वा । अत एतत् पद्यं केवलं कार्यांशे एवाभेदाध्यवसानं दधत अतिशयोक्त्यनुप्राणितस्य विभावनालंकारस्य चतुर्थविभावनायाश्च सुस्पष्टमुदाहरणं विद्यते ।

इदानीं स्वमतानुसारमभेदाध्यवसानरूपातिशयोक्ते रूपकस्य चानुप्राणकतया सर्वथा शून्यानि नितान्तं विविक्तानि विशुद्धानि च विभावनायाश्चतुर्थविभावनायाश्चोदाहरणानि न्यस्यन्ते तानि चावलोकनीयानि ।

'पश्य लाक्षारसासिक्तं रक्तं तच्चरणद्वयम् ।' पद्यांशमेतदभेदाध्यवसानरूपातिशयोक्ते रूपकस्य चानुप्राणकतया सर्वथा शून्यं विभावनायाश्चतुर्थविभावनायाश्च सुस्पष्टमुदाहरणम्, यतोऽस्मिन् पद्ये नायिकायाश्चरणयुगलं रक्ततासंचारकेण लाक्षारसेनासिक्तमपि रक्तं यतोऽस्य पद्यस्य कस्मिन्नप्यंशेऽभेदाध्यवसानरूपातिशयोक्ते रूपकस्य चानुप्राणकता नैव दृश्यते, अत एवैतत् पद्यं विशुद्धविभावनायाश्चतुर्थविभावनायाश्चोदाहरण मेव ।

अनायासकृशं मध्यमशङ्कतरले दृशौ ।
अभूषणमनोहारि वपुर्भाति मृगीदृशः ॥

कुरङ्गाक्ष्या मध्यभागं विनैव परिश्रमेण कृशं, नेत्रयुगलं विनैव शङ्कया चपलं, तथैव शरीरं विनाप्याभूषणैर्मनोहरमतोऽत्राभेदाध्यवसानरूपातिशयोक्ते रूपकालंकारस्य चानु-

प्राणकताया लेशमात्रमपि नास्ति, तथा च विनैव कारणेनाकारणेन वा कार्योत्पत्तौ विभावनायाश्चतुर्थविभावनायाश्च विशुद्धोदाहरणमेवैतत् पद्यम् ।

'शीतांशुकिरणास्तन्वि हन्त सन्तापयन्ति ताम्' अस्मिन् पद्यांशे चन्द्रमसः शैत्यसंचारकाः कराः स्वशैत्यमप्रदाय वियोगिनीं नायिकां सन्तापयन्ति, अत एतदपि पद्यं विनैव कारणेनाकारणेन वा कार्यस्योत्पत्त्या विभावनायाश्चतुर्थविभावनायाश्चानुप्राणकतया सर्वथा शून्यं पूर्णशुद्धमेव तस्या उदाहरणम् ।

इत्थं च विभावनायाश्चतुर्थविभावनायाश्चाभेदाध्यवसानमूलातिशयोक्तिरूपककृतानुप्राणकतया सर्वथा शून्यानि नितान्तं विविक्तानि पूर्णरूपेण विशुद्धानि चोदाहरणानि यदा प्रचुरपरिमाणे सन्ति तदा रूपकातिशयोक्तेर्विशुद्धोदाहरणयोः 'शंखाद् वीणानिनादोऽयमुदेति महदद्भुतम्', 'तिलपुष्पात् समायाति वायुश्चन्दनसौरभः ।' इन्दीवरयुगाच्चित्रं निःसरन्ति शिलीमुखाः ॥' अनयोः पद्ययोः विभावनायाश्चतुर्थविभावनायाश्चोदाहरणतया स्वीकरणं तत्र तयोर्विन्यसनं च नितान्तमसङ्गतमनुपयुक्तञ्चैव प्रतीयते ।

यदि श्रीपण्डितराजमहोदयानां सरणिमनुसृत्य विभावनालङ्कारेऽनुप्राणकतयाऽभेदाध्यवसानं स्वीकृत्य यथावसरमतिशयोक्तिरूपकाभ्यामन्यतरस्यास्तित्वमनिवार्यरूपेणैव स्वीक्रियते तदानयोरलंकारयोर्विषयं विभज्य कार्य-कारणयोरुभयांशे पद्यानां सर्वांशे वाभेदाध्यवसानवत्सूदाहरणेषु रूपकातिशयोक्तेः केवलं कार्यांश-मात्रेऽभेदाध्यवसानवत्सु चोदाहरणेषु विभावनालंकारस्य स्वीकरणमेवास्या विषमसमस्याया एकमात्रं सर्वसुगमं श्रेयस्करं च समाधानमिति प्रढीयान् मे विश्वासः ।

काव्यत्वमधुनैव संशीत्यविषयः

•

डॉ० रेवाप्रसादो द्विवेदी *

•

परमार्थसुधाया २:३ अंके 'अपि नाम काव्यत्वमधुनापि संशीतिविषयमिति अशुद्ध-शीर्षकं श्रीविश्वनाथमिश्रलेखं दृष्ट्वा विस्मित-क्षुभितोऽस्मि। मार्च-मासे बीकानेरमुपेयुषा दृष्ट-शार्दूलसंस्कृतविद्यापीठेन मया तत्रैव मध्येसभं प्रदत्त-तत्सर्व-प्रश्नोत्तरेण मदीयायाः काव्यालंकारकारिकायाः कारिकामात्रांशोऽध्येतुमुपचच्छन्दितः श्रीमते मिश्राय। अथ विस्मितोऽस्मि तानेव प्रश्नानादाय निबन्ध एष रचितः, न चानुशीलितः सवृत्तिको मम संपूर्णः कारिकाग्रन्थो निबन्धकृता इति क्षुभितोऽस्मि यत् संपूर्णेऽपि निबन्धे मम, कारिकाया वा मदीयाया नाम निबन्धकृतानेन सशपथं न गृहीतम्। नायमाधुनिकानां समयस्तत्त्वार्थपरिशीलनायाम्। अष्टभिः श्लोकैः श्रीमन्तं विश्वनाथमिश्रममुं स्पष्टं धिक्कृत्य सांप्रतं तस्य संतोषाय भूयोऽप्युत्तरेणात्मानं खेदयामः।

१. कविः शब्दमेव करोति नार्थमिति प्रतीपं वचः। रूपकादिषु मुखादिषु चन्द्रादीनां [न तु चन्द्रत्वादीनाम्] आरोपः अर्थ-रूप एव। अयं च प्रौढोक्तिसिद्ध इति कविनैव कृतः। शब्दश्च स्फोटात्मा नित्यश्चेति समयमुररीकृतवतः शाब्दिकस्य मते प्रत्युत अनुत्पाद्य एव, नित्यत्वोपाद्यत्वयोर्विप्रतिषिद्धत्वात्। 'शब्दस्य ब्रह्माभिन्नत्वमि'ति समयमभ्युपेयुषां पुनर्भूयोऽप्यसौ नोत्पाद्य एव, ब्रह्मण उत्पाद्यत्वस्य सर्वदर्शनप्रतिषिद्धत्वात्। नादात्मन उपाधेरुत्पत्ति-विनाशाभ्यामुपचर्येते तावेतस्मिन्निति कल्पे मूलक्षयः, नादस्यानित्यत्वात् तृतीयक्षणनिष्ठ-ध्वंसप्रतियोगित्वाच्च समुदायानापत्तेः, समुदायप्रसिद्ध्यर्थमेव च दर्शनान्तरानभ्युपेतस्यापि स्फोटात्मनो नित्यस्य शब्दस्य शाब्दिकेष्वभ्युपगतेः। शब्दान् योजयतीति विवक्षायां पुनः पृच्छामः शब्दब्रह्मण एकत्वे कीदृशी योजना, बैखर्युपाधिभेदेन बहुत्वे पुनर्बैखरीणामेव योजना पारिशेष्यसिद्धा। न च प्रतिपक्षो बैखर्यां शब्दत्वं पश्यतीत्युभयतःपाशा रज्जुः। अयं पुनर्गण्ड-स्योपरि पिटको यच्छब्दस्य स्फोटात्मकत्वे भगवतः पतञ्जलेर्विरोधः। भगवानेष शब्दे उच्चारणकर्मत्वं कण्ठरवेणैवोदाहरति 'येनोच्चारितेन सास्नाविषाणे'त्यादिनोपन्यासेन

* आचार्योऽध्यक्षश्च साहित्यविभागस्य काशीहिन्दुविश्वविद्यालयान्तर्गत-संस्कृत-महा-विद्यालयस्य।

मिश्रोद्धृतेन। उच्चारणं हि कण्ठताल्वादिजन्यनादानुकूलो व्यापारः। तत्कर्मत्वं बैखरीशब्द एव न तु शपथेन विज्ञाप्यमाने स्फोटे। उच्चारणं हि स्फोटस्य व्यञ्जकम्, न तु स्फोट उच्चारणस्य कर्म। उच्चारणपदस्यामुख्यत्वपक्षः पुनरशक्त्या पटस्यैव खड्गत्वेन परिभाषणम्। यदि च बैखरी न शब्दः, तर्हि कथं तत्र शब्दत्वनिरासप्रयासरभसः। न ह्यनग्नित्वमद्भ्यो निरस्यन्तो दृश्यन्ते प्रेक्षावन्तः। सिद्धमेतेन व्यवहारतो वैखर्यामेव शब्दत्वमिति। अतएव युक्तभाषी भगवान् गोनर्दीयः 'शब्दकार्ययं माणवकः, मा शब्दं कार्षीः' इति व्यवहारेणैव शब्द-शब्दं प्रत्यभिज्ञापयिष्यन्। अनित्यत्वमात्रमवेक्ष्य मार्गान्तरानवबोधेनार्थज्ञानाय वैखर्याः शब्द-त्वात् प्रच्यावनं नाम शृंङ्गं वीक्ष्य भिया गवि अगोत्वस्य प्रलाप एव। 'पदं श्रुतमर्थो न ज्ञात' इति व्यवहारे च श्रावणप्रत्यक्षं ज्ञानमेव। पदं श्रुतमिति वाक्यं 'श्रावणप्रत्यक्षविषयीभूतं पदम्' 'पदस्य श्रावणं प्रत्यक्षमि'ति च प्रतिपादयति। एवं च ज्ञानं विना अकिंचित्करमेव पदमर्थावि-बोधने। ततश्च को न्वपराधोऽस्माकं पदज्ञानस्यार्थज्ञानेन सम्बन्धमुदीरयतां स्वीकुर्वतां च ज्ञान-योरेवानयोः संबंधात्मकं शक्त्यपरपर्यायं ज्ञानम्--'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीरि'ति नास्ति चायमस्माकमपूर्व उपन्यासः। मध्ये संकेतग्रहं नौकीकृत्य प्रवर्तमानैः प्रातीपिकैरकामे-नाप्युपेत एव च 'शब्दज्ञानादर्थज्ञानमुत्पद्यते, न तु शब्दादर्थ' इति विज्ञान-शुद्धः पक्षः। अयमेव च संकेतो यद् अस्मात् पदादयमर्थो बोद्धव्यः, एतत् पदमेतदर्थबोधकं भवतु, असावर्थ एतदर्थ-बोध्य इति। एतस्य च संकेतस्य ग्रहो नाम बौद्धो ग्रन्थिः, ज्ञानमेव वा। एवं चाज्ञातेनार्थेन सहाज्ञातस्य पदस्य संकेतग्रहाभावस्तादृश-पदार्थज्ञान-युग्म-मात्र-सम्बन्धे पर्यवसाययति। ज्ञातस्य लिङ्गस्य हेतुतामुदस्य लिङ्गज्ञानं हेतुतया साधयद्भिर्नव्यैरपि क्षुण्णचर एवैष पन्थाः।

२. चमत्कृतावर्थस्येव शब्दस्य नान्तरीयकत्वमादाय शब्दे काव्यभाववाचोयुक्तिरप्य-युक्तिसहा न ह्युदन्योपशमे नान्तरीयकत्वमादाय शक्योत्प्रेक्षं पात्रस्य जलत्वम्।

३. लिपेः शब्दत्वमिव शब्दस्य काव्यत्वमूरीक्रियते चेत् स्वैरमूरीक्रियतां तर्हि दर्पण-स्यापि मुखादिबिम्बरूपत्वम्, न्यायसाम्यात्। अथ केयमत्रभवतां राभसी यदेकत्र लिपेः शब्द-त्वमपरत्र च स्फोटाभिव्यंजक-वैखरी-व्यंजकत्वमुदीर्यते भवता।

४. अनुवादेषु ध्वनयो जननान्तरेषु काया इव भिद्यन्ते तिष्ठति चैकरूपमेव काव्य-मात्मतत्त्वमिव तत्र सर्वत्रेति जाग्रत्यप्यनुभवे न्यक्क्रियते चेद् 'येषु निवर्तमानेषु यदनुवर्तत' इति न्यायस्तर्हि कायस्यात्मत्वेनांगीकारे का नु हानिः, को च भेदश्चार्वाकेभ्यो वेदान्तसिद्धान्तिनामत्र-भवताम्। कायमन्तरा आत्मन इव शब्दमन्तरा काव्यस्य प्रतीतिर्न संभवतीति या विवशता ततो न क्षमम् अस्मिभो विशुद्धमात्मदर्शनं विपर्यासयितुम्।

५. मध्यमायाः संविदेकरूपतामूरीकृतवतामस्माकं नास्त्येव कलहः शब्दस्य स्फोटात्मकतामूरीकृतवता उच्यते हि भवता 'मध्यमाया नादांशः स्फोट' इति। अत्र षष्ठ्यर्थः 'राहोः शिर' इत्यत्रेव नाभेदः। भेदे च भेदको जिज्ञास्येत, स च नान्यः, ऋते संविद्भावम्। अत्र यदधिकं वक्तव्यं तदपि वितत्य प्रपंचितमेव काव्यालंकारकारिकावृत्तौ। अत एव जयन्तभट्टोऽपि मध्यमादीनां शब्दत्ववादे खड्गहस्त एव।

६. मध्यमायाः प्रत्यक्षे प्रमाणमुपांशुशब्दप्रयोगः सूक्ष्मतरवाय्वाद्यभिघातो वेति भवतां यो वेणुनादः तत्र प्राणवाय्वापत्तिर्नागेशकृतेति न न विद्मः। नागेशस्य तदेतत् सर्वं दर्शनमुद्धृत्य दर्शितमस्माभिः कारिकावृत्तौ। उपांशुत्वं नाम वैखर्या एव धर्मः, तार-मध्य-मन्दादिस्वरभेदाश्रित इति।

७. 'मानवो भाषाप्रयोगे स्वतन्त्र' इत्यस्य कोऽर्थः, कल्पितत्वं विहाय भाषायाः। कल्पना च बुद्धिव्यापारश्चेत्यनर्थान्तरमेव। एवं च स्थित एवास्माकं सूर्यदृष्टान्त-सूर्यस्तथाविध एव।

८. रसस्याभिव्यञ्जकत्वसम्बन्धेनापि काव्यनिष्ठत्वाभ्युपगमो नाम प्रातिवेशिकत्वसम्बन्धेन देवदत्तस्य यज्ञदत्त-गृहस्वामित्वम्, दर्पणस्य मुखनिष्ठत्वम्, संसारस्य वा सूर्यनिष्ठत्वम्। सेयं कालिकादि-सम्बन्ध-कल्पना-प्रजल्पन-पाटवभृतां यादृच्छिकी सृष्टिः, न तु प्रामाणिकत्वं तत्रेति नाधिकं ब्रूमहे।

'सम्भूति'शब्दे कश्चन विचारः

डॉ० शिवनारायणशास्त्री *

सम्भूतिं च विनाशं च यस्तद् वेदोभयं सह।
विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥ १ ॥

'सम्भवनं=सम्भूतिः, तस्या अन्या असम्भूतिः प्रकृतिः कारणमविद्याऽव्याकृताख्या'[२] इति व्याख्यया श्रीशङ्कराचार्यैः 'सम्भूति'-शब्दः कार्य-ब्रह्मणि,[३] 'असम्भूति'-शब्दश्च कारण-ब्रह्मणि गृहीतः। प्रकृते मन्त्रे च 'विनाशो धर्मो यस्य कार्यस्य' इति व्याख्यया 'विनाश'-शब्दः कार्य-ब्रह्मणि गृहीतः। 'विनाश'-शब्देन कार्य-ब्रह्मणि गृहीते पुनः कार्य-ब्रह्म-वाचकस्य 'सम्भूति' -शब्दस्य ग्रहणे पौनरुक्त्यापत्तेस्तन्निराकरणायाचार्य-पादैरत्र 'सम्भूति'-शब्दयोः स्थान उभयत्र 'असम्भूति'-शब्दस्य ग्रहणमकार-लोपेनाभिप्रेतम्। तथा चाचार्या आहुः 'सम्भूतिं च विनाशं च' इत्यत्रावर्ण-लोपेन निर्देशो द्रष्टव्यः प्रकृति-लय-फल-श्रुत्यनुरोधात्' इति।

आचार्याणामिदं व्याख्यानं न विचार-सहम्। तथाहि—

(१) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय-इव ते तमो य उ विद्यायां रताः ॥' (ईशोपनिषद् ९) इत्यत आरभ्येमं मन्त्रं यावद् दधीच आथर्वणस्य शैल्या अध्ययनेन ज्ञायतेऽस्य प्रकरणस्य षण्णां मन्त्राणां द्वयोस्त्रिकयोः प्रथमयोर्द्वयोर्मन्त्रयोरविद्यायामसम्भूत्यां च, विद्यायां सम्भूत्यां च क्रम-साम्य-सूचितं किंचिदस्ति साम्यम् इति। उभयोरपि त्रिकयोः फल-कथनयोरपि तुलनयेदमायाति मृत्योस्तरणमृषिरविद्यया च विनाशेन च मनुतेऽमृतत्व-प्राप्तिं च विद्यया च सम्भूत्या चेति। अत एषां षण्णां मन्त्राणां प्रयोगशैल्या अयमेव निष्कर्षो यदत्रर्षिः अविद्यासम्भूत्यसम्भवान्, विद्या-सम्भूति-सम्भवांश्च समानान् मनुते। प्रकृतस्य चतुर्दशस्य मन्त्रस्य 'विनाश'-शब्दश्च पूर्व-मन्त्राणामसम्भूत्यसम्भवयोः सम-स्थान इति च। अत ऋषेरेक-वाक्यत्वायात्र 'सम्भूति'-'सम्भव'-शब्दाभ्यां प्रकृतेर्ग्रहणमुचितम् न तु कार्यस्य 'असम्भूति'-

* ई ४/२५, माडल टाउन, दिल्ली-९।

१. ईशा-वास्योपनिषत् २४।

२. द्र० ई० १२ मन्त्रे शाङ्कर-भाष्यम्।

३. इदं व्याख्यानं च गौड-पादीयां माण्डक्य-कारिकाम् (३।२५) अनुरुध्येति प्रतीयते।

'विनाश'-शब्दाभ्यां च कार्यस्य ग्रहणमुचितम् । सम्पूर्वो भवतिश्च तत्कार्य-रूपताऽऽपत्तावर्थे, लयेन कारणत्वेनावस्थाने चार्थे वैदिके वाङ्मये समुपलभ्यते । तथा च मन्त्र-वर्णा भवन्ति—

परो दिवा पर एना पृथिव्यैतावती महिना सम्बभूव,[१]
नाम नाम्ना जोहवीति पुरा सूर्यात्, पुरोषसः ।
यदजः प्रथमं सम्बभूव, स ह तत्स्वराज्यमियाम ॥[२]
तद्दाधार पृथिवीं, विश्व-रूपं तत्सम्भूय भवत्येकमेव ॥[३]
स एवं विद्वानस्माच्छरीर-भेदादूर्ध्व उत्क्रम्यामुष्मिन् ।
स्वर्गे लोके सर्वान्कामानाप्त्वा समभवत्, समभवत् ॥[४]
असदेवेदमग्र आसीत् । तत्सदासीत् । तत्समभवत्[५] इति च ।[६]

तेन, तत्तत्कार्यत्वेन सम्भवति इति 'सम्भूति'-शब्दः 'प्रकृति'-शब्देन तुल्यो मन्तुं शक्यः प्रकृति-लय-फल-श्रुतावविरोधाच्च नात्रावर्ण-लोप-कल्पना-क्लेशो न्याय्यः ।

(२) आचार्याणामवर्ण-लोप-व्याख्यानमेतदन्ययाऽप्येकया दृष्ट्या ऋष्यभिप्रायाद् विरुध्यते । तथाहि—संहितायां सर्वत्रापि 'सम्भूति'-शब्दः 'असम्भूति'-शब्दश्चाद्युदात्तौ । चतुर्दशे मन्त्रे यद्यवर्ण-लोप-सन्धिजस्तदा संहितायामनेन पदांशेन सर्वानुदात्तेन भाव्यम् । पृषोदरादित्वेन चेल्लुप्तोऽवर्णः, तर्हि प्रथमयोर्मन्त्रयोर्यदेव वस्तु 'असम्भूति'-शब्देनोक्तम् तदेवास्मिन्मन्त्रे 'सम्भूति' शब्देन कथ्यत इति महत्खलु शैथिल्यमृषेरसामर्थ्यं चाभिव्यज्यते । प्रमाणापुष्टमृषि-शैली-विरुद्धं चेत्यवोचाम । 'पूर्वापर-सन्दर्भानुसारेण वक्तुरभिप्रायस्याभिधा-नियामकत्वात् (सम्भूतिः) प्रकृतिः' इति रामचन्द्रपण्डित-कथनं तु यत्किंचिदेव, निर्दोषायां शब्द-स्वाभाव्याविरोधिन्यां व्याख्यायां सत्यामन्यथा-कल्पनस्य प्रौढि-वाद-मात्रत्वात् ।

(३) 'सम्भूति'-शब्दं पद-पाठे व्याहरन्तः पद-पाठ-कारा अपि शङ्कर-भगवत्पादानां व्याख्यानमपार्थयन्ति । इति शैल्या स्वर-पाठेन च सूचिताद् ऋषेरभिप्रायात्, पदपाठात्, शब्द-स्वाभाव्याच्च विपरीतत्वाद् भगवत्पादानामत्रावर्ण-लोप इति व्याख्यानं नोचितमिति स्पष्टमेव सुधियाम्' ।

---

१. द्रष्टव्या ऋग्वेद-संहिता १०।१२५।८ ।
२. द्र० अथर्ववेद-संहिता १०।७।३१ ।
३. द्र० सैव १०।८।११ ।
४. द्र० ऐतरेयोपनिषद् २।१।५–६ ।
५. द्र० छान्दोग्योपनिषद् ३।१९।१ ।
१. एषां मन्त्राणां साङ्गोपाङ्गायै व्याख्यायै लेखकस्य ईशोपनिषद्-भाष्य-नवाम्बरा इति ग्रन्थो द्रष्टव्यः ।

परमार्थसुधा

पं० बटुकनाथशास्त्री खिस्ते *

नवचिन्तनमन्दरमन्थनतः
सकलागमविस्तरवारिनिधेः ।
समुदित्वरसौरभसारगुणा
प्रमदं तनुते परमार्थसुधा ।। १ ।।

श्रुतिशीलनशोभनतां दधती
पदशास्त्रविवेचनशुद्धगतिः ।
धृतदर्शन - गौरव - गौरयशः-
स्नपिता जयतात् परमार्थसुधा ।। २ ।।

विबुधाधिपनन्दनचन्दनतो
ऽप्यधिका शिशिरीकरणे सुधियाम् ।
अधिकाशि शिवैकपरायणतां
प्रकटीकुरुते परमार्थसुधा ।। ३ ।।

कविलोकविलोकनकौतुकिनी
कमनीयकलक्वणितप्रवणा ।
तरसा जरसा शिथिलानपिन-
स्तरुणीकुरुते परमार्थसुधा ।। ४ ।।

* भूतपूर्वः साहित्यविभागाध्यक्षः-सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य, वाराणसी ।

घनसन्तमसाकुलिते परितो
नयवर्त्मनि धीरगतिं दधताम् ।
प्रभया परिपूरयते नयने
निजया कलया परमार्थसुधा ॥ ५ ॥

सकला वसुधाऽपि न यत्तुलना-
मुपयाति सरत्नकदम्बधना ।
न मुधा कलयामि सुधाशनवाग्
इयमस्ति सखे ! परमार्थसुधा ॥ ६ ॥

परितप्तजनप्रणयप्रवणा
करुणामसृणाचरणानुगुणा ।
शरणीकरणीयतया सुधियां
वृणुते हृदयं परमार्थसुधा ॥ ७ ॥

समये समये नुदती सुमतीन्
नवनिर्मितिपूर्तिकृते सुकृते ।
शरदिन्दुशतं सृजती यशसा
समुदेतु चिरं परमार्थसुधा ॥ ८ ॥

●

औचित्यं रुद्रटश्च

पं० विद्याधरद्विवेदी *

अलङ्कारशास्त्रस्य परम्परायां विविधेषु सम्प्रदायेषु प्रवर्तमानेष्वौचित्य-सम्प्रदायस्यापि नाम सादरं गृह्यते समीक्षकैः। सम्प्रदायस्यास्य यद्यपि प्रवर्तकत्वेनाऽऽचार्यक्षेमेन्द्र एवाङ्गीक्रियते किन्तु वस्तुतो नायमस्य प्रवर्तकोऽपितु व्यवस्थापक एव। यतो ह्यस्मात् प्रागपि भरत-भामह-दण्ड्युद्भट-वामन-रुद्रटाऽऽनन्दवर्धनप्रभृतीनामाचार्याणां ग्रन्थेषु बाहुल्येनौचित्यतत्त्वस्य प्रत्यक्षतः परोक्षतो वा विवेचनमुपलभ्यते। काव्यशास्त्रे तत्त्वस्यास्य विवेचनं कदाप्रभृति समारब्धम्, अथ चैतन्नाम्नो निर्देशः सर्वप्राथम्येन केन खलु व्यधायि, किञ्च क्षेमेन्द्रः कथमिवौचित्यस्य काव्यात्मत्वं स्वीचकारेति विवेचनद्वारेणाऽऽचार्यरुद्रटस्यैतत्सन्दर्भे किं योगदानमित्येवास्माकं विमर्शनस्य विषयः। तत्रादौ क्षेमेन्द्रस्यैव पदैरौचित्यस्वरूपमुपस्थाप्यते—

उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते[1] ॥ इति

अर्थात् 'यत् किल यस्यानुरूपं तदुचितमित्युच्यते, तस्य भावमौचित्यं कथयन्ती'[2] ति। क्षेमेन्द्रानुसारेणौचित्यं रससिद्धस्य काव्यस्य स्थिरमनश्वरं जीवितमस्ति।[3] नैतदेव किन्त्वौचित्य-मुत्कर्षयताऽनेन तस्य रसजीवितत्वमपि स्पष्टमुद्घोषितम्।[4] अत एव 'काव्यस्याङ्गेषु च प्राहुरौचित्यं व्यापि जीवितमि'त्युक्त्वा[5] तेन सप्तविंशतिसङ्ख्याकानां काव्याङ्गानां जीवितत्वे-नौचित्यमेव सविस्तरं प्रत्यपादि।

---

* **शोधच्छात्र :—काशीविद्यापीठस्य संस्कृतविभागे।**

१. औचित्यविचारचर्चायाम् का०–७

२. ,, तत्रैव वृत्तौ।

३. औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्। तत्रैव–५

४. औचित्यस्य चमत्कारकारिणश्चारुचर्वणे।
रसजीवितभूतस्य विचारः क्रियतेऽधुना ॥ तत्रैव–३

५. तत्रैव–१०

अथारम्भत औचित्यविवेचनं परीक्ष्यते—नाट्यशास्त्रप्रणेत्राऽऽचार्यभरतमुनिनाऽभिनय-सम्बद्धं विवेचनं कुर्वाणेनाप्रत्यक्षतो विवेचितमौचित्यम्—

वयोऽनुरूपः प्रथमस्तु वेषो वेषानुरूपश्च गतिप्रचारः ।
गतिप्रचारानुगतञ्च पाठ्यं पाठ्यानुरूपोऽभिनयश्च कार्यः[1] ।। इति ।

अर्थादभिनेतुर्वेष आयुषोऽनुरूपः शारीरिकचेष्टा वेषाऽनुरूपिण्यः, पाठ्यं (संलापः) गति-प्रचाराऽनुसारि तथाऽभिनयः पाठ्यानुरूपो भवेत् । असुश्लिष्टो वेषो ह्यभिनेतुर्नैपुण्यं प्रमाणयति । मेखला कण्ठे धृता सत्युपहासायैव जायते—

अदेशजो हि वेषस्तु न शोभां जनयिष्यति ।
मेखलोरसि वन्धे च हास्यायैवोपजायते[2] ।। इति

एवमेव नाट्यस्य सिद्धत्वं प्रतिपादयताऽनेनौचित्यमाधारीकृत्य प्रोक्तं यत् तदेव नाट्यं सिद्ध्यति यद्धि लोकसिद्धं लोकस्वभावजञ्च भवेत्, तत्प्रयोगे लोकस्यैव प्रामाण्यादिति । तथाहि—

लोकसिद्धं भवेत्सिद्धं नाट्यं लोकस्वभावजम् ।
तस्मान्नाट्यप्रयोगेषु प्रमाणं लोक इष्यते[3] ।। इति ।

वस्तुतो नाट्य एव विशेषेण दत्तदृष्टित्वेन रससम्प्रदायप्रवर्तकत्वेन च मुनिना भरतेनौचित्यं प्रत्यक्षतो विस्तरतश्च न विवेचितम् । अनेनौचित्यशब्दं नोक्त्वाऽपि तन्निर्देशः स्पष्टमेव विहितः । तथाहि—

यादृशो यस्य कर्तव्यो विन्यासो भूमिकास्वथ[4] ।।
अपि च—**या यस्य सदृशी चेष्टा ह्युत्तमाधममध्यमा**[5] । इति

सम्भाव्यते यदिदमेवानुसृत्य क्षेमेन्द्रेणोक्तं यद् 'उचितं प्राहुराचार्याः सदृशं किल यस्य यदि' ति ।

आचार्यभामहो गुण-दोषविवेचनद्वारेणौचित्यमेव परोक्षतो विवेचितवान् । तेनोक्तं यन्न कोऽपि दोषो गुणो वा स्वतो दोषः किं वा गुणो भवति प्रत्युत तत्प्रयोगे एव तयोर्दोषत्वं गुणत्वं वाऽऽश्रितं जायते । प्रयोगकौशलेन कश्चिदपि दोषो गुणत्वमाप्तुमलम् । औचित्यपूर्णेन प्रयोगेणाऽथवा योग्याश्रयप्राप्त्या दोषोऽपि गुणत्वमधिगम्य पुष्पस्रजो मध्ये नीलपत्रमिव प्रकाशते—

१. ना० शा०–१३/६८
२. नाट्यशास्त्रे
३. तत्रैव
४. तत्रैव ३५/१
५. ,, ३५/२६

सन्निवेशविशेषात्तु दुरुक्तमपि शोभते ।
नीलं पलाशमाबद्धमन्तराले स्रजामिव ।।
किञ्चिदाश्रयसौन्दर्याद् धत्ते शोभामसाध्वपि ।
कान्ताविलोचनन्यस्तं मलीमसमिवाञ्जनम्[1] ।। इति ।

भरतेन नाट्यं 'लोकस्वभावजं' प्रोक्तम्, भामहेन महाकाव्यं 'लोकस्वभावयुक्तं' कथितम्—

युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक् । इति

आचार्यदण्डी प्रत्यक्षत एवौचित्यं विमृष्टवान्[2] । गुणदोषयोर्नित्यानित्यत्वे तस्य विशेषेण विवेच्ये आस्ताम् । एतद्विचारेणाऽनित्यदोषाः कौशलपूर्णप्रयोगेण स्वेषां दोषत्वं (विरोधं) विहाय गुणत्वमासादयन्ति तथा रसस्योपयोगिनः सिद्ध्यन्ति । अवस्थाविशेषे दोषा अपि गुणा भवन्ति—

विरोधः सकलोऽप्येष कदाचित् कवि-कौशलात् ।
उत्क्रम्य दोषगणनां गुणवीथीं विगाहते[3] ।। इति

किञ्च व्युत्पन्नबुद्धिः कविर्दण्डिना गुणदोषयोर्विधिर्दर्शितं मार्गमनुसरन् वशवर्तिनीभिर्वाग्भिर्विहितप्रयासो मदिरेक्षणाभिः कृताभिसरणो धन्यो युवेव रमते कीर्तिञ्च लभते[4] इत्युक्तम् । अस्यायमाशयः--कश्चन कविर्यदि स्वकाव्ये दोषाणामेतेषामौचित्यं प्रतिष्ठापयन् ज्ञात्वा प्रयुङ्क्ते तर्हि तत्रैते गुणाः सञ्जायन्ते इति ।

तदेवमवलोकितं यदाचार्या एते न क्वापि स्वविवेचने 'औचित्यशब्दं परामम‍ृशुः, न चौचित्यं सिद्धान्तयाम्बभूवुः प्रत्युत तद्विवेचनमखिलमेव गुणदोषयोरेव गतम् ।

यशोवर्मणो 'रामाभ्युदय'नाटक एव सर्वप्रथममेकस्मिन्ननवद्ये पद्ये औचित्यशब्दस्योपयोगो महत्त्वपूर्णे आवश्यके चार्थे दृश्यते । यशोवर्मणः शब्दोऽयं भोजराजेन 'सन्निवेश-प्राशत्ये'ऽर्थे मन्यते । तच्च काव्यस्य मुख्य-गौणयोरङ्गयोरौचित्यपूर्णाद्, रसानुकूलसंयोगाद् विना नान्यत्किमपि । नाटकेषु किं वा महाकाव्येषु विविधानां तत्त्वानां सम्यक्तरत्वेन सुसंश्लिष्टरूपेण च सन्निवेशो विधेयः--

१. काव्यालङ्कारे १/५४-५५

२. काव्यालङ्कारे—१।२१

३. काव्यादर्शे—३।१७९

४. ,, —१।१०५

औचित्यं वचसां प्रकृत्यनुगतं सर्वत्र पात्रोचिता
पुष्टिः स्वावसरे रसस्य च कथा मार्गे न चातिक्रमः ।
शुद्धिः प्रस्तुतसंविधानकविधौ प्रौढिश्च शब्दार्थयो—
र्विद्वद्भिः परिभाव्यतामवहितैरेतावदेवास्तु नः[१] ।। इति

आचार्योद्भटेनापि यद्यपि औचित्यशब्दस्य प्रयोगो नाक्रियत किन्तूर्जस्विनाम्नोऽलङ्कारस्य लक्षणे प्रयुक्तोऽनौचित्य[२]शब्दः प्रकारान्तरेण प्रमाणयति यत्तस्मिन् युगे किलौचित्यविवेचनमङ्कुरायमाणमासीदिति । वस्तुतोऽनेनौचित्यविवेचनं प्रारभ्यमाणेनाऽनौचित्यमेव व्यवेचि । अत एवोर्जस्विनामालङ्कारस्याधाररूपेणाऽयमनौचित्यमेव सार्थकं मेने । वामनाचार्यस्य गुणदोषाणां व्याख्यानं बहु विशदं तथा प्रकारान्तरेणौचित्यस्यैव सूक्ष्मविवेचनं मन्तुं शक्यते । तदनुसारेण व्याकरणसम्मतत्त्वेऽपि केषाञ्चिच्छब्दानां केषुचिदर्थेषु प्रयोगोऽनुचितः[३] । आचार्यलोल्लटः केषुचन पद्येषु (यानि राजशेखरेण हेमचन्द्रेण च स्व-ग्रन्थयोरुद्धृतानि) परोक्षरूपेणौचित्यं पस्पर्श । एतन्मतेन नदी-तडागोपवन-चन्द्रादीनां वर्णना सरसाऽपि आधिक्येनाप्रासङ्गिकतया च न विधेया—

मज्जन-पुष्पावचयन-सन्ध्या-चन्द्रोदयादिवाक्यमिह ।
सरसमपि नातिबहुलं प्रकृतरसानन्वितं रचयेत्[४] ।। इति ।

आचार्यरुद्रटस्यौचित्यविवेचनम् औचित्यस्येतिहासे द्वितीयं सोपानमस्ति । सर्वप्रथमं यशोवर्मा रामाभ्युदयनाटके औचित्यशब्दं प्रायुनक् । औचित्यविचारस्य प्रथमो विकासस्तद्विवेचने विद्यते । तच्च प्रथमं सोपानं मन्तुं शक्यते । किन्तु काव्यशास्त्रे औचित्यस्य साक्षाद्विवेचनबीजं प्रथमं रुद्रटेनैवोप्तम् । वस्तुतो रुद्रटसमये औचित्यसम्बद्धेयं विवेचना नामाभिधानादृते सहृदयहृदयेषु समुदितैवाऽऽसीत् परन्तु तन्नामाभिधानस्य श्रेयस्तु तस्मा एवोपलब्धम् । आचार्यरुद्रटेन किलाऽऽधारशिला न्यस्ता यदाधारीकृत्याऽऽनन्दवर्धनस्तत्रापि विशेषेण क्षेमेन्द्रश्च विस्तृतं प्रासादमेव रचयामासतुः । उत्तरवर्तिन आचार्या रुद्रटस्यैव पदमनुसृतवन्तः । तन्मतेन रसप्रतिकूलान्यलङ्कारादितत्त्वानि किञ्चिदपि वैशिष्ट्यं नादधति । एतदेवाऽऽनन्दवर्धनेनापि प्रत्यपादि ५ ।

---

१. द्र०–शृङ्गारप्रकाशे—११ पृ०-४६१
२. अनौचित्यप्रवृत्तानां कामक्रोधादिकारणात् ।
भावानाञ्च रसानाञ्च बन्ध ऊर्जस्वि कथ्यते ।। काव्यालङ्कारसार सङ्ग्रहेचतुर्थवर्गः ।
३. द्र०–काव्यालङ्कारसूत्रवृत्तौ ।
४. द्र०–काव्यमीमांसायाम्-नवमेऽध्याये ।
५. द्र०–ध्वन्यालोके द्वितीयोद्योते ।

रसानुकूलाऽलङ्कारयोजनायाः प्रथमः समर्थको रुद्रट एवाऽऽसीत्। शास्त्रीयसमीक्षणेऽपि सर्वप्रथममौचित्यस्य निर्देशकोऽयमेव। तथाह्यनेन छन्दसामपि प्रयोगे उचिताऽनुचितविवेकः परमावश्यकोऽङ्गीकृतः। अत एव छन्दसामौचित्यपूर्णप्रयोगविषये सङ्क्षिप्तः किन्तु प्रबलः पक्षः प्रस्तुतोऽनेन—

छन्दोव्याकरणकलालोकस्थितिपदपदार्थविज्ञानात्।
युक्तायुक्तविवेको व्युत्पत्तिरियं समासेन[1] ॥ इति।

एवमग्रेऽपि वैदर्भी-पाञ्चाल्योः प्रेयसि, करुणे, भयानके तथाऽद्भुते, लाटीयागौडीययो रौद्रे प्रयोगौचित्यं प्रतिपादयता प्रोक्तं यत्—

वैदर्भी- पाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः।
लाटीया-गौडीये रौद्रे कुर्याद् यथौचित्यम्[2] ॥ इति।

नैतदेव, प्रत्युत वृत्तीनां प्रयोगौचित्यमादाय प्रोक्तं यन्मधुरा-प्रौढा-ललिता-भद्रा-परुषाख्यानां पञ्चवृत्तीनां सपरिश्रममध्ययनं विधाय पात्रगताऽभिनयगतयोरौचित्ययोः सविशेषध्यान-पुरस्सरं तयोर्यथार्थरूपेण नातिबहुलो न चात्यल्पः प्रयोगो विधेयः—

एताः प्रयत्नादधिगम्य सम्यगौचित्यमालोच्य तथार्थसंस्थम्।
मिश्रा कवीन्द्रैरघनाल्पदीर्घाः कार्या मुहुश्चैव गृहीतमुक्ताः[3] ॥ इति।

काव्यालङ्कारे स्वग्रन्थे रुद्रटेन तृतीयाऽध्यायेऽलङ्काराणामौचित्यं प्रतिपादितम्। अभिनवोत्साहवत्सु कविषु यमकादिशब्दालङ्काराणां भूयस्त्वेन प्रयोगस्य सुदृढा प्रवृत्तिरुपलभ्यते। एतत्सम्बन्धे रुद्रटः स्पष्टमुद्घोषितवान् यत् सत्कविभिरवहितैः प्रयुक्तान् यमकप्रभृतिशब्दालङ्कारान् सम्यङ् निभाल्यैव तेषामौचित्यपूर्ण एव प्रयोगोऽभीष्यते; यतो हि यमक-श्लेषाद्यलङ्काराणां प्रयोगबाहुल्यात्सरसमपि काव्यं हीयते। अतो ज्ञातव्यं यत्कस्मिन्रसे कदा चैतेषां प्रयोगः साधकः[4] इति। आचार्यलोल्लटोऽप्येतदङ्गीकरोति।

षष्ठेऽध्याये वक्तृ-वस्तुसम्बद्धमौचित्यं रुद्रटेन व्याख्यायि। स हि त्रिविधं वक्तारं प्रत्यपीपदत्—उत्तमं मध्यममधमञ्च। आनन्दवर्धनस्य वक्तृ-विषयसम्बद्धमौचित्यं रुद्रटीयविवेचन-

---

१. काव्यालङ्कारे—१/१८

२. ,, १५/२०

३. तत्रैव २/३२

४. इति यमकमशेषं सम्यगालोचयद्भिः सुकविभिरभियुक्तैर्वस्तु चौचित्यविद्भिः।
सुविहितपदभङ्गं सुप्रसिद्धाभिधानं तदनु विरचनीयं [illegible] ॥ तत्रैव ३/५९

मेवाश्रयति। आचार्यभरतस्य प्रकृति-शीलसम्बद्धमौचित्यमपि नास्माद् भिद्यते। वक्तृपूत्तम-मध्यमाऽधमविवेकेन परस्परसम्बोधनावसरे औचित्यं नितरामवधारणीयं भवति। मुनये तत्र-भवन्, भगवन्, सम्बोधने समुचिते तथा नृपतये ईश-परमेशादि। तथाहि—

यदनुचितं यत्र पदं तत्तत्रैवोपजायते ग्राम्यम्।
तद्वक्तृ-वस्तुविषयं विभिद्यमानं द्विधा भवति[१]॥

अपि च—तत्रभवन् भगवन्निति नार्हत्यधमो गरीयसो वक्तुम्।
भट्टारकेति च पुनर्नैवैतानुत्तमप्रकृतिः[२]॥ इति।

अनेनैव प्रकारेण पशु-पक्षिणां कूजनस्य तथा मेघादेर्ध्वननस्य कृतेऽपि विशिष्टानामेव शब्दानां प्रयोगोऽपेक्षितः[३]। यथा—

मञ्जीरादिषु रणितप्रायान् पक्षिषु च कूजितप्रभृतीन्।
मणितप्रायान् सुरते मेघादिषु गर्जितप्रायान्[४]॥ इति।

रुद्रटेन पुनरुक्तिविषये कथितं यद् यद्यपि पुनरुक्तिर्दोषत्वेन गण्यते किन्तु तस्या दोषत्वं विशिष्टदशायां नश्यति—

वक्ता हर्षभयादिभिराक्षिप्तमनास्तथा स्तुवन्निन्दन्।
यत्पदमसकृद् ब्रूयात् तत्पुनरुक्तं न दोषाय[५]॥ इति

अर्थाद् हर्ष-भयादिभिर्व्याक्षिप्तमनस्के वक्तरि पौनःपुन्येन तैरेव पदैः स्तुवति निन्दति वा तस्मिन् पुनरुक्तिर्नैव दोषाय कल्पते।

सङ्घटनाया (पदानां क्रमरूपायाः) अनौचित्यादपि यदा कदा महाननर्थः समुत्पद्यते। पदानामव्यवस्थितक्रमादपि कदाचिदर्थभ्रमोऽर्थवैपरीत्यं वा सम्भाव्यते। यथा ह्यस्मिञ्छ्लोके—

किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणैनम्।
ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम्[६]॥ इति।

---

१. तत्रैव—६/१७
२. „ ६/१९
३. दृष्ट्वा प्रयुज्यमानानेवम्प्रायांस्तथा प्रयुञ्जीत।
अन्यत्रैतेऽनुचिताः शब्दार्थत्वे समानेऽपि॥ तत्रैव ६/२६
४. तत्रैव—६/२५
५. तत्रैव ६।२९
६. „ ६।४२

पादपतितं कोपं कस्मान्न पश्यसि। एनञ्च कोपं बहुगुणं गृहाण। मनसो हृदयाच्च तमोरूपं हृदयनाथं वल्लभं मुञ्च त्यजेति दुष्टोऽर्थोऽवगम्यते। न चाऽत्र तथा विवक्षितम्, अपितु—कस्मात्पादपतितं हृदयनाथं प्रियं बहुगुणं न पश्यसि। ननु मनसस्तमोरूपं कोपं मुञ्च त्यज। एनञ्च प्रियं कण्ठे गृहाणेत्येवंविधं वाक्यमत्र विवक्षितमस्ति।

एवमेवाग्रेऽपि रुद्रटेनोक्तं यत्कस्यचिदनुकरणे प्रयुक्तानां दुष्ट-क्रमभङ्ग-लुप्तवर्णादीनां दोषाणां प्रयोगोऽपि न दूषितो मन्यते। यथा विकटनितम्बायाः पतिमनुकुर्वाणा काचिदाह—

काले माषं सस्ये मासं वदति शकासं यश्च सकाशम्।
उष्ट्रे लुम्पति रं वा षं वा तस्मै दत्ता विकटनितम्बा॥ इति।

अत्रानुकरणाय प्रयुक्तानि तत्तत्पदानि न दोषावहानि।

औचित्यसम्बद्धमिदं विवेचनमुपसंहरता रुद्रटेनाभ्यधायि यज्जाति-देश-कुल-विद्या-वित्त-वयःस्थान-पात्रेषु व्यवहाराऽऽकारवेष-रचनानां सम्यगनियोजनं हि परममनौचित्यमादधाति[२]। कन्यकानां प्रागल्भ्यं, गणिकानां निर्व्याजमुग्धत्वं, ग्राम्यजनानां वैदग्ध्यं, कुलीनानां धौर्त्यञ्च दोषायैव जायन्ते। स्वस्थस्य प्रलापो दोषः, किन्तून्मत्तादीनां स एव गुणः—

अभिधेयस्यातथ्यं तदनुपपन्नं निकाममुपपन्नम्।
यत्र स्युर्वक्तॄणामुन्मादो मौर्ख्यमुत्कण्ठा[३]॥ इति।

आचार्यानन्दवर्धनोऽलङ्कार-गुण-सङ्घटना[४]-प्रबन्ध-वृत्ति-भाषाणां प्रयोगौचित्यं सम्यक् प्रतिपादयन् क्षेमेन्द्राय द्वारमेवोद्घाटितवानिति तु न विस्मर्तव्यम्। औचित्यसम्बन्धे सर्वाधिकं प्राथम्येनोपवर्णयताऽनेन हि सिद्धान्तितं यद् विभिन्नकाव्यतत्त्वानामौचित्यं तेषां रसानुकूल-प्रयोगे एव सन्निहितो विद्यते। एवञ्चायं काव्यसौन्दर्यविधौ औचित्याय गौरवास्पदं पदं प्रायच्छत्तथाऽनौचित्यं रसभङ्गस्य सर्वप्रमुखं कारणं मेने—

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा[५]॥ इति॥

---

१. अनुकरणभावमविकलमसमर्थादि स्वरूपतो गच्छन्।
न भवति दुष्टमतादृग् विपरीतक्लिष्टवर्णञ्च॥ तत्रैव–६।४७
२. ग्राम्यत्वमनौचित्यं व्यवहाराकारवेषरचनानाम्।
देश-कुल-जाति-विद्या-वित्त-वयःस्थानपात्रेषु॥ तत्रैव–११।९
३. तत्रैव ११।२०
४. ''''तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः। ध्वन्यालोके—३।६
५. तत्रैव वृत्तौ–३।१४

एतदनन्तरं महिमभट्टेन काव्यदोषोऽनौचित्यनाम्ना ख्यापितः । तथाहि—

'[एतस्यानौचित्यस्य] विवक्षित-रसादि-प्रतीतिविघ्न-विधायित्वं नाम सामान्यलक्षण-[१] मि'ति । एतन्मतेन काव्येऽनौचित्यमन्तरङ्ग-बहिरङ्गनामभ्यां द्विविधं भवति । अन्तरङ्गमनौचित्यं रसविषयकं भवति तथा वहिरङ्गमनौचित्यं शब्दविषयकम् । अन्तरङ्गं प्रधानं तथा बहिरङ्गं गौणम् । बहिरङ्गमनौचित्यं विधेयाविमर्श-प्रक्रमभेद-पुनरुक्तता-वाच्यावचनामभिः पञ्चविधं जायते । इत्यादि ।

रामचन्द्र-गुणचन्द्राभ्यां पञ्चसु रसदोषेष्वनौचित्यमप्यन्यतममङ्गीकृतं यल्लक्षणञ्च— सहृदयानां विचिकित्सा-हेतु कर्म अनौचित्यमिति[२] । एतदतिरिक्तमन्यत्रानौचित्यं नामान्तरत्वेनापि प्रख्यापितम्—'अङ्गीग्र्यादयश्च दोषाः परमार्थतोऽनौचित्यान्तःपातिनोऽपि सहृदयानामनौचित्यव्युत्पादनार्थमुदाहरणत्वेनोपात्ताः[३] ।' इति

तदेवमस्माभिरैतिहासिकदृशा निरीक्षितं यदौचित्यशब्दस्य प्रथममभिधानं यशोवर्मणा रामाभ्युदयेऽकारि किन्तु काव्यशास्त्रे साक्षादस्य प्रयोगः प्रथमतो रुद्रटेनैव विहित इति । ततश्चोत्तरवर्तिभिराचार्यैरौचित्यं पूर्णतो गृहीतम् । ध्वनिप्रस्थापनपरमाचार्य आनन्दवर्धनस्तस्य क्षेत्रं विशदयन्नौदासीन्यमालम्बे, औचित्यस्य माहात्म्यं मन्यमानोऽपि काव्यात्मत्वेन ध्वनिमेव प्रतिष्ठापयाम्बभूव । किन्तु क्षेमेन्द्रस्तु प्रागव्यवस्थापितमौचित्यतत्त्वमेव सम्यङ्निभाल्य प्रतिष्ठापयाञ्चकार, व्यवस्थापयामास यदौचित्यमेव रससिद्धस्य काव्यस्य स्थिरं जीवितमस्तीति । सिद्धान्तोऽयं महता संरम्भेण संस्थापितो नाद्यापि हेयतामालिङ्गति, न वा किंचिन्मालिन्यमाचामतीत्यहो महिमाऽस्य । सत्यमेवोक्तम्—

कण्ठे मेखलया नितम्बफलके तारेण हारेण वा
पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा ।
शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यता-
मौचित्येन विना रुचिं प्रतनुते नाऽलङ्कृतिर्नो गुणाः[४] ॥ इति

---

१. व्यक्तिविवेके—द्वितीयोन्मेषे ।
२. नाट्यदर्पणे—३।१२५
३. ,, —३।१२५ वृत्तौ ।
४. औचित्यविचारचर्चायाम्-षष्ठकारिकावृत्तौ ।

इदन्त्वन्यद् यदौचित्यं रससिद्धस्य काव्यस्य स्थिरं जीवितमित्यत्र जीवितपदेनौचित्यस्य नात्मत्वं प्रोक्तं प्रत्युत काव्यस्योत्कर्षकतत्त्वान्यतमत्वमेव । अयमाशयः—क्षेमेन्द्रो हि सर्वाण्येव काव्याङ्गानि स्वीकुर्वाणः केवलं तेषामौचित्यपूर्णप्रयोगमेवाऽऽगृह्णाति न त्वौचित्यान्तर्गतत्वेन काव्याङ्गानीमानि मनुते । यथाऽलङ्कार-रीति-वक्रोक्ति-रसादिकाव्यसिद्धान्तानां प्रवर्तका अनुमोदका वा स्वेषां मान्यसिद्धानामन्तर्गतत्वेनान्यकाव्यतत्त्वानि मन्यन्ते यथाऽलङ्कारवादिनो रीतिवादिनो वक्रोक्तिवादिनो वा; अथवाऽन्यानि काव्याङ्गानि स्वेषां मान्यसिद्धान्तानां सम्पोषकत्वेन स्वीकुर्वते यथा ध्वनिवादिनो रसवादिनो वा । किन्तु क्षेमेन्द्रो नैतत्किमप्यादधातीति दिक् ।

उदयराजविरचितस्य 'राजविनोदमहाकाव्य'स्यालङ्कारानुशीलनम्

•

श्रीठाकुरदत्तजोशी *

•

संस्कृतसाहित्यस्यागाधपारावारे विद्यमाना अनेका अप्रकाशितकृतयो विभिन्नशोध-प्रतिष्ठानेभ्यः प्राकाश्यमानीयन्ते। आलोच्यग्रन्थोऽपि भाण्डारकरप्राच्यशोधसंस्थानेन लब्धैकमात्र-प्रतेराधारेण सुसम्पाद्य राजस्थानप्राच्यविद्याप्रतिष्ठानस्य भूतपूर्वोपनिदेशकपदभाजा श्रीगोपाल-नारायणबहुरामहोदयेन पुरातत्त्वमन्दिरादस्मादेव प्राकाश्यमानायि।

कविना उदयराजेन[1] समकालिकस्याश्रयदातुः काव्येऽस्मिन् सुलतानश्रीमहमूद-वेगड़ाख्यस्य[2] शौर्यवर्णनमकारि।

अस्य पूर्वजास्तक्षकजातीयाः सूर्यवंशीया क्षत्रिया आसन्। मूलपुरुषः सहारननामक आसीत्। यः फिरोजशाहगुणैस्समाकृष्टो भूत्वा स्वीयां भगिनीं तेन सह परिणीतवान्। कालान्तरे स्थानेश्वरात् दिल्लीं समधिगत्य तत्र च तेन स्वकीयं धर्मपरिवर्तनं कृतम्। अतः कालान्तरे तस्य सहारनस्य पुत्रः जफरखांनाम्ना ख्यातश्च बभूव। अस्यापरनाम मुजफ्फरखाँन इत्यपि

---

* प्राध्यापकः संस्कृतविभागे जोधपुर-विश्वविद्यालयः, जोधपुर।

१. प्रयागराजस्य तनूद्भवेन श्रीरामदासस्य कृताभियोगः॥
व्यधत्त काव्यं महमूदसाहेः सदोदयायोदयराजजन्मा॥ ७४१॥

२. अस्य जन्म पञ्चचत्वारिंशदुत्तरचतुर्दशशततमे खीष्टाब्दे (१४४५ ई०) समभवत्। अस्य प्रारम्भिकं नाम फतहरवाँ आसीत्। अनेन अष्टपञ्चाशदुत्तरचतुर्दशततमखी ष्टाब्दात् एकादशोत्तरपञ्चदशशततमखीष्टाब्दपर्यन्तं (१४५८-१५११ ई०) त्रिपञ्चा-शद्-वर्षपर्यन्तं गुर्जरदेशस्य शासनं विहितम् पुष्कला ख्यातिः समधिगता। अनेन कच्छ-सिन्ध-द्वारका-पावागढ़खानदेशादिषु आक्रमणं विहितम्। तथा तत्रत्यान् शासकान् विजित्य कतिपयेषु राज्येषु स्वकीयजनाः शासकत्वेन संस्थापिता।

आसीत्। अयमेव कालान्तरे गुर्जरदेशं गत्वा शासकत्वेन तत्र अस्य वंशस्य साम्राज्यस्यापि चिरस्थायिनीं प्रतिष्ठां विहितवान्। अत एव एतेषां वंशजा 'राजपूतसुलतान' नाम्ना ख्याता बभूवु गुर्जरदेशीयेतिहासे। अयं राजा पराक्रमौदार्यदानवीरतासु, साहित्यसङ्गीतादिनिखिलासु कलासु च सर्वान् भूपतीनतिशेते।

सप्तसर्गात्मके काव्येऽस्मिन् कविना सर्गान्ते सर्वत्र पुष्पिकायां महाकाव्यनाम्ना व्यवहारो विहितः। निखिलं काव्यमिदं सरस्वतीमुखादेव वर्णितं वर्तते। श्रोतृरूपेण सर्वत्र इन्द्रस्योपस्थितिर्विलोक्यते, विहाय चान्तिमं सर्गम्। यद्यप्यस्मिन् काव्ये आश्रयदातुः राज्ञो वीररसस्यैव चित्रणमभिप्रेतमासीत् तथापि स्थाने स्थाने प्रसङ्गानुसारेण राज्ञो दानवीरतायास्तथैव शृङ्गाररसस्यापि सफलं चित्रणं कविलेखन्या जातम्।

वर्तते काव्यस्यास्य भाषा सरला, रुचिरा, श्रुतिसुखदा, अतो नूनं पाठकस्य हृदयमावर्जयेत्। श्लोका अत्र प्रसन्ना प्रवाहमया हृदयादिव निर्गता भान्ति। अलङ्कारा निसर्गगताः, अतो नातिभारेण भाषां पीडयन्ति। काव्येऽस्मिन् कविना विविधालङ्काराणां, राज्ञः सभायाः, कटकस्य सङ्गीतकरङ्गस्य, दानवदान्यतायाः, प्रकृतेश्च यादृशं वर्णनं विहितं तत्संस्कृतानुरागिणां साहित्यरसिकानाञ्च मनांस्यावर्जयितुमलम्। अत इदानीमुपमादिविविधानलङ्कारान् पाठकानां परिचयाय दिङ्मात्रमुदाहरामि यथामनीषञ्च विमृशामि। तत्रादौ—

उपमालङ्कारः

राज्ञो महमूदस्य प्रासादाभ्यन्तरे निरङ्कुशानां गजेन्द्राणामिव नियन्त्रणरहितानां स्वच्छन्दानां वा राज्ञां प्रवेशोऽपि न सुकर आसीत्। अत्र गजेन्द्रनरेन्द्रयोः श्लेषगर्भितोपमा दर्शनीयास्ति।

निरङ्कुशत्वेन मदातिरेकान्नोज्झन्ति ये स्वैरविहारदर्पम्।
स्थिता निषिद्धा महमूदसाहेर्द्वारि गजेन्द्रा इव ते नरेन्द्राः ॥ ३।२१ ॥

अन्यच्च

नृत्यं विदधतया नर्तक्या उपमा कविना कामलतया सह दत्ता। एषा तन्वङ्गी रक्तिमकराणां कारणात् पल्लवानां शोभां समुल्लसन्ती, मन्दस्मितव्याजेन भ्रमरवृन्दाभावं पूरयन्ति कामवल्लर्या सह साम्यं बिभ्रतीव नृत्यति।

समुल्लसन्ती करपल्लवश्रिया स्मितेन तन्वी कुसुमानि तन्वती।
इयं कटाक्षभ्रमरोपशोभिता मनोभुवः कल्पलतेव नृत्यति ॥ ५।१८ ॥

अन्यच्च

युद्धार्थं राजगृहाद् बहिर्निर्गच्छतो राज्ञो महमूदस्योपमा शरदर्तौ शुभ्राभ्रमण्डलाद्

बहिरागच्छता भ्राजमाणेन तिग्मरश्मिणा सह कृता । एषोपमा न काल्पनिकी अपितु वैज्ञानिकतथ्यं प्रकाशयतीव भाति । इति तु सर्वे विदाङ्कुर्वन्त्येव यत् शुभ्रेण शुभ्रवर्णस्य कृष्णेन कृष्णवर्णस्याभा उपचीयते न तु क्षीयते विषयेऽस्मिन् कवेः सूक्ष्मेक्षिका अवलोकनीया वर्तते—

दिशि दिशि द्विषतामतिदुःसहो, बहिरसावुदयन्निजमन्दिरात् ।
अधिकदीप्तिधरा समुदीक्ष्यते, दिनकरः शरदम्बुधरादिव ॥ ६।१४ ॥

श्लेषगर्भितोपमानां वर्णनेऽपि कविः शीर्षण्यं स्थानं बिभर्ति, षष्ठसर्गे शिशिर-निशायां युद्धकटके मनोरञ्जनार्थमभिनीतानां नाटकानामवलोकनार्थं जागरणं कुर्वतां सैन्यानां वर्णनेन सह शिशिरप्रगल्भाया रजन्यास्तुलना उदारवेश्यया सह कविना या कृता, सा तु उपमाजगति उत्कृष्टतमा वर्तते । यथा—

क्रीडाविचित्रनवनाटककौतुकेन, निद्रां दृशोः प्रियतमामपि वञ्चयित्वा ।
कं वा न वीरकटके रमयत्युदारा, वाराङ्गनेव रजनी शिशिरप्रगल्भा ॥ ६।१२ ॥

रूपकम्

समस्तवस्तुविषयरूपकालङ्कारमाध्यमेन धरानायिकायाः करग्रहणप्रकारोऽपि कियत्या सरलया रीत्या कविना वर्णितं तदपि प्रशंसनीयमस्ति यथा—

उच्चैः प्रतापदहनं समरे प्रदीप्य, ज्जुह्वन् मुहुर्बहलशात्रवकीर्तिलाजान् ।
रत्नाकरोचितसमुज्ज्वलमेखलाया, वीरः करग्रहमयं कुरुते धरायाः ॥ ३।३० ॥

उत्प्रेक्षा

अस्यालङ्कारस्यापि माध्यमेन कविना बह्वचः कल्पना विहितास्तथा साकाररूपेण तास्ताः कल्पना विद्वन्निवहानां पुरतः स्थापिताश्च । देदीप्यमानकुण्डले परितः भ्राजमानानां पद्मरागाणां प्रभाङ्कुरैश्छुरितं महमूदस्याननस्याभा प्रातःकालीनभास्कररश्मिभिः स्पर्शितां कमलशोभामुपहसतीव भाति—

परिस्फुरत्कुण्डलपद्मराग—प्रभाङ्कुरैरञ्जितमास्यमस्याः ।
स्मितांशुलेशैर्हसतीव गूढं, बालारुणस्पृष्टसरोजलक्ष्मीः ॥ ३।९ ॥

अन्यच्च

उपमोत्प्रेक्षयोः सम्मिश्रणान्निर्मितानि अधस्तनपद्यानि नानादृश्यचित्राणि स्थापयितुं समर्थानि । नृत्यार्थं रङ्गाङ्गणे समागताः सुपरिधाना, राजानं परितः स्थिता नर्तक्यस्तथैव शोभन्ते, यथा सुधांशुं परितः स्थिता उडुगणा भ्राजन्ते । विशिष्टनयनवत्यस्ताः स्वकीयनयन-विभ्रमैर्विकासभाजामुत्पलानामुपहारं व्यञ्छतीव भाति—

इमाः समन्तात् परिवृत्य वल्लभं, विभान्त्यमूश्चन्द्रमिवोडवस्थिताः ।
विलोचनैरञ्चितविभ्रमैः स्त्रियः, कृतोपहारा विकचोत्पलैरिव ॥ ५।७ ॥

अन्यच्च

रणाङ्गणं प्रविशन्ती, शुभ्रपुष्पैराचिताञ्जलिः कापि नर्तकी महमूदस्य सौन्दर्याधिक्यात् पराभवभावं भजमानस्य कामदेवस्य सकाशात् स्वयं गृहीतमार्गणैः सन्नद्धा (रतिः) इव भाति । यथा—

इयं विशन्ती नवरङ्गमङ्गना, स्फुरप्रसूनैः परिपूरिताञ्जलिः ।
प्रियस्य सौन्दर्यविनिर्जितात्स्मरात् स्वयं गृहीतैरिव भाति मार्गणैः ॥ ५।१७ ॥

अतिशयोक्तिः

अतिशयोक्तेः सर्वालङ्कारबीजत्वादस्यामेव सर्वेऽलङ्काराः समाहिता भवन्ति । अत्रापि कवेः कल्पना इतरान् कविपुङ्गवानतिशेते । अस्य महमूदस्य सेनातुरङ्गैरुद्धूतानां रजःपुञ्जानामाधिक्येन एकतो नद्यः स्थलायिताः, अपरतस्तस्यैव कुञ्जराणां निष्यन्दमानदानवारिपयः—प्रवाहपूरैः नदीनामभावोऽपि भावरूपेण परिणतोऽभवत्—

त्वत्सेनातुरगावलीखुरपुटैरुद्धूलिताभिर्ध्रुवम्,
धूलीभिः स्थलतां गतः पथि भृशं लुप्ता न नद्यः कति ।
वीरश्रीमहमूदसाहनृपते ! त्वत्कुञ्जराणां पुनः,
दानोद्रेकलसत्प्रवाहनिवहैः पूर्णा न जाताः कति ॥ ७।१२ ॥

व्यतिरेकः

व्यतिरेकालङ्कारवर्णनप्रसङ्गेऽपि कवेः कल्पनायाः कमनीयता कं न मोदयति । विभाते धौतं महमूदमुखं विलोक्य आदिकालादारभ्य उत्कृष्टोपमानतां भजमानौ कमलचन्द्रमसावपि लज्जया पयसि ममज्जतुः । यथा—

प्राभातिकाचारविधौ जलेन, प्रक्षालितं वीक्ष्य मुखं नृपस्य ।
सरोरुहं मुञ्चति नाम्बुवासं, शशी पुनर्मज्जति वारिराशौ ॥ ३।४ ॥

अन्यच्च

कर्णाय कुण्डलयुगं प्रयच्छतः सूर्यस्यापि दशा कविनाऽस्य महमूदस्य पुरतोऽकिञ्चनरूपेणैव प्रतिपादिता । यथा—

यो दत्तवानिह हि भूरिसुवर्णवर्षि, कर्णाय कुण्डलयुगं जगदेकदीपः ।
सोऽयं प्रसादिविकिरः किल सुप्रभाते, कुर्वन्नृपस्य पुरतः प्रतिभाति भानुः ॥ ५।३३ ॥

अपह्नुतिः

अपह्नुत्यलङ्कारमाध्यमेनापि कृता कल्पना चमत्कारपूर्णा भवति । राज्ञो महमूदस्य पराक्रमात् समराङ्गणे भग्नानां वैरिणां याचकाः सुदूरं प्रपलायिताः । अतः स्तुतिपाठकैर्नृपो निवेद्यते, हे राजन् भवतामेतादृशं लोकोत्तरं चरित्रं वसुधापि स्वयं स्थाने-स्थाने भवन्निर्मितानां विजयस्तम्भानां मिषादुदञ्चितभुजा सती प्रख्यापयति—

भग्नानां समराङ्गणे बलवता वीरस्त्वया वैरिणां,
यद् ग्रामेषु परेषु याचकजना देशेषु च स्थापिताः ।
एतत्ते महमूदसाहचरितं लोकोत्तरं सर्वतः,
कीर्तिस्तम्भमिषादुदञ्चितभुजा व्याख्याति पृथ्वी स्वयम् ॥ ७।३५ ॥

भ्रान्तिमान्

भ्रान्तिमदलङ्कारमाध्यमेनापि मयूराणां ताण्डवानि रोचकतापूर्णानि कविना वर्णितानि—

हयखुरहतभूमीरेणुसञ्छिन्नभानौ, नभसि धृतपयोदा भ्रान्तयोऽमी मयूराः ।
ध्वनिभिरतिगभीरैस्त्वद्यशो दुन्दुभीनां, नृपवर ! तरुखण्डे तन्वते ताण्डवानि ॥ ७।१० ॥

सहोक्तिः

कालिदासोयेऽभिज्ञानशाकुन्तले दुष्यन्तशरेण त्रस्तस्य, वेपमानकलेवरस्य हरिणस्य चित्रणन्तु पशुमनोविज्ञानस्य पराकाष्ठाया निदर्शनमस्त्येव, किन्तु सहोक्त्यलङ्कारस्य माध्यमेनापि अत्र भयत्रस्तानां पलायनार्थं कृतोद्योगानां रिपुस्त्रीणां मृगीणाञ्च सम्मिलितरूपेण विहितं चित्रणमेवं तदर्थप्रयुक्ताः क्रियाश्च सहृदयहृदयाह्लादायालम् । यथा—

त्रस्यन्ति यान्ति परिवृत्य विलोकयन्ति, सङ्घीभवन्ति च विघट्य दिशो व्रजन्ति ।
मृग्यश्च वीररिपुराजमृगीदृशश्च, चेष्टां समादधति चापभृतः पुरस्ते ॥ ७।४ ॥

समासोक्तिः

समासोक्त्यादयोऽलङ्काराः कविप्रतिभाया निकषायमाणा विद्यन्ते । कविरत्रापि स्वबुद्धेश्चमत्कारेण श्रेष्ठकाव्यनिर्माणशक्तिं व्यनक्ति । उदाहरणरूपेण एक एव श्लोकः पर्याप्ततामावहति ।

अतीतायां निशीथिन्यामुदयाद्रिमारुरुक्षोः गभस्तिमत उदयदृश्यं समासोक्त्यलङ्कारेण कविना यथा प्रस्तुतं, वस्तुतः तत्प्रकृतिवर्णनपरम्परायामेकं समुज्ज्वलं हीरकमस्ति । मौद्गलानामागमनानन्तरं भारतेऽवगुण्ठनप्रथा पप्रथे । महमूदसमये सा प्रथा निखिलेऽपि भारते समस्तहिन्दूपरिवारे च समादृताऽभवत् । अधस्तनश्लोकेनानुमीयते यत् कविस्तात्कालिकप्रचलितावगुण्ठनप्रथायाः कारणादनुरागवशाच्च सम्मिलितपारिवारिकजीवने प्रातः भ्रान्त्या कृतापराधेन नतमस्तको नाभूत् नाम, किन्त्वेतादृशैः सापराधजनैरवश्यमेव परिचित आसीदिति निश्चप्रचम् । अन्यथा एतादृशी क्लिष्टकल्पना कथं प्रादुर्भूता कवेर्मनसि ?

प्रश्नोऽयं विदुषो हठाद् विचारयितुं प्रेरयति । अत्र प्रस्तुतेभ्यः प्राची-सूर्यकमलेभ्यो-ऽप्रस्तुतपरस्त्रीनायकयोस्तथा जायापत्योश्च प्रतीतिर्जायते । अतोऽत्र समासोक्त्यलङ्कारः । यथा—

प्राचीमुखं भ्रमवशात् परिचुम्ब्य किञ्चित्, रागादिवाम्बरवशात्त्ववलम्बमानः ।
दूरात् प्रसारयति सम्प्रति पद्मिनीनां, प्राणाधिपः किल करान् परिरम्भहेतोः ॥६।२७॥

अत्र स्वभावोक्त्यलङ्कारमाध्यमेनापि कविनाऽश्वशालायां बन्धनभावमुपागतानां परस्परमात्सर्यभृतां प्रातः यवसाय कृतमाधुर्यह्रेषाणामश्वानां सफलं चित्रणं विहितम्—

अन्योन्यमत्सरभृतो नवमन्दुरासु, क्षुण्णोदरासु खुरलीखुरलीलयैव ।
चेतो हरन्ति मधुरं नृप ! ह्रेषमाना, प्राभातिकाय यवसाय हयास्त्वदीयाः ॥ ६।३२ ॥

काव्यलिङ्गम्

अनेनालङ्कारेण कविना राज्ञो वर्णनं विहितम् । आदौ विरोधालङ्कारश्चान्ते काव्य-लिङ्गमस्ति । यथा—

सिंहासने भाति नरेश्वरोऽसौ, व्याप्नोति तेजो महिमाऽस्य विश्वम् ।
कोशं श्रयत्यस्य कृपाणयष्टी राज्ञामयं रक्षति दिक्षु चक्रम् ॥ ३।२८ ॥

एवं प्रकारेण सुन्दराणामलङ्काराणां सन्निवेशेन युक्तं काव्यमिदं वीरकाव्यमेव नास्ति, अपितु ऐतिहासिकं महाकाव्यमपि अस्ति । यस्मिन् महाकाव्ये राज्ञो महमूदबेगड़ाख्यस्य पूर्वजानां वीरत्ववर्णनेन सह न केवलं राज्ञो महमूदस्य वीरता प्रख्यापिता, अपि तु तत्सैनिकानां वीरतापि पदे-पदे प्रतिबिम्बिता भवति—

आविद्धाः परितः शिलीमुखशतैः रक्तप्रसूनोद्गिरः
शाखाखण्डभृतः परिच्छदभरैर्दूरान्तरे वर्जिताः ।
लक्ष्यन्ते न वनान्तरे त्वदरयो राजेन्द्रसेनाचरैः,
तुल्याकारतया वसन्तसमये लीनाः पलाशद्रुमैः ॥ ७।२१ ॥

एवं सप्तसर्गात्मकं वीररसप्रधानं काव्यमिदं विरचय्य कविः वीरस्य पराक्रमिण उदारस्य, साहित्यरसिकस्य तथा कलानुरागिणो राज्ञो गुणानां चित्रणेन सह महाकाव्यसर्जनपरम्परायामप्येकं विद्वत्तल्लजैर्विवेचनीयं महनीयं कार्यं विहितवान् । आशासे लेखेनानेन संस्कृतानुरागिणो लाभान्विता भविष्यन्तीति ।

अभिनव-साहित्य-परिचयः

१—कादम्बरीशतकम्, २—शिवशतकम्, ३—सगुणब्रह्मस्तुतिशतकम्, ४—महर्षि-दयानन्दप्रशस्तिशतकम्, ५—शिवप्रताप (शिवाजी, राणाप्रताप)—विरुदावलीशतकत्रयम्, ६—इन्दिराविजयवैजयन्ती, ७—संस्कृतमहाकविदिव्योपाख्यानम् (१६ प्राचीनमहाकवीनां प्रशस्तयः) ८—षड्दर्शनसिद्धान्तप्रक्रियाऽद्वैतवादश्च (लघुनिबन्धः) ।

लेखक :—श्रीहजारीलालशास्त्री विद्यालङ्कार : मु०—पो० घिलावड़ (छोटी) जि० सोनीपत (हरयाणा) । प्राप्तिस्थानम्—पूर्वोक्तमेव । आकारः—डबलक्राउन । पृष्ठसंख्या सर्वेषां शतान्तर्गता मूल्यं च पञ्चाशित्पणेभ्यो रूपकद्वयपर्यन्तम् ।

विविधविषयानवलम्ब्य प्रणीतानि लघुपुस्तकानीमानि संस्कृतसाहित्यवाटिकायाः शोभावर्द्धकानि कुसुमानीव साहित्यरसिकानां मनोरञ्जकानि भवितुमर्हन्ति । निखिलान्यपि पद्यानि सरलानि प्रवाहवन्ति च । पुस्तकानामावरणं मुद्रणं चापि मनोहरम् । संस्कृते नूतन-साहित्यरचनायाः कृते सर्वथा साधुवादार्हाः श्रीशास्त्रिमहाभागाः ।

२. हरियाणावैभवम् : (काव्यम्) लेखकः—आचार्यराधाकृष्णशास्त्री । प्रकाशकः—श्रीघनश्यामशर्मा, सनातनधर्म संस्कृत कालेज, अम्बाला, छावनी (हरयाणा) । मूल्यम्--पञ्चरूप्यकाणि । आकारः--डबलक्राउन । पृष्ठसंख्या १०४ ।

चतुस्सर्गात्मकेऽस्मिन् लघुकाव्ये उपजातिवृत्तमये हरियाणाप्रदेशस्य भौगोलिकं राजनीतिकं सांस्कृतिकं साहित्यिकं च समस्तमितिवृत्तं संक्षिप्य वर्णितं कविना । आधुनिकसंस्कृतरचनासु प्रदेशवर्णनविषयिणीयं प्रथमा रचनेति निस्सन्देहं वक्तुं शक्यते । इमां रचनामनुसृत्य यदि तत्तत्प्रदेशवासिनः कविवराः स्वस्वप्रदेशानां सर्वाङ्गपूर्णमितिवृत्तं कवितानिबद्धं कुर्युस्तर्हि एकस्योपेक्षितस्याङ्गस्य पूर्तिर्जायेत । एतादृशेषु काव्येषु यदि कानिचित् चित्राण्यपि प्रकाशितानि स्युस्तर्हि तानि समधिकमाकर्षकाणि जायेरन् । ज्ञानवर्द्धकानि च ।

३. आर्यान्योक्तिशतकम् : रचयिता--डॉ०राजेन्द्रमिश्रः प्रयागविश्वविद्यालये संस्कृतविभागे प्रवक्ता । प्रकाशकः--वैजयन्त प्रकाशनम्, द्रोणीपुरम् जौनपुरम् । आकारः--डिमाई । पृष्ठसंख्या--४१ । मूल्यम्–रूप्यकत्रयम् ।

संस्कृतभाषाया वाङ्मये अन्योक्तिसाहित्यस्य दीर्घा समृद्धिशालिनी च परम्परा । तामेव परम्परामाश्रित्य विदुषा मानव-पशु-प्राणि-विहग-वृक्षोदिविषयकेषु प्रकरणेषु नवनवभाव-

भरिता अभिनवा अन्योक्तयो लिखिता ललितलेखनकवितागीतिनिर्माणविश्रुतयशसा लेखकेन श्रीमिश्रेण। प्रारम्भे विंशतिपृष्ठव्यापिन्यां प्रस्तावनायामन्योक्तिसाहित्यं प्रस्तुतरचनाञ्चावलम्ब्य केचनाऽन्येऽपि रोचका ज्ञातव्याश्च विषयाः प्रपञ्चिता विद्यन्ते ये नूनमनूनं मोदं जनयिष्यन्ति जिज्ञासूनां पाठकानाम्। पुस्तकस्यावरणपृष्ठमपि सर्वथा सुपुष्टं चित्र-विचित्रवर्णरङ्गादिविभूषिततया नितरामाकर्षकञ्च।

४. प्लवङ्गदूतम् : रचयिता—डॉ० वनेश्वरपाठकः, प्राध्यापकः—सेन्टजेवियर्स—कालेज, राँची (विहार)। प्रकाशकः—सुबोधग्रन्थमालाकार्यालय, राँची। आकारः—डबलक्राउन। पृष्ठसंख्या—११२। मूल्यम्-चत्वारि रूप्यकाणि।

महाकविकालिदासप्रवर्तिता दूतकाव्यधारा अद्यापि देशे सर्वत्र प्रवहन्ती सर्वेषां च काव्यरसिकानां मनांसि उल्लासयन्ती दृश्यत इति सौभाग्यस्य विषयः अस्ति। पाठकमहोदयानां प्रस्तुतरचना तस्या एव धारायाः एको नूतनतमो मनोरमस्तरङ्गो विद्यते। काव्यमिदं निःश्वासद्वये विभक्तं वर्तते। तत्र पूर्वनिःश्वासे ८० पद्यानि उत्तरनिःश्वासे च ३४ पद्यानि वर्तन्ते। वृत्तञ्च परम्परानुसारं मन्दाक्रान्ता एव।

दूतकाव्यं प्रायेण दम्पत्योर्वियोगसंयोगवर्णनमयं भवति। तद्वदेवात्रापि कल्पना विलसति। परं विशेषस्तु अयमत्र वर्तते यत् प्रस्तुते काव्ये कथाप्रसङ्गेन भारत-पाकिस्तानवर्तिनामाधुनिकनगराणां विशेषतः पञ्जाबप्रदेशवर्तिनां भूयसी चर्चा वर्तते। श्रीमती इन्दिरागांधी अप्यत्र सहभागिनी।

पुस्तकस्य प्रस्तावनायां प्राचीनानामाधुनिकानां च दूतकाव्यानां विस्तृता चर्चा विद्यते। आवरणपृष्ठञ्च मनोहारि।

५. एकभारतम् : (नाटकम्) लेखकः—ई० पी० भरत पिषारटी। प्रकाशकः—कामधेनु पब्लिकेशन, एरानेल्लूर, त्रिचूर, (केरल)। आकारः—डबलक्राउन। पृष्ठ-संख्या—१००। मूल्यम्—पञ्च रूप्यकाणि।

नाटकस्यास्य कथानकं न खल्वैतिहासिकं प्रत्युत कल्पनाकलितमेव। तच्च लेखकस्यैव लेखन्या प्रस्तावनायां सम्यगुपवर्णितम्। नाटकमिदं मुख्यतया राष्ट्रीयभावनाभरितं, भारतीयसंस्कृतेः परिपोषकं गौरवाधायकं च। नाटकजगति सर्वथाऽसमानमिदं नूतनमवदानं सर्वैरेव नाट्यकलाकुशलैरवलोकनीयमभिनेयं च।

६. विचार और विवेचन (हिन्दी)। लेखकः—डॉ० वामन केशव लेले। प्रकाशकः—चौखम्बा सुरभारती प्रकाशन, वाराणसी। आकारः—डिमाई। पृष्ठसंख्या—१५४। मूल्यम्—पञ्चदश रूप्यकाणि।

पुस्तकममिदं लेखकद्वारा "काव्य शास्त्र व संस्कृति" इतिनाम्ना लिखितस्य मराठी-पुस्तकस्य हिन्दीभाषिणां हिताय तेनैव विहितं हिन्दीरूपान्तरं वर्तते । पुस्तकेऽस्मिन् निम्नाङ्कितेषु त्रयोदशशीर्षकेषु लेखकेन स्वकीया विचारा विवेचनाश्च उपस्थापिता विद्यन्ते—

१—साहित्यकारों के मौनमें साहित्यसौन्दर्य, २—काव्य की सरसता शब्दनिष्ठ, अर्थनिष्ठ या कविनिष्ठ ? ३—प्राचीन शास्त्रग्रन्थों की रचनाशैली, ४—प्राचीन साहित्यिक वाद, ५—भाविक अलंकार, ६—राजशेखरवर्णित कवियों के प्रकार, ७—क्या व्यासदास क्षेमेन्द्र का उपनाम था ? ८—काव्यशास्त्रकार वामन का मौलिक चिन्तन, ९—आचार्य भामह और साहित्यसमीक्षा के मूलतत्त्व, १० दण्डी का काव्यलक्षण—एक अध्ययन, ११—क्षेमेन्द्र की समीक्षा-शैली १२—भाषिक समस्याः शोध तथा बोध, १३—संस्कृत काव्यशास्त्र-विषयक एक समस्या ।

उपर्यङ्कितेषु सर्वेष्वपि विषयेषु लेखकेन केचन मौलिका विचाराः अभिनवानि चिन्तनानि च मनोहारिण्या शैल्या प्रकटीकृतानि यानि साहित्यशास्त्राध्येतॄणां कृते नितरां बोधवर्धनानि अभिनवमार्गदर्शकाणि च भविष्यन्ति । मराठीभाषाभिज्ञैर्मूलं मराठीपुस्तकमपि नूनमवलोकनीयम् । मराठीपुस्तकं निम्नलिखितसङ्केतेन लब्धुं शक्यते—

सौ० मालती वामन लेले घर नं० बी० २७।६२ डी० १ ए, दुर्गाकुण्ड रोड, वाराणसी ५

७. रसकौस्तुभः (वेणीदत्तविरचितः) सम्पादकः व्याख्याकारश्च—डॉ० ब्रह्ममित्र अवस्थी । प्रकाशकः—इन्दु प्रकाशन ८/३ रूपनगर, दिल्ली ७ । आकारः—डिमाई । पृष्ठसंख्या—१२३ । मूल्यम्—पञ्चदश रूप्यकाणि ।

क्रिष्टीयाष्टादशशताब्द्या उत्तरार्धे लब्धजन्मना मैथिलवुधावतंसेन विदुषा वेणीदत्तेन प्रणीतोऽयं ग्रन्थो नामानुसारमेव रसप्रतिपादनपरः । पुनश्च अन्यसाहित्यशास्त्रीयरसग्रन्थवदत्रापि शृङ्गाररसस्यैव प्राधान्यं तस्यैव च विपुलतरं निरूपणं दृष्टिगोचरी भवति । हिन्दीव्याख्यया सह सम्पादनेन सोऽयं ग्रन्थो निखिलानामपि रसमर्मज्ञानां कृते अनायासमास्वादनीयः संवृत्तः सम्प्रति ।

ग्रन्थारम्भे ग्रन्थ-ग्रन्थकारविषयिणी प्रस्तावनाऽपि विस्तृता विशदा च । कागदं मुद्रणञ्चापि मनोहारिणी ।

८. क्षेमेन्द्रप्रणीत औचित्यसिद्धान्त आणि औचित्यविचारचर्चा (मराठी) समीक्षकस्तथा सम्पादकः-प्रा०वामन केशव लेले । प्रकाशकः—सौ० मालती वामन लेले । घर नं० बी २७/६५ सी, दुर्गाकुण्ड, वाराणसी । आकार :—डिमाई । पृष्ठसंख्या—२५० । मूल्यम्—न लिखितम् ।

क्षेमेन्द्रप्रणीता औचित्यविचारचर्चा स्वविषये अद्वितीया साहित्यशास्त्रप्रवीणानां विदुषां सुपरिचिता च। प्रस्तुतपुस्तकस्य नवतिपृष्ठात्मके पूर्वभागे क्षेमेन्द्रप्रतिपादितस्य औचित्यसिद्धान्तस्य वैदुष्यपूर्णं समीक्षणं तथा उत्तरभागे औचित्यविचारचर्चायाः कारिकाणां सुविस्तृतं व्याख्यानं वितन्वता लेखकेन सुमहान् उपकारः साधितः समेषामपि छात्राणामध्यापकानां च। अस्यापि ग्रन्थस्य यदि हिन्दी-अनुवादः संस्कृतानुवादो वा प्रकाश्येत तर्हि लेखकस्य गंभीरैश्चिन्तनैर्हिन्दीसंस्कृतविदोऽपि लाभान्विता भवेयुः। पुस्तकमिदं स्वकीये विषयेऽद्वितीयमिति निःसंशयं वक्तुं शक्यते। अतो ये विद्वांसो मराठीभाषां न जानन्ति तैरपि पुस्तकमिदं द्रष्टव्यं रक्षणीयञ्चेति ममानुरोधः।

—सहसम्पादकः

●

समीक्षणार्थं प्राप्तानि पुस्तकानि

१. शाब्ददीपिका
२. वैयाकरणसिद्धान्तकौमुदी (कारकप्रकरणम्)
३. संस्कृत-सरणिः
४. वाणीविलसितम्
५. तत्त्वशतकम्
६. लघुसिद्धान्तकौमुदी
७. वेदसंस्कृति (अंग्रेजी)
८. वाणी सरोवर (विविधभाषा)

●

निवेदना—स्वासां नूत्नकृतीनां परिचयाय समालोचनाय चाभिनवसाहित्यप्रणेतृभिरेकैकस्य पुस्तकस्य प्रतिद्वयं प्रेषणीयमिति सानुरोधं निवेद्यते।

●

लेखक-परिचयः

परमार्थसुधायास्तृतीयवर्षस्य चतुर्ष्वपि त्रैमासिकेष्वङ्केषु येषां महानुभावानां निबन्धाः प्रकाशितास्तेषां सङ्क्षिप्तः परिचयोऽधस्तात्प्रकाश्यते—

श्रीसत्यनारायणशर्मा	प्रधानसम्पादकः। रांचीस्थ-सेंटजेवियर्समहाविद्यालये भूतपूर्वो व्याख्याता तिरुपतिविश्वविद्यालयान्तर्गते थियोसोफिकलमहाविद्यालये भूतपूर्वः प्राचार्यस्तथा गटिंगटनविश्वविद्यालये भूतपूर्वः प्राध्यापकः। सम्प्रति शर्मण्यदेशस्य मूईंस्तरविश्वविद्यालये प्राध्यापकः।
डॉ० बलजिन्नाथपण्डितः	मानोर हाउस शिमला ५ (हि० प्र०)
डॉ० वनेश्वरपाठकः अध्यक्षः	संस्कृतविभागस्य, रांचीस्थ सेंटजेवियर्स महाविद्यालयस्य।
डॉ० चन्द्रमौलिद्विवेदः	साहित्यविभागाध्यक्षः वाराणसीस्थ-शास्त्रार्थ-संस्कृतमहाविद्यालयस्य।
पं० रामप्रसनतिवारी	प्राध्यापकः साहित्यविभागस्य श्री सनातनधर्म-संस्कृतमहाविद्यालयस्य मुक्तिश्वरनाथ-गोरखपुरस्य।
डॉ० उमाशङ्करशर्मा	उपाचार्यः आङ्गलविभागस्य काशी-विद्यापीठस्य।
पं० शिवदत्तशर्मा चतुर्वेदः	प्राध्यापकः-साहित्यविभागस्य काशीहिन्दूविश्वविद्यालयस्य संस्कृतमहाविद्यालयस्य।
प्रा० वेदप्रकाशः	वरिष्ठप्राध्यापकोऽध्यक्षश्च संस्कृतविभागस्य संगरूरस्थ-राजकीय-महाविद्यालयस्य २७ रणबीर क्लब, संगरूर-१४८००१ (पञ्जाब)
डॉ० राजेन्द्रमिश्रः	प्राध्यापकः संस्कृतविभागस्य प्रयागविश्वविद्यालयस्य।
डॉ० रामाशीषपाण्डेयः	अध्यक्षः रांचीस्थ-मारवाड़ीमहाविद्यालयस्य।
पं० कृष्णदत्तशास्त्री शास्त्रपञ्चाननः	बम्बईस्थः।
प्रो० दिनेशप्रसादपाण्डेयः	भूतपूर्वोऽध्यक्षः संस्कृतविभागस्य रांचीविश्वविद्यालयस्य।

डॉ० राजेन्द्रप्रसाद द्विवेदी	प्राध्यापकः संस्कृतविभागस्य राँचीविश्वविद्यालयस्य ।
डॉ० रामविलास चौधरी	,, ,, ,, पटना विश्वविद्यालयस्य ।
प्रो० गौरीनाथपाठकः	,, ,, राँचीस्थ एस० के० वागे महाविद्यालयस्य ।
पं० चन्द्रकुमारत्रिपाठी	,, ,, राँचीस्थ-राजकीय संस्कृतमहाविद्यालयस्य ।
पं० रघुनन्दनमिश्रो 'वैद्यः'	प्राचार्यः, राँचीस्थ-जानकीदेवीमोदीआयुर्वेद-महाविद्यालयस्य ।
प्रो० शिवचन्द्रभट्टाचार्यः	प्राध्यापकः, राँचीस्थ-राजकीयसंस्कृतमहाविद्यालयस्य ।
पं० महेशशर्मा	प्राचार्यः, ,, ,, ।
डॉ० एस्० एस्० पण्डितः	प्राध्यापकः, आङ्गलविभागस्य राँचीस्थ-सेंटजेवियर्स-विद्यालयस्य ।
ई० पी० भरतपिषारटिः	प्राचार्यः, भारतविद्यापीठस्य, पत्रालयः एरानेल्लूर, मण्डलम् त्रिचूर (केरल-प्रदेशः)
श्री हरि अरविन्दः	प्राचार्यः श्री रामशङ्कर-साङ्गवेद-विद्यापीठस्य, कोडरा, चन्दहर, बस्ती ।
पं० कैलाशचन्द्रशास्त्री	अधिष्ठाता भूतपूर्वः प्राचार्यश्च, वाराणसीस्थ श्री स्याद्वादमहाविद्यालयस्य ।
पं० रघुनाथप्रसादश्चतुर्वेदः	दशभुजी गणेश, मथुरा ।
प्रो० बटुकनाथशास्त्रीखिस्ते	भूतपूर्व आचार्योऽध्यक्षश्च साहित्यविभागस्य सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य ।
प्रो० रेवाप्रसादद्विवेदः	आचार्योऽध्यक्षश्च काशीहिन्दूविश्वविद्यालयान्तर्गत-संस्कृतमहाविद्यालयस्य ।
डॉ० शिवनारायणशास्त्री	ई० ४/२५ माडल टाउन, नई दिल्ली ।
पं० विद्याधरद्विवेदी	शोधच्छात्रः, संस्कृतविभागस्य, काशी विद्यापीठस्य ।
श्रीठाकुरदत्तजोशी	लक्ष्मीनिवास, रातनाड़ा, जोधपुर (राजस्थान) ।

अमृतं मधुरं सम्यक्
संस्कृतं हि ततोऽधिकम्।



निखिलेऽपि महीमण्डले

संस्कृत-प्रसाराय

कानोडिया ओभरसीज कारपोरेशन, कलकत्ता"

(Kanoria oversees Corporation, Calcutta)

इति-संस्थानेन

श्रद्धा-भक्ति-प्रसूनानि विनिवेद्यन्ते



देवभोग्यामिदं यस्मात्
देवभाषेति कथ्यते।

दुर्गाण्यतितरन्ति ते ।

ये दम्भान्नाचरन्ति स्म येषां वृत्तिश्च संयता ।
विषयांश्च न गृह्णन्ति दुर्गाण्यतितरन्ति ते ॥
प्रत्याहुर्नोच्यमाना ये न हिंसन्ति च हिंसिताः ।
प्रयच्छन्ति न याचन्ते दुर्गाण्यतितरन्ति ते ॥
कर्माण्यकुहकार्थानि येषां वाचश्च सूनृताः ।
येषामर्थाश्च संबद्धा दुर्गाण्यतितरन्ति ते ॥
येषां न कश्चित् त्रसति न त्रसन्तीह कस्यचित् ।
येषामात्मसमो लोको दुर्गाण्यतितरन्ति ते ॥
सर्वान् देवान् नमस्यन्ति सर्वधर्मांश्च शृण्वते ।
ये श्रद्दधानाः शान्ताश्च दुर्गाण्यतितरन्ति ते ॥
ये क्रोधं सन्नियच्छन्ति क्रुद्धान् संशमयन्ति च ।
न च कुप्यन्ति भूतानां दुर्गाण्यतितरन्ति ते ॥
यात्रार्थं भोजनं येषां सन्तानार्थं च मैथुनम् ।
वाक् सत्यवचनार्थाय दुर्गाण्यतितरन्ति ते ॥

—महाभारते शान्तिपर्वणि अ० ११० ।

विद्वन्मोदावहा सूचना

एतत्पत्रिकायाः प्रधानसम्पादकानां श्रीमदाचार्यसत्यनारायणशर्ममहोदयानां शर्मण्यदेशीयाऽऽकाशवाणीतः प्रसारितानां संस्कृतप्रवचनानां सङ्कलनात्मकस्य ग्रन्थचतुष्टयस्य प्रकाशनं पूर्वं यथा सम्पन्नं मन्ये तेन मनीषिणोऽपरिचिता न भवेयुः । सौभाग्यादस्माकमेतेषां साहित्यदर्शनव्याकरणादिविषयकबहुविधप्रवचनानां बहुमूल्यं सङ्कलनमेकं 'प्रवचन-पराग' इति नाम्ना प्रकाश्यमानं वर्तते ।

पुस्तकरत्नमिदं न चिरादेव प्रकाशितं सम्भूय प्रदीपयिष्यति साहित्यरसिकानां हृदयमन्दिराणीत्याशास्यते ।

—व्यवस्थापकः

परमार्थसुधा

त्रैमासिक-संस्कृत-पत्रिका



परमार्थसुधा

(त्रैमासिक-संस्कृत-पत्रिका)

वर्षश्चतुर्थः * अङ्कः प्रथमः

आश्विन–कार्तिक–मार्गशीर्षमासाः

संवत्सरः-२०३६

सम्पादकः — श्रीसत्यनारायणशर्मा

सहसम्पादकः — श्रीरामप्रेमद्विवेदी शास्त्री

प्रकाशकः

श्रीसोहनलालः

मन्त्री, परमार्थन्यासः

मुड्हू, राँची (विहार)

प्राप्तिस्थानं, पत्र-लेख-मूल्यादि-प्रेषणसङ्केतश्च—

श्रीविद्याधरद्विवेदी

व्यवस्थापकः – परमार्थसुधा

सार्वभौम-संस्कृत-प्रचार-कार्यालयः

डी० ३८।११०, हौजकटोरा, वाराणसी

(उत्तर-प्रदेशः), दूरभाषः – ६६०२१

वार्षिकं मूल्यम्–दश रूप्यकाणि

विदेशेषु – दश डालराणि

मुद्रकः

बैजनाथ प्रसाद

कल्पना प्रेस

रामकटोरा रोड, वाराणसी ।

विषया लेखकाश्च



परमार्थसूक्तयः

स्वस्ति द्यावापृथिवी सुचेतुना

स्वस्ति नो मिमीतामश्विना भगः
स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः
स्वस्ति द्यावा पृथिवी सुचेतुना ॥१॥

स्वस्तये वायुमुप ब्रवामहे
सोमं स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये
स्वस्तय आदित्यासो भवन्तु नः ॥२॥

विश्वे देवा नो अद्या स्वस्तये
वैश्वानरो वसुरग्निः स्वस्तये ।
देवा भवन्त्यृभवः स्वस्तये
स्वस्ति नो रुद्रः पात्वंहसः ॥३॥

स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥४॥

—ऋग्वेद मंडल ५ सू० ५१

येभ्यो माता मधुमत्पिन्वते पयः
पीयूषं द्यौरदितिरद्रिबर्हाः ।
उक्थशुष्मान् वृषभरान्त्स्वप्नसस्ताँ
आदित्याँ अनु मदा स्वस्तये ॥५॥

—ऋग्वेद मंडल १० सू० ६३

प्रतीच्ये जगति संस्कृतशब्दकोशविषयिणी पर्येषणा

श्रीसत्यनारायणशर्मा

शब्दाह्वयं ज्योतिरासंसारं चेन्न दीप्येत, तर्हि कृत्स्नं भुवनत्रयमिदं घोरेण तमसावृतं सम्पत्स्यते इत्याचार्यदण्डिनो व्याहृतिर्गुर्वर्थं बिभर्त्ति। शब्दानां संख्या संस्कृतिविशेषस्य गरिमाणं निर्धारयितुं निकषतामेति। दुःखमुमुक्षाऽसुखेऽनित्ये लोकेऽस्मिन् प्राणिनां चेतांसि किलानारतं प्रेरयति। सच्छास्त्राधीनेयं मुमुक्षापरिणतिः। इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयते स वेद इति सायणाचार्येण विवृतम्। तत्सर्वं शब्दान् समाश्रयते। चतुष्पादेभ्यो नून् तेषां शब्द-भाण्डागारः किल व्यवच्छेदयति। हलायुधस्याभिधानरत्नमालायां मङ्गलाचरणे शब्दब्रह्मणः सर्वभूतचैतन्यत्वं त्रिभुवनपरिणामत्वञ्च सुष्ठु प्रणिहितं शब्दशास्त्रार्णवविगाहकेन विदुषा। किम्ब-हुनाऽवाक्श्रुतीनां प्राणिनां साहित्यसङ्गीतरसास्वादवञ्चितानां जीवनेन पृथिव्यान्तु सच्चिदा-नन्दस्यानन्दरूपतोपास्तेः प्रयोजनं न सिद्ध्यति।

ननु पुरुषार्थचतुष्टयनिष्पत्तेः साधनभूतं शब्दजालमिदमपरिमितम्। इन्द्रादयोऽपि यस्य शब्दवारिधेरन्तं न ययुस्तस्य कृत्स्नस्य प्रक्रियां वक्तुं नरः कथं क्षमः स्यादिति सारस्वतव्याकरणे सुष्ठु भणितम्। अतएव व्याकरणकोशयोः पदशक्तिग्रहणेऽपरिहार्यत्वं किल गम्यते। शिष्टै-रुक्तमस्ति—

> शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
> वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

अतिपुरातनकाले किल भारतस्य सुधियोऽभिधानकोशव्याकरणयोर्महत्त्वं विदाञ्चक्रुः। नानावैयाकरणानां नानाऽभिधानकोशप्रणेतॄणां कृतिभिर्न केवलं सुरगवी, प्राकृतादयोऽपि यथाकालं समलङ्कृता बभूवुः। इन्द्रचन्द्रकाशकृत्स्नापिशलिशाकटायनपाणिन्यमरजैनेन्द्रादिभिः शाब्दिकैः संस्कृतवाङ्मयं महता श्रमेण मण्डयाञ्चक्रे। एवमेव निघण्टुकारैर्हलायुधव्याडिवोपालितामरभागु-रिधन्वन्तरिमङ्खादिभिः कोषप्रणेतृभिः। संस्कृतशब्दशास्त्रस्यैतावत्यद्भुता समृद्धिरूनविंशति-शतक एव जर्मनदेशीयानुसन्धातुः त्साखरिए इत्यभिधस्य ध्यानमाकृष्टवती। इतः पूर्वं स्टेंत्सल-राख्यो गवेषकः सप्तचत्वारिंशदधिकाष्टशताधिकसहस्रतमे ख्रिस्ताब्दे ब्रेसलाउनगरात् संस्कृते कोशरचनासिद्धान्त इति रचनां प्रसिद्धीकृतवान्। लघ्वाकृतिः कृतिरियम्। भारतीयसंस्कृतेर-

परशाखाभिः समाकृष्यमाणा अत्रत्या अध्येतारः कोशरचनाक्षेत्रं प्रत्यनवधाना आसन्। भारतीयाभिधानशास्त्राणीति कृतिं सप्तनवत्यधिकाष्टशताधिकसहस्रतमे ख्रिस्ताब्दे स्ट्रासबुर्गनगरात् मुद्रापयित्वा प्रसिद्धीकृत्य त्साखारिए संस्कृतवाङ्मयाध्येतॄन् प्रतीच्ये जगति उपकृतवान्। कृतावस्यामादौ भारतीयकोशकलायाः प्रभावं विचार्य्य निघण्ट्वादींश्चर्चयित्वा एकार्थाननेकार्थांश्च कोशान् निर्दिश्य नानाविधानामभिधानकोशानां चर्चा व्यधीयत। बौद्धमतावलम्बिभिः प्रणीताः कोशा अपि उपसंहृतौ चर्चिताः सन्ति। बर्लिननगरात् द्व्यशीत्यधिकाष्टशताधिकसहस्रतमे ख्रिस्ताब्दे सोपोद्घातं शाश्वतकोषमसौ मुद्रापयित्वा प्राचिख्यपदित्यत्र न विस्मर्त्तव्यं श्रोतृभिः।

शब्दकोषार्थं पुराऽभिधानकोषः, नामपारायणं, नाममाला, निघण्टुः, निर्घण्टुः, निर्घण्टः, निघण्ट इत्यादयः शब्दाः संस्कृते प्रयुज्यन्ते स्म। धातूनां कोषार्थं धातुपारायणमिति सञ्ज्ञापनं भवति स्म। ऋग्वेदभाष्ये सायणाचार्यो निघण्टुं समानार्थवाचिशब्दानां सङ्कलनमिति व्याचचक्षे। 'एकार्थवाचिनां पर्यायशब्दानां सङ्घो यत्र प्रायेणोपदिश्यते, तत्र निघण्टुशब्दः प्रसिद्धः। तादृशेष्वमरसिंहवैजयन्तीहलायुधादिषु दश निघण्टव इति व्यवहारादिति।' त्साखारिए निघण्टुं दाक्षिणात्यं पदममंस्त। दाक्षिणात्योऽभिधानग्रन्थो वैजयन्ती आत्मानं वैजयन्तीनिघण्टुरिति ख्यापयतीति हेतोः। अपरञ्च दक्षिणोद्भवेषु पाण्डुलिपिसूचीपत्रेषु अद्यत्वेऽपि अभिधानकोशेभ्यो निघण्टुरिति पदं व्यवह्रियते। पुराकाले वैदिककोषार्थं निघण्टुरिति पदं वेदार्थाधिजिगमिषुभिः प्रयुयुज इति तु निश्चप्रचम्। कालं प्राप्य शब्दोऽयमायुर्वेदकोषेभ्योऽपि परिजगृहे। धन्वन्तरिनिघण्टुः, निघण्टुशेषः, राजनिघण्टुश्च प्रथिताः सन्ति।

ननु संस्कृतकोषाणां वैशिष्ट्यं कस्य खलु कृतधियश्चेतो न चमत्करोति! ते एकार्था अनेकार्था वा भवन्ति स्म। किन्तु नामधेयमिदमन्यथा नावगन्तव्यम्। विभाजनमिदमनतिक्रमणीयं नास्ति। एकस्मिन्नेव किल ग्रन्थे उभौ द्रष्टुं शक्येते। उदाहरणार्थममरकोशे वैजयन्त्यां वा उभे पद्धती समाश्रिते। हेमचन्द्रस्तु पृथग् ग्रन्थयोः समानार्थनानार्थपदानां सङ्कलनमकार्षीत्। अभिधानचिन्तामणिरेकार्थशब्दानामनेकार्थसङ्ग्रहोऽनेकार्थशब्दानाञ्च कोशौ स्तः।

लिङ्गानुशासनपरकग्रन्थोऽपि कोषसञ्ज्ञामानर्हं। वररुचेर्लिङ्गानुशासनं सन्दर्भेऽस्मिन्नो विस्मर्त्तव्यम्। हेमचन्द्रस्यैतद्विषयिका कृतिरप्यभिधानसङ्ग्रहेषु परिगण्यते। भवतु तावत्। शब्दशास्त्रसमुपास्तेरेतावान् विसरो भारतवर्षस्यातीतकालस्य महिमानमौज्ज्वल्यञ्च भूरिशो दर्शयति।

(२)

न केवलमेकार्थानामनेकार्थानां वा पदानामभिधानकोशं प्रणेतुमुपात्तविद्याः सूरयो भारते वर्षे मनश्चक्रिरे, एकाक्षरकोशप्रणयनार्थमपि एके विचक्षणा उद्युक्तवन्तः। एवंविधे कोशे एकाच्पदानि सङ्गृह्यन्ते स्म। मातृकाकोशसमाश्रिता अतस्ते तन्त्रसाहित्यमन्तर्भवन्तीति त्साखरिएमहोदयस्य मतम्। अव्ययकोषाऽपि संस्कृतशब्दकोषानामैतिह्यमधिजिगमिषद्भिर्नो विस्मर्त्तव्यः।

इमा नानाविधकोशप्रणयनपद्धतयोऽवरकालिक्यः सन्ति । वैदिकनिघण्टुषु अतिपुरातनाभिधानकोशपद्धतिर्द्रष्टुं शक्यत इति आचार्यत्साखारिए-प्रतिज्ञाने विप्रतिपत्तेरनवकाशः । यास्कस्य निरुक्ते नैघण्टुककाण्डो द्रष्टव्यः । वैदिकपदानां मुख्यार्थं प्रतिपादयितुं विहितोऽयं प्रयासः । नैगमकाण्डे दुर्बोध्यपदानां सङ्कलनमकारि, अनेकार्थानाम् । दैवतकाण्डे वसतिमुद्दिश्य देवानां नामानि निरदेशिषत । ननु निघण्टुरिति पदस्य कोऽर्थः ? निरुक्तकार आदावेव व्याचक्षे शब्दं व्युत्पिपादयिषुः । मन्त्राणामर्थनिगमयितृत्वान्निगन्तव इमे निघण्टवः स्म कथ्यन्ते । गकारो घकारः संवृत्तः, तकारस्तु टकारः । नामधेयप्रतिलम्भोऽयं वर्णविपर्ययात् । मन्त्रार्थान्निगूढार्थानवबोद्धुमिमे साहाय्यं विदधतीत्यस्माद्धेतोरिमे निगमसञ्ज्ञां लेभिरे । वेदानिमे विषयीकुर्वन्ति, न तु प्रात्यहिकजीवनमिति तु स्पष्टम् । महाभारतस्य मोक्षपर्वणि निघण्टुनिरुक्तयोरुल्लेखस्य सन्दर्भे वृषाकपिशिपिविष्टयोर्नामनिर्देशो, मत्प्रसादान्नष्टं निरुक्तमधिजग्मिवानिति शंसा धीमतामादरमर्हति ।

ननु संस्कृतवाण्या अभिधानकोशानाममरवैजयन्तीमेदिनीहलायुधादीनां नैघण्टुकपरम्परैव खलु निर्धारयितव्या । संस्कृतज्ञस्य दृष्टावुत्तरकालिक्याः सुरवाणीकोशसम्पदाया उत्सो निरुक्ते खलु विद्यते । त्साखारिए त्वत्र भिन्नदृष्टिः । अमुष्य मते महाव्युत्पत्त्यादयो बौद्धधर्मकोशा एव केवलं नैघण्टुकपारम्पर्ये यत्किञ्चिद् वर्त्तन्ते, न तु संस्कृतवाङ्मयस्य विश्रुताः कोशाः । निघण्टवो वेदविशेषपरका भवन्ति स्म । अथर्वनिघण्टुर्यथा । बौद्धजैनधर्मावलम्बिनोः शास्त्रेषु निघण्टवोऽध्येतॄणामध्ययनक्रमेऽपि निर्धारिता इति ब्यूलराख्येण संस्कृतानुसन्धातृणा सङ्केतितम् । अभिधानकोषाणां विरचने कस्यचिच्छास्त्रस्य शब्दार्थविशदीकरणं कोषकारा अचिकीर्षन्निति चेन्न । संस्कृतवाङ्मये भवभूतेः स्थानं स्पष्टीकुर्वता बरुआख्येन भारतीयग्रन्थकारेण अमरकोषप्रणयनप्रयोजनं सुकृतिनः कालिदासस्य कृतिभिः संश्लिष्टम् ।

निघण्टवो न केवलं नामानि, अव्ययानि वा, धातूनपि आददत । शब्दाभिधानकोशेषु सामान्यतस्तु केवलं नामानि अव्ययानि च निरदेशिषत । अपवादानां संख्या नादरमर्हति । पुराकाल एव नामपारायणं धातुपारायणञ्च पृथक् चक्राते । नामपारायणं कालं प्राप्याभिधानकोशस्य सहृदयहृदयग्राहि रूपं जग्राह, धातुपारायणं धातुपाठस्य । निघण्टुकोशयोरन्यदन्तरमपि कोशैतिह्याधिजिगमिषवो नोपेक्षेरन् । अभिधानकोशाः खलु श्लोकेषु व्यरचिषत । अनुष्टुभः प्रयोग एव प्राधान्येन विहितः । आर्याछन्दसः प्रयोगस्तु पुनरपि प्राग्भवः । सन्दर्भेऽस्मिन् त्साखारिए व्याडेः श्लोकं निर्दिशति—

लक्ष्मीसरस्वतीधीत्रिवर्गसम्पद्विभूतिशोभासु । उपकरणवेशरचना विधासु च श्रीरिति प्रथिता ॥

नूनं हलायुधस्याभिधानरत्नमालायान्तु छन्दसां वैभिन्न्यं सर्वानतिशेते ।

निघण्टवो गुरुमुखाच्छास्त्रश्रवणे साहाय्यं विदधति स्म । नैगमकाण्डे शब्दा अर्थमन्तरा सञ्जगृहिरे । त्साखारिए-मते प्राप्तसंस्कृताभिधानकोशास्तु कवीनां हितकाम्यया प्रणिन्यिरे ।

गुर्वर्थानां विरलानाञ्च पदानां तेषामर्थानाञ्च सङ्ग्रहात् कोशकाराः कवीनां साहित्यसिसृक्षायां साहाय्यं विदधिरे। पुरातनतमकोशकाराणां केषाञ्चिच्चिकीर्षितं पदार्थव्याख्यानमप्यासीदिति तु त्साखारिए नोपेक्षते। शाश्वतकोषस्य श्लोकोऽयं कोशकाराणां काङ्क्षां स्फुटीकरोति—

प्रसिद्धैरप्रसिद्धैश्च शब्दैरेष विनिर्मितः।
प्रसिद्धैर्ग्रन्थितुं ग्रन्थमप्रसिद्धैश्च वेदितुम्॥

अभिधानकोशस्याधीतिः काव्यं प्रणेतुकामानां कृतेऽपरिहार्या। वामनस्य काव्यालङ्कारवृत्तौ स्फुटमुपदिष्टमस्ति—'पदं हि रचनाप्रवेशयोग्यं भावयन् सन्दिग्धार्थत्वेन न गृह्णीयान्न वा जह्यादिति काव्यबन्धविघ्नः। तस्मादभिधानकोषतः पदार्थनिश्चयः कर्त्तव्य इति।' शब्दस्मृतेः शब्दानां साधुत्वनिश्चयो जायते, छन्दोविचितेर्वृत्तसंशयच्छेदः सम्पद्यते किन्तु पदार्थविनिश्चयार्थमाचार्यवामनस्य मतेऽभिधानकोषः समुपासनीयो भवति। कोशकारैरपि प्रस्तावनायामुपसंहारे वा चिकीर्षितमिदमञ्जसा व्यञ्जयाञ्चक्रे। हलायुधः कविकण्ठविभूषणार्थं कोषं प्रणिन्ये। संवित्तीनां भूषणं सत्कवीनामिति वैजयन्ती। कवीनां हितकाम्यया चेति धनञ्जयः। कवीनां सुखहेतव इति धरणीकोषः। कृपामुपेत्य सतां कवीनामिति महेश्वरः, कवेः शीघ्रकवित्वायेति शीघ्रबोधिनी। बहूनि तन्त्राणि समाहृत्य प्रणीतोऽमरकोषस्तु अद्यत्वेऽपि संस्कृतकवीनामुपजीव्यं वर्त्तते—

निघण्टूनामभिधानकोषाणाञ्च विषयवस्तुनो रूपलक्ष्ययोश्च प्रभेदो व्याख्यां नापेक्षते। त्साखारिए-मते तु तेषां कालव्यवधानदैर्घ्यमपि अनुसन्धातृभिर्मनसि निधातव्यम्।

ऊनविंशतिशतके कस्यचिदतिपुरातनाभिधानकोषस्य समुपलब्धांशस्य भागं ह्यर्न्लेनामाऽनुसन्धाता सानुवादं प्रकाश्यतां निन्ये। कोषस्यास्य प्रणेता बुद्धानुगामी आसीत्। मतः, समाख्यातः, स्मृतः, प्रोक्तः, ज्ञेयः आहुरुच्यते, कवयो विदुरित्यादिभिः पदैः श्लोकाः शृङ्गारिताः सन्ति। परवर्त्तिषु कोषेष्वपि पदानीमानि भूयोभूयः प्रयुयुजिरे। टीकाकारैरुद्धृतानां पुरातनशब्दाभिधानश्लोकानामवेक्षणात्पुराकालिककोषकाराणां प्रवृत्तिमधि सङ्केतो लभ्यते। उदाहरणार्थं हर्षचरितस्य टीकायां समुद्धृते एकस्मिन् श्लोके शिखिन्निति शब्दं व्याख्यातुं पङ्क्तिद्वयं विद्यते—

अग्निः शिखीति च प्रोक्तः शिखी वृक्षो निगद्यते।
बर्हिणश्च शिखी प्रोक्तः क्वचित्स्यात् कुक्कुटः शिखी॥

शाश्वतकोषकाराय एतदर्थमेकैव पङ्क्तिरलम्बभूव। शिखी हुताशने वृक्षे शिखिनौ केकिकुक्कुटाविति।

इति शम्।

किमर्थं काव्यं कथञ्च काव्यम्

□

आचार्यः पं० मधुसूदनशास्त्री*

□

तत्र किमर्थं काव्यं नाम कोऽर्थो यस्य तत् किमर्थम् अर्थात् अर्थोऽभिधेयरैवस्तु-प्रयोजन-निवृत्तिषु इति कोषोक्तेष्वर्थेषु कोऽर्थोऽत्र संगच्छते। अतः काव्यं किञ्चिद् वस्तु किम्? काव्यात् कस्य निवृत्तिः। काव्यशब्दस्य प्रतिपाद्यः अभिधेयः कः। काव्यस्य प्रयोजनं किम्। इति संगमिनः प्रश्ना अजागरिषुर्नानार्थत्वादर्थशब्दस्य। तत्र काव्यं किञ्चिद् वस्तु किम् अर्थात् सप्तसु पदार्थेषु कः पदार्थः।

काव्यमभावात्मकस्तु पदार्थो न, तस्य भावपदार्थत्वात्। काव्यं न समवायः। अयुत-सिद्धपदार्थानां समवायो भवति। काव्यं नायुतसिद्धः पदार्थः। काव्यं न विशेषः; यः कल्पनाया अन्ते अवसाने भवति तथा परमाण्वाकाशादिषु नित्यपदार्थेषु वर्त्तते स विशेषः। तत्रेदं काव्यं परमाण्वाकाशादिषु नित्यपदार्थेषु गणितं न, परं तेषां वर्ण्यत्वात् कल्पनाया आरम्भे मध्येऽन्ते च भवनात् तथा न। काव्यं न सामान्यम् यद्धि नित्यं सत् अनेकेषु समवायेन नित्यसम्बन्धेन वर्त्तते तत् सामान्यं भवति। तत्रेदं "त्रयी विद्या काव्यं छन्दः" इति शतपथीयश्रुतेः वेदरूपं त्रयीविद्यानामधेयं काव्यमाकल्पान्तस्थायितया नित्यं तु वर्त्तते परमनेकेषु समवायसम्बन्धेनास्य वृत्तिर्नास्ति। ततो न सामान्यरूपम्।

काव्यं न नैयायिकोक्तं कर्म। नैयायिकाः कर्मनिरूपणविषये दरिद्रा वा स्तनन्धया वा अज्ञानिन इति यावत्, अत एव कर्मेन्द्रियाणि यानि लोके शास्त्रे च व्यवह्रियमाणानि सन्ति तानि ते न मन्वते उपस्थादिभिर्व्यवहरन्तोऽपि। तेषां मते—भ्रमणरेचनस्पन्दनोर्ध्वज्वलनतिर्यग्गमनानां गमनेऽन्तर्भावात् उत्क्षेपणापक्षेणाकुञ्चनप्रसारणगमनानीति पञ्चैव कर्माणि सन्ति। परमस्मन्मते सहृदयसमवेतरसभावगुणीभूतव्यङ्ग्यगुणालंकारादोषरीतीनामुत्कर्षबोधौपयिकशब्दार्थयोरिदंप्रथम-तया प्रकाशनाख्यं कवेः कर्म काव्यमिति सिद्धान्तात् काव्यं कर्माख्यः पदार्थः। अत एव तादृशशब्दार्थयोरिदंप्रथमतया प्रकाशकः कविरित्यभिधाऽभवत्।

---

* काशीहिन्दूविश्वविद्यालयीय-संस्कृतमहाविद्यालये भूतपूर्वः साहित्यविभागाध्यक्षः।

सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति ध्वन्यालोके ? प्रथमोद्योते उक्तेः । अर्थप्रतिपादकः शब्दः काव्यमिति तल्लक्षणम् । गन्धवद् द्रव्यं पृथिवीतिवत् । तत्राऽसाधारणधर्मो हि लक्षणमित्युक्तेः काव्यं कवित्वं शब्दः, तेन नैयायिकानां मतेन शब्दस्य गुणत्वात् असाधारणधर्मशब्दरूपं तद्गुणोऽपि । वैयाकरणानां मीमांसकानामालंकारिकाणां मतेन शब्दस्य द्रव्यत्वात् काव्यं द्रव्यम् । अथ च शब्दार्थौ काव्यमिति भामहाद्युक्तलक्षणेनापि शब्दार्थयोः काव्यत्वात् काव्यं द्रव्यम् ।

काव्यात् कस्य निवृत्तिः । काव्यात् उपश्लोक्यस्तुतिरूपात् "स्तोत्रं कस्य न तुष्टये" इति सांसिद्धिकव्यवहारेण स्तुत्यप्रसादात् शिवेतरस्यानर्थस्य पापस्य तत्फलस्य दुःखस्य दारिद्र्यस्य आन्ध्यस्य कुष्ठादेः, तज्जनकस्य दुर्व्यसनस्य, दुराचरणस्य दुःसङ्गते दुर्व्यवहारस्य दुर्ज्ञानस्य दुर्गतेः दुःसहदुर्यशसः दौर्मनस्यस्य दुःशकुनस्य दुःस्वप्नादेश्च निवृत्तिः क्षतिर्विनाशो भवति । स्तुत्याया देवतायाः प्रसादोऽथ च तेन शिवेतरनिवृत्तिश्च प्रयोजनान्तर्गत एवेति प्राचामाचार्याणामभिप्रायः ।

काव्यपदस्य अभिधेयः कः ? इति विमर्शने यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद्, ऋचा तद् दृढमिति तैत्तिरीयाणां यज्ञाङ्गदाढ्र्यसम्पादकत्वेन, तदेतदृचाभ्युक्तमिति सर्वब्राह्मणानां विश्वसनीयत्वेन गृहीतत्वादृग्वेदस्य सर्ववेदेषु प्राथम्यं प्राधान्यम् । तद्विषये च जग्राह पाठ्यमृग्वेदादिति नाट्यशास्त्रे भरतोक्तेः पठ्यं काव्यं गद्यात्मकं कादम्बर्यादि, पद्यात्मकं रामायणमहाभारतरघुवंशादि, तदुभयात्मकं रामायणचम्पूभारतचम्पूप्रभृति प्रथमतया गृह्यमाणं त्रिविधम् । तदनन्तरञ्च ऋच्यध्यूढ साम गीयते इति श्रुतेः । गीतिषु सामाख्या इति छान्दसाच्च । तथा सामभ्यो गीतिमेव चेति तत्रैव भरतोक्तेः गीतिप्रधानं श्रव्यं काव्यं; प्राचीनं ककुभरागेण निर्मितं मारीचवधम्, ठक्करागेण निर्मितं राघवविजयम्, रागतालसमन्वितं गीतगोविन्दादि अर्वाचीनञ्च । ततो यजुर्वेदादभिनयानिति नाट्यशास्त्रे भरतोक्तेरभिनयात्मकं दृश्यं शाकुन्तलादिनाटकं गृह्यते । तदनु खड्गबन्धमुरजबन्धादिकं लिपिप्रधानं चित्रं काव्यं गृह्यते । एवं काव्यशब्दस्य प्रतिपाद्योऽभिधेय उपरिनिर्दिष्टानि सर्वाणि काव्यानि ।

काव्यस्य प्रयोजनं किम् ? काव्यस्य प्रयोजनावधारणसन्दर्भे एकमेव मुख्यं सकलप्राणिस्पृहणीयं कुतः कस्य हेतोरिदमिष्यते इत्येवं पर्यनुयोगानर्हं सुखं प्राञ्चोऽन्वचीयन्त । तदनु तद्धेतुलौकिकानां शास्त्रीयाणां सिद्धान्तानां व्यवहाराणाञ्च ज्ञानम् । यस्योपलब्धिः सम्पत्तिश्च— "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया" इति गीतासूक्तेर्गुरुं प्रणम्य परिपृच्छ्य सुसेवयैव । "शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन" इति कथनाश्च——

गकारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः । उकारः शम्भुरित्युक्तस्त्रितयात्मा गुरुः स्मृतः ॥ गकारो ज्ञानसम्पत्तिं [illegible]काशनम् । उकारः शिवतादात्म्यं ददातीति गुरुः

स्मृतः ॥'' इत्यागमरहस्याच्च गुरोः शुभाशिषा । सा शुभाशीः काव्यप्रणयनात् । तेन च यशः-समुल्लासः, तस्माच्च राजप्रसन्नता, तया च समीहितार्थप्राप्तिरित्येवं कारणमालारूपतोऽनुस्यूतानि प्रयोजनानि सप्त ।

कथञ्च काव्यम् ? कथञ्च काव्यं नाम काव्यशब्दनिरुक्तिनिर्मितौ कथम् । पाणिनिव्याकरणतः 'कावम्' इत्येव प्रयोगः साधुः, तत्कथं काव्यम् ? एवं हि नाम आम्नायते शास्त्रकारैः—जन्मसंस्कारविद्यादे शक्तेः स्वाध्यायकर्मणोः । ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम् ॥ स्वाध्यायस्याध्ययनशक्तेः कारणस्य ह्रासात् कार्यस्य विद्याशक्तेर्ह्रासः । ततश्च पाणिन्यादिमहर्षिप्रणीतानां सूत्रवार्तिकभाष्याणामनभ्यासात् के प्रयोगा वास्तविकाः के वा नेति जडिम्ना वावबोधन्ते केऽपि । यथा "इगन्ताच्च लघुपूर्वात्" इति सूत्रम् । अस्यार्थः । लघुः पूर्वोऽवयवो यस्य तस्मात् इगन्ताच्च प्रातिपदिकाद् भावे कर्मणि वाऽण्प्रत्ययः स्यात् तेन लघुपूर्वात् इगन्ताच्च कविशब्दात् कवेर्भावः कर्म वेति विग्रहेऽणि कावमिति रूपं निष्पन्नम् । एवञ्च कावमित्येव प्रयोगः साधुः तत्कथं काव्यम् इति ?

यत्तु केचित् पण्डितमूर्धन्या राजशेखरादयः प्राहुस्तत्तु गर्भस्रावेण गलितम् । ते कथयन्ति काव्यमीमांसायां लिखन्ति च--कविशब्दस्य कवृ वर्णे इत्यस्य धातोः काव्यकर्मणो रूपम्, किन्तु सिद्धान्तोऽत्र कवृ धातौ पवर्गीय एव बकारो न तु अन्तस्थो वकारः । अस्मिन् विषये प्रमाणत्रयमुपन्यस्यते । तेषु प्रथमम्--कवृधातोः प्राक् "रबि लबि अबि", इत्येवं पश्चाच्च क्लीवृ क्षीवृ इत्येवं धातुपाठे पठिता धातवः सर्वेऽपि पवर्गीयबकारघटिताः । तेषां प्रयोगेष्वपि करम्ब (केन जलेन रम्ब्यते इति) विलम्बः । अम्बा । क्लीबः क्षीब इत्येतेषु पवर्गीयः सः । तन्मध्यपतितन्यायेन कवृवर्णे इत्यत्रापि पवर्गीयो बकारः । तेन कवृधातोः कविशब्दः काव्यशब्दश्च न निष्पन्नौ । द्वितीयम्—यथा– अखिले संसारे सर्वैः कविः कविरिति काव्यं काव्यमिति च अन्तस्थवकारघटिता एव शब्दाः प्रयुज्यन्ते, लभ्यन्ते च ग्रन्थेषु यत्र तत्र सर्वत्र । स्वयं राजशेखर-महाशयेनाऽपि अन्तस्थवकारघटिता एव ते प्रयुक्ताः स्वग्रन्थे न तु पवर्गीयबकारघटितास्तेनापि कबृवर्णे इत्यस्माद् धातोः कविशब्दः काव्यशब्दश्च न निष्पन्नौ । तस्माद् बहूनामनुरोधो न्याय्यः । तृतीयं यथा--कुत्र अन्तस्थो वकारः कुत्र च पवर्गीयो बकार इति निर्णायिका प्राचामाचार्याणां कारिका—उदूठौ यत्र विद्येते यो वः प्रत्ययसन्धिजः । अन्तस्थं तं विजानीयात्तदन्यो वर्ग्य उच्यते ॥ यत्र यस्मिन् वकारे उत् मूलभूतो ह्रस्वः उकारो वर्त्तते यथा प्लवतेऽत्र प्लुङ्धातौ । यत्र यस्मिन् वकारे ऊठादेशो भवति यथा त्वरौ तूः । स्रिवौ धातौ स्रूः । अवौ ऊः । मवौ धातौ मूः । धुर्वौ धूः इत्यत्र (इकस्तिपौ धातुनिर्देशे इत्यनुसारम्, इका निर्देशे सप्तम्यां त्वरौ स्रिवौ इत्यादि बोध्यम्) अथ च यो वकारः प्रत्ययजः प्रत्ययेन लभ्यः यथा मायावी, तपस्वी, मेधावी, स्रग्वी इत्यत्र । अन्तस्थो वकारः सन्धिजः सन्धिकरणाज्जातो यथा भ्वादयः

प्वादीनां ह्रस्वः । ल्वादयः इत्यत्र । तमेवम्भूतं वकारमन्तस्थं विजानीयात् । तदन्यस्तेभ्य उदूठ-प्रत्ययसन्धिजेभ्योऽन्यो भिन्नः वर्ग्यः वर्गभवः पवर्गीय इष्यते स्वीक्रियते । उच्यते कथ्यते वा । तेनात्र कविशब्दस्य तन्निष्पन्नकाव्यशब्दस्य च मूले कुङ्धातोः सम्पन्नत्वात् ह्रस्व उकारः । अथ च कुङ्धातोः "अच इः" इत्यनेन इप्रत्यये ओकाररूपे गुणसन्धौ ओकारस्थाने अवादेशसन्धौ—च कविरितिरूपस्य निष्पन्नत्वात् सन्धिजोऽपि वकारः । अतोऽयमन्तस्थ एव न तु वर्ग्यः । तेन राजशेखरोक्तिः प्रलापायिता पलायिता चेति बोध्यम् ।

यत्तु कश्चिदाह—मन्मनोऽनुमनुते यदेव कव्यं तदेव काव्यम् । यतो हि कुशब्दे कवते इति भ्वादीयः । कुङ् शब्दे कौति इत्यदादीयः । कुङ् शब्दे कवति इति तुदादीयो धातुः । एवं त्रिषु धातुषु कस्मादपि तस्मादचो यदिति यत्प्रत्यये कव्यं वक्तव्यम् । एषु एव कस्मादपि "ओरावश्यके" इति ण्यत्प्रत्यये काव्यमवश्यं वक्तव्यम् । एवं वक्तव्यत्वार्थकयोरनयोः कव्य-काव्ययोः को भेदः । नास्ति भेदः इति चेन्न, कव्यं पितृभ्यो देयमन्नं द्रव्यम् । पितृणां कव्यतस्तृप्ति-र्देवानां हव्यतस्तथेत्युक्तेः । नायं योगरूढोऽपितु संज्ञाशब्दः । काव्यं कवित्वं शब्दश्चेद् गुण इतरथा कर्म महान् भेदः । ननु अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम् । तत्रात्र प्रवृत्ति-निमित्ततो भेदो वर्त्तते परं व्युत्पत्तिनिमित्तन्तु एकमेवेति चेन्न, कव्यशब्दः पितृभ्यो देयान्नस्य संज्ञा । काव्यशब्दस्तथा न । संज्ञाशब्देषु च व्युत्पत्तिनिमित्तप्रवृत्तिनिमित्तयोश्चर्चा नास्ति । एषु शब्द एव प्रवृत्तिनिमित्तम् । प्रकृतिश्च शब्दपरा तेन कव्यशब्दवानर्थ इति बोधः । परमयं बोधो निर्विकल्पो न; यतः कव्यं कव्ये कव्यानीति दिशा संख्याप्रकारकबोधस्य सत्त्वात् ।

अन्यच्च कुधातुभ्यः कोतुं कवितुं वावश्यकमिति विग्रहे काव्यं लक्ष्यम् । कोतुं कवितुं वा आवश्यकमिति लक्ष्म । तत्रात्र विशेषणदलं वर्त्तते किन्तु कोतुं कवितुं वावश्यकं किमिति विशेष्यदलं नास्तीति लक्षणवाक्यापूर्तिर्दोषः । न च यथा गन्धवती पृथिवीत्यत्र तदभावेऽपि गन्धवद् द्रव्यं पृथिवीति व्यवस्थीयते तथात्रापि व्यवस्थीयतामिति वाच्यम्, तत्र तु द्रव्यमनुस्यूतं, नवद्रव्येषु पृथिव्या अन्यतमत्वात् । एवञ्च गन्धवद् द्रव्यं पृथिवीति संगतम् । ननु अत्रापि शब्दार्थौ अनुस्यूतौ । तौ संयोज्य व्यवस्थीयतामिति चेन्न, कुधातुः शब्दनार्थकः, अतः कोतुमावश्यकः शब्द एव काव्यमिति स्यात् । तेन हि शब्दरूपाणां श्रव्य-काव्यानां मारीचवधराघवविजय-गीतगोविन्दानामेव ग्रहणं स्यात्, तेष्वेव लक्षणं सङ्गतं स्यादि-त्यर्थः । अर्थरूपाणां दृश्यकाव्यानां शब्दार्थोभयरूपाणां गद्य-पद्यतदुभयात्मकानां पठ्यकाव्यानां ग्रहणं न स्यात् । ननु नायं नियमो यच्छब्दस्यैव श्रवणम् । "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति श्रुतौ शब्दभिन्नस्य अर्थस्यात्मनो यथा श्रवणं भवति । यथा पश्यत श्रोत्रियस्योक्तिकौशलमित्याचार्याभिनवगुप्तोक्तौ उक्तेः शब्दस्य दर्शनं भवति तथा प्रकृतेऽपि संगमनीयम् । तथास्तु । परं काव्यं ग्राह्यमलङ्कारात् । काव्यशोभाकरान् धर्मानलंकारान्

प्रचक्षते इति । काव्यशोभायाः कर्त्तारो धर्मा अलंकाराः । तदुत्कर्षहेतवो गुणाः । गात्रे श्वित्रमिव स्त्रीणां काव्ये हेयं तु दूषणम् । काव्यवृत्तेस्तदाश्रयात् । इत्यादेः प्राचामुक्तेर्दोषाभावगुणालंकाररीतीनां कोतुमावश्यके चमत्कृतार्थशून्ये केवले शब्देऽभावात् काव्यत्वमेव दुर्घटम् ।

ननु कुर्वादिगणे कविशब्दस्य गणनात् कुर्वादिभ्यो ण्य इति सूत्रतो ण्यप्रत्यये सति काव्यमिति स्यादिति चेन्न, ततोऽपत्यार्थे विहितेन ण्यप्रत्ययेन निष्पन्नस्य काव्यपदस्यार्थः कवनक्रियाकर्तुः कालिदासादेरपत्यं न पतति कुलं यस्मादिति पुत्रपौत्रादिकं योनिजं काव्यं स्यात् न तु दृश्यं श्रव्यं पठ्यं चित्रमयोनिजं काव्यं स्यात् । अत्र जन्यत्वं तूभयत्रापि अतः केवलं जन्यत्वमपहाय योन्ययोनिपदं निवेश्यते । अन्यच्च एवं सति पूर्वमविवक्षितं सूत्रसिद्धमर्थं बोधयित्वा पश्चाद् विवक्षितं सूत्रासिद्धमर्थं बोधयति यत् तत्पदं निहतार्थकम् । ततश्च अविवक्षितस्य सूत्रसिद्धस्य योनिजपुत्रपौत्रादिरूपस्यापत्यार्थकप्रत्ययनिष्पन्नपदोपस्थापितस्यार्थस्य प्रत्ययेन कृतं यद् व्यवधानं तेन व्यवधानेन, अपत्यपदवाच्यत्वेनाप्रसिद्धस्य विवक्षितस्य गीतगोविन्दरघुवंशशकुन्तलादिरूपार्थस्य बोधकत्वरूपनिहतार्थकत्वं दोषश्च । अतो नायं निरुक्तिसमुद्देशः साधुप्रकारः ।

ननु कवेः कर्म स्मृतं काव्यमिति विग्रहे कवनकर्तृनिष्ठक्रियाजन्यफलाश्रयः शब्दो वाऽर्थो वा उभौ वेति मतभेदसिद्धार्थे ब्राह्मणादित्वाद्विहितेन ष्यञा निष्पन्नस्य काव्यपदस्यार्थः कवनकर्त्तरि कालिदासादौ निष्ठया निर्माणरूपया क्रियया जन्यस्य समुचितललितसन्निवेशरूपस्य फलस्याश्रयः शब्दार्थाविति चेत् शृणु--एवं हि कवनक्रिया नाम कविकर्तृका काव्यनिर्माणक्रियैव, अथ च कविर्नाम कवनक्रियायाः कर्त्ता काव्यनिर्माता । तथा च काव्यपदार्थज्ञानाधीनं कविपदार्थज्ञानं, कविपदार्थज्ञानाधीनं काव्यपदार्थज्ञानमिति अन्योन्याश्रयः स्यात्तेन हि उभयोरेव ज्ञानासंभवः । अत एव अन्योन्याश्रयाणि कार्याणि शास्त्रे न प्रथन्त इति न्यायो जाजागरीति ।

ननु यथा गोशब्दात् गवे हितं गव्यम्, गोर्विकारो गव्यम्, गवां समूहो गव्यस्तथा कोतुं कवितुं वा आवश्यकं काव्यं, कवेरपत्यं काव्यं, कवेः कर्म स्मृतं काव्यमित्याद्यपि स्यात्तथात्वे च नान्योन्याश्रयदोष इति चेन्न । अयं कविशब्दो गोशब्दवत् जातिशब्दो नास्ति । किन्तु क्रियाशब्दः । यः काव्यं निर्मिमीते स एव कविर्नान्यः सर्वः । तन्निर्माणमपि कस्यचिदेव प्रतिभावतः, तदपि कदाचिदेव । यदा सरस्वती प्रसीदति तत्र नान्यथा । कस्यचिदेव कदाचित् दयया सरस्वती प्रकाशयति इत्युक्तेः । कवित्वं दुर्लभं लोके शक्तिस्तत्र सुदुर्लभा इत्युक्तेश्च । ततश्च स दोषस्तदवस्थ एव ।

ननु ब्राह्मणादित्वात् ष्यञ् दुर्लभः । ब्राह्मणादिषु कविशब्दस्यागणनादिति चेन्न, ब्राह्मणादिराकृतिगणः । आकृतिः संस्थानम्, तां दृष्ट्वा संमेल्य ब्राह्मणादिर्गणः स्वीक्रियत इत्याचार्याणां शैली । ननु का कीदृशी वाऽऽकृतिः, किं ब्, आ, ह्, म्, अ, ण्, अ, इत्यानुपूर्वीरूपा सा । सा त्वत्र दुर्लभा । ननु ष्यञ्निष्पन्नपदस्वरूपा सा चेदपि न, तथात्वे हि प्रकल्प्यं

विदूष्यमित्यादीनामपि ष्यञन्तत्वेन ग्राह्यता स्यादिति चेच्छृणु---शुक्लयजुर्वेदस्य पञ्चदशेऽध्याये चतुर्थमन्त्रे काव्यं छन्द एतादृशः पाठो वर्तते, तस्य उव्वटमहीधराभ्यां कृतयोर्व्याख्ययोः कवेः परमात्मन इदं वेदत्रयीरूपं छन्दः "त्रयी विद्या काव्यं छन्दः" इति शतपथब्राह्मणोक्तश्रुतेः। छन्दो नाम श्रुतिः। छन्दांसि यस्य पर्णातीत्यत्र छन्दांसि श्रुतय इत्युक्तेः। देवस्य पश्य काव्यं ममार न जीर्यति। इत्यथर्वो (१०।८।३२)--क्तेश्च।

काव्यमितिः शब्दः वैदिक्या संस्कृतभाषाया एव न तु लौकिक्यास्तस्याः। तस्यास्तु कावमित्येव। यथा कृषिशब्दो लौकिकः वैदिकस्तु कार्षिः कार्षिरसीति शुक्लयजुर्वेदे। भगवानिति लौकिको भगव इति वैदिकः। ऋग्वेदं भगवोऽध्येमीति श्रुतेः। भद्रं कर्णेभिरिति वेदे। लोके तु कर्णैरित्यादि। तथा च महाजनाचारपरम्परागृहीते वेदे काव्यपदस्य निरूपितत्वाद् ब्राह्मणादिगणेऽगणितादपि कविशब्दात् ष्यञि सति काव्यशब्दसिद्धिरिति शम्। पण्डितेभ्य इदम्। त एवास्याधिकारिणो नान्ये बालाः बालस्तु बालिश इति वोपदेवः। अत एवोच्यते—

नानृषिः कवते काव्यमृषिश्च किल दर्शनात्।
विचित्रभावधर्मांशतत्त्वप्रख्या च दर्शनम्॥
स तत्त्वदर्शनादेव शास्त्रेषु पठितः कविः।
दर्शनाद्वर्णनाच्चाथ रूढा लोके कविश्रुतिः॥ इति

उपमानमर्थापत्तिश्च स्वतन्त्रं प्रमाणं न वा

□

डॉ० गजाननशास्त्री मुसलगांवकर*:

□

उपमानं नाम पूर्वानुभूतस्य कस्यचिद् वस्तुनः सादृश्यधारणेन यत्र कस्यचिन्नवीनस्य वस्तुनो ज्ञानोत्पादः। 'गोसदृशो गवयः' इति वाक्यं श्रुत्वा अरण्यं गतः कोऽपि पुरुषो यदा गोसाम्यं धारयन्तं पशुं दृष्ट्वा तं गवयपदवाच्यं मन्यते। इदमनुभवात्मकं ज्ञानं तस्य उपमान-साहाय्येन जातमस्ति। अत उपमाने वस्तुनोः सादृश्यज्ञानं हेतुरस्ति। तथा 'गोसदृशो गवय' इति वाक्यस्य स्मरणं सहकारि वर्त्तते। सादृश्यमपि अनेकविधं भवति--द्वयोरेकान्तसादृश्यम्, कतिपयांशसादृश्यम्—यथा, गो-महिषयोः, तथा--आंशिकसादृश्यम्--यथा, मेरु-सर्षपयोः, किन्तु भाष्यकारेण उपमानसिद्धयर्थमन्यानि सादृश्यानि निरस्य प्रसिद्धसादृश्यमेवोपयोगीति निश्चितम्। उपमाने साम्यबोधकानां धर्माणां वैपुल्यं नावगाहते महत्त्वम्, किन्तु साम्यस्य ख्यातिस्तन्महत्त्वञ्च। अतः प्रसिद्धसादृश्यबलेन यत्र संज्ञा-संज्ञिनोः सम्बन्धोऽवस्थाप्यते तदुप-मानमित्युच्यते नैयायिकैः[1]।

उपमानस्य स्वतन्त्रप्रमाणत्वाभ्युपगमे दार्शनिकानां विप्रतिपत्तिः। चार्वाकस्तावत् उपमानस्य प्रामाण्यं नाङ्गीकरोति। दिङ्नागो हि उपमानं प्रत्यक्षान्तर्गतमेव मन्यते[2]। कणादो हि उपमानमनुमानेऽन्तर्भूतमिति वदति[3]। यतो हि गोसादृश्येन अयं पशुः गवयोऽस्ति, इति ज्ञानं हेतुनिर्भरतया अनुमानस्यैवायं प्रकारः, नान्यत् किञ्चिदिति। सांख्यास्तावत् उपमाने, शब्द-प्रत्यक्षयोरांशिकीं स्थितिं मन्वते। गवये गोसादृश्यज्ञानं प्रत्यक्षेण भवति, तथा 'गोसादृश्य-वान् पशुर्गवयः' इति प्रतीतिराप्तोपदिष्टवाक्येन भवति[4]। नैयायिकोऽपि भासर्वज्ञ उपमानं

---

* भूतपूर्वो मीमांसाविभागाध्यक्षः, काशीहिन्दूविश्वविद्यालयीय—संस्कृतमहाविद्यालयस्य।

१. समाख्यासम्बन्धप्रतिपत्तिरुपमानार्थः--न्या० वा० १।१।६

२. न्या० वा०—१।१।६।

३. उपस्कारः, वै० सू०-९।२।५।

४. सां० त० कौ० कारिका ५

शब्दान्तर्गतं मन्यते । जैनाश्च उपमानं प्रत्यभिज्ञामात्रमिति वदन्ति[१] । मीमांसका वेदान्तिनश्च उपमानं स्वतन्त्रं प्रमाणमित्युद्घोषयन्ति[२] ।

अन्यान्यप्रमाणेषु अंशतः अवलम्बितमपीदं प्रमाणं स्वतन्त्रमेवेति वस्तुस्थितिः । उपमाने तावत् कश्चन मिश्रितो व्यापारो लक्ष्यते । 'गवयः गोसदृशः पशुरस्ति' अत्रांशे शब्दस्य गवये गोसादृश्यानुभवे प्रत्यक्षस्य । 'अयमेव गवयः'—अत्रांशे पूर्ववाक्यस्य स्मृतिः, तथा अनुमानसत्ता भवतु नाम तथापि 'गवयपदस्य वाच्यः अयमेव गवयपशुः' अत्रांशे उपमानं स्वतन्त्रमेव प्रमाणम्, यतोऽयमंशः कस्मिन्नपि प्रमाणे, नान्तर्गतो भवति ।

मीमांसकास्तावत् अस्याऽभ्युपगमे किञ्चिद्वैलक्षण्यं प्रदर्शयन्ति—यथा अनुपलब्धेरभावविषयकत्वादभाव इति नामान्तरं, तथा उपमानस्यापि सादृश्यविषयकत्वात् सादृश्यमिति नामान्तरम् । तच्च सादृश्यं प्रमाणं दृश्यमानव्यक्तिप्रतियोगिकसादृश्यविशिष्टाऽदृश्यमानव्यक्तिविषयां बुद्धिमुत्पादयति[३] । तथाहि—गवयदर्शनं, गवयप्रतियोगिकसादृश्यविशिष्टगोस्मरणस्य हेतुः । गवयदर्शने सति अनेन सदृशी मदीया गौः इति ज्ञानं जायते । मीमांसकमते उपमानस्थले गवयदर्शनस्यैव करणत्वं स्वीक्रियते[४] । उपमानस्य प्रमेयत्वञ्च सादृश्यस्य सादृश्यविशिष्टव्यक्तेर्वा अस्ति । एतदभिप्रायेणैव पार्थसारथिरुदाजहार—'यथा गवयदर्शनं गोस्मरणस्येति ।' अत्र सादृश्यविशिष्टव्यक्तेः प्रमेयत्वाभिप्रायेण । वार्तिककारोपि तत्समर्थयति[५] । सादृश्यस्य प्रमेयत्वपक्षेण, पूर्वं दृष्टे, गवयदर्शनकाले च स्मर्यमाणे गवि, दृश्यमानगवयप्रतियोगिकसादृश्यज्ञानमुपमानफलम् । न च शक्तिग्रहः उपमानफलं, तस्य 'गोसदृशो गवय' इत्यतिदेशवाक्येनैव जातत्वात् । सादृश्यस्वरूपञ्च 'तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् ।' एवञ्च—अर्थान्तरगतभूयोधर्मवत्त्वं सादृश्यस्वरूपम्, यतो हि व्यक्त्यन्तरवर्तिधर्मसदृशधर्मवत्त्वमेव सादृश्यम्, अत एव व्यक्त्यन्तरवर्तिधर्मसदृशधर्माणामाधिक्ये सादृश्यप्रकर्षः सुसदृशमिति, अल्पत्वे च अप्रकर्षं ईषत् सदृशमिति । नेदं प्रत्यक्षं, चक्षुःसन्निकर्षातिवर्तिन्यां गवि जायमानत्वात् । न स्मृतिः, पूर्वमेतादृशाननुभवात्; तत्पूर्वकस्मृतेः । गोमात्रज्ञानं तु स्मृतिरेव । नाप्यनुमानं, व्याप्ति-तत्प्रतिसन्धानपूर्वकत्वाभावात् सदृशदर्शनात् इत्यनेन ऐन्द्रियकसादृश्यज्ञानस्य उपमानत्वनिरासः । अवशिष्टेन

१. प्रमेयकमलमार्तण्ड—पृ० ९७–१००
२. शा० दी० पृ० ७४-७६, वेदा० परि० परि० ३
३. उपमानमपि सादृश्यमसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति ।—पार्थसा० शा० दी०
४. गवयदर्शनं तत्करणम्—गागाभट्ट—भा० चि०
५. तस्मात् यत् स्मर्यते तत् स्यात् सादृश्येन विशेषितम् ।
प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥—श्लो० वा०

च साद‍ृश्यदर्शनानुबन्धिनः भूयोऽवयवसामान्यज्ञानादेः साद‍ृश्यस्य च पृथक्‍त्वान्तरम्। इति सर्वं मनसि निधायैव प्रभाकरः 'सद‍ृशदर्शनात् तत्सद‍ृशवस्त्वन्तरगतसाद‍ृश्यज्ञानमुपमानम्' इति उपमानं लक्षितवान्। तच्च साद‍ृश्यं हि न द्रव्यम्, गुणकर्मणोरपि वृत्तेः, गन्धादयो हि परस्पर-सद‍ृशाः प्रतिभान्ति, गन्धो गन्धान्तरेण, तथा रूपं तथा क्रिया। अत एव न गुणकर्मणी। नापि सामान्यम्, अनुवृत्तप्रत्ययनिमित्तत्वाभावात्। भूयोऽवयवसामान्यमपि न साद‍ृश्यम् प्रतीति-वैलक्षण्यात्। साद‍ृश्यं हि सप्रतियोगिकमेव प्रतीयते 'अयमनेन सद‍ृशः' इति। तत्तु तद्व्यञ्ज-कम्, तत्रैव साद‍ृश्यप्रतीतेः। तस्मात् तत् पृथक्‍त्वान्तरम्। व्यक्त्यन्तरधर्माणां व्यक्त्यन्तरे असम्भवात्, तत्सद‍ृशधर्मस्वीकारे चात्माश्रय इति मन्यते प्राभाकरः।

किन्तु सामान्ययोगातिरिक्तमन्यदेव तत्त्वं साद‍ृश्यमिति मन्वानस्य प्राभाकरस्य प्रकर्षाऽ-प्रकर्षभेदः किंनिमित्त इति चिन्तनीयमेव। प्रमाणत एव प्रमेयस्य सिद्धिरिति प्रमाणं विना साद‍ृश्यस्य तत्त्वान्तरत्वं न युज्यते। उपमानस्य प्रमेयन्तु गवयप्रतियोगिकसाद‍ृश्यविशिष्टा गौः, तन्निष्ठं गवयसाद‍ृश्यं वा। तेनोभयेनैव इन्द्रियसन्निकर्षाभावात् न तस्य प्रत्यक्षेऽन्तर्भावः[1]। अनुमानज्ञानन्तु गृहीतसम्बन्धस्यैव पुरुषस्य भवति, उपमानन्तु अगृहीतसम्बन्धस्यापि उपजायते इति नानुमानेऽन्तर्भावः।

केचन तावत् अनुमाने तदन्तर्भावयितुं चेष्टन्ते। तथाहि—'गौः' गवयप्रतियोगिक-साद‍ृश्यवान्, गवयनिष्ठस्वसाद‍ृश्यप्रतियोगित्वात्। यद् यत्साद‍ृश्यप्रतियोगि, तत् तत्सद‍ृशं द‍ृष्टम्। यथा देवदत्तो यज्ञदत्तनिष्ठसाद‍ृश्यप्रतियोगीति देवदत्तो यज्ञदत्तसद‍ृशो द‍ृष्टः, अथवा गौः गवयनिष्ठ-स्वसाद‍ृश्यप्रतियोगीति गौः गवयसद‍ृशो द‍ृष्टः। यथा यमलयोर्देवदत्त-यज्ञदत्तयोर्मध्ये देवदत्तो यज्ञदत्तेन सद‍ृश इति यज्ञदत्तोऽपि देवदत्तेन सद‍ृशो भवति, तथा गवयो यदि गोसद‍ृशस्तदा गौरपि गवयसद‍ृश एवेत्यनुमानं, न ततः पृथगिदं प्रमाणम्।

किन्तु नैतद्युक्तम्, तथाहि—यः पुरुषः परस्परं सद‍ृशौ गो-गवयाविति द्वावर्थौ युगपन्न द‍ृष्टवान्, एकां गामेव नगरे द‍ृष्टवान्, तदनन्तरं वने गवयं पश्यति, सोऽपि 'अनेन सद‍ृशी मदीया गौः' इत्येवं गां गवयप्रतियोगिकसाद‍ृश्यविशिष्टामुपमिनोत्येव, नानुमिनोति; इति नानुमानेऽन्तर्भावः।

अयमभिप्रायः—यत्र गो-गवयौ युगपद् द‍ृष्टौ तत्र तु गवि गवयनिष्ठसाद‍ृश्यप्रतियोगित्वं प्रत्यक्षेण गृहीतमेवेति पुनश्च वने केवलगवयदर्शनेन 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमि'ति

---

१. तस्मात् यत् स्मर्यते तत् स्यात् इति, तथा—

प्रत्यक्षेणावबुद्धेऽपि साद‍ृश्ये गवि च स्मृते।

विशिष्टस्यान्यतोऽसिद्धेरुपमानप्रमाणता॥—श्लो० वा०

न्यायात् गोस्मरणे जाते गवि गवयनिष्ठसादृश्यप्रतियोगित्वस्यापि स्मरणं सम्भवति, तेन च स्मृतेन हेतुभूतेन गवयनिष्ठसादृश्यनिरूपितगोनिष्ठप्रतियोगित्वेन गवि गवयप्रतियोगिकसादृश्यस्य अनुमितिः संभवति, भूत-भविष्यल्लिङ्गस्मरणेन भूतभविष्यल्लिङ्गचनुमितिरिव। यत्र च गो-गवयौ युगपन्न दृष्टौ तत्र तु गवि गवयनिष्ठसादृश्यप्रतियोगित्वस्य अनुभवाऽभावान्न स्मरणं सम्भवति, न चापि वने केवलं गवयं पश्यतो हेतुभूतं गवि, गवयनिष्ठसादृश्यप्रतियोगित्वं प्रत्यक्षं, येन अनुमानं स्यात्। तस्मान्नगरे केवलं गामुपलभ्य तदनन्तरं वने केवलं गवयं पश्यतो नोक्तानुमानसंभवोऽस्तीति, तत्र उपमानेनैव गवयप्रतियोगिकगोनिष्ठसादृश्यस्य प्रमितिर्भवतीति।

न चानेन सदृशी मदीया गौः इत्येवं गवयप्रतियोगिकगोनिष्ठसादृश्यस्य ज्ञाने जाते अर्थादेव गवये गोप्रतियोगिक-सादृश्यस्यापि ज्ञानं संभवत्येवेति गवि गवयनिष्ठगोप्रतियोगिक-सादृश्यप्रतियोगित्वस्यापि ज्ञानं जातमिति ज्ञातेन हेतुभूतेन गवयनिष्ठसादृश्यप्रतियोगित्वेन गवि गवयप्रतियोगिकसादृश्यस्य उक्तरीत्या अनुमितिरेव किं न स्यात् इति वाच्यम्। पश्चाज्जातेनापि हेतुज्ञानेन पूर्वभाविज्ञानविषय-विषयिकाऽनुमितेरसंभवात्, पूर्वं ज्ञातस्यैव अनुमापकत्व-नियमात्।

किञ्च—फलभूते गवयप्रतियोगिकगोनिष्ठसादृश्यज्ञाने प्रथममेव जाते सति तदनन्तरं तदनुमानापेक्षाऽभावात्। अनुमाने कृतेऽपि तस्य प्रामाण्यं न स्यात्, गृहीतस्यैव ग्रहणात्। ननु प्रथमं हेतुज्ञानमेव किं न स्यादिति चेन्न, गवयदर्शनेन गोस्मृतिः, गोस्मरणे च गोप्रतियोगिक-सादृश्यस्य गवये ज्ञानं, तदनन्तरं च गवि, गवयनिष्ठसादृश्यप्रतियोगित्वस्य स्मरणं, तेन च स्मृतेन अनुमितिरित्येव वक्तव्यं स्यात्, तत्र गवयदर्शनेन गोस्मृतौ सादृश्यज्ञानं विना गोस्मरणमेव न संभवति, नतरां गवि गवयनिष्ठसादृश्यप्रतियोगित्वस्येति न हेतुज्ञानं पूर्वं संभवति। न चैवं गोस्मरणे सादृश्यस्यैव हेतुत्वात्, गवि गवयप्रतियोगिकसादृश्यज्ञानं विना न गोस्मरणं, गोस्मरणं विना च न गवि गवयप्रतियोगिकसादृश्यज्ञानमिति परस्पराश्रय इति वाच्यम्। गवयप्रतियोगिकसादृश्यविशिष्टगोरेव प्रमितिस्वीकारात्।

ननु उपमितिकारणीभूते गवयनिष्ठगोसादृश्यज्ञाने जाते हेतुभूतस्य गवि गवयनिष्ठसादृश्यप्रतियोगित्वस्यापि ज्ञानं स्यादेवेति तेनानुमानमेव स्यादिति चेन्न, अद्वैतिभिः गोनिष्ठगवयसादृश्योपमितिं प्रति गवयनिष्ठगोसादृश्यज्ञानस्य करणत्वस्वीकारेऽपि मीमांसकैस्तस्य करणत्वाऽस्वीकारात्, गवयदर्शनस्यैव करणत्वस्वीकारात्, भाट्टचिन्तामणिकारेणाऽपि समर्थितमिदम्[1]। उपमिनोतीति लोकप्रतीतिरपि। तस्मान्नानुमानम्। पदज्ञानजन्योपस्थितेस्तदानीमभावात् शाब्दे अन्तर्भावस्य त्वाशङ्कापि नास्ति। ततश्च न शाब्दत्वम्। तस्मात् उपमानं स्वतन्त्रं प्रमाणम्।

१—एवञ्चारण्यकवाक्यार्थज्ञानवतोऽरण्ये गवयदर्शनं तत्करणं, तत्सादृश्यविशिष्टो गौरिति ज्ञानं प्रमा, वाक्यार्थस्मरणमवान्तरव्यापारः।

अर्थापत्तिरपि स्वतन्त्रं प्रमाणम्

अर्थापत्तिरपि दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते इत्यर्थकल्पना, यथा जीवतो देवदत्तस्य गृहाभावदर्शनेन बहिर्भावस्य अदृष्टस्य परिकल्पना। इति भाष्यम्। अत्र दृष्टार्थापत्तिः श्रुतार्थापत्तिरिति द्वयाभिप्रायेणाह – दृष्टः श्रुतो वेति। अत्र भाष्ये "दृष्टः श्रुतो वार्थोऽन्यथा०" इत्येवं दृष्टपदं श्रुतपदं चोक्तं, तत्र दृष्टशब्दस्य येन केनापि प्रमाणेन प्रतीतार्थपरत्वात् श्रुतार्थस्यापि ग्राहकत्वेन श्रुतशब्दो व्यर्थः स्यादिति श्रुतशब्दस्य सार्थक्यमुपपादयितुं दृष्टपदेन दृष्टार्थापत्तिरुक्ता। श्रुतपदेन श्रुतार्थापत्तिरुक्ता। तत्र दृष्टार्थापत्तिस्तु प्रमेयस्य उपपादकस्य रात्रिभोजनादेर्ग्राहिणी भवति, श्रुतार्थापत्तिस्तु प्रमाणस्यैव उपपादकस्य ग्राहिणी (कल्पिका) भवतीति दृष्टार्थापत्तितः श्रुतार्थापत्तेर्वैलक्षण्यमुपपादयितुं श्रुतशब्दग्रहणं भाष्यकारेण कृतम्। यथा 'पीनो-देवदत्तो दिवा न भुङ्क्ते' अत्र दिवा भोजनस्य निषेध एव। पीनत्वञ्च दृष्टं, तच्च भोजनं विना नोपपद्यते इति उपपादकस्य रात्रिभोजनस्य कल्पना। अनुपपन्नं च पीनत्वं कल्पकम्। एवञ्च प्रमितस्य अर्थस्य अर्थान्तरेण विना अनुपपत्तिमालोच्य तदुपपत्तये या अर्थान्तरकल्पना सा अर्थापत्तिरिति पार्थसारथिः। अत्र 'प्रमितस्ये'त्युक्त्या अनुपपन्नस्य पीनत्वादेः कल्पकस्य यत्र भ्रान्तिरेव तत्र उपपादककल्पनायां सत्यामपि अर्थापत्तेः प्रामाण्यं नेष्टं हेत्वाभासेन अग्न्यनुमानवदिति सूचितम्।

तार्किकास्तावत् धूमेन तत्कारणस्य वह्नेरनुमानमिव अत्रापि पीनत्वेन तत्कारणस्य रात्रिभोजनस्य अनुमानमेव, दिवाभोजनस्य च निषेधात्। तथा जीवतो गृहाभावेन बहिर्भावस्य अनुमानमेवेति वदन्ति। यतो हि यदि अनुपपन्नाद् या उपपादकस्य कल्पना सा अर्थापत्तिरित्युच्यते, तर्हि एषा कल्पना तु अनुमानमेव। अनुमानस्थलेऽपि वह्निं विना अनुपपन्नादेव धूमात् वह्निः कल्प्यते, तस्मात् नार्थापत्तेः प्रमाणान्तरत्वं, किन्तु अनुमाने एव तस्यान्तर्भावः।

प्राभाकरैकदेशी कश्चन तदेवं परिहरति—अर्थापत्तेः अन्तर्भावः स्यात्, यदि अनुपपन्नं गमकं स्यात्, नैवमस्ति, किन्तु अर्थापत्तिस्थले यत् अनुपपन्नं, तदेव गम्यं भवति। न च अनुमाने अनुपपन्नं गम्यमिति द्वयोर्भेदः। जीवन् देवदत्तो गृहे नास्तीत्यत्र बहिर्भाव एव गम्यते। स च जीवतो देवदत्तस्य गृहाभावेन विना अनुपपन्नः, इति अनुपपन्नमेव अर्थापत्तौ गम्यम्, अनुमाने च वह्न्यादेरुपपादकस्यैव गम्यत्वात्, अनुपपन्नस्य च धूमादेः गमकत्वात् वैपरीत्यमिति नार्थापत्तेरनुमानेऽन्तर्भावः समुचितः।

परमत्र प्राभाकरैकदेशी भ्रान्तिमुपगत इति प्रतिभाति—यद्यपि जीवतो गृहाभावेन बहिर्भाव एव गम्यते (कल्प्यते), जीवतो गृहाभावश्च बहिर्भावं विना अनुपपन्नः सन् कल्पकः, तथापि अनेनैकदेशिना उपपादकस्यैव बहिर्भावस्य अनुपपन्नत्वं भ्रान्त्याऽवगतम्। तेन प्रभाकर-

सिद्धान्तेन विरोधो भवेत्। उक्तञ्च तत्सिद्धान्ते अनुपपन्नमेव गमकं, उपपादकञ्च गम्यम्[1]। ननु उपपादकात् अनुपपन्नेऽर्थे या बुद्धिस्तस्या अर्थापत्तित्वे को दोष इति चेत्, धर्मशास्त्रीयः कोऽपि दोषो नास्ति, किन्तु अर्थापत्तिस्थले उपपादकात् अनुपपन्नविषया बुद्धिर्न भवति। यदि उपपादकात् अनुपपन्नेऽर्थे बुद्धिः (कल्पना) स्यात्, तदा उपपादकात् वृक्षत्वात् शिंशपात्वेऽपि बुद्धिः स्यादिति वृक्षत्वदर्शनेन शिंशपात्वं कल्प्येत, न चैवं युक्तम्, शिंशपात्वेनैव वृक्षत्वस्य कल्प्यमानत्वात्। तस्मादनुपपन्नमेव गमकं, नोपपादकम्। यथा पीनो देवदत्त इत्यत्र दृष्टस्यैव पीनत्वस्य अनुपपन्नत्वं गमकत्वञ्च, अदृष्टस्यैव रात्रिभोजनस्य उपपादकत्वं गम्यत्वञ्च। तथा जीवन् देवदत्त इत्यत्रापि दृष्टस्यैव जीवतो गृहाभावस्य अनुपपन्नत्वं गमकत्वञ्च युक्तम्। अदृष्टे तु अनुपपन्नत्वज्ञानमेव अनुपपन्नमिति अदृष्टो बहिर्भाव एव उपपादको गम्यश्चेति विज्ञेयम्। न च बहिर्भावस्यापि दृष्टत्वमिति वाच्यम्। कल्प्यमानस्यापि दृष्टत्वे कल्पनानुपपत्त्या अर्थापत्तेः प्रमाणान्तरत्वविलयप्रसङ्गात्।

प्राभाकरः अर्थापत्तेरनुमानापेक्षया भिन्नं प्रामाण्यमेवमुपपादयति—अनुमानस्थले हि या धूमस्य अग्निं विनाऽनुपपत्तिः सा अविनाभावनिबन्धना भवति। अर्थापत्तिस्थले तु नैवमस्ति, येन अर्थापत्तेरनुमानेऽन्तर्भावः स्यात्, किन्तु संशयापत्तिनिबन्धना अनुपपत्तिर्भवति। यस्य हि जीवनं गृहसम्बन्धि एव प्रायशोऽवगतं, तस्य गृहाभावे दृष्टे जीवनं सांशयिकं भवद् बहिर्भावकल्पनया समाधीयते। अर्थात् बहिर्भावकल्पनायां जीवनसंशयापत्तिरेव हेतुः, संशयाभावे जीवनसमाधानमनर्थकं स्यात्। ततश्च बहिर्भावकल्पनायाः प्राक् जीवनस्य सन्दिग्धत्वात् न लिङ्गत्वम्। यतो हि न हि सन्दिग्धं लिङ्गं भवति। एवं पीनो देवदत्त इत्यत्र पीनस्य पीनत्वे दृष्टत्वे सति संशयितो दिवाभोजनाभावः रात्रिभोजनेन समाधीयते। ततश्च जीवन् देवदत्तो गृहे नास्तीत्यत्र बहिर्भाव एव अनुमानेन साध्यः, तत्र च जीवनस्य, गृहाभावस्य वा हेतुत्वं वक्तव्यम्। किन्तु जीवनस्य हेतुत्वं न संभवति, सन्दिग्धत्वात्। न च गृहाभावमात्रस्य हेतुत्वं सम्भवति व्यभिचारित्वात्। यत्र मृते सति पुरुषे तस्य बहिर्भावो नास्त्येव, तत्रापि गृहाभावमात्रस्य सत्त्वात्। अर्थात् जीवनरहितं च गृहाभावमात्रं मृतेऽपि सद्भावात् अनैकान्तिकम्, न बहिर्भावमनुमापयितुमलम्। अतः अनुमानाऽसम्भवाद् अर्थापत्तिः स्वतन्त्रमेव प्रमाणम्।

१—विना कल्पनयाऽर्थेन दृष्टेनानुपपन्नताम्।
नयता दृष्टमर्थं या साऽर्थापत्तिस्तु कल्पना॥
अभावेन गृहे भावो बहिष्कल्पनया विना।
नयताऽनुपपन्नत्वं कल्प्यमानो बहिर्यथा॥
गम्यस्याऽनुपपन्नत्वमिह कल्पनया विना।
मानान्तरविरोधेन सन्देहापत्तिलक्षणम्॥—प्र० पं०

किञ्च—न च जीवतो गृहाभावेन बहिःसत्त्वानुमानं युक्तम्, विशेषणस्य जीवनस्य सन्दिग्धत्वात् अप्रत्यक्षत्वाच्च। जीवनं हि देवदत्ते दृष्टे एव असन्दिग्धं प्रत्यक्षं च स्यात्, तदा तु देवदत्ते बहिर्दृष्टे बहिःसत्त्वमपि प्रत्यक्षमेव स्यादिति नाऽनुमीयेत। गृहे दृष्टे च बहिःसत्त्वं बाधितमेव स्यात्। अनुमानापेक्षया अर्थापत्तेरयं विशेषः-अनुमाने निश्चितं गमकम्, अर्थापत्तौ न सन्दिग्धं गमकम्। संशयश्चात्र पूर्वदृष्टरूपस्य विसंवादाद् (वैपरीत्यात्) भवति। यथा—देवदत्तो गृहे एव सदा दृष्ट इति गृहे इदानीमदर्शनेन संशयो भवति—'देवदत्तो जीवति वा न वे' ति। प्रभाकरेणाऽपि समर्थितोऽयं विचारः[1]। यस्मिन्नकल्पिते योऽर्थः प्रमितोऽपि दृष्टरूपान्तराभावेन संशयरूपामनुपपत्तिं भजते सोऽर्थः स्वगतसन्देहव्युदासाय तस्यार्थान्तरस्य कल्पनां प्रसूते सा चार्थापत्तिः। प्रमाणप्रतीतश्चार्थो दृष्टरूपार्थान्तराभावेन संशयमापन्न एव अर्थापत्तेर्जनक इति दर्शनबलादाश्रीयते। यथाहि अनुमानस्य निश्चितं लिङ्गं जनकं तथाऽर्थापत्तेः सन्देहग्रस्तमिति नास्ति विरोधः। अतएवानुमानादपि भेदः। निश्चित एव धूमः अग्नेर्गमको न तस्य किञ्चिदर्थान्तरमनुपपत्त्या आपादकमस्ति, गृहाभावस्तु विद्यमानताया अनुपपत्तिमातनोति, तेन गृहाभावेन विद्यमानतैव बहिर्देशसम्बन्धकल्पनायामभूतायामनुपपत्तिमापादिता स्वात्मनो बहिर्देशसम्बन्धं कल्पयतीति भिन्ना अनुमानादर्थापत्तिः। तदेवं गृहाभावो बहिर्भावकल्पनया विद्यमानताया अनुपपत्तिमापादयन् बहिर्भावं कल्पयति। अथवा विद्यमानतैव गृहाभावेन अनुपपत्तिमापादिता स्वोपपत्तये बहिर्देशसम्बन्धमुपकल्पयतीति। विद्यमानता हि देवदत्तस्य गृहाधिकरणैव, येन नाम प्रतीता, तस्य बहिर्देशसम्बन्धे अप्रत्याकलिते गृहाभावदर्शनेन देवदत्तस्य विद्यमानता प्रमाणान्तरप्रतीतापि सन्देहमावहति—'गृहे देवदत्तः अविद्यमानः कथं विद्यमान इति।'

किन्तु तार्किक उपपादितं प्राभाकरमतं निरस्यति—यथा अनुमानपक्षे प्राभाकरोक्तरीत्या सन्दिग्धस्य जीवनस्य अनुमापकत्वं न सम्भवति तथा प्राभाकरपक्षे बहिर्भावकल्पकत्वमपि न सम्भवति। तथाहि— कथं हि 'जीवति मृतो वा देवदत्तः' इति सन्दिहानः तस्य बहिर्भावं कल्पयेत्? नहि भावाऽभावसंशयस्य बहिर्भावकल्पनया अपनोदः संभवति। सर्वत्र हि संशयस्य निदानोच्छेदात् उच्छेदो भवति, अन्यतरपक्षावधारणाद् वा। अर्थात् 'स्थाणुर्वा पुरुषो वा' इत्यत्र स्थाणुत्वनिश्चयात् पुरुषत्वनिश्चयाद् वा संशयोच्छेदः। इत्यनेन जीवनं सांशयिकं भवद् बहिर्भावकल्पनया समाधीयते, अर्थात् जीवनसंशयो बहिर्भावकल्पनया समुच्छिद्यत इति निरस्तम्।

१. "देशेन हि विनाभावो न कदाचन दृश्यते।
विनाभावेन सिद्धोऽपि तेन सन्देहमार्च्छति॥'
"तत्सन्देहव्युदासाय कल्पना या प्रवर्तते।
सन्देहापादकादर्थादर्थापत्तिरसौ स्मृता॥'

न च बहिर्भावकल्पनया तावन्निदानोच्छेदः, इति बहिर्भावकल्पनया जीवनसंशयनिदानस्योच्छेदाऽसंभवः, यतो जीवनस्य प्रायेण गृहसम्बन्धित्वात्। अत्र तु गृहाऽसत्त्वमेव जीवनसंशयहेतुत्वेन उपन्यस्तम्। यतो गृहाऽसत्त्वदर्शनेनैव देवदत्तजीवने संशयो जातः। न चासौ गृहाऽभावः (गृहाऽसत्त्वं) बहिर्भावे कल्पिते सति समुच्छिद्यते। गृहाऽसत्त्वसमुच्छेदस्य गृहसत्त्वाधीनत्वात्, प्रत्युत अनिष्टमापद्यते, तथाहि—बहिर्भावे कल्पिते तु संशयनिदानं, गृहाऽसत्त्वमेव दृढं भवति, यतो बहिर्देवदत्तस्ततो गृहे नास्त्येव। अतः संशयनिदानस्य गृहाऽसत्त्वस्य बहिर्भावेन दार्ढ्ये सति कथं निरासः स्यात्? संशयोच्छेदहेतुः अन्यतरपक्षावधारणमपि नास्ति। सदा देवदत्तो गृहे एव दृष्ट इतीदानीं गृहेऽदर्शनेन संशयो भवति—'देवदत्तो जीवति वा न वेति।'

तत्र नैयायिकः कथयति—यथा अनुमानपक्षे भवदुक्तरीत्या सन्दिग्धस्य जीवनस्य अनुमापकत्वं न संभवति, तथा बहिर्भावकल्पकत्वमपि न संभवति। न चात्र बहिर्भावकल्पनया जीवनाभावावधारणं संभवति, जीवनाभावविरोधिनो बहिर्भावस्य कल्पितत्वेन सत्त्वात्। नहि बहिर्वर्तमानस्य जीवनाभावो वक्तुं शक्यते। न चापि जीवनाभावावधारणं युक्तं, तथा सति तद्विरोधिनो बहिर्भावस्यैव कल्पना न स्यात्। बहिर्भावकल्पनाया एव चार्थापत्तिफलत्वादिति जीवनाभावावधारणपक्षानुपपत्तिप्रतिपादनमुपेक्ष्य बहिर्भावावधारणपक्षं निरस्यति। जीवन-बहिर्भावयोः परस्परं भेदात् कथं बहिर्भावावधारणेनाऽपि जीवनभावावधारणं स्यात्? नहि यज्ञदत्तसत्त्वेन देवदत्तसत्त्वस्यावधारणं संभवति, प्रत्युत जीवनाभावविरोधिनो बहिःसत्त्वस्य जीवनविरोधिनश्च गृहाऽसत्त्वस्य प्रतिसन्धानाज् जीवने संशय एव दृढः स्यात्। जीवन् देवदत्तः सदा गृहे एव दृष्ट इति गृहाऽसत्त्वस्य जीवनविरोधित्वम्। न चापि जीवनं बहिर्भावसम्बद्धम्, येन बहिर्भावकल्पनया तत्सम्बद्धस्य जीवनस्यावधारणं स्यात्। न च गृहाभाववतो जीवनं बहिर्भावसम्बद्धमेवेति वाच्यम्, बहिर्भावस्यैव गृहाभाववतो जीवनेन सम्बद्धत्वात्। अतएव सिद्धान्ते जीवतो गृहाभावेन बहिर्भावः कल्प्यते। न च गृहाभाववतो जीवनमेव बहिःसत्त्वसम्बद्धं किं न स्याद् विनिगमनाविरहादिति वाच्यम्। यथाहि धूम एव व्यापकीभूतवह्निसम्बद्धः, न च वह्निः धूमसम्बद्धः, तथा बहिःसत्त्वमेव, जीवनसम्बद्धम्। न च जीवनं बहिःसत्त्वसम्बद्धमिति न्यायस्यैव विनिगमनायाः सत्त्वात्। जीवनं हि गृहसत्त्वेऽपि भवति, बहिःसत्त्वेऽपि भवति। बहिःसत्त्वन्तु गृहसत्त्वे सति न भवतीति बहिःसत्त्वापेक्षया जीवनस्य व्यापकत्वं ज्ञेयम्।

अपि च—यतो गृहाभावोऽपि न जीवननिर्णयं कर्तुं शक्नोति, ततो गृहाभावमूलकार्थापत्तिरपि न जीवननिर्णयं कर्तुं शक्नोति। गृहेऽभावं दृष्ट्वैव यतोऽर्थापत्त्या बहिर्भावः कल्प्यते। अतोऽर्थापत्तेर्गृहाभावमूलकत्वम्। नहि एवं संभवति—यस्माद् देवदत्तो गृहे नास्ति, तस्माद् जीवति, प्रत्युत पूर्वनिश्चितमेव जीवनं गृहाभावादेव सन्दिग्धं, कथं तत एव निर्णीयते? नहि संशयहेतुरेव निर्णयहेतुर्भवति। तस्मात् जीवनं सन्दिग्धम्। तद् सन्दिग्धं जीवनं तावद् आप

वचनादितो जीवननिश्चयादनन्तरं निश्चितजीवनविशिष्टेन गृहाभावेन बहिःसम्बन्धः कल्पयितव्यः। यस्माद् देवदत्तो जीवति, गृहे च नास्ति तस्मात् नूनं बहिरवस्थितः।

न तु सन्दिह्यमाने जीवने बहिःसत्त्वकल्पनं संभवति, यस्मादविद्यमानो गृहे जीवति वा न वा, तस्माद् बहिःस्थित इति असम्बद्धमेव स्यात्। अर्थात् जीवनसत्त्वे एव बहिर्भावः संभवति, न मृतस्यापि, तस्मात् जीवने निश्चिते सत्येव बहिर्भावकल्पना युक्ता। न तु संशयिते जीवने बहिर्भावकल्पनया जीवनसमाधानं युक्तम्। जीवनसन्देहेऽपि या बहिर्भावकल्पना तस्या असम्बद्धत्वम्। सन्दिग्धे हि जीवने बहिःसत्त्वम्—'यस्माद् गृहे अविद्यमानो देवदत्तो जीवति वा न वा ? तस्माद् बहिरवस्थितः' इत्येवमेव बहिःसत्त्वं कल्पयितुं शक्यते। तस्माद् गृहाभावविशिष्टन्तु जीवनं बहिर्भावव्याप्यमेवेति निश्चितेन गृहाऽभावविशिष्टेन जीवनेन यद् बहिर्भावस्य कल्पनं तदनुमानमेव। इदं बहिःसत्त्वकल्पनमर्थापत्तिरूपं न प्रमाणान्तरम्[१]।

किन्तु नैतन्मीमांसकः सहते। गृहे अभावः गृहाभावः, स च मृतेऽपि देवदत्ते संभवतीति न तेन बहिःसत्त्वकल्पना युक्ता, न जीवनमात्रं वा बहिः सत्त्वानुमापकं, जीवने सति देवदत्तस्य गृहेऽपि सद्भावसंभवात्, जीवनस्य गृहसत्त्वेनाऽपि सम्बद्धत्वेन बहिःसत्त्वव्यभिचारित्वात्। तस्मात् जीवनविशिष्टो गृहाभावो बहिःसत्त्वानुमापक इति वक्तव्यम्। गृहे देवदत्तस्य अभावो दृष्ट इति बहिःसत्त्वनिश्चयं विना लिङ्गैकदेशस्य जीवनस्य निश्चयादसंभवात्। तन्निश्चय विना च तस्य बहिःसत्त्वानुमापकत्वाऽसंभवात्। सर्वत्र निश्चितस्य पूर्वभाविन एव अनुमापकत्वनियमात्। न चैवमत्र संभवति, न च लिङ्गावगमसमये एव लिङ्ग्यवगमः। अत्रार्थापत्तिस्थले जीवन् देवदत्त इत्युदाहरणे वा बहिर्भावज्ञानं विना गृहाभावस्तु प्रत्येतुं शक्यते, किन्तु गृहे अविद्यमानस्य बहिर्भावनिश्चयं विना जीवनं न प्रत्येतुं शक्यते इति बहिर्भावज्ञानं विना गृहाभावविशिष्टजीवननिश्चयो न संभवति विरोधात्। विरोधश्च—बहिर्भावनिश्चयं विना यदि कोऽपि गृहाभावविशिष्टं जीवनं प्रत्येतुं प्रवर्तेत, तदा तेन 'देवदत्तो गृहे नावस्थितो गृहे वा अवस्थितः' इति प्रतिपत्तेः परस्परं सुस्पष्ट एव विरोधः। यदि गृहे अभावः तदा बहिर्भावः, यदि बहिरभावः तदा गृहे भावः इति, न तु 'गृहे नावस्थितः गृहे वा अवस्थितः' इत्येवं गृहे एव भावाभावौ संभवतः। अतः अनुमानात् पूर्वमेव विशिष्टेन हेतुना भवितव्यम्। इति हेतुभूतगृहाभावविशेषणस्य जीवनस्य निश्चयाय बहिर्भावः अवगत एवेति भावसंसर्गो बहिरभावसंसर्गश्च गृहे अवगत इति जीवनविशिष्टगृहाभावरूपहेतुनिश्चयेन सर्वं ज्ञातं, न किञ्चिदवशिष्यते यदत्रानुमेयं स्यात्। विद्यमानतासंयुक्तो यो गृहाभावो हेतुः नैयायिकैरुच्यते, तस्यैव ज्ञानार्थं बहिःसत्त्वमवगतम्, इति नानुमानस्य प्रमेयान्तरमवशिष्यते। ननु बहिःसत्त्वादीनामनुमेयत्वे ये दोषाः प्रदर्शिताः,

१. "अर्थापत्तिस्तु नैवेदं प्रमाणान्तरतेष्यते। व्यतिरेकव्याप्तिबुद्धया चरितार्था हि सा यतः॥"

ते एव दोषाः अर्थापत्तेः प्रमाणान्तरत्वेऽपि वर्तन्ते, अर्थात् अर्थापत्त्यापि बहिःसत्त्वादीनां कल्पने सन्त्येव ।

तत्र तुष्यतु दुर्जनन्यायेन समाधीयते—'जीवति चैत्रः, गृहे च नास्ति' इति संसृष्टधीरेवार्थापत्तिः । जीवनविशिष्टगृहाभावावगमस्य बहिःसत्त्वावगममन्तरेण अनुपपत्तेः । जीवनविशिष्टगृहाभावावगमेनैव बहिःसत्त्वावगमो जातः । यः खलु नियमेन गृहे तिष्ठति तस्य जीवतो गृहे अभावो न संभवतीति तस्य जीवनेन गृहाभावस्य विरोधः, गृहाभावेन च जीवनस्य विरोधः, गृहे असतो जीवनाऽसंभवात् इति प्रतिघातः । अयं प्रतिघातः बहिःसत्त्वकल्पनया निराकर्तुं शक्यते । गृहाभावेऽपि सति बहिःसत्त्वेन जीवनमुपपद्यत एव, नहि जीवनं गृहसत्त्वव्याप्यम् । तेन प्रमाणसिद्धयोर्द्वयोरर्थयोः परस्परं प्रतिघातः अर्थान्तरकल्पनया समाधेयत्वेन आलोच्यमानः अर्थापत्तेः कारणम् । सा च अर्थापत्तिः अनुमानाद् भिन्ना प्रमाणान्तरमेव । ननु भवतु एवम् अर्थापत्तेरेव प्रामाण्यम्, अनुमानस्य तु अर्थापत्तौ किं नान्तर्भावः स्यात् । एकेनैव निर्वाहे द्वयोः पृथक् प्रामाण्ये गौरवात् । तत्रोच्यते-उक्तरीत्या अर्थापत्त्या । अग्निमत्ताकल्पनं भवेत् यदि सर्वधूमवतामग्निमत्त्वमनुमानादन्येनैवावगतं स्यात्, किन्तु नैवमस्ति अनुमानेनैव सर्वधूमवतामग्निमत्त्वावगतिः भवति इति कथमनुमानस्य तद्विषयापहारेणार्थापत्तौ अन्तर्भावः स्यात् । अनुमानस्यार्थापत्तेश्च भिन्नविषयत्वात् अनुमानमपि प्रमाणान्तरमर्थापत्तेरपीति दिक् ।

कुमारिलभट्टपादविषयकासमीयलोकप्रवादस्य यथार्थत्वसमीक्षा

आचार्यमनोरञ्जनशास्त्री*

कुमारिलभट्टपादाचार्यधर्मकीर्त्ति विषयकोऽसमीयलोकप्रवादोऽस्माभिरितः प्रागन्यत्राऽपि विवृतः।[1] तद् कामरूपीयजनश्रुतेरनुकूलानि भट्टपादस्य कामरूपप्रदेशसम्भवत्वोपपादकतया प्रतीयमानानि यानि युक्तिप्रमाणान्युपलभ्यन्ते तान्यत्र विदुषां विवेचनार्थं संक्षेपेणोपन्यस्यन्ते।

तदानीन्तनभारतखण्डस्य भारताद् बहिश्च विभिन्नप्रदेशवासिजनतासु प्रचलिता विविधा देशाचारा लोकाचारास्तथा विभिन्नलोकभाषासु प्रचलिताः शब्दार्थभेदाश्च भट्टपादेन स्वग्रन्थ-मध्ये प्रसङ्गादुपन्यस्ताः। तेन तत्तद्विभिन्नप्रदेशाभिजनैर्जनगणैस्तस्य घनिष्ठः सम्पर्क आसी-दिति सुतरां प्रतीयते। तथाहि तन्त्रवार्त्तिके [१।३।३।२०८ पृ०] "अद्यत्वेऽपि अहिच्छत्र-मथुरानिवासिब्राह्मणीनां सुरापानम्। केशर्यश्वाश्वतरस्वरोच्छ्रोभयतोददानप्रतिग्रहविक्रय-व्यवहारभार्यापत्यमित्रसहभोजनाद्युदीच्यानाम्। मातुलदुहितृद्वाहासन्दीस्थभोजनादीनि दाक्षिणा-त्यानाम्। मित्रस्वजनोच्छिष्टभोजनं सर्ववर्णपरस्परस्पृष्टताम्बूलादन-तदवसानानाचमननिर्वेजक-धौतगर्दभारूढवस्त्रपरिधान-ब्रह्महत्यातिरिक्तमहापातककार्यपरिहरणादीन्युभयेषाम्। अतिस्थूलानि प्रतिपुरुषजातिकुलावस्थितसूक्ष्मस्वधर्मव्यतिक्रमणानि त्वनन्तभेदानि सर्वत्र विगानदर्शनानि च प्रायेणैव सम्भवन्तीति नैवं जातीयकमिश्रसदाचारधर्मत्वाध्यवसानसम्भवः"—इति। एतेषां शास्त्रप्रतिषिद्धानां कर्मणां केषाञ्चित् कस्यचिद्वाचरणं यद्यधुनाऽपि क्वचित् प्रदेशविशेषस्य सज्जनसमाजे सदाचारत्वेन परिगण्यते परिगृह्यते वेति न वयं तत् सम्यग् जानीमहे। यावद् जानीमहे दाक्षिणात्यानां मातुलदुहितृद्वाहस्तावत् तत्रत्यैः सर्वदैव सदाचारत्वेन परिगणितः शिष्यजनपरिगृहीतश्चेति।

* भूतपूर्वोऽध्यक्षः—नलवाडीस्थ-संस्कृतकालेजस्य, (असमप्रदेश)।

(१) क—द्र० परमार्थसुधा, प्रथमवर्षीयतृतीयाङ्कः पृ० २७—३९।

ख—The Souvenir, 52nd Session of All India Philosophical Congress, held at Gauhati University, 1977. pp. 59-68.

तथाहि देवनभट्ट-माधवाचार्यादिभिर्दाक्षिणात्यीयैः स्मृतिनिबन्धकारैः सोमेश्वरभट्ट-खण्डदेवप्रमुखैः भट्टमतव्याख्यातृभिर्मीमांसकैरपि मातुलदुहितृद्वाहस्य वैधत्वं युक्तिप्रमाणाभ्यामुपपादितं दृश्यते।[1] कुमारिलभट्टपादैस्तु तस्य शास्त्रप्रतिषिद्धत्वं लोकविद्विष्टत्वमधर्मत्वं च सुस्पष्टमुपपादितम्।[2] यदि भट्टपादो दक्षिणभारताभिजातोऽभविष्यत्तर्हि सोऽपि पितृपितामहादिभिः चिरमाचरितं मातुलकन्यापरिणयाचारं नैवं निर्ममभावेनागर्हिष्यत् अपितु दाक्षिणात्यीयनिबन्धकारान्तरवत्तदाचारस्य वैधत्वमुपापादयिष्यदिति पश्यामः।

कुमारिलभट्टपादाः पञ्चद्राविडभाषागतान् शब्दानुदाहृत्य तेषां परपरिकल्पितं संस्कृतमूलकत्वं निराकृतवन्तः।[3] तेन भट्टपादस्य द्राविड़भाषागतशब्दार्थाभिज्ञत्वे सिद्धेऽपि द्रविडदेशाभिजनत्वं न सिद्धयति। अन्यथा पारसी-वर्वर-यवन-रौमकादिभाषाया उल्लेखदर्शनात् लाटवलभीपाटलिपुत्रादिप्रदेशान्तरीयभाषागतशब्दार्थोपन्यासादहिच्छत्रमथुरादिनानादेशीयाचार - ज्ञानाच्च तस्य तद्देशोद्भवत्वं वा कुतो न सिद्धयतीति भवति विनिगमनान्वेषणा। तद्विनिगमनाविरहादपि तस्याविर्भावस्थानं द्रविडदेश एवासीदिति निश्चेतुं न शक्यते। परन्तु आनन्दगिरिपादप्रणीते शङ्करविजये उपलभ्यमानायाः "भट्टाचार्यो द्विजवरः कश्चिदुदग्देशात् समागत्य दुष्टमतावलम्बिनो बौद्धान् जैनानसंख्यातान् निर्जित्य निर्भयो वर्त्तते"[4] इत्युक्तेस्तस्य जन्मोत्तरभारतस्यैव कस्मिंश्चिज्जनपदे बभूवेति प्रतीयते।

---

१. द्र०—स्मृतिचन्द्रिका १, पृ० ७०–७८।
पराशरमाधवीयः १।२ पृ० ६३–६८।
न्यायसुधा १।३।३।७।
भाट्टदीपिका––१।३।३।७।

२. "शूद्रान्नभोजनेनाऽपि तुष्यन्त्यन्ये द्विजातयः।
स्वमातुलसुतां प्राप्य दाक्षिणात्यस्तु तुष्यति।
अन्ये तु सव्यलीकेन मनसा तत्र कुर्वते॥" तन्त्रवार्त्तिकम् १।१।३ पृ० २०४।

३. तद्यथा द्रविडादिभाषायामेव तावद्व्यञ्जनान्तभाषापदेषु स्वरान्तविभक्ति —स्त्रीप्रत्ययादिकल्पनाभिः स्वभाषानुरूपानर्थान् प्रतिपद्यमाना दृश्यन्ते। तद्यथा ····पन्थानमतरित्युक्तेऽतर इति कल्पयित्वाऽऽहुः सत्यं दुस्तरत्वादतर एव पन्था इति। तथा 'पाप्' शब्दं पकारान्तं कल्पयित्वा सत्यं पाप एवासाविति वदन्ति।" इत्यादि···।

[त० वा० १।३।५ पृ० २२६]

"तद्यथा द्राविडादिभाषायामीदृशी स्वच्छन्दकल्पना तदा पारसीवर्वर-यवन-रौमकादिभाषासु किं विकल्प्य प्रतिपत्स्यन्त इति न विद्मः।"

[त० वा० १।३।५ पृ० २२६]

४. शङ्करविजयम्, पृ० १८०, जीवानन्दविद्यासागर (कलिकाता)—संस्करणम्।

प्रकरणपञ्चिका-ऋजुविमलादिग्रन्थप्रणेता मुख्यो गुरुमतव्याख्याता शालिकनाथमिश्र-पादः प्रभाकरगुरोः साक्षाच्छिष्यो गौडदेशसम्भूतश्चासीदित्यप्रत्याख्येयप्रमाणबलान्निर्णीतं विद्वद्भिः। सर्वदर्शनमतव्याख्याता वाचस्पतिमिश्रपादोऽपि तदानीन्तनमिथिलाप्रदेशे लब्ध-जन्माऽनन्यसाधारणवैदुष्यभासा यशसा च दिगन्तप्रसारिणा समग्रं भारतभूमण्डलमलमकार्षीदिति सुविदितमेतद् विदुषाम्। ताभ्यामुभाभ्यामेव कुमारिलभट्टपादा 'वार्त्तिककारमिश्रा' इति व्यप-दिश्यमाना दृश्यन्ते।[1] 'मिश्र' व्यपदेशभाजः श्रोत्रिया ब्राह्मणा उत्तरभारतेष्वेवोपलभ्यन्ते न पुनर्दाक्षिणात्येष्वित्यनेनाऽपि भट्टपादस्योत्तरभारतसम्भवत्वं प्रतिपन्नं भवति।

उम्वेकाचार्य-मण्डनमिश्र-प्रभाकर-रेवणभट्टाः कुमारिलभट्टपादस्य मुख्याः शिष्या इति [2]श्रूयते। तथोम्वेकाचार्य-पार्थसारथिमिश्र-भवदेवभट्ट-सुचरितमिश्राः प्राचीनाः भट्टपाद-ग्रन्थव्याख्यातारः प्रसिद्धाः। ते सर्व एवोत्तरभारताभिजनाः। अतोऽपि तस्योत्तरभारताभिजातत्व-मुपपद्यतेतराम्।

"तथा षष्ठ्यष्टमी-चतुर्दशी-पञ्चदशीषु मांसभक्षणमैथुनादिक्रियाप्रतिषेधाद् गृहस्थ-स्यान्यत्र कामचारे प्राप्ते तदकरणनियमः श्रेयसे विहितः।"[3] इति गृहस्थस्य ब्राह्मणस्याऽपि कृते वैधमांसभक्षणं कुमारिलभट्टपादैरनुज्ञातं प्रतीयते। गौडकाश्मीरकामरूपान् विहाय भारतवर्षस्य सर्वत्रैव विशेषतो ब्राह्मणस्य कृते मांसभक्षणं सर्वथा प्रतिषिद्धं गर्हितं च मन्यते। कुमारिलभट्ट-पादस्य जीवनकाले क्रैष्टाब्दसप्तमशतकमध्येऽदाक्षिणात्येषु प्रचलितो मातुलकन्यापरिणय इव मत्स्यमांसभोजनव्यवहारोऽपि प्राच्येषु लब्धप्रचारः शास्त्रप्रतिषिद्धो गर्हणीयश्चामन्यतेति क्रैष्ट-सप्तमशतिकातः पूर्ववर्त्तितया प्रतिपन्नेन स्मृतिशास्त्रवाक्येन सुतरां [4]निश्चीयते। एवं शास्त्र-

१. "तदाहुर्वार्त्तिककारमिश्राः" प्रकरणपञ्चिका, Banaras Hiudu University Edition, P. 5, 6, 392, 402,

"यथाहुरत्रभवन्तो वार्त्तिककारमिश्राः"—न्यायकणिका, (वाराणसीसंस्करणम्) पृ० १०५।

२. उम्वेकः कारिकां वेत्ति चम्पूं वेत्ति प्रभाकरः।
मण्डनस्तूभयं वेत्ति न किञ्चिद्वेत्ति रेवणः॥" जैनाचार्यगुणरत्नधृतं प्राचीनपद्यम्।

३. तन्त्रवार्त्तिकम् १।३।२, पृ० १५१।

४. "उद्वाह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः।
मध्यदेशे कर्मकराः शिल्पिनश्च गवाशिनः॥
मत्स्यादाश्चवराः पूर्वे व्यभिचाररताः स्त्रियः।
उत्तरे मद्यपा नार्यः स्पृश्या नृणां रजस्वलाः॥
खशजाताः प्रगृह्णन्ति भ्रातृभार्यामभर्तृकाम्।
अनेन कर्मणा नैते प्रायश्चित्तदमार्हकाः॥"
[नानास्मृतिनिबन्धकारधृतं बृहस्पतिवचनम्]

प्रतिषिद्धाविशेषेऽपि दाक्षिणात्यप्रचलितमातुलसुतापरिणयस्याननुज्ञानाद् गौडकाश्मीरकामरूप-प्रचलितमतस्य मांसभोजनस्य तत्कृतादनुज्ञानाच्च दाक्षिणात्यभिन्नेषूत्तरभारतीयेषु गौडकाश्मीर-कामरूपान्यतमस्मिन् प्रदेशे एव भट्टपादोऽजायतेति सुप्रतिपन्नं भवति ।

तत्रापि तस्य कश्मीरेषु देशाभिजनत्वे काश्मीरेषु तदभिज्ञानं यत् किञ्चिदवशिष्टं लौकिक-प्रवचनादिकमवश्यमुपलभ्यते । अथ च नोपलभ्यते । किञ्च तस्य काश्मीरीयत्वे काश्मीरराज्यस्य सविशेषमितिवृत्तमुपवर्णयता तत्रभवता राजतरङ्गिणीकृता महाकविना कल्हणेनानन्यसामान्य-कर्मकारिणस्तस्यातुलनीयकीर्त्तेर्विद्वच्छिरोमणेर्नाम सगौरवमग्रहीष्यतेति दूरनिरस्ता तस्य काश्मीरीयत्वशङ्का ।

प्राचीनगौडवङ्गपौण्ड्रादिप्रदेशान्तर्भाव्यार्वाचीनो वङ्गदेशः समुदितोऽभवत् । विविधा-ख्यानोपाख्यानजनश्रुति-लोकप्रवादमुखरिताया वङ्गजनन्याः कुमारिलभट्टपादविषये नितरां मौनावलम्बनमेव तस्य तत् प्रदेशाभिजनत्वाभावमुपपादयति । ये तावद् वङ्गाभिजनाः सज्जनाः प्राग्ज्योतिषपुरं कामरूपमण्डलं कामाख्यातीर्थं च वङ्गेष्वन्तर्भूतं मन्यन्ते तेषां मध्ये कुमारिल-भट्टपादस्य वङ्गजननीप्रसूतत्वप्रसिद्धिरस्मदर्वाणतस्य तद्विषयकलोकप्रवादस्य प्रवृत्तिश्च सुतरां विद्येते एवेत्यन्यदेतत् ।

एवं सति परिशेषात् कुमारिलभट्टपादस्य जन्मस्थानं प्राचीनकामरूपप्रदेश एवासीदित्य-वश्यं प्रतिपत्तव्यम् ।

आनन्दगिरिमाधवाचार्यप्रमुखैस्तदानीन्तनैर्विद्वज्जनैः कुमारिलभट्टपादा एव भट्टाचार्य-पदेनोदलेखिषत ।[1]

यद्यप्याचार्योपाधिका भट्टोपाधिकाश्च विद्वद्ब्राह्मणा भारतस्य सर्वत्राभूवन् तथापि भट्टाचार्योपाधिधारिणो विद्वांसः कामरूपं वङ्गं च विहायान्यत्र न दृष्टचरा न वाश्रुतचराः ।

भट्टाचार्यपादानां मिथिलामण्डलजातत्वमपि केनापि प्रमाणेन साधयितुं न शक्यते । न च मिथिलामण्डलाभिजनैर्वाचस्पतिमिश्रचरणैः, "यथाहुरत्रभवन्तो वार्त्तिककारमिश्रा" इति ब्रुवाणैरत्रेतिपदेन वार्त्तिककारमिश्राणां वासस्थानं परामृश्य तेषां मिथिलामण्डलनिवासित्वं सूचितमिति वाच्यम्, 'अत्रे'त्यनेन वार्त्तिककारवासस्थानोल्लेखस्याप्रासङ्गिकत्वेनानौचित्यात्

---

१. "भट्टाचार्यो द्विजवरः"—शङ्करविजयम् पृ० १८० ।
मा विषीद वरारोहे भट्टाचार्योऽस्मि भूतले । इति शङ्करदिग्विजयम् । "तदुक्तं भट्टाचार्यैः"—सर्वदर्शनसंग्रहः, अक्षपाददर्शनम् पृ० २५५, तथा शाङ्करदर्शनम् पृ० ४१७ । "तदुक्तं भट्टाचार्यैर्मीमांसाश्लोकवार्त्तिके"—स० द०, पाणिनिदर्शनम्, पृ० ३०१ । तथाचोक्तं भट्टाचार्यैः"—स० द० पातञ्जलदर्शनम् पृ० ३६२ । इत्यादि ।

प्रासङ्गिकतयापेक्षितत्वात्तेन विषयपरामशर्स्यैव युक्तत्वात् । तस्मादत्रेति अस्मिन् विषये, भवन्तः पूज्या, वार्त्तिककारमिश्रा आहुरित्येवं व्याख्यानमर्हत्ययं ग्रन्थः ।

कुमारिलभट्टाचार्यो मैथिलश्रेणीभुक्तो ब्राह्मण आसीदिति यदि काचिज्जनश्रुतिरस्ति सा तस्य कामरूपाभिजनत्वेऽपि न विरुध्यते कामरूपवासिनां ब्राह्मणानां मध्ये सारस्वत-मैथिल-कान्यकुब्जौत्कलगौडादिविविधश्रेणीविभागश्रवणात् भट्टपादस्य मैथिलश्रेण्यामन्तर्भावसम्भवात् । तथाहीयमत्र जनश्रुतिर्नितरामुल्लेखमर्हति—'शब्दब्रह्मस्वरूपाया मातृकासरस्वत्या मालिन्य-परनामिकायाः परदेवताया उपासका ब्राह्मणाः सारस्वता आख्यायन्ते । ते च परदेवताराधन-परायणा ब्राह्मणा आदौ कामरूपे तत्सन्निहितेषु च स्थानेषु कृतवसतयो बभूवुः । अथ त्रेतायुगे भगवान् परशुरामो महीं निःक्षत्रियां कृत्वा मातृहत्यापापमोचनार्थं प्राच्यदेशमागत्य कुठारेण पर्वतराजगात्रं विदारयन् तीर्थराजं ब्रह्मपुत्रं दक्षिणसागरं प्रति प्रावाहयत् । तत्र स यथाविधि स्नानदानतर्पणादिकं विधाय स्वहस्ततः कुठारमात्मनो मातृहत्यापापं च निःशेषं निष्कासितवान् । ततः स तत्रैव भार्गवक्षेत्रे कृताश्रमः परदेवतां मातृकासरस्वतीमागमिकविधिनाराध्य लब्धसिद्धिः क्षत्रियविजयलब्धामिमां भूमिं महर्षये काश्यपाय प्रदाय राजशासनबहिर्भूतं दाक्षिणात्यस्थितं समुद्रोपकूलं प्रति वसत्यर्थे प्रतस्थे । तत्सहचराः शिष्याश्च बहवः कामरूपीयाः सारस्वत-ब्राह्मणाः तेनैव सह गत्वा दाक्षिणात्येषु समुद्रोपकूले केरलक्षेत्रे न्यवसन् । ततः कालक्रमेण ते सारस्वतब्राह्मणाः पश्चिमदेशं हिङ्गुलाक्षेत्रं यावत् उत्तरदेशं च जलन्धरं तथा काश्मीरमपि यावत् उपसृत्य तत्र तत्र स्थानेषु वैदिकीमागमिकीं च परदेवताराधनपद्धतिं प्रचारयामासुः । तेषामाराध्यभूता भगवती परदेवताऽपि तदवधि कामरूप-केरल-काश्मीराख्यं प्रदेशत्रयं ककारादि-नामकतया त्रिककाराख्ययाऽपि प्रख्यातं यथाक्रमं कामाख्या-कुमारी-शारदेति नाम्ना लोके सम्पू-ज्यमानाऽधितिष्ठतीति । इदानीं दाक्षिणात्येष्वेवावस्थितानां नम्बुद्रिब्राह्मणपरिवाराणां पूर्वजा अपि प्राच्यदेशात् कामरूपमण्डलाद् गत्वा तत्र न्यवसन्नित्येवंरूपाऽपि परम्परागता जनश्रुतिः लोकेषु प्रसृतोपलभ्यते ।

ततः परं मिथिलाधिपतेर्वैदेहस्य जनकस्य पालितपुत्रेण नरकेण प्राग्ज्योतिषेषु राजत्वं कुर्वणेन बहवो मैथिला ब्राह्मणाः कामरूपमानीय तत्र संस्थापिताः । तथा चोक्तं कालिकापुराणे—

"तस्मात् किरातानुत्सार्य वेदशास्त्रातिगान् बहून् ।
द्विजातीन् वासयामास तत्र वर्णान् सनातनान् ॥

[का० पु० ३८ । १२८]

तद्वंशजा ब्राह्मणपरिवारा इदानीमपि मैथिला इत्येवाभिमन्यन्ते । ततः परमिति-हासपरिगृहीते कालेऽपि ख्रीष्टाब्दप्रथमशतकात् सप्तदशशतकं यावद् विभिन्नवंशसम्भूतैः तत्तद्-

कालीनैर्विद्योत्साहिभिर्गुणग्राहिभिर्धर्मपरायणैरुदारमतिभिः कामरूपनृपतिभिः केरलकर्णाटगुर्जर-महाराष्ट्रकान्यकुब्ज-मिथिलोत्कलगौडादिभ्यो विभिन्नप्रदेशेभ्यः समागताः विविधविद्यानिःष्णाता धर्मज्ञानपरायणा बहवो ब्राह्मणपरिवारा अग्रहारभूम्यादिप्रदानेन सम्मानिताः स्वराज्ये संस्थापिताश्चेत्यैतिहासिकी वार्त्ताऽप्यत्र न विस्मर्त्तव्या। अतः कुमारिलभट्टपादस्य कामरूपाभिजनत्वेऽपि मैथिलत्वख्यातिः सङ्गच्छत एव।

"तथा च चरुशब्दोऽपि लोके स्थालीनिबन्धनः।
याज्ञिकानां च वेदे च प्रसिद्धस्त्वोदनं प्रति॥"[1]

एषा भट्टपादोक्तिः स्मरणातीतकालादिदानींयावत् प्रवहमाणायामसमीयलोकभाषायामेव सर्वथा सङ्गम्यमाना प्रतिपद्यते। साम्प्रतमप्यसमीयलोकभाषायां पाकस्थाली चरुशब्देनाभिधीयते। याज्ञिकैस्तु यज्ञे जातकर्मविवाहादिसंस्कारकर्मणि च होमार्थे पक्वमोदनमेव चरुशब्देनोच्यते। महाराजभास्करवर्म्मणो निधानपुरताम्रशासनेऽपि याज्ञिकप्रसिद्धार्थ एव चरुशब्दः प्रयुक्तः प्रतिपद्यते।[2]

प्रागैतिहासिककालादिदानीं यावदयमसमप्रदेशो लक्षणवतां हस्तिनामुत्पत्तिस्थानरूपेण प्रसिद्धोऽस्ति। सर्वेषां प्राग्ज्योतिषाधिपतीनां कामरूपीयनृपतीनां सेवादलं बहुसंख्यकवृहन्मातङ्गबलाढ्यमासीदिति महाभारतादिशास्त्रग्रन्थतोऽपि प्रतिपन्नं भवति। आदिमो गजशास्त्रप्रणेता महर्षिः पालकाप्योऽपि एतद्देश एव जातः परिपालितः संवर्द्धितश्चाभवत्। एतत्प्रदेशवासिनां साधारणग्रामवासिजनानां मध्येऽपि वन्यहस्तिसंग्रहण-तत्पालन-प्रशिक्षणादिकलाकौशलं सुविदितं; तत्कर्मणि प्रयुक्तानां पारिभाषिकशब्दानामर्थविशेषावबोधश्च सुकरो भवति। सुशिक्षितार्यजनैर्व्याकरणानपेक्षं प्रयुक्तमपशब्दमुदाहरता भट्टपादेन हस्तिशिक्षणकर्मनियुक्तानां मध्ये प्रचलितः कश्चित् पारिभाषिकः शब्दविशेष उपन्यस्तो यथा—

"अन्तो नास्त्यपशब्दानामितिहासपुराणयोः।
तथोभाभ्यादिरूपाणां हस्तिशिक्षादिकारिणाम्॥
युगपदुभाभ्यां दन्ताभ्यां यः प्रहारः स 'उभाभ्य' इति सर्वैः पालकार्यराजपुत्रादिभिर्व्याकरणानपेक्षमेव प्रयुक्तम्।" [त० वा० १।३।८, पृ० २५६] एतस्मादपि हेतोः स कामरूपीय-आसीदिति सम्भाव्यते।

यद्वस्तु प्रदेशविशेष एवोत्पद्यते न सर्वत्र तादृशां देशविशेषोद्भवानां द्रव्याणां नामानि तद्देशवासिभिर्यावन्न कथ्यन्ते तावद्देशान्तरवासिभिर्न ज्ञातुं शक्यन्ते इत्येतमर्थमुपपादयता भगवता भट्टपादेन तत्कालीनकामरूपदेशसम्भवं पत्रोर्णं वारवाणश्चेति द्रव्यद्वयं नामग्राहमुदाहृतं यथा—

१. तन्त्रवार्त्तिकम् १।३।४, पृ० २२१।
२. "वलिचरुसत्रोपयोगाय सप्तांशाः।" कामरूपशासनावली पृ० ३५।

"पत्रोर्ण-वारवाणादि यच्च तद्देशसम्भवम् ।
तैरेवाकथितं नाम तच्च को वेदितुं क्षमः ॥"

[त० वा० १।३।६, पृ० २३८]

पत्रोर्णं वस्त्रोपादानभूतः कौशेयतन्तुविशेषः । तच्च कौटिलीयार्थशास्त्रे समुल्लिखितं कामरूप एवोपाजायतेति विज्ञापितं तट्टीकाकृद्‌भिर्भट्टस्वामिपादैः ।[1]

वारवाणस्तु वस्त्रनिर्म्मितावरणविशेष इदानीमपि असमप्रदेशे 'आरोवाण' इति तल्लोक-भाषायामाख्यायते । राज्ञां वारवाणः श्वेतवर्णः अन्येषान्तु राजपुरुषाणां रक्तवर्णोऽभवदिति हेम-कोषे विवृतम् । अमरसिंहेन तु "कञ्चुकं वारवाणोऽस्त्री" ति सामान्यत उक्तम् [अमरकोषः—२।१।६३] प्रदेशान्तरे एतद्‌द्रव्यस्य सद्भावे किमपि प्रमाणं नोपलभ्तते । भट्टपादस्यासमप्रदेशा-भिजातस्य सत एव तत्कृते असमप्रदेशोत्पन्नासमीयलोकभाषाप्रसिद्धशब्दार्थप्रयोगः सुकरः स्या-न्नत्वन्येषां प्रदेशान्तरीयजनानां कृते तत्सम्भवः ।

तस्मात् कामरूपीयलोकभाषाप्रचलितचरुशब्दार्थभेदप्रदर्शनात्, हस्तिप्रशिक्षणकर्मप्रयुक्तो-भाम्य इति पारिभाषिकशब्दार्थोदाहरणात्, कामरूपदेशसम्भवयोः पत्रोर्णवारवाणशब्दार्थयोर्विशे-षेणोपन्यासाच्च प्राग्वर्णितस्य कुमारिलभट्टविषयकस्यासमीयलोकप्रवादस्य यथार्थत्वमुपपद्यते ।

नन्विदानीन्तनासमप्रदेशे वेदचर्च्चाया, वैदिकधर्मसंस्कृतेः, श्रौतयज्ञानुष्ठानस्य, भाट्टदर्श-नस्य च परम्पराविशेषस्यानुपलम्भात् प्राचीनकालेऽपि तथैव सम्भवात् कुमारिलभट्टसदृशां विदग्धविदुषां वैदिकदार्शनिकमूर्द्धन्यानामाविर्भावायापेक्षितस्य तदनुकूलस्य दैशिक-कालिक-धार्मिक-सांस्कृतिक-सामाजिकवातावरणस्याभावः कल्पनीयः स्यात् । ततश्च भट्टपादस्याचार्य-धर्मकीर्त्तेर्वा एतद्देशप्रसूतत्वज्ञापकलोकप्रवादस्य कल्पनामात्रप्रसूतत्वमेवाभ्युपगन्तव्यमिति चेद-न्नेदं वक्तव्यम्— कुमारिलभट्टपादस्य प्रायः समकालीनः क्रैष्टसप्तमशतकमध्यवर्त्ती कामरूपभूपतिः कुमारभास्करवर्मदेवो वैदिकधर्मसंस्कृतेर्महान् परिपोषको वर्णाश्रमधर्मस्याविचलितः पालकश्चा-सीत्, तस्य राजत्वकाले एतत्प्रदेशे वैदिकवर्णाश्रमधर्मस्य भूयानभ्युदयोऽभूदिति[२] सर्वसम्मतैति-हासिकयुक्तिप्रमाणाभ्यां सुनिश्चितं प्रतिपद्यते । चैनिकपरिव्राजक-हियुंवेन् छांमहाभागवर्णित-

1. Vide K. L. Barua—'Was kautilya an easterner' Journal of the Assam Research Society, vol. VII, No. 3, 1939, PP. 83—86.

२. "सजगदुदयकल्पनास्तमयहेतुना भगवता कमलसम्भवेनावकीर्णवर्णाश्रमधर्मप्रविभागाय निर्मितो भुवनपतिरिवोदयानुरक्तमण्डलो'''" इत्यादि ।

[कामरूपशासनावली पृ० ३५]

वृत्तान्तेनाप्ययमर्थः सुतरां प्रमाणितो भवति । तत्परवर्त्तिनोऽन्येऽपि कामरूपीया राजानो जनगणश्च वैदिकधर्मस्यानुवर्त्तिनः पृष्ठपोषका वर्णाश्रमधर्मस्य संरक्षकाश्चाभवन्[१] ।

क्रैष्टपञ्चमशतकमारभ्य द्वादशशतकं यावत् कृतराज्यानां भूतिवर्म्मादिधर्मपालान्तानां कामरूपराजानां यानि शिलाशासनानि ताम्रशासनानि चेदानीं यावदाविष्कृतानि तत्र सर्वत्रैव तत्कालीनकामरूपप्रदेशे वैदिकधर्मसंस्कृतेः श्रौतयज्ञानुष्ठानस्य विभिन्नवेदवेदाङ्गादिशास्त्राणां भाट्टदर्शनस्यापि चर्चाप्राचुर्यस्य सुस्पष्टानि प्रमाणानि सन्निबद्धान्युपलभ्यन्ते । तेष्वत्यल्पमात्रमत्र समासेनोपन्यस्यते । यथा—"स्वस्ति श्रीपरमदैवतपरमभागवतमहाराजाधिराजाश्वमेधयाजिनां"...इत्यादि [डबकाख्यस्थाने पर्वतगात्रोपलब्धं महाराजभूतिवर्मणः शासनम्]

"स (वज्रदत्तः) वाजिमेधैरयजन्महद्भिः" ।

"यागेष्वभूद्भूपतिरिन्द्रकल्पः" ।

"बलवर्मसञ्ज्ञकः.....इष्ट्वा चानेकैः क्रतुभिः सदक्षिणैः ।"

"महेन्द्रवर्मा.....ईजे स राजाक्रतुभिर्महेन्द्रवत् ।"

"दृष्ट्वासौ वाजिमेधं नरपतिरगमच्छक्रवासं..।"

"इष्ट्वा स यज्ञैर्मुहुः........" ।[२]

"अधीत्य साङ्गान् चतुरोऽथ वेदान्
वाक्यं प्रमाणं निखिलं च शब्दम् ।
....
ज्ञात्वा गजानां विनयोन्नयक्रमं
तथा हयानां कुलशील-सौष्ठवम् ।
....
देवासुराचार्यमतञ्च तत्त्वतः
स वाजिमेधैरयजन्महद्भिः ॥"

---

१. "प्रप्रीतसमस्तवर्णाश्रमान्"..[महाराजवनमालवर्मदेवशासनम्, का० शा० पृ० ६३]
"राजा प्रजारञ्जनलब्धवर्णो वर्णाश्रमाणां गुरुरेकवीरः ।" इत्यादि
[महाराजबलवर्म्मदेवशासनम् का० शा०—पृ० ७८]
"यस्मिन् नृपे विनयविक्रमभाजि जाते सम्यग् विभक्तचतुराश्रमवर्णधर्मा ।"
[महाराजेन्द्रपालशासनम्, का० शा० पृ० १३१]

२. द्र० महाराजभास्करवर्मणो निधानपुरताम्रशासनम्, कामरूपशासनावली तथा Journal of the Assam Research Society, vol. XII, No 1 and 2, pp. 16-32.

"नानाशास्त्रपदार्थनिश्चितमतेर्वेदेषु चाधीतिनः ।

....

येन व्याकरणोदको नयतिभिः सांख्योरुनक्रो महान्

मीमांसाबहुसारसानुरसितस्तर्कानिलावीजितः ।

व्याख्यानोर्मिपरम्परातिगहनो न्यायार्थफेनाकुल-

स्तीर्णोऽशेषसरित्पतिप्रकरणस्रोतोविशालाकुलः[१] ॥"

"नारायणवर्माणं जनकमिवाधिगतसांख्यार्थम् ।"[२]

"सुविस्तृतानां पदवाक्यतर्कतन्त्रप्रवाहातितरस्विनीनाम् ।

यः सर्वविद्यासरितामगाधमन्तर्निमग्नश्च गतश्च पारम् ॥"[३]

"मीमांसाभ्यासनिःशेषदोषप्रोषितमानसः ।"

"तद्वंशादजनिष्ट शिष्टचरितो विप्रेश्वरो भास्वरः

लक्ष्मीवान् नरवाहनाह्वयसुतः सम्यक् कलाभियुतः ।

मीमांसानयमांसलीकृतमतिश्चाणक्यमाणिक्यभू-

र्वंशोत्तुङ्गमणिः श्रुतिस्मृतिपथप्रस्थानपान्थव्रतः ॥"[४]

इत्यादि ।

महाराजभास्करवर्मणो निधानपुरताम्रशासने एकस्मिन्नेव सार्द्धद्विशताधिकसंख्याकानां विभिन्नवेदशाखास्वधीतिबोधाचरणशीलानां विविधवैदिकयज्ञानुष्ठाननिष्ठानां ब्राह्मणानां नामानि समुल्लिखितानि, येषु कुमारिलभट्टस्य, तत्पितुः कणादभट्टस्य, तत्पितृव्यस्य धर्मकीर्त्तेश्च नाम्नः सादृश्यमुपलभ्यते यथा "ईश्वरभट्टस्वामी, प्रभाकरकीर्त्तिस्वामी" इत्यादि । तदानीन्तन-कामरूपीयराजशासनेषूपलब्धानि प्रायः सर्वाण्येव विद्वद्ब्राह्मणनामानि 'स्वामि'भागान्तानि श्रूयन्ते । भट्टपादप्रणीतग्रन्थानां केषुचिद्धस्तलिखितेषु प्राचीनपुस्तकेषु मुद्रितपुस्तकेष्वपि अन्तिम-पुष्पिकायां कुमारिलभट्टस्वामीति, भट्टकुमारिलस्वामीति वा ग्रन्थकृन्नामोल्लेखो दृश्यते ।[५] एवं कामरूपीयब्राह्मणनामभिस्तन्नाम्नः सौसादृश्यमप्येतत् प्रसङ्गे उल्लेखमर्हति ।

---

१. महाराजभास्करवर्मणः डुबिताम्रशासनम् ।

२. निधारपुरताम्रशासनम्, कामरूपशासनावली ।

३. महाराजेन्द्रपालताम्रशासनम् का० शा० पृ० १२१ ।

४. महाराजधर्मपालताम्रशासनम् Journal of the Assam Research Society Vol. VIII, No 4.

५. New Catalogues Catalogorum, Vol, IV, p. 222, Edited by Dr. V. Raghavan, Madras University. Anundoram Baroaah, Precace to the Namalinganusasana, p. XVII. श्लोकवार्त्तिकम्, चौखम्बासंस्कृतग्रन्थमालासंस्करणम् वाराणसी ।

तत्काले प्रदेशान्तरीया अपि वैदिकधर्मानुरागिणो राजानः कामरूपप्रदेशाद् वेदवेदाङ्गपारङ्गतान् याज्ञिकान् ब्राह्मणान् संगृह्य धनमानाग्रहारप्रदानेन सम्पूज्य स्वस्वराज्ये संस्थापयामासुरिति साम्प्रतमाविष्कृतेभ्यस्तत्तद्राजकीयशासनेभ्योऽवगम्यते ।

तथाहि क्रैष्टनवमशतकमध्यवर्त्तित्वेनानुमितो गङ्गवंशीयः कलिङ्गराजोऽनन्तवर्मदेवः कामरूपान्तर्गत-शृङ्गाटकाग्रहार (आधुनिकशिङ्गरि)— वास्तव्यं वेदवेदाङ्गपारगं पराशरसगोत्रं विष्णुसोमाचार्यनामानं ब्राह्मणं धनमानदानेन सम्पूज्य स्वराज्ये समस्थापयत् ।[१]

पारमारवंशजेन वाक्पतिराजेन क्रैष्टदशमशतकमध्यभुवा ये षड्विंशतिसंख्यका विद्वद्ब्राह्मणा अग्रहारभूमिप्रदानेन सम्मानिता एकस्मिन् ताम्रशासने समुल्लिखितास्तेष्वनेके एव प्राच्यदेशस्य कामरूपान्तर्गतोत्तरकुलवासिन आसन्निति तत्रैव वर्णितम् ।[२]

एवमादिषु प्रमाणशतेषु जागरूकेषु तदानीन्तनकामरूपराज्ये कुमारिलभट्टस्येव वैदिकधर्मसंस्कृतिसम्पन्नस्य सर्वतन्त्रस्वतन्त्रस्य दार्शनिकविद्वद्वरस्याविर्भावानुकूलं वातावरणं नासीदिति कः कुतो वा प्रतिपद्येत ?

प्राचीनकामरूपीयराजशासनेषु भट्टपादाभिमतानां धार्मिकदार्शनिकसिद्धान्तविशेषाणां सङ्केतो बाहुल्येन परिलक्ष्यते । तेषामालोचनमत्र संक्षिप्ते प्रबन्धे यद्यपि नैव सम्भवति तथाऽपि दिङ्मात्रमत्र निर्दिश्यते । यथा—

प्रायः सर्व एव कामरूपराजानो भगवतः सोमार्द्धधारिणः (अर्द्धयुवतीश्वरस्य)[३] शशि-

---

१. "वेदवेदाङ्गपारगेभ्यः कामरूपविषयशृङ्गारकाग्रहारवास्तव्येभ्यः पराशरसगोत्रेभ्यो विष्णोसोमाचार्यपादेभ्यो विवाहसमये कन्यादानमुदकपूर्वकं कृत्वा" इत्यादि ।

Journal of the Andhra Historical Society, Vol. II, PP. 271–76.

See also 'A Cultural History of Assam', by Dr. B. K. Barua– PP. 107–109.

२. K. N. Dikshit, Epigraphia Indica Val. XXIII, P. 109.

'History of Civilisation of Assam' Dr. P. C. Chaudhury. PP. 384–85.

K. L. Barua 'Uttarakula desa' Journal of Assam Research society, Vol. IV, PP. 113–15.

३. उमया सह वर्त्तमानः सोमः, सोममर्द्धं वामार्द्धं; सोमश्चासौ अर्द्धश्चेति कर्मधारयः, तं धारयितुं शीलं यस्य स सोमार्द्धधारीत्यर्थः ।

शेखरस्य महेश्वरस्योपासका आसन् ।[१] कुमारिलभट्टपादोऽपि तस्यैव सोमार्द्धधारिणो यज्ञपुरुषात्मकस्योपासक आसीदिति तद्ग्रन्थारम्भकृतमङ्गलाचरणादवगम्यते ।[२] सोमार्द्धधारिणो महेश्वरस्य यज्ञात्मकत्वमुपपादितं पार्थसारथिमिश्रप्रमुखैर्भट्टमतव्याख्यातृभिर्मीमांसकमूर्द्धन्यैः ।[३]

महाराजभास्करवर्मणः क्रैष्टसहस्रशतकमध्यभुवः ताम्रशासने उपलभ्यमाने—

"जयति जगदेकबन्धुर्लोकद्वितयस्य सम्पदो हेतुः ।
परहितमूर्त्तिरदृष्टः फलानुमेयस्थितिर्धर्मः ॥"

इत्यस्मिन् तृतीयश्लोके धर्मस्य कुमारिलभट्टपादाभिमतं स्वरूपं प्रयोजनञ्च (फलम्) भिव्यञ्जितमिति प्रतिपद्यामहे वयम् ।

यद्यपि कौलाद्यागमशास्त्राभिमतं श्रुतिस्मृतिविरुद्धं शाक्तपाशुपतादिसम्प्रदायपरिगृहीतं दर्शनं निराकृतं भट्टपादेन[४] तथापि शक्तेः स्वतन्त्रपदार्थत्वं श्रुतिस्मृतिसम्मतमभ्युपगतम् । तथाहि—अद्वैतदर्शने शक्तेः सत्यत्वं स्वाश्रयसत्तातिरिक्तसत्ता वा नाभ्युपगम्यते । न्यायवैशेषिकमते शक्तिर्नाम पदार्थान्तरं नाभ्युपगम्यत एव । सांख्ययोगमते तु प्रकृतिरेव शक्तिः, सा च पुरुषव्यतिरिक्ता स्वतन्त्रा च । भट्टमते तु शक्तिः पदार्थान्तरम् । सा च स्वाश्रयसत्तातिरिक्तसत्तावती, अतएव स्वतन्त्रा । शक्ति-शक्तिमतोः परस्परं भेदाभेदौ । तयोः सम्बन्धस्तु भेदाभेदात्मकः तादात्म्याख्यो यः परैः समवाय इत्युच्यते । यद्धि निःशक्तिकं, परित्यक्तं वा शक्त्या, तदेव निष्क्रियं निःसत्त्वमसच्च भवतीति नैव क्वचित् किञ्चिद् वस्तु शक्तिहीनमुपपद्यते; न च

१. "प्रणम्य देवं शशिशेखरं परं पिणाकिनं भस्मकर्णैर्विभूषितम्" इत्यादि ।

[महाराजभास्करवर्मदेवताम्रशासनम्—का० शा०]

द्रष्टेव प्रतिबिम्बकैर्नखगतैः स्वैर्नृत्यसम्पद्विधेः
सौवश्वीवगतिं शुभां प्रकटयन् दृश्योऽनिशं ताण्डवीम् ।
एवं यः परमात्मवत् पृथुगुणो ह्येकोऽप्यनेकीभवन्
प्राकाम्यं दधदेव भाति भुवने स स्तात् श्रिये शङ्करः ॥

[महाराजरत्नपालताम्रशासनम्—का० शा०]

"वन्दे तमर्द्धयुवतीश्वरमादिदेवमिन्दीवरोरगफनामणिकण्ठबन्धम् ।
उत्तुङ्गपीनकुचकुङ्कुमभस्मभिन्नं शृङ्गाररौद्ररसयोरिव सर्गमेकम् ॥"

[महाराज धर्मपालताम्रशासनम्—का० शा०] इत्यादि ।

२. "विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे ॥" [श्लोकवार्तिकारम्भे]

३. द्र०—न्यायरत्नाकरः पार्थसारथिमिश्रकृतः पृ० १—२ ।

४. तन्त्रवार्त्तिकम् १।३।२, पृ० १९०।

शक्तिशक्तिमतोः परस्परपरिहारेणावस्थितिः सम्भवति । अयं भाट्टाभिमतः शक्त्याख्यः स्वतन्त्रः पदार्थ एव प्राचीनकामरूपीयराजशासनेष्वपि समुल्लिखित उपलभ्यते । तथाहि—

"ऽ स्वस्ति । भवतु भवतिमिरभिदुरं तेजो रौद्रं प्रशान्तये जगतः । परिवर्त्तते समग्रं कल्पान्तनिशावसाने यत् ॥"[१] इत्यत्र, "अनशनविधिना वीरस्तेजसि माहेश्वरे लीनः ।"[२] इत्यत्र च 'तेजः'शब्देन भाट्टाभिमतः शक्त्याख्योऽतिरिक्तपदार्थ एव परामृष्टः । अन्यथा रुद्रव्यतिरिक्ततया महेश्वरपृथक्तया च तत्तेजसः समुल्लेखो व्यर्थः स्यात् ।

"प्राकाम्यं दधदेव भाति भुवने स स्तात् श्रिये शङ्करः ।"[३] इत्यत्र प्राकाम्यपदेन स्वातन्त्र्यशक्तेः परामर्शः, "किं वाघौघविभेदनैकनिरता शक्तिः शुभा शाङ्करी ।"[४] इत्यत्र च शङ्करव्यतिरिक्ततया तच्छक्तेः समुल्लेखः शक्तेरतिरिक्तपदार्थत्वाभ्युपगमपक्ष एव सुतरामुपपद्यते नान्यथा ।

भट्टपादेन वर्णमालावाचकतया 'मातृका' शब्दः प्रयुक्तो यथा—

"ध्वनिमात्राण्यसाधूनि वर्णा वा केवलात्मनाम् ।
सङ्घातोऽर्थानपेक्षो वा मातृकाद्युपदेशवत् ॥"

"…………भेर्यादिशब्दमातृकाक्षरपाठप्रसिद्ध" एतदर्थे 'मातृका' शब्दस्य प्रयोगः इत्यादि[५] कामरूपादिप्रदेशे बहुलमुपलब्धेषु शाक्तादिसम्प्रदायेष्वेव प्रचुरं प्रचलितो यथा—'वर्णमातृका, मातृकावर्णः, मातृकामन्त्रः, मातृकान्यास इत्यादि । तन्त्रमतप्रभावमुक्तानां वैदिकविदुषां मध्ये वर्णमालायां 'मातृका' शब्दप्रयोगो नदृष्टचरः । बहूनां कामरूपीयराजशासनानामपि प्रारम्भे 'ऽ' इत्याकारकम् (क्वचित '७' इत्याकारकमपि) 'आञ्जी' इत्याख्यं चिह्नमङ्कितमुपलभ्यते । 'आञ्जी' तु मातृकावर्णमालायाः कुण्डलिनीशक्तेश्च ज्ञापिका (व्यञ्जिका) प्रतीकभूतेति तद्विदो वदन्ति । अद्यत्वेऽपि असमप्रदेशे मानवकेभ्यः प्रथममुपदेष्टव्यासावकारादिक्षकारान्तपञ्चाशद्वर्णघटिता, वर्णमाला (वर्णसमाम्नायः) 'मातृके'ति सिद्धिरिति चाख्यायते 'ऽ' एवमाकारेण, '७' एवमाकारेण वा आञ्ज्याख्येन सङ्केतेनारभ्यते च[६] ।

१. क्रैष्टनवमशतकमध्यवर्त्तितयाऽनुमितस्य महाराजबलवर्मणः ताम्रशासनम्–का० शा० पृ० ७३।
२. तत्रैव—का० शा० पृ० ७६ ।
३. क्रैष्ट १०मशतकमध्यवर्त्तितया निर्णीतस्य महाराजरत्नपालस्य ताम्रशासनम्, का० शा० ९१ ।
४. तत्रैव का० शा० ९२ ।
५. तन्त्रवार्त्तिकम् १।३।८, पृ० २५३ ।
६. एतद्विषये द्रष्टव्यम्—सप्तदशाखिलभारतीयसंस्कृतभाषणप्रतियोगितानुष्ठानस्य तथा नवमवैदिकसम्मेलनस्य गुवाहाटीनगरे ई० १५-१-७६ दिनात् १६-१-७६ पर्यन्तम् अनुष्ठितस्य 'स्मृतिलेखः'—पृ० २—५ ।

भट्टपादप्रतिष्ठापित: शक्तिवाद एव शाक्तसम्प्रदायस्य कौलागमानुसारिणश्च मुख्यमवलम्बनमभूदिति सम्भाव्यते । तथा कुमारिलभट्टपादोपस्थापितयुक्तिप्रमाणावलम्बनेनैव कौलागमानुसारिभिः वैधहिंसासुरापानादीनां कर्त्तव्यत्वमुपपादितम् ।[1]

एवं तदानीन्तनराजकीयताम्रशासनगतलेख्यप्रमाणसहकृतेन, ग्रन्थान्तरमध्योपलब्धतत्समर्थकोक्तिविशेषोपबृंहितेन, भट्टपादरचितग्रन्थमध्यगतोक्तिविशेषेण च प्रागुपन्यस्तस्य कुमारिलभट्टपादविषयकस्यासमीयलोकप्रवादस्य यथार्थत्वोपपत्तेः पूर्वोत्तरभारतस्य कामरूपराज्यान्तर्गतो मणिकूटपर्वतसन्निहितः प्राग्ज्योतिषपुराख्यो भूभाग एव कुमारिलभट्टपादस्य तत्पितृव्याचार्यधर्मकीर्त्तेरपि जन्मस्थानं निश्चितमिति सुधीभिरालोचनीयमिति शम् ।

---

१. "तस्माद् विधिना मांसं मद्यं न सेव्यते क्वचित् ।
विधिना सेव्यते देवि तरसा त्वं प्रसीदसि ।।
....
तृणं वाऽप्यविधानेन छेदयेन्न कदाचन ।
विधिना गां द्विजं वापि हत्वा पापैर्न लिप्यते ।।" इत्यादि ।
[कुलार्णवतन्त्रम् २।१३५—३६]

—*—

विनम्र-निवेदनम्

परमार्थसुधा-ग्राहकाणां सेवासु सप्रश्रयं निवेद्यते यद् यैर्गतस्य वर्तमानस्य वा वर्षस्य ग्राहकताशुल्को न प्रहितस्ते सकृपं स्व-स्व-द्रव्याणि यथाशीघ्रं सम्प्रेष्यानुगृह्णन्तु पत्रिकामिमाम् । अथ चेदमपि विशेषेणागृह्यते यत्पत्रिकाया अस्या निर्विघ्नं प्रकाशनाय यथाऽवसरं स्वीया एतत्सम्बद्धाः सद्विचाराः, स्वरूपानुरूपा निबन्धास्तथा परिचयप्रदानाय ग्रन्था अपि प्रेषणीयाः । सम्भवेच्चेदन्येऽपि मनीषिणो ग्राहका निर्मातव्या । पत्रिकापरिवारो भवतां सम्मतिं निर्देशञ्च यथासम्भवं सम्मानयिष्यतीति ।

—व्यवस्थापकस्य

कालिदासकृतिषु श्रौतसम्प्रदायाः

श्री के० सूर्यनारायणशास्त्री*

कालिदासमहाकवेः काव्यतपोवनं पुण्यतपोवनमिव भासते यतः एतत्काव्यतपोवनमपि पुरोडाशादिहोमद्रव्यजनितधूमानां पवित्रपरिमलवर्णनैः काव्यतपोवनमागतानां पाठकातिथीनां मनांसि शरीराणि च पवित्रीकरोति। एवमेतद्दर्शनेन अस्माकमपि मनांसि एकवारं पावयिष्यामः। दिलीपसार्वभौमः यदा वशिष्ठाश्रमं प्रविशति, कालिदासस्य अद्भुतवर्णनसज्जितः तत्तपोवनप्रान्तस्सर्वोपि तद्राज्ञः एवं दृष्टिगोचरो भवति। यथा "अभ्युत्थिताऽग्निपिशुनैः अतिथीनाश्रमोन्मुखान्। पुनानं पवनोद्धूतैः धूमैराहुतिगन्धिभिः॥" तत्र आहुतिभ्य उद्गता होमधूमाः तत्र आगतानतिथीन् पुनन्ति। अग्नौ यथाविधि हुताः आज्याद्याहुतयः प्रकृतिशास्त्ररीत्या पवित्रहोमधूमरूपेण परिणतास्सन्तः, क्रमशस्ताः सूर्यमण्डलं प्रविश्य तन्मण्डलात् समृद्धं सकालवर्षं च्यावयन्ति। एवं रीत्या ता आहुतयः क्रमशः सस्यसमृद्ध्यै देशक्षेमाय च कारिका भवन्तीति एतत् स्मृतिवाक्यजातमेवं विशदयति। "अग्नौ प्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते, आदित्याज्जायते वृष्टिः, वृष्टेरन्नं ततः प्रजाः", एवं "यज्ञाद्भवन्ति भूतानि……" एवं भूलोकस्य सर्वविध-सौभाग्यसन्धायकाः श्रुतिविहिता यज्ञादिक्रियाः यथाविधि भूलोके यद्याचरिता न भवेयुः, तदा तत्रत्याः सर्वाः प्रजाः अन्नदारिद्र्येण अनुतप्यमानास्सन्तः अन्वहमाक्रोशन्तीत्येनं विषयं वेदमन्त्रः एवं बोधयति "ओं यज्ञपतिमृषय एनसाऽहुः। प्रजा निर्भक्ता अनुतप्यमानामधव्यौ-स्तोका वपतौ रराध"। निर्भक्ता अन्नरहिता इति यावत्। उक्तश्रुतिप्रमाणेन एवं सिद्धान्तितो भवति। यथा—यथाविधि यज्ञादीनां निर्वहणं देशे अधिकाऽऽहारोत्पत्तिसम्पादनाय वेदशास्त्रविहितं सुलभसाधनं बोभवीतीति। किञ्च स वशिष्ठाश्रमः एवंविधोपि दृश्यते। यथा "वनान्तरादुपावृत्तैः समित्कुशफलाऽऽहरैः। पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः॥" वसिष्ठाऽश्रमस्थितास्तपस्विनः समित्कुशफलान्यादाय वनान्तरात् पुनः यदा स्वीयत्रेताग्निगृहाभिमुखमागच्छन्ति, त्रेताग्नयः इतरेषामदृश्यरूपेण आगतानां तपस्विनामभिमुखं प्रत्याधावन्ति। तादृशप्रभावभासु-

* खण्डविल्लः। दाक्षिणात्यः।

रैस्तपस्विभिः पूर्यमाणं वशिष्ठाश्रमं स महाराजः नेत्रत्रं यथा दृष्टवान्, इति कवेर्वर्णनम् अत्र अग्निप्रत्युद्यानविषयः श्रौतसम्मतः लोकसम्मतश्च विषयः। यथा ग्रामान्तरात् प्रत्यागमनसमये जनकः स्वपुत्राणामभिमतानि भक्ष्याणि गृहीत्वा यदा गृहाभिमुखमागच्छति, भक्ष्यलोलुपास्तत्पुत्राः जनकाभिमुखमभिधावन्ति। एवमेव त्रेताग्नयोपि आगतान् आहिताग्नीन् अदृश्यरूपेण प्रत्याधावन्ति। एवं प्रवासात् स्वाऽग्निसन्निधिं प्रविशतामाहिताग्नीनां समित्कुशाहरणं श्रौतसूत्रं प्रमाणम्। एवमेव महाकविः अशरीरवाणीमुखात् सोमतीर्थात् प्रतिनिवृत्तं कण्वमहर्षिं प्रति शकुन्तलागर्भधारणविषयमेवं सूचयति—"दुष्यन्तेनाऽहितं तेजो दधानां भूतये भुवः, अवेहि तनयां ब्रह्मन्! अग्निगर्भां शमीमिव ॥" अत्र उपमाने "शमीगर्भे अग्निर्विद्यते" इत्यस्य कवेर्वर्णनस्य श्रुतिप्रमाणमेतत् "शमीगर्भादग्निं मन्थति" अथाप्यत्र विशिष्य श्रोतव्यो विशेषो विद्यते। अश्वत्थगर्भे प्रादुर्भूतस्य शमीवृक्षस्य गर्भादेव यजमानाः यज्ञार्थमग्निमुत्पादयन्ति। अस्य श्रुतिप्रमाणमेतत् "ओं" अश्वत्थाद्धव्यवाहाद्धि जातां। अग्नेस्तनूं यज्ञियाङ्गं संभरामि। शान्तयोनिगं शमीगर्भम्। अग्नये प्रणनयितवे। यो अश्वत्थश्शमीगर्भः॥ अश्वत्थे अग्निरस्तीत्यस्य अन्यत् श्रुतिप्रमाणं विद्यते "ओं अश्वो रूपं कृत्वा। सोऽश्वत्थ संवत्सरमतिष्ठत्। तदश्वत्थस्याऽश्वत्थत्वं", अर्थात् अग्निः अश्वरूपेण अश्वत्थवृक्षे तिष्ठतीत्यश्वत्थः। एतावता अस्मन्महाकविः उक्तश्रुत्यर्थं सम्यक् ज्ञात्वा "अग्निगर्भां शमीमिव" इत्यनेन श्रौतसम्प्रदायेन पाठकान् परिचितानकरोत्। एवमेव कविः गिरिजाकुमार्याः "अरणि"सादृश्यं तस्याः मध्यस्य "वेदि"सादृश्यं च वर्णितवान्। एवमेव अस्य कवेः काव्यरत्नापणे बहूनि श्रौतसम्प्रदायरत्नानि पाठकोत्तमानां सुलभान्येव विद्यन्ते।

दिलीपचक्रवर्तिनः सुदक्षिणा नाम्नी पत्नी, यज्ञस्य दक्षिणेव आसीदिति कवेर्वर्णनम्। "पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।" अत्र उपमानेन कविः अध्वरदक्षिणयोः पतिपत्नीसम्बन्धं सूचयन् "यज्ञो गन्धर्वस्तस्य दक्षिणाऽप्सरसः" इत्येनं श्रुत्यर्थं स्वीयोपमानेन प्रकाशयांचकार, पत्न्या अभावे पतिरिव दक्षिणाया अभावे यज्ञोपि नष्टप्रायो भवतीति च स्वीयोपमानेन प्रकटयन् मृतो यज्ञस्त्वदक्षिणः इत्येनं श्रौतरहस्यमत्र कविरुपदिष्टवान्। एवं रघुकौत्ससम्भाषणसन्दर्भे रघुवंशे कविरेवं वदति। "इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण। एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः॥" अत्र रघोः "द्विजराजकान्तिरिति" विशेषणम्। द्विजराजश्चन्द्रः तस्य कान्तिरिव कान्तिः यस्य स इति विग्रहवाक्येन रघुमहाराजः द्विजराजः, द्विजराजसदृशश्च भवितुमर्हति। कविचित्रितस्यास्य अर्थविशेषस्य वेदप्रमाणमपि विद्यते—"तस्मात् सोमराजानो ब्राह्मणाः। सोमोऽस्माकं ब्राह्मणानां राजा।" एवमेवात्र श्लोके "एनोनिवृत्तेन्द्रियवृत्तिः" इति द्वितीयविशेषणेन वक्ष्यमाणमर्थविशेषं कविः प्रकटितवान्। यथा एनसः पापात् निवृत्त उपरत इन्द्रियव्यापारो यस्य राज्ञः स एनोनिवृत्तेन्द्रियवृत्तिर्भवति। रघुमहा-

राजो विश्वजिद्यागादिश्रुतिविहितक्रिया यथाविधि निर्वर्त्य तन्निर्वहणप्रभावेण पापरहितेन्द्रियव्यापारस्संवृत्तः। तत्पापराहित्यं राज्ञो ब्रह्मज्ञानप्राप्तये मूलमासीत्। एवं श्रौतक्रियानिर्वहणं क्रमशः तन्निर्वाहकस्य मोक्षसाधनं भवतीति कविरत्र व्यङ्ग्यरीत्या सूचितवान्। कवेस्सूचनस्यास्य प्रमाणमेवंविधं दृश्यते—"महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः" इत्युक्तरीत्या अस्मत्कालिदासकवीन्द्रः श्रौतक्रियाविशेषान् विशेषेण वर्णयित्वा तद्वर्णनेन पाठकेभ्यः सर्वाभ्युदयसन्धायकान् उत्तमसन्देशान् एवं सूचितवान् यथा—"श्रुतिविहितसत्कर्माचरणं पापभञ्जकं सत्, तत् मानवानां चित्तशुद्धये, भक्तिज्ञानवैराग्यप्रदानाय, तद्द्वारा मोक्षानन्दसम्पादनाय च मूलं भवति। अस्मत्कर्माचरणेनैव जीवितसाफल्यमिहपरलोकयोः सौख्यं च सम्प्राप्तं भवती" ति उपर्युक्तवर्णनैः कविकुलगुरुर्लोकं प्रबोधयामास। एवं भारतीयमूलधनरूपाणां श्रौतक्रियाणामेवं भारतीयसंस्कृतिसर्वस्वरक्षणाय च रत्नपेटिकास्थानीयानि कविकुलगुरोः काव्यानि सर्वस्य भारतीयस्य सादरमध्ययनयोग्यानि लोककल्याणसाधनाय मङ्गलतोरणानि च भवन्तीति शम्॥

परमार्थ-सुधा



शिवदत्तशर्मा चतुर्वेदः*

परमार्थसुधा सुधेव चित्ते
मिलिता नन्दयतीह भावनां मे ।
इयमत्र मनोज्ञवेशसज्जा
मिलिता वाङ्मयमद्भुतं तनोति ॥ १ ॥

बहवोऽत्र धुरीण-धीर-धीराः
प्रतिभा-सार-विमण्डिता विनम्राः ।
नवनीत-समान् मधुप्रलेपान्
निगमेषूल्लसितान् प्रसाधयन्ति ॥ २ ॥

इयमस्ति गभीरवाग्वितानो-
ल्लसिता सन्तमसापसारिणी द्राक् ।
परमार्थ-सुधा नितान्तभव्या
दिवि देवैरपि दर्शनीयकान्तिः ॥ ३ ॥

निगमागमसत्प्रवाहरूपा
महती वागियमादिकालतो या ।
मनसा वचसा सदाभिवन्द्या
परिपठ्या परमार्थतः सुधायाम् ॥ ४ ॥

परमो जगदीश्वरः समन्तात्
विततं वेष्टयतीह दृश्यजातम् ।
ननु चार्थगतोऽपि दृश्यमध्ये
निखिलेष्वेषु चकास्त्यनन्तरूपः ॥ ५ ॥

* प्रवक्ता काशीहिन्दुविश्वविद्यालयस्थ-संस्कृतमहाविद्यालये साहित्यविभागे, (वाराणसी) ।

परमार्थनिविष्टचेतनानां
गतिरप्येकविभुः स एव सर्वः ।
अथवा वितता तदीयवाणी
कथिता सा परमार्थतः सुधैव ॥ ६ ॥

इह याः परमार्थतः प्रवृत्ता
वचसां देवतया नितान्तधीराः ।
कथमन्तमुपालभे नु तासां
क्षणिके श्वासविलासलास्यकाले ॥ ७ ॥

तदिदं विषमेऽपि देशकाले
मतमत्यन्तमनोज्ञभाग्यरूपम् ।
विततं परितोऽपि निर्मलायां
विशदायां परमार्थतः सुधायाम् ॥ ८ ॥

नारायणोत्तरमनीषिसमेधितायां
श्रीवासुदेवमतपूरितचिन्मयायाम् ।
दिव्या लसन्ति विमला विशदा विचारा
वाराणसेयमतिमञ्जुल–पत्रिकायाम् ॥ ९ ॥

श्रीव्यासवन्द्यरचनावलिचञ्चलायां
वेदोदितप्रकटदिव्यविभान्वितायाम् ।
ज्ञानप्रभा विलसतीह नितान्तरम्या
नव्योद्भटावलि–विमण्डित–पत्रिकायाम् ॥ १० ॥

एतादृशेषु विषयेषु पराङ्मुखा ये
जानन्तु ते किमपि तान्प्रति नैष यत्नः ।
ये तु प्रसन्नमनसा प्रविहाय सर्व–
मास्वादयन्ति वचनानि त एव नम्याः ॥ ११ ॥

पाणिनीय-शाकटायनव्याकरणयोः प्रत्याहार-सूत्राणां प्रत्याहाराणाञ्च परिशीलनम्

□

श्रीरामकृष्णपुरोहितः*

□

प्रत्याहारसूत्राणां विवेचनम्—

१—किमर्थो वर्णानामुपदेशः ? इति ।

२—प्रत्याहारसूत्राणि पाणिनीयान्यपाणिनीयानि वेति ?

३—उभयोर्व्याकरणयोः प्रत्याहारसूत्राणां संकलनम् ।

४—पाणिनीयशाकटायनयोः प्रत्याहारसूत्राणां द्वैविध्यप्रदर्शनम् ।

५—अपाणिनीयव्याकरणानां प्रत्याहारसूत्रनिदर्शनम् ।

वैदिकसमये वर्णानामुपदेश आसीत् । किन्तु व्याकरणशास्त्रेऽक्षरसमाम्नायस्य महत्त्वं सर्वोपरि विद्यते । स 'ब्रह्मराशिः' इति नाम्ना[1] उच्यते । अस्याक्षरसमाम्नायस्य विषये शाब्दिकानां बहूनि मतानि दृश्यन्ते । तेषु मतेषु भगवतः पतञ्जलेर्मतं[2] सर्वोत्कृष्टं वर्तते । काशिकायाम्,[3] न्यासे,[4] प्रदीपे,[5] पदमञ्जर्यां[6] च पक्षोऽयं दृश्यते ।

---

* अनुसन्धाता—सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी ।

१. "यथाचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते । न भुक्त्वा, न नक्तं प्रब्रूयाद् ब्रह्मराशिरिति ब्रह्मराशिरिति च" (ऋक्तन्त्रे १।४) ।

२. "अथ किमर्थो वर्णानामुपदेशः ? वृत्तिसमवायार्थ उपदेशः ॥ १५ ॥ वृत्तिसमवायार्थो वर्णानामुपदेशः कर्तव्यः । का पुनर्वृत्तिः ··· ······। शास्त्रप्रवृत्तिः । अथ कः समवायः ? वर्णानामानुपूर्व्येण सन्निवेशः ।·········· अनुबन्धकरणार्थश्च ॥ १६ ॥ वृत्तिसमवायाश्चानुबन्धकरणं च प्रत्याहारार्थम् । इष्टबुद्ध्यर्थश्च । इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः····।

अपिच—वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।

तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थञ्चोपदिश्यते ॥ (महाभाष्ये ४३, ११३ पृ०)

३. का० वृ० पृ० १ । ४. न्यासे पृ० १८ ।

५. प्रदीपे पृ० ९९० । ६. प० म० १८ पृष्ठे ।

परिवर्तिना सिद्धान्तकौमुदीकारेणाऽपि[१] पक्षोऽयं समर्थितः। अपाणिनीयेन चान्द्र-व्याकरणकारेण,[२] शाकटायनेन[३] चेदं मतं समर्थितम्।

महाभाष्ये भगवता पतञ्जलिना 'हरवट्'[४] (प्र० सू० ५), 'वृद्धिरादैच्'[५] (अ० १।१।१) इत्यनयोः सूत्रयोर्निर्दिष्टं यत् पाणिनीयानि प्रत्याहारसूत्राणीति। स्कन्दस्वामिना,[६] कुलशेखरवर्मणा,[७] पुरुषोत्तमदेवेन,[८] सृष्टिधराचार्येण,[९] मेधातिथिना,[१०] न्यासकारेण[११] च पक्षोऽयं समर्थितः।

परञ्च नन्दिकेश्वरेण,[१२] पाणिनिशिष्येण,[१३] भट्टोजिदीक्षितेन[१४] चोक्तं यद् माहेश्व-

१. सि० कौ० पृ० ३।
२. चा० व्या० पृ० १।
३. "वर्णसमाम्नायः क्रमानुबन्धोपादानः प्रत्याहारयन् शास्त्रस्य लाघवार्थः"। (शाकटायनः-मोघवृत्तौ पृ० १)।
४. "एषा ह्याचार्यस्य शैली लक्ष्यते—यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति—अचोऽक्षु हलो हल्षु" इति। आचार्यपदस्य व्यवहारो भाष्ये पाणिनये कात्यायनाय च भवति। अत्र तु पाणिनये आचार्यपदेन निर्देशः। (द्र० भ० भा० पृ० ९५)।
५. 'वृद्धिः, आदैच्, च पदस्य साधुत्वप्रतिपादने वर्णितम्'—"कृतमनयोः साधुत्वं कथम्। वृधिरस्माय विशेषेणोपदिष्टः प्रकृतिपाठः तस्मात् क्तिन्प्रत्ययः। आदैचोऽप्यक्षरसमाम्नाय उपदिष्टाः" (म० भा० १।१।१)।........
६. "नापि 'अइउण्' इति पाणिनीयप्रत्याहार—समाम्नायवत्" (निरुक्तटीकायाम् प्रथमे भागे ८ पृ०)।
७. "पाणिनिप्रत्याहार इव महाप्राणझषाश्लिष्टो झषालंकृतश्च" (अमरटी० सर्वस्वे प्रथमे भागे १८६ पृ०)।
८. भाषावृत्यर्थविवृतेः प्रारम्भे।
९. भाषा० विवृ० १ पृ०।
१०. मनु० टीका० १।१ पृ० १।
११. न्यासे ७५५ पृ०।
१२. एतच्चतुर्दशसूत्रव्याख्यायां काशिकायामुक्तम्—
"नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्" ॥ इति।
१३. येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ (पाणिनिशिक्षायाम्)।
१४. "इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि" (सि० कौ० ३ पृ०)।

राणि 'प्रत्याहारसूत्राणीति ।' किन्तु मतमिदं युक्तं न प्रतिभाति । महाभाष्यकारस्य पूर्वोक्तं समर्थितं मतं युक्तमस्ति ।

पाणिनीयानि सूत्राणि—

अइउण् (१) ऋऌक् (२) एओङ् (३) ऐऔच् (४) हयवरट् (५) लण् (६) ञमङणनम् (७) झभञ् (८) घढधष् (९) जबगडदश् (१०) खफछठथचटतव् (११) कपय् (१२) शषसर् (१३) हल् (१४) इति प्रत्याहारसूत्राणि ।

शाकटायनीयानि सूत्राणि—

अइउण् (१) ऋक् (२) एओङ् (३) ऐऔच् (४) हयवरलञ् (५) ञमङणनम् (६) जबगडदश् (७) झभघढधष् (८) खफछठथट् (९) चटतव् (१०) कपय् (११) शषसअंअः ≍क ≍पर् (१२) हल् (१३) इति प्रत्याहारसूत्राणि ।

उपर्युक्तसंकलितसूत्रेषु पाणिनेश्चतुर्दश शाकटायनस्य च त्रयोदश सूत्राणि विद्यन्ते । उभयोर्व्याकरणयोः सूत्रेषु द्वैविध्यं दृश्यते । पाणिनीयानाम् 'ऋऌक्' 'हयवरट्' 'लण्' 'झभञ्' 'घढधष्' 'खफछठथचटतव्' 'शषसर्, इत्येतेषां सूत्राणां स्थाने शाकटायनस्य 'ऋक्, हयवरलञ्, झभघढधष्, 'खफछठथट्' शषसअंअः≍ क ≍पर्, इमानि सूत्राणि सन्ति ।

नायं पक्षः शाकटायनस्य स्वोपज्ञः । अपाणिनीये चान्द्रव्याकरणे,[1] जैनेन्द्रव्याकरणे,[2] सरस्वतीकण्ठाभरणे,[3] सारस्वत[4] व्याकरणे, मुग्धबोधे[5] चाऽयं पक्षो दृश्यते ।

पाणिनीयेऽक्षरसमाम्नाये ऌकारस्योपदेशो वर्तते । अत्र भगवता पतञ्जलिना महाभाष्ये 'ऋऌक्' इतिसूत्रे ऌकारोपदेशस्य हेतुरित्थं प्रतिपादितः—"ऌकारोपदेशः क्रियते यदृच्छाशब्दार्थोऽशक्तिजानुकरणार्थः प्लुत्याद्यर्थश्च । यदृच्छाशब्दार्थस्तावत्—यदृच्छया कश्चित्

---

१. 'हयवरट्, लण्' इत्यनयोः सूत्रयोः स्थाने 'हयवरलण्' इत्येवं सूत्रमस्ति (चा० व्या० पृ० १) ।

२. 'अइउण्, ऋक्, एओङ्, ऐऔच्, हयवरलण्, ञमङणनम्, झभञ्, घढधष्, जबगडदश्, खफछठथचटतव्, कपय्, शषसअंअः ≍ क ≍पर्, हल्,' शाकटायनस्य सूत्राणि, एभिः सूत्रैः सह साम्यमस्ति (जै० व्या० पृ० १) ।

३. हयवरट्, लण्, इत्यनयोः स्थाने हयवरलण्, इत्येकं सूत्रमस्ति (स० क० पृ० ३) ।

४. 'अइउऋऌ' 'एऐओऔ, हयवरल, ञणनङम्, झढधघभ, जडदगब, छठथखफ, चटतकप, शषस, (सार० पृ० १–३) ।

५. अइउऋऌक्, एओङ्, ऐऔच्, हयवरल, ञणनङम्, झढधघभ, जडदगब, खफछठथ, चटतकप, शषस (मु० पृ० ९) ।

लृतको नाम । तस्मिन्नच्कार्याणि यथा स्युः—दध्य्[१]लृतकाय देहि, मध्व्लृतकाय देहि, उदङ्-लृतकोऽगमत्,[२] प्रत्यङ् ङ्लृतकोऽगमत् । चतुष्टयी शब्दानां प्रवृत्तिः—जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्चतुर्थाः" इति ।

अशक्तिजानुकरणार्थः—"अशक्त्या कयाचिद् ब्राह्मण्या ऋतक् इत्याह कुमार्य् लृतक इत्याह ।

प्लुत्याद्यर्थश्च—के पुनः प्लुत्यादयः । प्लुतिर्द्विवचनस्वरिताः । क्लृ३प्तशिखः[३] । क्लृप्तः[४] । प्रक्लृप्तः[५] । प्लुत्यादिषु कार्येषु कृपेर्लत्वं सिद्धम् । तस्य सिद्धत्वादच्कार्याणि न सिध्यन्ति । तस्माद् लृकारोपदेशः क्रियते । अत्र भाष्यकृता महान् प्रयत्नोऽनुष्ठितः । "सैषा महतो वंशस्तम्बाल्लट्वाऽनुकृष्यते"[६] इत्यनेन सूचितम् तेन । काशिकायाम्,[७] न्यासे,[८] पदमञ्जर्याम्,[९] प्रदीपे,[१०] प्रक्रियाकौमुद्याः[११] प्रसादटीकायाञ्च पक्षोऽयं दृश्यते ।

परवर्तिना नागेशेनापि पक्षोऽयं समर्थितः ।

शाकटायनस्याक्षरसमाम्नाये तु लृकारोपदेशो नास्ति । एतद्विषये तेन स्वोपज्ञामोघवृत्तावुक्तम्—"ॠ" इत्येव लृवर्णस्य ग्रहणम् । तयोरेकत्वं हि 'गुरुर्वैकोलनृत' (शा० २।३।२७) इति लृ—ग्रहणात् प्रतिज्ञायते । तथा च 'ऋत्यकः' (शा० १।१।७५) इत्यादिलृकारेऽपि सिद्धं भवति ।[१३] तथा च "ऋवर्णलृवर्णयोरेकत्वप्रतिज्ञानाद्दतीति लृकारोऽपि गृह्यते"[१४] इति ।

१. 'इको यणचि' (अ० ६।१।७७) इत्यनेन यणि ।
२. "ङमो ह्रस्वादचि ङमुण्नित्यम्" (अ० ८।३।३२) इत्यनेन ङमुडागमे ।
३. "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्" (अ० ८।२।८६) इत्यनेन प्लुतः ।
४. 'अनचि च' (अ० ८।४।४७) इत्यनेन द्वित्वम् ।
५. "उदात्तादनुदात्तस्य स्वरितः" (अ० ८।४।६६) इत्यनेन स्वरितः ।
६. म० भा० ६४ पृष्ठतः—७३ पृष्ठपर्यन्तम् ।
७. का० वृ० पृ० २९ ।
८. न्या० पृ० २७–३० ।
९. प० म० पृ० २७–२९ ।
१०. प्रदीपे पृ० ७२–७७ ।
११. प्रसादटीकायाम् पृ० १२ ।
१२. उद्योते पृ० ७२–७७ ।
१३. शा० अ० वृ० पृ० १ ।
१४. तत्रैव पृ० १५ ।

शाकटायनव्याकरणे "ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्"[१] इति कात्यायनीयस्य वार्तिकस्यानुसारेण 'दध्य्लृतकाय दीयताम्' पितृकार इत्यादि प्रयोगाणां सिद्धिः स्वीक्रियते पाल्यकीर्तिना। किन्तु 'क्लृप्तशिखा' इति प्रयोगे "एकदेशविकृतस्यानन्यत्वात् प्लुत्यादयः[२]" इति, "रवत् प्रतिषेधाच्च"[३] इति सिद्धान्तयोरनुसारेण प्रतिषेधनिवृत्त्यर्थं "दूरादामन्त्र्यस्य गुरुर्वैकोऽनृत्[४]" (शा० २।३।२७) इत्यस्मिन् सूत्रे लृकारस्य पर्युदासः स्वीकृतः शाकटायनेन। तेनोक्तम् — "लृकारग्रहणमनृदिति प्रतिषेधनिवृत्त्यर्थम्। इदमेव ज्ञापकम् ऋवर्णलृवर्णयोरभेदेन सङ्ग्रहणस्य"[५] इति।

नायं पक्षो युक्तः। शाकटायनव्याकरणे केवलं लौकिकशब्दानां सिद्धिर्भवति। यतः 'प्रक्लृप्तः' इत्यस्मिन् स्वरितविधानार्थं किमपि सूत्रं नास्ति। पाणिनीये व्याकरणे तु लौकिक-वैदिकयोः शब्दयोः सिद्धिर्जायते। अतः पाणिनेः लृकारस्योपदेशस्य पक्षो युक्तः प्रतिभाति। तथा च प्रदीपे स्पष्टमुल्लिखितं कैयटेन — "वार्तिककारस्य लृकारप्रत्याख्यानं निष्प्रयोजन-मित्याह" (प्रदीपे ७७ पृष्ठे)।

तथा च पाणिनीयतन्त्रे महाभाष्ये भाष्यकारेण अयोगवाहानामुपदेशविषये पक्षत्रय-मुपस्थाप्य विस्तरेण प्रपञ्चितम्। तत्रोक्तम् — "अयोगवाहानामट्सु णत्वम्"[६] "शर्षुजश्भाव-षत्वे"[७] अथवा "अविशेषेण संयोगोपधासंज्ञाऽलोन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः"[८] इति। परञ्च शाकटायनेन भाष्यकारस्य "शर्षुजश्भावषत्वे" इति पक्षमाश्रित्य स्वकीये व्याकरणे "शषसअंअः ≍क ≍प र्" (प्र० सू० १२) इति प्रत्याहारसूत्रं विरचय्य वैशिष्ट्यं प्रद-र्शितम्। अतो नायं स्वोपज्ञत्वं पाल्यकीर्तेः। शब्दार्णवचन्द्रिकायां पक्षोऽयं दृश्यते। हैम-शब्दानुशासने "अंअः ≍क ≍ पशषसाः शिट्" (१।१।१६) इति सूत्रमस्ति। मलय-गिरिशब्दानुशासने च "अं–अः–क ≍ पशषसाः शिट्" (प्र० सन्धौ १८) इति सूत्रं सूत्रितम्।

प्रत्याहाराणां परिशीलनम्

पाणिनेरष्टाध्याय्यामेकचत्वारिंशत् (४१) प्रत्याहारा दृश्यन्ते। परञ्च वार्तिककारेण "चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्" इति वार्तिकं विरचय्य 'चय' प्रत्याहारः

१. सि० कौ० पृ० १५।
२. म० भा० पृ० ७६।
३. तत्रैव पृ० ७७।
४. चा० व्या० 'गुरु एकैकम् अनृतं वा' (६।३।११८) इति। जै० व्या० "अनृतोऽनन्त्यस्याप्येकैकस्य रोः" (५।३।९४)।
५. शा० अ० वृ० २।३।२७।
६–७–८. 'हयवरडिति सूत्रे महाभाष्ये ९२, ९४ तमयोः पृष्ठयोः।

स्वीकृतः । अपि च काशिकाकारेण "ञमन्ताड्डः" इति ञकारेणापि ग्रहणमस्य दृश्यते[1] इति विलिख्य ञम्प्रत्याहारोऽपि स्वीकृतः । किन्त्वयं प्रत्याहार उणादिसूत्रे दृश्यते, अत्रोक्तम् तत्त्वबोधिनीकारेण "ञमिति प्रत्याहारः । काशिकायां तु त्रिभ्य एव कणमाः स्युरित्युक्तम्, ञम्प्रत्याहारस्तु न स्वीकृतः । अष्टाध्याय्यां तस्य विषयाभावात्"[2] इति । काशिकायां त्वयं श्लोको वर्तते—

एकस्मान् ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः ।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः ।। इति ।[3]

अस्मिन् श्लोके ४१ प्रत्याहाराणां समावेशोऽस्ति । परञ्च विवेचनेनेदं प्रतीयते यत् पाणिनीयतन्त्रे त्रिचत्वारिंशत् प्रत्याहाराः समुपलभ्यन्ते ।

शाकटायने तु सप्तत्रिंशत् (३७) प्रत्याहारा दृश्यन्ते, किन्तु शाकटायनप्रक्रियासंग्रहकारेणाधोलिखितश्लोके ३८ प्रत्याहाराणामुल्लेखः कृतः ।

एको णङटवाद् ग्राह्यो द्वौ ञशात्कयतस्त्रयः ।
चत्वारश्चमरात् षट् स्यु यथायोगं षलाद् बुधैः ।।[4] इति ।

अमोघवृत्तावपि प्रत्याहारगणनाप्रसङ्गे ३८ प्रत्याहाराणां गणना स्वीकृता, तत्रोल्लेखोऽस्ति—"मकारस्य छञमयप्रशानः" (शा० १।१।१५०) इत्यकारेण, 'हलो यमि यमो वा' (शा० १।१।१३२) इति यकारेण, 'ञमोऽङः' इति ञकारेण, इति त्रयाणां प्रत्याहाराणामुल्लेखः । परञ्च शाकटायनव्याकरणे 'ञमोऽङः' इति सूत्रं न दृश्यते । अपि च ञम्प्रत्याहारस्यापि प्रयोगो न दरीदृश्यते । अतः शाकटायनप्रक्रियासंग्रहकारस्य कथनं नोचितं प्रतिभाति । पाणिनीयशाकटायनयोः प्रत्याहाराणां वर्गीकरणमित्थमस्ति—

पाणिनीयव्याकरणसदृशाः शाकटायनव्याकरणप्रत्याहाराः

शाकटायनस्य		पाणिनीयस्य	
१—अण्	(१।१।८०)	अण्	(१।१।५१)
२—अक्	(१।१।७५)	अक्	(६।१।१०१)
३—इक्	(१।१।७२)	इक्	(१।१।३)
४—उक्	(१।२।११४)	उक्	(४।१।५)

१. 'ञमङणनम्" (प्र० सू० ७) इति सूत्रे काशिकायां ४ पृष्ठे ।
२. "ञमन्ताड्डः" (३०११९) इति सूत्रे द्र० ।
३. काशिकायां ६ पृष्ठे ।
४. शाकटायनप्रक्रियासंग्रहे २ पृष्ठे ।

५—एङ्	(१।१।२०)	एङ्	(६।१।९४)
६—अच्	(१।१।४५)	अच्	(१।१।५७)
७—इच्	(२।२।३)	इच्	(६।३।६८)
८—एच्	(१।१।७१)	एच्	(६।१।७८)
९—ऐच्	(१।१।१९)	ऐच्	(१।१।१)
१०—इञ्	(१।२।६०)	इण्	(८।३।५७)
११—यञ्	(१।१।७२)	यण्	(६।१।७७)
१२—अम्	(१।१।१५०)	अम्	(८।३।६)
१३—यम्	(१।१।१३२)	यम्	(८।४।६४)
१४—ङम्	(१।१।१२३)	ङम्	(८।३।३२)
१५—ञम्		ञम्	(उ० सू० ११९)
१६—जश्	(१।१।१३६)	जश्	(८।४।५३)
१७—बश्	(१।२।७६)	बश्	(८।२।३७)
१८—अष्	(१।१।१५३)	अश्	(८।३।१७)
१९—हष्	(१।१।१५७)	हश्	(६।१।१४)
२०—वष्	(४।२।१३४)	वश्	(७।२।८)
२१—छव्	(१।१।१५०)	छव्	(८।३।७)
२२—मय्	(१।१।१०५)	मय्	(८।३।३३)
२३—खय्	(१।१।११४)	खय्	(८।३।६)
२४—जर्	(१।१।१३३)	झर्	(८।४।६५)
२५—खर्	(४।१।७९)	खर्	(८।४।५५)
२६—चर्	(४।१।७९)	चर्	(८।४।५४)
२७—शर्	(१।१।११४)	शर्	(७।४।६१)
२८—जय्	(१।१।१०९)	झय्	(८।३।६२)
२९—अल्	(१।४।४७)	अल्	(१।१।६५)
३०—हल्	(१।१।१३२)	हल्	(१।१।७)
३१—वल्	(१।१।६४)	वल्	(६।१।७६)
३२—रल्	(४।१।१५२)	रल्	(१।२।२६)
३३—जल्	(१।२।७५)	झल्	(८।२।२६)
३४—शल्	[illegible]	शल्	(३।१।४५)

३५—जप्	(१।१।१३६)	झश्	(८।४।५३)
३६—झष्	(१।२।७६)	झष्	(८।२।३७)
३७—भष्	(१।२।७६)	भष्	(८।२।३७)

शाकटायनस्य पाणिनेरपेक्षया विशिष्टाः प्रत्याहाराः

शा०		पा०
१—झट् (४।१।६३)	—	(६।४।१२०-२१-२२-२६)

पाणिनीयतन्त्रस्य शाकटायनस्यापेक्षया विशिष्टाः प्रत्याहाराः

पा०			शा०
अण्	(१।१।६९)	—	(१।१।२)
अट्	(८।४।६३ वा०)	—	(१।१।१४४)
यञ्	(७।३।१०१)	—	(४।२।३४)
यय्	(८।४।५८)	—	(१।१।१०६)
यर्	(८।४।४५)	—	(१।१।१०६)
चय्	(८।४।४८)	—	(१।१।११४)

शाकटायनेन स्वकीये व्याकरणे "त्रप्फलिभजत्रझट्क्वज्ह्वादिददिशसिक्तस्याऽन्तर्हलोः" (शा० ४।१।६३) इति सूत्रे झट्प्रत्याहारः स्वीकृतः। तत्र पाणिनीये तन्त्रे "थल् च सेटि' (अ० ६।४।१२१), "अत एक हल्मध्येऽनादेशादेर्लिटि" (अ० ६।४।१२०), 'तृफलभजत्रपश्च' (अ० ६।४।१२२) "न शसददवादिगुणानाम्" (अ० ६।४।१२६) इति सूत्राणि सन्ति। अत्र सूत्रे शाकटायनेन पाणिनीयस्य 'अनादेशादेः' इति पदस्य स्थाने व्याख्यारूपतया (अझट्क्वज्ह) इत्यंशः स्वकीये सूत्रे सन्निवेशितः। काशिकायाम् "अनादेशादेः" इत्यस्यार्थः कृतः "आदेश आदिर्यस्याङ्गस्य नास्ति" इति। √कण् धातोर्लिटि द्वित्वे "कुहोश्चुः" इत्यनेनाऽऽद्यस्य ककारस्य स्थाने चकारादेशे सति 'चकण्'। √गण् धातोः 'जगण्' √भण् धातोः 'बभण्' √फण् धातोः 'पफण्' √हल् धातोः 'जहल्' इत्यादिष्वेकारादेशो न भवति। शाकटायनेन तु प्रायस्तानि सर्वाण्येवाऽक्षराणि परिगणितानि, यत्र लिटि द्वित्वे सत्याद्याक्षरस्य स्थान आदेशो भवति, यथा—झट्प्रत्याहारः (झ, भ, घ, ढ, ध, ख, फ, छ, ठ, थ,) कवर्गाः अच् ह्वादिश्चेति। क्रमेणोदाहरणानि—झकारस्य-जझटतुः, अत्र झकारस्य स्थाने जकारादेशः। अत ऐत्वमभ्यासलोपश्च न भवतः। 'बभणतुः' अत्र भकारस्य बकारादेशः, अत्रापि तथैव ज्ञेयम्। जघसतुः, चखनतुः, डुढौके, दधावतुः, चकचतुः, पफणतुः, चछमतुः, टठरुतुः, तथलतुः इति। इमान्युदाहरणानि झट्प्रत्याहारान्तर्गतानि वि[illegible]। [illegible] तु चकणतुः, जगणतुः,

इति। अत्र खघौ झट्प्रत्याहारान्तर्गतत्वात् पुनरुक्तौ भवतः। अजादिस्तु—इयजिथ, उवयिथ। हादिः—जहसतुः। वादिः—ववणतुः। कृत्—विशररतुः, निपपरतुः, इति। एवं ताव। पञ्चाक्षरात्मके अनादेशादेरित्यस्य स्थाने व्याख्यात्मकः (अझट्क्वज्ह) इति पञ्चाक्षरात्मकं व्याख्यारूपं पदजातं प्रयुक्तम्। "न शसददवादिगुणानाम्" (अ० ६।४।१२६) इत्यत्र गुणस्थाने कृतशब्दस्य प्रयोगः कृतः।

पाणिनेः सूत्रचतुष्टयी समानविषयिणीति कृत्वा शाकटायनेन (पाल्यकीर्तिना) तेषां स्थाने कृतमेकं सूत्रं युक्तियुक्तम्। एकहल्मध्यत्वाभावात् त्रब्धातोरनादेशादेरित्वात् पाणिनेर्मते। शाकटायनमते च झडाद्यर्थत्वाद् भज्-फल्धात्वोः पाणिनेर्मते गुणत्वात्, शाकटायनमते च कृतत्वात् 'तृ' धातोश्च निषेधः स्यादेतदर्थं पार्थक्येन सूत्रे तेषां धातूनां ग्रहणं कृतम्।

पाणिनेर्व्याकरणे चर्तुण्णां सूत्राणां पार्थक्यात् सर्वेषां संगतिः परस्परं करणीया भवति। शाकटायनव्याकरणे तु तेषां सर्वेषामेकसूत्रे ग्रथितत्वात् सौकर्य्यं वर्तते। पाणिनेः "एक हल्मध्ये" इत्यंशस्य 'असहाययोर्हलोर्मध्ये' इत्यर्थः कृतः काशिकायाम्। सूत्रांशे विचिकित्सा जागर्ति हलोर्मध्ये हलां मध्ये वेति। अतः शाकटायनेन स्पष्टार्थं काशिकावृत्तेः 'हलोर्मध्ये' इति व्याख्यायाः स्थाने 'अन्तः हलोः' इति परिपूर्य्य सूत्रे सन्निवेशः कृतः। एवं खलु निर्भरमनुशील्य पाणिनीयं व्याकरणं, रचितं शाकटायनं व्याकरणं पाल्यकीर्तिना। पाणिनीय-व्याकरणस्य ग्रन्थग्रन्थिभेदनार्थमिदं शाकटायनं व्याकरणं पाणिनीयवैयाकरणानां महते लाभाय भविष्यतीति मदीयो विश्वासः।

अपि च—भगवता पाणिनिनाऽण्प्रत्याहारो द्विवारं पठितः। तत्र प्रथमस्तु समान एव। परश्च द्वितीयस्याऽण्प्रत्याहारस्योपयोगः "अणुदित्सवर्णस्य चाप्रत्ययः" (अ० १।१।६९) इति सूत्रे वर्तते। तत्र काशिकायां "परेण णकारेण' प्रत्याहारग्रहणम्। अणृगृह्यमाण उदिच्च सवर्णानां ग्राहको भवति स्वस्य च रूपस्य प्रत्ययं वर्जयित्वे"त्यर्थः कृतः। (का० वृ० १।१।६९)।

शाकटायनेन तु महाभाष्यकारस्य[१] "अणुदित्सवर्ण०" (अ० १।१।६९) इति सूत्रे जातिपक्षेऽण्ग्रहणप्रत्याख्यानपक्षमाश्रित्य "उतास्वः" (शा० १।१।२) इति सूत्रं विरचय्य महद् वैशिष्ट्यं प्रदर्शितम्। तथा च पाणिनीयतन्त्रे अट्, यञ्, यय्, यर्, चय्, इति शाकटायनस्यापेक्षया विशिष्टप्रत्याहारा दृश्यन्ते। तत्र सूत्राणि—'शश्छोऽटि' (अ० ८।४।६३), "अतो दीर्घो यञि" (अ० ७।३।१०१), "अनुस्वारस्य ययि परसवर्णः" (अ० ८।४।५८), "यरोऽनुनासिकेऽनुनासिको वा" (अ० ८।४।४५) "चयो द्वितीयाः शरि पौष्करसादेः" (८।४।४८ वा०) इति। शाकटायनेन तु "छत्वममिचच्छंलोकेन चच्छ्मश्रुणोति प्रयोजनम्"

१. "अणुदित्"० (अ० १।१।६९) इति सूत्रे भाष्ये ३७३ तमे पृष्ठे द्र०।

(८।४।६३ वा०) इति वार्तिकस्यानुसारेण "शश्छोऽमि" (शा० १।१।१४४) इति विरच्याऽट्प्रत्याहारस्याऽम्प्रत्याहारे निवेशः कृतः। अपि च शाकटायनेन यय्-यर्-प्रत्याहारौ हल्-प्रत्याहारे निवेश्य "हलोऽनुंनासिकेऽनुनासिकः स्वः" (शा० १।१।१०६) इति सूत्रं विरचय्य लाघवमाश्रितम्। तथा च चय्प्रत्याहारं खय्प्रत्याहारे निवेश्य "खय् खयश्शरि वा" (शा० १।१।११४) इति सूत्रं विरचितम्। एवञ्च यञ्प्रयाहारस्य कृते "अतो येयः" (अ० ७।२।८०) इति सूत्रे 'पचेत्, यजेत्, इति प्रयोगयोः "अतो दीर्घो यञि" (अ० ७।३।१०१) इत्यनेन दीर्घत्वं प्राप्नोति। तत्र "येन नाप्राप्तिन्यायेन दीर्घस्यैव बाधकः" इति महाभाष्यकारस्य पक्षमाश्रित्य पाल्यकीर्तिना (शाकटायनेन) "आद्मव्यतः" (शा० ४।२।३४) इति सूत्रे "मकारादौ वकारादौ च" निवेश्य वैशिष्ट्यं प्रदर्शितमिति।

सूचना

प्रथमत एव सम्प्राप्तानां केषाञ्चनाभिनव-साहित्यानां परिचयोऽपरिहार्यकारण-वशादङ्केऽस्मिन्प्राकाश्यं न गत इत्येतदर्थं पुस्तक-प्रदातारः पाठकाश्च क्षन्तव्याः। आगामिन्यङ्के तद्ग्रन्थानां यथास्थानं परिचयः प्रकाशयिष्यत इति सविनयं संसूच्यते।

—सह-सम्पादकः

पूर्वाङ्कादनुवृत्तम्

ब्रह्मचिन्तनपरम्पराया विकासः

डॉ० राजेन्द्रप्रसादद्विवेदी*

परिमोहितः सन् दुःखी, सुखी भोक्ता वा भवति। तथा च श्रुतिः—'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम्' (कैवल्यो० १२)। स्वप्ने कल्पितजीवलोके स्वमायया स जीवः कर्त्ता भोक्ता च भवति। सुषुप्तिकाले सकले विलीने स एव तमोऽभिभूतः सुखरूपमति। एतस्मात् प्राणा मनः सर्वेन्द्रियाणि च जायन्ते। तस्मिन्नेव सकलं जातं सर्वं प्रतिष्ठं सर्वं लयं च याति। तदेव ब्रह्म अपि। संसारार्णवनाशनं ज्ञानमनेन सम्प्राप्य जीवः कैवल्यफलमश्नुते। एवं सर्वाणि भूतानि मणिसूत्रमिव आत्मनि व्यवस्थितानि सन्ति।[1]

ननु आत्मा एव सर्वं स च सत्यस्वरूपकः कथं तर्हि बन्धः कथं मोक्षश्च। यदि अविद्या तत्र कारणं तदा विद्या का भवति। जाग्रत् स्वप्नं सुषुप्तं तुरीयं च कथं भवति। अन्नमयः प्राणमयो मनोमयो विज्ञानमय आनन्दमयश्च कोशः कथं वात्मनः सम्भवति। कर्त्ता जीवः क्षेत्रज्ञः साक्षी च कथं स कूटस्थोऽन्तर्यामी चात्मा प्रत्यगात्मा परमात्मा मायात्मा च कथं भवति। सत्यम्, शृणु तावत्। आत्मेश्वरोऽनात्मानो देहादीनामात्मत्वेन अभिमन्यते सोऽभिमानः आत्मनः बन्धः, तन्निवृत्तिश्च मोक्षः। अविद्या तु सा या तदभिमानं कारयति। स च अभिमानः यथा विनिवर्तते सा विद्या। मनसादिचतुर्दशकरणैः पुष्कलैः आदित्याद्यनुगृहीतैः शब्दादीन् स्थूलान् विषयान् यदोपलभते तदा आत्मनो जागरणम्। तद्वासनारहितः चतुर्भिः करणैः शब्दाद्यभावेऽपि वासनामयान् शब्दादीन् यदा उपलभते तदात्मनः स्वप्नम्। चतुर्दशकरणोपरमात् विशेषविज्ञानाभावात् यदा आत्मा तिष्ठति तदा तस्य सुषुप्तिः। अवस्थात्रयभावात् भावसाक्षि स्वयं भावाभावरहितं चैक्यं यदा तदा तु तुरीयं चैतन्यमित्युच्यते। अन्नकार्याणां षण्णां कोशानां समूहोऽन्नमयकोश इत्युच्यते। प्राणादिवायुभेदा अन्नमये कोशे यदा वर्तन्ते तदा प्राणमयः कोश इत्युच्यते। प्राणमयकोशश्च गमनादिक्रियासम्पन्न इति कार्यमुच्यते। एतत्कोशद्वयसंयुक्तः मनआदिचतुर्भिः करणैरात्मा शब्दादिविषयान् सङ्कल्पादिधर्मान् यदा करोति तदा मनोमयकोश इति कथ्यते।

१. ध्यानबिन्दु. ।८

* प्राध्यापकः—संस्कृतविभागस्य, राँचीविश्वविद्यालयः, राँची (बिहार)

मनोमयकोश इच्छाशक्तिसम्पन्न इति विवेकसाधकत्वेन करणमुच्यते। पूर्वोक्तान्नमयप्राणमयमनोमयकोशेषु विज्ञानमयः कोशो ज्ञानशक्तिसम्पन्न इति कर्त्ता उच्यते। एतत्कोशचतुष्टयं स्वकारणाज्ञाने वटकणिकायामिव गुप्तवटवृक्षो यदा वर्तते तदानन्दमयकोश इत्युच्यते। स एव भोक्ता भवति।[1] सुखदुःखसंविदाश्रयो देहान्तः कर्त्ता यदा तदा इष्टविषये बुद्धिः सुखबुद्धिः, अनिष्टविषये बुद्धिः दुःखबुद्धिः। शब्दस्पर्शरूपरसगन्धाः सुखदुःखहेतवः। पुण्यपापकर्मानुसारी भूत्वा प्राप्तशरीरसंधियोंगमप्राप्तशरीरसंयोगमिव कुर्वाणो यदा दृश्यते तदा उपहितत्वात् जीव इत्युच्यते। मनःप्राणसत्त्वेच्छापुण्यादिपंचवर्गा इत्येषां पंचवर्गाणां धर्मीभूतात्मज्ञानादृते न विनश्यति। आत्मसन्निधौ नित्यत्वेन प्रतीयमानः य आत्मोपाधिः तल्लिङ्गशरीरं हृद्ग्रन्थिरित्युच्यते। तत्र यच्चैतन्यं प्रकाशते स क्षेत्रज्ञ इत्युच्यते।

ज्ञातृज्ञानज्ञेयानामाविर्भावतिरोभावज्ञाता स्वयमेवमाविर्भावतिरोभावहीनः स्वयंज्योतिः स साक्षीत्युच्यते। ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिषु अविशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते। कूटस्थाद्युपहितभेदानां स्वरूपलाभहेतुर्भूत्वा मणिगणसूत्रमिव सर्वक्षेत्रेषु अनुस्यूतत्वेन यदा प्रकाशते आत्मा तदान्तर्यामीत्युच्यते। सर्वोपाधिविनिर्मुक्तः सुवर्णवद्विज्ञानघनः चिन्मात्रस्वरूप आत्मा स्वतन्त्रो यदा अवभासते तदा त्वंपदार्थः प्रत्यगात्मा इत्युच्यते, प्रतीपमञ्चतीति विग्रहात्। सत्यं ज्ञानमनन्तमानन्दं ब्रह्म। सत्यमविनाशि यत् नामदेशकालवस्तुनिमित्तेषु विनश्यत्सु न विनश्यति। ज्ञानं नाम उत्पत्तिविनाशरहितं चैतन्यम्। अनन्तं नाम मृद्विकारेषु मृदिव सुवर्णविकारेषु सुवर्णमिव तन्तुकार्येषु तन्तुरिव अव्यक्तादिसृष्टिप्रपंचेषु पूर्वं व्यापकं चैतन्यमनन्तमित्युच्यते। आनन्दो नाम सुखचैतन्यस्वरूपोऽपरिमितानन्दसमुद्रोऽवशिष्टसुखरूपश्च इत्युच्यते। एतद् वस्तुचतुष्टयं यस्य लक्षणं देशकालवस्तुनिमित्तेषु अव्यभिचारी स तत्पदार्थः परमात्मा परब्रह्म इत्युच्यते। त्वंपदार्थादौपाधिकाद् तत्पदार्थात् औपाधिकाद् विलक्षणः आकाशवत्सर्वगतः[2] सूक्ष्मः केवलः सत्तामात्रः स्वयंज्योतिः आत्मा इत्युच्यते। अतत्पदार्थश्चानवगमात् आत्मेति उच्यते। अनादिः प्रमाणाप्रमाणसाधारणा ब्रह्मणः शक्ति मायेत्युच्यते। सा च न सती नासती न सदसती चेति। इयं हि स्वयमविकाराद् विकारहेतौ निरूप्यमाणे असती। अनिरूप्यमाणे सती लक्षणशून्या च सा माया भवति।

'अहं ब्रह्मास्मि' (बृहदा १।४।१०) 'तत्त्वमसि' 'अयमात्मा ब्रह्म'[3] इत्यादिभिः श्रुतिभिः ज्ञातृज्ञेययोः एकत्वबोधाय साधनरूपेण ज्ञानस्य स्वीकारे तज्ज्ञानप्रतिपादकस्य

१. माण्डूक्यो. ।५

२. बृहदा० ३।६।१३

३. तत्रैव २।५।१९

उपनिषत्समाम्नायस्य योगदानं तु सर्वथा विलक्षणम्। यथा एकस्याकाशस्य घटाद्युपहितस्य घटाकाशादिभेदाः निरुपाधिकत्वे च आकाशमात्रस्थितिः तथैव आत्मनो देहाद्युपाधिभेदात् नानात्वप्रतीतिः। निरुपाधिकत्वे च एकत्वबोधः। एवमेव मायोपहितत्वे प्रत्यक् चैतन्यस्य विशुद्धचैतन्यात्पृथक् प्रतीतिः। अनुपहितत्वे तु एकत्वमेव। सति च एकत्वबोधे को द्रष्टा, किं दृश्यं, को ज्ञाता किं च ज्ञेयम्।[१] ऐकात्म्यमुद्भाव्य व्युपरते ज्ञाने विलीने दृष्ट-दृश्यभावे बन्धमोक्षभावौ निवर्तेते। तथा च चैतन्यमात्रमेव अवतिष्ठते।

उपनिषदः पूर्वयुगे परमार्थसत्ता त्वव्याख्येयेति। परन्त्वानन्दात्मिकसत्ताया व्याख्या तूपलभ्यतेऽनन्तरमिति दृष्टम्। सर्वाङ्गीं सम्पूर्णां च सत्तां ज्ञातुं सर्वे रचनात्मकप्रबन्धा अन्ते सामान्यतः समवेतपूर्णस्यैव परिणाममाप्नुवन्ति। यदा व्याख्यातसत्तया सह अव्याख्यातसत्तायाः संसर्गायास उपनिषत्समर्थितः क्रियते तदा नानन्द एवान्तिमसत्ता अपि त्वयं मनुष्यचिन्तनस्य उच्चतमोपलब्धिरिति कथितुं शक्यते। नेयं सत्ता पारमार्थिकी नित्या वा या आत्मनि वैशिष्ट्येन तिष्ठति। पारमार्थिकानन्दस्तु सर्वथा सुखानुभवहीनः ब्रह्मणि अंगभावेन निवसति एकाकारतां चाप्नोति। तैत्तिरीयोपनिषदि विषयविषयिणोः ब्रह्मात्मनोः विश्वीयात्मिकयोः एकत्वं मन्यते, 'तद्ब्रह्म स आत्मा' इति श्रुतिदर्शनात्।[२] पुरुषगतं सूर्यगतं च यद् ब्रह्म तदेकमेव। ऋग्वेदे ईश्वरस्य सर्वातिशयित्वभावः सर्वान्तर्यामिभावे परिणतः। वेदकालिक ईश्वर एव उपनिषदि ज्ञानसद्भावादन्तर्यामिरूपेण वर्णितः सन् ब्रह्मरूपेणावगम्यते। ब्रह्म-विषयकधारणा आत्मविषयकविचारेण सह अनुकूलतामावहति। ब्रह्म यदानन्दस्वरूपं तथाभूत आत्मापि, यदभिव्यक्तिः तुरीयावस्थायां भवति। तदवस्थायां विषयो विषयी द्रष्टा दृश्यं च एकस्मिन्नेव सम्पूर्णे ब्रह्मणि ऐक्यं समधिगच्छति। यदा आत्मा स्वयंचेतनस्वरूपेण पुरुषेण सह तादात्म्यभावमापन्नो गण्यते तदा ब्रह्म स्वयचेतनस्वरूपक ईश्वरः विजातीय-शक्तिको भवति। यदा चात्मा मानवस्य मानसिकप्राणभूतशक्तिस्वरूपस्तदा ब्रह्म हिरण्यगर्भ इति कथ्यते।

संसारे चैतन्यस्य इच्छायाश्च कल्पना क्रियते। मनश्चानवरतरूपेण शरीरेण सह वर्तमानम्। मनसो व्यवस्थायाः साहचर्यं शारीरिकव्यवस्थया सह वर्तते। अस्य संसार-स्यापि इत्थमेव एकं सहचारि मानसं वर्तते तथा च विश्वरूपशरीरस्य मानसमयमेव हिरण्यगर्भ इति। विश्वात्मनोऽयं भाव उपनिषत्सु विभिन्ननाम्ना आकृत्या च 'कार्यब्रह्मा' इत्यादिरूपेण वर्णितः कारणब्रह्मेश्वरात् भिन्नप्रकृतिकः। अयं कार्यब्रह्मा उत्पन्नपदार्थानां समुच्चयः सान्तपदार्थाश्च यस्यांशमात्रम्। सर्वकार्याणां चेतनात्मकः समुच्चयः ब्रह्मा

१. तत्रैव २।४।४—यत्रत्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्।
२. तैत्ति० १।५

हिरण्यगर्भ एव। नायं ब्रह्मणः सर्वथा भिन्नः। ब्रह्म विशुद्धं व्यक्तिरूपं नित्यमात्मस्वरूपमेकमद्वितीयम्। एकस्मिन्नेव समये कर्त्तारूपेण ईश्वरः कार्यरूपेण च हिरण्यगर्भ इति। हिरण्यगर्भः तस्मिन् ब्रह्मा अपि तस्मिन् ब्रह्मण्येवान्तर्भूतः।[1] अखिलविषयात्मकब्रह्माण्डमनेनैव विषयिप्रमात्रा धार्यते। यदा व्यक्तिरूपो विषयी विलुप्यते तदा प्रलयेऽपि नूतनसृष्टिविषये संकल्पकर्तृरूपेण तस्य विद्यमानता। यदा आत्मनः प्रपंचेन सह तादात्म्यं तदा ब्रह्म विश्वमयं विराड्रूपं वा भवति। व्यापकस्यात्मनः संसारस्य मूर्त्तरूपभौतिकपदार्थेषु अभिव्यक्तित्वं विराड् इति संज्ञितम्। अखिलब्रह्माण्डस्य सूक्ष्मप्रकृतेः तथैवाभिव्यक्तित्वं ब्रह्मा इति। सूत्रात्मा हिरण्यगर्भः। कारणकार्यभावहीनः सर्वोपरम आत्मा ब्रह्म इति। यदा अनात्मनः पृथक्त्वेन आत्मप्रज्ञो भवति तदायमीश्वरसंज्ञां लभते। सुषुप्त्यवस्थायां विषयी आत्मा विषयं जगच्च यद्यपि द्वावप्युपस्थितौ भवतः तथापि दमितौ अप्रकाशितरूपौ न सर्वथा विलुप्येते। अवस्थावैभिन्न्यमेव भवति। अयमात्मा इदं ब्रह्म वा उपनिषत्समाम्नाये पूर्णं यथार्थसत्ता चेति। अयमेव ब्रह्मस्वरूपको जीवित ऊर्जस्वी सक्रियश्चात्मा यथार्थसत्ताया अनन्तानेकाकृतीनामुद्गमस्थलं धारणकर्त्ता च। वैभिन्न्यं मायारूपे विलुप्य परमसत्तायां परिवर्तते।

ब्रह्मस्वरूपाय 'ओम्' शब्दस्यापि प्रयोगः। ओम् नित्यसत्ताया उपलक्षणमात्रं विष्णोः प्रतिमैव।[2] ओम्शब्दः मूर्त्तताया: पूर्णतायाश्च प्रकृष्टः प्रतीकः। परवर्तिसाहित्येऽयम् आत्मनः लक्षणत्रयात्मकत्वं विदधाति 'अ' विश्वस्रष्टा ब्रह्मा अस्ति। 'उ' रक्षकस्य विष्णोः उपलक्षणम्। 'म' शिवस्य संहारकर्त्तुः रूपप्रतिपादकः। ओम्शब्देन सगुणरूपस्य ब्रह्मणः प्रतीतिर्जायते। ईशोपनिषदि व्यक्तस्याव्यक्तस्य च ब्रह्मणः उपासनार्थं विवरणं दृश्यते।[3] उपनिषदि यस्यैकेश्वरवादस्य प्रतिपादनं न तद्भावात्मकरूपम्। तस्मिन् यद्यपि पृथक्त्वं किन्तु तादात्म्यमपि वर्तते। ब्रह्म अनन्तं किन्तु सान्तपदार्थास्तद्बहिर्भूता इति नार्थः सम्भवति, समस्तसान्तपदार्थानामप्याधारत्वात्। इदं नित्यम्। किन्तु कालवर्त्तिपदार्था अपि तस्मिन् तिष्ठन्ति, तस्य ब्रह्मणः कालसम्पादकत्वात्। ब्रह्मशब्दार्थो विकासपरकः जीवनगत्युन्नतिद्योतकः न च मृत्युनिश्चेष्टतास्थिरतासूचकः। परमार्थसत्ता तु सच्चिदानन्दरूपा स्थितिचेतनापरमसुखरूपया वर्ण्यते। ज्ञानं, सामर्थ्यं क्रिया च तद्रूपम्। इदं ब्रह्म स्वयंभूस्वरूपम्। तैत्तिरीयोपनिषदि ब्रह्मणः यत्सच्चिदानन्दस्वरूपं तत्तु यथार्थसत्ताया भावात्मकरूपम्। ब्रह्म सर्वथा पूर्णमेव।[4]

---

१. मुण्डको० ३।१३।१
२. तैत्तिरीयो० १।६ शांकरभाष्यम्
३. उभयं सह—ईशोप०।१४
४. 'पूर्णमदः पूर्णमिदम्'०—बृहदा० ५।१।१

ब्रह्मणो निर्गुणत्वे विशेषणाभावः। विशेषणन्तु व्यवच्छेदकधर्मः। नेदं न चेत्थमिति दशायां वस्तु निर्गुणं भवति। यदा ब्रह्मणि न किमपि लक्षणं तिष्ठति तदा तस्य निर्गुणत्वम्। सत्यत्वं नित्यत्वमानन्दमयत्वं तु तस्य सगुणरूपस्य बोधकविशेषणम्। संसारप्रपंचोपप्लुत आत्मा यदाऽज्ञानप्राबल्येन तस्य निर्धर्मकस्वरूपं ज्ञात्वा संशयशीलो भवति तदैव तस्य सगुणरूपस्योपासना विधीयते। ननु रूपद्वयपरिवर्तनशीलवस्तु न स्थायि इति चेन्नैवम्, यत इयं तु बोधनप्रक्रिया भवति। अयमाशयः—स्थूलप्रपंचस्य विलयोऽज्ञाननिवृत्तिदशायां सूक्ष्मप्रपञ्चे भवति। उपासनया नित्यनैमित्तिकेन कर्मणा च ब्रह्मभावितात्मा सूक्ष्मप्रपंचस्य विलयस्थानं सूक्ष्मशरीरमिति बुद्ध्यते। अनन्तरकाले तस्य तिरोधानात् आत्मनः ईश्वरस्य च भेदो नश्यति। तस्यामेव स्थितौ ब्रह्मणः सगुणरूपं हृदि निधाय 'तत्त्वमसि' इति महावाक्यस्याभ्यासात् 'अहं ब्रह्मास्मि' इति बोधः संजायते। ब्रह्मबोधानन्तरमहंत्वस्यैव बोधोऽवशिष्यते। तदानीं न विशेष्यभावः विशेषणभावो वेति। तदेव ब्रह्मणः निर्गुणत्वम्। निर्गुणरूपे ब्रह्मणि न कापि शक्तिः न वा किमपि कार्यम्। सगुणत्वे आगतवति तस्मिन् सत्यत्वादिधर्माणां व्यवहारो भवति।

आत्मनो जीवत्वम्

प्रकृतिसमष्ट्यवच्छिन्नचैतन्यमीश्वरः व्यष्ट्यवच्छिन्नचैतन्यं च जीव इति वेदान्तदर्शनस्य मान्यता। नानयोर्वास्तविको भेदः परन्तु तत्त्वौपाधिक एव। तद्भेदोऽपि मात्रमित्थमेव यदीश्वरः नोपाध्यधीनो जीवस्तु तदधीन एव। अयमीश्वरः उपाधिजीवौ नियन्ता चेति। 'क्षरात्मानावीशते देव एकः'[1] इति श्रुतिदर्शनात्। अत्र क्षरशब्दः उपाधिपरक एव। यथा ईश्वरः उपाधिनावच्छिन्नस्तथैव उपाधेः प्रतिबिम्बीभूतेन जीवेनापि अवच्छिन्नो भवति। जीवस्यान्तःकरणे बाह्यशरीरे च तस्य व्याप्तत्वमेवमेव भवति। 'य आत्मनि तिष्ठन् आत्मनोऽन्तरः' इति श्रुतिप्रतिपादनात् ईश्वरजीवभेदप्रतिपादिका श्रुतिरपि सार्थकतामेति—आत्मा वाऽरे द्रष्टव्य इति।[2] वस्तुगत्या सुवर्णतन्निर्मितकटककुण्डलवत् मृत्पिण्डघटशरावववद्वा कारणोपाधिविशिष्टस्य ईश्वरस्य कार्योपाधिविशिष्टस्य च जीवस्याभेदः। समष्टिव्यष्टिरूपाज्ञानद्वयस्य वनवृक्षवज्जलाशयनदीतडागादिगतजलवदैक्यमिति तदुपहितेश्वर-जीवयोरपि वनवृक्षावच्छिन्नाकाशवत् जलाशयनदीतडागादिप्रतिबिम्बिताकाशवदैक्यम्। अतएव 'अयमात्मा एष सर्वेश्वरः, एष सर्वज्ञः, एषोऽन्तर्यामी'—त्यादिश्रुतीनां चरितार्थतेति।

इदं दृश्यं सर्वात्मना मृषैव। अहमर्थो नैव भवितुमर्हति, क्षणिकत्वदर्शनात्। क्षणिकस्य अहमादेः अहं सर्वं जानामीति प्रतीतिः कुतः सिद्ध्येत? अहंपदार्थस्तु अहमादेः साक्षी, यतः तस्य सत्ता सुषुप्तावपि दृश्यते। श्रुतिरपि 'अजो नित्यः' इति प्रतिपादयति।

१. श्वेत०—१।१०
२. बृहदा०—२।४।५

अतस्तत् प्रत्यगात्मा एव सदसद्विलक्षण इति । विकारिणां सर्वविकारवेत्ताऽयं नित्योऽविकारी च भवितुमर्हति । मनोरथस्वप्नसुषुप्तिषु एतयोः सूक्ष्मस्थूलयो रूपयोः पुनः पुनः स्फुटं दर्शनं भवति । अहंबोधेन यस्य सत्ता स्वीक्रियते स एव जीवशब्देन बोध्यः । अहम्भाव एव आत्मस्वरूपः स एव च जीवशब्दवाच्यः । ननु अहंत्वस्य सिद्धत्वेऽपि कथं परस्परधर्मविरोधात्मकभेदः, ऐक्यं तद्घटकवर्णनं च कथमिति चेत्—सत्यम्, वेदान्तवाक्यप्रवृत्तिः मुमुक्षुजनहिताय एव भवति । मुमुक्षूणां परमसाध्यस्य मोक्षस्योपपादनमैक्यश्रुतिभिः क्रियते । मोक्षसाधनभूतपरमात्मदर्शनं साधकानां भेददृष्टित्वात् भेदप्रतिपादकश्रुतिभिः वर्णितम् । घटकश्रुतिस्तु आत्मदर्शनमार्गं निर्दिशन्ती कथयति अन्तर्यामित्वात् साधकैः परमात्मा अनुसन्धीयताम् । अनेन जीवात्मपरमात्मनोः अभेदत्वे सिद्धेऽपि एकत्वधर्मविशिष्ट आत्मा कथं सविशेषधर्मको न निर्विशेषः ? तथा च एकत्वाभावे द्वैतापत्तिर्भवति अद्वैतहानिश्च संजायते । तच्च न समीचीनं शांकरमतसम्मतं च इति शंकायामित्थं समाधेयं यदेकत्वं न कोऽपि धर्मः किन्तु द्वित्वाभाव एवेति ।

'न जीवो म्रियते' (छान्दो ६।११।३)' 'जीवः स विज्ञेयः' (श्वेता० ६) इत्यादिश्रुतयः जीवस्य अमृतत्वं वर्णयन्ति । जीवस्तु सर्वदा कूटस्थोऽक्षरश्चेति ।[१] पंचदश्यामपि भारतीतीर्थश्च तथैव कथयति–कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते ![२] ब्रह्मभावमापन्नोऽयं जीवोऽपि आनन्दमय एव, सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् (मा० ५) इति माण्डूक्यश्रुतिसिद्धसौषुप्तानन्दमयत्वसिद्धेः । तत्रैव जगतः प्रभवत्वमपि तस्य कथितमस्ति, एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्यामी एष योनिः सर्वस्य प्रभावोऽप्यसौ हि भूतानाम् (मा० ६) इति श्रुतिदर्शनात् । नेदमभेदे सामानाधिकरण्यं किन्तु बाधायामेव, यथा 'यः स्थाणुरेष पुमान्' इति पुरुषत्वबोधेन स्थाणुत्वबुद्धिः निवर्त्यते, एवम् 'अहं ब्रह्मास्मि' इति कूटस्थब्रह्मस्वरूपत्वबोधेन अध्यस्ताहमर्थरूपत्वं निवर्त्यते, तथा च जीवब्रह्मणोरैक्यं भवति जीव एव ब्रह्म इति सिद्धान्तोऽपि सिद्धिं याति । 'जीव ईशो विशुद्धा चित्' इति त्रैविध्यप्रक्रिया विहाय यथा घनावच्छिन्नाकाशो घटाकाशः, तदाश्रिते जले प्रतिबिम्बितः साभ्रनक्षत्रो जलाकाशः अनवच्छिन्नो महाकाशः इति रूपत्रयवैभिन्न्येऽपि अन्ततोऽभेद एव दृश्यते तथैव उपाधिभिन्नतया भिन्नरूपेण प्रतीयमानोऽपि जीवो मूलरूपेण ब्रह्म एव भवति । उपाध्यवच्छिन्नं चैतन्यं कूटवन्निर्विकारत्वेन स्थितं कूटस्थं कल्पितेऽऽन्तःकरणे प्रतिबिम्बितं संसारयोगी जीवः, अनवच्छिन्नं चैतन्यं ब्रह्म, तदाश्रिते मायातमसि स्थितासु सर्वप्राणिनां धीवासनासु प्रतिबिम्बितं चैतन्यमीश्वर इति चैतन्यवैविध्येन भेदावगतिर्भवति । भेदराहित्ये जीवस्य सर्वज्ञत्वादिधर्मा एवावशिष्यन्ते ।

---

१. द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ गीता १५।१८

२. पंचदशी—६।२२

ब्रह्मानन्दे तु सुषुप्तिसंयोगात् माण्डूक्योक्त आनन्दमयो जीव एवेति तस्य ब्रह्मत्वं सिद्ध्यति। यदा हि जाग्रदादिषु भोगप्रदस्य कर्मणः क्षये निद्रारूपेण विलीनमन्तःकरणं पुनर्भोगकर्मवशात् प्रबोधे घनीभवति तदा तदुपाधिको जीवो विज्ञानमय इत्युच्यते। स एव पूर्वं सुषुप्तिसमये विलीनावस्थोपाधिकः सन्नानन्दमय इत्युच्यते। स एव माण्डूक्ये सुषुप्तिस्थानम् इत्यादिना वर्णितः। एवं सति तस्य सर्वेश्वरत्वादिवचनं कथं संगच्छतामिति चेत्सत्यम्, सन्ति अधिदैवतम् अध्यात्मं च परमात्मनः सर्वविशेषाणि त्रीणि त्रीणि रूपाणि। तत्राधिदैवतं त्रीणि शुद्धचैतन्यं चेति चत्वारि रूपाणि चित्रपटदृष्टान्तेन समर्थितानि। यथा स्वतः शुभ्रपटो धौतः, अन्नलिप्तो घट्टितः, मस्यादिविकारयुक्तो लाञ्छितः, वर्णपूरितो रञ्जित इत्यवस्थाचतुष्टयमेकस्यैव चित्रपटस्य तथा परमात्मा मायातत्कार्योपाधिरहितः शुद्धो भवति। मायोपहितश्च ईश्वरसंज्ञां लभते। अपञ्चीकृतभूतकार्यसमष्टिसूक्ष्मशरीरोपहितो हिरण्यगर्भः, पञ्चीकृतभूतकार्यसमष्टिस्थूलशरीरोपहितो विराट् पुरुष इति अवस्थाचतुष्टयमेकस्यैव परमात्मनो भवति। अस्मिंश्च चित्रपटस्थानीये परमात्मनि चित्रस्थानीयः स्थावर-जङ्गमात्मको निखिलः प्रपञ्चः। यथा चित्रगतमनुष्याणां चित्राधारवस्त्रसदृशा वस्त्राभासा लिख्यन्ते तथा परमात्माध्यस्तदेहिनाम् अधिष्ठानचैतन्यसदृशाः चिदाभासा अपि भवन्ति। ते च जीवनामानः संसरन्तीति। अध्यात्मन्तु विश्वतैजसप्राज्ञभेदेन रूपत्रयम्। तत्र सुषुप्तौ विलीने अन्तःकरणे अज्ञानमात्रसाक्षी प्राज्ञः, योऽयमिह आनन्दमय उक्तः। स्वप्ने व्यष्टिसूक्ष्मशरीराभिमानी तैजसः। जागरे व्यष्टिस्थूलशरीराभिमानी विश्वः। तत्र माण्डूक्य-श्रुतिः अहमनुभवे प्रकाशमानस्य आत्मनः विश्वतैजसप्राज्ञतुर्यावस्थाभेदरूपं पादचतुष्टयं 'सोऽयमात्मा चतुष्पात्' [1] इत्युत्क्षिप्य पूर्वपूर्वपादप्रविलापेन निष्प्रपंचस्य ब्रह्मात्मकस्य तुर्यपादप्रतिपत्तिसौकर्याय स्थूलसूक्ष्मसूक्ष्मतरोपाधिसाम्याद् विराडादीन् विश्वादिषु अन्तर्भाव्य 'जागरितस्थानो वहिःपुरा' इत्यादिना विश्वादिरूपान् न्यरूपयत्। अतः प्राज्ञशब्दिते आनन्दमये अव्याकृतस्य ईश्वरस्य अन्तर्भावं कथयित्वा तस्य सर्वेश्वरत्वादिधर्मवचनमिति। तथा च छान्दोग्योपनिषदि–'अनेन जीवेनात्मनानुप्रविश्य' इति। [2]

गौडपदकारिकायां जीवस्य आत्मना सह अनन्यत्वमपि प्रतिपादितमस्ति। [3] ब्रह्मोपनिषदि स एव आत्मा पुरुषः प्रायो जीवश्चेति कथितोऽस्ति। एतज्जीवस्य आनन्दमयत्वं तत्रैव दृश्यते (ब्रह्मोप० ३—'आनन्दमेतज्जीवस्य' इति।) स्कन्दोपनिषदि तु जीवः शिवः शिवो जीवः स जीवः केवलः शिवः' इति श्रुत्या तस्य व्यापकत्वं केवलत्वं च प्रतिपाद्यते। [4] कैवल्योपनिषदि स एव जीवः भोक्तापि भवति, 'स्वप्ने स जीवः सुखदुःखभोक्ता' इति (कैवल्यो ।१३) श्रुतिप्रतिपादनात्। गीतायां जीवलोकस्य तस्यैव ब्रह्मणः अंशत्वं गीयते, 'ममैवांशो जीवलोक' इति दर्शनात्।

१. माण्डूक्यो०।२
२. छान्दो० ६।३।२
३. गौडपद॰ माण्डूक्योप० ३।१३—जीवात्मनोरनन्यत्वम्।
४. स्कन्दो०।६

ननु शुद्धं निर्विशेषमसङ्गं चिद्रूपं ब्रह्म न श्रुतिविषयकमनुमानबोध्यम्, कथं तर्हि जीवस्य तस्मिन् ज्ञानमिति चेत्, सत्यम्, 'यतो वाचो निवर्तन्ते' इति श्रुत्या ब्रह्मणः उपपादनत्वासम्भवात्। तथापि निषेधमुखेन शुद्धचिद्घनरूपब्रह्मावबोधे श्रुतयः सफला भवन्त्येव। यथा नवोढा नायिका कयाचित् सख्या पृष्टा किमुष्णीषशिरस्कस्तव पतिरिति सा लज्जाभिभूता नेति कथयति। अनन्तरं पतिमेवोद्दिश्य अंगुलिनिर्देशेन स तव पतिरिति यदा पृच्छति तदा सा मौनं धारयति। अनेन संकेतात्मकेन उत्तरेण चतुरा सा सखी अयमेव तत्पतिरिति बुध्यते तथैव 'स एष नेति नेति'[1] 'अस्थूलमनणु'[2] 'अशब्दमरूपस्पर्शम्'[3] इत्यादिश्रुतिभिः निषेधमुखेनैव अग्राह्यालक्षणाचिन्त्यचिद्घनानन्दस्वरूपस्य जीवस्य बोधः संजायते।

एवमुपनिषत्काले वेदगतात्मजीवब्रह्मशब्दाः समानतां यान्ति। वैदिककाले ब्रह्मविषयिणी धारणा प्रारम्भे संशयास्पदा दृश्यते। 'को वेद' इत्यादिश्रुतीनां तत्र स्वरूपविषयिका निश्चयता एव। यद्यपि वेदेषु ब्रह्मणः स्थितिः स्वरूपावगतिश्च स्पष्टे तथापि एकत्वस्य वैभिन्न्यस्य च कारणं न तत्र तथा स्पष्टं यथोपनिषत्समाम्नाये। ई० पू० ४५००—२५०० काले ब्राह्मीस्थितेरनुभवः तथाभूत एव यथानन्तरं तथापि वेदानां बीजमूलकत्वात् ऐहिकपारलौकिकवस्तूनामुत्पत्तिविन्दुस्तु तत एव प्रसरति। संहिताब्राह्मणकालेऽस्य विकासे दृढताऽऽयाति। यज्ञयागादिकर्मणि तस्य परमार्थभूतपदार्थस्यावेष्टनं भवति। कर्मणामपि ब्रह्मज्ञाने उपयोगो भवति। आरण्यककाले तु ब्रह्मावगतये एकमात्रमरण्यमेव उचितस्थानमिति तत्रैव तस्य विनियोगो भवति। यद्यपि आरण्यकग्रन्थाः प्राधान्येन यागादिकर्मसंपूर्णात्मकाः तथापि पूजनोपासनादिविषये ऐकाग्र्यताया उत्कृष्टत्वं भजन्ते। सा चैकाग्रता ब्रह्मस्थितिबोधिकेति। काले काले विकसितोऽयं विचार उपनिषत्काले अशेषतां प्राप्नोति। अत्रागत्य दार्शनिकविचाराणां चरमोत्कर्षसीमा प्राप्यते। सर्वे हि दर्शनोद्भूतभावा विवेकस्य सहयोगेन विविक्ता भवन्ति। ब्रह्मणो ध्यानसरणिः आत्मा जीवश्च सैवेतिरूपेण प्रसरति। ब्रह्मणः सगुणत्वस्य च तत्रैव निर्धारणं भवति। सगुणावस्थायां स एव आत्मा जीवो वा, तद्ब्रह्म वेति नामाख्यरूपेण गीयते। तद्विशेषणं तु बोधकारकं न तु ब्रह्मविकारसूचकमिति पूर्वं विचारितमेव। आवरणविक्षेपशक्तियुक्तं ब्रह्म तु विशेषणज्ञानसंवलितमेव भवति। यदा विशेषणस्यानन्तरकालेऽभ्यासान्नाशस्तदा ब्रह्मैक्यं संजायते। इत्थं ब्रह्मबोधे सर्वा विप्रतिपत्तयः अस्मिन्युगे समाधानमादाय ऐक्ये युञ्जन्ति।

१. बृहदो० ३।९।२६
२. तत्रैव ३।८।८
३. कठोप० ३।१५



नगरे नगरे ग्रामे ग्रामे विलसतु संस्कृतवाणी
सदने सदने जन-जन-वदने जयतु चिरं कल्याणी।
सत्य–शील–सौन्दर्य–समीरा ज्ञानजला गतिसारा
छल-छल कल-कल प्रवहतु दिशि-दिशि पावन-संस्कृतधारा ॥



Shri Hari Prasad Lobia

Alliance Mills (Lesses) Pvt. Ltd.

18 Netaji Subhas Road

CALCUTTA--1

द्वारा

सुरभारती–सेवायै



सादर-समर्पणम्

तत्र का परिदेवना ?

(१)

एकवृक्षे सदा रात्रौ नानापक्षिसमागमः ।
प्रभातेऽन्यदिशो यान्ति तत्र का परिदेवना ॥

(२)

एकसार्थप्रयातानां सर्वेषां पत्र - गामिनाम् ।
यस्त्वेकस्त्वरितो याति तत्र का परिदेवना ॥

(३)

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥

(४)

नाप्राप्तकालो म्रियते विद्धः शरशतैरपि ।
कुशाग्रेण तु संस्पृष्टः प्राप्तकालो न जीवति ॥

(५)

लब्धव्यान्येव लभते गन्तव्यान्येव गच्छति ।
प्राप्तव्यान्येव प्राप्नोति दुःखानि च सुखानि च ॥

—गरुडपुराणम् अ० ११३, ४६–५० ।

विद्वन्मोदावहा सूचना

एतत्पत्रिकायाः प्रधानसम्पादकानां श्रीमदाचार्यसत्यनारायणशर्ममहोदयानां शर्मण्यदेशीयाऽऽकाशवाणीतः प्रसारितानां संस्कृतप्रवचनानां सङ्कलनात्मकस्य ग्रन्थचतुष्टयस्य प्रकाशनं पूर्वं यथा सम्पन्नं मन्ये तेन मनीषिणोऽपरिचिता न भवेयुः । सौभाग्यादस्माकमेतेषां साहित्यदर्शनव्याकरणादिविषयकबहुविधप्रवचनानां बहुमूल्यं सङ्कलनमेकं 'प्रवचन-पराग' इति नाम्ना प्रकाश्यमानं वर्तते ।

पुस्तकरत्नमिदं न चिरादेव प्रकाशितं सम्भूय प्रदीपयिष्यति साहित्यरसिकानां हृदयमन्दिराणीत्याशास्यते ।

परमार्थसुधा

त्रैमासिक-संस्कृत-पत्रिका

परमार्थसुधा

(त्रैमासिक-संस्कृत-पत्रिका)

वर्षश्चतुर्थः ※ अङ्का द्वितीयतृतीयचतुर्थाः

पौषतो भाद्रपदं यावन्मासाः

संवत्सरः-२०३६-३७

सम्पादकः — श्रीसत्यनारायणशर्मा

सहसम्पादकः — श्रीवासुदेवद्विवेदी शास्त्री

प्रकाशकः
श्रीसोहनलालः
मन्त्री, परमार्थन्यासः
मुड्हू, राँची (विहार)

प्राप्तिस्थानं, पत्र-लेख-मूल्यादि-प्रेषणसङ्केतश्च—
श्रीविद्याधरद्विवेदी
व्यवस्थापकः – परमार्थसुधा
सार्वभौम-संस्कृत-प्रचार-कार्यालयः
डी० ३८।११०, हौजकटोरा, वाराणसी
(उत्तर-प्रदेशः), दूरभाषः – ६६०२१

वार्षिकं मूल्यम्—दश रूप्यकाणि
विदेशेषु – दश डालराणि

मुद्रकः
बैजनाथ प्रसाद
कल्पना प्रेस
रामकटोरा रोड, वाराणसी।

विषया लेखकाश्च



परमार्थसूक्तयः

आनन्दमयं जीवनम् ।

(१)

वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः ।
वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रन्त्यः ॥

(२)

स्योना पृथिवि भव, अनृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथः ॥

(३)

भूमे मातर्निधेहि मा भद्रया सुप्रतिष्ठितम् ।
संविदाना दिवाऽकवे श्रियां मा धेहि भूत्याम् ॥

(४)

स्वादो पितो मधो पितो वयं त्वा ववृमहे ।
अस्माकमविता भव ॥

(५)

उप नः पितवाचर शिवः शिवाभिरूतिभिः ।
मयोभुरद्विषेण्यः सखा सुशेवो अद्वयाः ॥

—ऋग्वेदात्

प्रतीच्ये जगति आन्वीक्षिकीविषयकं विमर्शनम्

श्रीसत्यनारायणशर्मा

संसृतेरनवबोधकुज्झटिकापरिवृतं रहस्यमुद्घाटयितुं व्याकर्त्तुञ्च सभ्यताया महति प्रत्यूते खलु भारते वर्षे बहुकृत्वश्चिचेष्टिर इति ऐतिह्यविदामगोचरं नास्ति। जनिमृत्योर्विविधतापान्मुमुह्यमाणा आत्यन्तिकदुःखोपशमामपुनरावृत्तिं जिगमिषन्तः सम्यक्तया सर्गममुं दिदृक्षन्तस्तत्त्वानुचिन्तका प्राक्तने भारते बहुशतकं यावत् तपःपूर्वं चिन्तयाञ्चक्रिरे; नानामकरसंकुलितं भवाब्धिं तरीतुं संस्कारानुपूर्वा विविधास्तरण्यश्चालिताश्च। औडुपिकानां चेष्टितानि इमानि दर्शनं, तत्त्वज्ञानं, तत्त्वचिन्तनं, तत्त्वविद्येत्यादिभिर्नामभिर्व्यपदिश्यन्ते। इत्थम्भूतानां विदुषामपि अभावो नास्ति यैः सन्दर्भेऽस्मिन्नान्वीक्षिकीति शब्दः प्रयुज्यते।

ननु आन्वीक्षिकीति शब्दस्य कोऽर्थः ? तत्त्वानुसन्धित्सुभिः पूर्वसूरिभिः प्राक्तने भारते शब्दोऽयं कस्मिन्नर्थे व्यवहृतः ? इदानीन्तनः प्रयोगस्तु प्रेक्षावतां दृष्टेरगोचरो नास्ति। न केवलं विद्वद्वरेण्यैः, समधीतशब्दशास्त्रैरपि विचक्षणैरान्वीक्षिकीति पदस्य एवंविधः प्रयोगोऽसाम्प्रतं न मन्यते। आचार्ययाकोबीसदृशः कृतभूरिश्रमः संस्कृतविशारदोऽपि प्रतीच्ये जगत्यर्थममुं निर्विचिकित्सं प्रतिजग्राह। गच्छता कालेन वाक्षु बहूनां शब्दानामर्थः परिणम्यते विस्तीर्यते प्रयोगश्चेद् वरीवृत्येत। किन्तु प्राक्तने भारते विपश्चित आन्वीक्षिकीति शब्दं कस्मिन्नर्थे प्रयुयुजिर इत्यनुसन्धित्सा शब्दशास्त्रमध्येतुकामानां कृतेऽगुर्वर्था किल नास्ति।

वेदान्तग्रन्थपरिशीलननिवेदितधिय आचार्यहक्करस्य दृष्टिः शब्दस्यास्य प्राक्तनप्रयोगमन्विष्यन्ती कौटिलीयार्थशास्त्रे विहिते प्रयोगे न्यपतत्। आचार्यकौटिल्येन ग्रन्थस्य उपोद्घाते चतस्रो विद्या व्यपदिश्यन्ते। विनयाधिकारिके प्रथमेऽधिकरणे विद्यासमुद्देशे द्वितीयोऽध्याय आन्वीक्षिकीति संज्ञितः। विद्यासमुद्देशार्थं प्रणीते प्रकरणेऽस्मिन्नाचार्योऽसौ आन्वीक्षिकीं, त्रयीं, वार्त्तां, दण्डनीतिञ्च विद्यारूपेण अभिदधे। ग्रन्थस्य प्रतिपाद्यन्तु केवलं दण्डनीतिरस्ति, तथाप्यपरविद्याः परिचिचापयिषता तेनान्वीक्षिकीति शब्दस्यार्थो व्याचचक्षे। अन्येषामप्याचार्याणां मतं निर्दिशन् स स्वकं मतं व्यञ्जयाम्बभूव। मानवाः केवलं त्रयीं, वार्तां, दण्डनीतिञ्च विद्यात्वेनाभिदधुः। त्रयीविशेषो ह्यान्वीक्षिकीति। बार्हस्पत्यास्तु वार्तां दण्डनीतिञ्च केवलं मेनिरे। औशनसास्तु दण्डनीतिमेवैकां विद्यां प्रतिजगृहुः, परमाचार्यकौटिल्यस्य मते तु चतस्र एव विद्यारूपेण अवगन्तव्याः। ननु विद्यानामेतासां चिकीर्षितं किम् ? प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इत्युक्तिस्मरणात्। आचार्यकौटिल्यस्य मते प्रयोजनं धर्मार्थयोरवगन्तव्यम्। विद्यानामासां विद्यात्वविवक्षया ताभिर्धर्मार्थौ

यद्विद्यात्तद्विद्यानां विद्यात्वमित्यस्मिन् व्याहारे चतुर्षु पुरुषार्थेषु काममोक्षौ विजानता पर्यहारिषाताम्। अन्यत्र सप्तमेऽध्याये काममपि ग्रन्थकारः पुरुषार्थत्वेन निरदिक्षदर्थस्य तावत् प्राधान्यं चिकथयिषमाणः।

ननु आन्वीक्षिकी कथम्भूता विद्याऽस्ति अर्थशास्त्रकारस्य मते सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी। एतदूर्ध्वमान्वीक्षिक्याः प्रक्रियां व्याचिख्यासुः स विशदीकृतवान् धर्माधर्मौ त्रय्यामर्थानर्थौ वार्त्तायां नयापनयौ दण्डनीत्यां बलाबले चैतासां हेतुभिरन्वीक्षमाणा लोकस्योपकरोति व्यसनेऽभ्युदये च बुद्धिमवस्थापयति प्रज्ञावाक्यक्रियावैशारद्यं च करोतीति हेतुभिरन्वीक्षमाणां विद्यामिमां परिसमाप्तिश्लोकेन ईडानो द्वितीयाध्यायमर्थशास्त्रकृत्समापयाञ्चक्रे—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥

---

(२)

प्रतीच्यजगतः संस्कृतविद्वत्सु लब्धप्रतिष्ठ आचार्ययाकोबिर्विंशशतकस्य प्रभाते एकादशाधिकनवशताधिकसहस्रतमे ख्रिस्ताब्दे पुराकालिक्या भारतीयतत्त्वविद्याया इतिवृत्तमधिकृत्य आन्वीक्षिकीति शब्दं विस्तरेण परिशीलयाञ्चक्रे। अमुनाऽन्वीक्षिकीविद्या दर्शनविद्येति विभाविता। ननु केन हेतुना प्रतीच्यजगति संस्कृतगवेषकैर्बहु समादृतः कृतभूरिश्रमो विद्वानसौ पदमिदं दर्शनविद्यायाः समानार्थकममंस्त? आचार्यहक्करस्योत्तरमत्र विस्पष्टम्। सांख्यं योगो लोकायतञ्च दर्शनान्तर्भूतानि सन्ति। सांख्यं योगो लोकायतं चेत्यान्वीक्षिकीत्यत्र इतिशब्दप्रयोगादेवाऽर्थनिष्पत्तिः। परन्तु ग्रन्थेऽस्मिन्नपरत्रापि पदमिदं वीक्ष्यते। तदविचार्यैव खलु अर्थनिष्पत्तिरेषा शक्येत्याचार्यहक्करस्य मतम्।

अर्थशास्त्रकृता एकतः सांख्ययोगलोकायतेभ्यः पदमिदं प्रयुयुजेऽन्यतस्त्रयीवार्त्तादण्डनीतिभिः सह। बलाबले चैतासां हेतुभिरन्वीक्षमाणेति व्याहारोऽर्थविनिश्चयार्थं मनसि निधातव्यः। प्रतीच्ये जगति तत्त्वविद्यायै दर्शनशास्त्राय वा व्यवहृतः शब्दस्तु कुत्रापि अर्थेऽस्मिन् न व्यवह्रियते। आचार्यहक्करस्य दृष्टावर्थशास्त्रकारस्य विचारसरणिरियं भारतीयदृष्ट्याऽपि विस्माययति। तस्य मते सांख्ययोगौ लोकायतमतञ्चान्वीक्षिकीमन्तर्भवन्ति सा च त्रयीवार्त्तादण्डनीतिषु हेतुभिरन्वीक्षते। सञ्जातविस्मय आचार्यहक्कर पृच्छति—त्रीणि एव किल दर्शनानि तिसृणां विद्यानां क्षेत्रेषु सम्प्रयुज्यन्त उत दर्शनविशेषेण काचिद् विद्याऽन्वीयते? उभावेव तर्कावनुपपन्नौ। सांख्ययोगशास्त्रयोरर्थशास्त्रेण राजनीत्या वा सम्बन्धः किलादृष्टपूर्वः। आचार्यः कौटिल्यस्तु वर्णाश्रमविभागं गुरुप्रयोजनं मेने। त्रयीधर्मस्योपकारिकत्वं प्रतिपाद्य वर्णानामाश्रमाणाञ्च कर्त्तव्यानि यथातथं संसूच्य वर्णाश्रम-

धर्ममहिमानमसौ ख्यापयाम्बभूव । स्वधर्मः स्वर्गाय आनन्त्याय च भवतीत्याचार्यं कौटिल्यः । स्वधर्मे निधनं श्रेयः परधर्मो भयावह इति श्रीभगवद्वचनमेवार्थशास्त्रकृदत्र अनुससार ।

तस्मात्स्वधर्मं भूतानां राजा न व्यभिचारयेत् । स्वधर्मं सन्दधानो हि प्रेत्य चेह च नन्दति ॥
व्यवस्थितार्थमर्यादः कृतवर्णाश्रमस्थितिः । त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति ॥

सांख्ययोगयोर्वर्णाश्रमव्यासङ्गस्याश्रुतपूर्वतां निर्दिशन्नाचार्यहक्करो दर्शनग्रन्थानभिप्रैति, न तु पुराणेतिहासान् ।

अध्यात्मशास्त्राणि अवहेलयतां लोकायतानां तु कथैव का । अक्षजमेव मानं मन्यमानानामिहत्यं सुखमेव सुखमित्याकलयतां जगदीश्वरं निवृत्तिञ्च निराकुर्वाणानां लोकायतमतावलम्बिनां कृते तु धर्माधर्मयोः प्रश्न एव कुतः ? तेषां मतं हरिभद्रसूरिणा सुष्ठु प्रपञ्चितम्—

पिब खाद च जातशोभने, यदतीतं वरगात्रि तन्न ते ।
नहि भीरु गतं निवर्त्तते, समुदयमात्रमिदं कलेवरम् ॥
तस्माद् दृष्टपरित्यागाददृष्टे च प्रवर्त्तनम् ।
लोकस्य तद्विमूढत्वं चार्वाकाः प्रतिपेदिरे ॥

आचार्यहक्करस्य मते तेषां दण्डनीतिवार्त्ताविषयकमप्यौदासीन्यं खल्वभ्युपगन्तव्यम् । ग्रन्थास्तु लौकायतिकाः कालयोगेन इमिविषयामतीयुस्तथापि सांख्यं योगो लोकायतञ्चान्वीक्षिकीति व्याहारेण धर्माधर्मौ त्रय्यामर्थानर्थौ वार्तायां नयापनयौ दण्डनीत्यां बलाबले चैतासां हेतुभिरन्वीक्षमाणेति व्याहारस्य आन्वीक्षिकीति शब्दस्यार्थनिर्धारणार्थं व्युत्पत्तिरपि अवधातव्या । ननु शास्त्राणामध्ययनानन्तरं समधीतस्य विषयस्य ईक्षाऽर्थात् परीक्षणम् । साऽन्वीक्षा भवति । अन्वीक्षेयं प्रयोजनमस्या अस्माद्धेतोरर्थेऽस्मिन् ठञ् ङीप् चेति प्रत्ययौ संयोज्य आन्वीक्षिकीति शब्दो निष्पद्यते ।

प्रतीच्ये जगति जर्मनदेशीयगवेषकैर्याकोबिग्लाजनापहक्कराभिधैः पदमिदमधिकृत्य यदोहि तच्छब्दशास्त्रमध्येतुकामैर्विमर्शयितव्यम् । एकोनविंशत्यधिकनवशताधिकसहस्रतमे ख्रिस्ताब्दे गवेषको याकोबिभूयोऽपि स्वमतं प्राचीकटत् । धर्माधर्मौ हेतुभिरन्वीक्षमाणयाऽऽन्वीक्षिक्या लोकायतमतस्य संगतिमपश्यन्नसौ लोकायतपदं व्याचचक्षे, जैनानां सूत्रकृताङ्गेन सम्प्रेरितः सन् । ननु लोकायतमिति पदादाचार्यः कौटिल्यः किं विवक्षति ? यावज्जीवेद् सुखं जीवेद् ऋणं कृत्वा घृतं पिबेदिति उपदिशन्नमरणधर्माणमात्मानं निरस्यंल्लोकायतमतमर्थशास्त्रकृतोऽभीप्सितं नासीदित्याचार्ययाकोबिरमंस्त । व्याख्येयमाचार्यहक्करस्य दृष्टौ नादरमर्हति । पुण्यपापयोः फलममन्वानानां लौकायतिकानां तु कथैव का, सांख्ययोगशास्त्रयोरपि वर्णाश्रमयोर्विवेचनमनुपलभ्यत इत्यस्माद्धेतोराचार्यहक्करस्य मते व्याख्येयं प्रमाणपदवीं नावगाहते ।

लब्धकीर्त्तिः सांख्यानुशीलयिता गात्र स्वके साङ्ख्यदर्शनाख्ये ग्रन्थे आॅटो स्ट्राउसो भारतीय-

दर्शनाख्ये ग्रन्थे सन्दर्भेऽस्मिन् याकोबिमतमश्रयताम् । तस्य सदोषतामपश्यदाचार्यग्लाजेनापः । स भारतीयचिन्तनस्य विकासक्रम इत्याख्ये प्रबन्धे याकोबेर्मतमवगणय्य प्रकृतविषययोरन्योन्यनैरपेक्ष्यमवलोक्य अपृच्छत्—कस्मिन् सांख्ययोगयोर्ग्रन्थेऽर्थशास्त्रं राजनयो वा वर्ण्यते ? तदनुसारं सांख्ययोगलोकायतेभ्यः कौटिल्यस्य विवक्षितमस्ति सत्यान्वेषणस्य विभिन्नाः सरण्यो, न तु परिणतानि दर्शनानि । सांख्ययोगलोकायतानां तत्त्वानुचिन्तनपद्धतीनां क्षेत्रविशेषतां प्रतिपाद्यानुसन्धाताऽसौ तासां समाहाराद् सर्वविद्याप्रदीपत्वं सर्वकर्मणामुपायत्वं सर्वधर्माणामाश्रयत्वमिति अर्थशास्त्रकारस्य भणितिं व्याचिख्यासति । आचार्यहक्करस्य दृष्टौ व्याख्येयमर्थंबाह्या, याकोबेर्व्याख्याया अपि असौकर्याद् भ्रान्तिपर्यवसितत्वाच्च । ननु आचार्यकौटिल्यस्तिस्रः पद्धतीः लक्षयाञ्चकार किम् ? मैवम् । इति शब्दादेकस्या आन्वीक्षिक्या निर्देशो ग्राह्यः । हेतुभिरन्वीक्षमाणेति पदे अपि न विस्मर्त्तव्ये ।

आचार्यग्लाजेनापः सांख्ययोगौ विवृण्वन् पुरातनसांख्यस्य गणनापरत्वं योगस्य च ध्यानाभ्यासपरत्वञ्चामनिष्ट । आन्वीक्षिकीति पदस्य व्याख्यया गणनापरकताया ध्यानाभ्यासविशेषताया वा संगतिः कथं सम्भवतीत्याचार्यहक्करः पृच्छति । सांख्ययोगलोकायतानां क्षेत्रविशेषताऽप्यमुष्य मतेऽतर्कसहा । राजनये अर्थशास्त्रे वा सांख्ययोगौ व्यापृतावास्तां, लोकायतमतं वेदशास्त्रे वेत्याचार्यग्लाजेनापस्तु प्रत्यादिक्षत्, परं लोकायतमतं राजनयेऽर्थशास्त्रे वा सांख्ययोगौ च वेदशास्त्रे व्यापृता आसन्नित्यत्रासौ तूष्णीमस्थात् । आचार्यहक्करस्तु सम्भावनामिमामपलपति ।

---

(३)

आचार्यकौटिल्यानुसारं मानवास्त्रयीं वार्त्तां दण्डनीतिञ्च विद्यां मेनिरे । कामन्दकीयनीतिसारादपि व्याहृतेरस्याः पुष्टिर्भवति । आन्वीक्षिकी तु विशेषाऽऽसीत्, कामन्दकस्तां विभाग इति संजज्ञौ, वेदविद्यायाः । आचार्यहक्करस्य मते हेतुभिरन्वीक्षमाणा विद्येयं परिवर्त्तिनि काले आत्मविद्येति संज्ञां प्राप । नीतिसारे द्वितीयाध्याये कामन्दक आन्वीक्षिकीमात्मविज्ञानरूपेण निर्दिश्य पदमिदमित्थं व्युत्पादयाम्बभूव—

अन्वीक्षिक्यात्मविद्या स्यादीक्षणात्सुखदुःखयोः ।
ईक्षमाणस्तया तत्त्वं हर्षशोकौ व्युदस्यति ॥

मनुस्मृतौ सप्तमाध्यायेऽप्यान्वीक्षिकी स्त्रीलिङ्गे आत्मविद्यां परिच्छिनत्ति । भूभृद्भिश्चतस्रो विद्या अध्येतव्या लोकस्य सम्यक्शासनार्थी नैजधर्मस्य सुष्ठु पालनार्थञ्च ।

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम् ।
आन्वीक्षिकीमात्मविद्भ्यो वार्त्तारम्भांश्च लोकतः ॥

मनुस्मृतेरन्यस्मिन् संस्करणे आन्वीक्षिकीञ्चात्मविद्यामिति पाठभेदो वीक्ष्यते । कुल्लूकभट्टस्तु आन्वीक्षिकीं श्लोकेऽस्मिन् , विशेषणरूपेणापश्यन्नुभयोरनायत्ततां प्रतिपादयाञ्चक्रे । आन्वीक्षिकी तर्कविद्या स्यादात्मविद्या तु ब्रह्मविद्या । आचार्यहक्करस्य दृष्टौ व्याख्येमविचारसहा । चतसृणां विद्यानां स्थाने पञ्च विद्या इत्यमापद्यन्ते । चेत्यव्ययमप्यव्याख्येयं भवेत् । मेधातिथिस्तु पदद्वयमिदमधिकृत्य विशेषणविशेष्ये वा पदे इति व्याचष्टे । अपरत्रापि कृतिनां ग्रन्थेषु इत्थम्भूतः प्रयोगस्तु दरीदृश्यते । न्यायवार्त्तिकतात्पर्यटीकायां संशयच्छेदिपण्डितो वाचस्पतिमिश्रः 'न च वाच्यमस्तु विद्यात्रयमेव कृतमान्वीक्षिक्या विद्ययेति, एतस्या एव समस्तविद्यावदातीकरणहेतुत्वात्' इत्यत्रान्वीक्षिकीं विशेषणरूपेण प्रयुयुजे । वाल्मीकीयरामायणेऽप्ययोध्याकाण्डे बुद्धिमान्वीक्षिकीमिति पदयोरान्वीक्षिक्या विशेषणत्वं बुद्धेश्च विशेष्यत्वं हस्तामलकवत् स्पष्टम् । सन्दर्भेऽस्मिन्नाचार्यहक्करः पदस्यास्य प्रयोगं दिदर्शयिषन् न्यायमञ्जर्यां जयन्तभट्टस्य आन्वीक्षिकं शास्त्रमिति पदे अपि निर्दिशति ।

शुक्रनीतावपि प्रथमाध्याये आन्वीक्षिकी आत्मविद्येति निगद्यते । नीलकण्ठस्य टीकायां कवीनामुपजीव्यस्य महाभारतस्य राजधर्मपर्वणि प्रयुक्तमान्वीक्षिकीतिपदं ज्ञानकाण्ड इति पदेन त्रयीति पदं कर्मकाण्ड इति पदेन व्याचचक्षाते । अन्यस्मिन् श्लोके प्रयुक्तमान्वीक्षिकीतिपदं व्याचिख्यासुः प्रथितयशाः टीकाकारोऽयं वेदान्ताभ्यासिबूणां कृते सबहुमानं प्रयुक्ते श्रवणमनने स्मारयति । 'श्रवणमनु पश्चादालोचनमन्वीक्षा मननं तत्प्रधानामान्वीक्षिकीमिति ।'

ननु महाभारतस्य टीकयाऽऽसिन्धुहिमाचललब्धकीर्तिर्नीलकण्ठ एवान्वीक्षिकीं सर्वप्रथमं मननेन सममांस्तीत् किम् मैवम् । षड्दर्शनानां बहुविश्रुतटीकाकृत्सर्वतन्त्रस्वतन्त्रो वाचस्पतिमिश्रो न्यायवार्तिकतात्पर्यटीकायामुद्योतकरविनिर्दिष्टं निःश्रेयसस्य परात्परभावं व्याचिख्यासुश्चतस्रः प्रतिपत्तीर्विवृणोति । ''चतस्रो हि प्रतिपत्तयः प्रमेये आत्मादौ, प्रथमा तावदागमाद् यामाचक्षते श्रवणमिति । द्वितीया तु श्रुतस्य परीक्षा न्यायेनैवावस्थापनं यामाहुर्मननमिति । सा चान्वीक्षिक्यामायत्तते । आन्वीक्षिकी च संशयादितत्त्वज्ञापनं प्रमाणतत्त्वज्ञापनायोपादत्ते । प्रमाणतत्त्वज्ञापनं च हेयोपादेयभेदव्यवस्थितप्रमेयतत्त्वपरिज्ञापनाय । तत्राप्याद्यन्तवर्जितदशवर्गज्ञापनेनाद्यन्तयोरेवात्मापवर्गयोरुपादेययोस्तत्त्वज्ञानस्योपकरोति । न चायमान्वीक्षिकीविद्यावधृतप्रमेयतत्त्वोऽपि परितुष्यति पूर्वदेवात्मादिगतविपर्ययवासनानुवृत्तेरिति ।' वात्स्यायन उद्योतकरश्चोभावान्वीक्षिकीं न्यायनयमिति निरूपयाञ्चक्रात इति वाचस्पतिमिश्रोऽत्र व्यस्मार्षीदित्याचार्यहक्करः ।

विपश्चितां ग्रन्थेषु बहुकृत्व आन्वीक्षिकी किल न्यायविद्येति न्यगद्यत । षड्दर्शनपारावारपारीणो वाचस्पतिमिश्रस्तु स्वयमनेकस्मिन् स्थलेष्वेवं परिबभाषे । सन्दर्भेऽस्मिन्नर्थविपर्यासं निराचिकीर्षुराचार्यहक्करः शब्दस्यास्य व्यपगतदोषमर्थं विनिश्चेतुमनाः स्मृतीनां नीतिग्रन्थानां, काव्यशास्त्राणाञ्च प्रयोगं पर्यैक्षिष्ट । कियन्त्विन्निदर्शनानि सन्दर्भेऽस्मिन्नन्यथागृहीतस्य शब्दस्यास्य दुरवधारणत्वं लघयिष्यन्ति ।

याज्ञवल्क्यस्मृतावाचाराध्याये नृणां पातुरदीर्घसूत्रतां स्मृतिमत्तामक्षुद्रतामपरुषतां वशीकृतेन्द्रियतां पैशुन्यादिदोषराहित्यञ्च प्रबोधयन् स्मृतिकारस्तस्यान्वीक्षिक्यां विनीततां खल्वभिदधे ।

स्वरन्ध्रगोप्ताऽऽन्वीक्षिक्यां दण्डनीत्यां तथैव च ।
विनीतस्त्वथ वार्त्तायां त्रय्यां चैव नराधिपः ॥

ननु श्लोकेऽस्मिन् महर्षिरान्वीक्षिकीतिपदात् किं बोधयाम्बभूव ? विज्ञानेश्वरो मिताक्षराख्यायां टीकायामान्वीक्षिकीमात्मविद्यात्वेन व्याचष्टे । दण्डनीतिमर्थयोगक्षेमोपयोगित्वेन वार्त्तां कृषिवाणिज्यपशुपालनत्वेन, धनोपचयहेतुभूतत्वेन च । मित्रमिश्राभिधोऽपरष्टीकाकारः श्लोकेऽस्मिन्नान्वीक्षिकीं तर्कविद्येति व्यजिज्ञपत् । 'आन्वीक्षिक्यां तर्कविद्यायां, दण्डनीत्यामर्थशास्त्रे वार्त्तायां कृषिवाणिज्यादिवर्तनहेतुभूतायामिति ।'

ननु हेतुमदर्थं व्याचिख्यास्वोष्टीकाकारयोर्व्याख्ययोरेतावदर्थवैषम्यं किंहैतुकम् ? दण्डनीतेश्च वार्त्तायाश्चैहिकाभ्युदयसाधकत्वादान्वीक्षिक्याश्च श्रेयोऽभिधायकत्वाद्धेतुमद्भिरेवमप्यवध्रियते स्म ।

कामन्दकीयनीतिशास्त्रे प्रयुक्तमान्वीक्षिकीति पदं टीकाकृतामनुमानविद्या, न्यायदर्शनवैशेषिकादिकेति व्याख्यातम् । याज्ञवल्क्यस्मृतौ प्रथमाध्याये राजधर्मप्रकरणे षट्त्रिंशत्तमं श्लोकं विशदयँष्टीकाकारो विश्वरूपः समस्तसांदृष्टिकनिरूपणक्षमा हेतुविद्येति व्याचचक्षे । विदुषां बहुमतेऽमरकोषेऽप्यान्वीक्षिकी तर्कविद्येति निगद्यते । आन्वीक्षिको दण्डनीतिस्तर्कविद्यार्थशास्त्रयोरिति । तर्कन्यायौ तु समानार्थं द्योतयतः । अर्थविपर्ययपरिजिहीर्षयाऽऽचार्यहक्करो लब्धकीर्तेर्विद्वत्तल्लजस्य मधुसूदनसरस्वतेः प्रस्थानभेदेऽपि विहितं प्रयोगं प्रति शब्दशास्त्रानुसन्धित्सूनां ध्यानमाचिकृक्षत् यत्र दर्शनशास्त्रनिष्णातोऽसौ संन्यासी आन्वीक्षिक्या न्यायशास्त्रपर्यायतां द्रढयाम्बभूव, प्रमाणप्रमेयादिषोडशपदार्थानामुद्देशलक्षणपरीक्षाभिस्तत्त्वज्ञानं तस्याः प्रयोजनमिति प्रतिपादयन् । गौतमेन प्रणीता पञ्चाध्यायीति त्रिभिः शब्दैर्द्वैविध्यं खलु निरस्यते ।

———

(४)

आन्वीक्षिकीति पदान्नु पुराकालिकग्रन्थकाराः किं व्यञ्जिजिषन्ति स्म ? टीकाकृतां व्याख्यानामितरत्वात् किं खलु विभाव्यम् ? आचार्यहक्करस्य दृष्टावितथ्यम्भूता अपि प्रसङ्गा अनादरं नार्हन्ति यत्रोभावर्थौ—आत्मविद्या तर्कविद्या च–समाह्रियेते । मानवधर्मशास्त्रस्य वात्स्यायनभाष्यस्य चोभे पारम्परीणे अर्थविद्ये अत्रैकीभवतः टीकाकृतः । स्वं स्वं परिवेशसंस्कारमनुसरन्तः प्रमापुरःसरमर्थमभिनिविशन्ते स्म । आत्मविद्येति व्याख्या तर्कविद्येति व्याख्यां सर्वतोभावेन प्रत्यवतिष्ठत इति चेन्न । अतस्त्वर्थसन्निकृष्टतां मनसि निधाय प्रकृतप्रसङ्गमविस्मृत्य अवितथार्थः खलु प्रापणीयः ।

शुक्रनीतौ प्रथमाध्याये वेदान्ताद्यामान्वीक्षिक्यां तर्कशास्त्रं प्रतिष्ठां लेभे इत्याचार्यान्तरवचनमप्यवधेयम्। राजनीतिप्रकाशे मित्रमिश्रोऽपि द्वयोरेवार्थयोः समाहारं विधित्सुर्वेदाद्यविरुद्धात्मज्ञानोपयोगिनी न्यायविद्येत्यान्वीक्षिकीं व्याचष्टे। न्यायभाष्ये वात्स्यायनो महाभारतस्य टीकायां नीलकण्ठश्चोभावेव व्युत्पन्नमती आन्वीक्षिकीं विशदयाम्बभूवतुः। प्रतिपाद्यवैलक्षण्यात् पृथक्प्रस्थानाश्चतस्रो विद्या निर्वर्ण्य नैयायिकशिरोमणिर्वात्स्यायन आन्वीक्षिकीं न्यायविद्येत्युदाजहार। 'यासामान्वीक्षिकी चतुर्थीयं न्यायविद्येति।' ननु न्यायविद्येति पदात् भाष्यकारस्याभीप्सितं किम्? संशयमुच्छेत्तुं भाष्यकारः न्यायस्यार्थं व्याचचक्षे। 'कः पुनरयं न्यायः। प्रमाणैरर्थपरीक्षणं न्यायः। प्रत्यक्षागमाश्रितमनुमानं साऽन्वीक्षा। प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा। तया प्रवर्त्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्।' अमुमेवार्थमभ्युपगच्छन् वृत्तिकारो विश्वनाथोऽप्यान्वीक्षिकीं स्ववृत्तौ साधु व्युत्पादयाम्बभूव। 'श्रवणादनु पश्चादीक्षाऽन्वीक्षा, उन्नयनम्, तन्निर्वाहिका सेयमान्वीक्षिकी न्यायतर्कादिशब्दैरपि व्यवह्रियत इति।' अमरकोषस्य टीकायां क्षीरस्वामिनो व्युत्पत्तिमपि सन्दर्भेऽस्मिन् आचार्यहक्करो निर्दिशति। 'प्रत्यक्षागमाभ्यामीक्षितस्य पश्चादीक्षणम् अन्वीक्षा; सा प्रयोजनं यस्या इति।' महर्षेः पाणिनेरष्टाध्याय्याः पञ्चमाध्यायस्य प्रथमपादस्थं नवाधिकशततमं प्रयोजनमिति सूत्रमपि प्रसंगेऽस्मिन् मनसि निधातव्यम्।

ननु व्याख्यासन्दोहेऽस्मिँस्तर्हि व्यपगतदोषमर्थमवगन्तुमनुसन्धाता किं कुर्यात्? एके तां वेदान्तेन सम्बध्नन्ति, अपरे न्यायशास्त्रेण। अन्ये तामपरायत्तविद्यात्वेन प्रतिपिपादयिषन्ति। राजनयग्रन्थानाश्चिकीर्षितन्तु अञ्जसा व्यावहारिकम्बभूव। अभ्युदयस्य निःश्रेयसः प्रत्यनीकत्वमपरिहार्यं खलु न भवति उभयोरैकात्म्यं सामञ्जस्यं वा शास्त्रेषु दरीदृश्यते।

वेदान्तविद्यायान्तु आन्वीक्षिकी श्रवणादनु अभ्यसनीयं मननमस्तीति गमयितुं शक्यते। आचार्यहक्करः सन्दर्भेऽस्मिन्नुपदेशसाहस्र्या गद्यप्रकरणं स्वप्रबन्धे निरदिक्षद् यत्र श्रवणमनननिदिध्यासनानामावश्यकत्वं कुहेतुसन्तमसो विमुक्तये आद्यशंकराचार्येण प्रत्यपादि। संशीतिभावापनोदनक्षमत्वं खलु मननस्य। श्रवणमनननिदिध्यासनानि संसृतेः सुखदुःखयोरविनाभावात् तत्त्वाधिजिगमिषूँस्त्रातुं प्रभवन्तीत्यत्र वैमत्यं नास्ति। आन्वीक्षिकी त्रय्या केन हेतुना सम्बन्धितेति विविधग्रन्थानां मतमाकलय्य आचार्यहक्करः समाधत्ते, दर्शनतर्कयोर्यौगपद्यप्रसङ्गात्।

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकीं चात्मविद्भ्यो वार्त्तारम्भाँश्च लोकतः॥

ननु सत्यपि दर्शनतर्कशास्त्रयोरविनाभावे आन्वीक्षिकीमधिकृत्य दर्शनमिति विवक्षणं शास्त्रवचनेनं संगच्छते। प्राच्यप्रतीच्यविद्वद्भिर्विहितो दर्शनमिति रूपान्तरमाचार्यहक्करस्य मते निर्युक्तिकमवसेयम्।

हेतुभिरन्वीक्षमाणा विधेयं मननमासीदस्य निगमनमप्यूहस्य पर्यवसिताततत्त्वानामवगमस्या-

पवर्गगम्यतां प्रकृतेर्नानाऽऽश्रयतां ख्यापयत्सांख्यदर्शनमभ्यूहनजीवितमासीत् । सांख्याश्रितो योगोऽपि कियताप्यंशेन । देवं निर्वृत्तिश्च निराकरिष्णु लोकायतिकदर्शनमप्येवमेव निगमनाभ्यूहने अशिश्रियत् । परवर्त्तिनो वेदान्तिनः प्रतिपन्नसांख्यसिद्धान्तान् तार्किकानित्यजिज्ञपन्निति विदितमेव वेदान्तशास्त्र-विचक्षणानाम् । आचार्यहवकरस्य मतेऽर्थशास्त्रप्रणेतुर्व्याहृतेरवबोधार्थं संज्ञानमिदमर्थंवदस्ति । सांख्यं योगो लोकायतञ्चेत्यान्वीक्षिकीति । विद्यासु एतासु मननं, तर्कोऽभ्यूहनं निगमनञ्च शीर्ष-स्थानीयान्यासन्, तासां परिस्फुटचिन्तनत्वात्ता मननार्थिकां संज्ञामारुह्यः इमास्तिस्रः किल दर्शन-शास्त्रीयपरिभाषामन्तर्भवन्ति, किन्तु आन्वीक्षिकी दर्शनमस्तीति निगदितुं न शक्यते । मनननिगमने इति संज्ञे अप्येतदर्थमविचारसहे । सन्दर्भेऽस्मिन्नाचार्यहवकरः कौटिल्यस्यान्वीक्षिकीसमाश्रितं ग्रन्थं निर्दिशति, यो राज्यदर्शनमिति संज्ञामवाप्तुं नो प्रभवति ।

आन्वीक्षिकीमधिकृत्य बहुविधग्रन्थेषु पंक्तयो वीक्ष्यन्ते । सामस्त्यविवेचनायोगादपि समासे-नैव विहितं विवेचनमिदमनुवादकानामसौकर्यं लघयिष्यति । स्वसमीक्षोपसंहृतेः प्रागाचार्यहबकरो राजशेखरस्य काव्यमीमांसायां उपोद्घातं प्रति अनुसन्धित्सूनां ध्यानमाक्रष्टुं समीहते । कविरहस्ये द्वितीयेऽध्यायेऽसौ चत्वारि शास्त्राणि निरदिक्षत्– पौरुषेयन्तु पुराणमान्वीक्षिकी मीमांसा स्मृतितन्त्र-मिति । आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चेति विद्या इत्यत्र कौटिल्यमुदाहरन् राजशेखर आन्वी-क्षिक्या हि विवेचिता त्रयी वार्त्तादण्डनीत्योः प्रभवतीति व्यवारीत् । अत ऊर्ध्वमान्वीक्षिकीमसौ द्विधा व्यभाङ्क्षीत् पूर्वोत्तरपक्षाभ्याम् । अर्हद्भदन्तदर्शने लौकायतिकमतञ्च पूर्वपक्षे संस्थाप्य सांख्यं न्यायं वैशेषिकञ्चोत्तरपक्षे समतिष्ठपत् । त इमे षट् तर्का इति निगद्य राजशेखर आन्वीक्षिकीविषयिकां संशीतिमपनुदति । वाल्मीकीयरामायणेऽपि लौकायतिकान् ब्राह्मणानधिकृत्य प्रयुक्तमान्वीक्षिकीति पदमप्यनादरं नार्हति ।

धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः ।
बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते ॥ इति शम्

———

कूरेश-पञ्चस्तवी

श्रीके० वी० रामकृष्णमाचार्यः *

पीताम्बरं वरदशीतलदृष्टिपातमाजानुलम्बिभुजमायतकर्णपाशम् ।
श्रीमन्महावनगिरीन्द्रनिवासदीक्षं लक्ष्मीधरं किमपि वस्तु ममाविरस्तु ।।

(सुन्दरबाहुस्तवे–१४)

वैष्णवोत्तमाः श्रीवत्साङ्कमिश्राः श्रीमद्रामानुजान्तरङ्गिकशिष्येष्वगण्याः । एते कलिवर्षे ४१०९ सौम्यनाम्नि संवत्सरे पुष्यमासे हस्तनक्षत्रे श्रीरामांशया श्रीमदनन्तभट्टारकाणां पुत्राः अभूवन् । काञ्चीनगरपरिसरवर्ती 'कूर' ग्रामः एतेषां जन्मभूमिः । एतेषां तद्ग्रामाधिपत्येन 'कूरेशाः' इति व्यवहारस्समजनि । एवं परमभागवतोत्तमानां "आव्वार्" इति कीर्त्यमानानां यद् शमदमादिगुणविभवैश्वर्यं, तादृशशमदमादिसम्पद्युक्ताः एते "कूरत्ताव्वार्" इत्यपि कीर्त्यन्ते । श्रीमद्रामानुजगुरुचरणारविन्दावेवानन्यशरणतयाऽऽश्रित्य, गुरुसेवायां प्राणानपि त्यक्तुमुद्युक्ताः महान्त एते । श्रीमद्रामानुजा अपि कूरेशरूपशिष्यलाभेन आत्मनो मुक्तिं करतलामलकं मन्यन्ते स्म । तादृशानां कूरेशानां गुणवैभवं वर्णयितुं को वा समर्थः ? व्याससूत्राणां वृत्तिं बोधायनप्रणीतां आमूलाग्रमेकवारमेव दृष्ट्वा, तां सर्वामपि कण्ठस्थीकृतवन्तः गुरूणां कृते तां समर्पितवन्तश्चासन् । एतादृशकार्येण प्रीता गुरवः श्रीभाष्यकारा एतान् यामुनाचार्यावताररूपेण प्रस्तुतवन्तोऽपि । न केवलमेतत् । गुरुभिः श्रीभाष्यादिग्रन्थेषु प्रोच्यमानेषु, तदवगतिपूर्वकं तान् सर्वानपि ग्रन्थान् सपदि निर्दुष्टं लिखितवन्त एते । एतेषां पतिव्रता साध्वी "आण्डाल्" नाम्नी द्वितीया संवृत्ता । एते च स्वग्रामे प्रातरारभ्य रात्रौ यामद्वयपर्यन्तं निरतमन्नदानमकुर्वन् । एकदा श्रीरङ्गनाथ एतेषां स्वप्ने आविर्भूय श्रीरंगमागन्तुमाज्ञापयामास । तदनु सर्वस्वं त्यक्त्वा सद्वितीया एते श्रीरंगं गत्वा उञ्छवृत्त्या जीवनं यापयन्तः श्रीरंगनाथं संसेव्य, श्रीरंगनाथप्रसादात् ज्ञानिनौ द्वौ पुत्रौ अलभन्त । यदा क्रिमिकण्ठनामा राजा भगवद्रामानुजान् मतद्वेषेण अपकर्तुमैच्छत् तदा तान् रक्षितुं गुरोर्नाम्ना स्वयं गत्वा, राजदौष्ट्येन काणा अभवन् । श्रीरंगे रामानुजशिष्यप्रवेशो निषिद्ध इति राजशासनमाकर्ण्य, रंगनाथमपि त्यजेयं, गुरूंस्तु नैव त्यजेयमिति, श्रीरंगं त्यक्त्वा सुन्दरभुजस्वामिनां सिसेविषया वनगिरिमगच्छन् । मार्गमध्ये शीघ्रतया स्वगुरुसमागमं कामयमाना एते, नेत्रबाधाविस्मृत्यै च भगवत्कल्याणगुणान् ध्यायन्तः पञ्चस्तवीमरचयन् ।

* व्याख्याता, के० सं० विद्यापीठम्, सिरथोल ([illegible])

एते "शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वा आत्मन्येवात्मानं पश्येत्" (बृ०आ०३) इति वचनमनुसृत्य शमदमादिसाधनसंपद्युताः "नायमात्मा प्रवचनेन लभ्यः, यमेवैष वृणुते तेन लभ्यः" (मुण्डको०) "भक्त्या ह्यनन्यया शक्यः अहमेवंविधोऽर्जुन" (भगवद्गीता) इत्यादि श्रुतिस्मृतिवाक्यानि परिशील्य, भक्तिमार्गं परिगृह्य, 'विवेक-[1] विमोका[2]-भ्यास[3]-क्रिया[4]-कल्याणा[5]-नवसादा[6]-नुद्धर्ष[7] युक्ता ध्यानेन परमपुरुषं श्रीमन्नारायणम्, आश्रितवत्सलां श्रीदेवीं ज्ञाननेत्राभ्यां साक्षात्कृत्य, तान् स्तुन्वाना अभीष्टं गुरुसमागमं, नेत्रे चालभन्त ।

अस्यां पत्रस्तव्यां श्रीभाष्यारूढो वैष्णवसिद्धान्तसारः सम्यक् वर्णितः । अस्यां च कविता मृदुमधुरा सर्वाङ्गसुन्दरी च सती भक्तिरसमाप्लावयन्ती भावुकान् तन्मयान् करोति । अस्यां सूक्तीनां नेयत्ता । उपनिषदोऽप्यत्र श्राव्यश्लोकरूपतामापन्नाः ।

एतैः कूरेशैः श्रीस्तवः, वैकुण्ठस्तवः, अतिमानुषस्तवः, सुन्दरबाहुस्तवः, वरदराजस्तवः इति पञ्च स्तोत्राणि रचितानि ।

श्रीस्तवः

स्वगुरुभिः श्रीमद्रामानुजमुनिभिः शरणागतिगद्यारम्भे स्तुतां श्रीमन्नारायणाभिमतानुरूपासंख्येयकल्याणगुणविशिष्टामखिलजगज्जननीं देवदेवदिव्यमहिषीमशरण्यशरण्यां पुरुषकारायादौ एकादशश्लोकेषु अस्तुवन् । अस्मिन् देव्याः कल्याणगुणान् स्तोतुं बृहस्पतिरपि नालं किमुताहमिति स्वनैच्यमनुसन्धायापि तत्र स्वप्रवृत्तिमित्थमेते समर्थितवन्तः ।

ये वाचां मनसां च दुर्ग्रहतया ख्याता गुणास्तावकाः
तानेव प्रति साम्बुजिह्वमुदिता हैं मामिका भारती ।
हास्यं तत्तु न मन्महे नहि चकोर्यैकाखिलां चन्द्रिकां
नालम्पातुमिति प्रगृह्य रसनामासीत सत्यां तृषि ॥ (श्रीस्तवः ४)

पश्यत श्लोकस्थं भावसौन्दर्यम् । यथा किञ्चिद्भक्ष्यं दृष्ट्वा जिह्वा साम्बु भवति तथा श्रीदेव्याः गुणवर्णनेऽपि जिह्वा तेषां साम्बु आसीत् । सर्वगुणवर्णनं केनापि कर्तुं न शक्यमिति, गुणगानमेव न कार्यमिति को वा जनश्चिन्तयति ? तत्रापि यदौपम्यं चकोर्या दत्तं तदत्यन्तहृद्यम् । तेनात्र गुणलवसंकीर्तनमेवातन्यते इति व्यंग्यम् । एवं स्वप्रवृत्तिं समर्थ्य, श्रीदेव्या इंगितं ज्ञात्वा कथं नारा-

---

१. अदुष्टादन्नात् शरीरशुद्धिर्विवेकः । २. कामनाभावः विमोकः ।
३. नारायणगुणभावनं सदा ह्यभ्यासः । ४. यथाशक्तिपञ्चमहायज्ञाद्यनुष्ठानं क्रिया ।
५. सत्यं, आर्जवं, दया, दानं, अहिंसा इत्यादि कल्याणानि ।
६. देशकालवैपरीत्येभ्यः शोकवस्त्वाद्यनुस्मृतेश्च दैन्याभावः अनवसादः ।
७. अतिसन्तोषाभावोऽनुद्धर्षः ।

गणश्चेष्टते,[1] नारायणोऽपि तस्याः कटाक्षपाताय कथं चकोरायते[2] इत्यादि संवर्ण्य, सौन्दर्यादिगुणा अपि तत्सेवालभ्या[3] इति, सृष्टौ जडचेतनभेदकारणीभूता भारती तस्याः परिचारिकेति,[4] महेशत्वादिकमपि तत्कटाक्षपातलभ्यमिति[5] च संस्तुत्य तादृशकटाक्षपातायात्मनि तां प्रार्थयामासुः ।

वैकुण्ठस्तवः

अस्मिन् आदितः ५८ श्लोकेषु उपनिषत्प्रतिपाद्यं परतत्त्वं स्वसिद्धान्तानुसारं सम्यग्वर्णितम् । ततः भगवतः क्षमाश्रितवत्सलत्वादिगुणा वर्णिताः । ततः

भ्रूविभ्रमेण मृदुशीतविलोकितेन मन्दस्मितेन मधुराक्षरया च वाचा ।
प्रेमप्रकर्षपिशुनेन विकासिना च संभावयिष्यसि कदा मुखपङ्कजेन ॥ (वैकुण्ठस्तवः–७०)

इति भगवत्संभावनं काङ्क्षमाणाः,

हा ! हन्त ! हन्त ! हतकोऽस्मि खलोऽस्मि धिङ् मां मुह्यन्नहो ! अहमिदं किमुवाच वाचा ।
त्वामङ्ग ! मंगलगुणास्पदमस्तहेयमास्मर्तुमेव कथमर्हति मादृशंहः ॥
(वैकुण्ठस्तवः–८५) इति नारायणस्मरणयोग्यतापि नास्तीति सन्दिहानाः,

जानेऽथवा किमहमङ्ग ! यदेव संगादंगीकरोषि यदि मंगलमन्यदस्मात् ।
तेन त्वमेनमुररीकुरुषे जनं चेन्नैवामुतो भवति युक्ततरो हि कश्चित् ॥
(वैकुण्ठस्तवः–८७) इति

भगवद्दयापात्रस्य भक्तस्य दोषा अपि गुणा एवेति "दोषो यद्यपि तस्य स्यात्सतामेतदगर्हित" मिति रामायणोक्तमर्थमनुसन्दधानाः समाहितचित्ता अभूवन् । ततः बहुभिः श्लोकैः स्वनैच्यमनुसन्धाय भक्तभगवतोश्शेषशेषिभावसम्बन्धं सम्यक्प्रकटीचक्रुः ।

अस्मिन् स्तवे तत्त्वप्रतिपादकश्लोकेषु मुख्योऽयं श्लोकः—

यः खल्वणोरणुतरो महतो महीयान् आत्मा जनस्य जनको जगतश्च योऽभूव ।
वेदात्मकप्रणवकारण वर्णवाच्यं तं त्वां वयन्तु परमेश्वरमानुनामः ॥
(वैकुण्ठस्तवः—२०)

हे सर्वेश्वर ! परतत्त्वभूतो नारायणस्त्वमेव । वेदस्वरूपोङ्कारवाच्यपरमेश्वरोऽपि त्वमेव । "य आत्मनि तिष्ठन् आत्मानमन्तरो यमयति यमात्मा न वेद एष सर्वभूतान्तरात्मा अपहृतपाप्मा दिव्यो देव एको नारायणः" (सुकालोपनिषद्) इतिस्तुतस्सर्वान्तिर्यामिस्त्वम् । "अणोरणीयान् महतो महीयान्" (महानारायणोपनिषद्) इति सर्वविलक्षणस्त्वं, "पतिं विश्वस्यात्मेश्वरं शिवमच्युतं

---

१. श्रीस्तवे १–श्लोकः । २. श्रीस्तवे ४–श्लोकः । ३. श्रीस्तवे–७ श्लोकः । ४. श्रीस्तवे ९ श्लोकः । ५. श्रीस्तवे १० श्लोकः ।

नारायणं महाज्ञेयं विश्वात्मानं परायणम्'' (महानारायणोपनिषद्) इत्युक्तस्सर्वेश्वर एव।

एवं श्रीमन्नारायणस्यावाङ्मानसगोचरानन्दस्वरूपं,[१] नारायणसङ्कल्पेनैव ब्रह्मादीनामुत्पत्तिं,[२] सात्विकश्रुतिस्मृतिपुराणेषु नारायणस्यैव परतत्वरूपेण संकीर्तनं,[३] च प्रकटय्य, भगवत्कल्याणगुणकीर्तनपुरस्सरं ब्रह्मादिदेवानां, सनकादिसिद्धानां च दुर्लभं सायुज्यमेव परमपदमिति,[४] तच्च नित्यमुक्तनिरन्तरानुभाव्यमिति चोक्त्वा, भगवत्साम्यादपि भगवत्परिचरणमेव महदिति'' मुक्तिं ततो हि परमां तव साम्यमाहुः त्वद्दास्यमेव विदुषां परमं मतं तत्'' (बैकुण्ठस्तवे–६६ श्लोकः) इति प्राबोधयन्। अस्मिन् स्तवे १०२ श्लोकाः सन्ति।

अतिमानुषस्तवः

श्रीमन्नारायणावतारेषु परिपूर्णावताररूपेण अर्चावताररूपेण च प्रसिद्धेषु रामकृष्णाद्यवतारेषु अतिमानुषलीला भगवतः संवर्ण्यास्मिन् भगवतो नारायणस्य सर्वविलक्षणत्वं प्रकाशयामासुः।

भगवतो लीलावताराणां का आवश्यकता ? स च सङ्कल्पसिद्धः सङ्कल्पमात्रेणैव दुष्टान् शिक्षयितुं प्रभवति। तस्मान्न दुष्टशिक्षणं प्रयोजनम्। किन्तु तत्र कारणमाश्रितवात्सल्यमेव। आश्रितानां भक्तानां स्वीयमतीन्द्रियं दर्शनं यथा सिद्धयति, यथा ते मुक्ता भवेयुः तथा तानाश्रितान् संभावयितुमेव भगवता लीलावताराः[५] स्वीकृताः। यद्यपि मानुषीं तनुमाश्रित्य भगवान् स्वभक्तमध्येऽतिष्ठत् अथापि स्वीयमतिमानुषत्वं स तत्र प्रदर्शितवानेवेति तत्तदवतारेषु उदाहरणप्रदर्शनपूर्वकमेतेऽस्मिन् स्तवे प्राकटयन्। कानि तान्यतिमानुषानीति चेत्—उच्यन्ते। वटपत्रशायिनः बालस्योदरे ब्रह्माण्डानामुपसंहारः;[६] ब्रह्मादीनामपि स्रष्टुः ब्रह्मादिभिस्सृष्टिः;[७] सङ्कल्पमात्रेण सर्वमपि स्वाधीनं कर्तुं समर्थस्य वटुरूपेण याचनं;[८] सीतान्वेषणे सीताया स्थितिमजानतो रामस्य जटायोर्मोक्षदानं;[९] एकेनैव बाणेन सप्तसालानपि च सप्तगिरीन् रसातलञ्च भेत्तुं समर्थस्य रामस्य सुग्रीवमैत्री;[१०] समुद्रमनुलङ्घ्यैव रावणमहत्वैव विभीषणस्य लङ्काराज्यदानम्;[११] इत्यादि। एतादृशातिमानुषशक्तिसंपन्नत्वादेव रामस्य, हनूमान् मोक्षमपि त्यक्त्वा तत्परिचरणाय तन्नामसङ्कीर्तनाय[१२] चात्मानं समर्पितवानिति भक्ताग्रगण्यो हनूमानेव सर्वेषामपि भक्तानां मार्गदर्शक इति सश्रद्धं समुदघाटयन्।

एवं कृष्णावतारे पूतनाशकटार्जुनादिभञ्जनमनुसन्धाय एतादृशस्त्वं कंसाद्भीतः नन्दगोपकुले आत्मानमगौप्सीः इति भगवन्तमपृच्छन्[१३]। एवमस्मिन् स्तवे गोवर्धनोद्धरणादिलीला अपि सम्यक्

---

१. बैकुण्ठस्तवः—२५ श्लोकः। २. बैकुण्ठस्तवे—२१ श्लोकः। ३. बैकुण्ठस्तवे—१८ श्लोकः। ४. बैकुण्ठस्तवे–४३ श्लोकः। ५. अतिमा–१ श्लोकः। ६. अतिमा–१४ श्लोकः। ७. अतिमा–१५ श्लोकः। ८. अतिमा–१६ श्लोकः। ९. अतिमा–१८ श्लोकः १०. अतिमा–१९ श्लोकः। ११. अतिमा–२४ श्लोकः। १२. अतिमा–३२ श्लोकः। १३. अतिमा–३४ श्लोकः।

वर्णिताः। पश्यत नवनीतचौरं कृष्णं प्रति एते किं कथयन्तीति—

पश्यत्सु सूरिषु सदा परमं पदं ते देव्या श्रिया सह वसन् परया विभूत्या ।
योगेन योगनिरतैः परिमृग्यमाणः किं त्वं व्रजेषु नवनीतमहो व्यमुष्णाः ॥

(अतिमा०–३५)

"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" इत्युपनिषद्वचनात् योगीश्वरेषु भवन्तमन्वेषयत्सु सत्सु भवता भवत्साक्षात्कारो व्रजवासिनां दत्तः। श्रियोऽप्यधिपतिस्सन् अपि नवनीतचौरोऽभूः। किमेतद्वैपरीत्यानुसन्धानं भवतः ?

एवं निजधाम्नि गव्यसमूहे सत्यपि परगृहान् प्रविश्य किमर्थमचूचुरः ? चोरिताच्छिष्टं गव्यशेषं कुतो भस्मसादकरोः ? किमर्थं गोपीजनानां परिहासपात्रमभूः ? नवनीतचौर्यं गोपयितुं कुतः नवनीतदिग्धं करकमलं गात्रे प्रमृष्टवानसि ? इत्येवं बहुधापृच्छन् ।

एवं ते वेणुनादमहिमानमित्थमस्तुवन्—

वेणुक्वणप्रणयिनि त्वयि लोकनाथ ! वृन्दावनं चरणसंचरणैः पुनाने ।
भावास्तदा वनभुवः किल कीदृशस्ते त्वद्गीतसिक्तसिकतासु वसुन्धरासु ॥

(अतिमा०—४५)

हे नाथ ! चरणसंचारैः वृन्दावनं पवित्रीकुर्वता यदा वेणुनादः कृतः तदा तत्र स्थिता भावाः कीदृशास्संजाताः ? इति पृष्ट्वा तदेव पुनरित्थमभ्यष्टुवन् ।

धन्यैः श्रुतं तदिह तावकरासकाले गीतेन येन हि शिलास्सलिला बभूवुः ।
पञ्चापि किञ्च परिवृत्तगुणानि भूतान्युर्वीकृशानुमरुदम्बरशम्बराणि ॥

(अतिमा–४६)

पृथिव्यप्तेजोवाय्वाकाशरूपभूतसङ्घातः शिलोच्चयानपि द्रवीकुर्वंति वेणुगाने स्वभावं परित्यज्यान्यादृग्रूपमाप किल। एवं वेणुनादामृतं तत्र पुलिने विस्तृतं स्वरसनाभिः लीढवतां भुजगानामपेक्षया को वा श्रेष्ठो भवतीति भुजगानपि स्तुवता, श्रीकृष्णस्य स्वरूपम्

अम्भोदनीलमरविन्ददलायताक्षं पिच्छावतंसमुररीकृतवेणुपाणिम् ।
त्वां गोपवेषपरिकर्मितकायकान्तिं धन्यास्तदा ददृशुरुन्मथितान्यभावाः ॥ (अतिमा – ४८)

इति मनसि ध्यात्वा, "तदा वृन्दावने स्थितश्चिदचिदात्मकस्सर्वोऽपि प्रपञ्चः त्वत्पादरजस्सङ्गान्मुक्तोऽभूत् । किमस्मद्दौर्भाग्यम् ? वृन्दावने स्थिरचरात्मककीटदूर्वापर्यन्तजन्तुनिचये बत ये तदानीं नैवालभामहि जनिं" (अतिमा—५०) इति स्वपापित्वमनुसन्धाय

पापीयसोऽपि शरणागतिशब्दभाजो नोपेक्षणं मम तवोचितमीश्वरस्य ।
त्वज्ज्ञानशक्तिकरुणासु सतीसु नेह पापं पराक्रमितुमिच्छति मामकीनम् ॥ (अतिमा—६१)

इति मां मोपेक्षस्व ! भवच्छरणागतोऽहमिति पुनः पुनः संप्रार्थ्य स्तवमिदमुपसंहृतवन्तः । अस्मिन् भगवत्प्रियकृत्कर्मैव पुण्यमिति, तदतिरिक्तं पापमिति, गोपालत्वमेव कृष्णस्याद्भुतमिति च प्रकटय्य पुनः 'गोपालवेषपरिकर्मपरावरेशं, पिच्छलाञ्छनसुदामकृतोपवीतं गोधूलिधूसरितकुन्तलं तमसः परस्तात् (यत्) परमं धाम'' (अतिमा – ५५) अकीर्तयन् । अस्मिन् ६१ श्लोका हृद्याः सन्ति ।

सुन्दरबाहुस्तवः

अस्मिन् तदा तैः समाश्रितोऽर्चावतारः श्रीमन्नारायणस्सुन्दरबाहुस्वामी स्तुतः । अत्रादौ गिरिवर्णनं, ततः सुन्दरबाहुस्वामिनोऽङ्गाङ्गवर्णनं च कृतम् । श्रीमन्नारायणाधिष्ठितोऽयं गिरि-वैकुण्ठतुल्यश्चकास्ति इति, तत्स्थाः सर्वेऽपि जन्तवो नित्यमुक्ततुल्यास्सन्तो रागद्वेषादिगन्धरहिता महोपनिषदुक्तप्रकारेण "एको ह वै नारायण आसीत्, न ब्रह्मा नेशान" इति नारायणमेव परतत्त्वतया ज्ञात्वा "नेह नानास्ति किंचन" इति श्रुत्या इतरनिवृत्तौ सत्यां नारायणमेवाराधयन्तीति सम्यग्वर्णितम् । अत्र मर्कटचरितमित्थं वर्णितम्—

यदीयशिखरागतां शशिकलां तु शाखामृगाः निरीक्ष्य हरशेखरीभवनमामृशन्तस्ततः ।
स्पृशन्ति न हि देवतान्तरसमाश्रितेति स्फुटं स एष सुमहातरुव्रजगिरिगृहं श्रीपतेः ॥

(सुन्दरबाहु-७)

अन्येषु परतत्त्वबुध्या ये चरन्ति तेषां दर्शनस्पर्शनादिकमप्ययुक्तमिति, हस्तग्राह्यमपीन्दुमस्पृष्ट्वा प्रतिपादयन्ति स्म । एवं गिरिवर्णनम्, अर्चारूपस्य स्वामिनोऽङ्गाङ्गवर्णनं च विधाय, श्रीरङ्गधाम्नि गुरुणा सहावस्थितिमात्मनस्संप्रार्थ्य गुरुदर्शनभाग्यमापुः । अस्मिन् १३२ श्लोकाः सन्ति ।

वरदराजस्तवः[१]

गुरुसमागमानन्तरं गुरूणामादेशेन कञ्चिवरदराजस्य स्तोत्रं कृत्वा नेत्रे पुनरवापुरेते । पञ्चस्तवेषु वरदराजस्तवस्यास्त्यन्यदपि वैशिष्टचम् । अयं स्तवः श्रीमन्नारायणशरणागतिप्रबोधकमन्त्ररत्नस्वरूपः । अस्मिन् ' श्रीनिधिं निधिमपारमर्थिनाम्'' इति द्वितीयश्लोकेन मन्त्ररत्नस्थं श्रीमत्पदं व्याख्याय, नारायणपदैकदेशनारपदार्थतया स्वामिनः निवासभूतं करिगिरिं सम्यगुपवर्ण्य, नारायणशब्दवाच्यस्य निखिलहेयप्रत्यनीककल्याणगुणविशिष्टस्य श्रीमन्नारायणस्य कल्याणगुणान् संवर्ण्य, दिव्यमङ्गलविग्रहस्यापि नारायणशब्दवाच्यत्वात्, श्रीचरणेषु शरणागतेर्वक्तव्यत्वाच्च शिर आरभ्य पादपर्यन्तमङ्गाङ्गवर्णनं विधाय, रामकृष्णनृसिंहाद्यर्चावतारेषु श्रीमन्नारायणस्य सौशील्यकृपावात्सल्यादिगुणान् अभिवर्ण्य, शरणागतिं प्रतिपादयितुकामाः श्रीरामं विभीषण इव समस्तदोषनिलयोऽहं त्वामेव शरणं प्रपद्ये इति पुनः पुनः "वरद ! शरणमित्यहं त्वां वृणे" (८२ श्लोकः) वरदमुरुदयं

---

१. स्तवेऽस्मिन् १०२ श्लोकाः सन्ति ।

गतिं त्वां वृणे" (८३ श्लोकः) इति संप्रार्थ्य, भवत्करुणावतारायाः देव्याः भक्तस्य पराङ्कुशमुनेः भक्तस्य नाथमुनेर्भक्तस्य यामुनमुनेः भक्तस्य श्रीमद्रामानुजमुनेः भक्तस्य मम ते दास्यमनुगृहाणेति बहुवारं देवं संप्रार्थितवन्तः। एतत् स्तोत्ररचनासमये कूरेशाः परिपक्वहृदयाः ब्रह्मादिपदमपि तृणीकर्तुं समर्था जाताः। पश्यत —

भोगा इमे विधिशिवादिपदं च किञ्च स्वात्मानुभूतिरिति या किल मुक्तिरुक्ता।

सर्वं तदूषजलजोषमहं जुषेय हस्त्यद्रिनाथ ! तव दास्यमहारसज्ञः॥

(वरदराज ८१ श्लोकः)

भोः स्वामिन् ! ते दास्यमहारसज्ञोऽहं ब्रह्मादिपदं स्वात्मानुभवरूपमोक्षं च ऊषरक्षेत्रगत-जलाभासरूपं मन्ये।

एवमत्र पाञ्चरात्रागमप्रसिद्धं व्यूहोपासनमपि सम्यगस्मिन् श्लोके वर्णितम्।

गुणैष्षड्भिस्त्वेतैः प्रथमतरमूर्तिस्तव बभौ
ततस्तिस्रस्तेषां त्रियुगयुगलैर्हि त्रिभिरभुः।
व्यवस्था या चैषा ननु वरद ! साविष्कृतिवशात्
भवान् सर्वत्रैव त्वगणितमहामङ्गलगुणः॥ (वरदराज-१६)

हे—वरद ! उपासकानां सौकर्याय ज्ञानबलैश्वर्यवीर्यशक्तितेजोरूपगुणविशिष्टस्त्वं वासुदेव इति, ज्ञानबलगुणविशिष्टस्त्वं सङ्कर्षण इति, ऐश्वर्यवीर्यसम्पन्नस्त्वं प्रद्युम्न इति, शक्तितेजोयुत-स्त्वमनिरुद्ध इति च कीर्त्यसे। अयं गुणसङ्कोचः केवलमुपासकानां सौलभ्यायैव। भवांस्तु असङ्ख्येय-कल्याणगुणः खलु। न केवलमस्मिन्नेव स्तवे किन्तु स्तोत्रान्तरेष्वपि व्यूहोपासनविषयकाः श्लोकाः सन्त्येव।

एवमनुकूलस्य सङ्कल्पः, प्रतिकूलवर्जनम्, रक्षयतीति विश्वासः गोप्तृत्ववरणम्, आत्मनिक्षेपः, कृपणत्वमित्येवं षड्विधासु प्रपत्तिषु गोप्तृत्ववरणमेव शरणागतिरिति "त्वां वृणे" इति पुनः पुनः वदन्तो व्यक्तीकृतवन्तः।

तादृशं स्तोत्रसाहित्यं मुमुक्षुभिरेव न, किन्तु सर्वैरपि भक्तिमार्गानुयायिभिः सांसारिकैः संसारदुःखोपशमाय अवश्यं पठनीयमिति शम्॥

———

ग्रहस्थितेर्जीवने प्रभावः

विद्याभूषणः पं० श्रीगणेशरामशर्मा *

अयि वेदवेदाङ्गदर्शनसाहित्यादिविविधविद्यापारावारपारीणा ज्ञानविज्ञानसम्पन्नबुद्धयः सकलकलाकलापकुशलाः श्रद्धाविश्वासभाजः सम्माननीया विद्वांसो महाभागाः ! सततसामयिकसाहित्यानुशीलनप्रवणाः प्रियाः पाठकबन्धवो महानुभावाः ! जानन्त्येवात्रभवन्तो भवन्तो भद्रभव्यभावानुभूतिशीलाः प्रौढानुभवशालिनः सज्जना यदिह भौतिकविज्ञानार्थशास्त्रराजनीतिवाणिज्यव्यवसायप्रधाने परमाणूद्जनविस्फोटनाम्नामोघशक्तिसंदप्ते विद्युदग्नितीव्रनमजवे युद्धाग्निविभीषिकासंत्रस्ते सर्वतः सर्वराष्ट्रप्रजाजनजीवनसङ्कीर्णतरलेऽस्मिन् विकाशयुगे केचन दुराग्रहग्रस्ता उदरभरणमात्रपुरुषार्थवादिनो यन्त्रैकशरणचेतनाः परदेशीयाचारविचारधाराचाकचक्यचञ्चलचेतसः स्थूलबुद्धयो जडसभ्यताग्रहणग्रहिला जनाः प्राच्यं प्रतीच्यं वा ज्ञानं तत्त्वतः पूर्णतया साधिकारं न जानन्तोऽस्य विश्वब्रह्माण्डस्य सृष्टिस्थितिलयकारणे परमात्मनीश्वरे तत्प्रेरितपरोक्षशक्तीनां सत्तायां चाश्रद्दधाना भारतीयवेदवेदाङ्गदर्शनशास्त्रतत्त्वसिद्धान्तान् केवलं कपोलकल्पितानिव निस्सारान् सर्वांशतो मिथ्या प्रमाणयितुं दुश्चेष्टन्त इति विशेषतो वैदिकयज्ञानुष्ठानकर्मकाण्डविज्ञाने प्राचीनायुर्वेदचिकित्सापद्धतौ फलितज्यौतिषतन्त्रे तु नवशिक्षितानामेषां नांशतोऽपि श्रद्धाभावलवलेशो विद्यते ततस्ते ज्यौतिषशास्त्रस्य फलिततन्त्रोक्तग्रहप्रभावाणां सत्यत्वेऽतिशयसंशयाः परप्रत्ययनेयबुद्धयः सन्देहोद्भ्रान्तमस्तिष्काः फलादेशसिद्धान्तमकर्मण्यानां दैववादं रूढिवादं च जोघुष्यमाणाः सदा दैवज्ञानाक्षिपन्ति । केचित्पुनरास्तिक्यमावापन्नाः स्वयं भारतीया भगवति परमेश्वरे तत्प्रयोजितदैवीशक्तीनां सत्तायां बहु विश्वसन्तोऽपि च वर्तमानविश्वस्य नानाराष्ट्राणां नव्यवैज्ञानिकैः सप्रमाणं सप्रयोगं प्रत्यक्षं च प्रतिष्ठापितस्य विज्ञानविकाशक्रमस्य तत्त्वावबोधाय यावदपेक्षितं बौद्धिकं स्तरमस्पृशन्तः सङ्कीर्णहृदयत्वाच्छ्रद्धाजडतां रूढिवादप्रियतां कूपमण्डूकत्वञ्च द्रढयन्तः स्वदेशीयानाम् तत्तच्छास्त्राणामधीतिबोधाचरणप्रचारणैः प्राप्यं पारमार्थिकं ज्ञानं सोपपत्तिकमनासाद्य जीविकावृत्तिनिर्वाहमात्रपर्याप्तं ज्यौतिषायुर्वेदादिविद्यानां केवलं पल्लवग्राहिपाण्डित्यं समाश्रयन्तोऽन्धेन नीयमाना अन्धा इव प्रजासु बुद्धिभेदं जनयन्तो भ्रमोत्पादनं कुर्वन्ति । परिणामतोऽस्माकं भारतीयं ज्योतिर्विज्ञानं प्रखरं भास्वरं प्रत्यक्षं सदपि कैश्चित्स्वार्थपरायणैर्नक्षत्रसूचिभिर्याचकैर्मौहूर्तिकैश्चापकर्णितां

* डूंगरपुरम् (राजस्थानम्)

नीतं किंचित्कलुषितं मलिनीकृतमिव च दृश्यते। प्राचीना नवीना वानभिज्ञास्तत्तद्विद्यानां साङ्गोपाङ्गं तलस्पर्शि पारमार्थिकं निगूढं ज्ञानमनाश्रयन्तो गम्भीरतत्त्वावबोधे मोमुह्यन्ते चेत्तदतीव स्वाभाविकम्। परदेशीयाः प्रजाः कामं किमपि वदन्तु भारतीयानां विद्यानां विषये परन्तु महद्दुःखं तु तदा जायते मार्मिकाणां यदास्माकं राष्ट्रनेतारः प्रामाणिकाः पुरुषाः शिक्षिता विज्ञा वैज्ञानिकाः स्वात्मानं शिक्षितं सभ्यंमन्या अपि स्वदेशस्य कला विद्या ज्ञानं विज्ञानं प्रति तत्तद्विद्याविशेषज्ञान् प्रति विदुषश्चानास्थामश्रद्धां जुगुप्सां तिरस्कारभावनां च प्रथन्ते। एवं सति फलिततत्त्वसिद्धान्तनिरूपणमहत्त्वे कियत्कठिनं कष्टसाध्यं वारण्यरोदनमिव मोघं भवतीति सरलतयाऽनायासं चानुमातुं शक्येत विचक्षणैः पाठकैः। साध्वाह श्रीमान् भास्कराचार्यवर्यः सिद्धान्तशिरोमणेर्गोलाध्याये—

ज्योतिःशास्त्रफलं पुराणगणकैरादेश इत्युच्यते
नूनं लग्नबलाश्रितः पुनरयं तत्स्पष्टखेटाश्रयम्।
ते गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न ज्ञायते
तस्माद्यो गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति ?

सत्यप्येवमत्राद्य भारतीयज्योतिर्विज्ञानदशा फलितसिद्धान्तमधिकृत्य सर्वेषामपि जडचेतनानां जीवने खगोलस्थानां ग्रहाणां प्रभावः पतति न वा ? यदि च पतति तदा सः कथं बोधगम्यः स्यात् ? ग्रहाणां प्रभावः पतितोऽपि स खलु निवार्यो वाऽनिवार्यो वा भवितुमर्हति न वेति विषयेष्वेषु कश्चिद्विमर्शो बुधानां सर्वसाधारणानां च पुरः समुपस्थाप्यते प्रसङ्गात्। ज्ञानस्यानन्तत्वान्मानवबुद्धेरल्पत्वात्तत्तद्विषयेष्वल्पज्ञत्वाच्चात्र विषये प्रमेयोपपादने गच्छतो मे प्रमादात्स्खलनानि बुधाः क्षाम्यन्त्विति विनिवेद्य प्रकृतमनुसरामि—

एतत्तु नास्तिका आस्तिकाः पण्डित मूर्खा ज्ञानिनो विज्ञानविदः सर्वेऽपि स्वजीवने प्रतिदिनं प्रत्यक्षमेवानुभवन्ति स्वप्रतीतेः प्रामाण्यात् स्वीकुर्वन्ति च यदाकाशे संचरतां केषाञ्चिज्ज्योतिष्पिण्डानां स्थूलो वा सूक्ष्मो वा महीयान्वाल्पीयान् वा प्रभावो विश्वस्य सर्वेष्वपि च भूभागेषु दिग्दिगन्तेषु सर्वेषु सचेतनेषु जीवेषु पदार्थेष्वपि च सदा सर्वदा सर्वतः सर्वत्र न्यूनाधिकं निश्चयेन पततीति। तत्रापि केषांचिद् ग्रहनक्षत्रतारकाणाम् प्रभावस्तथा परिपतन् दरीदृश्यते यश्चर्मचक्षुर्भ्यामिवानुभवितुं शक्यते। उदाहरणार्थं तावत् सूर्यस्यैव प्रभावं वयमत्र किञ्चिच्चिन्तयेम चेत्तदा स्थितिः सुस्पष्टा जायेत। तथाहि—

प्रातर्यदा सूर्यः पूर्वाकाशक्षितिजे समुदेति तदा तस्य किरणजालं भूमावन्तरिक्षे सर्वासु दिक्षु च प्रसरति। तस्यालोकः सर्वं वै ब्रह्माण्डं व्याप्नोति। तस्यातप ऊष्मा च सर्वत्रानुभूयते। मानवाः पशवः खगाः सरीसृपाः कीटाः पतंगादयश्च सर्वेऽपि जीवाः सूर्योदयात् स्वजीवने कामपि नवीनामेव संजीवनीशक्तिं कर्मक्षमतां स्फूर्तिं चासाद्य सद्यश्चेतनां बलमोजः क्रियाशक्तिं कर्मक्षमतां वात्मनि विन्दन्तः

सोत्साहं कर्मसु प्रवर्तन्ते। न केवलं सचेतना एवापि तु जडपदार्थाश्चापि सूर्यप्रकाशेन प्रभाविता इव परिलक्ष्यन्ते। सूर्यरश्मिभिः स्पृष्टा जलाशयास्तरंगिता भवन्ति। वृक्षा लता गुल्माः पत्राणि पुष्पाणि मञ्जर्यः फलानि च कामपि नव्यां शोभां दधते। समस्तायाः पृथिव्याः सौन्दर्यं सूर्यकिरणानुप्राणितमुच्छ्वसतीव राजते। निखिलमपि स्थावरजंगमम् जगत् सत्यं प्रियमानन्दमयमिवाभाति। प्रातः सूर्योदयसमयेऽस्वस्था रुग्णाः पीडिता अपि प्राणिनः किञ्चिदाश्वस्ता इव स्वास्थ्यं सुखं शान्ति चात्मानि सम्भावयन्ति। को नु खल्वेवंविधो भवेत्सचेतनो यो हि सूर्यस्य प्रकाशोष्मणोः प्रभावं प्रत्यक्षमेव परिपतन्तं न स्वीकुर्वाणः स्यात्? सूर्योदयादेवास्य विश्वस्य प्रवृत्तिचक्रं गतिशीलं भवति तदस्तमनेन च शैथिल्यं निवृत्ति वाश्रयते। सूर्योदयादेव सापेक्षिकस्य कलनात्मकस्य कालस्य गणनारम्भो भवति येन प्राणा विकलाः कलाः पलानि घटिकाः प्रहरा दिवसा रात्रयः सप्ताहाः पक्षौ मासा ऋतवोऽयनानि वर्षाणि युगादीनि सर्वाणि जायन्ते। सूर्यस्य प्रकाशतापोष्मभिरेव मेघोत्पत्तिर्जलवर्षणमृतुपरिवर्तनं कृषिकर्मसु धान्यांकुरप्ररोहा वृक्षादीनां विकाशो जलवायुशुद्धिः श्वेतपीतहरितकृष्णकर्बुरादीनां वर्णानां पृथक् पृथक् प्रतीतिर्दूषितबाष्पपरमाणूनां शोष इत्याद्याः परिमाणा भवन्ति। संक्षेपादिदमेव निवेदनं पर्याप्तं यदणुपरमाणुपर्यन्तं सर्वमपि जगत् सूर्यसाक्षिकं स्पन्दते स्वस्थिति च परिपालयति। एवं सति सूर्यस्य तमिमं प्रत्यक्षं प्रभावं को नाम न मन्येत? तत एव हि प्राचीना मन्त्रद्रष्टारो महर्षयो नवीना वैज्ञानिकाश्च रविरश्मिषु जीवनदायकममृतमयं किमप्यविनाशि तत्त्वं निहितं समर्थयन्ते। नवीना वैज्ञानिकास्तु स्वप्रयोगशालासु बहुयन्त्रोपकरणानां साहाय्येन लोकजीवनोपयोगिनां सूर्यकिरणान्तःस्थितानां तत्त्वानां (Cosmic Rays, ultra violet Rays, e. t. c.) अस्तित्वं सप्रमाणं प्रयोगसिद्धं चामनन्ति। सूर्योष्मणाग्नीन्धनविद्युच्छक्तिप्रयोगैर्यन्त्रसञ्चालनं कर्तुं प्रयतन्ते वैज्ञानिकाः। नव्या वैज्ञानिकास्तु चन्द्रलोकयात्रामपि भौममण्डलयात्रां च कर्तुं कामयन्ते। इत्थं सुदूरमूहापोहानन्तरं त्वज्ञा जडा मन्दमतयो मूर्खाश्चापि सूर्यस्यातपोष्मप्रकाशानां प्रभावं स्वीकुर्युरेव किन्तु नव्यशिक्षितानां पुरः 'सूर्य आत्मा जगतस्तस्थुषश्च', 'आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन् ॥ १ ॥ 'नवो नवो भवति जायमानोऽह्नां केतु रुषसामेत्यग्रं भागम् विदधात्ययनं प्रचन्द्रमाः स्थिरं ते दीर्घमायुः' ॥ २ ॥ 'योऽसावादित्ये पुरुषः सोऽसावहम्।' इत्यादीनि श्रुतिवचनानि गम्भीरज्ञानविज्ञानानुभवशबलानि समुच्चारयन् कोऽपि भारतीयः शास्त्रज्ञो विद्वान् वेदशास्त्रप्रामाण्यात् सूर्यस्य चान्येषां ग्रहाणां च प्रभावसम्बन्धिनं सत्यसिद्धान्तं त्रिकालाबाधितं किलाव्यभिचारि प्रमाणयति तदा स्थूलधियोऽद्यतनाः केवलं भौतिकविज्ञानमेव विद्यासर्वस्वं मन्यमानाश्चाक्षुषप्रत्ययगम्येऽप्यत्र सुस्पष्टे विषये विप्रतिपद्यमानाः सहसा नैव सहमता भवन्तीत्यहो तेषां बोधदारिद्रयमज्ञता चेति वक्तव्यं भवेत्।

न केवलं सूर्यस्यैवैकलस्य प्रभावोऽस्मिञ्जगति विद्यते प्रत्यक्षं प्रत्युतान्येषामपि चन्द्रादीनां ग्रहाणामपि प्रकाशादीनां प्रभावो भवति नाम नूनम्। विषयमेतं समधिकं स्पष्टीकर्तुमधुना सूर्यवच्चन्द्रस्यापि

प्रभावविषये किञ्चिदुच्यते—चन्द्रस्तावज्जलपिण्डरूपः। अर्थाच्चन्द्रमसि जलीयतत्त्वानां तरलरसरूपाणामाधिक्यं वर्तते। स च पुनः सूर्यकिरणस्पर्शादेव प्रकाशते। स्वयं जलरूपोऽपि चन्द्रमाः सूर्यरश्मिभिः सम्पृक्तः शीतलां द्युतिं ज्योत्स्नारूपां सर्वतोदिक् प्रसारयति। तदेवाहुर्भास्कराचार्यवर्याः—

तरणिकिरणसङ्गादेष पीयूषपिण्डो दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति।
तदितरदिशि बालाकुन्तलश्यामलक्ष्मीर्घट इव निजमूर्तिच्छाययैवातपस्थः॥ १॥

सोऽयं चन्द्रः शीतलां द्युतिमात्मीयां विकिरञ्जागतिकान् सर्वांश्चेतनान् प्रभावयति स्वचन्द्रिकाकिरणजालैः। यथा सूर्ये प्रकाशोष्णताधिक्यं तथैव चन्द्रे रसाधिक्यं शीताधिक्यं च वर्तते। यतश्चन्द्रकिरणानां प्रभावः शीतलो रसमयश्चाह्लादकरोऽनुभूयतेऽस्माभिः। चन्द्रस्य किरणानां सूक्ष्मप्रभावान्मनः प्रहृष्यति, जलं तरंगायते, वनस्पतिष्वोषधिषु रसात्मकेषु तरलद्रव्येषु च रसपरिपाकस्तरलतादयो गुणा सम्भवन्ति। चान्द्रमसं ज्योतिर्जीवानां भौतिके देहे तथौषधिप्रभृतिषु पदार्थेषु च रसं पुष्णात्यमृतमयरश्मिभिस्तस्मादेवायमोषधिपतिरित्युच्यते। मानवानां व्यष्टिपिण्डे मनस्तत्त्वप्रतिष्ठा चन्द्रमस एव भवति। तदेवोक्तं श्रुतौ—'चन्द्रमा मनसो जातश्चक्षोः सूर्योऽजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥ १॥' इति स्मृतिप्रस्थानेऽपि गीतासु भगवत्पादा इममेवार्थं प्राहुः—

'पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः॥' गीता, अध्यायः १५ श्लोकः १३

पुनः सर्वेषां सचेतनानां प्राणिनां मनस्तत्त्वनिर्माणे चन्द्रमसस्तेजसो महत्त्वपूर्णः प्रभावो भवति। एवमेव सर्वेषामेव ग्रहाणां तत्तत्तेजोविशेषाणां प्रभावाः सचेतनेष्वचेतनेष्वपि चानिवार्यतया पतन्त्येव। प्रत्यक्षमनुभूयमानेऽस्मिन् विषये नास्त्येवाणीयानपि सन्देहशंकावसरस्तथापि विषयस्यास्य स्पष्टीकरणाय सर्वेषामेव ग्रहाणां प्रभावविषये श्रीमद्वराहमिहिराचार्यैर्बृहज्जातके प्रोक्तमेतच्छन्दोऽवधारणीयमत्र प्रसंगोपात्तम्—

कालात्मा दिनकृन्मनस्तुहिनगुः सत्त्वं कुजो ज्ञो वचो
जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः।
राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुधः
सूरिर्दानवपूजितश्च सचिवौ प्रेष्यः सहस्रांशुजः॥ १॥

अयमभिप्रायो यत् सचेतनानां प्राणिनां किलात्मतत्वनिर्माणे सूर्यतेजसस्तन्मात्राणां, मनस्तत्वप्रतिष्ठायां चन्द्रमसः, बलसंचारे भौमस्य, वाग्विकाशे बुधस्य, ज्ञानसुखयोः प्रतिष्ठायां बृहस्पतेः, कामसंकल्परचनायां शुक्रस्य, दुःखानुभूतिसंवेदनादितत्वावस्थितौ शनेश्च तेजस्तन्मात्राणाम् प्रामुख्येनोपयोगो भवति। एवं हि जीवेषु शासनाधिकारक्षमतानिर्माणे सूर्यचन्द्रयोः, नेतृत्वशक्तिसंचारे भौमस्य क्रीडाप्रियत्वसौकुमार्यमार्दवादिगुणरचनायां बुधस्य, मन्त्रित्वराजनीतिज्ञतादिगुणक्षमतःनिर्माणे गुरुशुक्रयोस्तथा च दूतत्वादिगुणनिर्मितौ शनैश्चरस्य तेजसः सुमहान् प्रभावो भवति।

नायं कल्पनाप्रसूतो भावात्मको वादविशेषः । वैज्ञानिकेन दृष्टिकोणेन विश्लेषणान्मनोबुद्धीन्द्रियगोचरो ज्ञानगम्योऽयं विषयः । वस्तुतो ग्रहाणां स्थितिः खगोले सौरमण्डले वर्तते । स्वस्वकक्षासु स्वकीयं गतिक्रममन्वटन्तो ग्रहास्तत्रत्ये वातावरणे स्वतेजसामाकर्षणविकर्षणाभ्यां ग्रहानन्यान्भूमिमण्डलं सर्वानपि खगोलस्थाञ्ज्योतिर्मयनक्षत्रतारकापिण्डान् प्रभावयन्तो भवन्ति, स्वयं चान्येषां तेजोरश्मिपुञ्जैः प्रभाविताः सन्तो निखिलब्रह्माण्डस्थलोकान् तत्रस्थाञ्जडचेतनांश्च स्व प्रकाशावपातानुपातप्रमाणं प्रभावयितुं प्रभविष्णवो भवन्ति । अतोऽत्र सौरे जगति वर्तमानस्य ग्रहनक्षत्रमण्डलस्य यथार्थस्थितिपरिचयाय किञ्चिदुच्यतेऽधस्तात्—

भूमेः पिण्डः शशांकज्ञकविरविकुजेज्यार्किनक्षत्रकक्षा–
वृत्तैर्वृ'त्तो वृतः सन्मृदनिलसलिलव्योमतेजोमयोऽयम् ।
नान्याधारः स्वशक्त्यैव वियति नियतं तिष्ठतीहास्यपृष्ठे
निष्ठं विश्वं च शश्वत्सदनुजमनुजादित्यदैत्यं समन्तात् ॥ १ ॥

सर्वतः पर्वतारामग्रामचैत्यचयैश्चितः । कदम्बकुसुमग्रन्थिः केसरप्रसरैरिव ॥ २ ॥

—भास्कराचार्यः, सि. शि. गोलाध्याये

अत्र श्रीमद्भास्कराचार्यकृतं वासनाभाष्यमपि दृश्यताम्—

योऽयं मृदनिलसलिलव्योमतेजोमय इति पाञ्चभौतिको भूमेः पिण्डो वर्तुलाकारस्तद्बहिःस्थैः शशांकादिकक्षावृत्तैरावृतः सन्ननन्याधारः स्वशक्त्यैव नियतं निश्चितं वियत्याकाशे तिष्ठति । तत्पृष्ठनिष्ठं च जगत् । दनुजा दानवाः । मनुजा मानवाः । आदित्या देवाः । दैत्या असुराः । तैः समेतं समन्तात् तिष्ठति । शेषं स्पष्टार्थम् ।

अत्र भारतीयखगोलविज्ञानोक्तप्रकारेण सर्वादौ केन्द्रमध्यवर्ति भूमण्डलं, ततो विधुबुधशुक्रसूर्यभौमगुरुशनीनां कक्षावृत्तानि क्रमशो वर्तन्ते, ततो नक्षत्रमण्डलमास्त इत्येव भारतीयज्यौतिषाचार्योक्तः खगोले भूमण्डल-ग्रहमण्डलानां च कक्षाक्रमः ।

अथ च यूरोपादिविदेशीयानां वैज्ञानिकानां मते पृथ्वी चला सूर्यश्च स्थिरः । भारतीयो ज्योतिविदार्यभट्टः स्वसंहितायाम् पृथिव्याश्चलत्वमंगीचकार । तथाहि—"चला पृथ्वी स्थिरा भाति, भूपञ्जरः स्थिरो, भूरेवावृत्यावृत्य प्रातिभासिकावुदयास्तौ सम्पादयति ग्रहनक्षत्राणाम् ।" इति । अतो धरायाश्चलत्वं सूर्यस्य च स्थिरत्वं भारतीयज्योतिर्विद्भिरंगीकृतमास्ते । तेषां मते पृथ्व्यादीनां ज्योतिष्पिण्डानां परिभ्रमणं सूर्यकेन्द्रकं (Helio Centric भवति । खगोले ये ज्योतिष्पिण्डाः सूर्यकेन्द्रकं भ्रमन्ति ते ग्रहाः कथ्यन्ते ये च भूकेन्द्रकं (Ceo centric) भ्रमन्ति ते खलूपग्रहाः प्रोच्यन्ते । यथा चन्द्रः । अमीषां पाश्चात्यज्योतिर्विदां मते खगोले ग्रहाणां प्रत्येकं कक्षामण्डलं दीर्घवृत्ताकारं

भवति । तत्रैव च ग्रहा भ्रमन्ति । ते हि कक्षाणां दीर्घवृत्ताकारत्वे ह्याकर्षणशक्तिं कारणं मन्यन्ते । तेषां मते ग्रहाणां कक्षाक्रम इत्थं वर्तते—सूर्यः, बुधः, शुक्रः, पृथ्वी, भौमः, गुरुः शनिरिति । पाश्चात्यानां मते यूरेनस, नेपच्यून, प्लूटो इत्याद्या केचिद्ग्रहा नवाविष्कृताः सन्ति परं ते वैज्ञानिकदूरवीक्षणादि-यन्त्रोपकरणैर्विना नान्ये ग्रहा इव चर्म-चक्षुभ्यां दृक्प्रत्ययार्हा भवन्ति । अथ प्रसक्तानुप्रसक्तमेतन्मतं पाश्चात्यानामुल्लिखितं परं प्रस्तुतप्रकरणे भारतीयमेव कक्षाक्रमं स्वीकृत्य प्रकृतं विविच्यते ।

अथेदं ग्रहकक्षामण्डलं निरवलम्बे खगोले किमाधारं तिष्ठति ? कथं वा भूमिर्ग्रहाश्च स्वकक्षातो न प्रच्यवन्ते ? इति जिज्ञासायाम् भूमेराकर्षणशक्तिविषये किमपि विवेचनं नाप्रासंगिकमिति कृत्वा-त्रोच्यते—

मध्ये समन्ताद्ण्डस्य भूलोको व्योम्नि तिष्ठति ।
बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम् ॥ १ ॥ (सूर्यसिद्धान्ते)

श्रीमद्भास्कराचार्या अपि भूमेराकर्षणशक्तिविषये प्रोचुरेवम्—

यथोष्णतार्कानलयोश्च शीतता विधौ द्रुतिः के कठिनत्वमश्मनि ।
मरुच्चलो भूरचला स्वभावतो यतो विचित्रा बत वस्तुशक्तयः ॥ १ ॥

आकृष्टशक्तिश्च महीतया यत् खस्थं गुरुस्वाभिमुखं स्वशक्त्या ।
आकृष्यते तत्पततीव भाति समे समन्तात् क्व पतत्वियं खे ॥ २ ॥

(—सिद्धान्तशिरोमणौ)

एवमत्र ग्रहाणां भूमेश्च खगोले कक्षास्थित्याकर्षणशक्तिवर्णनादिदं स्पष्टं भवति यद्ग्रहमण्डलानां भूमेश्च परस्परमाकर्षणविकर्षणाभ्यां मिथः संतोलनमेव हि सर्वेषां ज्योतिष्पिण्डानामाधारहेतुः ।

अथ सूर्यादयो ग्रहाः स्वगतिक्रमेण कक्षासु किं प्रमाणं भ्रमन्ति ? तत्रोच्यते

मासं शुक्रबुधादित्याः सार्द्धमासं तु मंगलः ।
गुरुस्त्रयोदशमितान्, सपादद्विदिने शशी ॥ १ ॥
राहुरष्टादशमितान् त्रिंशन्मासांच्छनैश्चरः ।
यथा राहुस्तथा केतू राशिभुक्ताः प्रकीर्तिताः ॥ २ ॥

अर्थात् स्थूलमध्यममानेन सूर्य एकं मासं, चन्द्रः सपादं दिनद्वयं, भौमः सार्द्धमेकं मासं, बुधो मासमेकं, गुरुस्त्रयोदशमासान्, शुक्र एकं मासं, शनिस्त्रिंशन्मासान्, राहुरष्टादशमासान्, केतुश्च तथैवाष्टदशमासान् यावदेकं राशिं भुङ्क्त इति गतिक्रमोऽयं ग्रहाणाम् ।

इत्थमाकाशे नियतं गतिक्रममनुवर्तमानाः स्वकक्षासु भ्रमन्तोऽपि ग्रहा मनुष्याणामस्माकं कथं न गतिशीला लक्ष्यन्त इत्युक्तं भवति—

यान्तो भचक्रे लघुपूर्वगत्या खेटास्तु तस्यापरशीघ्रगत्या ।
कुलालचक्रभ्रमिवामगत्या यान्तो न कीटा इव भान्ति यान्तः ।। १ ।।

एवं खगोले परिभ्रमतां ग्रहाणां तेजांसि निखिलमपि खगोलं भूगोलं सजीवं निर्जीवं च जगत्प्रभावयन्ति । ग्रहाणां स्वकक्षासु परिभ्रमतां तेजःपुञ्जो मिथो ग्रहानपि प्रभावयति । तेषां तेजसः परस्परं घातप्रतिघातैस्तेजोमयी स्थितिरपि प्रतिक्षणं परिवर्तते । खगोले ग्रहनक्षत्राणां भ्रमणान्नानाविधानि स्थित्यन्तराणि जायन्तेऽतस्तत्रस्थानां सर्वेषामेव तेजःपिण्डानां प्रभावपरिणामाः प्रकाशफलानि च सर्वतोभावेन ज्ञातुमसम्भवानि यतस्ते विभिन्नगुणधर्माणोऽन्तरिक्षे विराजन्ते । तेषामालोकप्रभावैर्भूलोके स्थितानां जीवानां पदार्थानां चोपरि या याः क्रिया प्रतिक्रियाश्च भवन्ति न ताः सर्वा अद्यावधि साकल्येनेदमित्थं सुसूक्ष्मं निरीक्ष्य स्थिरीकृता विद्यन्ते । तथापि सूर्यादीनां नवग्रहाणां वार्षिकी मासिकी दैनन्दिनी वा गतिः कैश्चिज्ज्यौतिषाचार्यैः प्रतिभावद्भिर्नलिकाबन्धनैर्गणितगणनाप्रकारैः शास्त्रचिन्तनैर्यन्त्रादिभिश्च सुविनिश्चित्य सिद्धान्ततः स्थिरीकृतास्ति या सहसा वर्षाणां सहस्रैरपि न व्यभिचरति । अतएवामीषां ग्रहनक्षत्राणां प्रभावाः स्वतन्त्ररूपा मिश्रितस्वरूपाश्च सुविनिश्चिताः सन्ति । तानेतान् प्रभावान् स्वयं ज्ञात्वा तत्परिणामजन्यानि शुभाशुभानि फलानि वानुभूय जगद्धितैषिभिर्ज्योतिर्विद्भिः स्वशिष्येभ्यो ज्ञानप्रदानाय विवृतानि । विषयमेतं स्पष्टीकर्तुं ग्रहतेजसां प्राकृता मूलस्वभावास्तत्तेजोमिश्रणसम्भवाः स्थितयो बलाबलं सुयोगाः कुयोगाश्च निरूपिता वर्तन्ते । तस्मादेव हि ज्योतिषशास्त्रेऽश्विन्यादीनां नक्षत्राणां, मेषादीनां राशीनां, सूर्यादीनां ग्रहाणां च गुणकर्मस्वभावा वर्णिताः सन्ति । तदत्र श्रीवराहमिहिराचार्योक्तेन प्रकारेण ग्रहादीनां प्रकाशस्य देश्र वर्णादिविषये किंचिदुच्यते प्रसक्तानुप्रसक्तम्—

वर्णास्ताम्रसितातिरक्तहरितव्यापीतचित्रासिता
वह्न्यम्ब्वग्निजकेशवेन्द्रशचिकाः सूर्यादिनाथाः क्रमात् ।
प्रागाद्या रविशुक्रलोहिततमःसौरेन्दुवित्सूरयः
क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युतः ।। १ ।।

अयमाशयः— सूर्यः स्वयं ताम्रवर्णस्ततोऽसौ ताम्रवर्णस्य स्वामी । चन्द्रः शुक्लवर्णः श्वेतवर्णस्य स्वामी । भौमः स्वयमतिरक्तवर्णस्ततोऽसौ रक्तवर्णस्य स्वामी । बुधो हरितवर्णो हरितरंगाधिपः । गुरुरतिपीतवर्णः पीतवर्णाधिपतिः, शुक्रश्चित्रविचित्रवर्णो विचित्रवर्णानां पतिः । शनिः कृष्णवर्णस्य स्वामी । सारांशोऽयं यद्धि सूर्यादीनां ग्रहाणां तेजस्तत्तद्वर्णविशिष्टं वर्तते । तच्च स्वधर्मणो वर्णास्तत्तद्वर्णयुक्तान् पदार्थाञ्जीवान् देशांश्चानुकूल्येन प्रातिकूल्येन वा प्रभावयन्ति ।

एवमेव सूर्योऽग्निधर्मविशिष्टस्तस्मात्तस्याधिपतिरग्निः । चन्द्रो जलधर्मविशिष्टस्तदधीशो वरुणः । भौमोऽग्निधर्माधिकस्तत्स्वामी चाग्निकुमारः कार्तिकेयः । बुधः सहधर्मग्रहणशीलस्तत्प्रभुर्विष्णुः । गुरुः

प्रभावधर्मविशिष्टस्तत्स्वामीन्द्रः । शुक्रो वैद्युतीं प्रभावधारां धत्ते ततस्तत्स्वामिनीन्द्राणी, शनिश्च रजोगुणप्रधानं तेजो दधाति तस्मात्तत्पतिर्ब्रह्मेति ग्रहाणां प्रभावपरिचयाय कल्पितमेतदाचार्यैः ।

पुनः सूर्यः पूर्वां दिशं समधिकं प्रभावयति स्वतेजसा तस्मादयं पूर्वदिक्प्रभुः । अग्निकोणस्य शुक्रः । दक्षिणाशायाः पतिर्भौमः । नैऋत्यकोणस्य राहुः । पश्चिमाया दिशः शनिः । वायुकोणस्य चन्द्रः । उत्तराशाया बुधः । ईशानकोणस्य गुरुरधिपतिः परिभाषितः ।

अथ च कृष्णपक्षस्याष्टमीं तिथिमारभ्य शुक्लपक्षस्याष्टमीं यावदल्पप्रकाशः क्षीणश्चन्द्र सूर्यो भौमः शनैश्चरश्चैते ग्रहा रजस्तमःप्रकाशकिरणान्विकिरन्तः पापग्रहा इत्युच्यन्ते । तैरेतैर्युतो बुधोऽपि पाप इत्युक्तम् । वस्तुतो बुधः स्वयं सौम्योऽपि सन् पापग्रहाणां संगत्या पापो भवतीत्यभिप्रायः । एभ्यः पापग्रहेभ्योऽवशिष्टाः पूर्णचन्द्रः स्वतन्त्रबुधः सौम्यग्रहसंयुतो वा, गुरुः शुक्रश्च सौम्या ग्रहा भवन्ति । अन्यच्च—

बुधसूर्यसुतौ नपुंसकाख्यौ, शशिशुक्रौ युवती नराश्च शेषाः ।
शिखिभूखपयोमरुद्गणानां, वशिनो भूमिसुतादयः क्रमेण ॥ १ ॥

यतो बुधस्य तेजोमण्डलं सदैव सूर्यादिग्रहाणां तेजोभिः समधिकं प्रभावितं तिष्ठति शनैश्चरस्य च मन्दप्रकाशत्वादतिदूरत्वाच्च भूमिस्थिताञ्जडचेतनान् प्रत्यक्षतः स्वतेजोदानेन, विनान्यग्रहाणां तेजोमिश्रणम्, समधिकं प्रभावयितुं न प्रभवतस्ततस्तावेतौ (बुधशनी) नपुंसकावित्युक्तम् । शशी शुक्रश्चातिमृदुलं कोमलमाह्लादि तेजः प्रयच्छतस्तस्मात्तौ युवती इति प्रोक्तौ । सूर्यभौमगुरवः स्वशक्त्यैकनिर्भरं स्वच्छन्दं तेजः प्रयच्छन्ति ततस्ते पुरुषा इति परिभाषितम् । वस्तुतो ग्रहा न मनुष्या इव पुंनपुंसका युवतयो वा भवन्ति परं तेषां स्वतेजोविकिरणे तत्सामर्थ्यप्रभावानुपातलब्धिजिज्ञासयैव तेषामेते तेजोधर्मा निरूपिताः ।

एवं हि भौमेऽग्नितत्त्वाधिक्यात् स वह्नेर्वशंवदः । पार्थिवतत्त्वाधिकाद्बुधो भूस्वामिकः । बृहस्पतिः खगोलीयाकाशतत्त्वविशिष्टतया जलस्वामिकः । शनैश्चरश्च वायुतत्त्वप्राधान्याद्वायोर्वशे तिष्ठतीति प्रोक्तम् । अन्यच्च—

विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितोऽन्त्यजानाम् ।
चन्द्रार्कजीवाज्ञसितौ कुजार्कौ यथाक्रमं सत्वरजस्तमांसि ॥ १ ॥

गुरुः शुक्रश्च ब्राह्मणानां प्रभू, सूर्यभौमौ क्षत्रियाणां पती, चन्द्रबुधौ वैश्यानां स्वामिनौ, शनिश्च शूद्राणामधिपः । यतो ग्रहाणाममीषां तेजसां प्रभावा मनुजेषु तथाविधगुणधर्माः परिपतन्तस्तांस्तथाविधशीलाचारान् कुर्वन्तीति फलादेशप्रयोजनादेतदुक्तम् । अथ पुनर्ग्रहेषु सूर्यचन्द्रगुरवः सत्वतेजःप्रधानाः सात्त्विकाः, बुधशुक्रौ रजोगुणप्रधानौ, भौमशनैश्चरौ च तमोगुणप्रधानौ भवत इति प्राचामाचार्याणां ग्रहाणां तेजःप्रभावगुणधर्मविश्लेषणादनुभवजन्यप्रतीतिः ।

यदा ग्रहः स्वगतिक्रमेणैकं राशिमतिक्रम्यान्यं व्रजन् भवति तदा तस्य तेजस्तत्रानुकूलं प्रतिकूलं वा प्रभावं पूर्वत एव तनोति। स्वतेजोरश्मिप्रभावादग्रे वर्तमानं तेजोमण्डलं वातावरणं च किञ्चिदान्दोलयति। तथा चोक्तम्—

सूर्यः पञ्चदिनं शशी त्रिघटिकं भौमोऽष्टवारात्मकं
सप्ताहं भृगुजश्च सोमतनयो मासद्वयं वै गुरुः।
षाण्मासं च शनैश्चरस्तदधिकं राहुश्च मासत्रयं
केतुश्चेति दिशत्यवश्यमिह तद्गन्तव्यराशेः फलम् ॥ १ ॥

सूर्यो यदा स्वाधिष्ठितं राशिमतिक्रम्याग्रे स्थितं राशिं प्रत्यग्रं सरति तदा तत्किरणजालं पञ्चदिनेभ्यः पूर्वमेव हि गन्तव्यं राशिं प्रभावयितुं प्रारभते। चन्द्रो घटिकात्रयपूर्वं, भौमोऽष्टदिनपूर्वं, बुधो भृगुजश्चैकसप्ताहपूर्वं, गुरुर्मासद्वयात् पूर्वं, शनिः षण्मासेभ्यः प्राक् राहुः केतुश्च मासत्रयात्पूर्वमेव स्वस्थानादग्रे वर्तमानं ग्रहराशिकक्षामण्डलं प्रभावयन्ति।

एवं प्राचीनैरार्यमहर्षिभिः शास्त्रज्ञानेनाप्तवचनानुरोधात्प्रत्यक्षानुभवेन च ग्रहाणां राशीनां नक्षत्राणां च तेजोमण्डलानां वातावरणानां देशकालपात्रापेक्षया सूक्ष्मं विविच्य समन्वयव्यतिरेकाभ्यां ते ते परिणामाः प्रभावानिष्पत्तयश्च परिभाषिताः। ज्योतिःशास्त्रे ता एता परिभाषा असंख्या अनन्ताश्च प्रोक्ताः। आध्यात्मिकाधिदैविकाधिभौतिकफलादेशसिद्धये पारिभाषिकमेतत्सर्वं साङ्गोपाङ्गं जानञ्ज्योतिर्विद्वेदवेदांगदर्शनविज्ञानादिकं लौकिकमनुभवं चात्मनि दधानो गुरुमुखादभ्यस्तवाङ्मयः सत्यवाक् सदाचारो महता श्रमेण च फलादेशं च कर्तुं प्रभवेन्नान्यः। यतो विषयोऽयमतीव सूक्ष्मो गंभीरश्च। अत्र लेखविस्तृतिभिया पुनः पुनरुक्तिदोषाशङ्कया स्थालीपुलाकमाश्रित्य संक्षेपादिदमेव निवेद्यते यद्धि नलिकाबन्धादिसाधनैर्यन्त्रोपकरणैर्वेधजन्यानुभवैः स्थूलैः सूक्ष्मैश्च निरीक्षणैर्ग्रहाणां तेजःप्रभावान्निपुणं ज्ञात्वैव फलं वक्तुं युज्यते प्रकृष्टप्रतिभावद्भिः सतताभ्यासशीलैरध्यवसायशालिभिः। न केवलं ग्रहाणामेव प्रत्युत राशीनां नक्षत्राणामपि च भारतीयैर्ज्योतिर्वित्पण्डितैस्तेजसां प्रभावविषये बहु विचिन्त्य कानिचित्तथ्यानि चाविष्कृतानि विद्यन्ते। यथा नक्षत्रवृत्तेऽश्विनीभरणी-कृत्तिकाया एकपादपर्यन्तं मेषराशिः। तावति स्थाने यदा कोऽपि ग्रहः संचरति तदा तत्स्थानीयं तेजः स्ववातावरणजन्यैर्गुणधर्मैस्तद्ग्रहस्य तेजोंऽशतः प्रभावयति। ततो द्वादशराशीनां प्रभावाः पृथक् पृथग् वर्णिता विद्यन्ते। यथा मेषराशिविषये —

आद्यः स्मृतो मेषसमानमूर्तिः कालस्य मूर्द्धा कथितः पुराणैः।
सोऽजाविकासं चरकन्दराद्रिस्तेनाग्निधात्वाकररत्नभूमिः ॥ १ ॥

एवं वृषभादीनामपि राशीनां गुणधर्मस्वभावाः परिभाषिताः। एवमेवाश्विन्यादीनां नक्षत्राणामपि प्रभावास्तत्तत्स्थानजन्यवायुमण्डलजाः परिभाषिता विद्यन्ते।

इत्थमाकाशे संचरतां ग्रहाणां तेजःप्रभावा भूमिस्थितसचेतनाचेतनेषु पदार्थेषु पतन्ति ते च सर्वेषां जीवने शुभाश्चाशुभाश्चानुकूल्येन प्रातिकूल्येन वा स्वपरिणामात् दर्शयन्त्येवेति सुनिश्चितम् । ते च ग्रहराशिनक्षत्रादीनाम् प्रभावाः कदा कीदृशाः किंपरिणामाः किंपरिमाणाश्च देशकालपात्रापेक्षया सरलवक्रतिर्यक्कोणगतदृष्ट्या न्यूना वाधिका वा कियन्तः कथं जायन्ते तत्तारतम्यानुपाताश्च के भवन्तीति विभावयितुमेव पूर्वाचार्यैर्जातकसंहितासु नानादृष्टिभिः परिभाष्यन्ते फलाभिसन्धिं निर्णेतुं बलाबल-तत्त्वमीमांसातिगभीरा विहितास्ति । अभीष्टस्य प्रमेयस्योपरि सूर्यादिग्रहाणां प्रभावं विनिश्चेतुं तत्तद्देशे काले पात्रे प्रभावं ज्ञातुं ग्रहणराशिसंयोगाद् सूर्यचन्द्रयोः परस्पराकर्षणविकर्णणजन्यं तेजो-निष्कर्षं ज्ञातुं होराविचारस्तृतीयांशानुपाततस्तेजोमानं विवेचयितुम् द्रेष्काणविचार एवमेवसप्तमांश-नवमांशद्वादशांशत्रिंशांशादीनां विचारः षड्वर्गेषु वैज्ञानिकदृष्टचा ज्योतिर्विद्भिः सुसूक्ष्मं क्रियते । पुन-र्ग्रहाणामेकचरणद्विपादत्रिपादसम्पूर्णदृष्टिगतसम्बन्धादपि तत्तेज सदाहानप्रदाने निर्णीयते । खेटानां मित्रसमशत्रुत्वकल्पनयापि च तत्तेजःप्रभावाणां मानं स्थिरीक्रियते । को नु खलु ग्रहः सबलो वा निर्बलो वा कस्मिन् कालखण्डे स्वानुकूलां प्रतिकूलां वा स्थितिमासाद्य फलप्रदानाय सक्षमो वा क्षमो वास्यादिति निर्णयाय पुरुषायुषो विंशोत्तरशतवर्षात्मकमष्टोत्तरशतवर्षप्रमाणं वा मानं स्वीकृत्य तत्तद्ग्रहस्य दशान्तर्द-शासु फलादेशव्यवस्था विधीयते । एवं ग्रहाणां खगोलीयस्थितिवशात्तेषां पारस्परिकसम्बन्धविमर्शैर्योगा-योगविचारमनु तत्तेजःप्रभावान् सम्यग्विचार्य फलमादिशन्ति जगद्धितमभीप्सवो दैवज्ञाः ।

प्राचीनैराचार्यैः शास्त्रज्ञानेन, सूक्ष्मवेधादिजन्यस्वानुभवेन, सार्वभौमफलादेशाय, व्यक्तिगत-जीवने ग्रहफलादेशाय चासंख्या विभिन्नाश्च सुयोगाः कुयोगा वा परिभाषाक्रमेण निरूपिता वर्तन्ते । खगोले भ्रमतां ग्रहाणामित्थं सुदूरं गम्भीरं च प्रभावं विचार्य तेषां सबलत्वं निर्बलत्वं वा निपुणं विनिर्णीय फलादेशः क्रियते । ज्ञानविज्ञानपारदृश्वभिर्गूढानुभवशालिभिः शास्त्रोक्तं सत्यं प्रत्यक्षं जिज्ञासुभिश्चमत्कारकौतुकप्रियैर्जगद्धितैषिभिर्मार्मिकैर्दैवज्ञैरित्थं प्रयत्यते ।

इत्थमुपर्युक्तप्रकारेण खगोलस्थितं ग्रहमण्डलं स्वतेजसा ब्रह्माण्डे वर्तमानान् सर्वानेव लोकान् सदा सर्वदा सर्वतः प्रभावयदास्ते । एवं सति तदस्माकं भूगोले स्थितान् सर्वाञ्जीवान् पदार्थांश्च नूनं प्रभावयति तदेतदतीव स्वाभाविकम् । प्रत्यक्षं परिदृश्यमाने सततं चानुभूयमानेऽप्यत्र विषये केषांचिज्जड-मतीनां नव्यानां नास्तिकानामविश्वासो विप्रतिपत्तिरप्रत्ययश्चास्ते तत्तेषां स्वास्तित्व एव सन्देह इवा-ज्ञानदुर्विलसितम् सूर्यचन्द्रयोर्ग्रहणं, भूकम्पः, प्रभञ्जनोऽतिवृष्टिरनावृष्टिः, सुभिक्षं, दुर्भिक्षं महामारिर्ज-लविप्लवोऽग्निभयमुत्पाता युद्धमित्यादीनि घटनान्तराणि ग्रहप्रभावैरेव जायन्ते । उल्कापातराज्यभ्रंशाद-योऽपि ग्रहाणामेव प्रभावाद्भवन्ति । अग्निविस्फोटकोपो विषवृक्षोत्पत्तिर्हिमशर्करापातो विचित्रकृमि-कीटानामुत्पत्तिश्चापि ग्रहप्रभावतः । कामं कोऽपि ग्रहाणां प्रभावं मन्यतां न वा मन्यतां परन्तु पाञ्च-भौतिकेऽस्मिन्मानवदेहपिण्डे यथाकाशस्थितजलभूमीनां प्रभावा अनिवार्यतः पतन्त्येव तथैव ग्रह-

प्रभावा अपि निर्निरोधमनिवार्यतया जायन्त एवात एवाचार्या 'गृह्णाति स्वतेजसान्यान् प्रसह्याक्रम्यादत्ते तत्तेज इति ग्रहः' इति व्युदपादयन् ।

अथाधुना ग्रहराशिसम्भवानां जन्मकुण्डली-वर्षकुण्डलीप्रश्नकुण्डलीनां विषयेऽपि किञ्चिदुक्त्वोपसह्रियतेऽयं लेखः—

खगोले स्थितानां ग्रहाणां या सत्या वास्तविकी स्थितिस्तस्या मानचित्रमेव कुण्डली । आकाशस्थग्रहराशिनक्षत्राणां प्रतिकृतिरूपेयं कुण्डली स्पष्टगणितसिद्धा फलाफलविमर्शे प्रधानं साधनम् । अत्र कुण्डल्यां तिथिवारनक्षत्रयोगकरणादीनां स्वाभीष्टसमये गणितसिद्धा स्थितिरङ्किता भवति । मेषादयो राशयो द्वादश संख्याकाः १,२,३,४,५,६ प्रभृतिभिरङ्कैः सङ्केतरूपैः सूर्यादयो नवग्रहाश्च स्वस्वकक्षासु यथास्थानं स्थिताः सू.चं.मं.बु. इत्याद्यैरक्षरचिह्नैः सौकर्याय संक्षिप्य लिखिता भवन्ति । मनुष्यस्य जन्मसमये वर्षप्रवेशसमये प्रश्नकाले विवाहराज्याभिषेकादिमुहूर्तसमये वा या खगोलगता ग्रहस्थितिः सात्र कुण्डल्यां चित्रिता भवति । सर्वादौ तत्र कुण्डल्यां तदा पूर्वक्षितिजे क्रान्तिवृत्तस्या राश्यादिर्यः प्रदेशो लग्नो भवति स एव लग्नमिति स्वीकृत्य राश्यंशसङ्केतेन लिखितो भवति । तथ चोक्तं श्रीमद्भास्कराचार्यैः सिद्धान्तशिरोमणेर्गोलाध्याये—

यत्र लग्नमपमण्डलं कुजे तद्गृहाद्यमिह लग्नमुच्यते ।
प्राचिपश्चिमकुजेऽस्तलग्नकं मध्यलग्नमिति दक्षिणोत्तरे ॥ १ ॥

यथा चतुरङ्गक्रीडापट्टे (शतरञ्ज) चतुःषष्ठीकोष्टात्मके द्वात्रिंशद्गुटिकाः संस्थाप्य स्वगतिक्रमेण चलन्तीनां तासां परस्परसम्बन्धाद्बलाबलं विचार्य जयपराजयौ निर्णीयेते तथैवात्र कुण्डल्यां द्वादशराश्यात्मकेषु कोष्ठेषु यथास्थानं स्थितानां नवग्रहाणां स्थानगतदृष्टिगतनानाविधैः सम्बन्धैस्तत्तेजसामाकर्षणवशाद्बलाबलं योगकारकत्वं फलदानसक्षमत्वं वाक्षमत्वं च विचार्यते । भूवलयस्थितानां सर्वेषामेव जडचेतनानां ग्रहाणां तेजसा साकं सम्बन्धः—विशेषतः सर्वोत्कृष्टतेजसोः सूर्यचन्द्रयोः—क्षितिजेन सह सूर्यवृत्तस्याधिका सापेक्षता भवति यतो ग्रहाणां प्रकाशकिरणघाताः प्रतिघाताश्च तत्रैव प्राथम्येन पतन्ति तत्स्थानं च सर्वाधिकं प्रभावयन्ति ततस्तत्स्थानं सर्वप्रथमं लग्नाख्यं स्वीक्रियते बुधैः कुण्डलीषु । लग्नोपरि ये ये ग्रहतेजसां प्रभावाः पतन्ति तैरेव मनुष्यस्य देहबन्धसौष्ठवं रूपं सौन्दर्यं बलमायुर्वर्णं इत्यादि विचार्यते । मातुर्गर्भात् सद्यः प्रसूतश्चेतनो व्यष्टिपिण्डो भौतिकवातावरणस्य जलवायूष्मणां देशस्य कालस्य ग्रहाणां च प्रभावान् गृह्णन् जीवनक्रमे श्वासोच्छ्वासैः प्रवर्तते । यद्यपि जन्मतः पूर्वमेव मातृगर्भे रजोवीर्यसंयोगाज्जातो भ्रूणरूपो गर्भोऽप्रत्यक्षतो ग्रहाणां तेजः समादत्ते । जीवनसम्बन्धिनः सर्वेऽपि गुणकर्मस्वभावा उत्कर्षापकर्षाः स्वच्छन्दैर्मिश्रितैर्वा प्रभावैर्ग्रहतेजसां जायन्ते मनुष्याणाम् । यथा प्रागुक्तं यद्ग्रहाणां तेजःप्रभावा जडचेतनेषु नियतं पतन्त्येव ते च मातुर्गर्भे स्थितस्य भ्रूणस्याप्यङ्गनिर्माणे शरीरमनोवाग्बुद्ध्यादितत्त्वरचनायामपि प्रभवन्ति सुनिश्चितम् । तदेवाहुर्वराहमिहिराचार्या बृहज्जातकस्य निषेकाध्याये—

कुजेन्दुहेतु प्रतिमासमार्तवं गते तु पीडर्क्षमनुष्णदीधितौ।
अतोऽन्यथास्थे शुभपुंग्रहे क्षिते नरेण संयोगमुपैति कामिनी॥ १॥

अत्रायमभिप्रायो यद्भौमः स्वतेजोरश्मिषु रजस्तत्त्वांशमाधिक्येन दधाति तस्मादेव स रक्तोऽङ्गारको रुधिराढ्यो भूपुत्रश्चेति कथ्यते। भौमस्य प्रकाशकिरणाः स्त्रीषु यन्नैसर्गिकं रजो भवति तद् क्षोभयन्ति। एवमेव चन्द्रो जलीयतत्त्वानामात्मन्याधिक्यं धत्ते। अतो भौमचन्द्रयोस्तेजःस्पर्शात् स्त्रीणां गर्भान्तःस्थितान् रजःपरमाणून् संक्षोभ्य मासि मासि गर्भाधानयोग्यतामापादयति। इत्थं सृष्टेर्मूलभूततत्त्वानां रजोवीर्यादीनामपि क्रियाशीलतायाः प्रेरका भवन्ति ग्रहाः। सृष्ट्युत्पत्तौ स एव ग्रहाणामरम्भवादः।

अथ मातुर्गर्भे मासक्रमेण वृद्धिं गच्छतो भ्रूणस्य विकाशेऽपि च ग्रहतेजसः प्रभाव एव कारणमित्याहुराचार्याः।

तथा हि—

कललघनाङ्कुरास्थिचर्माङ्गचेतनाः
सितकुजजीवसूर्यचन्द्रार्किबुधाः परतः।
उदयपसूर्यचन्द्रनाथाः क्रमशो गदिता
भवन्ति शुभाशुभं च मासाधिपतेः सदृशम्॥ १॥

अर्थात् स्त्रीणां गर्भे पुरुषसंयोगान्निषिक्तं रजोवीर्यमिश्रणरूपं तरलं कललं प्रथममासे तिष्ठति। तच्च शुक्रतेजःप्रभावाद्भवति। ततः प्रथममासस्य स्वामी शुक्रः प्रोक्तः। द्वितीये मासि तत् कललं घनत्वे परिणमति। भौमतेजसः प्रभावात्तस्माद् द्वितीयमासस्य स्वामी भौमः कथितः। तृतीये मासेऽङ्कुरा जायन्त गुरोस्तेजसः प्रभावेण, ते चाङ्कुरप्ररोहा गुरुप्रयोजितास्ततस्तृतीयमासाधिपो गुरुरुक्तः। चतुर्थे मासेऽस्थ्नां विकाशो भवति सूर्यप्रभावात्ततो रविरेव चतुर्थमासस्य पतिः। पञ्चमे मासि चर्मसम्भवश्चन्द्रतेजःप्रभावस्तमाच्चन्द्रः पञ्चममासाधिपतिः। षष्ठे मासे शरीरावयवानां निर्माणं भवति तच्च शनिप्रभावतस्तस्माच्छष्ठस्य मासस्य स्वामी शनिरुक्तः। सप्तमे मासे गर्भस्थिते बाले चेतनाप्रतिष्ठा भवति सा च बुधस्य तेजसा जायते ततः सप्तममासाधिपो बुधो गदितः। एवमेवाष्टमे नवमे दशमे च मासे क्षुत्तृड्वेगप्रसवाः क्रमशो लग्नेशसूर्यचन्द्राणां तेजःप्रभावात्सम्भवन्ति ततस्तेऽष्टमनवमदशममासानां स्वामिनः प्रोक्ताः। एवं गर्भाधानात्प्रसवपर्यन्तं गर्भे स्थितस्य शिशोर्ग्रहप्रभावा जायन्त इति सुस्पष्टमेव।

न केवलं सचेतनेष्वेव प्रत्युत वृक्षलतागुल्मपादपपत्रपुष्पफलादीनामप्युत्पत्तौ विकाशे च ग्रहाणां तेजो महान्तमेव प्रभावमर्पयति। तथा चोक्तं बृहज्जातके वियोनिजन्माध्याये वराहमिहिराचार्यैः

अन्तःसाराञ्जनयति रविर्दुर्भगान् सूर्यसूनुः
क्षीरोपेतांस्तुहिनकिरणः कण्टकाढ्यांश्च भौमः।

वागीशज्ञौ सफलविफलान् पुष्पवृक्षांश्च शुक्रः ।
स्निग्धानिन्दुः कटुकविटपान् भूमिपुत्रस्तु भूयः ॥ १ ॥

अनेन ज्ञायते यत्सूर्यस्य तेजो वृक्षाणामन्तःसारनिर्माणेऽधिकां योग्यतां दधाति । शनिर्दुर्भगान् मनसोऽरुचिकरान् वृक्षान् रचयति स्वतेजःकिरणैः । चन्द्रकिरणाः क्षीरिणामन्तर्दुग्धवताम् वृक्षाणामुत्पादने तत्परमाणून् सविशेषं प्रेरयन्ति । कण्टकवृक्षाणामुत्पत्तौ भौमस्य तेजोरश्मयः प्रभवन्ति । फलवतां वृक्षाणां निर्माणे विकाशे च गुरोस्तेजो महत्प्रभवति । बुधः फलरहितानां वृक्षाणां निर्माणे स्वतेजसा प्रभवति । चित्रविचित्रवर्णान्मनोहरान् सुगन्धयुक्तान् पुष्पवतो वृक्षाञ्जनयितुं स्वतेजोमयूखैः प्रभावमर्पयति शुक्रः । पुनश्चन्द्रः स्निग्धान् भौमश्च कटून् विटपान् स्वकिरणैरधिकाधिकं प्रभावयति । एवमन्तश्चेतनेषु वृक्षादिषु स्थावरपदार्थेषु धात्वादिषु चापि ग्रहाणां प्रभावाः सुसूक्ष्मं विचारणया विज्ञानसम्मता जायन्ते । ततश्चोक्तम्—

ग्रहा राज्यं प्रयच्छन्ति ग्रहा राज्यं हरन्ति च ।
ग्रहैर्व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ १ ॥

एवं ग्रहस्थितेर्जीवने प्रत्यक्षं प्रभावे विद्यमानेऽपि सति ज्यौतिषशास्त्रानुसारं फलादेशकथने नानाविधाः कठिनता भवन्ति । सर्वादौ ज्यौतिषशास्त्रस्य गणितप्रकरणस्य—व्यक्तगणितस्य-अव्यक्तगणितस्य-रेखागणितस्य-त्रिकोणमिति-गणितस्य विद्युद्गणित-ध्वनिप्रकाशवायुवेगगुरुत्वाकर्षणादिसिद्धान्तानामुच्चगणितस्य च ज्ञानं साङ्गोपाङ्गमतीवावश्यकम् । ततः खगोलविज्ञानस्य सोपपत्तिकं ज्ञानं ग्रहगतीनां नलिकाबन्धादियन्त्रसाधनैर्वेधादिभिः प्रक्रियाभिर्दृक्प्रत्ययानुभवः, प्राचीनाचार्यैः संस्थापितानां शास्त्रसिद्धान्तानां नव्यवैज्ञानिकानुभावानां च यथावज्ज्ञानमात्मप्रतीतिस्तीव्रा जिज्ञासा, गुरुमुखाच्छास्त्रपाठश्रवणं सतताभ्यासो वेदवेदाङ्गानां दर्शनसाहित्यादीनां प्रतिपत्तिर्भूगोलेतिवृत्तभूगर्भविद्याप्राणिशास्त्रवनस्पतिखनिजतत्त्वानां ज्ञानं चातीवावश्यकम् । भौतिकविज्ञानरसायनशास्त्रस्वरोदयशास्त्र-रमल-केरल-जातक-ताजिकसिद्धान्त-संहिताहोरा-सूर्यचन्द्रोपराग-धूमकेतुपातादीनां ज्ञानं, देशकालपात्रादीनां मनोविज्ञानं, स्थितप्रज्ञता, ग्रहाणामुदयास्तशृङ्गोन्नतियुतिपातसाधनं, निरयनसायनविवेकस्ततो ग्रहगणितेऽपेक्षितबीजसंकारादिविभिन्नविषयाणां याथातथ्यं ज्ञानं च दधानाः सदाचाराः सच्चरित्रा हितमिततथ्यभाषिणो वाक्सिद्धिं प्राप्ता इष्टदेवतागुरुकृपामाश्रिता लोकहितैषिणो मनीषिणो ज्यौतिषाचार्या भगवति परमात्मनि परमेश्वरे दृढं श्रद्दधानाश्च यदा फलादेशे निष्कामं प्रवर्तन्ते तदैवैतदस्माकम् फलितशास्त्रं सत्यमेव भूतभविष्यद्वर्तमानसमयोपयुक्तं तात्त्विकं चमत्कारि च प्रमाणयितुं शक्नुयुः ।

अद्यत्वे धनलिप्सवो मौहूर्तिकाः केवलं पञ्चांगास्त्रशूरा मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यदेवोभयलोकसिद्धये नीतिं मन्यमाना 'मुखमस्तीति वक्तव्यं दशहस्ता हरीतकी' इतिवत् फलादेशं कुर्वन्ति । प्रश्नकर्तारश्चापि स्वार्थसाधनधुरीणा मोघाशा मोघकर्माणो मोघज्ञाना विचेतसो दुष्टाभिसन्धिपूर्वकं विनैव

पारमार्थिकं किमपि प्रयोजनं ज्योतिर्विदः शतशः प्रश्नान् पृच्छन्ति पुनस्ते ज्योतिषं निन्दन्ति, तज्ज्ञान् प्रतारयन्ति तस्मादेवात्र लौकिकप्रपञ्चे कपटपाखण्डधूर्तताछलछद्ममायाजालविस्तारे विफला जायन्ते। तस्मादेवेदं प्रत्यक्षं सत्यं दृग्गोचरं दिव्यं भास्वरं सदपि ज्योतिर्विज्ञानं नास्तिकानां जडवादिनां मायापट्टनामाक्षेपायैव केवलमवशिष्यते, इति महानेव खेदावसरः। यथाग्नेर्दाहात्मिकां शक्तिं जानन्तोऽजानन्तो वा जनास्तत्स्पर्शाद्दाहदुःखमनुभवन्त्येव तद्वद्ग्रहाणामतिस्फूर्जत्प्रभावोऽत्र जगति सर्वेषां जडचेतनानां जीवनेऽनिवार्यतया जायत एवेति सुनिश्चितम्।

मानवानां जन्मसमये ये ये ग्रहाणां प्रभावा जायन्ते ते सर्वे जीवनपर्यन्तं स्थायिनो भवन्ति। वज्रलेपा इवेमे ग्रहतेजसां प्रभावाः कथमपि दूरीकर्तुं न शक्यन्ते तथापि छत्रेण सूर्यातपादिव यथा किंचिद्रक्षणं सम्भवति, ऊर्णावस्त्रैर्यथा शीतं निवार्यते तथा ग्रहाणां तेजोप्यौषधिसेवनाद्रोगशांतिरिव मन्त्रजपैर्दानैर्व्रतै रत्नादिधारणैर्यज्ञैरन्यैर्वोपायैः शास्त्रोक्तैः किंचिदनुकूलतां नेतुं शक्यते। सूर्यप्रभावस्यानुकूलतासम्पादनार्थं माणिक्यं, चन्द्रस्य मौक्तिकं, भौमस्य प्रवालं, बुधस्य नीलमणिं, गुरोः पुष्परागरत्नं, शुक्रस्य हीरकमणिं, शनेर्नीलमणिं, राहोर्गोमेदरत्नं, केतोश्च वैदूर्यरत्नं धारयितुं समर्थयन्ते ग्रहप्रभावविदो दैवज्ञाः। एवमेव सर्वेषामपि ग्रहाणामनुकूलतापादनाय दुस्तेजोऽपाकरणाय च ग्रहशान्त्यादिविधानं प्रोक्तं शास्त्रज्ञैराचार्यवर्यैः। केषांचित्पदार्थानामोषधीनां वस्त्राणां धातूनां पुष्पाणां च धारणं विधिविहितं प्रोक्तं शास्त्रज्ञैः। क्वचिद्ग्रहाणां प्रतिकूलप्रभावशमनाय केषांचित्पदार्थानां त्याग उत्सर्गश्च प्रोक्तः। एतत्सर्वं सविज्ञानं प्रसिद्ध्यति परन्तु तेषामेव कृते फलदं भवति ये जनाः प्राकृतिकं सरलातिसरलं जीवनक्रममनुवर्तमानास्तादृशीं कृत्रिमां दिनचर्यामङ्गीकृत्य शुद्धं सात्त्विकं सदाचारयुक्तं सनियमं च जीवन्ति।

अत्र स्वभावतः प्रश्नोऽयं समुदेति यदधुना ग्रहफलमिदमित्थं किमर्थं न सत्यं फलति, दिने दिने फलितशास्त्रचमत्कारो धूमिल इव जायमानः कस्माद्बोभूयमानोऽस्ति? यतोऽद्यतना लोकाः स्वकीये भौतिकजीवने विज्ञानसाधनान्यधिकाधिकं प्रयुञ्जाना प्राकृतिकं वातावरणमणुपरमाणुपर्यन्तं दूषयन्तः स्वार्थान्धतां देहात्मवादितां भोगपरायणतां च द्रढयन्ति। एवंविधा दोषाश्च मानवजीवनेऽतीवानुचितं प्रभावं जनयन्तो दरीदृश्यन्ते। तस्मात्प्रागिव नाद्य फलादेशः सद्यश्चमत्कारं दर्शयति। येषामाहारविहारा मर्यादिताः सन्ति, ये पापात्मानः क्षुद्रधियः स्वार्थसाधनाय परपीडां जनयन्ति, ये च सर्वव्यापकस्य सर्वान्तर्यामिनः परमात्मनः परमेश्वरस्यास्तित्वेऽपि सन्दिहानाः पापाचरणान्न बिभ्यति, तादृशा नास्तिका मनोवाक्कायकर्मभिरसत्याचरणमेव हि परमं पुरुषार्थं मन्यन्ते तथाविधानां जडवादिनां कृते शास्त्रोक्ता ग्रहप्रभावनिवारणोपायाः शुभप्रभाववर्जका विधयो वापेक्षातो न्यूनामेव फलसिद्धिं दिशन्ति चेत्तन्नाश्चर्यावहमिति विरम्यते विस्तरात्।

उद्यन्तु शतमादित्या उद्यन्तु शतमिन्दवः।
न विना विदुषां वाक्यैर्नश्यत्याभ्यन्तरं तमः॥ १॥

—०—

नायिका-शकुन्तलाया नाट्यशास्त्रीयमध्ययनम्

डॉ० कुसुमभूरिया *

नाटकीय-पात्राणां विवेचनस्थले आचार्य-भरतेन नाट्यशास्त्रे नायिका-विवेचनमपि प्रस्तुतम्। आचार्य-भरतस्य नायिका-विवेचने स्थूल-सूक्ष्म-विचारतत्त्वयोः समन्वयो विलसति। तत्र नारीणामङ्गसौन्दर्यातिरिक्तं तासां शीलमाचरणस्य पवित्रता जीवनप्रकृतिरवस्था च विशेष-महत्त्वं भजन्ते। नाट्यशास्त्रानुसारं नायिका-विवेचने इमे विशेषा भवन्ति—

१. प्रकृतिभेद :—उत्तमा, मध्यमा, अधमा च। —(ना० शा० २५·३७-४२)

२. आचरणस्य पवित्रतापवित्रता वा—बाह्या, आभ्यन्तरा बाह्याभ्यन्तरा च। —(ना० शा० २४·१४२-४७)

३. सामाजिकप्रतिष्ठा—दिव्या, नृपपत्नी, कुलस्त्री, गणिका च।

४. कामदशा—वासकसज्जाद्याः अष्ट। —(ना० शा० २४·२०५-२१२)

५. शीलम्—ललिता, उदात्ता, निभृता धीरा च। —(ना० शा० ३४·२४)

६. अङ्गरचना अन्तःप्रकृतिश्च—दिव्यसत्त्वादि एकविंशतिः। —(ना० शा० २४·९६-१३५)

७. अन्याधाराः—वेश्या, कुलजा, प्रेष्या च। —(ना० शा० २२·२२६)

नायिकाभेदानामुपयुक्ताधारैः सम्प्रति अभिज्ञानशाकुन्तलस्य नायिकायाः शकुन्तलायाश्चरित्र-विश्लेषणं प्रस्तूयते। कण्वाश्रमस्य कुलपति-महर्षिकण्वस्य धर्मपुत्री एषा शकुन्तलात्यन्तसरलहृदया स्नेहमयी सौन्दर्यशालिनी च कन्यास्ति। तस्याश्चरित्रं विश्वसाहित्य आदर्शनायिकाया विलसति।

१. प्रकृतिभेदः—प्रकृतिभेदस्योपयुक्त-त्रिष्वाधारेषु शकुन्तला उत्तमप्रकृतेर्नायिका विद्यते।

उत्तमप्रकृतेः परिभाषा नाट्यशास्त्रे ईदृशी विद्यते —

"या विप्रियेऽपि निष्टम्भं न वदत्यप्रियं प्रियम्।
अदीर्घरोषा च तथा कलाशिल्पविचक्षणा॥
काम्यते पुरुषैर्या तु कुलभोगधनादिकैः।
कुशला कामतन्त्रेषु दक्षिणा रूपशालिनी॥

* व्याख्याता—संस्कृतविभागे सागरविश्वविद्यालयस्य।

गृह्णाति कारणाद्रोषं गतेर्ष्या प्रब्रवीति च ।
कार्यकालविशेषज्ञा सुभगा सा स्मृतोत्तमा ॥

—(ना० शा० २५.३७–३९)

परिभाषानुसारमधोलिखिता गुणा विलसन्ति शकुन्तलायाम्—

क. शकुन्तलायाः हृदये स्वप्रियजनार्थमत्यधिकं प्रेम विद्यते। सा कदापि तेषां प्रति अशोभनं व्यवहारं न करोति। अनेन कारणेनैव तस्याः सख्यौ, पिता-कण्वः आर्या—गौतमी तपस्विनश्च सर्वे तस्यां स्निह्यन्ति। पंचमाङ्के दुष्यन्तेन तिरस्कृता शकुन्तला यदा शार्ङ्गरवमनुगच्छति तदा शार्ङ्गरवस्तां सक्रोधं कथयति—"किं पुरोभागे स्वातन्त्र्यमवलम्बसे" तस्मिन्नवसरेऽपि शकुन्तला किमप्यप्रियं न वदति शार्ङ्गरवम्।

ख. शकुन्तला अदीर्घरोषास्ति। दीर्घसमयं न क्रुध्यति सा। तथा च कारणविशेषे एव क्रुध्यति। पंचमाङ्के तिरस्कृता शकुन्तला क्रोधावेशे दुष्यन्तस्य भर्त्सनां करोति—"अनार्य ! आत्मनो हृदयानुमानेन पश्यसि। क इदानीमन्यो धर्मकञ्चुकप्रवेशिनः तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते ?" किन्तु पुनर्मिलने सा तमेकमपि अपशब्दं न वदति स्वानि भाग्यानि एव निन्दति—

"उत्तिष्ठत्वार्यपुत्रः। नूनं मे सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणाममुखमासीत्, येन सानुक्रोशोऽप्यार्यपुत्रो मयि तथा संवृत्तः।" (सप्तमाङ्के)

ग. कलाशिल्पादिषु प्रवीणा विद्यते शकुन्तला। सा विभिन्न–कार्यैश्च उद्यानशोभां वर्धयति। पुष्पोद्गमे सा महोत्सवमायोजयति। दुष्यन्ताय प्रेमपत्रं लिखित्वा पठित्वा च सा स्वगीतकौशलमपि प्रकटीकरोति।

घ. सा स्वकुलेन (क्षत्रिय) सौन्दर्येण च राजर्षि–दुष्यन्तेन काम्यास्ति। दुष्यन्तशब्देष्वेव—

"अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात् ? अथवा कृतं सन्देहेन—

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥" १.२०

ङ. सा दक्षिणा युवती विद्यते। आश्रमस्य जड-चेतने प्रति तस्या व्यवहारो दयार्द्रो विद्यते। एकः मृगशावकः शकुन्तलया पुत्रवत् पालितः। सर्वे पशुपक्षिणश्चतुर्थाङ्के शकुन्तलायाः प्रस्थानसमये तस्या वियोगजन्यदुःखमनुभवन्ति। यथा हि—

"उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः॥" १.२

च. रूपशालिनी तु विद्यत एव शकुन्तला। तस्या रूपसौन्दर्येणाकृष्टो दुष्यन्तस्तां प्रति कथयति—

"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥" १.१८

अपि च,

मानुषीषु कथं वा स्यात्..........वसुधातलात्। १.२३ चित्रे निवेश्य..........वपुश्च तस्याः॥ २.९ इत्यादि।

छ. कालस्थितिं व्यवहारमपि सा जानाति। पिता कण्वस्तामतिथिसत्कारे नियोजयति। सावधानपूर्वकं तत् कार्यं करोति। वृक्षाणां सिंचनमपि सा उचित-समये करोति। एवं शकुन्तलोत्तमप्रकृतेर्नायिका विद्यते।

२. आचरणस्य पवित्रतापवित्रता वा—

बाह्या चाभ्यन्तरा चैव स्यादबाह्याभ्यन्तरा परा।
कुलीनाभ्यन्तरा ज्ञेया बाह्या वेश्यांगना स्मृता॥
नहि राजोपचारेषु बाह्यस्त्रीभोग इष्यते।
आभ्यन्तरो भवेद्राज्ञो बाह्यो बाह्यजनस्य वा।
दिव्यवेश्यांगनानां हि राज्ञो भवति सङ्गमः॥

—ना० शा० २४. १४३–४६.

नाट्यशास्त्रस्योपयुक्तनियमालोचनान्तरं वयं पश्यामो यत् शकुन्तला कुलीनांगनात्वात् आभ्यन्तर-कोट्यां समागच्छति।

३. सामाजिकप्रतिष्ठा—सामाजिक प्रतिष्ठादृष्टी शकुन्तला प्रमुख-रूपेण नृपपत्नी विद्यते, किन्तु अप्सरस उत्पत्तित्वेन तस्यां दिव्यतत्त्वमपि प्राप्यते। प्रथमाङ्के राजा दुष्यन्तस्तां प्रति कथयति—

'सर्वथाप्सरःसम्भवैषा।'

सप्तमाङ्के पुनर्मिलने सा विधिपूर्वकं नृपपत्नी स्वीकृता।

४. कामदशा—वासकसज्जाद्यष्टावस्थासु शकुन्तला तिसृष्ववस्थासु परिलक्ष्यते। सा स्वाधीनभर्तृका-विरहोत्कण्ठिता-प्रोषितभर्तृका च विद्यते।

तृतीयाङ्के गान्धर्व-विवाह-समये सा स्वाधीनभर्तृका-नायिका विद्यते। नाट्यशास्त्रानुसारं—

"सुरतातिरसैर्बद्धो यस्याः पार्श्वगतः प्रियः ।
सामोदे गुणसंयुक्ता भवेत्स्वाधीनभर्तृका ॥' —ना० शा० २४.२०७.

विवाहस्य पश्चाद्राज्ञा सह सुप्रसन्ना रममाणा सा गर्भं दधाति ।

विरहोत्कण्ठिता—नायिकारूपेणापि सा प्रस्तुता । नाट्यशास्त्रानुसारं विरहोत्कण्ठिता—नायिकायाः लक्षणं विद्यते—

"अनेककार्यव्यासंगाद्यस्य नागच्छति प्रियः ।
तस्यानुगमदुःखार्ता विरहोत्कंठिता मता ॥"—ना० शा० २४·२०९

दुष्यन्तस्य नगरगमनमनु सा चतुर्थाङ्केऽतीवोत्कंठिता परिलक्ष्यते । नगरं गत्वा राजकार्येषु संलग्नो दुष्यन्तस्तामानेतुं न आगच्छति, अतः स्वकार्यमपि सा विस्मरति । तदैव दुर्वासा ऋषिरागच्छति, तां बोधयति अन्ते क्रोधेन शकुन्तलां शप्त्वा निर्गच्छति, किन्तु शकुन्तला इदं सर्वं न जानाति । सा तु कुटी—समक्षं पति-चिन्तने चित्रलिखितेव तिष्ठति । प्रियंवदायाः शब्देषु—

"अनसूये पश्य तावत् । वामहस्तोपहितवदनाऽलिखितेव प्रियसखी । भर्तृगतया चिन्तयाऽऽत्मानमपि नैषा विभावयति किं पुनरागन्तुकम् ।" (चतुर्थाङ्के)

पञ्चमाङ्के दुष्यन्तेन अवमानिता तिरस्कृता च शकुन्तला मारीचर्षेराश्रमे प्रोषितभर्तृकाया जीवनं व्यतियाति । भरतानुसारं—

"गुरुकार्यान्तरवशाद्यस्या विप्रोषितः प्रियः ।
सारूढालकके शान्ता भवेत्प्रोषितभर्तृका ॥" ना० शा० २४·२११

सप्तमाङ्के राजा दुष्यन्तस्तस्याः परिवेषस्य वर्णनं करोति—"अयेसेयमत्रभवती शकुन्तला । यैषा— वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति ॥" ७·२१

मारीचाश्रमे पुनर्मिलनावसरे सा पुनः स्वाधीनभर्तृकानायिकारूपेण सामाजिकानानन्दयति ।

(५) शीलम्—ललितोदात्तादिषु शीलस्य चतुर्षु गुणेषु शकुन्तला दिव्यत्वात् नृपपत्नीत्वाच्च उपयुंक्त-चतुर्षु गणेष्वेवान्तर्भवति । नाट्यशास्त्रानुसारं दिव्या नृपपत्नी चोपयुंक्तचतुर्षु गुणेषु समायुक्ता भवतः "धीरा च ललिता च स्याद् उदात्ता निभृता तथा ।
दिव्यानां जातयस्त्वेतैर्गुणैर्युक्ता भवन्ति हि ॥" – ना० शा० ३४·२४

(६) अङ्गरचना अन्तःप्रकृतिश्च—दिव्यसत्त्वाद्येकविंशतिभेदेषु शकुन्तला गान्धर्वकोटिं समलंकरोति । गान्धर्वशीला नारी नाट्यशास्त्रानुसारं—

"अनेकारामभोग्या च नखदन्तैः सुपुष्पितैः । स्मिताभिभाषिणी तन्वी मन्दचारा रतिप्रिया ॥
गीते वाद्ये न नृत्ते च नित्यं हृष्टा मृजावती । गान्धर्वशीला विज्ञेया स्निग्धत्वक्केशलोचना ॥"
—ना० शा० २४·१००–१०१

परिभाषानुसारं सा पुष्पितोपवनेषु प्रसन्ना भवति। स्वोपवने सा स्वहस्तेभ्यो सिंचति। पुष्पोद्गमे सा महोत्सवमपि समायोजयति। महर्षिकण्वस्तां प्रशंसन् कथयति—

"भो भोः संनिहितास्तपोवनतरवः !
पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥—४'९

सा स्मिताभिभाषिण्यपि विद्यते। स्वसख्यौ प्रति सा प्रेमपूर्वकं व्यवहरति। स्वमधुरवाण्या सा सर्वान् तोषयति।

शकुन्तला सुकुमारी विद्यते। प्रथमाङ्क एव राजा तां प्रति कथयति—

"कथमियं सा कण्वदुहिता ? असाधुदर्शी खलु तत्रभवान् काश्यपः, य इमामाश्रमधर्मे नियुङ्क्ते।
इदं किलाव्याजमनोहरं वपुः, तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया, शमीलतां छेत्तुमृषिर्व्यवस्यति॥" १'१७

अस्मिन् श्लोके तस्याः सौकुमार्यं सुस्पष्टं विद्यते।

शकुन्तला गीत-नृत्तादिष्वपि प्रवीणा विद्यते। प्रथमाङ्के वृक्षसेचनसमये तस्याः नृत्तकलायास्तृतीयाङ्के च गीतनैपुण्यस्य परिचयः प्राप्यते।

सा नित्यमेव प्रसन्ना निर्मला च विद्यते। स्वसखीभ्यां सह हासपरिहासमपि सा करोति।

स्निग्धत्वक्केशलोचनापि सास्ति। तस्या रूपसौन्दर्यं वर्णयन् राजा दुष्यन्तो वदति—"प्रियमपि तथ्यमाह शकुन्तलां प्रियंवदा। अस्याः खलु—

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम्॥ १'१९

इत्थं सा गान्धर्वशीला नायिका विद्यते।

(७) अन्याधाराः—आचार्यभरतो नायिकानां कामदशां वर्णयन् नायिकानां त्रीन् भेदानपि निरूपयति। तथा हि—वेश्या, कुलजा, प्रेष्या च। उपर्युक्ताष्टासु कामदशासु एतासामेव नायिकानां प्रयोगः कर्तव्य इति भरतमतम्—

"वेश्यायाः कुलजायाश्च प्रेष्यायाश्च प्रयोक्तृभिः।
एभिर्भावविशेषैस्तु कर्तव्यमभिसारणम्॥"

—ना० शा० २२'२२६

उपर्युक्ताधारेषु शकुन्तला कुलजाकोटिकी नायिका विद्यते।

मुद्राराक्षसनाटके राजनीतिर्जातिविचारश्च

□

डॉ० वनेश्वरपाठकः *

□

कविविशाखदत्तकृतं मुद्राराक्षसनाम नाटकं राजनीतिकघातोपघातोपेतं जातिविचारोपहितं चेति प्रायोवादः। अस्मिन् नाटके चन्द्रगुप्त-मलयकेतु-राक्षसेतिपात्रत्रयं विजयीकृत्य राजनीतेः कूटनीतेश्च सञ्चालकश्चाणक्यः कठोरसिद्धान्तवादी विशुद्धपरिणामदर्शी च। कुटिलमतिः स सामादिनीतीनां प्रयोगे कुत्रापि नाशङ्कते, न वा दयाभावं दर्शयति। स केवलं सिद्धिं पश्यति साधनानि यथाविधानि स्युस्तत्र तस्य न कोऽप्याग्रहः।

राजनीतौ कूटनीतौ च बुद्धेर्महान् योगोऽपेक्षितः। राजनीतिज्ञः स्वविश्वासपात्रेषु मित्रेषु वशवर्त्तिष्वनुचरेषु च तथा नातिष्ठते यथा स स्वप्रखरबुद्धावास्थावान् दृश्यते। चाणक्यस्यापि तथैवास्था स्वस्यामघटितघटनाघटने पटीयस्यां बुद्धौ—

'एका केवलमर्थसाधनविधौ सेनाशतेभ्योऽधिका,
नन्दोन्मूलनदृष्टवीर्यमहिमा बुद्धिस्तु मागान्मम।' मुद्रा० १।२६)

लोकोत्तरराजनीतिज्ञः स पूर्वमेव लक्ष्यं निर्धार्य उचिते काले उचितेषु कर्तव्यस्थानेषु नीतिप्रयोगं कुरुते येन तस्याव्याहता अर्थसिद्धिर्जायते। एवंविधो नीतिप्रयोगोऽर्थसिद्धेर्मूलम्। यथाह महाकविर्भारविर्नीतिप्रयोगे सिद्धहस्तस्य राज्ञो दुर्योधनस्य सम्बन्धे—

"अनारतं तेन पदेषु लम्भिता विभज्य सम्यग् विनियोगसत्क्रियाः।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसम्पदः।" (किराता० १।१५)

कार्यसिद्धावुत्साहस्य दक्षतायाश्च महदपेक्षितत्त्वं विद्यते। यथाहापरत्र भारविः—

"प्रभवः खलु कोषदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः।
स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते।" (किराता० २।१२)

सहायसाधनोपाय-देशविभाग-कालविभाग-विपत्तिप्रतीकारेतिपञ्चांगोपेतस्य नयस्य सम्यग् ज्ञाता प्रयोक्ता च चाणक्य उत्साहस्य दक्षतायाश्च मूर्तिमान् विग्रह इव विराजते। फलतो राजनीतिनिपुणोऽपि राक्षसः कूटनीतिकुशलस्य चाणक्यस्य हस्तक्रीडनकमिवाभाति।

चाणक्यः प्रतिहिंसायाः प्रतिशोधस्य च महान् अवतारः। स शत्रूणामपराधान् क्षणमपि न सहते। प्रतिपक्षिणां नाम श्रुत्वैव तस्य मनः क्रोधाकुलितं भवति। किन्तु स शत्रूणां निन्दामात्रेण

---

* संस्कृतविभागाध्यक्षः—सेंटजेवियर्स कालेज, राँची (बिहार)।

कालक्षयं कार्यहानिम्, आत्मनः शक्तेर्ह्रासञ्च न चिकीर्षति । आधुनिकराजनीतिज्ञेष्वपि प्रतिहिंसायाः प्रतिशोधस्य च बलवती भावना दरीदृश्यते; किन्तु तेषु यथा लोकहितचिन्तामुपेक्ष्य केवला परस्पर-निन्दाकारिणी प्रवृत्तिर्मुख्यायमाना विलोक्यते तथा कार्यसिद्धौ निरते नीतिनिपुणे चाणक्ये नासीत् । राजनीतिकप्रतिशोधस्य क्षेत्रे भारतन्तु किञ्चिच्छ्लाघनीयं वर्त्तते पार्श्ववर्त्तिषु ईरान-पाकस्थानप्रभृतिषु देशेषु प्रतिशोधस्य या रोमाञ्चकारिणी हिंसात्मिका लीलाऽवलोक्यते सा मानवताया इतिहासे एकः कुत्सितोऽध्यायः । चाणक्यः स्वशत्रून् प्रति अत्यन्तामुग्रतां कठोरताञ्च वर्त्तयन्नपि राक्षसस्य गुणानां प्रशंसक आसीत् । गुणग्राही स अनुपमस्वामिभक्तस्य सुदक्षस्य साहसिनश्च राक्षसस्य गुणान् हृदये-नाभिलषति स्म[1] । अत एव स राक्षसस्य संग्रहे यत्नवानासीत्—"अत एव अस्माकं त्वत्संग्रहे यत्नः ।" (मुद्रा० १।१४ तः परम्) ईर्ष्यया प्रज्वलन् राक्षसोऽपि चाणक्यं हृदयेन प्रशंसति स्म—

"आकरः सर्वशास्त्राणां रत्नानामिव सागरः ।
गुणैर्न परितुष्यामो यस्य मत्सरिणो वयम् ॥" (मुद्रा० ७।७)

कूटनीतौ, कार्यसिद्धयर्थं, शत्रोरपि प्रशंसनं श्रेयसे सम्पद्यते । गुणग्राहिणी राजनीतिरेव फलेन शोभते ।

चाणक्यः बलप्रयोगापेक्षया हृदयपरिवर्त्तनमेवाधिकं श्रेयस्करं मन्यते । अतएव स राक्षसस्य बुद्धि-बल-शक्तिं स्वामिभक्तिञ्च स्वीकुर्वन् स्वप्रज्ञाबलेन तं वशीकर्तुमिच्छति न तु रक्तपाताय चेष्टते । तस्य प्रज्ञाप्रज्वलिताया राजनीतेः सकलः कार्यकलापश्चन्द्रगुप्तस्य सर्वा विरोधिनीः शक्ती राजभक्ते राष्ट्रियताया वा एकसूत्रे बद्ध्वा समस्ते भारते एकच्छत्रसाम्राज्यस्थापनायैव प्रवर्त्तते । एतादृशराज-नीतिकप्रवृत्तौ तस्य सर्जनात्मिकायाः शक्त्या विकासो जायते, यया शक्त्या स विलासिनीं नन्दशक्ति-मुन्मूलयति तथा समस्तं भारतं वर्षं राष्ट्रिताया एकस्मिन् सुदृढे सूत्रे आबध्नाति । राष्ट्रकल्याणाय सर्वात्मना समर्पितस्वात्मा चाणक्यस्त्यागस्य प्रतिमूर्तिर्गीताया अनासक्तयोगीवाभाति । राजाधि-राजमन्त्रिणस्तस्य गृहविभूतिस्तु तस्य स्वार्थत्यागस्य स्वसुखनिरीहतायाश्चानुपममुदाहरणं वर्त्तते—

"उपलशकलमेतद् भेदकं गोमयानां बटुभिरुपहृतानां बर्हिषां स्तोम एषः ।
शरणमपि समिद्भिः शुष्यमाणाभिराभिर्विनमितपटलान्तं दृश्यते जीर्णकुड्यम् ॥" (मुद्रा० ३।१५)

किमेतादृशी लोकसंग्रहभावना, एतादृशः स्वार्थत्यागः, एतादृशो स्वसुखनिरीहता, एतादृशी जनमङ्गलकारिणी राष्ट्रियता कुत्रापि राजनीतिज्ञे मन्त्रिणि वा दृष्टिपथमायाति ?

---

१. ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते,
तं गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया ।
भर्तुर्ये प्रलयेऽपि पूर्वसुकृतासंगेन निःसङ्गया
भक्त्या कार्यधुरां वहन्ति कृतिनस्ते दुर्लभास्त्वादृशाः ॥ (मुद्रा० १।१४)

एतादृशभावनया भावितो लोकोत्तरराजनीतिज्ञोऽपि चाणक्यः स्वव्यक्तित्वस्य स्वब्राह्मणत्वस्य च उच्चभावनायाः प्रत्याख्यानं न करोति। तस्य स्वसुखनिरीहतायामात्मविश्वासस्यात्मबलस्य च सुमहान् सन्निवेशो दृश्यते। आत्मविश्वासी निरीहश्च स राजानं तृणमिव तिरस्कारस्य विजयं मनुते—"निरीहाणामीशस्तृणमिव तिरस्कारविषयः।" (मुद्रा० ३।१६)

एतादृशो निरीहस्तथा महता आत्मविश्वासेन आत्मबलेन च संबलित एव राजनीतिनिपुणो जनः राष्ट्रस्य निर्माता तथा तस्य सत्यो हितचिन्तको भवति। चाणक्यो राष्ट्रस्य निर्माताऽस्ति किन्तु तस्य भोक्ता न। अर्थशास्त्रस्य प्राचीनकथापरम्परायाश्च चाणक्यो भवेन्नु महत्त्वाकाङ्क्षी, महाक्रोधी, महाकूटनीतिज्ञो ब्राह्मणः, किन्तु मुद्राराक्षसस्य चाणक्यः स्वसुखनिरभिलाषः, स्वार्थत्यागस्य मूर्तिः, लोकसंग्रहभावनाभावितो ब्राह्मणत्वस्यानुपमादर्शोऽस्ति।

ब्राह्मणत्वस्य प्रबलपोषकोऽपि स राजनीतौ जातिवादाय स्थानं न दत्ते। स जातेः पूजको नासीत्, शक्तेः पूजक आसीद्। तस्य नये शक्तिरेव पूज्या जातिर्या का वा भवेत्।

संस्कृतसाहित्ये सामाजिकताप्रधानेषु नाटकेषु भासकृतचारुदत्तस्य प्रथमा गणना। तत्र ब्राह्मणो जात्यैव पूज्यो वर्त्तते—"पूजनीयो मे ब्राह्मणजनः" (द्वितीयेऽङ्के वसन्तसेनाया उक्तिः। मृच्छकटिकेऽपि द्वितीयेऽङ्के वसन्तसेनायाः सैवोक्तिः। दशमेऽङ्केऽपि मृच्छकटिकस्य ब्राह्मणो जात्या अग्रगण्योऽस्ति। विदूषको धूतां प्रति कथयति--"समीहितसिद्धये ब्राह्मणोऽग्रतः कर्तव्यः।" किन्तु मुद्राराक्षसे चाणक्यो ब्राह्मणं जात्या पूज्यं न मन्यते, स शक्त्यैव तं पूज्यं मनुते। अत एव स राजनीतौ शासने युद्धे च प्रथितयशसं ब्राह्मणममात्यराक्षसमभिवादयते—"भो अमात्यराक्षस! विष्णुगुप्तोऽहमभिवादये", चन्द्रगुप्तेन च तमभिवादयति--"अयममात्यराक्षसः प्राप्तः। प्रणमैनम्" (मुद्रा० अङ्कः ७)।

प्राचीनकाले समाजो ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेति चतुर्षु वर्गेषु विभक्त आसीत्। एतदतिरिक्तं चाण्डालाः पञ्चमे वर्गे परिगणिता आसन्। उच्चवर्गीया अस्य वर्गस्य स्पर्शमपि वर्जनीयं मन्यन्ते स्म—"विष्णुगुप्त! न मां चाण्डालस्पर्शदूषितं स्प्रष्टुमर्हसि" (मुद्रा० ७।८ तः परम्)। यद्यपि प्राचीनकाले सर्वे स्व-स्वजात्यनुसारं स्व-स्वकर्मण्यभिरता आसन्, किन्तु संस्कृतनाटकेषु एतद् बन्धनं शिथिलमिवाभाति। चारुदत्ते मृच्छकटिके च ब्राह्मणश्चारुदत्तो जीविकार्थं वैश्यकर्म वाणिज्यं कुरुते, ब्राह्मणः शर्विलकश्चौर्यं करोति, क्षत्रियः सजलकः संवाहकः संवृत्तः। तथापि दान-भोजनादौ ब्राह्मणानामेव समादर आसीत्। मुद्राराक्षसेऽपि दान-भोजनादौ ब्राह्मणानामेव समादरो दृश्यते—"आमन्त्रिता मया भगवन्तो ब्राह्मणाः।.......तत् प्रवर्त्यतां भगवतो ब्राह्मणानुद्दिश्य पाकः" (प्रथमाङ्कस्यारम्भे)। किन्तु चाणक्यो गुणवन्तं ब्राह्मणमेव श्रद्दधाति। अत एव स पर्वतेश्वरेण धारितपूर्वाण्याभरणानि ब्राह्मणेभ्यः प्रतिपादयितुमुद्यतस्य सम्राजश्चन्द्रगुप्तस्येच्छां निरुध्य ब्रूते—"गुणवन्ति भूषणानि गुणवद्भ्य एव प्रतिपादनीयानि। तदहं स्वयमेव परीक्षितगुणान् ब्राह्मणान्

प्रेष्यामि" (मुद्रा० प्रथमोऽङ्कः)। गुणग्राही चाणक्यः स्वामिभक्तं राजनीतिज्ञं शूरं ब्राह्मणं राक्षसं संगृह्णाति, चन्द्रगुप्तस्य साचिव्यञ्च कारयति—"अत एवास्माकं त्वत्संग्रहे यत्नः, कथमसौ वृषलस्य साचिव्यग्रहणेन सानुग्रहः स्यादिति" (मुद्रा० प्रथमोऽङ्कः)।

विद्वान् ब्राह्मणश्चाणक्यः सम्यग् जानाति यद् ब्राह्मणो मत्यैव शासनं कर्तुं शक्नोति न तु खड्गेन। राष्ट्रहिताय साचिव्यपदमेव योग्यं न तु राजसिंहासनारोहः। अत एव राष्ट्रनिर्माताऽपि स स्वयं चन्द्रगुप्तस्य साचिव्यं करोति ब्राह्मणेन राक्षसेनापि तस्य साचिव्यमेव कारयति। शक्तेः समादर्ता स प्रचलितप्राचीनपरम्परायाः परमो विरोधी। अत एव स विलासिनीं नन्दशक्तिमुन्मूल्य क्षत्रियस्य राज्ञः स्थाने शक्तिसम्पन्नं वृषलं चन्द्रगुप्तं स्थापयति। नन्दवंशविनाशाय स वृषलं चन्द्रगुप्तमेव साधनत्वेनाङ्गीकरोति। चन्दनदासस्य मित्रवात्सल्येन गुणेन प्रीतः स श्रेष्ठिनं चन्दनदासं पृथिव्यां सर्वनगरश्रेष्ठिपदमारोपयति। अत्रापि गुणस्यैवादरो न तु जातेः।

मुद्राराक्षसे ब्राह्मण-क्षत्रिय-वृषल (शूद्र)-कायस्थेतिजातिभाजः पात्रविशेषा विशेषतो विचारणीयाः सन्ति। गुणवन्तौ शक्तिसम्पन्नौ च ब्राह्मणौ चाणक्यो राक्षसश्च शासने सम्मानस्य महतीं भूमिमारोपितौ स्तः। चाणक्यश्चक्रवर्तिसम्राजो निर्माता बृहत्तरभारतस्योपस्थापकश्च। तस्मिन् परिग्रहग्राहिता पदलोलुपता च न दृश्येते, अतएव स सम्राजं साम्राज्यञ्च तृणमिव तिरस्कारयोग्यं मन्यते। एतादृशो ब्राह्मण एव राष्ट्रनिर्माणं तथा राष्ट्रं राष्ट्रियैकतायाः सूत्रे आबद्धं कर्तुं समर्थः। एतादृशं ब्राह्मणमेवाभिलक्ष्य श्रीजयशंकरप्रसादेन स्वीये चन्द्रगुप्ताख्ये नाटके चाणक्यस्य विषये प्रोक्तम्—"ब्राह्मण न किसी के राज्य में रहता है, न किसी के अन्न से पलता है। वह ऋत से जीता है और अमृत पीता है।"

राष्ट्रियैकतायाः स्थापनाय राष्ट्रे समस्तविरोधिशक्तीनामेकसूत्रे आबन्धनमावश्यकम्, न तु तासां तिरस्कारो बहिष्कारो बलाद् दमनं वा। अत एव स विरोधिनं राक्षसं, यस्य चिन्तया सोऽहर्निशं जागर्ति आयासितमतिश्चास्ते—"गुरुभिः कल्पनाक्लेशैर्दीर्घजागरहेतुभिः चिरमायासिता सेना वृषलस्य मतिश्च मे" (मुद्रा० ७।८), स्वनीतिनैपुण्येन विद्यावैभवेन च वशीकृत्य आत्मनः प्रधानमन्त्रित्वं तस्मै समर्पयति। किं राष्ट्रहितकामनया एतादृशो महान् स्वार्थत्यागः कुत्रापि मन्त्रिणि प्रधानमन्त्रिणि वा दृष्टिपथमायाति ? अधुना तु सर्वे येन केनाप्युपायेन स्वं पदमेवाभिरक्षितुं दृढयत्नाः सन्ति। राष्ट्रचिन्तया कः खिद्यते ?

शक्तिहीनो गुणवतां ब्राह्मणानामवमन्ता विलासी क्षत्रियो राजा राजसिंहासनाच्च्यावयितुं योग्यः। शक्तिसम्पन्नः वृषलोऽपि तत्स्थाने स्थापयितुमर्हं इति चाणक्यस्य नीतिर्जनतन्त्रशासनस्य सर्वथाऽनुकूला।

वृषलो यद्यपि समाजस्य चतुर्थे वर्गे स्थितः। वृषं धर्मं लुनाति छिनत्तीति वृषलः (वृष + लू

(लूञ् छेदने) + 'अन्येभ्योऽपि दृश्यते' इति उः) इति व्युत्पत्त्या, "नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह" इति मनूक्त्या (४।१४०) "वृषो हि भगवान् धर्मस्तस्य यः कुरुते ह्यलम्। वृषलं तं विदुर्देवास्तस्माद् धर्मं न लोपयेत्" इति मनूक्त्या (८।१६) च वृषलः अपशूद्रः अधार्मिकः। किन्तु सोऽपि शक्तौ क्षत्रियमतिशय्य वर्त्तते चेद् राजसिंहासनस्याधिकारीति चाणक्यस्य नीतिः श्लाघनीया। अधुनापि भारतीयशासने एतादृशी सर्वसमन्वयकारिणी उदारा नीतिरनुस्रियते।

बुद्धिजीवी कायस्थः मुख्यतया लिपिकवृत्तिं विदधाति स्म। कायेषु सर्वभूतशरीरेषु अन्तर्यामितया, काये ब्रह्मकाये वा तिष्ठतीति कायस्थः (काय + स्था + क) इति व्युत्पत्त्या, "क्षणं ध्यानस्थितस्यास्य सर्वकायाद् विनिर्गतः। दिव्यरूपः पुमान् हस्ते मसीपात्रं च लेखनी। चित्रगुप्त इति ख्यातो धर्मराजसमीपतः। प्राणिनां सदसत्कर्मलेखाय स निरूपितः। ब्रह्मणातीन्द्रियज्ञानी देवाग्न्योर्यज्ञभुक् स वै। भोजनाच्च सदा तस्मादाहुतिर्दीयते द्विजैः। ब्राह्मकायोद्भवो यस्मात् कायस्थो वर्ण उच्यते। नानागोत्राश्च तद्वंश्याः कायस्था भुवि सन्ति वै"॥ इति पद्मपुराणोक्त्या (सृष्टिखण्डे) च कायस्थः जातिविशेषः, कूटकृत्, पञ्जीकरणः, करणः, पञ्जिकारकः। संस्कृतनाटकेषु कायस्थः न्यायाधिकरणे सम्भवतः प्रस्तुतिकार (पेशकार इति भाषायाम्)—पदे नियुक्तः कूटकर्मकृत् पुरुषः। कायस्थस्य कूटकर्मणः सर्वे बिभ्यति स्म। अधिकरणे कुटिलसर्पस्येव कायस्थस्य स्थानमासीत्—

"चिन्तासक्तनिमग्नमन्त्रिसलिलं दूतोर्मिशंखाकुलं
पर्यन्तस्थितचारनक्रमकरं नागाश्वहिंस्राश्रयम्।
नानावाशककङ्कपक्षिरुचिरं कायस्थसर्पास्पदं
नीतिक्षुण्णतटञ्च राजकरणं हिंस्रैः समुद्रायते।" (मृच्छ. अ० ९)

भारतीयसमाजे बुद्धिजीविन्यौ द्वे जाती—ब्राह्मणः कायस्थश्च। प्राचीनकाले ब्राह्मणस्येव कायस्थस्यापि समाजे सम्माननीयं स्थानमासीदित्युपर्युक्तपद्मपुराणोक्त्या स्पष्टं प्रतिभाति। कालान्तरे बुद्धिजीविन्योरनयोर्जात्योः परस्परं संघर्षः समजनि। न्यायाधिकरणेषु नियुक्तेषु कायस्थेषु राजनीतिकं कौटिल्यञ्च समायातम्। उपर्युद्धृता मुद्राराक्षसस्य पंक्तिः 'कायस्थसर्पास्पदा' एतस्य परिचायिका। फलतः समाजे तेषां तद् सम्माननीयं स्थानं विनष्टम्। अत एव मुद्राराक्षसे कुटिलमतिश्चाणक्यः कूटकृतं कायस्थं शकटदासमुद्दिश्य कथयति—"कायस्थ इति लघ्वी मात्रा" (A Kayastha is a small matter) अर्थात् कायस्थः किमप्यस्मदनिष्टं कर्तुं न समर्थः। (मुद्रा० प्रथमोऽङ्कः)

यद्यपि कायस्थः ब्राह्मण इव बुद्धिजीवी आसीत्, किन्तु न्यायाधिकरणे अन्यस्मिन् राजकर्मणि वा नियुक्तः स वेतनभोगी आसीत्। तस्मिन् समाजे सम्मानं नासीत्। कुटिलमतिके

तस्मिन् ब्राह्मणचाणक्य इवात्मबलमात्मविश्वास आत्मशक्तिश्च नासीत् । अत एव सेवां श्ववृत्ति[1] मन्यमान्यस्य चाणक्यस्य दृष्टौ कायस्थः लघ्वी मात्रा (शक्तिहीनः) आसीत्, तथा च स शक्तिपूजकस्य चाणक्यस्य श्रद्धायाः पात्रं नासीत् ।

सारांशोऽयं यत् समस्तं मुद्राराक्षसनाटकमालोचयद्भिरस्माभिरेतद् विनिश्चेतुं शक्यते यत् मुद्राराक्षसे राजनीतिको जातिविचारोऽधुनातनसंकीर्णजातिवाद इव कटुतामापन्नो न वर्त्तते । राजनीतौ शासने च ब्राह्मणो जात्या न अपि तु शक्त्या सम्माननीयः । त्यागी, ज्ञानधनी, सत्त्वसम्पन्नः, सोत्साहो ब्राह्मण एव राष्ट्रं निर्मातुं राष्ट्रे राष्ट्रियैकतां सम्पादयितुं सफलसाचिव्यञ्च कर्तुं क्षमः । शक्तिहीनः क्षत्रियो राजा शासनस्याधिकारी न, अपि तु शक्तिसम्पन्नो वृषलोऽपि राष्ट्रस्य शासनं विस्तारं प्रतिरक्षां च कर्तुं क्षमः । बुद्धिवैभवसम्पन्नोऽपि अल्पप्राणो जनः शासनं कर्तुमक्षमः । अतः राजनीतौ शासने च शक्तिरेव पूज्या, गुणा एव ग्राह्याः, न तु जातिः । राष्ट्रश्रीः शक्तिवश्या गुणगृह्या च भवति । इयमेव नीतिरखण्डराष्ट्रियताया राष्ट्रियशक्तिसम्पदश्च मूलमित्यलम् ।

१—'सेवा लाघवकारिणी कृतधियः स्थाने श्ववृत्तिं विदुः ।' (मुद्रा० ३।१४ कञ्चुकिन उक्तिः)

———

वाक्यप्रदीपः

□
डॉ० शिवशंकरोऽवस्थी *
□

भूतिराजतनयेन श्रीमता हेलाराजेन महावैयाकरणेन वाक्यप्रदीपस्य काण्डत्रये स्वकीयं व्याख्यानं विहितमासीदिति निश्चप्रचम्। तृतीयकाण्डस्य प्रारम्भेऽसौ कथयति—

काण्डद्वये यथावृत्ति सिद्धान्तार्थसतत्त्वतः। प्रबन्धो विहितोऽस्माभिरागमार्थानुसारिभिः॥ २॥

तच्छेषभूते काण्डेऽस्मिन् सप्रपञ्चे स्वरूपतः। श्लोकार्थद्योतनपरः प्रकाशोऽयं विधीयते॥ ३॥

भगवद्भर्तृहरिविरचितवृत्त्यनुसारं काण्डद्वयं व्याख्याय स्वरूपतः विस्तृतेऽस्मिन् प[१]दकाण्डे तृतीये श्लोकार्थप्रकाशिका प्रकाशाख्या टीका मया क्रियत इति। तत्र प्रथमकाण्डस्य टीकाया अभिधा 'शब्दप्रभा' इत्यासीत्। द्वितीयकाण्डस्य 'वाक्यप्रदीप' इति, तृतीयकाण्डस्य 'पदप्रकाश' इति प्रकीर्णकप्रकाश इति वा। शब्दप्रभेति प्रकीर्णप्रकाश इति प्रथिते नामनी। वाक्यप्रदीपं न कोऽपि जानातीति तदर्थमयमारम्भः। वाक्यप्रदीपे काण्डत्रयं वर्तते शब्दकाण्डं (ब्रह्मकाण्डं), वाक्यकाण्डं, पदकाण्डं चेति।

यत्तु गणरत्नमहोदधिकृता वर्धमानसूरिणोक्तम् —"भर्तृहरिर्वाक्यप्रदीपप्रकीर्णयोः कर्ता महाभाष्यत्रिपाद्या व्याख्याता च इति तत्समये तथाप्रचारस्य बाहुल्यात् तथोक्तिरिति ध्येयम्। वस्तुतस्तु वाक्यप्रदीयं काण्डत्रयात्मकमेवेति वर्धमानसूरिपूर्ववर्तिना हेलाराजेन तथोक्तत्वात्। तथाहि—

त्रैलोक्यगामिनी येन त्रिकाण्डी त्रिपदी कृता। तस्मै समस्तविद्याश्रीकान्ताय हरये नमः॥ (पदकाण्डान्ते)

तत्रभवान् भर्तृहरिरप्याह—

"वर्त्मनामत्र केषाञ्चिद्वस्तुमात्रमुदाहृतम्। काण्डे तृतीये न्यक्षेण[२] भविष्यति विचारणा॥"

(वाक्यकाण्डान्ते)

---

* उपाचार्यः—संस्कृतविभागे गोरखपुर विश्वविद्यालयस्य।

१. पदकाण्डेऽपि भगवद्भर्तृहरिकृता वृत्तिरासीदिति द्वितीयकाण्डस्यप्रस्तुतकृतितो ज्ञायते — "कालस्यैव चोपाधिविशिष्टस्य परिमाणत्वात् कुतोऽस्यापरं परिमाणमित्येतत्कालसमुद्देशे व्याख्यास्यते।"। काण्ड २ कारिका २४

२. प्रथमकाण्डस्य तृतीयकारिकाया वृत्तौ भगवान् भर्तृहरिः 'न्यक्षेण' इति शब्दं प्रयुङ्क्ते—"जातिसमुद्देशे तु सत्ताविभागे न्यक्षेण भावविकारा वक्ष्यन्ते।" अत्र श्रीवृषभाचार्यः "न्यक्षेण इति। आभिमुख्येन कार्त्स्न्येन वा।"—पद्धतौ।

पुण्यराजाचार्योऽप्येतद्व्याख्याने—"अत्रास्मिन् वाक्यकाण्डे काण्डद्वये वा केषाञ्चिदेव न्यायवर्त्मनां वस्तुमात्रं बीजमात्रं प्रदर्शितमिव । शिष्टे तु तृतीयेऽस्य ग्रन्थस्य पदकाण्डे काण्डद्वयनिष्यन्दभूते न्यक्षेणादरविशेषेण स्वसिद्धान्तापरसिद्धान्तवर्तिनां विचारणा युक्तायुक्तविचारपूर्वकनिर्णीतिर्भविष्यति । ततो नायमेतावान् व्याकरणागमसंग्रह इति ॥" इत्यवोचत् ।

तत्र प्रथमकाण्डे श्रीमता हेलाराजेन शब्दप्रभाख्या टीका रचितेत्यत्र प्रमाणबाहुल्यम् । यथा—

"क्रमाख्या हि कालशक्तिः ब्राह्मणो जन्मवत्सु पदार्थेषु जन्मादिक्रियाद्वारकमेव पौर्वापर्येणाभासोपगमविधायिनी नापरो द्रव्यभूतः काल इति—अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः । जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥ इत्यत्र शब्दप्रभायां निर्णीतोऽयमर्थः ।"—(जातिसमुद्देशस्य ३७ तमकारिकायाम्)

"विस्तरेणागमप्रामाण्यं वाक्यपदीयेऽस्माभिः प्रथमकाण्डे शब्दप्रभायां निर्णीतमिति तत एवावधार्यम् ।"

द्रव्यसमुद्देशस्य पञ्चदशतमकारिकाया हेलाराजीये व्याख्याने लिखितमिदं वर्तते "विशेषश्चानयोः वाक्यप्रदीपेऽस्माभिर्व्याख्यात इति तत एवावधार्यम् ।" अत्रत्यः 'वाक्यप्रदीप' इति पाठे, ए. बी. एल. इत्याख्ये पुस्तकत्रये विद्यत इति अय्यरमहाभागैः स्वसम्पादिते वाक्यपदीय-तृतीयकाण्डे पादटिप्पणीषु सङ्केतितम् । किञ्च मूले 'वाक्यप्रदीप' इत्यस्य स्थाने 'वाक्यपदीये' इत्येव पाठस्तैः स्वीकृतः । सोऽयमसङ्गतः पाठः । वाक्यपदीयं तु न हेलाराजीयं व्याख्यानमपि तु वाक्यप्रदीपाख्यैव व्याख्या तस्य । अत एवास्माभिरिति कथनं सङ्गच्छते । एषा व्याख्या वाक्यकाण्डस्यैव भवितुमर्हति । किञ्च यत्र यत्रास्माभिरिति शब्दस्य प्रयोगस्तत्र तत्र सर्वत्र 'वाक्यपदीय' इत्यस्य स्थाने वाक्यप्रदीप इति पाठः सुवचः । यथा—"तथा ह्युक्तं वाक्यपदीयेऽस्माभिः ।"—कालसमु०, ६२ कारिकायाम् "एतच्च वाक्यपदीये विस्तरेणास्माभिर्निर्णीतम् ।"—कालसमु० ७० कारिकायाम् । नहि वाक्यपदीयं हेलाराजकृतिरत उपर्युक्तोदाहरणद्वये वाक्यप्रदीप इत्येव पाठः सुसङ्गतः । लिपिकरप्रमादाद्वाक्यपदीय इति पाठः प्रचलित इत्यनुसंदध्महे ।

हेलाराजः सर्वत्र स्वकीयरचनास्वेवास्माभिर्निर्णीतं, प्रपञ्चितमित्यादिशब्दान् प्रयुनक्ति । तथाहि—"अत एव सैव प्राधान्याद्वाक्यार्थो वैयाकरणानामिति क्रियाविवेकेऽस्माभिः प्रपञ्चितं तत एवावधार्यम् ।" (क्रियासमुद्देशे ४० तमकारिकायाम्) "सिद्धान्तस्तु यथाभाष्यं गुणावस्थारूपं लिङ्गमित्यस्माभिर्वार्त्तिकोन्मेषे यथागमं व्याख्यातं तत एवावधार्यम् ।" (लिङ्गसमुद्देशे ३१ तमका-

---

ए.—बनारससंस्कृतपुस्तकमालायां प्रकाशितम् ।

बी.—अड्यारपुस्तकालयस्य हस्तलिखितं पुस्तकम् । सं०—५५४.

एल.—ट्रावङ्कोरविश्वविद्यालयहस्तलिखित-पुस्तकालयस्य पुस्तकम् । सं०—२४१.

रिकायाम्) वे.दल.मत्र "कारणान्तरव्युदासद्द्वाद्वयसिद्धावभिहित इति सत्यर्थित्वे तत(वावगन्तव्यः ।" —अस्मशब्दप्रयोगो नास्ति । किन्तु 'अभिहित' इत्यस्य स्थाने 'विवृत' इति पाठान्तरदर्शनादनुमातुं शक्यते यदद्वयसिद्धिस्तस्यैव कृतिरिति ।

वाक्यपदीयशब्दस्य प्रयोगं तु हेलाराजः प्रथमस्य ब्रह्मकाण्स्य विशेशरूपेणैव करोति । यथा— "अक्रमा हि पश्यन्तीरूपा संवित् प्राणवृत्तिमुपारूढा कालात्मना परिगृहीतक्रमेव चकास्ति इति कृतनिर्णयं वाक्यपदीये शब्दप्रभायामस्माभिस्तत एवावगमनीयम् ।"—(कालसमु० ६२ तम का०) येषु सन्दर्भेषु एकल एव प्रयोगः वाक्यपदीयशब्दस्य हेलाराजः करोति तत्र वाक्यपदीयशब्दस्य स्थाने 'वाक्यप्रदीप' एव पठनीयः । यथात्र—"तेन चोद्बोधितशब्दभावनः प्रवर्तत इति निर्णीतं वाक्यपदीये ।" —सम्बन्धसमु० ३२ तमकारिकायाम्

इह 'वाक्यपदीय' इत्यस्य स्थाने वाक्यप्रदीप इति पाठाद् ज्ञायते यद् वाक्यकाण्डस्य टीकायां वाक्यप्रदीपाख्यायां 'अनागमश्च सोभ्यासः समयः कैश्चिदिष्यते । अनन्तरमिदं कार्यमस्मादित्युपदर्शनम् ॥ (११८ । वाक्यकाण्डे)—इति कारिकाव्याख्यानसन्दर्भे हेलाराजेन विषय एषः वितत्य संदब्धः । इह सम्बन्धसमुद्देशे तु – "अनादिशब्दभावनानुविद्धं हि तिरश्चामपि ज्ञानम् ।" "श्रोतापि स्ववासनाविकासानुसारेण प्रतिपद्यते समाविष्टशब्दभावनः । तेन चोद्बोधितशब्दभावनः प्रवर्तत इति निर्णीतं वाक्यप्रदीपे ।" वाक्यकाण्डस्योक्तकारिकाव्याख्याने पुण्यराज आह—"स चाभ्यासोऽनागमः इदानीन्तनो न भवति । नहि बालस्य तदैवोपदिष्टं केनचिदिति जन्मान्तरभावो एव स च सम इष्यते । संकेतस्वरूपोऽसाविष्यत इति स्वरूपमेवास्य स्फुटयितुमाह 'अनन्तरमिदमित्यादि । यथाय कशाभिघातमात्रसमनन्तरमेव वाजिनोऽतियान्ति, अङ्कुशाभिघातेन च राजा, एवमन्येऽपि यथास्वं प्राणिनोऽनादिवासनाभ्यासवशेन प्रतिभातः समुचितव्यवहारं कुर्वन्तो लोकयात्रां निर्वाहयन्तीति स्थितम् ।"

अपि च कालसमुद्देशस्य सप्ततितमकारिकाव्याख्याने हेलाराज आह—"एतच्च वाक्यपदीये विस्तरेणास्माभिर्निर्णीतम् ।" अत्रापि वाक्यपदीयस्य स्थाने वाक्यप्रदीप इति भवितुं युक्तः । द्वितीयकाण्डस्य २०,२३,२४ तमकारिकाव्याख्यायां वाक्यप्रदीपाख्यायामेष विषयः विस्तरेणोक्तो भवेत्। कालसमुद्देशस्य १०५ तमकारिकाव्याख्यानेऽपि हेलाराजः कथयति—"पुरुषधर्मेष्वपि हि शास्त्रमधिकृतमिति विचारितं वाक्यपदीये ।"

एष विषयः ब्रह्मकाण्डे न कुत्रापि विचारितः । वाक्यकाण्डस्य वाक्यप्रदीपटीकायां विचारित इति मन्ये । अतः उक्तोदाहरणे 'वाक्यपदीये' इत्यस्य स्थावे वाक्यप्रदीप इत्युचितम् । हेलाराजोऽसकृदुदाहरणेषु ब्रह्मकाण्डं वाक्यकाण्डं च नामग्राहं जग्राह । यथा—

१. "तदेवं यदुक्तं वाक्यकाण्डे—

'यश्च जातिसमुद्देशे प्रतिनिधिं प्रति अपरो दर्शनभेदः ।' —जातिसमु० पञ्चमकारि०

इदं यश्चेत्युदाहरणं वाक्यकाण्डस्थाया भर्तृहरेर्भगवतो वृत्तेरुपगृहीतमिति प्रतिभाति।

२. "अवेदलपदप्रयोगो द्योतक इति निर्णीतं वाक्यकाण्डे।"— वृत्तिसमुद्देशे १९१ कारिकयाम्।

३. "तथा च विद्याविद्याप्रविभागमप्रविभागं ब्रह्मेति ब्रह्मकाण्ड उक्तम्।"—सम्बन्धस० ६२।

४. "सा च विद्यातत्त्वान्यत्वाभ्यामनिर्वाच्येति ब्रह्मकाण्डे निर्णीतम्।"——सम्बन्धस० ६८।

५. "तत्र च स्वरूपस्य वाच्यता प्रथमकाण्ड एव निर्णीता, इह तु सम्बन्धसमुद्देशेऽपि निर्णेष्यते।"— जातिस०, कारि० ६।

६. "तस्माद्धि ते शक्ती पृथक् क्रियेते इत्युपपादितं प्रथमकाण्डे।"— साधनस० ५३।

एतैरुदाहरणैरिदमवगन्तुं शक्यते यन्महावैयाकरणो हेलाराजः काण्डत्रयीं वाक्यपदीयनाम्ना जानाति स्म। तेन प्रथमकाण्डे शब्दप्रभा, द्वितीयकाण्डे वाक्यप्रदीपः, तृतीयकाण्डे पदप्रकाश इति नामत्रय्या टीकां निर्मिमाय। भ्रमवशादेव लिपिकरैस्तत्र तत्र वाक्यप्रदीपस्य स्थाने वाक्यपदीयेति पदं स्थापितमिति सुधियो विभावयन्तु॥

निवेदना

सहृदयाः पाठका ग्राहकाश्चापि निवेद्यन्ते यदपरिहार्यकारणेनैतत्पत्रिकायाश्चतुर्थवर्षीययोर्द्वितीयतृतीयाङ्कयोः प्रकाशने विलम्बोजातः। अतस्तावङ्कौ सम्मेल्य चतुर्थवर्षीयश्चरमोऽङ्कः प्रकाश्यतेऽयम्। पत्रिकापरिवारो ग्राहकैः पाठकैश्चापि क्षन्तव्य इति।

—व्यवस्थापकस्य

काव्येषु नाटकं रम्यम्

□

प्रो० श्रीरञ्जनसूरिदेवः *

□

'काव्येषु नाटकं रम्यम्'— सूक्तिरियं महाकवेः कालिदासस्य प्रसिद्धतरमभिज्ञानशाकुन्तलनाटकं लक्ष्यीकृत्य प्रचारितास्ति। पूर्णः सूक्तिश्लोकस्तु एवंविधोऽस्ति—काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला। तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥

ज्ञातव्यमिदं यद् काव्यं द्विविधं भवति— श्रव्यकाव्यं दृश्यकाव्यञ्च। श्रव्यकाव्येषु रघुवंश–कुमारसम्भव–कादम्बर्यादिप्रसिद्धग्रन्थानां काव्यानां परिगणना भवति। दृश्यकाव्यं तावन्नाटकापरपर्यायभूतम्। अतएव दृश्यश्रव्यकाव्येषु श्रव्यकाव्यभूतस्य नाटकस्य रमणीयता सर्वोपरि वरीवर्त्ति। रमणीयेषु तु नाटकेषु सप्ताङ्कात्मकस्याभिज्ञानशाकुन्तलनाटकस्य सर्वाधिकं चारुतरत्वं स्वीक्रियते। तत्रापि चतुर्थोऽङ्को रमणीयतायां सर्वातिशायी वर्तते, अथ च तस्मिन् चतुर्थेऽङ्केऽपि यथासमावेशितेषु श्लोकेषु 'यास्यत्यद्य शकुन्तलेति' प्रभृतयश्चत्वारः श्लोकाः सातिशयमनोज्ञा इति नाटकसमीक्षकाणां मतम्। अत्र हि काव्येषु नाटकं रम्यमिति विषयमाश्रित्य विवेचनं प्रासङ्गिकमस्ति।

जैनशास्त्रानुसारं द्वासप्ततिकलासु, ब्राह्मणमतानुसारञ्च चतुःषष्टिकलासु ललितकलाया मूर्द्धन्यं महत्त्वम्। काव्यं, सङ्गीतं, नृत्यं, नाटकञ्च ललितकलायाः प्रमुखानि मोदावहाङ्गानि सन्ति। आचार्यकल्पैः काव्यरसवादिभिर्विवेचकप्रवरैर्मन्यते यन्नाटकं काव्यस्योत्कृष्टतमं रूपम्। भारतीयधारणानुसारं यथा हि चित्रकला मूर्त्तिकला च स्थापत्यस्याङ्गीभूते कले स्तः, तथैव नृत्यकला संगीतकला च नाट्यकलायाः सहयोगिन्यौ वर्तेते। विभिन्नाः कलाकृतयः जीवनस्य यान् स्थितिवैविध्यान् मूल्यांश्च अभिव्यञ्जयन्ति, नाटकेषु तेषां प्रदर्शनं ततोऽधिकसाफल्येन भवति। नाटकस्यास्वादो नेत्रेण कर्णेन च परिगृह्यते, अथ च अनयोरिन्द्रिययोरेव कृते नाटकं प्रचुररुचिकरं भवति; यतो हि रसानुभूत्यै इमे द्वे इन्द्रिये एव सर्वाधिके समुपयुक्ते स्तः।

वेदो हि नाटकस्यादिस्रोत इति नाट्याचार्येण भरतमुनिना स्वकीये नाट्यशास्त्रे समुट्टङ्कितमुक्तञ्च यन्नाटकं पञ्चमो वेद इति। नाटकस्य वेदमूलत्वविषये नाट्यशास्त्रे दरीदृश्यते खल्वेकः श्लोकः—जग्राह पाठ्यमृग्वेदात् सामभ्यो गीत एव च। यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥

ब्रह्मा हि ऋग्वेदात्पाठ्यमथवा संवादं, सामवेदात्संगीतं, यजुर्वेदादभिनयमथर्ववेदाच्च

---

* सम्पादकः—परिषत्पत्रिकायाः (त्रैमासिक्याः) बिहार राष्ट्रभाषापरिषद्, पटना-४।

रसतत्त्वं समाकृष्य पञ्चमं नाट्यवेदं निर्मितवान् । ऋग्वेदे हि एतादृशानि सूक्तानि समुपलभ्यन्ते येषु खलु संवादः कथोपकथनं वा विद्यते । अस्ति चेदं बहुप्रचलितं मतं यदेतानि संवादसूक्तानि सर्वाधिकप्राचीनरचनापद्धतिरूपेण लिखितानि । अतश्चैवैतानि सूक्तानि परिवर्तिनाट्यकृतीनां रचनाधारभूतानि । संवादसूक्तेषु तूर्वशी-पुरूरवः-सूक्तं यमयमीसूक्तञ्च सर्वाधिकं प्रसिद्धम् । कालिदासस्य विक्रमोर्वशीये नाटके ह्यस्य संवादस्यैव विकासः पूर्णनाटकीयरूपेण परिदृश्यते । अग्निपुराणेऽपि नाटकनिरूपणप्रकरणे नाटकस्य भेदोपभेदाः समुल्लिखिताः सन्ति । विश्वनाथमहापात्ररचितस्य साहित्यदर्पणस्य षष्ठे परिच्छेदे नाटकविषयकं विवेचनं बहुलांशतोऽग्निपुराणस्यैव नाटकनिरूपणप्रकरणाधृतमस्ति । अग्निदेवेन खलु नाटकं धर्मार्थकामभूतस्य त्रिवर्गस्य साधनरूपेणांगीकृतम् । यथा चोक्तम्—'त्रिवर्गसाधनं नाट्यम् ।' जैनानां द्वादशांगेषु तृतीयस्य स्थानाङ्गस्य चतुर्थे स्थाने ना याभिनययोर्विवरणस्य समुल्लेखोऽस्ति ।

काव्येनाथवा नाट्येन सह संगीतस्य रसघनिष्ठः सम्बन्धः । भारतीये कलाचिन्तनशास्त्रे नृत्यकलाया अन्तर्भूतस्याभिनयस्याथवा नाट्यस्य सातिशयगभीरं विश्लेषणं सम्प्राप्यते । नृत्यवाद्यसंगीताभिनयसंवलितत्वमेव नाटकस्य रमणीयः पक्षः प्राचीनभारतीयनाटकेषु पाश्चात्यनाटक इव वध-युद्धमरणादीनां प्रदर्शनं वर्जितमस्ति । साहित्याचार्येण विश्वनाथमहापात्रेणापि वध-युद्ध-राज्यविप्लवमृत्युप्रभृतीनां दृश्यानां प्रदर्शनस्य निषेधः कृतः । अतएव शास्त्रीयभाषायां दुःखान्तनाटकस्य यादृशोऽर्थस्तस्यानुरूपस्य कस्यापि नाटकस्यास्तित्वं प्राच्यभाषासु विशेषतया संस्कृतभाषायां नास्ति । अतश्चैव सर्वविधेषु काव्येषु नाटकस्य सर्वाङ्गतया सुखावहत्वात्तस्य रम्यत्वं स्वीक्रियते ।

भरताचार्येणोक्तं यन्नाट्ये गीतवाद्ययोः समायोगान्न कदापि तस्य विनाशो भवति । अर्थान्नाटकस्य शश्वत्प्रतिष्ठायै तस्मिन् गीतवाद्ययोः समन्वयोऽनिवार्यः । वाद्यं तु नाट्यस्य शय्येति भरतेनोद्घोषितम् । भरतानुसारेणैव नाटकस्या नर्त्तक्यः चतुरा नाट्यकुशला ऊहापोहविचक्षणा रूपयौवनसम्पन्नाश्च भवन्ति स्म । अतो हि नेत्रकर्णयोर्युगपत्प्रियत्वात् हृदयावर्जकत्वाच्च नाटकस्य रमणीयता सर्वस्वीकृतास्ति । नाट्यं खलु स्वकीयरमणीयताभूयिष्ठगुणेन भिन्नरुचेर्जनस्य युगपदेव समाराधनाय समर्थम् । अतएव मालविकाग्निमित्रनाटके कालिदासेनोक्तम्—'नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ।'

प्रसिद्धरसवादिनोऽभिनवगुप्तस्य मतेन रसनिष्पत्तेश्चतस्रः स्थितयो वर्त्तन्ते । प्रथमस्थितौ नाटके हि रङ्गमञ्चोपरि दर्शकः खलु व्यक्तिविशेषं पश्यति । स्थितिरियं स्थूला प्रत्यक्षीभूता च । द्वितीयस्थितौ दर्शकस्य कृते व्यक्तिविशेषबोधस्य समाप्तिर्जायते, परं द्वैतत्वं तिष्ठत्येव । तृतीयस्थितौ विभावादेर्विशेषत्वलोपेन सहैव सहृदयहृदये वासनारूपेण स्थितस्य स्थायिभावस्य साधारण्येन समुद्बोधनं जायते, अथ च चतुर्थस्थितौ तु विगतविघ्नाः सहृदयास्तत्स्थायिभावं रसरूपेणास्वादयन्ति । अभिनवगुप्तो हि प्रक्रियामिमां नाटकं लक्ष्मीकृत्यैवावितनोत् । अथ चाभिज्ञानशाकुन्तलस्य श्लोक-

विशेषमाश्रित्याभिनवगुप्ताचार्येण रसास्वादनप्रक्रियाया यादृशी व्याख्या कृता, सा खलु श्रव्यकाव्य-मथवा नाटकमेवाभिश्रियते । श्लोकविशेषस्त्वेवम्—

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि ॥

श्लोकस्यास्य तात्पर्यः खल्वयमस्ति यत् रम्याणि वस्तूनि दृष्ट्वा तथा च मधुरान् शब्दान् श्रुत्वा दर्शकहृदये वासनारूपेण स्थितः स्थायिभावो हि समुद्बोधनं प्राप्य तन्मन आनन्दयति । नूनमेवाभिनवगुप्तेनैषा रसास्वादनप्रक्रिया नाटकं मनसि निधायैव प्रतिपादिता विश्लेषणेनानेन खलु नाटकस्य भृशमापातरमणीयता संसूच्यते ।

नाटकस्य रम्यत्वे तस्य विनोदजनकत्वञ्चापि कारणवैशिष्ट्यमस्ति । नाट्यवेदस्य सृष्टि-प्रयोजनं विनोदाय तु भवत्येव, हितोपदेशाय दुःखश्रमशोकाविष्टानां प्राणिनां विश्रामाय चाप्युप-योगिभूतम् । भारतीयनाटके मङ्गलभावनाया बाहुल्यं वर्णितमस्ति । सत्त्वोद्रेक एव भारतीयनाटका-नामुद्देश्यभूतः । सत्त्वोद्रेकात्समुत्पन्नस्य चरमाह्लादस्य रसनीयत्वं कदाप्यशिवं न स्यात् । यतो हि रसभावः सर्वथैव माङ्गलिकः, अतो हि नाटकस्य वर्ण्यविषयोऽपि मांगलिक एव भवेत् । नाटके समुपस्थापितानामुदात्तचरित्राणां मोहकाभिनयमाध्यमेनाभिव्यक्तं जीवनदर्शनं, तेषां नाटकीयं गीतिमयं माधुर्यं, प्रकृतेर्विशाला पटभूमिः, रसवेशभाषायाश्च प्रवाहमयी सप्राणा व्यञ्जनाशक्ति-रित्यादयो हि नाटकस्य रमणीयत्वं चारुत्वञ्च भूरिशो विवर्द्धयन्ति ।

संस्कृतनाटके तु भारतीयाचारस्य सञ्जीवनी सञ्चरति । तस्मिन्हि धर्माध्यात्मयोर्विनिवेशो-ऽस्ति, नैतिकताया आशावादितायाश्च सन्देशो विद्यते । किम्बहुना, तस्मिन्नन्तर्निहिता विजयोद्घो-षस्य पराशान्तेश्च स्वरवैखरी निरन्तरं मुखरिता भूत्वा सहृदयहृदयान्तमुल्लासयति लोकजीवनञ्च प्रसादयति । संस्कृते हि रमणीयनाटकरचनाया दीर्घतरा परम्परा वरीवर्ति । नाटककारेषु हि भास-कालिदास-भवभूति-शूद्रक-विशाखदत्तमुरारि-जयदेव-कृष्णमिश्रराजशेखरादयो हि मौलिभूताः सन्ति । एते सर्वे हि सौन्दर्यरसिका नाट्यशास्त्रिण आसन् । तैर्हि स्वकीयनाटकेषु रम्यत्वं प्रतिष्ठा-पितं यतश्च ते रमणीयतागुणस्य सम्यग्ज्ञातारः सुप्रयोक्तारश्चासन् । लोकजीवनस्य रम्यतापादकत्वा-देव संस्कृतनाटकानां रमणीयत्वम् । अतएव 'काव्येषु नाटकं रम्यम्' —सूक्तिरियं सर्वथान्वर्थीभूतेति ।

———

कवीनां कमलप्रीतिः

□

श्रीहरिअरविन्दः *

□

हरेर्जातं विधेस्तातं वनमालीविलोचनम् ।
इन्दिरामन्दिरं काम-कार्मुकं जलजं भजे ॥

हिरण्यगर्भः समवर्तताग्रे, भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमाम् । भगवान्नारायणः शेषविष्टरे शयान आसीत् । स एकाकी न व्यरमत । सोऽकामयत—एकोऽहं बहुस्यामिति । यावदेव तन्मनसि सिसृक्षा समुद्भूता तावदेव तन्नाभेः कमलमेकं प्रादुर्बभूव । अङ्कुरणसमकालमेव प्रवृद्धं तत्तामरसं प्रफुल्लतां भेजे । विकासक्षण एव तस्माद् विधिरुद्बभूव । चतुर्षु दिक्षु दिदृक्षोस्तस्य निसर्गत एव चत्वारि मुखानि सञ्जातानि । तदाप्रभृति स चतुराननः स्वयम्भूः कमलोद्भव इति विख्यातः । अब्जयोनिः स चिन्तयाञ्चकार यत्—'कुत इदं कमलम् ? कथमिदं सर्वत्र जलमेव जलमेव ? कुतोऽहम् ? अहमेकाकी किं कुर्याम् ?' इत्यादि । तदा 'तप जपे' ति विष्णोर्वचनमाकर्ण्य स शब्दागमनस्थलं प्रतिलक्ष्य कमलनालमाश्रित्य जलं प्रविवेश । तत्र शेषशायिनं नारायणं दृष्ट्वा तदादेशात् संसृतिचक्रं सञ्चालयितुं भूयोऽप्यम्भोरुहकर्णिकामारुरोह । तस्मिन्नेव कमले स्थितः स भुवनानि ससर्ज । अतः कमलासन इत्यभिधानं प्राप । इत्यादिपौराणिकीं कथामनुसृत्य ज्ञायते यदिदं सम्पूर्णमपि संसारं कमलनाभेः कमलोद्भवाद्वा समुत्पन्नमस्ति । "कविर्मनीषी परिभूः स्वयम्भूः" —कवीनामादिकविः, आदिकवीनामपि पुराणकविर्भगवान् विष्णुः कमलं प्रति तादृशीं प्रीतिं करोति, ब्रह्मा कमलादेव जायते चेत्तन्निर्मिताः प्रजाः कमले सुहृत्त्वमादधते —किमत्र चित्रम् ?

कमलं नाम कुसुमं सर्वेषां वृन्दारकाणां विद्याधराणां नराणां वा समानं प्रीतिभाजनं चेद् भ्रमरादयस्तिर्यग्योनयोऽपि तत्र मुह्यन्ति —"दारुभेदनिपुणोऽपि षडङ्घ्रिर्निष्क्रियो भवति पङ्कजकोशे ।" नारायणो नाभौ हस्ते च नलिनं दधाति । हरिप्रिया पद्मा तु पद्मालयैव, सा द्वाभ्यामेव हस्ताभ्यां पद्मं गृह्णाति । रमाकुमारस्य सर्वोत्कृष्टमायुधं सरोजम् —"अरविन्दमशोकं च चूतं च नवमल्लिका । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ।"

'श्लोकत्वमापद्यत यस्य शोकः'—आदिकविर्वाल्मीकिरेव प्रारभत प्रथमं कमलविषयिणीमुपमां दातुम्—"प्रविश्य तु महारण्यं रामो राजीवलोचनः । विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ।"

* प्राचार्यः-श्रीरमाशङ्कर [illegible] विद्यापीठस्य, कोडरा, चन्दहर, बस्ती ।

इति रामायणस्य बालकाण्डे प्रथमसर्गस्यैकचत्वारिंशत्तमे श्लोके राजीवप्रयोगमारभ्य बहुषु स्थलेषु भूरिशः प्रयुयोज । सुन्दरकाण्डस्थपद्ये मनोरमैका उपमा दृश्यते—

"तस्याः शुभं वामकरालपक्ष्मराजीवृतं कृष्णविशालशुक्लम् ।
प्रस्पन्दतैकं नयनं सुकेश्या मीनाहतं पद्ममिवाऽभिताम्रम् ॥" रा० सु० २९--२

'कवीति च ततो व्यासे'—अचतुर्वदनो ब्रह्मा, द्विबाहुरपरो हरिः, अभाललोचनः शम्भुर्भगवान् बादरायणः कृष्णद्वैपायनो व्यासो वाल्मीकेः पश्चाद्द्वितीयो महाकविर्बभूव । स हि भगवान् वेदान् सौकर्यार्थं चतुर्धा विभज्य वेदमतं परिपोषयितुं पुराणान्युपपुराणानि रचयाञ्चकार । पुराणेषु मुकुटायितं श्रीमद्भागवतं महापुराणं विदुषामपि परीक्षणनिकषत्वं भजते—'विद्यावतां भागवते परीक्षा ।' तत्र बहुषु विविधप्रकारैरुपमादानैर्वर्णनैश्च कमलसौन्दर्यं प्रकाश्यते शुकतातेन । दशमस्कन्धे भगवतः श्रीकृष्णस्य जन्मसमये कमलानां श्रीवृद्धया ह्रदानां सौन्दर्यं द्विगुणं सञ्जातम्—"नद्यः प्रसन्नसलिलाः ह्रदा जलरुहश्रियः" (भा० १०।३।३) । कारागारकक्षान्तरालमुद्भासयन्, मातापित्रोः शोकसागरमुपशोषयन्, रक्षकसमूहान् विमोहयन्, पृथिवीं पावयन्, भूभारमवतारयन् भगवान् श्रीकृष्णचन्द्रो यदा स्वसम्मुखमद्भुतबालकरूपेणाऽविर्भवति तदा वसुदेवः पश्यति यत्तस्य चत्वारः करा उद्यतचतुरायुधाः सन्ति—

"तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदार्युदायुधम्" । (भा० १०।३।९)

अत्र शङ्खगदादिशब्देषु 'अरि' शब्दो द्वावर्थौ प्रकाशयति—अरिः = चक्रं सुदर्शनम्, अरिः = कमलमिति च । एवमेव सौन्दर्यसारस्य रसपारावारपुरुषोत्तमस्य भगवतो लीलामनुगायन् बादरायणः "अम्बुजाक्ष ! पुण्डरीकाक्ष !" इत्यादिशब्दैः सम्बोधयन् नारायणचरणारविन्दं करसरोरुहं मुखाम्बुजं नाभिनलिनं चासकृद्वर्णयति । भगवतो नगर्यां भगवल्लीलादर्शनलालसो देवर्षिर्नारदो यदा प्रविशति तदा पश्यति—

'उत्फुल्लेन्दीवराम्भोजकह्लारकुमुदोत्पलैः । छुरितेषु तरस्सूच्चैः कूजितां हंससारसैः॥' भा० १०।६९।४

यत्र यत्र भगवतः करचरणानन-नयनादीनां वर्णनं चिकीर्षति तत्र तत्र प्रायः सर्वेषु स्थलेष्वेव अम्भोजसरोरुहाम्बुजपद्मारविन्दपङ्केरुहादिपदानाश्लिष्य लिखति द्वैपायनः । तथैव ह्रदजलाशयदीर्घिकाणां शोभावर्णनप्रसङ्गे कमलकुमुदकह्लारमृणालादीनां समुल्लेखमपि नैव त्यजति । इत्थमेव हि सर्वेष्वपि पुराणेषु स पङ्कजायापि कमलाय सुरुचिमावहन् स्थानं दत्ते ।

महाकवेर्भासस्य प्रसिद्धेषु नाटकेषु 'स्वप्नवासवदत्तम्' प्राथम्यं भजते । अत्र नाटके केवलं द्वयोः स्थलयोः कमलप्रसङ्ग आयाति । प्रथमेऽङ्के सूत्रधारो यन्मङ्गलाचरणं करोति वस्तुनिर्देशात्मकश्लोकरूपं तत्र—"बलरामस्य पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम्" इति कथयन् बलस्य भुजौ कमलतुल्यकोमलौ प्रसन्नताप्रदातारौ स्त इति प्रतिपादयति । यद्यपि अन्यत्रासौ महाकविर्महाराजस्योदयनस्य वासवदत्तायाः पद्मावत्या वा करचरणनेत्रादीनां वर्णने कमलाद्युपमानाना-

मुल्लेखं न कुरुते । अन्यैः कविभिरिव क्रीडोद्यानाऽऽरामवनादिस्थलेष्वपि दीर्घिकाकमलादिकं वर्णितवान् तथापि पञ्चमेऽङ्के राजा वासवदत्तां विचिन्तयन् शोकाकुलो वक्ति—

"लावाणके हुतवहेन हृताङ्गयष्टिं तां पद्मिनीं हिमहतामिव चिन्तयामि ।।" स्व० वा० ५।१

अत्र 'तुषारपातेन विनष्टायाः पद्मिन्या उपमाभूतां तां वासवदत्तां चिन्तयामि या लावणकग्रामेऽग्निना दग्धशरीराऽभूत्' इति वर्णयन् कविः कमलं धन्यं विधत्ते— क्व ज(ड)लजं ? क्व च सचेतनो मनुष्यः ?

कमलस्य बहवो भेदा भवन्ति--रक्तकमलं नीलकमलं नलिनी कुमुदिनी कुमुदमित्यादि । अजरामरा धन्यधन्याः समे कवयो बहुविधानि कमलकुमुदादीनि बहुषु स्थलेषु बहुविधोपमानदानप्रसङ्गे समभिगृह्णन्ति । प्रायशः कवीनां वर्ण्यविषयत्वं जलजमेव कमलं भजते, परन्तु स्थलकमलानामपि नैव वर्णनं मिलतीति न । भारविकालिदासादयः स्थलकमलिनीमपि निजलेखनीचञ्चलचञ्चुतलखेलनसौभाग्यभगिनीं व्याचचक्षिरे । पुराणकविः :पराशरसूनुर्महाभारते भीमसेनं कुबेरनगरीं प्रापयति सुवर्णकमलान्यानेतुं द्रौपदीमनोविनोदनपरायणम् । तत्रैवान्याऽपि कथाऽऽयाति सुयोधनपत्नी शङ्करं स्वर्णकमलानां सहस्रेण पूजयति स्म । कविकुलचूडामणिः कालिदासोऽपि मेघदूते यक्षमुखेन अलकापुर्यां हैमकमलानां प्राचुर्यं सूचयति—

"वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा । हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।।"

उत्तरमेघः १३

भगवान्नारायणः सकललोकपालनपरायणः सर्वेश्वरः सन्नपि अशेषजगन्मङ्गलायतनं पञ्चाननं प्रलयङ्करमपि लोकशङ्करं महेश्वरं सहस्रकमलैः समर्चयन् यदैकदा नवनवत्युत्तरनवशतमेव कमलानि लब्धवान्, तदेकं कमलं स्वकीयविलोचनमेवामन्यत --

"हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोनं तस्मिन्निजमुदहरन्नेत्रकमलम् ।" (महिम्नस्तोत्र)

अत एव श्रीविष्णोः पुण्डरीकाक्षत्वं सार्थकतामावहति । शिशुपालवधमहाकाव्यप्रणेता महाकविर्माघश्च प्रथमसर्गे नारददर्शनप्रसङ्गे प्रफुल्लतां प्राप्तयोर्वासुदेवलोचनयोः साभिप्रायत्वं स्फुटीकरोति—

"विलोचने बिभ्रदधिश्रितश्रिणी स पुण्डरीकाक्ष इति स्फुटोऽभवत् ।"

महाकविकालिदासः स्वेषु काव्येषु काटकेषु चात्यधिकं कमलं वर्णयति । कवीनां कुलगुरुरसौ यावन्मात्रं कमलान्युपमितिषूपयुङ्क्ते तावत्तु सम्भवतः कोपि द्वितीयः कविर्नोपयुयोज । आलोकयामस्तावत्तस्य काव्येषु कमलानामुपयोगं समासेन । विद्योत्तमावदननिर्गत'अस्ति'शब्दोद्भवस्य कुमारसम्भवमहाकाव्यस्य प्रथमे सर्गे हिमालयवर्णनावसरे तदुच्छ्रितत्वं वर्णयन् कविः सूर्यमपि हिमाचलनितम्बतलचारिणं निर्वक्ति । तत्रत्यसरःसु स्थितानि कमलानि सप्तर्षिभिरवचीयन्ते सूर्यस्योर्ध्वमुखकिरणैश्च प्रबोध्यन्ते —

"सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान्परिवर्तमानः ।
पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः ॥"

तारकासुरपरिपीडिता इन्द्रादिवृन्दारका वृहस्पतिं पुरोधाय धाम स्वायम्भुवं ययुः। तत्र देवैः प्रार्थितो भगवान्ब्रह्मा तथा प्रादुर्बभूव यथा सरसां मुकुलितानां कमलानां पुरतः सूर्यः समुदेति —

तासामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम् । सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ॥

(कुमार० २ सर्गः)

कीदृशी मनोहारिणी चात्रोपमितिः ? मृणालसूत्रं तु सूक्ष्मतरं लौकिकव्यवहारानुपयोगि च भवति, तथापि अलौकिकानन्दप्रदायिनि रसाभिष्यन्दसमास्वादनानुभवदानमानिनि अलौकिकवस्तुनि काव्ये समुचितोपयोगित्वेनोपन्यस्तं कविना तदपि—

"अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तथा प्रवृद्धम् ।
मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम् ॥" (कुमार० १ सर्गः)

भगवान् शंकरः समाधिमङ्गीकरोति । स निस्पन्दः सुस्थिरपूर्वकायः ऋज्वायतः सन्नमितोभयांसः पर्यङ्कबन्धो यदा तिष्ठति पद्मासने तदा स कविना प्रफुल्लकमलेनोपमीयते—"उत्तानपाणिद्वयसन्निवेशात्प्रफुल्लराजीवमिवाङ्कमध्ये" (कुमार० ३ सर्गः)।

मेघदूते पश्यामः—रात्रौ खण्डितानां योषितां नयनसलिलं प्रणयिभिः प्रातःकाले शान्तिनेयम्, तत्रान्यो न मध्ये निवारयेदिति वाक्यमुदाहरणमुखेन परिपोषयति महाकविः—"नलिन्याः कमलवदनात्प्रालेयास्रं हर्तुं प्रत्यावृत्तो भानुः कररुधि त्वयि अनल्पाभ्यसूयो भविष्यती" ति। अलकापुरसुन्दरीणां शृङ्गारं पुष्पैरेव सम्पादयति कविस्तत्रापि प्रथमं कमलमेवोपन्यस्तम्—"हस्ते लीलाकमलमलके बालकुन्दानुविद्धं नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ॥" उत्तरमेघः २

यथा प्रोषितपतिका नारी सौन्दर्यविहीना भवति, मालिन्यमावहति, म्लानमुखी संतिष्ठते, तथैव सूर्यस्यानुपस्थितौ कमलिनी सौन्दर्यविकला जायते—"सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्" (उत्तरमेघः १७)। पद्मिनी तु पद्माक्षकरस्पर्शेनैव प्रफुल्लतां प्राप्नोति। मेघच्छन्ने नभोमण्डले सा निराशा न च बद्धाशा सती अर्द्धविकसितगतिं प्रयाति—"साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम्" (उ० मे० २७)। 'आयास्यति नायास्यति वा प्रियो मे' इति विचिन्तयन्ती प्रोषितपतिका योषिदपि कदाचित्पूर्वकृतप्रेमव्यापारान् स्मृत्वा किञ्चित्प्रसीदति कदाचित्तदागमनसमयविलम्बत्वमसहमाना सती विषीदतीत्यहो कवेरुपमादानचातुर्यम्। एवमेव रघुवंशमहाकाव्ये "तिरश्चकार भ्रमराभिलीनयोः सुजातयोः पङ्कजकोशयोः श्रियम्" (३ सर्गः) इति सुदक्षिणास्तनवर्णनावसरे, इन्दुमतो स्वयंवरावसरे च बहूनि पद्यानि कमलोपमानालङ्कृतानि द्रष्टुं शक्यन्ते—

"समीरणोत्थेव तरङ्गलेखा पद्मान्तरं मानसराजहंसीम्" (६।२६)

"बबन्ध सा नोत्तमसौकुमार्या कुमुद्वती भानुमतीव भावम्" (६।३६)

"शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्या" (६।४४)

"स्वसुर्विदर्भाधिपतेस्तदीयो लेभेऽन्तरं चेतसि नोपदेशः ।

दिवाकरादर्शनबद्धकोशे नक्षत्रनाथांशुरिवारविन्दे ॥" (६।६६)

इत्यादि कियन्ति पद्यान्युदाहरामः—"सरसिजमनुविद्धं शैवलेनापि रम्यम्" (अभि० शा०) इत्यभिदधता कविना पदे पदे व्याख्यातमस्ति सरोजसौन्दर्यसौकुमार्यम् ।

यथा कालिदासो रघुवंशीये सप्तमसर्गे—"विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन्" इत्युल्लिलेख, तथैव भावसाम्यमनुगृह्णता महाकविनाऽश्वघोषेणापि बुद्धचरितमहाकाव्ये लिखितम्—"वातायनेभ्यस्तु विनिःसृतानि परस्परायासितकुण्डलानि । स्त्रीणां विरेजुर्मुखपङ्कजानि सक्तानि हर्म्येष्विव पङ्कजानि ॥" (३।१९)

संक्षेपादेव पश्यामोऽन्येषामपि कवीनां कृतिषु । अद्वैतसिद्धान्तप्रतिपादको जगद्गुरुः शङ्कराचार्यः स्वरचनासु—"दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा दवीयांसं दीनं स्नपय कृपया मामपि शिवे !" "मृणालीमृद्वीनां तव भुजलतानां चतसृणाम्" (सौन्दर्यलहरी) इत्यादि नैकविधस्थलेषु कमलान्युदाजहार । नाट्यजगति कविकुलगुरुप्रतिस्पर्धी श्रीकण्ठपदलाञ्छनो महाकविर्भवभूतिरेकत्र प्रकृतेः कठोरतररूपाणि चित्रयति चेदन्यत्र कोमलतममपि चित्रं नैव विस्मरति । सूक्ष्मातिसूक्ष्मभावचित्रणपटुरयं कविकुञ्जरः किमिति कविसमयं विस्मरेत् ? अत्रोदाहरणार्थमस्य द्वावेव श्लोकौ पर्याप्तौ—

"व्यतिषजति पदार्थानान्तरः कोऽपि हेतुर्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥"

(उत्तररामचरितम् ६।१२)

"वपुरवियुतसिद्धा एव लक्ष्मीविलासाः प्रतिकलकमनीयां कान्तिमुद्भेदयन्ति ।
अमलिनमिव चन्द्रं रश्मयः स्वे यथा वा विकसितमरविन्दं बिन्दवो माकरन्दाः ॥"

(उ० रा० च० ६।२४)

बभूव गुर्जरराज्ये महिलापत्तनस्थाने पुरा वीरसिंहो नाम राजा । तस्यासीत् पुत्री शशिकलानाम्नी । तस्य राज्ञः सभायां 'विह्लण'भिधेयः सकलशास्त्रविगाहनपटुर्महाकविर्विराजते स्म । भूपतिस्तं कविवरं स्वदुहितुरध्यापकं नियुयोज । शशिकला जवनिकान्तरिता शास्त्राणि पठति स्म । जवनिकाबहिर्देशस्थो विद्वान् विह्लणमहाभागस्तां पाठयति स्म । याते काले तस्याः कन्यायाः शास्त्रग्रहणवैचक्षण्यमनिन्द्यलावण्यं च ज्ञात्वा तस्यां सञ्जातरतिर्मनीषी स पटान्तःस्थितां तामभिलक्ष्य श्लोकार्द्धमेकं पपाठ—

"जातं सुजन्म विफलं भुवने नलिन्या दृष्टं यया न विमलं तुहिनांशुबिम्बम् ।"

एतच्छ्रुत्वा शशिकलापि सद्यः पद्यबन्धलक्षणविलक्षणं श्लोकार्द्धं कविगुणचरितविमुग्धतया समुदाजहार—

"सम्पूर्णतापि शशिनश्च हि निष्फलैव दृष्टा यया न नलिनी परिपूर्णरूपा ।।"

तदनु परस्परमुत्कण्ठितयोस्तयोरन्तरालाज्जवनिका सत्वरमपसृता । पश्चात् प्राप्तकठोरराजदण्डः स जीवनान्तेऽपि पञ्चाशिकारचनापूर्वकं प्रेम्णः प्रकर्षं प्रदर्शयन् प्रयातः । स हि विक्रमाङ्कदेव-चरितमहाकाव्यस्य प्रथमे सर्गे मङ्गलमाचरन् पुण्डरीकनीलोत्पलयोः सुन्दरं चित्रमुपस्थापयति—

"श्रीधाम्नि दुग्धोदधिपुण्डरीके यश्चञ्चरीकद्युतिमातनोति ।
नीलोत्पलश्यामलदेहकान्तिः स वोऽस्तु भूत्यै भगवान्मुकुन्दः ।।" (१।२)

आयाति चैको महाकविः स्थलकमलिनीपरागविनिर्मितं छत्रं गृहीत्वा नभोमण्डलं साहित्या-काशमिवोद्भासयन् भारविनामा । अनेके कवयः कमलिनीं स्थलकमलिनीं च वर्णयामासुः, परन्तु भारवेर्महाकवेः कमलिनीवर्णना नान्योच्छिष्टत्वावच्छिन्ना जृम्भते । एतस्मादेव कारणादयं कवीशः 'आतपत्रभारवि' रिति ख्यातिं गतः । आस्वादयामस्तावत्स्थलकमलिनीवर्णनरसम्—

"उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसम्भवः परागः ।
वात्याभिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम् ।।"

(किरातार्जुनीयम् ५।३९)

इन्द्रकीलपर्वतं प्रति गच्छन्नर्जुनो मार्गे यक्षाधिपदर्शिताश्शोभाः पश्यन् स्फुटं तुतोष । क्षेत्रेषु कलमाः परिणामरमणीयाः स्वर्णवर्णा लसन्ति । मृणालिनीनां त्विषा कमलपलाशशोभया शालिशिखाभिश्चानुरञ्जितं जलं पुरन्दरधनुष्खण्डं सुशोभितमिव राजते । तत्रत्यमेव पश्यामः शोभनमेकं प्रसङ्गम्—

"असावनास्थापरयाऽवधीरितः सरोरुहिण्या शिरसा नमन्नपि ।
उपैति शुष्यन्कलमः सहाम्भसा मनोभुवा तप्त इवाभिपाण्डुताम् ।।" (४ सर्गः)

अत्र शालिसरोरुहिण्योर्वर्णनेन कविर्नायकनायिकयोर्भावं प्रकटीकरोति ।

भक्तिसाहित्येऽपि विलक्षणाः कवयः सुन्दर-सुन्दरमाध्यमेन कमलिनीकुमुदिनी-मृणालिनी-नामुपमादानैर्भक्तिरसं पुष्णन्ति । महामाहेश्वरः कवितिलको जगद्धरभट्टः स्तुतिकुसुमाञ्जलिनामके स्वकीये शिवस्तुतिकाव्ये लिखति—

"युष्माकमस्तु नवनीलसरोजदामश्यामद्युतिः सुमतये शितिकण्ठकण्ठः ।।"
"फुल्लारविन्दमकरन्दघृतप्रसङ्ग-भृङ्गाङ्गनागुमगुमारवगीतिगर्भम् ।
गायन्ति यस्य चरितं हरितामधीशा धीशालिनः कमलिनीपुलिनस्थलीषु ।।"

एवं हि शान्तरसधाराभिराप्लावितमानसं जनं ये कुर्वन्ति संसारचक्रपराङ्मुखवृत्तयो योगीश्वरा महात्मानस्तेऽपि कमलकोमलतां त्यक्तुं नापारयन् । ते निजवाचोयुक्तीः कमलसौरभ्य-

सुरभिताः कृत्वा लोकमुपदिशन्ति—

"भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला
आयुर्वायुविघट्टिताब्जपटलीलीनाम्बुवद्भङ्गुरम् ।" (वैराग्यशतकम्)

विलक्षणभक्तिरसपरिप्लुतहृदयो बिल्वमङ्गलाभिधानो भक्तप्रवरः श्रीकृष्णनयननलिनयोः सन्दर्शनाभिलाषी सन्ततमेवं समुत्कण्ठते—

"लीलायताभ्यां रसशीतलाभ्यां नीलारुणाभ्यां नयनाम्बुजाभ्याम् ।
आलोकयेदद्भुतविभ्रमाभ्यां काले कदा कारुणिकः किशोरः ॥
(श्रीकृष्णकर्णामृतम्)

शृङ्गारतिलकशृङ्गारशतककाराभ्यां कालिदासामरुकाभ्यां स्वस्वरचनयोः कमलाय विशिष्टं स्थानं वितरितम्—कालिदासस्य नायकः कथयति—

"ये ये खञ्जनमेकमेव कमले पश्यन्ति दैवात्क्वचि-
त्ते सर्वे कवयो भवन्ति सुतरां प्रख्यातपृथ्वीभुजः ।
त्वद्वक्त्राम्बुजनेत्रखञ्जनयुगं पश्यन्ति ये ये जना-
स्ते ते मन्मथबाणजालविकला मुग्धं किमित्यद्भुतम् ?" इति

चेदमरुकस्य नायिका प्रवासात्प्राप्तस्य प्रियस्य स्वागतं स्वैरङ्गकुसुमादिभिरेव करोति—

"दीर्घा वन्दनमालिका विरचिता दृष्ट्यैव नेन्दीवरैः,
पुष्पाणां प्रकरः स्मितेन रचितो नो कुन्दजात्यादिभिः ।
दत्तः स्वेदमुचा पयोधरयुगे नार्घ्यो न कुम्भाम्भसा,
स्वैरेवावयवैः प्रियस्य विशतस्तन्व्या कृतं मङ्गलम् ॥"

'सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति' (मृच्छकटिकम्) इति सुक्ति-सार्थकतामापन्नः पण्डितराजो जगन्नाथः स्वकीयदशायाः स्वरूपं रूपकेणाभिव्यनक्ति—

"येनामन्दमरन्दे दलदरविन्दे दिनान्यनायिषत । कुटजे खलु तेनेहा तेने हा ! मधुकरेण कथम् ? ॥"

करुणरसनिर्वचनप्रक्रियायां भामिनीविलासे प्रेयसीमभिलक्ष्य नायकेन कृतानि संस्मरणपरि-देवितानि मनो हरन्ति—'या मङ्गलमयी गृहदेवता मां नित्यं विकसितनेत्ररूपैर्नीलकमलै रचयति स्म साऽद्य सुरसुन्दरीसहचरी जाता, अतः सरोरुहाणां चिन्ता शशाम सकलाऽपि' । 'मन्दहास्य-विलसितं सुन्दरीमुखमवलोक्य भ्रमराः कमलधिया नन्दन्ति, तदेव मुखं चन्द्रमसं बुद्ध्वा चकोराश्चञ्चूपुटं चटुलयन्ति' सुमनोहरमेकं दृश्यं पश्यामो जगन्नाथचित्रितम्—

"तीरे तरुण्या वदनं सहासं नीरे सरोजं च मिलद्विकासम् ।
आलोक्य धावत्युभयत्र मुग्धा मरन्दलुब्धालिकिशोरमाला ॥"

विलक्षणकाव्यरचनाचातुर्यसम्पन्नोऽन्यो महाकविरायाति संस्कृतसाहित्ये । स तु लोकविभ्रातारं

धातारमपि कमलकोशसम्बद्धं विदधाति—"तत्सङ्कुचन्नाभिसरोजपीताद् धातुर्विलज्जं रमते रमायाम्" (नैषधीयचरितम् ३ सर्गः । अत्युदारवर्णनाशाली नैषधचरितकारः श्रीहर्षः । तन्मते पुण्यश्लोकस्य राज्ञो नलस्य करयोश्छायालवोऽपि पल्लवे नास्ति । नलचरणौ कमलातिशायिनौ सन्तौ कमलेषु घृणां दधतः—"अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे ।" राज्ञा नलेन प्रेषितसन्देशं प्रापयितुं हिरण्मयो हंसो विदर्भनगरीं प्राप्नोति । वैदर्भीकेलिकानने स दमयन्तीं मिलति । तस्यै निजपरिचयं ददाति हंसः—'भगवतो ब्रह्मणो यानभूतस्य हंसस्य वंशे समुत्पन्नाः स्मो वयम् । अस्मादृशां चाटुवचनं श्रोतुं सर्वे नाधिकारिणो भवन्ति ! स्वर्गङ्गासमुत्पन्नसुवर्णमृणालिनीनां नालामृणालाग्रभागान् भक्षयामः । तस्याद्वयं स्वर्णवर्णाः स्मः—

"सहस्रपत्रासनपत्रहंसवंशस्य पत्राणि पतत्त्रिणः स्मः ।
अस्मादृशां चाटुरसामृतानि स्वर्लोकलोकेतरदुर्लभानि ॥
स्वर्गापगाहेममृणालिनीनां नालामृणालाग्रभुजो भजामः ।
अन्नानुरूपां तनुरूपऋद्धिं कार्यं निदानाद्धि गुणानधीते ॥"

गुणिजना अवाञ्छितप्रत्युपकाराः सर्वभूतहिते रता भवन्ति । ते सुखेषु दुःखेषु चाश्रितं जनं न परित्यजन्ति । परन्तु ये धनिनो जनास्ते तु कृतपरोपकारं सन्तमपि जनं तथैवावमन्यन्ते यथा पादतलगता दूर्वाङ्कुरा जनैरवहेल्यन्ते । अस्मिन् विषये कस्यापि सूक्तिरियमवश्यं दर्शनीया—

"आजन्मानुगतेऽप्यस्मिन्नाले विमुखमम्बुजम् । प्रायेण गुणपूर्णेषु रीतिर्लक्ष्मीवतामियम् ॥"

(सुभाषितरत्नभाण्डागारम्)

गम्भीरधीरकविताविन्ध्याटवीचातुरीसञ्चारी कविकुम्भिकुम्भभिदुरपञ्चाननो महाकविबाणभट्टः संस्कृतसाहित्यजगति महदुत्कृष्टं स्थानमादत्ते । 'बाणोच्छिष्टं जगत्सर्वम्' इत्येतावतैव ज्ञातुं शक्यतेऽस्याप्रतिहता प्रतिभा कादम्बरीपर्यालोचनेन वा । कविकेसरीशोऽसौ चण्डीशतकस्तोत्रे भवान्याश्चरणकमलं वर्णयति—

"जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जु मञ्जीरभृङ्गः ।
भर्तुर्नृत्यानुकारे जयति निजतनुस्वच्छलावण्यवापी-
सम्भूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः ॥"

पश्चाद्वर्तिनस्तुलसी-सूर-रहीम-पन्त-प्रसादादयो हिन्दीभाषाकवयोऽपि संस्कृतसाहितीमनुसरन्तो बाहुल्येन कमलकुन्दचम्पकादिकुसुमानि प्रयुञ्जते स्वस्वकाव्येषु । तुलसीदासस्तु सर्वाधिक्येन कञ्जकमलपरागादिशब्दान् व्यवहृतवान्—

'वन्दौं गुरु पद पदुम परागा । सुरुचि सुवास सरस अनुरागा ।।" (रामचरितमानस बाल काण्ड)

"रावन सिर सरोज बन चारी । चलि रघुबीर सिली मुखधारी ॥" (लङ्काकाण्ड)

"उदितउदयगिरि मञ्च पर रघुबर बाल पतङ्ग ।
विकसे सन्त सरोज सब हरषे लोचन भृङ्ग ॥" (बालकाण्ड)

अत्र विश्वामित्रस्य गुरोर्वचनं परिपालयन् सीतास्वयंवरावसरे जनकप्रतिज्ञां सफलयितुं भगवान् श्रीरामचन्द्रः सभामञ्चस्थादासनादुत्तस्थौ तदा सर्वे सन्तस्तुतुषुः । इति वर्णयन्कविः कथयति यन्मञ्च एवोदयगिरिः । तत्र रघुवरबालपतङ्गो यदोदितस्तदा सज्जनसरोजानि विकसितानि तत्रोपस्थित-जनलोचनभृङ्गाश्च मुदं सम्प्राप्ता इति ।

रहीमकविः प्रतिपादयति कमलजलोदाहरणमुखेन यत्—प्रारब्धवशात्तदेव सुखदं वस्तु दुःखदं जायते । यथा जले स्थितं कमलं यो रविः पोषयति, जले शुष्यति स एव रविस्तत्कमलं शोषयति—

"पलटत ही प्रारब्ध के सुखद दुखद ह्वै जात ।
रवि पोषत शोषत वही जलजातहिं जल जात ॥"

भावुककविवरो जयशङ्करप्रसादः 'आँसू'नामके शोककाव्ये नायिकाया हास्यं वसन्तकालिक-प्रभातप्रसन्नं विकसितकमलवनवैभवं तिरस्करोतीति वर्णयति—

"विकसित सरसिजवन वैभव मधु ऊषा के अञ्चल में ।
उपहास करावे अपना जो हँसी देख ले पल में ॥"

नेपालदेशीया भाषाकवयोऽपि यथावसरं यथास्थानं कमलं वर्णयाम्बभूवुः । कविशिरोमणिपदविभू-षितो लेखनाथपौड्यालनामा कविः 'ऋतुविचार' नाम्नि काव्ये कमलस्थितिं मनोहारितया वर्णयति । 'पङ्क एव भेको निवसति, पङ्क एव कमलं च विलसति । स्थानं तु सममेव, परन्तु गुणगतिस्तयोर्भिन्ना भवति । संसारमिदं पङ्कमस्ति, ईश्वरभक्तिः पद्मम् । जीवाः सर्वे मण्डूकाः सन्ति, पद्मस्य रसो मुक्तिरस्ति । जलाशयान्यविषयासक्तो मण्डूको यदि कमलरसं पातुं प्रभवेत्, कीटाद्याहारविहारमात्रकार्ये न रमेत्तर्हि स मुक्तो भवेत् । परन्तु सांसारिकजीवा वयं भेकवत् कमलरसं (ईश्वरप्राप्त्यानन्दानुभवरसम्) पातुं न पारयामः ! कीदृशी मार्मिकी दर्शनप्रकाशन-शैलीयं कवेः—

"संसार यो हिलो सारा, पद्म ईश्वरभक्ति हो । जीव छन् भ्यागुतातुल्य, पद्मको रस मुक्ति हो ॥"

इत्थं जलेषु स्थलेषु च कवयः श्रियमुपवर्णयन्ति प्रायशः । किञ्च नदीनां समुद्रस्य च जले-ष्वपि ते जलजजालं विस्तारयन्ति— 'किं न पश्यन्ति कवयः ?'

अत्र न विस्मयः कार्यः । अयं तु कविसमय एव । कविसमयपरिचयो विश्वनाथकविराजेन दत्तः साहित्यदर्पणग्रन्थे—

'मालिन्यं व्योम्नि पापे यशसि धवलता वर्ण्यते हासकीर्त्योः ।
रक्तौ च क्रोधरागौ सरिदुदधिगतं पङ्कजेन्दीवरादि ॥"

एतावता प्रमुखकवीनां कमलेषु प्रीतिः समासेनात्र सङ्कलिता ।

— ❋ —

अभिनव-साहित्य-परिचयः

वैयाकरणसिद्धान्तकौमुदी (कारकप्रकरणम्) लेखकः—राजकिशोरमणित्रिपाठी गोरखपुरविश्वविद्यालये संस्कृतविभागेऽध्यापकः। प्रकाशकः—संस्कृत सेवा संस्थान, १३३ खुर्रमपुर (गोरखपुर)। आकारः डिमाई। पृष्ठसंख्या—३९६। मूल्यम्—२० रु०।

वैयाकरणसिद्धान्तकौमुद्याः कारकप्रकरणं व्याख्यातं च विद्वद्वरेण श्रीराजकिशोरमणित्रिपाठिना पर्यवालोकि। कारकप्रकरणमधिव्याकरणशास्त्रं विवेचनप्रधानं प्रौढवैदुष्यव्याख्यानसापेक्षं, निखिलशास्त्रोपयोगि व्युत्पत्तिसमेधकं, प्रतिभाप्रकर्षकमित्यशेषविदुषामाकूतम्। नात्र संदेहो यद् विदुषा व्याख्यात्रा कृतोऽत्र फलवान् श्रमः। विस्तृतभाष्यात्मकेन व्याख्यानेन स्फोरितानि निखिलानि गूढतत्त्वानि, निपुणतया व्याख्यातानि कठिनस्थलानि, न न स्पृष्टान्येव कठिनस्थलान्यपि तु वैशद्येन स्फुटीकृतानि तत्रत्यानि तत्त्वानि, येन प्रपाठकानां कृते नावशिष्येत संदेहलेशोऽपि कथञ्चन। दृष्टिविकासाय, प्रतिभाप्रकर्षाय च प्रस्तुतीकृतानि नवीनान्यनेकानि काव्यगतानि पद्यमयान्युदाहरणानि।

व्याख्यानेऽत्र विषयाणां तादृशमस्ति प्रस्तुतीकरणं येन जिज्ञासोः पुरस्तात् कीदृशमपि काठिन्यमसमाहितं नावतिष्ठते। इदं प्रथमतया प्रातिपदिकार्थसूत्रस्य व्याख्यानं कुर्वता व्याख्यात्रा—किमिदं प्रातिपदिकं कश्च प्रातिपदिकार्थः? प्रातिपदिकार्थत्वादेव सिद्धे लिङ्गग्रहणस्य किमौचित्यमित्यादयो विषया निगदव्याख्याताः।

परिमाणमात्रे द्रोणो व्रीहिरित्युदाहरणप्रसंगे दीक्षितेन लिखितं—प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणं, प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणम्। स्थलमिदं स्पष्टीकुर्वता व्याख्यात्रा—कथमत्राभेदसम्बन्धेन कथं च परिच्छेद्यपरिच्छेदकभावसम्बन्धेनान्वय इत्यादयो विषयाः सम्यक् स्फोरिताः। तावताऽपि—कर्त्तुः किं—माषेष्वश्वं बध्नाति इत्यस्याः पंक्तेः व्याख्यानावसरे कर्तृग्रहणाभावे कर्मण ईप्सितानां माषाणां कर्मत्वमापाद्य कर्तृग्रहणद्वारा तन्निराकृत्यापि नेदं समाहितं यद् यदा पुष्ट्यर्थं माषक्षेत्रे अश्वं बध्नाति इत्येतादृशतात्पर्यकमिदं वाक्यं स्यात् तदा अश्वो मद्वृत्तिव्यापारेण रज्जुशंकुदृढतरसंयोगाश्रयीभूतो भवतु, माषाश्चाश्वस्य गलबिलाधःसंयोगाश्रयीभूता भवन्तु, इत्याकारिकायां कर्त्तुरिच्छायां सत्यां माषाणां कथं न कर्मत्वम्? कर्तृग्रहणसामर्थ्यात् प्रकृतधात्वर्थफलाश्रयस्यैव तदिति समाहितं चेदतीव तत्र स्याद् वैशिष्ट्यम्।

एवं तमप् ग्रहणं किं—पयसा ओदनं भुङ्क्ते। इत्यत्र तमबर्थप्रकर्षस्य दीक्षितमते प्रकृत्यर्थतावच्छेदकेऽन्वयः, नागेशमते तु प्रकृत्यर्थतावच्छेदकेऽन्वयः [illegible] मतीत्यादयो विषया-

स्तत्र विवेचिताः स्युस्तदा स्याद् ज्ञानवर्धनं जिज्ञासूनामामोदश्च विदुषाम् । नागेशादिभिर्व्याख्यातविषया नात्रोल्लिखिताश्चेदुद्वेजकतयेति चेन्नात्र संशयो यद् व्याख्यानमिदं कारकप्रकरणस्य सर्वथैवापूर्वमुपयोगि च सर्वेषाम् । सर्वथैव कृतिनोऽत्र व्याख्यातारोऽध्यापयितारश्चाधिगतयाथातथ्या नूनमुपकरिष्यन्तीति मे मतिः ।

विश्वनाथ मिश्रः

प्राचार्यः—शार्दूलसंस्कृतविद्यापीठम्, बीकानेर ।

संस्कृतसरणिः लेखकः—डा० रामलखन शर्मा । प्रकाशकः— प्रशान्त प्रकाशन ५८ छित्वापुर रोड, लखनऊ । आकारः—डिमाई । पृष्ठसंख्या—३७५ । मूल्यम्—१२ रूप्यकाणि ।

एतद्ग्रन्थलेखकाः डा० शर्माणः शिक्षाशास्त्रे कृतभूरिपरिश्रमा विश्रुता विद्वांसः सन्ति । एभिः पुस्तकेऽस्मिन् सुदीर्घकालीनं संस्कृतशिक्षणानुभवमाधृत्य वर्णपरिचयादारभ्य संस्कृव्याकरणसम्बद्धाः सर्वेऽपि विषया राष्ट्रभाषायां सम्यक्तया विवेचितातस्था संस्कृते प्रविविक्षूणां छात्राणां हितदृष्ट्या सुस्पष्टतया निरूपिताश्च । व्याकरणविषयनिरूपणानन्तरं १५ छन्दसां तथा २० अलङ्काराणां च लक्षणोदाहरणान्यपि प्रदर्शितानि । अन्ते २७ विषयानधिकृत्य निबन्धा अपि सरलसरसभाषया उपनिबद्धा विद्यन्ते । एवञ्च पुस्तकमिदं हिन्दीमाध्यमेन संस्कृतमध्येतुमिच्छतां प्रौढजनानां तथा संस्कृतछात्राध्यापकानाञ्चापि परमोपकारकमिति संस्कृतसमाजे सर्वथा सम्मानमर्हति ।

— सहसम्पादकः

शब्ददीपिका (नूतनं संस्कृतव्याकरणम्) लेखकः—डा० वि० आर० शास्त्री, हैदराबादस्य उस्मानिया विश्वविद्यालये संस्कृतविभागाध्यक्षः, प्रकाशकः—अमरभारतीप्रकाशनम्, १-१-३३६।९३, विवेकनगर, हैदराबाद २० आन्ध्रप्रदेशः । आकारः—डिमाई । पृष्ठसंख्या—३२३ । मूल्यम्—२२ रूप्यकाणि ।

संस्कृतभाषायाः संस्कृतमाध्यमेन शिक्षकमिदं पुस्तकम् । पुस्तकेऽस्मिन् यद्यपि अन्यसंस्कृतशिक्षकपुस्तकानामेव सरणिमनुसृत्य सर्वे व्याकरण-सम्बन्धिनो विषया बोधितास्तथापि केषुचित् प्रकरणेषु "नूतनं संस्कृतव्याकरणम्" इति सूचनानुसारं नूनं काचिन्नवीनताऽपि परिलक्ष्यते । पुस्तकस्यास्य क्रियाकल्पप्रकरणम्, विधायकप्रकरणम्, कर्मप्रवचनीयप्रकरणम्, समुच्चयप्रकरणम्, भावप्रकरणम्, परिचितिप्रकरणम् वाक्यप्रकरणञ्चेत्यादीनि प्रकरणानि किमपि नूतनं ज्ञानं, नूतनां बोधशैलीं च समुपस्थापयन्ति । वाक्यप्रकरणे परिचितिप्रकरणे च वाक्यगतानां पदानां तथोपवाक्यानां च यादृशं निरूपणं विहितं तत् छात्राणां कृते नूतनं बोधं ददाति । संस्कृताध्यापकैश्छात्रैश्च पुस्तकमिदं नूनमवलोकनीयं पठने पाठने च उपयोक्तव्यमिति ।

—सहसम्पादकः

वाणीसरोवर (त्रैमासिकी) सम्पादकः—श्री नन्दकुमार अवस्थी, प्रकाशनस्थलम्—भुवनवाणी ट्रस्ट, लखनऊ। पृष्ठसंख्या—१९२। वार्षिकं मूल्यम् १० रु०। एकस्याङ्कस्य मूल्यम् —२–५० रु०

पत्रिकाया अस्या एकादशवर्षस्यायं चतुर्थोऽङ्को मत्समक्षं विराजते। एतत्पत्रिकाया अनन्यपत्रिकासाधारणः कश्चिद् विशेषो वर्तते। अस्यां पत्रिकायां समस्तभारतीयभाषाणां प्राचीनप्रतिनिधिकाव्यग्रन्थानां क्रमिकरूपेण नागराक्षरेषु प्रकाशनं भवति तथा तेषां हिन्दीभाषानुवादोऽपि प्रकाशितो भवति। एतदतिरिक्तं अरबी-फारसी-उर्दू-अंग्रेजी ग्रन्थानामपि सानुवादं नागराक्षरेषु प्रकाशनं विधीयते। मानसभारतीनाम्ना तुलसीकृतरामायणस्य संस्कृतपद्यानुवादोऽपि क्रमशः प्रकाश्यमानो विद्यते। एवञ्च ये साहित्यरसिका जना विभिन्नलिपीनां ज्ञानाभावे नागराक्षरद्वारा अन्यभारतीयभाषाणां साहित्यस्य अध्ययनं कर्तुं कामयन्ते तथा हिन्दी-अनुवाद-माध्यमेन अर्थमपि ज्ञातुमिच्छन्ति तेषां कृते पत्रिकेयं परमसहायिका भवितुमर्हति। समस्तभारतीयभाषाणां पारस्परिकपरिचयप्रसारदृष्ट्या पत्रिकाया अस्याः सुमहत् राष्ट्रीयं महत्त्वं विद्यते। एतादृशपत्रिकायाः सम्पादकाः प्रकाशका ग्राहकाश्च सर्वेऽपि अस्माकं नितरां वन्दनीया अभिनन्दनीयाश्चेत्यत्र नास्ति काचिदतिशयोक्तिः। हिन्दीप्रदेशेषु वयं गृहे गृहे अस्याः प्रचारं कामयामहे।

सहसम्पादकः

तत्त्वशतकम्—रचयिता—डा० ब्रह्मानन्दशर्मा, राजस्थानप्राच्यविद्याप्रतिष्ठानस्य भूतपूर्वनिदेशकः। प्रकाशकः—ब्रह्मानन्दशर्मा, पारसी मन्दिर के पास, नसीराबाद रोड, अजमेर, राज०। मूल्यम्—२ रु०।

एतस्मिन् पुस्तके नामानुसारमेव केषुचित् शास्त्रीयविषयेषु केषुचित् लौकिकेषु च विषयेषु रचयित्रा महानुभावेन केचन स्वानुभूतास्तात्त्विका विचारा अनुष्टुप्छन्दस्सु उल्लिखिताः सन्ति। आकृत्या लघ्वपि पुस्तकमिदं विषयदृष्ट्या विचारदृष्ट्या च नितरां गभीरं नवीनदृष्टिप्रदं चेति नूतनरचनाप्रवीणैरवश्यमेव द्रष्टव्यं संग्राह्यं च। श्लोकानां हिन्दीभाषानुवादोऽपि ग्रन्थान्ते प्रदत्तो वर्तते।

———

समीक्षणार्थं प्राप्तानि पुस्तकानि

१. मन्दाकिनी, श्रीभाष्यं विजयसारथिः, वारंगल, आन्ध्रप्रदेश ।

२. राजस्थानस्याधुनिकाः कथालेखकाः, डा० पुष्करदत्तशर्मा, उदयपुर, राजस्थान ।

३. प्रसन्नाञ्जनेयं नाम हनुमत्सन्देशः, डा० अर्क सोमयाजी, तिरुपति, आन्ध्रप्रदेश ।

४. सुभाषितसुमनोऽञ्जलिः, मिथिलेशकुमारो मिश्रा, पाटलिपुत्रम्, विहारप्रदेशः ।

५. मेघदूत (हिन्दी पद्यानुवाद), डा० अभयमित्र इलाहाबाद, उत्तरप्रदेशः ।

६. कादम्बरीनाटकम्, भोजमणिशुक्लः, कुशीनगर, देवरिया, उत्तरप्रदेशः ।

७. विक्रान्तभारतम्, डा० वी० आर० शास्त्री, हैदराबाद, आन्ध्रप्रदेशः ।

८. काव्यसत्यालोकः, डा० ब्रह्मानन्दशर्मा, अजमेर, राजस्थान ।

९. अभिनवा स्तुतिः, राजकिशोरमणित्रिपाठी, गोरखपुर, उत्तरप्रदेशः ।

१०. देवीशतकम्, वि० सुन्दरशर्मा, हैदराबाद, आन्ध्रप्रदेशः ।

●

निवेदना—स्वासां नूतनकृतीनां परिचयाय समालोचनाय चाभिनवसाहित्यप्रणेतृभिरेकैकस्य पुस्तकस्य प्रतिद्वयं प्रेषणीयमिति सानुरोधं निवेद्यते ।

●

शोकसमाचारः

प्रधानसम्पादकमहोदयस्य भ्रातृद्वयवियोगः

परमार्थसुधायाः परिवारस्य कृते महतो दुःखस्यायं विषयो यत् प्रधानसम्पादकानां श्रीशर्ममहोदयानां द्वयोः भ्रात्रोरल्पकालव्यवधान एव दिवङ्गमनं जातम् । अनयोर्ज्येष्ठभ्राता श्रीपण्डितरामेश्वरशर्मा ज्योतिषकर्मकाण्डशास्त्रयोर्महान् निष्णातः तथा रांचीनगरस्य विद्वत्सु संभ्रान्तनागरिकेषु च लब्धप्रतिष्ठो यशस्वी विद्वान् आसीत् । कनिष्ठभ्राता श्रीमुरारीलालशर्मा रांचीनगरस्थमारवाड़ीकालेजस्य प्रधानाचार्यस्तथा लोकप्रियः समाजसेवी चासीत् । अनयोर्द्वयोरपि लोकसम्मानितयोः गृहसंचालनदक्षयोश्च भ्रात्रोरल्पकालाभ्यन्तर एव वियोगेन भृशं दुःखितान् श्रीशर्ममहोदयान् प्रति हार्दिकीं समवेदनां प्रकटीकुर्मस्तथा दिवङ्गतयोर्द्वयोरपि महानुभावयोः शाश्वतिकीं शान्तिं सद्गतिञ्च कामयामहे ।

वासुदेवद्विवेदी शास्त्री

पत्रिकापरिवारसदस्याश्च

भारतस्य प्रतिष्ठे द्वे
संस्कृतं संस्कृतिस्तथा।



निखिलेऽपि महीमण्डले

संस्कृतभाषा-साहित्य-प्रसाराय

भारत लक्ष्मी ट्रेडिंग कम्पनी

प्राइवेट लिमिटेड, कलकत्ता



इति संस्थानेन

श्रद्धा-भक्ति-प्रसूनानि विनिवेद्यन्ते

पुनर्जीवनम्

(१)

शतं जीव शरदो वर्धमानः, शतं हेमन्ताञ्छतमु वसन्तान् ।
शतमिन्द्राग्नी सविता बृहस्पतिः, शतायुषा हविषेमं पुनर्दुः ॥

(२)

आहर्षं त्वाऽविदं त्वा, पुनरागाः पुनर्नव ।
सर्वाङ्ग सर्वं ते चक्षुः, सर्वमायुश्च तेऽविदम् ॥

(३)

अङ्गादङ्गाल् लोम्नो लोम्नो, जातं पर्वणि पर्वणि ।
यक्ष्मं सर्वस्मादात्मनस्, तमिदं वि वृहामि ते ॥

(४)

आरभस्वेमाममृतस्य श्नुष्टिम्, अच्छिद्यमाना जरदष्टिरस्तु ते ।
असुं त आयुः पुनराभरामि, रजस्तमो मोप गा मा प्रमेष्ठाः ॥

(५)

जीवतां ज्योतिरभ्येह्यर्वाङ्, आ त्वा हरामि शतशारदाय ।
अवमुञ्चन् मृत्युपाशानशस्तिं, द्राघीय आयुः प्रतरं दधामि ॥

ऋग्वेदात् १०/१६१/४–५

परमार्थसुधा

त्रैमासिक-संस्कृत-पत्रिका

नियमाः

१—इयं त्रैमासिकी संस्कृतपत्रिका मार्गशीर्ष-फाल्गुन-ज्येष्ठ-भाद्रपदमासेषु प्रकाश्यते। वर्षारम्भो मार्गशीर्षमासाद् गण्यते।

२—ग्राहकत्वं स्वीकुर्वाणस्य शुल्कं पूर्णवर्षस्यैव गण्यते। मध्येवर्षं ग्राहकत्वं भजतोऽपि समग्रवर्षस्यैव तद् भवेत्। तादृशाय ग्राहकाय वर्षस्य पूर्वभागे प्रकाशिता अङ्का उपलब्धौ सत्यां प्रेषयिष्यन्ते।

३—ग्राहको यदि स्थानपरिवर्तनं कुर्यात् तर्हि नवीनसङ्केतं निर्दिशेत् कार्यालयाय।

४—वार्षिकं शुल्कं दशरूप्यकाणि तथा एकस्याङ्कस्य रूप्यकत्रयं वर्तते। शुल्कमिदं धनादेशद्वारेण प्रेषणीयम्।

५—विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गभीरा मौलिकनिबन्धाः प्रकाशनाय गृह्यन्ते।

६— काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्याः कृतयोऽत्र स्थानं न लभन्ते।

७—प्रकाशनाय प्रेषिताः सर्वविधा एव रचना एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैर्लिखिताः टङ्किता वा स्युस्तथा लेखान्ते लेखकस्यावाससङ्केतः पदनिर्देशश्चोल्लिखितौ भवेताम्।

८—अस्वीकृता रचनाः पोस्टविभागीयचिटिका(टिकट)—प्राप्त्यनन्तरं प्रत्यावर्तयिष्यन्ते।

९—लेखकेभ्यस्तल्लेखानां पञ्च उन्मुद्रितयोऽपि प्रदास्यन्ते।

१०—कृतीनां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकायत्तः।

११ —परिचयप्रकाशनाभिलाषुकैः प्रकाशकैर्लेखकैर्वा नवीनकृतीनां द्वयी प्रेषणीया।

१२—पत्रिकासम्बद्धः सर्वविधपत्रव्यवहारः धनादेशद्वारेण शुल्कप्रेषणञ्च 'व्यवस्थापकः—परमार्थसुधा' इति सङ्केतेन कर्तव्यं तथा स्वस्य नामावाससङ्केनपदनिर्देशाः सुस्पष्टं लेख्याः।

परमार्थसुधा

(त्रैमासिक-संस्कृत-पत्रिका)

वर्षः पञ्चमः ✲ अङ्कतृतीयः

चैत्र-वैशाख-ज्येष्ठमासाः

संवत्सरः - २०३८

सम्पादकः

श्रीसत्यनारायणशर्मा

सहसम्पादकौ

श्रीवासुदेवद्विवेदी शास्त्री — श्रीविद्याधरद्विवेदी

प्रकाशकः

श्रीसोहनलालः

मन्त्री, परमार्थन्यासः

मुड्हू, राँची (विहार)

●

प्राप्तिस्थानं, पत्र-लेख-मूल्यादि-प्रेषणसङ्केतश्च –

व्यवस्थापकः – परमार्थसुधा

सार्वभौम-संस्कृत-प्रचार-कार्यालयः

डी० ३८।११०, हौजकटोरा, वाराणसी

(उत्तर-प्रदेशः), दूरभाषः – ६६०२१

●

वार्षिकं मूल्यम्–दश रूप्यकाणि

विदेशेषु – दश डालराणि

●

मुद्रकः

बैजनाथ प्रसाद

कल्पना प्रेस

रामकटोरा रोड, वाराणसी ।

विषया लेखकाश्च



परमार्थसूक्तयः

सुसंस्कार-प्रबोधनम्

(१)

अग्ने त्वं सु जागृहि वयं सु मन्दिषीमहि ।
रक्षा णो अप्रयुच्छन् प्रबुधे नः पुनस्कृधि ॥

(२)

पर्यावर्ते दुष्वप्न्यात् पापात्स्वप्न्यादभूत्याः ।
ब्रह्माहमन्तरं कृण्वे परा स्वप्नमुखाः शुचः ॥

(३)

अपेहि मनसस्पतेऽपक्राम परश्चर ।
परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः ॥

(४)

भद्रं वै वरं वृणते भद्रं युञ्जन्ति दक्षिणम् ।
भद्रं वैवस्वते चक्षुर् बहुत्रा जीवतो मनः ॥

(५)

यदाशसा निःशसाभिशसा,
उपारिम जाग्रतो यत्स्वपन्तः ।
अग्निर्विश्वान्यप दुष्कृतानि,
अजुष्टान्यारे अस्मद् दधातु ॥

—यजुर्वेदात् ४/१४

ऋग्वेदात् १०/१६४/१–३

क्रमदीश्वरस्य व्याकरणविषयको विमर्शः

श्रीसत्यनारायणशर्मा

संस्कृततेर्गरिम्णो मानदण्डो वाङ्मये खलु चकास्ति, तत्रापि कोशव्याकरणयोः समृद्धौ। पुराकाले भारते वर्षे उभयोरेव श्रीर्धीमतां चेतांसि रञ्जयाञ्चकार। मुनित्रयस्य व्याकरणशास्त्रमन्तराऽन्येऽपि व्याकरणग्रन्था अध्येतॄणां ज्ञानार्जनतृषं स्म शमयन्ति। कानिचित्तु पुस्तकानि कालस्य दुरवगमगत्या दृग्पथमतीतानि, कानिचिद् विपश्चितां प्रश्रयणात् बहुत्र व्यवहृतानि, कानिचित्तु हेतुविशेषैः स्थानविशेषमेव समलङ्कृतानि। अद्यतने प्रवचने वङ्गीयविदुषः क्रमदीश्वरस्य संक्षिप्तसाराख्यं व्याकरणमधिकृत्य किञ्चिन्निवेदयिष्यते, सुरभारतीसमर्चनपराणां प्रमोदाय। श्रीकवीन्द्रचक्रचूडामणिमहापण्डितश्रीक्रमदीश्वराचार्य इति नाम्ना प्रथितस्य विदुषो व्याकरणग्रन्थ ऊनविंशशत्यामेव प्रतीच्यजगति शब्दशास्त्राधिजिगमिषूणां ध्यानमाकृष्टवान्। कोलतुकः स्वनिबन्धग्रन्थे द्वितीये भागे, आउफरेख्टश्च पाण्डुलिपीनां सूच्याममुं निर्दिदिशतुः। तत ऊर्ध्वं त्साखारिए कोशव्याकरणयोः क्षेत्रेऽनुसन्दधानः संक्षिप्तसारमपि अञ्जसा विवेचयामास।

वैयाकरणप्रवरोऽयं भुवः कस्मिन्नञ्चले कस्य राज्ञो विषये विद्योपास्तिपरायणः स्वं जीवनमत्यवाहयदिति प्रश्नः सम्मुखीभवति। पश्चिमीयबङ्गे भागीरथ्या दक्षिणस्थः प्रदेशो वैयाकरणस्यास्य मातृभूरासीदिति पण्डितस्य राजेन्द्रलालमित्रस्य मते विप्रतिपत्तीरनवकाशः। राधाऽपरनामधेये प्रदेशेऽस्मिन् कवयिता मुरारिमिश्रः, विद्याविलासमतिः रायमुकुटमणिरपि न्यूषतुः। रायमुकुटमणिः पञ्चदशे खिस्तीयशतकेऽमरकोषस्य पदचन्द्रिकाख्यां टीकां रचयाम्बभूव। मुरारिमिश्रस्य नवनवोन्मेषशालिनीं काव्यप्रतिभान्तु को न जानीते संस्कृतसाहित्यसुधोदधिनिमग्नधीः प्रधीः! संक्षिप्तसारटीकायामपि मुरारिः स्मर्यते।

वोपदेवस्य मुग्धबोधाख्यं व्याकरणं गौडदेशे सर्वतोऽधिकं प्रचलितं, भागीरथ्या उभयोर्दिशः। राधाप्रदेशे क्रमदीश्वरस्य व्याकरणं, विहारादिषु अनुभूतिस्वरूपाचार्यस्य सारस्वतं, पूर्वस्यां दिशि पद्मनाभदत्तस्य सुपद्मव्याकरणं, कामरूपे, उत्कले च पुरुषोत्तमश्रीविद्यावागीशभट्टाचार्यस्य प्रयोगरत्नमाला व्याकरणमधिजिगमिषुभिः संसेव्यन्ते। कातन्त्रव्याकरणन्तु कृत्स्नं पूर्वबङ्गं व्याप्नोति।

सन्दर्भेऽस्मिन् आचार्यत्साखारिए अष्टात्रिंशदधिकाष्टशताधिकसहस्रतमे ख्रिस्ताब्दे प्रकाशिते पूर्वीयभारतस्य इतिहासनामग्रन्थं निर्दिशति, यस्य द्वितीये खण्डे दिनाजपुरं वर्णयता क्रमदीश्वरस्य व्याकरणं ग्रन्थकारेण निरदेशि । अन्तेवासिनः प्रथमं दशवत्सरं यावत् संक्षिप्तसाराख्यं व्याकरणमधीयते, यस्य प्रणेता क्रमदीश्वराख्यो ब्राह्मणः कश्चिदासीदिति सूचयित्वा इतिहासकारोऽयं गोपीचन्द्रस्य टीका विद्याप्रपित्सूनामसौकर्यं लघयतीति सूचयाञ्चक्रे । सन्दर्भेऽस्मिन् शालिवाहनस्य समकालीनस्य सर्ववर्मणः, वोपदेवस्य, सारस्वतव्याकरप्रणेतुरनुभूतिस्वरूपाचार्यस्य च नामान्यपि जगृहिरे ।

वोपदेवस्तु ऐतिह्यविद्भिस्त्रयोदशशत्यां स्वव्याकरणं प्रणिनायेति प्रख्यापितः, हेमचन्द्रः किल द्वादशशत्याम् । क्रमदीश्वरस्य जीवनमेतयोर्मध्यवर्त्तिनि काले स्थाप्यते । आचार्य आउफरेख्टः पाण्डुलिपीनां सूच्यां संस्कृतवैयाकरणानां क्रमनिरूपणप्रसङ्गे क्रमदीश्वरं हेमचन्द्रादनु वोपदेवात्प्राक् सस्मार । कोलब्रुकोऽपि संक्षिप्तसारं हैमव्याकरणात् कातन्त्राच्चानन्तरं, मुग्धबोधात्तु प्राक् स्थापयाम्बभूव । प्राक्कालिकपाण्डुलिपीनां विज्ञः, शास्त्रेणु कृतभूरिश्रमः राजेन्द्रलालमित्रोऽपि संक्षिप्तसारं संस्कृतस्य दशसु प्रतनव्याकरणेषु गणयाञ्चकार । अमुष्य मते क्रमदीश्वराभिधो वैयाकरणतल्लजोऽयं पुरुषोत्तमवोपदेवसुपद्मेभ्यः पुरातन आसीत्, कातन्त्रसारस्वतव्याकरणाभ्यान्तु संक्षिप्तसारोऽर्वाक्तनः । भट्टिकाव्यस्य भरतमल्लिकविरचितायां टीकायां ग्रन्थोपक्रमश्लोकान् व्याचिख्यासुष्टीकाकारो वैयाकरणान् स्मरन् क्रमदीश्वरं वोपदेवात्प्रागेव निर्दिशतीति तथ्यमाचार्यत्साखारिएमतेऽनुसन्धातॄणां ध्यानमर्हति ।

ननु वैयाकरणः क्रमदीश्वरो हेमचन्द्रवोपदेवयोः पूर्वग आसीत्पश्चाद्भवो वा ? भारतीयपण्डितसंसदि एवंविधः प्रश्नो विशिष्टमादरं नार्हति, किन्तु प्रतीच्यजगतोऽनुसन्धानप्रक्रिया तु ऐतिह्यसमाश्रया । क्रमदीश्वरः स्वग्रन्थे कांस्कान् ग्रन्थकारान् सस्मार, तस्य नाम केषां कवीनां ग्रन्थेषु वीक्ष्यत इति प्रश्नद्वयं तस्य कालनिर्धारणार्थमुपयुज्यतेतमाम् । क्रमदीश्वरो हेमचन्द्रात्पूर्वं पश्चाद् वा संक्षिप्तसारं प्रणिनाय, एतद्विषयकानि प्रमाणानि नोपलभ्यन्ते । हेमचन्द्रं क्रमदीश्वरः कुत्रापि नास्मार्षीत् । धातुपारायणन्त्वसौ निरदिक्षत्, किन्तु कस्य विदुषो धातुपारायणमित्यनिर्दिष्टम् । आचार्यत्साखारिए सन्दर्भेऽस्मिन् बर्लिनमहानगरस्य राजकीयग्रन्थागारे सुरक्षितं हस्तलिखितमेतन्नामकं हेमचन्द्रप्रणीतं ग्रन्थं जानाति स्म । धातुपारायणं नाम बहूनि पुस्तकानि रचितानि । अस्माद्धेतोर्नामिदमैतिह्यविदां कृते गुर्वर्थं नास्ति । उभौ स्वव्याकरणस्योपसंहारेऽष्टमाध्याये प्राकृतं निरूपयाम्बभूवतुरित्यपि उभयोरन्योन्याश्रयत्वं किल प्रतिपादयति । संक्षिप्तसारस्य टीकाकारैरपि हेमचन्द्रो न स्मृतः । न केवलं हेमचन्द्रो, वोपदेवोऽप्यमूभिर्नो निरदेशि । एतद्विपरीतं वोपदेवस्य टीकाकृतः क्रमदीश्वरं निरदिक्षदिति आचार्यत्साखारिएविहितमवेक्षणं गुर्वर्थमस्ति ।

ननु क्रमदीश्वरो वोपदेवात् प्रागभूवेति ऊहन् आचार्यत्साखारिए हेतुद्वयमद्राक्षीत् । संक्षिप्तसारो मुग्धबोधाद्वृहत्तरोऽस्ति, वैदिकप्रयोगाननुपेक्षते च । काशिकाकारात् पुष्पदन्तात्, माघात्, मुरारेस्तु क्रमदीश्वरोऽर्वाग्भव इति अनायासेनोहितुं पार्यते । संक्षिप्तसारे समुपलब्धानामुद्धरणानां रचयितॄणामपरिचयात्, तेषां क्षेपकत्वशङ्कया च ग्रन्थकर्त्तुः सम्यक्तया कालनिर्धारणेऽसौकर्यमुपचीयते । इति शम् ।

(२)

क्रमदीश्वरस्य व्याकरणं वैदिकप्रयोगज्ञानार्थमपि निष्प्रयोजनं नास्तीति सत्यं, किन्तु तस्य चिकीर्षितं छन्दसां पदप्रयोगव्याख्या नासीदित्यपि ध्रुवम् । ग्रन्थस्य मङ्गलाचरणे सर्वभाषासु लक्षणमिति चक्षाणो ग्रन्थकारोऽध्येयं ज्ञापयामास । भाषाग्रहणेन छन्दसां लक्षणपरित्यागः सूचित इति लक्षयँस्तस्य टीकाकारोऽपि चिकीर्षितं विशदीकरोति । संक्षिप्तसारवृत्तौ यजातीत्यादिपदप्रयोगपरिहारहेतुस्तेषां वैदिकत्वे संसूच्य व्याकरणस्यास्य क्षेत्रमुपदर्शितम् । अस्माद्धेतोरस्य अतिपुरातनत्वन्तु स्वत एव निरस्यते ।

क्रमदीश्वरादयोऽति पुरातनेषु काव्यादिषु दृक्पथं नायान्ति । श्रीरामतर्कवागीशो मुग्धबोधस्य स्वोपज्ञटीकायां सांक्षिप्तसारका इति पदेन तान्निर्दिशयामास । केचित् पाणिनीयज्ञाः, केचित्कालापकोविदाः, एके विद्यानिवासा अन्ये सांक्षिप्तसारका इति वैयाकरणानां चतुष्टयमात्मानन्तु पाणिन्यादिमतावलोकनपरं जुघोष । सप्तदशशतकस्य पूर्वार्द्धे दुर्गादासाभिधो विद्वान् मुग्धबोधटीकायां क्रमदीश्वरमतमुल्लिलेख । आचार्य आउफरेख्टः सुबोधाख्यटीकामिमां निर्दिष्टवान् । भरतमल्लिको भट्टिकाव्यस्य टीकायां विष्णुमिश्रश्च सुपद्ममकरन्दे वैयाकरणममुमस्मरताम् । ननु विल्सनमते भरतमल्लिकोऽष्टादशशत्या मध्येऽवर्तत । वोपदेवस्य कविकल्पद्रुममधिकृत्य विपश्चित्कश्चित्परिभाषाटीकां रचितवान् । तत्रापि 'एवमेव धातुपरायणक्रमदीश्वरौ' इति निर्दिष्टः । टीकाकारा इमे पुरातना न सन्तीति तु स्फुटम् ।

सुप्रथितष्टीकाकारो मल्लिनाथो हेमचन्द्रवोपदेवौ निर्दिदेश, न तु क्रमदीश्वरम् । उज्ज्वलदत्तस्तु वैयाकरणानिमान् सर्वान् समुपेक्षाञ्चक्रे । आचार्यत्साखारिएदृष्टावर्वाग्भवानां टीकाकृतामुपेक्षाऽनभिज्ञत्वात्, कामतो वा । संक्षिप्तसारप्रचलनक्षेत्रस्य संकीर्णत्वात् वा । रायमुकुटोऽपि क्रमदीश्वरं कुत्रापि न स्मार्षीदिति विस्मयमावहति नितराम् । तस्य संक्षिप्तसारप्रचलनभुवि वसतेः । कातन्त्ररसवत्याः प्रणेतारं जूमरन्त्वसावुल्लिलेख । रायमुकुटो हेमचन्द्रवोपदेवावपि न जानीते स्मेति प्रतीयते । रायमुकुटक्रमदीश्वरयोरुद्धरणेषु यदभुतं दरीदृश्यते, तस्य को हेतुः ?

क्रमदीश्वरः पाणिनीय आसीदिति त्वप्रत्याख्येयः । पाणिनिकात्यायनयोर्व्याकरणं खलु संक्षिप्तसारस्याधारम् । भट्टिकाव्यस्य अष्टमसर्गस्यैकस्मिन्ने श्लोके भरतः पाणिनीयसूत्रेण साकं

क्रमदीश्वरसूत्रमपि निवेशयति । अभिनवव्याकरणसरणिः क्रमदीश्वरेण न निरमायीत्यत्र आचार्यत्साखरिए किमप्यतर्कसहं खलु नोदीरितवान् । भगवतः पाणिनेरनल्पसंख्यकानि सूत्राणि किञ्चित्परिवर्त्य, मौलिकरूपे वाऽसौ प्रयुयुजे । क्रमदीश्वरोऽत्रापवादो नासीदपरेऽपि अर्वाग्भवानां व्याकरणप्रणेतॄणामेषा प्रवृत्तिः । क्वचिदसौ अष्टाध्याय्याः द्वित्राणि सूत्राणि समाहृत्य सूत्रं प्रणिन्ये, क्वचिदेकं सूत्रं प्रविभज्य भूयशः सूत्राणि निर्ममे । सन्दर्भेस्मिन् आचार्यत्साखरिए पाणिनेर्द्वितीयाध्यायस्य प्रथमपादस्य षष्ठं सूत्रं, तृतीयपादस्योनसप्ततितमं सूत्रञ्च निर्दिशति, ये समाश्रित्य संक्षिप्तसारे बहुशः सूत्राणि व्यरचिषत । सप्तम्यन्तसूत्राणि तु बहुकृत्वः क्रमदीश्वरेणान्यैः शब्दैर्विपरिणतानि । आचार्यत्साखारिए हेतुनाऽमुना क्रमदीश्वरं पाणिनेरनुवादकमिति उदाहर्त्तुमुदसहिष्ट । अधिकार्थवचन इति पाणिनीयप्रयोगस्य स्थाने स्तुतिनिन्दयोः, निर्धारण इत्यस्य स्थाने पृथक्करणे, संज्ञायामित्यस्य स्थाने नाम्नि, क्षेप इत्यस्य स्थाने निन्दायाम् आक्रोश इत्यस्य स्थाने क्षेपे, समः प्रतिज्ञान इत्यस्य स्थाने समः प्रतिज्ञायां स्वकरण इत्यस्य स्थाने स्वीकरण इत्यादिभिः प्रयोगैः क्रमदीश्वरस्य रचनापद्धतिः स्पष्टीभवति । हेमचन्द्रवोपदेवावपि समः प्रतिज्ञायामिति सूत्रमुदाजह्रतुः ।

न केवलं पाणिनीयं, संक्षिप्तसारस्य प्रणेताऽन्यान्यपि व्याकरणपुस्तकानि प्रयुक्तवान् । काशिकान्यासयोरुपयोगस्तु विहित एव, कातन्त्रादीनां व्याकरणानामपि । इत्येके, इत्यन्ये, इत्यनुपादकारः, इति कालापः, इति चान्द्राः, इति न्यासः, इति भागवृत्तिरित्यादिभिः पदैरपरेषां वैयाकरणानां मतमसकृदुदाहृतम् । विरोधिमतं प्रति वैयाकरणोऽसौ सहिष्णुतामदीदृशत् । क्वचिन्न स्यात्, क्वचिदन्यत्रापीति पदैरसौ प्रयोगवैविध्यं प्रति औदार्यं सूचितवान् । अन्यतोऽपि दृश्यत इति सूत्रम् 'अपिशब्दः सर्वोपाधिव्यभिचारार्थः, दृश्यत इति प्रयोगानुसारार्थम्' इति टीकया विशदीकुर्वाणोऽसौ संक्षिप्तसारपक्षस्यासंकीर्णतां व्यजिज्ञपत् ।

क्रमदीश्वरः स्वयमेव सूत्राणां टीकां कृतवानिति भरतमल्लिकोऽपि मेने । भट्टिकाव्यस्य तृतीयसर्गस्थं पञ्चमश्लोकं व्याचिख्यासुरसौ क्रमदीश्वरेण सप्रादिक्लइभ्वस्तिभिश्चेति सूत्रं कृत्वाऽयमेव श्लोको निर्दशित इति व्यजिज्ञपत् । महाराजाधिराजः श्रीमज्जुमारनन्दी नाम व्याकरणविद् भूभृत् टीकां परिष्कुर्वाण इमां किञ्चिद् विस्तारयाम्बभूव । एतदर्थं व्याकरणस्यास्य व्यवहर्त्तारो जौमरा इति संज्ञामापुः । व्याकरणञ्च जौमरम् । क्रमदीश्वरजुमारनन्दिनो वृत्तिमधिकृत्य महापण्डितोपाधियुक्तः श्रीगोयीचन्द्राख्यो वैयाकरणो टीकां विदधे । न्यायपञ्चाननो, वंशीवदनकविचन्द्रः, अभिरामः सर्वविद्यालङ्कारभट्टाचार्यश्च स्वटीकाभिर्व्याकरणमिदमेधयाम्बभूवुः । इति शम् ।

☆

मन्त्रेष्वस्मच्छब्दार्थ-विचारः

स्व० म० म० पं० श्रीगिरिधरशर्मा चतुर्वेदः

ये हि वेदानामपौरुषेयत्वमीश्वरकृतत्वं वास्थिषत, तैर्मन्त्राणामर्थनिर्वचनकाले येषां हृदि मन्त्राः प्रादुर्भूताः, तेषामेव वक्तृत्वमनुसंधेयं भवति। अन्येन प्रकारेणार्थनिर्वाहस्याशक्यत्वात्। न हि "योऽस्मान्द्वेष्टि यं च वयं द्विष्मः" इत्यादौ वक्तारमननुसन्धाय ईश्वरं वा वक्तारमनुसन्धाय अर्थोपपत्तिः सम्भवति, वक्तुरभावे निराधारस्य निर्विषयस्य वा द्वेषस्यासम्भवात्, ईश्वरे द्वेषादि-दोषस्वीकाराच्च। यदि चात्र तत्तत्कर्मसु मन्त्रप्रयोक्ता यजमानादिरेव वक्तृत्वेनानुसन्धेय इति समाधीयते, तथापि बहुत्र तदपि समाधानं न संभवत्येव। तथाहि—

"रमध्वं मे वचसे सोम्याय ऋतावरीरुपमुहूर्तमेवैः।
प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः॥"
(विश्वामित्र ऋषिः नद्यो देवताः, ऋ० ३।३३।५)

विश्वामित्रो नदीः प्रतिब्रूते—ऋतावरीः—ऋतमुदकम्, तद्वत्यो हे नद्यः, यूयं मे—विश्वा-मित्रस्य मम, सोम्याय सोमसम्पादिने, वचसे, तदर्थम्, एवैः शीघ्रगमनेभ्यः, मुहूर्तम्-मुहूर्तमात्रम्-उपरमध्वम्-उपरता भवत। सामान्येन नदीषूच्यमानासु समीहितं प्रयोजनमकुर्वतीषु पुरोवर्तिनीं शुतुद्रीं प्रति ब्रूते - कुशिकस्य राजर्षेः, सूनुः विश्वामित्रोऽहम्, बृहतीमहत्या, मनीषा-मनीषया-स्तुत्या, अवस्युः-आत्मनो रक्षणमिच्छन् सन्, सिन्धुं-शुतुद्रीं त्वाम्, अच्छ—आभिमुख्येन, प्र अह्वे प्रकर्षेण आह्वयामि" इति, अस्य मन्त्रस्य सायणमाधवीयं भाष्यम्। तत्रेतिहासमस्य विश्वामित्र ऋषि सुदासः पैजवनस्य पुरोहितो बभूव, स वित्तं गृहीत्वा विपाट् शुतुद्र्योः संभेदमाययौ, अनुययुरितरे। स विश्वामित्रो नदीस्तुष्टाव "गाधाभवत" इति (निरु० अ० २) इत्यादि निरुक्तमप्यस्य मन्त्रस्य निदानतया प्रवृत्तं पर्यालोच्यम्। अपि च :—

कारुरहं ततो भिषगुपलप्रक्षिणी नना।
नानाधियो वसूयवो नुगा इव तस्थिम-इन्द्रायेन्दो परिस्रव।
आङ्गिरसः शिशुनामा ऋषिः सोमे देवता।
(ऋ० सं० ९।११२।३)

---

* भूतपूर्वः संस्कृतशिक्षाप्रचालकः काशीहिन्दूविश्वविद्यालयस्य।

ऋषिः प्रवृत्तसोमयागः सन् दशापवित्रात् सोमेऽक्षरतिप्रतिबन्धकपापापनुत्तये पुरश्चरितानुकीर्तनपुरःसरमध्येषणां चकार। तावत्—अहं कारुः-स्तोमानां कर्तास्मि ततः-पिता पुत्रो वा, भिषक्-भेषजकृत्—यज्ञस्य ब्रह्मेत्यर्थः। तथा उपलप्रक्षिणी-बालुकासु यवान् हिनस्ति, तथाभूता, यद्वा दृषदादिषूपलेषु भ्रष्टान्. यवान् हिनस्ति—चूर्णयतीति, अथवा धानासक्तुकारम्भादीनां कारिका, नना—माता, दुहिता वा। एवं सर्वेषां परिचरणेन नानाधियः—नानाकर्माणः, वसूयवः-धनकामा वयम्, अनुतस्थिम लोकमन्वास्थिताः स्मः। तत्र दृष्टान्तः—गा इव। गावो यथा गोष्ठमनुतिष्ठन्ति,—स्वपयः प्रदानेन परिचरन्ति वा, एवं वयमपि परिचरन्तः एतत् ज्ञात्वा हे इन्दो! सोम! इन्द्राय परिस्रव—दशापवित्रात् क्षर" इति सायणभाष्यम्। अन्यच्च—

अकारि त इन्द्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्याम्।
सुपेशसं वाजमापरा नः प्रातर्मक्षू धिया वसुर्जगम्यात्॥

(नोधा गौतम ऋषिः, इन्द्रो देवता, ऋ० १ अ ६३।९)

हे इन्द्र, ते—तव, गोतमेभिः—गन्तृतमैरेतत्संज्ञैः ऋषिभिः, अकारिस्तोत्रं कृतमित्यर्थः। एतदेव स्पष्टीकरोति—ब्रह्माणि—मन्त्रजातानि, नमसा, हविर्लक्षणेनान्नेन सह, हरिभ्याम्—अश्वाभ्यां युक्ताय तुभ्यम्, ओक्ता—आभिमुख्येनोक्तानि। यद्वा मर्यादायाभाकारः, यथाशास्त्रम् प्रयुक्तानि। स त्वम् सुपेशसं—बहुविधरूपयुक्तम्, वाजम्—अन्नम्, नः—अस्मभ्यम्, आभर आहर, देहीति यावत्। धिया—बुद्धया, कर्मणा वा प्राप्तधन इन्द्रः, प्रातःकाले अस्मद्रक्षणार्थम्, जगम्यात्—आगच्छतु, इति सायणमाधवीये भाष्यम्। अपरञ्च—

प्रियमेधवदत्रिवज्जातवेदो विरूपवत्।
अङ्गिरस्वन्महिव्रत। प्रस्कण्वस्य श्रुधी हवम्॥

(प्रस्कण्व ऋषिः, अग्निर्देवता। ऋ० १।४५।३)

हे महिव्रत—प्रभूतकर्मन्, जातवेदः—अग्ने! प्रस्कण्वस्य-कण्वपुत्रस्य महर्षेः, हवम्,—आह्वानम्, श्रुधि-शृणु। तत्र चत्वारो दृष्टान्ताः-प्रियमेधात्रिविरूपाङ्गिरोनामकाः। एतेषामाह्वानं यथा शृणोषि तद्वत्। इति सायणमाधवीयं भाष्यम्। अपरमपि—

अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात्।
अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम्॥

(कुत्स आङ्गिरसः ऋषिः, इन्द्राग्नी देवते। ऋ० १।१०९।२)

"हे इन्द्राग्नी, वाम्—युवाम्, भूरिदावत्तरा-अतिशयेन बहुधनस्य-दाताराविति, अश्रवं हि—अश्रौषं खलु। कस्मात् पुरुषात्? विजामातुः—श्रुताभिरूप्यादिभिर्गुणैर्विहीनो जामाता यथा कन्यावते—बहुधनं प्रयच्छति कन्यालाभार्थम्। ततोप्यतिशयेन दाताराविन्द्राग्नी इत्यर्थः। उत वा—अपि च, स्यालात्—स्यालः—कन्याभ्राता, स यथा भगिनीप्रीत्यर्थं बहुधनं प्रयच्छति, ततोऽप्यतिशयेन

दाताराविन्द्राग्नी । घ इति पादपूरणः । तथा च सति अथ–अनन्तरम्, हे इन्द्राग्नी, युवभ्यां सोमस्य प्रयती–अभिषुतस्य सोमस्य प्रदानेन सह, नव्यम्–नवतरम्–प्रत्यग्रम्, स्तोमं–स्तोत्रम्, जनयामि–निष्पादयामि इति सायणमाधवीयं भाष्यम् ।" अग्रेऽपि च—

"आभोगयं प्रयदिच्छन्त एतनापाकाः प्राञ्चो मम केतिदापयः ।
सौधन्वनासश्चरितस्य भूमना गच्छत सवितुर्दाशुषो गृहम् ॥"
(कुत्स ऋषिः, ऋभवो देवताः । ऋ० १।११०।२)

"हे ऋभवः,–अपाकाः—परिपक्वज्ञानाः, प्राञ्चः—पूर्वकालीनाः, मम आपयः–प्रापयितारो मदीया ज्ञातय इति केचित् एवम्भूता ये केचन यूयम्, आभोगयम्–उपभोग्यं सोममिच्छन्तः, यत्–यदा प्र एत न–तपश्चरितुमरण्यं गतवन्तः । ऋभवो हि सुधन्वन आङ्गिरसस्य पुत्राः । तदुक्तं यास्केन– "ऋभुर्विभ्वा वाज इति, त्रयः पुत्राः सुधन्वन आङ्गिरसस्य बभूवुः" (नि० ११।६) इति ।" कुत्सोऽप्याङ्गिरसः । अतस्तेन मदीया ज्ञातय इत्युक्तम् । हे सौधन्वनासः–सुधन्वनः पुत्राः, तदानीम् चरितस्य–समुपार्जितस्य तपसः, भूमना–भूम्ना–बहुत्वेन, दाशुषः–हवींषि दत्तवन्तः, सवितुः–सोमाभिषवं कुर्वतः, यजमानस्य सम्बन्धि यज्ञगृहम्, आगच्छत तपसा लब्धसोमाः सन्तः कृतपाना यूयं गतवन्तः । यद्वा दाशुषः प्रातःसवनादिषु अग्न्यादिभिरपसारितेभ्यः ऋभुभ्यः सोमपानं दत्तवतः सवितुर्गृहं निवासस्थानं तृतीयसवनाख्यमगच्छत–प्राप्ताः" । इति सायणमाधवीयं भाष्यम् ।

एवंविधेषु शतशो मन्त्रेषु तत्तदृषीणामस्मच्छदेन ग्रहणादतिरिक्ता नास्ति कापि गतिः । न हि सर्वः कर्मकाण्डेषु मन्त्राणां प्रयोक्ता कुशिकस्य सूनुर्भवति । नापि सर्वः कारुर्भवति । न वा सर्वस्य नना उपलप्रक्षिणी भवति । "अकारि त" इत्यादौ च स्तोतृत्वेन वक्ता स्वयं, स्वगोत्रं नाम, अन्येषाञ्च स्तोत्राणां निर्दिशति । "नव्यं स्तोमं जनयामि" इति स्वस्य कर्तृत्वं ख्यापयति च । अन्तिमे "मम प्राञ्चः" इति स्तोतव्यं प्रति ब्रुवन् स्वस्य तद्वंशजत्वं ख्यापयति । न ह्येतत्सर्वं सर्वेषु प्रयोक्तृषु संभवति ।

तथैव—

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवाँ एह वक्षति ।
(ऋ० १।१।२)

"इति शुश्रुम धीराणां ये नस्तद् विचचक्षिरे ।" (यजु० अ० ४) इत्यादिषु पौर्वापर्यानुसन्धानादिकं च ऋषीणामेव वक्तृत्वमभिप्रेत्योपपद्यते, नेतरथा । श्रीमाधवाचार्यप्रभृतिभिर्भाष्यकारैरपि च सर्वत्र द्रष्टॄणामेव वक्तृत्वमवलम्ब्य व्याख्यानं कृतम् । इति प्राक्तनभाष्याण्यनुसृत्य द्रष्टॄणामेव वक्तृत्वमनुसन्धाय मन्त्रार्थः प्रतिष्ठित इति सुस्पष्टम् ।

स्वामिदयानन्दप्रक्रियाविचारः

अथ श्रीदयानन्दस्वामिनां भाष्ये तु मन्त्राणामर्थव्यवस्था कापि न दृश्यते, क्वचिदीश्वरो

वदति हे मनुष्याः ! इत्यादि, क्वचिच्च मनुष्या वदन्ति अहं स्तौमि ईडे, प्रशंसामि, इत्यादि। प्रकरणसंगतिरपि न दृश्यते–एकस्मिन्नेव सूक्ते अत्यन्तसन्निहितयोरपि मन्त्रयोः परस्परं कापि संगतिर्नोपलभ्यते, ऋषिदैवतादिव्यवस्थाबोधकानि सर्वानुक्रमणीसूत्रादीनि विनियोगबोधकानि श्रौतसूत्रादीनि च तैर्नाद्रियन्त इति स्पष्टमेव। निरुक्ते श्रद्धावन्तोऽपि तत्र तत्र स्वीये भाष्ये तत्तन्मन्त्रस्य निरुक्तकृतं व्याख्यानमुद्धरन्तोपि तदनुकूलतां स्वकीये व्याख्याने ते न निर्वहन्ति।

जैमिनिमृषिं मन्वाना अपि मीमांसाशैलीं सर्वथैव प्रायेण परित्यजन्ति। ईश्वरेणैव मन्त्रार्था ऋषिभ्यो बोधिताः, ते च ऋषिभिर्ब्राह्मणेषु प्रकाशिताः इति ब्राह्मणानां महत्त्वमुररीकुर्वाणा अपि ब्राह्मणदृष्टां मन्त्रार्थशैलीं दूरमुत्सारयन्ति। शब्दार्थभावार्थयोः सर्वदा सामञ्जस्यमपि सर्वत्र न निरुह्यते। तस्मान्मन्त्रार्थे तेषां स्वातन्त्र्यमेवेत्यगत्या वक्तुमापतति। केवलं व्याकरणे "व्यत्ययो बहुलम्" इति सूत्रं लुप्तोपमालङ्कारश्चाधिक्येन तेषामवलम्बनम्। ततश्चास्मत्प्रकृतविचारविषयीभूतोऽस्मच्छब्दार्थोपि तत्र न व्यवस्थापितः प्रतीयते, तथापि तद्भाष्येऽपि अन्यच्छब्दार्थः प्रवक्तैवेति बहुत्र व्यजत एव। तत्र कतिचिन्निदर्शनान्युपस्थापयामः।

"रमध्वं मे वचसे सौम्याय ऋतावरीरुपमुहूर्त्तमेवैः। प्रसिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सुनुः।३।३३।५।

अत्र स्वादिदयानन्दभाष्यम् –"(पदार्थः)" रमध्वम्–क्रीडध्वम्, मे, मम, वचसे वचनाय, सौम्याय–सोम इव शान्तिगुणयुक्ताय ऋतावरीः–ऋतं पुष्कलमुदकं विद्यते यासु ताः, उपमुहूर्तम्–कालावयवम्, एवैः–प्रापकैर्गुणैः, प्रसिन्धुम्–समुद्रम् अच्छ–सम्यक्, अत्र निपातस्य चेति दीर्घः। बृहती–महती, मनीषा–प्रज्ञा, अवस्यु आत्मनो व इच्छुः, अह्वे–प्रशंसामि, कुशिकस्य–विद्यानिष्कर्षप्राप्तस्य, अत्र वर्णव्यत्ययेन मूर्धन्यस्य तालव्यः। सुनुः–अपत्यमिति वर्तमानः।

भावार्थः - अत्र वाचकलुप्तोपमालंकारः। यथा नद्यः समुद्राभिमुखम् गच्छन्ति, तथैव मनुष्याः विद्या धर्म्यव्यवहारं प्रत्यभिगच्छन्तु, येन सुखेन समयो गच्छेत्, इति।

अत्र उपेत्युपसर्गः क्वान्वेति, इति नैव व्याख्यातम्। "छन्दसि परेऽपि" "व्यवहिताश्च" इति पाणिनिसूत्रानुसारमस्य रमध्वमिति क्रियया सम्बन्धो न्याय्यः। तथैव च निरुक्तकृता "उपरमध्वम् इति विवृण्वता कृतः, ततश्चोपरमधातोः क्रीडध्वमित्यर्थो नोपपद्यते। कुशिकपदे निष्प्रमाणं वर्णव्यत्ययं प्रकल्प्यामि, सूनुशब्दे प्रमाणैरसिद्धामुपमां प्रकल्प्यामि, विश्वामित्रो नदीस्तुष्टाव इति निरुक्तकृदुक्तिमगणयित्वापि सर्वस्मिन्मन्त्रे लुप्तोपमां कल्पनामात्रधारामुद्भाव्यापि कोऽयमात्मनो अव–रक्षणम् इच्छति, को वा प्रशंसामीत्यस्य कर्ता कुत्र वा बृहती मनीषेत्यनयोरन्वयः, इति किमपि न स्पष्टीकृतम्। "नदीवन्मनुष्या विद्या धर्म्यव्यवहारं प्रत्यभिगच्छन्तु" इत्ययं केषां पदानामभिप्रायः? "बृहती" मनीषा इति न द्वितीयाविभक्त्यन्ते उक्ते, ययोः प्रामिह्वये इत्यनेन सम्बन्धः स्यात्। अभिह्वये इत्यस्योत्तमपुरुषस्य मनुष्या गच्छन्त्विति कथं लापनसंभवः? "मे सोम्याय

वचसे' इत्यनेन विद्याधर्मव्यवहारः सिद्ध्यतीति चेत् --क एवमुपदिशति? ईश्वर इति चेत्, न स अवस्युः अव इच्छति, न वा सः कुशिकस्य सूनुरिव। न च तस्य कस्यचित् प्रशंसया प्रयोजनम्। यदि प्रयोक्ता मनुष्यो वदति तर्हि न सर्वोऽपि मनुष्यः स्ववचनमनुसर्तुं सर्वानुपदेष्टुमीष्टे। कश्चिन् मेधावी धार्मिकः पुरुषः उपदिशतीति चेन् मन्त्रद्रष्टा ऋषिरेवोपदिशति, इत्युक्तौ को विरोध आग्रहादृते। अनादित्वभङ्गशङ्काया उभयत्र तुल्यत्वात्। यदि मेधावी धार्मिकपुरुषोत्पत्त्यनन्तरं मन्त्रः प्रवृत्तः तर्हि नानादिः, यदि स उत्पत्तेः पूर्वमेव ईश्वरेणाभिसंहितः, तर्हि विश्वामित्रोऽपि पूर्वमेवाभिसन्धातुं शक्यः, मनुष्याः प्रवाहनित्याः इति चेद् विश्वामित्राद्या अधिकारिणोऽपि तथेति ऋषेः प्रवक्तुरेव वक्तृत्वमत्र तुल्यन्यायात् व्यञ्जितं भवति।

अथ तत्सूक्तान्तर्गत एव तदुत्तरे मन्त्रे "इन्द्रो अस्माँ अरदद् वज्र बाहुरपाहन् वृत्रं परिधिं नदीनाम्, देवोनयत् सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः (ऋ० सं० ३।३३।६)

श्रीदयानन्दभाष्यम् -(पदार्थः) इन्द्रः - परमैश्वर्यवान् राजा, अस्मान्-अरदत् —विलिखेत् वज्रबाहुः - शस्त्रभुजः अप अहन्—हन्ति, वृत्रम् - आवरकमेघं, परिधिम्—सर्वतोधीयन्ते नद्यां नद्यो यस्मिंस्तम्, नदीनाम् देवः दिव्यगुणस्वभावम् अनयत् - नयति, सविता - सूर्यः, सुपाणिः शोभनहस्तः, "तस्य" वयं प्रसवे-ऐश्वर्ये यामः-प्राप्नुयाम्, उर्वी - बहुसुखप्रदाः प्रजाः।

भावार्थः—अत्र वाचकलुप्तोपमालङ्कारः। यथा सूर्यो भूम्यादीनामाकर्षणेन व्यवस्थाप्य वर्षाः कृत्वैश्वर्यं जनयति तथैव वयं सद्गुणानाकृष्याऽरीन् विजित्य राज्यश्रियं जनयेम" इति, एवं व्याख्यातपूर्वेण मन्त्रेण सहास्य न कोऽपि सम्बन्धः तत्र विद्याधर्म्यव्यवहाराभिगमोपदेशः, इह तु शत्रुविजयराज्यश्रियोरभिलाष इति न प्रकरणसंगतिः। नद्यः प्रत्यञ्च इति निरुक्तकारानादरश्च स्फुट एव। अस्मान् अरदत् इति लिखेत् इति को वदति। किं कश्चन शिष्टो दुष्टो वा? शिष्टश्चेत् परमैश्वर्यवान् राजा, तं किमर्थं विलिखेत् हन्यात् ताडयेद्वा। अथ दुष्टः स कथमैश्वर्यमाप्नुयात्? तस्मादस्मानित्यस्य सम्बन्धो नोपपद्यत एव ऋते प्रवक्तुर्वक्तृत्वाश्रयणात्। सर्वश्च परमैश्वर्यवान् राजा वृत्रम्, आवरणं मेघं कथं हन्तुं शक्नुयात्? नदीनाम् इति पदस्य क्वापि सम्बन्ध एव न योजितः, न वा लुप्तोपमापि तत्रोक्ता। तस्मादत्राप्यस्मच्छब्दस्य वक्तृपरत्वाश्रयणेनैव निर्वाहो व्यञ्जितः। एवंविधराजोत्पत्त्यनन्तरं मन्त्रप्रादुर्भावे अनादित्वभङ्गशङ्कापि तदवस्थैव, इति द्रष्टा ऋषिरेव नदीमुखेन वक्तीति कल्पने नास्ति क्षतिः।

अश्रवं हि भूरिदावत्तरा वां विजामातुरुतवाघा स्यालात्।

अथा सोमस्य प्रयती युवाभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम्॥ ऋ० सं० १।१०९।२

श्रीदयानन्दभाष्यम्—(पदार्थः) अश्रवम् शृणोमि (हि) किल (भूरिदावत्तराः) अतिशयेन बहुधनदानप्राप्तिनिमित्तौ (वाम्) एतौ (विजामातुः) विगतौ विरुद्धश्च जामाता च तस्मात् (उत) अपि (घ) (घ) एव अत्र "ऋचि तु" इति दीर्घः। (सोमस्य) ऐश्वर्यप्रापकस्य

व्यवहारस्य (प्रयती) प्रयत्यै प्रदानाय । अत्र प्रपूर्वाद्यमधातोः क्तिन्–तस्माच्चतुर्थ्येकवचने सुपां सुलुगितीकारादेशः (युवाभ्याम्) एताभ्याम् (इन्द्राग्नी) पूर्वोक्तौ (स्तोमम्) गुणप्रकाशम् । (जनयामि) प्रकटयामि (नव्यम्) नवीनम् ।

भावार्थ :—सर्वेषां मनुष्याणां विद्युदादिपदार्थानां गुणज्ञानसम्प्रयोगाभ्याम् नूतनम् कार्यसिद्धिकरम् । कलायन्त्रादिकं विधायानेकानि कार्याणि निर्वृत्य धर्मार्थकामसिद्धिः सम्पादनीयेति ।"

अत्रापि नवीनं सोमं गुणप्रकाशम्, इन्द्राग्न्योः को जनयति ? जनयामीत्यस्य कः कर्ता ? यः ताविन्द्राग्नी जामात्रपेक्षया श्यालापेक्षया चापि अधिकदातृ तमी श्रृणोति स च ऐश्वर्यप्रापकस्य व्यवहारस्य प्रदानाय गुणप्रकाशम् करोतीति मन्त्राक्षरैर्लभ्यते । सोऽयं नेश्वरो भवितुमर्हति, तस्य दानप्राप्त्यादीच्छाविरहात् । न वा सर्वो मनुष्यः, सर्वेषां तादृशगुणप्रकाशजनने असामर्थ्यात् । वैज्ञानिको मेधावी कश्चन पुरुषविशेष एव जनयामीत्यस्य कर्ता सिद्ध्येत, स च मन्त्रद्रष्टा ऋषिरेव प्रधानप्रत्यासत्याग्राह्य इत्यत्रापि वक्तुरस्मत्पदेन ग्रहणं स्वामिभिर्व्यञ्जितम् ।

आभोगयं प्रयदिच्छन्त एतनापाकाः प्राञ्चो मम केचिदापयः ।
सौधन्वनासश्चरितस्य भूमना गच्छत सवितुर्दाशुषो गृहम् ॥

अत्र स्वामिभाष्यम्—(पदार्थः) (आभोगयम्) आसमन्तात् भोगेषु साधुं व्यवहारम् । अत्रोभयसंज्ञान्यपि छन्दांसि दृश्यन्त इति भसंज्ञानिषेधादल्लोपाभावः (प्र) (यत्) यम् (इच्छन्तः) (एतन) प्राप्नुत (अपाकाः) वर्जितपाकयज्ञाः यतयः (प्राञ्चः) प्राचीना (मम) (केचित्) (आपयः) विद्यामाप्तुकामाः (सौधन्वनासः) शोभनानि धनानि धनूंषि येषु ते सुधन्वानस्तेषु कुशला सौधन्नाः (चरितस्य) अनुष्ठितकर्मणः (भूमना) बहुत्वेन, अत्रोभयसंज्ञान्यपीति भसंज्ञाभावादल्लोपाभावः (अगच्छत) (सवितुः) ऐश्वर्ययुक्तस्य (दाशुशः) दानशीलस्य (गृहम्) निवासस्थानम् ।

भावार्थ :—हे गृहस्थादयो मनुष्याः, यूयं परिव्राजां सकाशात् सत्याः विद्याः, प्राप्य क्वचिद्दानशीलस्य सभां गत्वा—तत्र युक्त्या स्थित्वा, निरभिमानत्वेन वर्त्तित्वा विद्याविनयौ प्रचारयत ।" इति

अत्र भावार्थच्छटया प्रतीयते—इश्वर एव वक्ता भाष्यकर्तुरभिमत इति । परं मम इत्यस्य केन सम्बन्ध इति न शब्दार्थे न वा भावार्थे व्यक्तीभवति । तस्य सम्बन्धविचारेऽवश्यं प्रवक्तुर्ग्रहणमपि व्यञ्जितं स्यात् ।" ऋभुर्विभ्वां वाज इति त्रयः पुत्राः सुधन्विन आङ्गिरसस्य बभूवुः । (निरु० ११ अ० २ पा० ४ ख०) इति सौधन्वनासः पदस्य निरुक्तोक्तोऽर्थोऽप्युपेक्षितः । तेनापि प्रवक्तुर्वाक्यमिदमिति स्फुटं स्यात् । परिव्राजां सकाशाद्विद्यां लब्ध्वा धनुषि कौशलप्राप्तिः ततश्च दानशीलस्य निवासस्थाने गमनमिति सर्वमिदं विचित्रमेव । अथापि ऐश्वर्ययुक्तानां दानशीलानामुत्पत्यनन्तरं मन्त्रोऽयं पठितश्चेद्—अनादिता वेदस्य भज्येतैव । पूर्वमेव सर्वज्ञतया ईश्वरेण तदुत्पत्तिं विज्ञाय मन्त्र उपदिष्टश्चेत् तत्तद्व्यक्तीनामप्युत्पत्तिरीश्वरेण पूर्वमेव विज्ञायोपादिश्यतेत्यत्र

को विरोधः ? ततश्च मन्त्रद्रष्टुरेव वक्तृत्वाश्रयणेऽपि न कश्चिद्विरोधः। यथा हि तत्तद्गुणविशिष्टा मनुष्याः पूर्वमेवेश्वरेण विज्ञायन्ते—तथा तत्तन्नामानो व्यक्तयोऽपि पूर्वं कुतो न विज्ञायन्ते ? न हि सर्वज्ञस्य किञ्चिदपि परोक्षं स्यात्। एवं पूर्वमेव भविष्यतो जनाननुसन्धाय सर्वज्ञ ईश्वर उपदिशतीति "अग्निः पूर्वेभिर्ऋषिभिरीड्यः" (ऋ० सं० १।१।२) इति मन्त्रभाष्ये श्रीदयानन्दस्वामिभिः स्पष्टं स्वीकृतम्—

सर्वज्ञेनेश्वरेण स्वकीयज्ञानान्मनुष्यज्ञानापेक्षयाऽतीतान् वर्तमानांश्चर्षीन् विदित्वास्मिन्मन्त्र उपदिष्टे सति नैव कश्चिद्दोषो भवितुमर्हति, वेदस्य सर्वज्ञवाक्यत्वात्। इति। एवं चेतरमनुष्य-मुखेनेश्वरेण ते त उपदेशाः प्रयोजिताः—इति कल्पनापेक्षया द्रष्टॄणामृषीणामेव मुखात्प्रयोजिता इत्येव कल्पनं साधु भवतीति स्वामिभाष्यमपि नात्र विशेषेण प्रतिकूलं भवति। तथासत्यर्थनिर्वाहश्च सम्यग्भवतीत्युपदर्शितमेव।

निदर्शनमात्रमिदम्, पर्यालोचने शतशः स्थानानि तादृशानि, यत्र द्रष्टुर्वक्तृत्वमप्रकल्प्य अर्थनिर्वाहो न शक्यत एव कर्तुम्। न च तथा प्रकल्पने कोऽपि विरोधो भवति, अपौरुषेयत्व-वादिनोऽपि तम्मुखादीश्वर एवं प्रकाशयति इति समाधातुं शक्नुवन्ति, ईश्वरस्यापि न वक्तृत्वमिति मन्यमाना मीमांसका अपि भूतं भवद् भविष्यदिति सर्वं वेदेन प्रकाश्यत इत्यभ्युपगच्छेयुरेव, तस्माद्भविष्यतामपि वक्तृत्वानुसन्धानं न विरुद्धमिति सम्यक् पर्यालोच्यम्।

पुनः प्राचीनरीत्या विचारशेषः

बृहदारण्यकोपनिषद्भाष्ये (अ० २। ब्रा० ५।१७ कण्डि) च मधुविद्याप्रसङ्गे—

"आथर्वणायाश्विना दधीचे" त्यादिमन्त्रं व्याचक्षाणाः श्रीशंकरभगवत्पादा अपि—"हे अश्विनाविति मन्त्रदृशो वचनम्" इत्याहुः। तदेव च तुल्यन्यायेन अन्यत्राप्यनुसन्धेयं स्यादिति नात्र विवादावसरः।

"यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति।"

(नि० दै० का० ७)

"एवमुच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति"

(नि० दै० का० अ० ७)

इत्यादीनां भगवद्यास्कोक्तीनां च स्पष्टमिदमेव तात्पर्यम्। तथा च द्रष्टॄणाम् ऋषीणामेव वक्तृत्वं सर्वत्रानुसन्धेयं भवतीति निर्विवादम्। परं क्वचिद् द्रष्टा ऋषिरन्यमुखेन वक्तव्यम् प्रकाशयति। काव्येषु या कविनिबद्धवक्तृणामुक्तिर्दृश्यते, यां च ध्वनि भेदप्रसङ्ग आलंकारिकाः "कवि-प्रौढोक्तिसिद्धोऽर्थः" "कविनिबद्धवक्तृप्रौढोक्तिसिद्धोऽर्थः" इति पृथग् गणयन्ति, सा प्रक्रिया वेद-मुपजीव्यैव प्रवृत्ता।

पिप्पल्यः समवदन्तायतीर्जननावधि ।
यं जीवमश्नामहे न स रिष्यति पूरुषः ॥
(अथर्वसं०का० ६ सू० ९ म० २)

आयतीः दीर्घाः पिप्पलीनामिका ओषधयः, समवदन्त -- परस्परं संवादं चक्रुः । किमिति तदाह—जननावधि जन्मतः प्रभृति, यं जीवम् अश्नामहे—प्राप्नुयाम्, योऽस्मान् जन्मतः प्रभृति सेवते । स पूरुषः न रिष्यति – क्लिष्टो न भवति । रोगं न प्राप्नोतीति भावः ।"

अत्रोत्तरार्द्धं पूर्वार्धस्यान्तिमं च पदं पिप्पलीनामुक्तिः ।

किञ्च —

"औषधयः संवदन्ते सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ॥"
(भिषग् ऋषिः, ओषधयो देवता ऋ० १०।१७।४२)

"इन्द्रो अस्मां अरदद् वज्रबाहुरपाहन् वृत्रं परिधिं नदीनाम् ।
देवो नयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः ॥"
(नद्यः ऋषिकाः, विश्वामित्रः प्रतिपाद्यः । ऋ० ३।३३।६)

इत्यादिषु शतशो मन्त्रेषु भूरि भूरि प्रक्रियेयमाम्रेड्यते । तदनया प्रक्रियया निबद्धेषु मन्त्रेषु सूक्तेषु वा बहुत्र द्रष्टॄणामृषीणाम् स्थाने तन्निबद्धानां वक्तॄणामेव नाम ऋषित्वेन व्यवहृतं दृश्यते । त एव च भवन्ति तत्रास्मच्छन्दग्राह्याः । इति ।

तदेतत्स्पष्टीकृतं श्रीगुरुचवर्णैर्विद्यावाचस्पतिश्रीमधुसूदनशर्ममैथिलैः "महर्षिकुलवैभवे ।" तदुक्तान् मन्त्रान् भाष्यव्याख्यया संयोज्यात्रोदाहरामः स्पष्टप्रतिपत्तये ।

"सर्वथाऽपि येनायं मन्त्रोऽर्थं दृष्ट्वोपदिष्टः सोऽस्य मन्त्रस्य ऋषिरुच्यते । ऋषिभिरेवैते मन्त्राः पुरोपदिष्टाः । तस्मात् पारोवर्यविदोऽमीद्रष्टार एवैतेषां मन्त्राणां प्रवक्तारः ऋषयः प्रायेण दृश्यन्ते । क्वचित्पुनरनृषयोऽप्येषामृषयो निर्दिश्यन्ते । वक्तृत्वेन विवक्षणात् । तेषु चेदमृषित्वं गौणं द्रष्टव्यम्, काल्पनिकत्वात् । तथा हि पञ्चविधो मन्त्राणां वर्गो भवति—१—भाववृत्तम् । २ — देवस्तवः ३ —वक्तात्मस्तवः । ४ - देवात्मस्तवः । ५ – कयोश्चित्संवादो वेति । तत्र सृष्टिक्रम-निरूपणं भाववृत्तम् । प्राणदेवानां स्वरूपधर्मप्रदर्शनं देवस्तवः । तयोरयं मन्त्रप्रवक्तैव ऋषिः । द्रष्टृत्वाच्च वक्तृत्वाच्च । देवता तु तत्र सृष्टिविश्रयो वा प्राणदेवा वा । वक्तात्मस्तवेऽपि अयं मन्त्रप्रवक्ता आत्मानं स्तौतीति स एव स्यादृषिश्च देवता च । अथ चतुर्थे देवात्मस्तवे तु मन्त्रप्रवक्ता प्रतिपाद्यं देवं तद्देवमुखेनैव स्तावयति । तत्र तस्य प्राणदेवस्यैव वक्तृत्वेन विवक्षणात् स एव स्याद् ऋषिश्च देवता च । मन्त्रप्रवक्तुस्तु वक्तृत्वेऽपि तत्र [illegible]

एवं पञ्चमे संवादेऽपि मन्त्रप्रवक्तुर्ऋषित्वमपह्नूयते। ययोस्तु संवादो वर्ण्यते, तयोर्मध्ये वक्तुर्ऋषित्वम् सम्बोध्यस्य च देवतात्वमिति पर्यायेणोभयोर्ऋषित्वं देवतात्वं च विवक्ष्यते इति। तदुक्तं बृहद्देवतायाम्—

"नवकः प्रथमस्त्वासाम्" (इत्यादि पूर्वोक्तम्)।

इन्द्रः सीतां निगृह्णातु तां पूषानुयच्छतु।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम्॥

(वामदेव ऋषिः, सीता देवता। ऋ० ४।५७।७)

सीताऽत्र हलपद्धतिः—हलेन भूमौ कृता रेखा। साऽत्र मन्त्रे स्तूयते। इमां सीतां हलकृतां रेखाम्, इन्द्रः वृष्टिकर्ता देवः, निगृह्णातु अनुगृह्णातु पूषा च देवः, अनुयच्छतु – खाद्यं ददातु– अत्रैवान्नमुत्पादयत्वित्यर्थः। सा पयस्वती – सस्यशालिनी सीता, उत्तरामुत्तराम् समाम् प्रत्येकमाश्रमेषु वर्णेषु, नः अस्मभ्यम्, दुहाम्—अन्नादिकं दोग्धु।" इति।

भाष्यकृन्माधवाचार्यस्तु आधारकाष्ठं सीतेत्याह। अत्र रेखादिकं जडपदार्थः किमिति स्तूयते? किं स शृणोति? इत्याद्यानां शङ्कानां तत्र तत्राभिमानिनी देवता स्तूयते, इत्येव शिष्टसम्मतं समाधानम्। अभिमाननी देवता च सर्वत्रानुस्यूता देवरूपा प्राणशक्तिरेव! तस्मादुक्तासु विधासु द्वितीयविधायाम् देवस्तवेऽन्तभवत्ययं मन्त्रः। रामदेवः सीतां स्तौतीति प्रकृते तात्पर्यम्।"

अथ प्रजापतेरङ्गिरसः पुत्री दिव्यस्याङ्गिरस्य भगिनी दक्षिणा नाम्नी ऋत्विग्भ्यो दीयमानां दक्षिणां स्तौति –

तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम्।
स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध॥"

(अत्र दक्षिणा ऋषिका, दक्षिणा चान्या देवता। ऋ० १०।१०७।६)

अत्र माधवाचार्यः—"तमेव दक्षिणायाः दातारम्, ऋषिम्—अतीन्द्रियार्थदर्शिनम् सत्कर्मकरणेन ऋषिमित्याहुः। तथा तमु—तमेव ब्रह्माणमाहुः। किं च तमेव यज्ञन्यम्—यज्ञस्य नेतारम्—अध्वर्युमित्याहुः। तमेव सामगाम् साम्नां गातारमिति, तथा उक्थशासम् —शस्त्राणाम् शंसितारं होतारं ब्रुवन्ति। दक्षिणादानेन तत्तत्कर्मणः परिग्रहात्। स दाता, शुक्रस्य दीप्यमानस्य ज्योतिषः, तिस्रः तन्वः अग्निवैद्युतादित्यात्मकानि त्रीणि शरीराणि, वेद—जानाति। यद्वा शुक्रस्य–दीप्तस्याग्नेः आहवनीयाद्यात्मकानि त्रीणि शरीराणि जानाति। प्रथमो मुख्यो योजनः दक्षिणया रराध ऋत्विगादीनाराधयति। अत्र यद्यपि दक्षिणैव ऋषित्वेन दक्षिणैव च देवतात्वेनोच्यते, तथापि आत्मस्तवोऽत्रेति शंका न कार्या। दक्षिणापदार्थस्योभयत्र भिन्नत्वात्।" तस्मादयमपि देवस्तव एवान्तर्भवति।

अथागस्त्यदृष्टेऽगस्त्येन्द्रसंवादे —प्रथमायामगस्त्य ऋषिरिन्द्रो देवता । द्वितीयस्यामिन्द्र ऋषिरगस्त्यो देवता ।

किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव ।
तेभिः कल्पस्व साधुया मा नः समरणे वधीः ॥

(ऋ० १।१७०।२)

अत्र माधवाचार्यः –"इदमगस्त्यवाक्यम् । हे इन्द्र नोऽ स्मानमपराधिनः, किं निहन्तुमिच्छसि । कथमवध्यत्वमत आह मरुतस्तव भ्रातरः—त्वया भोगदानेन भरणीया इत्यर्थः । अतो वयमवध्या इत्युक्तं भवति । मरुतामिन्द्रभ्रातृत्वमेकस्मिन्नेव दितिगर्भे उत्पन्नत्वात् । सा चोत्पत्तिः पुराणेषु प्रसिद्धा । सन्तु भ्रातरः, ततश्च किमित्याह –तेभिः —तैर्मरुद्भिः सह साधुया साधुत्वं कल्पस्व हविर्भागान्, तैः सह युद्धं वा, नः—अस्मान्,— समरणे – संग्रामे, मा वधीः – मा हिंसीः । यद्वा क्लृप्तेर्दृष्टान्तः—संग्रामे यथा विरोधिनं हंसि न तथा ।"

किन्नो भ्रातरगस्त्य सखा सन्नति मन्यसे ।
विद्या हि ते यथा मनोऽस्मभ्यमिन्न दित्ससि ॥

(ऋ० १।१७०।३)

इदमिन्द्रवाक्यम् । हे भ्रातः हे अगस्त्य, हविःप्रदान वरप्रदानाभ्यां परस्परोपकारकत्वात् भ्रातृत्वम् । तादृशस्त्वं सखा सन् अस्मद्धितकार्यपि सन्, नोऽस्मान्, किमति मन्यसे — कस्मादपराधादतिक्रम्य मनुषे अपलपसि । नायमपलापः, किन्तु तथ्यमेवेति चेदुच्यते - मन्तव्यं ते - तव, मनो —मानसम्, यथा यथावत, विद्मः—जानीमः । कथं जानीथेति उच्यते – अस्मभ्यमिन्न दित्ससि अस्मदर्थं निरुप्तमस्मभ्यं दातुं नेच्छसि एव । अत्र संवादः स्पष्टः । तत्र वक्ता ऋषिर्भवति, बोद्धव्यश्च देवता ।

यद्यपि सूक्तो यमगस्त्यदृष्ट एव, परमिन्द्रो यत्रागस्त्येन वक्ता कल्पितः । इन्द्रमुखेन यद् वाचितम् —द्वितीयमन्त्रादिकम् तत्रार्थसंगतये इन्द्रस्य वक्तृत्वापरपर्यायमृषित्वमनुसन्धेयम् भवति ।"

अथेयमम्भृणसुता वाङ्नाम्नी ऋषिका त्रैलोक्यव्यापिनीं वाचं नाम देवीं तस्या एव मुखेन स्तौति । तत्राम्भृण्या ऋषित्वं सदपि निवर्त्यते । देवताया एव च वाचोऽष्टर्चेन सूक्तेनात्मस्तव ऋषित्वं विवक्ष्यते । तया वाम्भृण्या अभेदोपचारादाम्भृण्या पुनरन्यदृषित्वमौपचारिकमापद्यत इति विशेषः ।

"अत्रापि वाक्शब्दप्रतिपाद्यावर्थौ भिन्नौ । अम्भृणस्य ऋषेर्दुहिता वाङ्नाम्नी मनुष्यरूपा वक्त्री ऋषिका ।" जगदुपादानभूता व्ययपुरुषकला ब्रह्मस्वरूपान्तःप्रविष्टा तु वाक्प्रतिपाद्या देवता । परम् ऋषिरूपा वाक् देवतारूपया वाचा आत्मनो अभेदं साक्षात्कृत्य ब्रवीति इति मन्त्रेषु अहं

शब्देन देवतारूपा वागेव गृह्यते। अभेदोपचाराच्च अम्भृणसुताया वाच एव ऋषित्वं व्यवह्रियते।"
तद्यथा--

"अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा विभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥"

(ऋ० सं० १० म० १२५ सू० १ म)

"अहं सूक्तस्य द्रष्ट्री वाक्, आम्भृणी, यद् ब्रह्म जगत्कारणं —तद्भूता भवन्ती, रुद्रेभिः— रुद्रैरेकादशभिः तदात्मना चरामि। एवं वसुभिरित्यादौ तत्तदात्मना चरामीति योज्यम्। एवं च मित्रावरुणेत्यत्र उभा उभावहमेव ब्रह्मीभूता, बिभर्मि - धारयामि। उभा उभावाश्विनावहमेव धारयामि। मयि सर्वं जगत् शुक्तौ रजतमिवाध्यस्तं सद् दृश्यते। माया च जगदाकारेण विवर्तते। तादृश्या मायाया आधारत्वेन असंगस्यापि ब्रह्मणः उक्तस्य सर्वस्योपपत्तिः इत्यादि।

तदेतेषु सन्दर्भेषु ऋषिदेवतादीनामस्मच्छब्दवाच्यता सिद्ध्यति।



अस्माकं जीवने मीमांसादर्शनस्य प्रभावः

आ० पट्टाभिरामशास्त्री*

शमार्थं सर्वशास्त्राणि निर्मितानि मनीषिभिः ।
य एव सर्वशास्त्रज्ञस्तस्य शान्तं मनस्सदा ॥

इति वैयासिकेन वचसा समेषां दर्शनानां परममुद्देश्यं शान्तेरवाप्तिरिति स्पष्टमवगच्छामः । आस्तिक-नास्तिकभेदेन प्रवृत्तानि दर्शनानि कामं विभिन्नेषु मार्गेषु गच्छेयुः, कामञ्च तानि मिथो विरुद्धानीव परिलक्ष्येरन्, किन्तु समाहितमनसो विमृशन्तो विपश्चितः विरोधमिमम् अपरिहार्यं नानुमन्येरन् । तत्र दर्शनेषु मीमांसा-अतिविस्तृतकलेवरा वाक्यार्थनिर्णयायैव प्रवृत्ता सर्वैरेव दर्शनैराद्रियमाणा विशिष्टं स्थानमावहति । मीमांसा नाम पूज्यो विचारः । विचारद्वारा विविधान् विवादान् लौकिकान् वैदिकांश्च प्रशमयितुं सहस्रसङ्ख्याकान् न्यायान् प्रदर्शयति । न्यायनिबन्धनात्मकमिदं दर्शनम् । विश्वस्मिन् जगति विशेषतः पवित्रतमे भारते जनिमातस्थुषा मानवमात्रेण न्यायानां सम्मुखं नतमस्तकेन भवितव्यमिति नियता स्थितिः । मीमांसायाः प्रवर्त्तको महर्षिर्जैमिनिः सहस्रेणाधिकरणैर्मीमांसां सूत्रैर्जग्रन्थ । एकैकमप्यधिकरणम् एकैकस्य न्यायस्यावबोधकम् । अधिकरणं न्यायालयश्चेत्यनर्थान्तरम् । विवादग्रस्ते विषये न्यायालयमुपस्थिते विचारपतिर्विषयं तत्र जायमानं संशयं संशये वादिप्रतिवादिभ्यां समुपस्थाप्यमानानि प्रमाणानि द्वाभ्यां दीयमाना युक्तीश्च साधु पर्यवेक्ष्य निर्णयमुद्घोषयतीति, यः क्रमोन्यायालये, स एव मीमांसाधिकरणेष्वपि । तत्तदधिकरणसिद्धा न्यायास्समाजे जायमानानां सांस्कृतिकविवादानां प्रशमने महान्तमुपकारमादधते । न केवलं सांस्कृतिकानामेव किन्तु लौकिकानामपि नैकविधानां विवादानां प्रशमने न्याया इम उपयुज्यन्ते । अहञ्च सुदृढं वक्तुं प्रभवामि—यद् मीमांसायाः प्रवर्तयिता जैमिनिः महान् विचारपतिः, श्रेयांश्च न्यायाधीशः । प्राधान्येन भारते संस्कृतिरसमाश्च्योतयितुमेव तस्य जीवनमासीदिति । स च निखिलप्रमाणमूर्धन्यान् सर्वानेव निगमान् नानाविधैः न्यायाभिधानमन्थानैर्निर्मथ्य संस्कृतिसुधां सर्वान् पाययति । पवित्रविचारधारया सर्वत्र यथाधिकारं समत्वदृष्टिमाधातुं मानवान् प्रेरयति ।

* ४।७ हनुमद्घट्टम् – वाराणसी ।

तैस्तैः प्रान्तैः विविधाभिर्भाषाभिः अनेकविधैराचारैः संस्कृतिभिस्सिद्धान्तैश्च भिन्नानपि मानवान् सुदृढेन वैदिकेन सूत्रेण प्रबध्य गन्तव्यदेशं प्रापयति। वेदसम्बन्धीनि वाक्यानि विचारयितुं प्रवृत्तोऽपि तत्र तत्र सूत्रेषु 'लोकवत्' 'यथालोके' 'लोकभूतेषु' 'लोके कर्माणि वेदवत्' इति बहुशो लोकशब्दं प्रयुञ्जानो वैदिक्या संस्कृत्या लोकं भूषयति। वैदिकार्थनिर्णयायाविष्कृता न्याया लौकिकविवादप्रशमनायाप्युपयुज्यन्त इत्यवबोधयति। अधुना दैवबलेन सन्नायकानां गांधी-नेहरूप्रभृतीनाम् अनुपमेनोद्यमेन च भारते जनिमातस्थिवानेकैकोऽपि स्वातन्त्र्यसुखमनुभवति। स्वातन्त्र्यस्यानितरसाधारण्यमापादयितुं सामाजिकैर्मीमांसान्याया अनुसरणीयाः। स्वातन्त्र्यं हि नाम न स्वाच्छन्द्येन वर्तनम्, किन्तु स्वस्वाधिकारानुसारेण नियतां मर्यादामनुल्लङ्घ्य मिथो भेदजनकेषु भाषादिषु सत्स्वपि तानविगणय्य भारतीयत्वेनैक्यबुद्धिमास्थाय परस्परं सौहार्देन सौमनस्येन भ्रातृभावेन प्रेम्णा च वर्तनमेव स्वातन्त्र्यस्यानितरसाधारण्यम्। अत्र चानेके मीमांसान्याया वर्तन्तेऽनुकूलाः। 'लोकवत्परिमाणतः फलविशेषस्स्यात्' इति सूत्रयन् जैमिनिः लघु-गुरु-गुरुतर-गुरुतमेषु कर्मसु व्यापृतैर्मानवैः तत्तदनुकूला एव फलविशेषा लब्धव्या भवन्तीत्युपदिशति। तत्तदनुष्ठीयमानकर्माधीनैव फलप्राप्तिरिति निश्चये सति, मानवानां कलहस्य सत्याग्रहस्य धर्मघटस्य वा क्वावसरः ? कलहादिस्तु स्वातन्त्र्यविघटकः। न्यायोऽयमर्थवादाधिकरणसिद्धः।

होलाकाधिकरणे विमृश्यमाने साध्विदं प्रतिभाति—यत्, तत्तत्प्रान्तभेदेन लोकैरनुष्ठीयमानेषु होलाकाद्याचारेषु समेषां समं प्रामाण्यमिति न्यायः। अनेन न्यायेन दिक्–प्रान्त–सम्प्रदायादिकृतो भेद औपाधिको न तु वास्तविकः, उपाधौ निवृत्ते सति सर्वमेकमेव सिध्यति। सर्वोऽपि भारतदेशोऽखण्ड एवेति बुद्धिजननायैवायं न्यायः। प्राच्यत्वोदीच्यत्वाद्युपाधिपिशाचिका अनेन न्यायेन समुत्सार्यन्ते। उपाधिग्रस्ता एव कलहादिदुष्कर्मसु प्रवर्तन्ते। तेन च स्वातन्त्र्यविघटनम्। अन्ततः किमिदं प्राच्यत्वमुदीच्यत्वं वा ? न हीदं प्राच्यत्वादिकं निष्कृष्य निर्वक्तुं शक्यम्। प्राच्यां जातः, प्राचीं गतः, प्राचीतस्समागत इत्यादिषु निर्वचनेषु व्यभिचारमनुभवामः। अत्रेदं जैमिनेस्सूत्रम्— 'अपि वा सर्वधर्मस्स्यात् तन्न्यायत्वाद्विधानस्य' इति। अत्र 'सर्वधर्मस्स्यात्' इति प्रयुञ्जानस्सूत्रकारो देशस्य समाजस्य चाखण्डत्वमवबोधयति।

एवं समानकल्पन्यायः कश्चन षष्ठाध्यायसिद्धः। दीर्घकालसाध्यं समृद्धिफलकं बहुयजमानकर्तृकं कर्म सत्रमित्युदीर्यते। अस्मिन् सत्रे समानकल्पानामेवाधिकारस्साधितः। वासिष्ठा वा भारद्वाजा वा अन्ये वा पृथक्-पृथक् सम्भूय सत्रमनुतिष्ठेयुः। वासिष्ठानां भारद्वाजादीनाञ्च सम्मिश्रणे कर्म विगुणं स्यात्। अतस्समानकल्पा एव सम्भूय यजेरन्। अत्रेदं जैमिनेरनुशासनम्— 'सन्निपाते वैगुण्यात्प्रकृतिवत्तुल्यकल्पा यजेरन्' इति। सत्रवदेव प्रजातन्त्रमपि। सत्रेऽस्ति कश्चन गृहपतिः। अस्य च चयनं सत्रानुष्ठातारस्सर्वेऽपि सम्भूय कुर्वन्ति। गृहपतिश्चान्येभ्यो योग्यतानुसारेण आध्वर्यवहौत्रादिकार्याणि विभजति। ते च यजमाना अपि सन्तो गृहपतिप्रदत्तं कार्यं यथावत्सम्पा-

दयन्ति । अयमेव क्रमः प्रजाभिः कल्पिते तन्त्रेऽप्यस्तीति सर्वस्वसंवेद्यम् । अत्रापि प्रजातन्त्रात्मके सत्रे भिन्नकल्पानां नाधिकारः । किन्तु समानकल्पानामेव । भिन्नकल्पैरवलम्बिते प्रजातन्त्रविधौ बहुत्र वयं वैगुण्यमपश्याम ।

एवं चतुर्थेऽध्याये लिप्सान्यायः कश्चन । अनेन न्यायेन यथानियममर्जितानां द्रव्याणां पुरुषार्थत्वं व्यवस्थापयन् जैमिनिः पुरुषार्थेषु कार्येषु क्रतूनामपि सत्त्वात् तत्र न्याय्येन पथार्जितानां द्रव्याणां विनियोगं साधयति । प्रजातन्त्रमस्माकं क्रतुस्थानापन्नमिति हेतोः तत्र न्याय्येन मार्गेणार्जितानामेव विनियोग आपतति । तेन प्रजातन्त्रसत्रस्यानुष्ठानावसरे प्रजाभिः प्रजाद्वारा नियुक्तैरधिकारिभिश्चानुचितेन मार्गेण द्रव्यार्जनं न कर्तव्यमिति सिध्यति । अन्यथा प्रजातन्त्रस्य व्याहतिर्भवेत् इत्ययं न्याय उपदिशति ।

एवं तत्तत्फलविशेषसाधकेषु कर्मसु फलकामनामात्रेण लोकानामधिकारो वा उत सामर्थ्यानुसारेण तत्राधिकारो वेति संशयमुत्थाप्य सकलाङ्गसहितप्रधानानुष्ठानसमर्थस्यैव क्रतुष्वधिकारस्साधितः षष्ठे तिर्यगधिकरणे । अनेन न्यायेन प्रजातन्त्रेऽपि तस्य तस्य विभागस्य स एवाधिकारी नियोक्तव्यः यश्च समग्रं तं विभागं यथायथं परिचालयितुं समर्थः । पदलाभकामनामात्रेण नियोगे सति प्रजातन्त्रकार्यं विघटितं स्यादिति सिध्यति । एवमनेके मीमांसान्याया जीवनोपयोगिनो विद्यन्ते । तान् प्राप्तेऽवसरे यदा कदा वा विवेचयितुमिच्छन्नुपसंहरामि ।



कर्मबन्धनं कर्मस्वरूपञ्च

सोहम् श्रीभरतमिश्रः*

यद्यपि सर्वं खल्विदं ब्रह्मेति सिद्धान्तात् संसारे यत् किञ्चिद् वस्तु प्रतिभाति तत्सर्वं ब्रह्मातिरिक्तं नान्यत्—किमपि वर्तते तथापि स्थूलेन्द्रियगोचरा दृश्य-सृष्टिपदार्था अध्यात्मशास्त्र-दृष्ट्या विविच्यमाना नित्यानित्यरूपेण विभागद्वये विभक्ता भवन्ति। तत्रैकस्मिन् पदार्थविभागे यन्नामरूपात्मकं दृश्यं धीन्द्रियगोचरं तदनित्यम् परिणामित्वात्। द्वितीयं चादृश्यं—नामरूपाच्छादितं धीन्द्रियागोचरं यत्सूक्ष्मातिसूक्ष्मं तन्नित्यं परमात्मतत्त्वात्। यथा रसायनशास्त्रे भौतिकपदार्थान् पृथक्-पृथक् कृत्वा तद्घटकद्रव्याणि विभज्य पृथक्-पृथक् क्रियन्ते तथा नेमे नित्यानित्यद्रव्ये विभज्य धीन्द्रियगोचरे पृथक्-पृथक् कर्त्तुं शक्येते। परन्तु ज्ञानदृष्ट्या ते नित्यानित्यद्रव्ये पृथक् पृथक् कृत्वा शास्त्रीयोपपादनसौविध्यार्थं ब्रह्ममायेति नामद्वयेन विभक्तुं शक्येते। तत्र ब्रह्म मूलतो नित्यं सत्यं चास्ति। नेदं ब्रह्म—केनाप्युत्पादितं नापि परिणामि। यथाह—भगवान् श्रीकृष्णः—"अच्छेद्योयमदाह्योयमक्लेद्योऽशोष्य एव च। नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः।" गीता–२–२४। तदिदं ब्रह्म नामरूपादिभिरमर्यादितं नित्यं शुद्धं बुद्धं स्वतन्त्रमविनाशि, सृष्टेराधारभूतं परमाराध्यं ज्ञेयं ज्ञानगम्यममृतमात्मतत्त्वमस्ति। तथाप्येतन्मानवानामात्मतत्त्वं दृश्यसृष्टेरन्यान्यवस्तुवत् नामरूपात्मकैर्देहेन्द्रियादिभिराच्छादितं वर्तत एव। इदं च देहेन्द्रियादिकं नामरूपात्मकं विनश्वरं दुःखप्रदमेव। अतो मानवान्तःकरणे निसर्गतः स्पृहा जायते कथं दुःखविनिर्मुक्तः प्राप्नुयाममृतत्वं सुखं चैकान्तिकमात्यन्तिकं चेति।

अस्या इच्छायाः पूर्त्तये ब्रह्मजिज्ञासा भवति। ब्रह्म, आत्मा, पुरुषः, सच्चिदानन्दः, भगवान् इत्यनर्थान्तरम्। वेदान्तशास्त्रदृष्ट्या एक एवात्मा पिण्डस्थो जीवात्मशब्देन, ब्रह्माण्डस्थश्च परमात्मशब्देन व्यवह्रियते। यदि द्वयोः पिण्ड-ब्रह्माण्डयोर्मूलभूतो नित्यः स्वतन्त्र एक एवात्मास्ति तदा सहजः प्रश्नः समुत्पद्यते—पिण्डस्थस्यात्मनो जीवात्मनो ब्रह्माण्डस्यात्मनः परमात्मनो ज्ञाने

---

* राष्ट्रपतिसम्मानितो विहारप्रान्तान्तर्गतछपरामण्डलवास्तव्यः। डी० ३६।२४९ अगस्तकुण्डा, वाराणसी।

का बाधा वर्त्तते ? कथं च साऽपनेया ? एतस्य प्रश्नस्य समाधानाय नामरूपादीनामावरकाणां विवेचनं प्रथमं विधातव्यम् । यतो वेदान्तशास्त्रदृष्टौ सर्वेषां पदार्थानां द्वयोरेव विभागयोरन्तर्भाव एकं ब्रह्म द्वितीयं च मायात्मकं नामरूपादिकमावरणम् । अस्य च नामरूपाद्यात्मकस्यावरणस्य क्वचिद् घनत्वात् क्वचिद् विरलत्वाच्च संसारे सचेतनाचेतनव्यवहारः । सचेतनेषु चाण्डज-पिण्डजोद्भिज्जस्वेदजादिषु पशुपक्षिमनुष्यसुरासुरयूकालिक्ष-वृक्षलतादिचतुरशीतिलक्षयोनिभेदाः सन्ति ।

यद्यपि सर्वव्यापि ब्रह्म सर्वत्र स्थले, लोष्ठे, प्रस्तरे, जले, वायौ, पिण्डे, ब्रह्माण्डे च वर्त्तते तथापि यथैको दीपो लौहमञ्जूषायां काचमञ्जूषायां च न्यस्तः स्वच्छताया न्यूनाधिकतया प्रकाशेऽन्तरं भवति तथैकमप्यात्मतत्त्वं नामरूपाद्यात्मकस्याऽऽवरणस्य तारतम्यात्सचेतनाचेतनरूपं भेदद्वयं भवत्येव । अस्मादेव कारणात्सचेतनेष्वपि मनुष्यपशुपक्षियूकालिक्षादिषु ज्ञानतारतम्यं जायते । सत्यमेतद् यत् सर्वत्रैक एवात्मास्ति तथाप्युदासीनवदासीनो निर्गुणोऽयमात्मा मनोनेत्रादिधीन्द्रियं करचरणादिकर्मेन्द्रियं बुद्धि देहादिसाधनं विना न किमपि कर्त्तुं स्वयं शक्नोति ।

इमानि सर्वाणि साधनानि मनुष्ययोनावेवोपलभ्यन्ते । नान्यत्र । अतएव सर्वजीवेषु मानवः श्रेष्ठः कथ्यते । अस्मिञ्छ्रेष्ठजन्मनि संप्राप्ते जीवात्मनि नामरूपात्मकमावरणं स्थूल-सूक्ष्म-भिदा द्विधा लक्ष्यते । तत्र शुक्रशोणितजं मानवशरीरमेव स्थूलमावरणम् । तथा शुक्रशोणितादनन्तरं स्नायु-रस्थि-मज्जा-रक्त-त्वचा मांसं केशाः समुत्पद्यन्ते । यतः सर्वाण्येतानि शुक्रादीनि समुद्भूतान्यन्नादेव तस्मादन्नमयकोशोयं कथ्यते । अस्य स्थूलस्यान्नमयकोशस्यान्तर्यतः—प्राणापान-समानोदानव्यानवायवः सञ्चरयन्ति तस्मात् सूक्ष्मः प्राणमयकोशस्ततः सूक्ष्मं मनोऽतो मनोमयकोशः ततः सूक्ष्मा बुद्धिरतो ज्ञानमयकोशस्तदन्ते चानन्दमयकोशः समुपलभ्यते । तस्मादपि परोयमात्मा । तथाहि तैत्तिरीयोपनिषदि—'स वा एष पुरुषोऽन्नरसमयः।२।१। तस्माद् वा एतस्मादन्नरसमयादन्योन्तर आत्मा प्राणमयः ।२। तस्माद् वा एतस्माद् प्राणमयादन्योन्तर आत्मा मनोमयः।२।३। तस्माद् वा एतस्मात् मनोमयादन्योन्तर आत्मा विज्ञानमयः।२।४। तस्माद् वा एतस्माद् विज्ञानमयादन्योन्तर आत्मानन्दमयः ।२।५। अन्नमयकोशं स्थूलदेहं विहाय बुद्ध्यहङ्कार—प्राणमयादिकोशः सूक्ष्मेन्द्रिय – पञ्चतन्मात्राणां समूहः सूक्ष्मशरीरमुच्यते । आयुषः क्षये त्यक्त्वा च स्थूलदेहं जीवात्मा सूक्ष्मशरीरं गृहीत्वा विभिन्नयोनौ विभिन्नस्थूलदेहं लभते । यथाह भगवान्—

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥
शरीरं यदवाप्नोति, यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥

 — १५–७–८ ।

जीवात्मनो जन्मबन्धनं – पुनः पुनरावर्त्तनं कर्मपरिणामफलम् । कर्मणः कर्मफलस्याऽऽधारः शरीरमेव । स्थूलशरीरस्य त्यागेऽपि सूक्ष्मशरीरमाश्रित्य कर्माण्यवतिष्ठन्ते । प्राप्य स्वर्गीयं, नारकीयं पार्थिवं वा स्थूलशरीरं कर्मफलानि भुङ्क्ते जीवात्मा । कर्माण्येव सूक्ष्मशरीराश्रयाणि जीवात्मानं सूक्ष्मशरीराश्रयं पुनः पुनर्जन्मग्रहणाय बध्नन्ति ।

यथाह भगवान् व्यासो महाभारते—"कर्मणा बध्यते जन्तुः" शा० २४०।७ अतएव नामरूपात्मक-जन्ममरण चक्रतो मुक्तये—मोक्षप्राप्तये परब्रह्मस्वरूपावाप्तये वा जीवात्मनो महती बाधा समवतिष्ठते । क्षणे-क्षणे जायमानानि कर्माण्येव बन्धनकराणीति जानन्नपि जीवः कर्मप्रवाहे संसारे पतितः क्षणमात्रमपि कर्माणि त्यक्तुं न शक्नोति । तथाहि—

नहि कश्चित्क्षणमपि, जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म, सर्वः प्रकृतिजैर्गुणैः ॥ गी० ३।५।

कृतं च कर्मवृक्षवत् फलति । तद्भोगार्थं शरीरं प्राप्यते । जायमाने च शरीरेऽवशः कर्म कार्यते । तदेव पुनः पुनः फलं कर्म चेति बीजवृक्षवाद् कर्मचक्रं कारणं बन्धनस्येति सिद्धम् ।

कर्मस्वरूपम्

यस्य कर्मणो बाधनान्मानवो मुक्तिमप्राप्य जन्ममरणचक्रं प्राप्नोति तस्य कर्मणः किं स्वरूपम् ? तस्माच्च कर्मबन्धनाद्विमुक्तये प्राप्तये चामृतत्वस्य संसारे मानवेन कथं वर्त्तितव्यम् ?

सृष्ट्यारम्भकालेऽजोऽव्यक्तोऽव्ययात्मा निर्गुणश्च परमेश्वरो नामरूपात्मकया सगुणशक्त्यां व्यक्तो दृष्टसृष्टिस्वरूपवत् सगुणो दृश्यते । सैव तस्य ब्रह्मणो माया । तथाहि—अजोऽपि सन्नव्ययात्मा, भूतानामीश्वरोऽपि सन् ।

प्रकृतिं स्वामधिष्ठाय, सम्भवत्यात्ममायया ॥ गी० ४।६। तदेव सृष्ट्यारम्भकर्मणं कर्म—भूतभावोद्भवकरो, विसर्गः कर्मसंज्ञितः । गी० ८।३। किं बहुना माया कर्म चोभयः समानार्थकः कथ्यते । यतः प्रथमं परमात्मापि क्रियां विनाऽव्यक्ताद् व्यक्तो निर्गुणाद् सगुणो वा भवितुं नार्हति । अतः परमात्मना सृष्टिकाले समारब्धा क्रिया यावन्महाप्रलयं चलत्येव । क्रियया च परिणामो भवति । अत एव—

दृश्यं सर्वनामरूपात्मकं नामरूपात्मकदृश्यान्तरे सदा परिणमत्येव । यद्यपि तन्तुवायो वयनक्रियया नामरूपात्मकसूत्रं नामरूपान्तरे पटे परिणमयति, मृत्तिका कुलालव्यापारेण घट इति नामरूपान्तरं प्राप्नोति, सुवर्णं च सुवर्णकारकर्मणा कटककुण्डलादिनामरूपान्तरं लभते, तथापि पट-घट-कटकनिष्ठसूत्र-मृत्तिका सुवर्णादिमूलद्रव्याणि विभिन्ननामरूपादिभिराच्छादितान्यपि न परिणमन्ति । तथैव संसरत्स्वपि संसारेषु, गच्छत्स्वपि जगत्सु परिणमत्स्वपि पिण्डेषु ब्रह्माण्डेषु च तन्निष्ठमूलमात्मतत्त्वं न संसरति, न गच्छति, न च परिणमति । किन्तु सदा सर्वथा सर्वत्रैकरसेन

तिष्ठति प्रकाशते च । मायास्वरूपं, कर्मस्वरूपं नामरूपं चैकमेव समानार्थकं वस्तु तथापि त्रिकेऽस्मिन् सूक्ष्मभेदोऽप्यस्त्येव । माया = प्रकृतिः, तस्या आडम्बरः = नामरूपम्, तद्व्यापारश्च कर्म ।

अदृश्यं तदात्मतत्त्वं परिणामिन्या—विनाशिन्याऽनयैव माययाऽऽच्छादितं मानवदृष्टौ सोपाधिकं दृश्यमिव संजातम् । माया–नामरूपं कर्म वा प्रतिक्षणं परिणामि । अतएवैतानि नित्यस्याविकारिणो ब्रह्मणः साम्यं नार्हन्ति । यतो नित्यमनित्यं चेति परस्परं विरुद्धं कल्पनाद्वयमेकत्र न सम्भवति, अतो माया-ब्रह्मणोरस्तित्वं नैककालावच्छन्नं मन्यते वेदान्तिभिः । तेषां मते गुणपरिणामिनी प्रकृतिः कर्मात्मिका माया वा न स्वतन्त्रं ब्रह्मवत् किमपि तत्त्वमस्ति । किन्तु नित्ये सर्वव्यापिनि निर्गुणे चैकरसे परब्रह्मणि ज्ञानहीनमानवानां दुर्बलेन्द्रियै रज्जुसर्पवत् परिणामी मिथ्या सगुणो मायाडम्बरो दृश्यते ।

ननु नित्यश्चिद्रूपी परमेश्वरोऽनित्यं नामरूपात्मकं मायातत्त्वं कदा किमर्थमुत्पादितवान् ? वा निर्गुणे ब्रह्मणि सगुणस्य मायात्मकदृश्यस्य कदा किमर्थमाविर्भाव इत्यादिप्रश्नस्य समाधानायैतावदेव वक्तुं शक्यते -यदैव मानवज्ञानदृष्टौ निर्गुणपरब्रह्मापरोक्षज्ञानं जातं तदैव नामरूपात्मिका परिणामिनी मायापि दृग्गोचरीभूता । अतएव निर्गुणस्य परब्रह्मणोऽतर्क्यलीलयैवेयं वेदान्तशास्त्रे परिभाषिता नामरूपात्मिका माया सांख्ये गुणपरिणामिनी प्रकृतिः परिभाष्यते । अतो माया प्रकृतिर्मायी च परमेश्वरः श्वेताश्वतरोपनिषदि प्रतिपाद्यते –

'मायां तु प्रकृतिं विद्धि मायिनं परमेश्वरम् ।'

यतो मायिनो माया संयाता न तु मायातो मायी, अतो मायी परमात्मा स्वतन्त्रो माया च मायिनः परमात्मनोऽधीना । यथाह भगवान् कृष्णः—

"दैवी ह्येषा गुणमयी, मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते, मायामेतां तरन्ति ते ॥" गी० ७।१४।

यद्यपि स्वतन्त्रो मायी-पुरुषो माया च प्रकृतिस्तदधीनेति सिद्धम् तथापि गुणपरिणामिनी प्रकृतिर्गुणिनः पुरुषस्य गुण एवेति गुण-गुणिनोः समवायात्तयोः सहैव ज्ञानात्तावुभावपि प्रकृति-पुरुषावनादी । किन्तु प्रकृतितो गुण-विकृतयश्च भवन्ति न तु गुणतो विकृतितो वा प्रकृतिः । अतएव गुणपरिणामिन्यो विकृतयो विकुर्वाणाः सादयो विनश्वराश्चोच्यन्ते । विकुर्वाणा च सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः पुरुषवदनादिरत एव आह भगवान् श्रीकृष्णः—

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकाराश्च गुणाश्चैव विद्धि प्रकृतिसम्भवान् ॥ गी० १३।१९॥

एवमेव जगद्गुरुशङ्कराचार्योऽपि सर्वज्ञेश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञेश्वरस्य मायाशक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ।

वे० सू० शं० भा० २।१।१४।

फलतो दृश्यसृष्टिनिर्माणारम्भसमये मूलभूते निर्गुण-ब्रह्मणि यो व्यापारः समभवत् तदेव मायात्मकं कर्म निरन्तरं नामरूपान्तराद् नामरूपान्तरे परिणमज्जगदिति नामरूपं दधति । यथाह भगवान् श्रीकृष्णः—

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि, यस्तं वेद स वेदवित् ॥
अधश्चोर्द्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनु सन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥ गी० १५।१-२॥

अतएव—'कार्यते ह्यवशः कर्म, सर्वः प्रकृतिजैर्गुणैः । गी० ३।५।

वेदान्तदर्शनेऽपि कर्मणोऽनादित्वं प्रतिपादितम् ।

यथा—'न कर्मविभागादिति । २।१।३५।

तस्मादिदं नामरूपात्मकं कर्म गुणपरिणामिनी प्रकृतिरनादि—'कर्म वरूपमि'ति सिद्धम् ।



कालिदासस्य सौन्दर्यसृष्टिः

डॉ० वनेश्वरपाठकः*

सौन्दर्यं कलाकारस्य परमोपास्यं परमाभिव्यक्तिश्च । तच्च सौन्दर्यं काव्ये रसगुणालङ्कारादीनां समुचितसंविधानेनैवोत्पद्यते । काव्ये रसो ध्वनिर्वा परमं सौन्दर्यम्[1] । यदाह ध्वनिसम्प्रदायपरमाचार्य आनन्दवर्द्धनः—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु[2] ॥

कालिदासः स्वग्रन्थेषु सर्वत्रैतादृशमेव लावण्यं समुत्पादयितुं यत्नवान् दृश्यते "शेषाङ्गलावण्यविधौ विधातुर्लावण्य उत्पाद्य इवास यत्नः[3] ।" (कालिदासस्येयमुक्तिरानन्दवर्द्धनस्योपर्युक्तोक्तेः प्रेरणादायिका ।)

सौन्दर्यशास्त्रिभिः सौन्दर्यस्य रूपद्वयं प्रतिपादितम्—वस्तुनिष्ठम्, आत्मनिष्ठञ्च । वस्तुनिष्ठं सौन्दर्यं काव्ये बाह्योपादानानां गुणालङ्कारादीनां संविधानमपेक्षते । आत्मनिष्ठं सौन्दर्यं काव्यात्मभूतस्य रसस्य संविधानमपेक्षते । कालिदासस्य काव्यनाटकेषूभयविधस्य सौन्दर्यस्य परिपोषो दृश्यते । तस्य काव्यनाटकेषु वस्तुनिष्ठसौन्दर्यस्य रमणीयमुदाहरणं प्रकृतेर्नार्याश्च रमणीयताया वर्णनमस्ति । प्रकृतेः रम्यरूपस्य वर्णने स नारीरूपस्य सहयोगमाश्रयति । नारीरूपस्य वर्णने स प्रकृतिरूपस्यानुसन्धानं करोति । उदाहरणार्थम् (प्रकृतिरूपवर्णनम्)—

पर्याप्तपुष्पस्तवकस्तनाभ्यः स्फुरत्प्रबालोष्ठमनोहराभ्यः ।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि[4] ॥

अत्र लतावधूनां वर्णने रमणीनां रूपसम्पदो दर्शनं भवति ।

---

* संस्कृतविभागाध्यक्षः—सेंटजेवियर्स कालेज, राँची (विहार)

१. आलङ्कारिकास्तु अलङ्कारमेव सौन्दर्यं मन्यन्ते । यथाह वामनः—"सौन्दर्यमलङ्कारः ।" (का० सू० वृ०)

२. ध्वन्या० १।४   ३. कुमार० १।३५   ४. कुमार० ३।३९

लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य।
रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार[1] ॥

अत्र मधुश्रीः (वसन्तलक्ष्मीः) स्वशृङ्गाराय नारीणां प्रसाधनसाधनान्युपयुङ्क्ते। कालिदासस्य मधुश्रीर्मुग्धा नवयौवना च —"मुग्धत्वस्य च यौवनस्य च सखे ! मध्ये मधुश्रीः स्थिता[2] ।" एवमेव मेघदूते निर्विन्ध्याया गम्भीरायाश्च चेष्टादीनां वर्णनमपि विरहविधुराया मुग्धाया युवत्याः प्रतिच्छायामाश्रयते। (नारीरूपवर्णनम्)--

आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम्।
पर्याप्तपुष्पस्तवकावनम्रा सञ्चारिणी पल्लविनी लतेव[3] ॥

अत्र नवयौवनायाः पार्वत्या रूपवर्णने प्रकृतेः रूपसम्भारस्योपयोगो दृश्यते। समाधिस्थस्य शिवस्य परिचर्यामितस्ततः सञ्चरन्त्याः पार्वत्याः सञ्चारिण्या लताया इव वर्णनमतीव मनोहरम्[4] ।

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्[5] ॥

अत्र शकुन्तलाया रूपवर्णने लताया रूपश्रियाः समुपयोगो दर्शनीयोऽस्ति। मेघदूते यक्षप्रियायाः सौन्दर्यं कविः प्रकृतेः साम्राज्ये एकत्र द्रष्टुमिच्छति —

श्यामास्वङ्गं चकितहारिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन् क्वचिदपि न ते चण्डि ! सादृश्यमस्ति[6] ॥

कालिदासस्य प्रायः सर्वा नायिका रूपोच्चयेन निर्मिता विधातुरद्वितीयाः सृष्टयः सन्ति। विधाता एकत्र सौन्दर्यराशि दिदृक्षुः पार्वतीं निर्मितवान्—

सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन।
सा निर्मिता विश्वसृजा प्रयत्नादेकत्र सौन्दर्यदिदृक्षयेव[7] ॥"

जगतो रूपोच्चयेन विनिर्मिता शकुन्तला विधातुर्मनःकल्पनाया अद्वितीया स्त्रीरत्नसृष्टिः—

---

१. कुमार० ३।३०   २. विक्रमो० २।७

३. कुमार० ३।५४

४. 'सञ्चारिणी लता, सञ्चारिणी दीपशिखा, लतावधूः, पर्याप्तपुष्पस्तवकस्तना', इत्यादयो रूपकोपमान्विताः शब्दाः कालिदासस्याधिकं प्रियाः सन्ति।

५. अभिज्ञान० १।२०   ६. मेघ० उत्तरमेघः।   ७. कुमार० १।४९

चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः[१] ॥

विधातुरियं मानसी सृष्टिरतीव कोमला, करतलादिस्पर्शेन क्लेशिता न। महाकविबाणभट्टेनापि चाण्डालकन्याया निर्माणे कालिदासस्यास्याः कमनीयकल्पनाया उपयोगः कृतोऽस्ति "मन्ये च मातङ्गजातिस्पर्शदोषभयादस्पृशतेयं मनसैवोत्पादिता प्रजापतिना, अन्यथा कथमियमक्लिष्टता लावण्यस्य। न हि करतलस्पर्शक्लेशितानामवयवानामीदृशी भवति कान्तिः।" (कादम्बरी)

प्रकृतिकोमला तन्वङ्गी तरुणी यक्षरमणी अपि विधातुराद्या सृष्टिः—

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः[२] ॥

किन्तूर्वश्या निर्माणे तु विधातुरपि निर्माणकला कुण्ठिताऽभवत्। वेदाभ्यासजडः, विषयपराङ्मुखः, पुराणमुनिर्विधाता तस्या निर्माणेऽक्षमः सञ्जातः। कविना तस्या निर्माणे चन्द्रस्य, मदनस्य, वसन्तस्य च क्षमताऽङ्गीकृता —

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकसः स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः[३] ॥

वस्तुतः कालिदासस्योर्वशी तस्य कमनीयकल्पनातः प्रसूताऽपूर्वा स्त्रीरत्नसृष्टिः।

कवेरात्मनिष्ठसौन्दर्यसंविधानन्तु ततोऽप्यधिकं रमणीयमास्ते। एतादृशसौन्दर्यनिर्माणेऽनुभूतेरभिव्यक्तेश्च सहयोगोऽपेक्षितः। भावानुरूपाऽनुभूतिः, अनुभूतेरनुरूपाऽभिव्यक्तिः, इदं द्वयं यत् कवित्वस्य परमं भागधेयं तद् कालिदासे सर्वत्र दृश्यते।

एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती[४] ॥

---

१. अभिज्ञान० २।९
२. मेघ० उत्तरमेघः।
३. विक्रमो० १।१०
४. कुमार० ६।८४

इत्यत्र सौन्दर्यस्य बाह्योपकरणानां गुणालङ्कारादीनामभावेऽपि कवेरनुपमां भावाभिव्यक्तिमवलोक्य मुग्धाः काव्याचार्याः श्लोकमिममुत्तमकाव्यत्वेनोदाहरन्ति। अस्य व्यङ्ग्यार्थेन मुग्ध आनन्दवर्द्धनोऽपि

दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः[1] ॥

इत्यस्याः कारिकाया वृत्तौ प्राह—'यथा एवंवादिनि देवर्षौ' इत्यादिश्लोकस्य।

'सौन्दर्यमलङ्कारः' इति सौन्दर्यवादिनामालङ्कारिकाणामभिमतः सौन्दर्यसंविधानस्यापरः पक्षः। अस्मिन् पक्षेऽपि लोकोत्तरवर्णनानिपुणकवेः कालिदासस्य कल्पनाऽवलोकनीयास्ति। अस्मिन् सन्दर्भे तस्य निम्नोक्ताः श्लोका विशेषतः समुद्धरणीयाः सन्ति —

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिम्वरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः[2] ॥

कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य।
दिग्दक्षिणा गन्धवहच्छलेन व्यलीकनिःश्वासमिवोत्ससर्ज[3] ॥

हरस्तु किञ्चित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि[4] ॥

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्निक्षेपणाय पदमुद्धृतमुद्वहन्ती।
मार्गाचलव्यतिकराकुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ[5] ॥

कथानकानां संयोजनेऽपि कालिदासस्य सौन्दर्यदृष्टिः श्लाघनीयाऽस्ति। उदाहरणार्थं कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलं प्रस्तूयते। कालिदासस्य परिपक्वप्रतिभाया अन्तिमा प्रौढ़तमा प्रसूतिरिदं नाटकं कवेः कमनीयकल्पनायोगेन कथानकसंयोजनकौशलेनापरैर्नाट्यगुणैश्च मुग्धैः काव्यरसिकैः कालिदासस्य प्रतिभायाः सर्वस्वं मन्यते; विदेशिविद्वद्भिश्च भूरिशः प्रशंसितमास्ते।

बाह्यसौन्दर्येणोद्भूतं वासनात्मकं प्रेम सङ्कटस्य तापेन तपस्यया च परितप्तं सन्निःस्वार्थं निष्कलुषञ्च भूत्वा सुखपरिणामि भवति। तादृशमेव प्रेम सामाजिकजीवनस्य कौटुम्बिकजीवनस्य च कल्याणाय कल्पते। एष एव कुमारसम्भवस्याप्युपदेशः—अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः[6]।

पार्वती शकुन्तला च कालिदासस्य काव्यनाटकेषु सर्वोत्कृष्टनायिके स्तः। उभयोर्माध्यमेन कालिदास इममेव सन्देशं दित्सुरस्ति।

अभिज्ञानशकुन्तले नाटकीयसौन्दर्यमाधातुं कालिदासेन मूलकथायामनेकानि परिवर्त्तनानि कृत्वा एकं नवीनं कथावस्तु निरमायि, इति तस्य सूत्रधारस्यानयोक्त्या सुस्पष्टतां व्रजति—"कालि-

१. ध्वन्या० ४।४ २. रघु० ६।६७
३. कुमार० ३।२५ ४. कुमार० ३।६७
५. ,, ५।८५ ६. ,, ५।२

दासग्रथितवस्तुना नवेन नाटकेनोपस्थातव्यमस्माभिः।" मूलकथायां मौलिकपरिवर्त्तनस्य मुख्यमुद्देश्यमस्ति दुष्यन्ते श्रेष्ठनायकत्वोपपादनम्। अस्योद्देश्यस्य पूर्तये कालिदासस्य कठोरता दर्शनीयाऽस्ति। प्रकृतिकोमलायाः सरलहृदयायाः पतिचिन्तानिमग्नायास्तपोवनबालायाः शकुन्तलाया अज्ञातस्यापराधस्य कृते शापप्रदानायाकरुणहृदयस्य सुलभकोपस्य दुर्वाससोऽवतारणं कालिदासस्य कठोरमर्यादाप्रियतामभिव्यनक्ति।

तपोवनस्य मर्यादाभङ्गकारिणौ शकुन्तलादुष्यन्तावुभावेव समानापराधिनौ। अतः सामाजिकमर्यादाया रक्षणायोभावेव दण्डनीयाविति नाटकस्यास्य नैतिकं रहस्यम्। काव्यमर्मज्ञैर्भूरिशः प्रशंसितो नाटकस्यास्य चतुर्थोऽङ्कः स्नेहस्य कारुण्यस्य च हृदयस्पर्शिनी अभिव्यक्तिः। अङ्केऽस्मिन् भारतीयसंस्कृतेः सन्देशवाहिनी स्नेहसौहार्दयोर्या पवित्रमन्दाकिनी प्रवाहिताऽस्ति सा समस्ते संस्कृतसाहित्येऽन्यत्र कुत्रापि न दृश्यते।

पञ्चमेऽङ्के शार्ङ्गरव–शारद्वतयोः शकुन्तलां प्रति प्रयुक्तं निष्ठुरकठोरवचनम्, शकुन्तला-दुष्यन्तयोः कथोपकथनञ्चातीव हृदयावर्जकमस्ति। प्रतारणप्रतप्तायाः शकुन्तलायाः क्रोधाविष्टहृदयस्य एष उद्गारोऽतीव प्रभावपूर्णोऽस्ति—"अनार्य? आत्मनो हृदयानुमानेन पश्यसि। क इदानीं धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते?" "सुष्ठु तावदत्र स्वच्छन्दचारिणी कृताऽस्मि; याऽहमस्य पुरुवंशप्रत्ययेन मुखमधोर्हृदयविषस्य हस्ताभ्यासमुपगता[१]।" अन्ते नायकनायिकयोराध्यात्मिकपरिवर्त्तनन्त्वतीव भव्यमस्ति। परिधूसरे वसने वसानाया नियमक्षाममुख्याः शकुन्तलायाः पादयोर्दुष्यन्तस्य पतनम्, श्रद्धा–विधि–वित्तरूपाणां शकुन्तला–दुष्यन्त–सर्वदमनानां समागमश्च परिवर्त्तनस्यास्य मङ्गलमयः परिणामोऽस्ति। एष एव परिणामो नाटकस्यास्य सत्यं शिवं सुन्दरं रूपमस्ति।

एतादृशं चरमोत्कर्षमयं सौन्दर्यसंविधानमेव कालिदासस्य, कवीनां गणनाप्रसङ्गे, अनामिकाधिष्ठितत्वमभिव्यनक्ति। सौन्दर्यस्य सत्परीक्षकेणानन्दवर्द्धनेनापि संसारेऽस्मिन् कविपरम्परायां प्रसिद्धेषु द्वित्रेषु पञ्चषेषु वा महाकविषु कालिदासस्य प्रथमा गणना कृता—"अस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवयः सन्ति[२]।" महाकवेरस्य प्रेरणास्रोतसि काव्यदेवतावतारे आदिकवौ वाल्मीकौ स्थितेऽपि कालिदासस्य प्रथमगणनायां तस्यानुपमा सोपमा च सौन्दर्यसृष्टिरेव हेतुत्वेन पदं निधत्ते।

१. पञ्चमाङ्कस्य परमौजस्वि भावात्मकञ्च कथोपकथनमेवाभिलक्ष्यालोचकैरस्याङ्कस्य चतुर्थाङ्कापेक्षयाऽधिकरमणीयत्वं प्रतिपादितम्—

शाकुन्तलचतुर्थोऽङ्कः सर्वोत्कृष्ट इति प्रथा।
न सर्वसम्मता यस्मात् पञ्चमोऽस्ति ततोऽधिकः॥

२. ध्वन्या० १।६ वृत्तिः।

अप्पय्यदीक्षितकृतं वैराग्यशतकम्

स्व० श्री के० लक्ष्मणशास्त्री *

विदुषामग्रेसरः शताधिकग्रन्थकर्ता श्रीमदप्पय्यदीक्षितः दक्षिणे भारते खिस्ताब्दीयषोडशशतकस्य समाप्तावासीदिति तत्पौत्रनीलकण्ठदीक्षितोक्त्या ज्ञायते। अप्पय्यदीक्षितेन पूर्वोत्तरयोर्मीमांसयोः, शैवाद्वैते, अलङ्कारशास्त्रे, धर्मशास्त्रे चानेके ग्रन्था विरचिताः। एवं च सर्वेष्वपि शास्त्रेष्वयं दीक्षितः निष्णात इति सुप्रसिद्धं भवति। तन्निर्मितानां ग्रन्थानां केचनेदानीमुपलभ्यन्ते। अन्ये च बहवः नाममात्रावशिष्टाः। न केवलं दक्षिणे, अपि तु सर्वस्मिन्नपि भारते वर्षे विद्वन्मण्डनायमानः अप्पय्यदीक्षितः वैराग्यबोधात्मकं किञ्चित् शतकं निर्ममौ। तत्र च, विरक्तस्य किं लक्षणम्? तेन किं वा कार्यम्? कथं स लोकानुपदिशति? कथं च पुरुषस्संसारे प्रमाद्यति? इत्यादिकान् बहून् विषयानधिकृत्य स कविः शतश्लोकीं रचयामास। एवमेव भर्तृहरिनामा प्रथितकीर्तिरन्यः कविरपि शतकमेकं वैराग्यनामकं लोकप्रियं व्यरचयत्। तदद्य भारते सर्वैरप्याद्रियते।

अस्मिन् वैराग्यशतके महाकविरप्पय्यदीक्षितः, दशभिरव्ययैः ज्ञानवैराग्यादिभिस्सुसम्पन्नं भगवन्तं शङ्करं प्रथमं स्तौति। अनेन वैराग्यस्य साम्राज्यत्वमुपकल्पितम्। तस्मिन् वैराग्यसाम्राज्ये अधिष्ठितस्य पुरुषराजस्य तु धीरेव सचिवः, धैर्यं च बलम्, शत्रवस्तु सङ्कल्पाः, शम एव धनम्, भुवनत्रयं पाल्यो देशः इति राज्याङ्गान्ययं विशिनष्टि। विरक्तः न कुतोऽपि भयं प्राप्नोतीत्यमुं विषयं विवृण्वन् दीक्षितः—

राज्ञो बिभेति लोकः, राजानं पुनरितोऽपि वैरिभ्यः।
आब्रह्मणः कृतान्तात्

इति सर्वेषामपि भयकारणं निरुच्य विरक्तस्य अकुतोऽपि भयं प्रतिपादयति।

विरक्तस्य त्वात्मीयान् विवृण्वन् कविरयं—

वैराग्ययुक्तस्य जनन्यः भिक्षाप्रदात्र्यः उपदेष्टार एव पितरः,
शिष्यास्तु पुत्राः, शान्तिरेवैका तरमयित्री दयिता

---

* ६९ आदर्शनगर, हैदराबाद, आ० प्र०

इति सुष्ठु प्रतिपादयति—

पततु नभः स्फुटतु मही, चलन्तु गिरयो मिलन्तु वारिधयः।
अधरोत्तरमस्तु जगत् का हानिर्वीतरागस्य।

इति वैराग्ययुक्तस्य प्रलयेऽपि न काऽपि हानिर्भविष्यतीति कविनाऽनेन साधूक्तम्।

वशीकृतचित्तस्य वशे सर्वमपि जगत् विद्यते। तदा तस्य न केऽपि शत्रवः न च मित्राणि भवन्तीति तस्य द्वन्द्वातीतत्वम्।

के चोराः के पिशुनाः के रिपवः केऽपि दायादाः

इति श्लोकेन विशिनष्टि दीक्षितः।

संसाररोगस्य मूलकारणमज्ञानम्, तस्य प्रारम्भकालश्च जननम्, रोगपरिपाकदशा तु संसारः इति भवरोगस्य परां काष्ठां दर्शयित्वा दीक्षितः तन्निवारणे सुलभां सुकरां च चिकित्सां "भैषज्यं नैष्ठिकी शान्तिः" इति श्लोकपादेन निर्वक्ति। यथा कौमारे शैशवं कौमारं च तारुण्ये, तत्तु वार्धके न रुच्यते तथैव विदुषां कामविचेष्टितमपीति—

न स्वदते धीराणां कामस्य विचेष्टितं शान्तौ

इत्यनेन श्लोकेन कविर्विवृणोति।

वनितानां दर्शने चपलानां धीराणां च चित्तवृत्तिः कथं भवतीति दीक्षितः—

तृणवद्भ्रमन्ति चपलाः स्त्रीनामनि चण्डमारुते चलति।
धरणिधरा इव सन्तस्तत्र न किञ्चित्प्रकम्पन्ते॥

इत्यनेन श्लोकेन चित्रयति।

यथा पितरः अकारणमुन्मत्तवत्क्रीडन्तं पुत्रमनुसृत्य मोदन्ते तद्वत् विद्वांसोऽपि अकारण-कार्यकारिणः अस्थानसन्तुष्टान् पुरुषाननुवर्तमानाःताननुशासतीति मूर्खोद्धरणे विदुषामभिनिवेश-मुपवर्णयति दीक्षितः। यथा तरवः स्वपोषकान् स्वनाशकांश्च पुरुषान् सममीक्षन्ते तथैव सत्पुरुषाः स्वोपकर्तर्यपकर्तरि च विषये सममेव प्रवर्तन्त इति विरक्तानां मित्रामित्रसमत्वं—"वर्तन्ते सन्तस्सममुपकर्तरि चापकर्तरि च" इत्यनेन श्लोकार्धेन प्रदर्शयति दीक्षितः। तरुणो यथा, कदाऽप्य-प्राप्तेऽपि कामसुखे प्रवर्तते तथैव कश्चन पुरुषो भाग्यवशात् ब्रह्मसुखेऽपि प्रवर्तते इति "एवं ब्रह्मसुखेऽपि प्रवर्तते कोऽपि भाग्यवशात् इति श्लोके प्रस्फुटयति कविः।

पुत्रगुणाः स्वातन्त्र्ये, दारगुणाश्चाधिवेदनावसरे।
भ्रातृगुणा दायविधौ, द्रष्टव्या मोक्ष्यमाणेन॥

इति श्लोकेन दारपुत्रादीनां स्वस्मिन्ननुरक्तिः कियदवधि विद्यते इति सुस्पष्टं प्रोवाच। अतः सर्वान्परित्यज्य मुमुक्षुणा आत्यन्तिकं सुखमभिलषणीयमिति विविनक्ति कविः। लोके हि पापकर्मकृतः पुरुषाः स्वार्थमेव सर्वदा चिन्तयमानानां दारपुत्रादीनां कृते बहूनि पापानि कुर्वन्तीति दीक्षितः संसारिणो निन्दति—

पितृभिः कलहायन्ते पुत्रानध्यापयन्ति पितृभक्तिम् इति श्लोकेन कविरयं लोके विद्यमानं परोपदेशपाण्डित्यं निन्दति।

कलियुगे अनुष्ठीयमाना निवृत्तिधर्माः लोकैरन्यथा क्रियन्ते। यथा किल "अलाभे निराशेति शान्ति, अपात्रत्वमिति प्रतिग्रहनिरासं, दुर्बलतेति च क्षान्ति खलाः निन्दन्तीति" कलौ धर्मवैमुख्यं जनानामुपवर्णयति कविः। लोके हि जनाः सर्वानपि विषयान्, किं बहुना, ब्रह्मापि ज्ञातु शक्नुवन्ति। परं तु स्वस्याज्ञानं न जानन्तीति कविः कलिस्वभावं—

नीतिज्ञा नियतिज्ञा वेदज्ञा अपि भवन्ति शास्त्रज्ञाः।
ब्रह्मज्ञा अपि लभ्याः स्वाज्ञानज्ञानिनो विरलाः॥

इत्यनेन श्लोकेन दर्शयति।

लोके जनैः इन्द्रियार्थान् शब्दस्पर्शरूपादीन् स्वानुकूलीकर्तुं तत्साधने एव यत्नो विधीयते। न तत्कार्यम्। यत्नस्तु विषयिणि हृदये कार्यः। न स क्रियते। तथाहि, दृग्दोषनिवारणार्थं दृश्ये वस्तुन्यौषधप्रदाने किं प्रयोजनं स्यादित्यमुमंशं—

विषयाननुकूलयितुं विषयिणि हृदये विधीयतां यत्नः।
दृशि देयमौषधं को दृश्ये दत्वा सुखीभवति॥

इत्यस्मिन् श्लोके स्फुटीकरोति दीक्षितः।

प्रत्यहं म्रियमाणान् पश्यन्तः, मृतांश्च स्मरन्तोपि जनाः स्वयं नित्यप्राणिन इव कर्माणि चेष्टन्ते। अहो कियन्मूर्खा एते इति जनानामज्ञानं विलपति दीक्षितः। सुखार्थं दण्ड्यं वपुः सम्यक् पुष्णन्ति मूर्खाः इत्यमुं विषयं "न हि शर्कराभिलाषिभिरिक्षोः काण्डानि पूज्यन्ते" इति समञ्जसेनोदाहरणेन विविनक्ति दीक्षितः। अधिकानामर्थानामर्जने राजभयश्चोरेभ्यश्च भीतिरुत्पद्यते। यथा किल अधिकमन्नस्य खादने वमनं वा विरेकश्च वा भवतीति सुष्ठु भणति कविः। अपि च— धनत्वं न जातिः, यस्य यद्वस्तु इष्टं तदेव तस्य धनं भवति। एवमेव विदुषां दारिद्र्यमिष्टं भवतीति तदेव तेषां धनं भवतीति "आकिञ्चन्यं धनं विदुषां" इति श्लोकपादेन विवृणोत्यप्पय्यदीक्षितः। "मन्मथाऽज्ञाकरणे तिर्यञ्चः, नराः, देवा अपि सर्वे एकरूपा एव। न तत्र भेद" इति मदनवशीकृतत्वस्य त्रिभुवने सञ्चाल्यमानं साम्राज्यं तथ्यमेव कविर्विशिनष्टि।

अप्पय्यदीक्षितः जनानेवमुपदिशति हे मूर्खाः सम्यक् भुङ्ध्वम्, बाढं पिबत जाग्रत, संविशत तिष्ठत वा यूयम्; परं तु अयं देहबन्धः नाश्य एवेति समग्रे युष्माकमायुषि सकृदपि किञ्चिदपि वा विचार्यतां भवद्भिः। अपि च अन्नस्य अभावे मृत्युस्सिद्धो भवति; अन्नं तु शाल्या भवति; शाली च वृष्टेः; वृष्टिस्तपसो जायते; इति हि सर्वैरपि ज्ञायत एव। तथाऽपि जनाः मृत्यवे एव तपस्तप्यन्ति लोके। न कोऽप्यमृतत्वाय तपश्चरतीति विनाश्ये वस्तुनि व्यर्थः प्रयत्नः क्रियते लोकैरिति तेषां मूर्खत्वं प्रतिपादयति दीक्षितः। अज्ञानेन विज्ञाने अपहृते सति जनाः किं कर्म

कुर्युः । यथा किल, चक्षुषा काणाः मुखं व्यादाय किमीक्षेरन् ? इत्यन्धोपमानमज्ञानिनः सम्यक् प्रतिपादयति । मूढा हि लोके अयुतं नियुतं धनं व्ययीकृत्य प्राकृतान् नश्वरांश्च भोगान् क्रीणन्ति । परन्तु शाश्वतं कैवल्यरूपं सुखं पञ्चषैरेव बिल्वदलैः सम्पादयितुं नेच्छन्तीति ऐहिकसुखाभिलाषिणश्शपति दीक्षितः । अङ्गवङ्गकलिङ्गादीनां देशानां समाचारग्रहणे जना उत्सुका भवन्ति । परं तु यमपुरवार्ताग्रहणे न कोऽप्युत्सहते इति परलोकाज्ञानिनः पुरुषान् सुस्पष्टं निन्दति अप्पय्यदीक्षितः । जनैर्ममकारस्त्यक्तव्य एव, यदि त्यक्तुं न शक्येत तर्हि कर्तव्य एव सः । किन्तु स सर्वत्रापि कर्तव्यः इत्येकेनैव लघुना वाक्येन जनेभ्यस्सर्वभूतसमत्वं बोधयति महाकविः । महतां विज्ञानसागरः अतिगम्भीरः, अकलुषः, अक्षोभ्यः, अपारः अविलङ्घ्यः, अखण्डभङ्गभङ्गुरः इति महात्मनां विज्ञानस्य अगम्यत्वं विवृणोति दीक्षितः ।

पाशो यदि मोक्तव्यः पशुपतिरेवोपसर्तव्यः ।
न खलु व्यतिमुच्यन्ते पशवः पाशेन सम्बद्धाः ॥

इत्यस्मिन् श्लोके भवपाशविमोचनाय पशुपतिश्शिवस्सेव्य इति लौकिक्या रीत्या सुनिपुणं वक्ति दीक्षितः ।

बन्धुं तमेव चिन्तय बद्धुं मोक्तुं च यः क्षमते इत्यनेन श्लोकार्धेन प्राणिनां बन्धमोक्षकरः परमात्मैव बन्धुरिति मन्तव्यः, नान्ये दारपुत्रादय इति संसृतेः बन्धकारणत्वं द्रढयति कविः ।

कलहः कदाऽपि मास्त्विति कलितशरीरैक्ययोश्शिवयोः ।
अहमस्म्यहमस्मीति प्रातः कलहो मम त्राणे ॥

इत्यनेन श्लोकेन शिवयोर्भक्तत्राणपरायणत्वं, तत्र तयोर्विद्यमानामहमहमिकां च सुचतुरं चमत्करोति श्रीमदप्पय्यदीक्षितः ।

न गृहीतं श्रुति हृदयं, न च न गृहीतं परिप्लवं हृदयम् ।
इच्छामि धाम परं, गच्छामि तु विश्वनाथपुरीम् ॥

इत्यन्तिमश्लोकेन कविरप्पय्यदीक्षितः स्वस्य मुमुक्षुत्वं, विश्वनाथपुरीजिगमिषुत्वं च प्रकटीकृत्य साधकानप्येतत्करणे बोधयति ।

अस्मिन् हि वैराग्यशतके महाकविर्विद्वच्छिरोमणिश्चाप्पय्यदीक्षितः ऐहिकामुष्मिकसुखानि सम्यग्विविच्य अस्य ग्रन्थस्य निवृत्तिमार्गे एव तात्पर्यमिति व्यङ्ग्यमर्यादया कान्तासम्मितया च दिशा सर्वत्र सहृदयान् सुकरं बोधयति ।

मनोरञ्जकेषु लौकिकेषु काव्येषु अज्ञानिजनदुर्बोधानां तात्त्विकानां विषयाणां सुचतुरं वर्णयतां विदुषामस्य अयमेव तुल्य इति एतद्ग्रन्थपठनेन सचेतसां सुस्पष्टं गोचरीभवति ।

वैराग्यविचारचर्चा

▢

श्रीहरि अरविन्दः

▢

'वि' उपसर्गपूर्वकाद् 'रञ्ज् रागे' धातोः घञ्प्रत्ययान्तो हि विरागशब्दः। विगतो रागो यस्मात् स विरागः। विरागस्य भावो वैराग्यम्। विरक्तिः, विरतिः, इत्यादिशब्दाः तत्पर्यायवाचिनः।

संसारोऽयं विनश्वरः। परिवर्त्तनशीलाश्च सांसारिकाः सुखभोगाः, ये सदैवैकान्तिकं सुखं दातुं नार्हन्ति। धनैः पीना दीना निर्धनाश्च, नेतारः कलाकाराश्च, विद्वांसः प्राकृताश्च, महान्तः क्षुद्राश्च, धार्मिकाः पापाश्च सर्वेऽपि म्रियन्त एव, अद्य वा श्वो वा परश्वो वा, शीघ्रं वा विलम्बेन वा। आ ब्रह्मभुवनात् सर्वे लोका नश्यन्ति पुनः सृज्यन्ते च—अतस्ते पुनरावर्त्तिनः। का कथाऽन्येषाम्? विरञ्चिः पञ्चत्वं व्रजति। हरिर्विरतिं प्राप्नोति। कीनाशो विनाशमेति। धनदो निधनं याति। माहेन्द्री विततिरपि वितन्द्री भवति। अतो हेतोः, एतस्य ऊर्ध्वमूलस्य अवाक्शाखस्य छन्दःपत्रस्य अव्ययस्यापि अश्वत्थवृक्षस्य छेदनाय प्रयासः कर्त्तव्य इति श्रुतिस्मृतिपुराणादयः प्राहुः। अस्य वृक्षस्य छेदनं च दृढवैराग्यरूपेणैव कृपाणेन भवितुमर्हति नान्यथेति भगवान् श्रीकृष्णः प्रतिपादयामास—"अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्वा" इति।

संसारेऽस्मिन् किमपि वस्तु स्थायि नास्ति। अन्यत्तु अन्यदेव, यच्छरीरं स्वकीयं मत्वा प्राणैरपि रक्ष्यते, पाल्यते, लाल्यते च तदपि एकदाऽवश्यमेव क्षयं प्रयाति। यद्यपि वयं भृशं कामयामहे—'मा न भूवं, हि भूयासम्' इति, परन्तु अनिच्छतोऽप्यस्मान् विहाय शरीरं पञ्चत्वमाश्रयते। तथैव जागतिकानि सर्वाण्यपि वस्तुजातानि अस्मान् हित्वा लीयन्ते, परिवर्त्तन्ते वा। इत्येवं प्रकारकमुपरिकथितं विवेचनं मनसि यदोत्पद्यते, नित्यानित्यवस्तुविवेको जागर्ति, तदा सर्वमेतद् यदसत्यं क्षणभङ्गुरमस्ति तर्हि किं तत् सत्यम्? अविनश्वरम् अभङ्गुरञ्च किमस्ति? इति जिज्ञासा समुदेति। सा च जिज्ञासा परिपुष्टा सती सन्ततं हृदयान्तर्निवासिनी भूत्वा जनं प्रेरयति तत्सत्यवस्तुमार्गणाय। सत्यवस्तुज्ञानार्थं प्रयतमानः स जनः समित्पाणिः सन् श्रोत्रियं ब्रह्मनिष्ठं सद्गुरुं समभिगच्छति। सत्सङ्गतिं करोति। शुश्रूषां विधत्ते। पश्चाद्गुरूपदिष्टं परब्रह्म परमेश्वरमेकमेव सत्यं विनाशरहितमपरिवर्त्तनशीलं च ज्ञात्वा सर्वाण्यपि जागतिकवस्तुजातानि

तत्र तत्रैव त्यक्त्वा परमेश्वरभजनाभिलाषी भवति। परमेश्वरमेव सर्वं मुख्यं सेव्यं भजनीयं समाश्रयणीयं ज्ञातव्यं च मत्वा तस्य हृदये लौकिकसुखानि विश्वान्यपि तुच्छानि प्रतिभान्ति। एतदेव हि वैराग्यं नाम। एतावता वयं पश्यामो यदेकतः परिवृत्तिशीलानि लौकिकवस्तूनि प्रति विरागो जायते चेदन्यतः परमेश्वरे परमरागो जायते। लौकिकवस्त्वनुरागो नितरां हेयश्चेद् भगवच्चरणारविन्दानुरागः सुतरां श्रेयः।

कस्यचिज्जनस्य सकाशे हिमखण्डमस्ति। ग्रीष्मकाले तस्य कृते तद् सुखदायकं भवति। परन्तु यदि कोऽपि जनः सुवर्णखण्डानि दत्वा हिमं क्रेतुमिच्छति तदा सुवर्णं गृहीत्वा स हिमखण्डं तस्मै ददाति। यतो हि हिमं तु क्षणे क्षणे क्षरितं सद् विनाशं प्रयाति, परन्तु सुवर्णेन बहूनि कार्याणि साध्यन्ते। इत्थमेव यः पुरुषो जानाति–अधिगच्छति यद्—'इमानि सुखानि क्षणे क्षणे परिणमन्ति, अन्तकालं यावन्नैव तिष्ठन्ति, स आत्मसुखे भगवच्चरणारविन्दसेवनसुखे वा विश्वासं विधाय सर्वाणि लौकिकसुखानि परित्यजति। तस्य दृष्टौ सर्वे भोगा इमे तुच्छत्वाय कल्पन्ते। इयमेवावस्था वैराग्यम्। तदेव वैराग्यं यत्र भगवद्भजनातिरिक्तेषु सर्वेष्वन्यपदार्थेषु लवमपि प्रेम न भवति। तत्र केवलं भगवत्प्रेमैव शिष्यते।

महाराजयुधिष्ठिरेण वैराग्यशस्त्रधारिणा प्रकटितमाश्चर्यं कस्य सचेतसो हृदयं न हरति?—

'अहन्यहनि भूतानि गच्छन्ति यममन्दिरम्।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्यमतः परम्॥' इति।

वैतृष्ण्यमेव महासुखमिति प्रदर्शयता राजसभोगानपि गर्हयता केनचित्सहृदयेन निगदितम्—

'चेतोहरा युवतयः सुहृदोऽनुकूलाः
सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः।
वल्गन्ति दन्तिनिवहास्तरलास्तुरङ्गाः
सम्मीलने नयनोर्नहि किञ्चिदस्ति॥' इति।

याथातथ्येन यदा वैराग्योदयो जायते तदा जागतिकाः सम्बन्धाः कीदृशाः संलक्ष्यन्ते? इति कीदृश्यां मनोहारिभाषायां प्राचीकटन् भगवत्पादा जगद्गुरवः शङ्कराचार्याः —

'कति नाम सुता न लालिताः? कति वा नेह वधूरभञ्जि हि?
क्व नु ते? क्व नु ताः? क्व वा वयं? भवसङ्गः खलु पान्थसङ्गमः॥' इति

शरीरस्य क्षणभङ्गुरतां प्रतिपादयता भगवता व्यासेनोक्तम्—'प्रातः संस्कृतं भोजनं सायं कालं यावत् कोपि सुरक्षितुमिच्छेच्चेत् तदसम्भवि। तावति काले तदम्लत्वं याति। अखाद्यं भवति, प्रणश्यति च। ननु तादृशान्नस्य रसेन पुष्टं शरीरं कथं नाम स्थायि भवेत्?—

'यत्प्रातः संस्कृतं चान्नं सायं तच्च विनश्यति।
तदीयरससम्पुष्टे काये का नाम नित्यता॥'

वैराग्यस्य परिचयमिव वितीर्य भगवती श्रुतिर्वक्ति—'तेन त्यक्तेन भुञ्जीथाः, मा गृधः, कस्य स्विद्धनम् ?' इति। यद्यपि लौकिकवस्तूनां त्यागो विशिष्टः परन्तु लौकिकस्य शरीरस्य संरक्षणार्थं तेषां वस्तूनामुपयोगोऽनिवार्यो भवति। तत्किं रागात्मकेनैव भावेन तेषां संग्रहः कर्त्तव्यः ? मैवम्। यथासम्भवं स्वल्पतमैर्वस्तुभिरेव आजीविका शरीररक्षा च सञ्चालनीया, तत्रापि कस्मिंश्चिदपि वस्तुनि रागो न कार्यः - 'तेन त्यक्तेन भुञ्जीथाः'। महर्षिर्वशिष्ठोऽनुशास्ति—"अन्नादिप्राप्तये युक्तं कर्म कुरु। प्राणसन्धारणाय अन्नादिकमशान। तत्त्वजिज्ञासनाय प्राणाः सन्धार्याः। येन भूयो दुःखं नानुभूयादतस्तत्त्वं जिज्ञास्यम्" इति।

'अत्राहारार्थं कर्म कुर्यादनिन्द्यं कुर्यादाहारं प्राणसन्धारणार्थम्।
प्राणाः सन्धार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो न दुःखम् ॥'

अतो विरक्ता जनाः स्थूलपदार्थान् कार्यनिर्वाहायैवाङ्गीकुर्वन्ति। प्राणरक्षणार्थमश्नन्ति, तत्त्वज्ञानार्थं प्राणान्दधति।

विरक्तशिरोमणेर्महाराजस्य भर्तृहरेर्वैराग्यसम्बन्धिविचारान् पश्यामः "विषयाः खलु चिरमुषित्वापि एकदाऽवश्यं विहाय यातारः, तर्हि किमिति न ते झटिति त्यज्येरन् ? विषया अस्मान् यदि त्यक्ष्यन्ति तदा महद्दुःखं भविष्यति, अतो वयमेव तांस्त्यजामः। तृष्णाराहित्यं हि वैराग्यम्। वैतृष्ण्यं नाम महत्सुखकरमिति शास्त्रेषु बहुधा विवेचितम्—

"तस्याः (तृष्णायाः) पारगता विशुद्धमतयो नन्दन्ति योगीश्वराः" इति
"आशा हि परमं दुःखं नैराश्यं परमं सुखम्" इति।

अस्मिन् संसारे किमपि तादृशं वस्तु न विद्यते यद् भयान्वितं न भवेत्—"सर्वं वस्तु भयान्वितं भुवि नृणाम्"। तर्हि कुत्रचिदभयं वस्तु किमपि नास्ति किम् ? इति प्रश्नं समादधाति भर्तृहरिः—"वैराग्यमेवाभयम्" इति।

"न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति", अतः सांसारिकान् भोगान् परित्यज्य वैराग्यमेवाश्रयणीयम्।

यथा सांसारिका जीवाः सम्पत्तिं प्राप्य प्रसीदन्ति, तथैव महात्मानो विवेकशालिनः खलु विपत्तिं प्राप्य प्रसीदन्ति। आश्चर्यमिदं दृष्ट्वा प्राकृता जनास्तान् विक्षिप्तान् मन्यन्ते। सन्तश्च प्राकृतान् जनान् केवलं साधारणजीवान् मन्यन्ते। वस्तुतः विचारवन्तो जना विपत्तिं सुखमूलत्वेन मन्वते, यतो हि दुःखप्राप्तिद्वारैव मनुष्याणां हृदयं संसाराद्विरक्तं भवति। ते चिन्तयन्ति—

"अश्नीमहि वयं भिक्षामाशावासो वसीमहि।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥"

ते दीनाः सन्तो जीवनं यापयन्ति परन्तु दैन्यं नैव प्रकटयन्ति। वस्तुतः स एव दीनो दरिद्रो भवति यस्य तृष्णा विशालाऽस्ति, पर—'मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ?'

शिवे भक्तिरस्ति। मरणजन्मभयं हृदि विद्यते। बन्धुषु स्नेहो नास्ति। कामविकाराः नासते। संसर्गदोषरहिता वनान्ता निवासाय सन्ति। वैराग्यं च हृदये विलसति, इतः परं किमर्थनीयम्? सांसारिकभोगेषु विनष्टेषु गङ्गातटे कुटीनिवासो वरम्। संसारासारताबोधे सञ्जाते सति सर्वमपि सौन्दर्यं नैव चित्तमाकर्षति। भोगादिकं सकलं परमचञ्चलं विज्ञाय हर्म्यतलं त्यक्त्वा सन्तो वनान्तं गताः। सञ्जातवैराग्या महान्तः पुरुषाः केवलमिदमेव वाञ्छन्ति—

"एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः।
कदा शम्भो! भविष्यामि कर्मनिर्मूलनक्षमः॥" इति।

वैराग्यस्य विषये महर्षिणा पतञ्जलिना योगसूत्रे विवेचितमस्ति। योगो हि नाम चित्तवृत्तिनिरोधः। तत्र वृत्तीनां निरोधः कथं स्यादिति प्रश्नस्य समाधाने—"अभ्यासवैराग्याभ्यां तन्निरोधः" (सू० १२) इत्युक्तम्। चित्तस्य स्वाभाविको बहिर्मुखः प्रवाहो वैराग्येण निवर्त्तते। अभ्यासेन चान्तरिकः प्रवाहः स्थिरी भवति। वैराग्येण रजो गुणनिवृत्तिः, अभ्यासेन च तमोगुणनिवृत्तिर्भवति। एवमेव योगस्याष्टप्रकारसाधनेषु यमनियमादिबहिरङ्गसाधनानां सिद्धौ अभ्यास उपकरोति, धारणाद्याभ्यन्तरिकसाधनानां च सिद्धौ वैराग्यं सहायकं भवति। भगवता श्रीकृष्णेनापि मनोनिग्रहोपायमुपदिशता गीतायामुक्तम्—'असंशयं महाबाहो! मनो दुर्निग्रहं चलम्। अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते' इति।

'तत्र स्थितौ यत्नोऽभ्यासः' (सू० १३) 'स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः'— (सू० १४) इत्यभ्यासस्वरूपप्रयोजने प्रतिपाद्य वैराग्यस्वरूपं विवृण्वन् तद्द्विधा विभजते—अपरवैराग्यं परवैराग्यं चेति। तत्रापरवैराग्यलक्षणं ब्रूते—'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्' (सू० १५) इति। दृष्टविषयेषु (रूप-धन-स्त्री-राज्यादिषु) आनुश्रविकविषयेषु (देवलोक-स्वर्ग-सिद्धि-दिव्यगन्धादिषु) च यस्य वितृष्णा जायते तस्य वैराग्यं हि वशीकारसंज्ञकमपरवैराग्यम्। यतमान-व्यतिरेकैकेन्द्रिय-वशीकाराभिधानं चतुर्धा वैराग्यम्। चित्तस्य मल रागादिदोषेषु निवृत्तेषु, दिव्यादिव्यविषयोपस्थितिषु उपेक्षाबुद्धौ सञ्जातायां—"ममैते वश्याः, नाहमेतेषां वश्यः" इति ज्ञानमेव वशीकारसंज्ञकं वैराग्यम्। परवैराग्यं किमिति आकाङ्क्षायामाह— "तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्" (सू० १६) इति। पुरुषख्यातिद्वारा गुणेभ्यो वैतृष्ण्यं परवैराग्यमिति तदर्थः। चित्तस्य परमनैर्मल्ये सम्पन्ने पुरुषख्यातिरपि (तृष्णानिवृत्तौ एकाग्रे चित्ते चित्तपुरुषयोर्भेदसाक्षात्कारः पुरुषख्यातिः) चित्तस्यैव सात्त्विकी वृत्तिरस्तीति, गुणपरिणामोऽयमिति वा प्रतीयते, ततः पुरुषख्यातेरपि विरक्तिरुत्पद्यते। एवं गुणेभ्यो वैतृष्ण्यं परवैराग्यम्। तदुदये योगी मनुते—'यत्प्राप्तव्यं तत्प्राप्तं, क्लेशा विनष्टाः, संसृतिचक्रं भग्नम्' इति। इदं परवैराग्यमेव ज्ञानस्य पराकाष्ठा, अस्यैव निरन्तराभ्यासेन कैवल्यं भवति।

एवं दृष्टेषु पदार्थेषु विरक्तोऽपि जनोऽदृष्टेषु स्वर्गादिभोगेष्वासक्तो भवितुमर्हति, यतो हि अदर्शनात्तेषां दर्शनाकाङ्क्षोत्पद्येत । वयं पश्यामो यत्–यद्वस्तु नित्यं दृश्यते तन्न मनो हरति, किन्तु मनसः स्वभावः एवैतादृशो यददो नवं वस्तु दिदृक्षते सदैव । एवं तस्य पतनं सम्भवतीति विचार्यैव गीतादिशास्त्राणि समादधति—'ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इति । देवा अपि पुण्ये क्षीणे सति स्वर्गात् पतन्ति–इति ज्ञानं लब्ध्वा तत्रत्यभोगेष्वपि विरक्तिरुत्पद्यते—इहामुत्रफलभोगविरागः । लौकिकस्वर्गीयभोगेषु त्रिगुणाधिकारभूमिषु च या विरक्तिस्तदेव विशिष्यते, सम्भवत एतदेव सङ्केतयन् पण्डितराजो जगन्नाथः कथयति—

"मृद्वीका रसिता सिता समशिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाऽप्यधायि कतिधा रम्भाधरः खण्डितः ।
सत्यं ब्रूहि मदीय जीव ! भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः ?"

इत्थङ्कारमाध्यात्मिके पथि निर्भयतयाऽग्रेसरणाय वैराग्यमेव प्रधानं सहायकमिति ज्ञायते । यस्य हृदये वैराग्यं नोदेति स बहुप्रयासेनापि आत्मसाक्षात्कारं विधातुं नैव शक्नोति, यतो हि तस्य कृते सांसारिका एव विषया मधुराः प्रीतियोग्या अहेयाश्च । वैराग्यसूर्ये समुदिते सति नित्यानित्यवस्तुविवेक उत्पद्यते, यमनियमादीनां यत्नेन श्रद्धया चाभ्यासो भवति, अन्ते चात्मनोऽपरोक्षानुभूतिर्जायते । अतः, आध्यात्मिकतत्त्वज्ञानसाधनेषु प्रामुख्यं भजते वैराग्यमिति शम् ।

रागिण्यपि विरागिण्यः स्त्रियस्तासु रमेत कः ।
अहं तु कलये मुक्तिं या विरागिणि रागिणी ॥



पाणिनीयव्याकरणस्य वैशिष्ट्यानि

पं० बाकेलालमिश्रः

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः[1] ॥
वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी[2] ॥
एकत्वमनतिक्रान्ता वाङ् नेत्रा वाङ् निबन्धनाः ।
पृथक् प्रत्यवभासन्ते वाग्विभागाद् गवादयः[3] ॥

भगवता विश्वनाथेन आत्मशक्त्या विविधा सृष्टिर्विरचिता, परन्तु तत्र तत्र सन्तोषमलभमानेन यदा मानवसृष्टिर्विहिता तदैव सृष्टेः कार्तार्थ्यं मेने । यतो हि मानवशरीरं ब्रह्मावलोकधिषणमजायत । उक्तञ्च श्रीमद्भागवते एकादशस्कन्धे—

सृष्ट्वा पुराणि विविधान्यज आत्मशक्त्या,
वृक्षान् सरीसृपपशून् खगदंशमत्स्यान् ।
तैस्तैरतुष्टहृदयः पुरुषं विधाय,
ब्रह्मावलोकधिषणं मुदमाप देवः[4] ॥

तत्र च ब्रह्मज्ञानरूपलक्ष्यसिद्ध्यर्थमेव मानवशरीरस्य रक्षामावश्यिकीं मत्वा पृथ्वी, जलम्, अग्निः, वायुः, आकाशम्, इति पञ्चभूतानां सृष्टिः पूर्वमेव कृता, तथैव मानवेभ्यः शब्दतत्त्वमपि उपदिष्टम् । शब्दज्ञानं विना मानवः सामाजिको भवितुं नार्हति । तदभावे ब्रह्मचर्यादयः आश्रमाः

प्रवक्ता-संस्कृतविभगे काशीविद्यापीठस्य, वाराणसी ।

१—वाक्यपदीये ब्रह्म० १ कारिका

२—तत्रैव १२४ कारिका

३—पं० श्रीरघुनाथशर्मणा वाक्यपदीये ब्रह्मकाण्डे उद्धृतम् पृ० १५०

४—श्रीमद्भागवते, एकादशस्कन्धे, ९-२८

पालयितुमशक्याः। तत्तदाश्रमविहितानामाचाराणामनुष्ठानेनैव पूर्वसङ्केतितब्रह्मज्ञानस्य प्राप्तिर्भवति। तच्च शब्दतत्त्वं द्वेधा व्यवस्थितम्—वैदिकं लौकिकञ्चेति। तत्र वैदिकशब्देषु व्याकरणानुशासनं लक्ष्यानुसार्येव भवति। किन्तु लौकिकशब्देषु लक्ष्यशासकं भवति। तच्च शब्दरूपं लक्ष्यं व्याकरणनियमज्ञानेनैव सम्यगवबोद्धुं शक्यते नान्यथा, इति अनादिकालादेवास्ति व्याकरणस्यावश्यकता। तत्र अनेकेषु व्याकरणशास्त्रेषु मध्येकालमस्तङ्गतेषु द्वापरयुगावसाने महामुनिना पाणिनिना विरचितमेकमष्टाध्यायीरूपं महामहनीयं व्याकरणम्। तद्विषये कानिचिद्वैशिष्ट्यानि प्रकाशयितुं प्रयत्यते।

पाणिनीयव्याकरणस्य परिचयः वैशिष्ट्यपदार्थश्च

तत्र गार्ग्य[1]–शाकल्य[2]–शाकटायन[3]–सेनक[4]प्रभृतिभिर्मुनिभिर्विरचितेषु संस्कृतभाषानियामकेषु व्याकरणेषु कालक्रमेण विलुप्तेषु सत्सु महामुनिः पाणिनिः व्याकरणविशेषं व्यरीरचत्। अस्मिन् व्याकरणेऽनुवृत्तिक्रमादौ प्रकृष्टा वैज्ञानिकी सरणिः समाश्रिताऽस्ति, या चाग्रे स्फुटीभविष्यति। पाणिनिना रचितत्वात् इदं व्याकरणं पाणिनीयमित्युच्यते। पाणिनिनामा कश्चिन्महामुनिः दाक्षीनामिकायाः मातुर्गर्भादुदपद्यत। एतदीयजन्मकालविषये इदमित्थं निर्णयः कर्तुं न शक्यते। तथापि द्वापरयुगावसाने कलियुगस्यारम्भकाले एष मुनिः भारतभूभागमलञ्चकारेति कथञ्चिद् वक्तुं शक्यते। यतो हि अनेन अष्टाध्यायां वासुदेवार्जुनाभ्यां वुन्[5] इति सूत्रे भगवान् वासुदेवः अर्जुनश्च स्मृतिविषयतां प्रापितौ। अनेन ज्ञायते महाभारतयुद्धानन्तरमदसीयः कालः। पुनश्च राजर्षिपरीक्षितकालात् पूर्वमस्य कालः। यतो हि परीक्षितो नामसङ्केतः क्वापि न कृतः। अथ च परीक्षितमुद्दिश्य श्रीमद्भागवतसप्ताहप्रवचनं विधातुः महामुनेः शुकदेवस्य च चर्चा न क्वापि कृता। अपि तु व्यासवरुणनिषादचण्डालविम्बानां चेति वक्तव्यम्[6] इति वार्तिकं रचयता श्रीकात्यायनेन वैयासकिनाम्ना श्रीशुकदेवस्य सङ्केतः सम्पादितः। तत्र च कोऽयं भारतभूभागः महामुनेरेतस्य जन्मना समलङ्कृत इति विचारे शलातुरनामको ग्रामविशेषः यश्चेदानीं यवनजातीयाक्रान्ते भूभागे वर्तमानलाहुरनाम्ना प्रसिद्धिं गतोऽस्ति, वर्तमानकाले रावलपिण्डीजनपदः यश्च पुनः 'तक्षशिला' इति नाम्ना प्रसिद्ध आसीत्। तत्समीप एव वर्तमानभारतात् पश्चिमोत्तरदिशि विराजमानोऽस्ति। लक्षश्लोका-

---

१—अङ्गार्ग्यगालवयोः (अष्टा० ७-३-९९)

२—लोपः शाकल्यस्य (अष्टा० ८-३-१९)

३—त्रिप्रभृतिषु शाकटायनस्य (अष्टा० ८-४-५०)

४—गिरेश्च सेनकस्य (अष्टा० ५-४-११२)

५—वासुदेवार्जुनाभ्यां वुन् (अष्टा० ४-३-९८)

६—सुधातुरकङ् च (अष्टा० ४-१-९७) सि० कौ० तद्धितेष्वपत्याधिकारप्रकरणम्।

त्मकसङ्ग्रहग्रन्थस्य रचयिता आचार्यः व्याडिः एतस्य मातुल आसीदित्यपि प्रचुरा प्रसिद्धिरस्ति। एतस्य समये संस्कृतभाषा शैथिल्यं प्राप्नुवती आसीत्। तन्नियामकानि प्राक्तनव्याकरणानि चापि विलुप्तप्रायाण्यासन्। इत्थं विचार्य परमकारुणिकः एष महामुनिपाणिनिः इदमद्भुतं व्याकरणं रचयामास। अनेन अद्य यावत् संस्कृतभाषा जीवन्ती विराजते। यदि दुग्धपूर्णः कोऽपि घटः वस्त्राच्छन्नमुखः अगाधे गङ्गाजले प्रक्षिप्येत, पुनश्च केनाऽपि निमज्जनकर्त्रा स घटो बहिरानीयेत तदा रक्तिकामात्रमपि दुग्धं बहिर्न निर्गच्छति, अपितु सम्पूर्णं प्राप्यते, तत्र को हेतुः ? मुखद्वारे वस्त्रबन्धनमेव। अन्यथा बन्धनरहितघटात् दुग्धं बहिर्निःसृत्य धारया सम्मिल्य अगाधं गङ्गाजलं गमिष्यति। तस्यामवस्थायां नीरक्षीरविवेचकः कोऽपि हंसः एव पृथक् कर्त्तुं शक्नुयात्। तथैव भाषामुखमपि यदि व्याकरणनियमबन्धनेन परिवेष्टितं स्यात्तदा तस्या भाषायाः सुचिरं जीवनं सम्भाव्येत। अन्यथा व्याकरणनियमरहिता भाषा विनष्टा भवतीत्येवेतिकृत्वा एतत्पाणिनीयं व्याकरणं संस्कृतभाषायाः कृते महते उपकाराय कल्पते। अदसीया विशेषता अवश्यं वचनीयास्ति। सैव वैशिष्ट्यपदार्थः। तज्ज्ञानेनैवैतद्व्याकरणाध्ययने लोकानां प्रवृत्तिर्भविष्यति। यतश्च तज्ज्ञानं प्रयोजनज्ञानाधायकम्। प्रयोजनज्ञानमेव प्रवृत्तिजनकम्। उक्तञ्च—"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति।

एवञ्च प्रसंगतः "व्याक्रियन्तेऽसाधुशब्देभ्यः साधुशब्दा पृथक् क्रियन्ते येन तद् व्याकरणम्" इति व्युत्पत्त्या असाधुशब्दावधिकसाधुशब्दविषयक पृथक्कृतिज्ञापकः नियमविशेषो व्याकरणमिति लभ्यते। निष्कृष्टदृष्ट्या शब्दगतसाधुत्वज्ञापकनियमविशेषत्वं व्याकरणशास्त्रलक्षणमिति चावगन्तव्यम्।

पाणिनीयव्याकरणे सूत्रभेदविमर्शः

अस्मिश्च व्याकरणे नियमविशेषाः सूत्रात्मकतया सङ्केतिताः सन्ति। सूत्रलक्षणञ्च—

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥

इत्युक्तमस्ति। एतादृशलक्षणलक्षितानां सूत्राणां षड्विधाः दृश्यन्ते एतस्मिन् व्याकरणे। तथाहि—

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च सूत्रं षड्विधमुच्यते॥

तत्र शक्तिग्राहकत्वं संज्ञा सूत्रत्वम्। यथा—"वृद्धिरादैच्।[1]" "अदेङ्गुणः[2] इत्यादि संज्ञा—

१—अष्टा० (१–१–१)
२ – तत्रैव (१–१–२)

संज्ञासूत्राधिकारसूत्रभिन्नत्वे सति अप्रामाण्यज्ञानानास्कन्दितलक्ष्यधर्मिकसाधुत्वप्रकारकशास्त्रजन्यप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वं परिभाषासूत्रत्वम् । तच्च "इको गुणवृद्धी"[१] "तस्मिन्निति निर्दिष्टे पूर्वस्य"[२] इत्यादौ सुष्ठु वर्तते । लक्ष्यविषयकापूर्वसंस्कारविषयकबोधजनकत्वं विधिसूत्रत्वम् । यथा—"इको यणचि"[३] "अकः सवर्णे दीर्घः"[४] इत्यादि । सिद्धौ सत्यनारभ्यमाणविधित्वं नियमसूत्रत्वम् । यथा—"धातोस्तन्निमित्तस्यैव"[५] इत्यत्र "वान्तो यि प्रत्यये"[६] इत्यनेनैव वान्तादेशस्य सिद्धत्वात्तत्र लक्षणसमन्वयः सुतरां जातः । वत्प्रत्ययघटितत्वमतिदेशसूत्रत्वम् । यथा—"अन्तादिवच्च"[७] "पूर्ववत्सनः"[८] इत्यादि । यदि क्वचिद्वतिं विनाऽपि वत्यर्थो गम्यते, तदा तत्रापि अतिदेशत्वं मन्तव्यमेव, बहुगणवतुडतिसंख्या[९] इति सूत्रस्थभाष्यप्रामाण्यात् । अस्यातिदेशसूत्रस्य षड्भेदाः शास्त्रे निरूपिताः तन्नात्र प्रपञ्च्यते । एतदर्थं प्रौढमनोरमायां "तृज्वत्क्रोष्टुः"[१०] इति सूत्रं द्रष्टव्यम् । स्वदेशे लक्ष्यसंस्कारविषयकबोधाजनकत्वे सति उत्तरसूत्रानुवृत्या लक्ष्यसंस्कारविषयकबोधजनकत्वमधिकारसूत्रत्वम् । यथा—प्रत्ययः[११] परश्च[१२] अंगस्य[१३] भस्य[१४] पूर्वत्रासिद्धम्[१५] इत्यादिषु । अयञ्चाधिकारः चतुर्विध इति शाब्दिकाः कथयन्ति । तथाहि—

गोर्यूथः सिंहदृष्टिश्च माण्डूकप्लुतिरेव च ।
गङ्गाप्रवाहवच्चापि अधिकारश्चतुर्विधः ॥ इति

पाणिनीयव्याकरणेऽनुवृत्तिक्रमे वैज्ञानिकशैलीविमर्शः

अष्टाध्यायीसूत्राणामर्थाः क्वचित्स्वतः क्वचिच्चाऽनुवृत्तिद्वारा सारल्येन ज्ञातुं शक्यन्ते । यथा—प्रथमाध्याये प्रथमपादे प्रथमसूत्रमस्ति–वृद्धिरादैजिति । तत्र स्वत एव तदर्थो ज्ञायते । तथाहि—वृद्धिरिति विधेयपदम् आदैजिति चोद्देश्यपदम् । एवञ्चादैच्पदार्थः वृद्धिसंज्ञको भवतु इति सूत्रार्थीया प्रथमकक्षा । ततश्च 'आत्' इत्यनेन दीर्घाकारः, ऐजिति प्रत्याहारपदेन ऐकारौकारो च गृह्यन्ते । एवञ्च आकारः ऐकारः औकारश्च वृद्धिसंज्ञको भवतु इति द्वितीया कक्षा ।

१—अष्टा० (१–१–३)
२—तत्रैव (१–१–६६)
३—तत्रैव (६–१–७७)
४—तत्रैव (६–१–१०१)
५—तत्रैव (६–१–८०)
६—तत्रैव (६–१–७९)
७—तत्रैव (६–१–८१)
८—अष्टा० (१–३–६२)
९—महाभाष्ये (अष्टा० १–१–२३)
१०—प्रौ० मनो० अजन्तपुंल्लिङ्गे (अष्टा० ७–१–९५)
११—अष्टा० (३–१–१)
१२—तत्रैव (३–१–२)
१३—तत्रैव (६–४–१)
१४—तत्रैव (६–४–१२९)
१५—तत्रैव (८–२–१)

तदनु प्लुताकारस्य प्लुतैकारौकारयोश्च वृद्धिसंज्ञावारणाय "तपरस्तत्कालस्य"[१] इति सूत्रसाहाय्यं गृहीत्वा द्विमात्रिकस्याकारस्यैकारस्यौकारस्य च वृद्धिसंज्ञा भवत्विति तृतीयकक्षायां सारल्येन पर्यवसितोऽर्थः समक्षमागतः । तत्र ऐच् प्रत्याहारस्यार्थः "आदिरन्त्येन सहेता"[२] इति सूत्रस्य सहकारं गृहीत्वा, तत्र च "अणुदित्सवर्णस्य चाप्रत्ययः"[३] इत्यनेन ऐजंशे "गुणा अभेदकाः" इत्यनेन आकारांशे प्राप्तस्य सवर्णग्रहणस्य वारणाय तपरसूत्रसाहाय्यं गृह्यते इति कृत्वा अष्टाध्यायीसूत्रस्यास्यार्थः अष्टाध्यायीसूत्रद्वयसाहाय्येनैव सुज्ञातः । अग्रिमे च "अदेङ्गुणः"[४] इति द्वितीयसूत्रस्याप्यर्थ एवमेव सुष्ठु ज्ञातुं शक्यते । स च इत्थम् ह्रस्वाकारः द्विमात्रिकः एकारः ओकारश्च गुणसंज्ञकः स्यात् इत्याकारः सम्पद्यते । अग्रिमे च "इको गुणवृद्धी"[५] इति परिभाषासूत्रस्यार्थोऽपि स्वत एव अनुवृत्तिमन्तरेव ज्ञातुं शक्यते । तथाहि—वृद्धिगुणपदयोः पूर्वसूत्राभ्यामनुवृत्यैव लाभसम्भवे पुनरत्रत्यगुणवृद्धिशब्दयोः सामर्थ्यात् गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धयोर्विधानं तत्र इकः इति षष्ठ्यन्तं पदमुपतिष्ठते, इत्यर्थः आञ्जस्येन सम्पद्यते । अग्रिमे च "न धातुलोप आर्धधातुके"[६] इति चतुर्थसूत्रे "इको गुणवृद्धी" इति सम्पूर्णं सूत्रमनुवर्त्य धात्वंशलोपनिमित्ते आर्धधातुके परे इकः स्थाने गुणवृद्धी न भवेतामिति सूत्रार्थः सरलतया बोद्धुं शक्यते । "क्ङिति च"[७] इति पञ्चमे सूत्रेपि 'न धातुलोप' इत्यतो नेति पदम्, "इको गुणवृद्धी"[८] इत्यतः समग्रं पदद्वयञ्चानुवर्त्य गिति किति ङिति परे इकः स्थाने गुणवृद्धी न भवेतामिति सूत्रार्थः सुष्ठु अवगन्तुं शक्यते । एवमेव "दीधीवेवीटाम्"[९] इति सूत्रस्याप्यर्थबोधने प्रक्रिया गृहीता वर्तते । एषा एव वैज्ञानिकी पद्धतिः । अतएव शिष्टोक्तिरपि वर्तते—"सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र" इति ।

कतिपयसूत्राणां विशेषवैलक्षण्यम्—

अष्टाध्यायीसूत्रेषु कानिचित् सूत्राणि विशेषतो महत्त्वाधायकानि सन्ति । यथा—"विप्रतिषेधे परं कार्यम्"[१०] इति प्रथमाध्यायस्थं सूत्रं सापादिकसूत्रेषु परशास्त्रस्य बलवत्त्वं

१—अष्टा० (१–१–७०)
२—तत्रैव (१–१–७१)
३—तत्रैव (१–१–६९)
४—तत्रैव (१–१–२)
५—तत्रैव (१–१–३)
६—अष्टा० (१–१–४)
७—तत्रैव (१–१–५)
८—तत्रैव (१–१–३)
९—तत्रैव (१–१–६)
१०—तत्रैव (१–४–२)

बोधयति। यथा—"सुपि च"[१] इति सूत्रं 'रामाभ्याम्' इत्यत्र दीर्घं विधातुं चरितार्थम्। "बहुवचने झल्येत्"[२]—इति च सूत्रं 'रामेषु' इत्यत्र एत्वं विधातुं कृतार्थमस्ति। रामेभ्यः इत्यत्र तु द्वयोरनयोः प्राप्तौ सत्यां 'विप्रतिषेधे परं कार्यम्' इति सूत्रं परस्य एत्वविधायकशास्त्रस्य बलवत्त्वं बोधयति। तेन दीर्घं बाधित्वा एत्वमेव भवति, अन्यथा पर्यायेण द्वयोरपि विधानमापद्येत। इदञ्च सूत्रं त्रिपाद्यां न प्रवर्तते, परस्यासिद्धत्वेनाभावात्। उक्तञ्च वार्तिककृता—पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति। एवमेव "पूर्वत्रासिद्धम्" इति अष्टमाध्याये द्वितीयपादे प्रथमं सूत्रम्। तेन सापादिकशास्त्रं प्रति त्रैपादिकशास्त्रस्यासिद्धत्वं[३] बोध्यते। त्रिपाद्यामपि पूर्वशास्त्रं प्रति परशास्त्रस्य च। यथा—'मनोरथः' इत्यत्र मन र्‌रथः इत्यवस्थायां 'रो रि' इत्यनेन रेफस्य लोपे प्राप्ते, "हशि च"[४] इत्यनेन उत्वे च प्राप्ते। तत्र 'हशि च' इति सापादिकशास्त्रदृष्ट्या "रो रि" इति त्रैपादिकशास्त्रस्यासिद्धत्वात् उत्वमेव भवति। त्रिपाद्यामपि ईदृशी एव गतिः, तेन 'प्रशान्' इत्यत्र नलोपः शास्त्रदृष्ट्या "मो नो धातोः"[५] इति परशास्त्रस्यासिद्धत्वात् नलोपो न जायते। अथ च 'प्रत्ययः'[६] परश्च[७] "आद्युदात्तश्च"[८] इत्येतत् सूत्रत्रयं तृतीयाध्यायतः आरभ्य पञ्चमाध्यायं यावत् अधिकृतमस्ति। एवञ्च तृतीये, चतुर्थे, पञ्चमे चाध्याये इदं सूत्रत्रयं निष्प्रत्यूहमनुवर्तते। अनयैव रीत्या "अङ्गस्य"[९] "भस्य"[१०] इत्यादिसूत्रमपि अधिकारसूत्रतया गृह्यते। "असिद्धवदत्राभात्"[११] इत्यपि च शास्त्रं समानाश्रये कर्तव्ये कृतस्य आभीत्यस्यासिद्धत्वं विदधाति। तेन 'बभूव' 'दिदीये' इत्यादौ उवङि यणि च कर्तव्ये वुग्युटोः असिद्धत्वं प्राप्तम्, तच्च न भवति, "वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ" इति वचनादित्यन्यत्। एवमेव अन्यत्रापि विशेषतो वैलक्षण्यमालोचयितुं शक्यते।

१—तत्रैव (७–३–१०२)
२—अष्टा० (७–३–१०३)
३—तत्रैव (८–३–१४)
४ तत्रैव (६–१–११४)
५—तत्रैव (८–२–६४)
६—तत्रैव (३–१–१)
७—तत्रैव (३–१–२)
८—तत्रैव (३–१–३)
९—अष्टा० (६–४–१)
१०—तत्रैव (६–४–१२९)
११—तत्रैव (६–४–२२)

पाणिनीयव्याकरणस्य दर्शनत्वम्

यद्यपि पाणिनीयं व्याकरणं शब्दानां साधनाय प्रक्रियाविशेषं प्राधान्येन बोधयति, तथापि एतस्य दर्शनत्वमपि अविच्छिन्नपरम्परया अवगतं वर्तते एव। तथाहि—भारतीयदर्शनस्यायमेव विशेषः अवगम्यते, यत् आत्मानात्मविवेचनद्वारा मोक्षतत्त्वं प्रकाशयतु। तदनुगुणमेतद्व्याकरणमपि आत्मानात्मविवेचने पदं पश्चान्न करोति। तथाहि—"चत्वारि वाक्परिमिता पदानि" इति ऋङ्मन्त्रमादाय चतसृणां वाचां स्वरूपं ज्ञायते। तत्र वैखर्याः मध्यमायाः पश्यन्त्याश्च संस्कारकं व्याकरणशास्त्रं प्रसिद्धमस्ति। तुरीयायाः पराख्यवाचः संस्कारो न भवति, तस्याः नित्यत्वात्, निरवयवत्वात्, चेतनत्वाच्च। उक्तञ्च महाभारते स्वरूपज्योतिरेवान्तः परावागनपायनी इति। एवञ्च परा वाचः एव विवर्तभूतं पश्यन्त्यादिकं सर्वं वाक्तत्त्वम्। तत्र नित्यः अखण्डः स्फोटः परा वागेव। मध्यमानादव्यङ्ग्यस्फोटस्तु अन्तःकरणावच्छिन्नचिदात्मैव। तत्र व्यञ्जकस्य मध्यमाख्यध्वनेरनित्यत्वात् औपाधिकमनित्यत्वं चिदात्मभूते स्फोटेऽपि इति कृत्वा व्यञ्जकस्य ध्वनेरनात्मत्वं, व्यङ्ग्यस्य चिदात्मभूतस्य स्फोटस्य नित्यत्वं विवृण्वत् व्याकरणमपि आत्मानात्मनोः विवेकं साधु विदधात्येव। अथ च तत्तच्छब्देषु प्रक्रियाबोधनपुरःसरं नित्यशब्दस्यैव साधुत्वबोधने तात्पर्यमस्य व्याकरणशास्त्रस्य। उक्तञ्च –

सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ।
सत्यं यत्तत्र सा जातिः असत्या व्यक्तयो मताः॥

वैया० भूषणसारे—

अनयापि कारिकया जातिव्यक्त्योः सत्यत्वमसत्यत्वञ्च प्रतिपादितमस्ति। पुनश्चान्ते "महो देवो मर्त्यां आविवेश। महता देवेन नः साम्यं यथा स्यात्" इति महाभाष्योक्त्या मुक्तिस्वरूपं तत्प्राप्यत्वञ्चापि सङ्केतितमस्ति। आचार्यश्रीहरिणापि वाक्यपदीये उच्यते—

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्। प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते॥[1]

एतेन भारतीयदर्शनस्य लक्ष्यं पूरयत् एतद् व्याकरणं सुष्ठु दर्शनपदवीमधिरोहति। किञ्च पराभिधायाः वाच एव विवर्तभूतं तरङ्गद्वयम् एकं शब्दरूपम्, द्वितीयञ्चार्थरूपम्। तत्राद्यं सद्रूपं संविद्रूपञ्च, द्वितीयं सद्रूपमानन्दरूपञ्च। अतएव प्रथमस्यैव प्रकाशकत्वं, द्वितीयस्य प्रकाश्यत्वम्। प्रथमस्यैव वैदिकवाग्रूपत्वं तन्त्रशास्त्रदृष्ट्या पार्वतीरूपत्वञ्च। द्वितीयस्य परमेश्वररूपत्वं, आनन्दरूपत्वेनाभिलष्यमाणत्वञ्च। अतएव श्रुतिरपि वदति नामरूपे व्याकरवाणीति। तत्र नामपदेन पश्यन्त्यादिशब्दरूपो विवर्तः, रूपपदेन च परमेश्वरादिः पृथिव्यन्तः अर्थरूपो विवर्तो गृह्यते। अतएव महाकविना श्रीकालिदासेनापि रघुवंशमहाकाव्यस्य आदिमे श्लोके वागर्थयोरुपमानत्वं पार्वतीपरमेश्वरयोश्चोपमेयत्वं वर्णितम्। तथाहि—

१—वाक्य० का० १३१

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

पाणिनीयव्याकरस्य समाजोपयोगिता

अनेनापि व्याकरणस्य दर्शनत्वं सुदृढकोटिमाटीकते । पाणिनीयव्याकरणे समाजोपयोगिनो बहुविधा विषया निर्दिष्टाः सन्ति । यथा – वृद्धिरादैच् इति प्रथमे सूत्रे वृद्धिः शब्दमादितः प्रयुञ्जानो महामुनिः पाणिनिः एतच्छास्त्रमध्येतृणामध्यापयितृणाञ्च मङ्गलं भवतु इति निर्दिशति । अनेन इदं ज्ञायते यत् समाजेऽपि कस्मिंश्चदपि कार्ये प्रवर्तमानो जनः वृद्धिसूचकं मङ्गलं कुर्यात् । तेन हि मङ्गलाचरणेन उत्साहवृद्धिः, कार्यस्य निर्विघ्नं परिसमाप्तिश्च भवति इति सङ्केतः प्राप्यते । अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात्खः[1] इत्यादिसूत्रेण अषडक्षीणो मन्त्र इति प्रयोगसाधनद्वारा इदं ज्ञाप्यते यत् कश्चिदपि मन्त्रणा द्वाभ्यामेव विधेया इति ।

उक्तञ्चान्यत्रापि—षट्कर्णो भिद्यते मन्त्रः इति । एतावता द्वाभ्यामेव सम्पाद्यमानो मन्त्रः स्थिरायते, वाञ्छितं फलञ्च प्रसूते । आशितङ्गवीनमरण्यम् इति द्वितीयप्रयोगेण सूच्यते यद् राष्ट्रे प्रचुराणि अरण्यानि भवेयुः । तत्र गावः महिष्यादयश्च ग्राम्याः पशवः यथेच्छं तृणं चरन्तु यतश्च दुग्धस्य, दध्नो, घृतस्य च प्राचुर्येण सम्पत्तिः राष्ट्रे भवेत्, तेन समाजः बलवान् बुद्धिमान्, प्रगतिशीलश्च स्यात् । कृषिप्रधाने भारतवर्षे तु एतादृशी स्थितिः परमावश्यकी । अलं कर्मणे अलकर्मीणः पुरुषः इति तृतीयोदाहरणेन ध्वन्यते यत् पुरुषः कर्मकरणे समर्थो भवेत्, तत एव कर्म कृत्वा इदं फलं सम्पादयितुं प्रभविष्यति, समाजस्य च समीचीनां रक्षां कर्तुं शक्ष्यति, अन्यथा अकर्मण्यो जनः समाजे घृणापात्रं भूत्वा समाजं विकारयिष्यति । एवमेव—संसृष्टे[2] व्यञ्जनैरुपसिक्ते[3] इत्यत्र तत्र संस्कृतम् तेन संस्कृतम् 'तत्र संसृष्टम्' तेन संसृष्टम् इत्यर्थचतुष्टयेन एकविध एव प्रयोगः साध्यते दाधिक इति । तेन दध्नि संस्कृत ओदनादिरथवा दध्ना संस्कृतः, दध्नि संसृष्टः अथवा दध्ना संसृष्टः एतैश्चतुर्भिः प्रकारैः भोजनव्यवस्थायां बहुविधत्वं ज्ञाप्यते । एवमेव—प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च[4] इति सूत्रेण बोध्यते यत् समाजे प्रहासोऽपि आवश्यकः । तत्र वाक्स्खलनं भवत्येव, किन्तु प्रहास आनन्दं वर्धयति, मनोमालिन्यञ्च दूरीकरोति । ये धातव उभयपदिनः तत्र कर्तृगामिनि क्रियाफले आत्मनेपदस्य प्रयोगः, परगामिनि क्रियाफले तु परस्मैपदस्य प्रयोगः । अनेनापि आत्मार्थ-

---

१—अष्टा० (५–४–७)

२—अष्टा० (४–४–२२)

३—अत्रैव (४–४–२६)

४—तत्रैव (१–४–१०६)

परार्थयोः कार्ययोः भेदः सूचितोस्ति। 'स्वतन्त्रः कर्ता'[१] इत्यनेन स्व-स्वक्रियायां कर्तुः स्वातन्त्र्यं भवेत्तदैव सुष्ठु कार्यनिष्पत्तिः संम्पद्यते नान्यथा। एवञ्च तत्तत्क्रियायां सामाजिको जनः स्वातन्त्र्यं प्राप्नुयात्, अन्यथा सा क्रिया साधुतरा न सम्पादिता भवेत्। किञ्च सन्ति तादृशान्यपि सूत्राणि यैः सामाजिकमन्यदपि कार्यं प्रसाध्यते। यथा—षट्पदयुक्तैः सूत्रैः वृश्चिकदंशजनितव्यथोपशमनं क्रियते। तथाहि तादृशं 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः'[२] इति षट्पदयुक्तं सूत्रम्। अस्य वैशिष्टचन्तु मया अनेकेषु स्थलेषु प्रत्यक्षमनुभूतम्। एतस्य जपेन वृश्चिकविषस्य दूरापसारणमवश्यमेव भवति। तथैव दाधर्ति-दर्धर्ति-दर्धर्षि-बोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्पदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्याऽऽगनीगन्तीति च[३] इति सूत्रस्य जपेन अथवा नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च[४] इत्यस्य जपेन सर्पविषस्यापहरणं भवति। अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरात्रिन्दिवाहर्दिवसरसजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः[५] इति सूत्रस्य जपेन तृतीयकस्य चातुर्थिकस्य वा ज्वरस्य दूरीकरणं भवति। "एको गोत्रे"[६] इत्यस्य जपेन शत्रुवंशे एक एव कश्चन पुरुषो जीवितः स्यात्, अन्ये सर्वे मरीष्यन्तीति। एवमेव वृद्धिरादैच्[७] इत्यस्य जपेन धनस्य, बलस्य, ऐश्वर्यस्य विद्यायाश्चाभिवृद्धिः भवति। न्यायालयीयविवादोपशान्तिर्भवति। एतावताऽपि समाजे प्रचुरा शान्तिः सम्भाव्यते। पाणिनीयव्याकरणस्य एतादृशं महत्त्वं ज्ञातव्यम्।

पाणिनीयव्याकरणस्य धर्मसाधनता

महामुनिः पतञ्जलिः ब्रवीति यत् शास्त्रज्ञानपूर्वके प्रयोगे अभ्युदयः अथ च लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते इत्याद्युक्तिभिः ज्ञायते यत् शास्त्रज्ञानपूर्वकं यः शब्दं प्रयुङ्क्ते तस्य धर्मोत्पत्तिः तेन च ऐहकलौकिकं पारलौकिकञ्च सुखमवाप्यते। तदप्युक्तम्—एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवति" इति। अन्यत्रापि पुण्यजननाय साधुभिर्भाषितव्यम् न असाधुभिः पापजननाय" इति। आचार्येण भर्तृहरिणाऽपि उक्तम्—

१—अष्टा० (१–४–५४)
२—तत्रैव (१–४–१०५)
३—तत्रैव (७–४–६५)
४—तत्रैव (८–४–१७)
५—अष्टा० (५–४–७७)
६—तत्रैव (४–१–९३)
७—तत्रैव (१–१–१)

अपोद्धारपदार्था ये चार्थाः स्थितलक्षणाः । अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः[१] ॥
कार्यकारणभावेन योग्यभावेन च स्थिताः । धर्मे ये प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु[२] ॥
ते लिङ्गैश्च स्वशब्दैश्च शास्त्रेऽस्मिन्नुपवर्णिताः । स्मृत्यर्थमनुगम्यन्ते केचिदेव यथागमम्[३] ॥
शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम् । अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः[४] ॥

एतैः बहुविधैः प्रमाणैः ज्ञायते, यत् एतद्व्याकरणनिष्पादिताः शब्दाः साधवः त एव प्रयुक्ताः सन्तः धर्ममुत्पादयितुं क्षमन्ते । अतश्च व्याकरणशास्त्रस्य ईदृशो—महिमा यत् ताम्बूलं भक्षयन् सुखेन शय्यायां शयानोऽपि यदि साधुशब्दान् प्रयुङ्क्ते तदा अनायासेनैव धर्मोत्पत्तिर्भवति । मीमांसाधर्मशास्त्रादिप्रतिपादितैः सन्ध्योपासनादिकर्मभिस्तु धर्मोत्पत्तिः अवश्यं भवति, किन्तु तादृश-कर्मसम्पादने क्लेशाधिक्यं जायते इति न तिरोहितं लोके ।

पाणिनीयव्याकरणस्य वेदमूलकत्वं वेदशास्त्रोपयोगित्वञ्च

एतच्च पाणिनीयव्याकरणं वेदमूलकमस्ति इत्यत्र नास्ति सन्देहलेशावसरः । तथाहि—

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा शखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि[५] ॥ इति

ऋग्वेदस्य मन्त्रमुद्धरता महामुनिना पतञ्जलिनाऽस्य वेदमूलकत्वं संसूच्यते । अथ च

चत्वारि वाक्परमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥[६] इति

इममपि ऋग्वेदीयं मन्त्रमुद्धरन् महाभाष्यकारः पाणिनीयव्याकरणस्य प्रतिपाद्यं वाक्चतुष्टयं बीजरूपेणोक्तमन्त्रो सङ्केतितवानस्ति । अथ च

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः[७] ॥

इति यजुर्वेदमन्त्रे प्रथमे यज्ञपदे इज्यते येन असौ यज्ञः यागादिर्व्यापारः इति करणव्युत्पत्तिर्दर्शिता । द्वितीये यज्ञपदे तु इज्यतेऽसौ यज्ञः विष्णुः इति व्युत्पत्तिर्दर्शितास्ति । तत्र "यजयाचयतविच्छप्रच्छरक्षो नङ्"[८] इति पाणिनीयसूत्रमेव साधुत्वसम्पादकम् । अथ च वेदोपयोगिताऽपि

१—वाक्यपदीये ब्रह्मकाण्डे २४ ३— ,, ,, २६
२— ,, ,, २५ ४— ,, ,, २७
५—ऋ० १०, ७१, २
६—ऋ० १, १६४, ४५
७—यजु० ३१।१६
८—अष्टा० (३-३-९०)

अस्य व्याकरणस्य प्रचुरमात्रायां वर्तते । तथा चोक्तं महाभाष्यकृता—कानि खल्वस्य व्याकरणस्य प्रयोजनानि ? "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति । आभ्यां प्रश्नोत्तराभ्यां स्पष्टमेव प्रतीयते यत् वेदस्य रक्षादय एव व्याकरणाध्ययनस्य मुख्यानि प्रयोजनानि । लौकिकशब्दानां पुण्यजनकतावच्छेदकसाधुत्वज्ञानम्, अन्यच्चापि आनुषङ्गिकं बहुविधं प्रयोजनं महाभाष्योक्तं द्रष्टव्यम् । तथाहि—इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि—तेऽसुराः इत्यादि ।

एतावता निबन्धेन अयं निष्कर्षः आयाति यत् संस्कृतभाषायाः अमरत्वसम्पादकमेतत्पाणिनीयव्याकरणमद्यत्वे वेदाङ्गतया प्रवर्तमानं चकास्ति । नास्ति अन्यदार्षं व्याकरणं यत् अद्यत्वे वेदाङ्गतामनुभवेत् । एवञ्च वेदोक्तबीजकमेतच्छास्त्रं वेदरक्षायै महान्तमुपकारं विदधत् वर्तते । न हि केवलं वेदरक्षामेव विदधाति अपितु लौकिकशब्दसाधुत्वमपि विज्ञापयति । बहुविधां सामाजिकीं व्यवस्थाञ्चापि प्रकाशयति । आत्मानात्मविवेचनद्वारा मोक्षसाधकमपि अस्ति । अतः श्रोतॄणां महते कल्याणाय निबन्धोऽयं भवेदिति आशासानो विरमति विदुषां विधेयः ।



पूर्वतोऽनुवृत्तम्—

महाकविकालिदासस्य महावैदिकत्वम्

डॉ० रामाशीषपाण्डेयः*

एवमेव रघुवंशमहाकाव्यस्य १४।७, १५।८९, १७।१७, ३७ श्लोकेष्वपि अभिषेक-संस्कारस्य वर्णनं प्राप्यते। विक्रमोर्वशीयेऽपि अभिषेकवर्णनं द्रष्टव्यम्--नारदः आकाशमवलोक्य 'रम्भे ! उपनीयतां स्वयं महेन्द्रेण संभृतः कुमारस्यायुषो यौवराज्याभिषेकः।'' (अंक ५।पृ० २४५) तत्रैव नारदः पुनः कथयति–निवर्त्यतां शेषो विधिः (अंक ५।पृ० २४५)

अन्त्येष्टिसंस्कारः

रघुवंशमहाकाव्ये प्राप्यते यत् अनग्निचित् अजः पितुः अनग्निं नैष्ठिकं विधिं यतिभिः सार्धं विदधे--

"श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः।
विदधे विधिमस्य नैष्ठिकं यतिभिः सार्धमनग्निमग्निचित्॥" (रघु० ८।२५)

एवमेवाग्निवर्णस्याग्निसंस्कारोऽपि १९।५४ श्लोके विद्यते।

श्राद्धसंस्कारः

श्राद्धसंस्कारस्य वर्णनं महाकवेः काव्येषु यत्र तत्र प्राप्यते। रघुवंशमहाकाव्ये पितृकार्य-कल्पवित् अजः पितृभक्त्या तदौर्ध्वदैहिकमकरोत्--

"अकरोत् स तदौर्ध्वदैहिकं पितृभक्त्यापितृकार्यकल्पवित्।
नहि तेन यथा तनुत्यजस्तनयावर्जितपिण्डकाङ्क्षिणः॥" (८।२६)

विदुषा अनेन गुणविशेषां भामिनीमिन्दुमतीमुद्दिश्य दशदिनात् परे महर्द्धयः क्रियाः नगरस्य उपवने एव अनुष्ठिताः--

"अथ तेन दशाहृतः परे गुणशेषामपदिश्य भामिनीम्।
विदुषा निधयो महर्द्धयः पुर एवोपवने समापिताः॥" (रघु० ८।७३)

रामलक्ष्मणौ गृद्धराजस्य पितृवदौर्ध्वदैहिकं चक्रतुः--

"तयोस्तस्मिन्नवीभूतपितृव्यापत्तिशोकयोः। पितरीवाग्निसंस्कारात्परा ववृतिरे क्रियाः॥" (रघु० १२।५६)

एवमेव रघुवंशमहाकाव्यस्य ८।८६ कुमारसंभवमहाकाव्यस्य ४।३७, ३८ एवमभिज्ञान-शाकुन्तलनाटकस्य ६।२५ श्लोकेष्वपि श्राद्धादयो वर्णिताः सन्ति।

सामवेदसम्बद्धानि तत्त्वानि

सामवेदसम्बद्धतत्त्वान्यपि महाकवेः काव्येषु यत्र तत्र वर्णितानि सन्ति। रघुवंशमहाकाव्ये

---

* मारवाड़ी संस्कृत कालेज, राँची

इन्द्रादयो देवा विष्णुं स्तुवन्ति--हे देव ! त्वां सप्तसामोपगीतं, सप्तार्णवजलेशयं सप्तार्चिमुखं सप्तलोकैकसंश्रयम् महविध आचख्युः---

"सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् । सप्तार्चिमुखमाचख्युः सप्तलोकैकसंश्रयम् ।।" (रघु० १०।२१)

तथा च चतुर्भुजांशप्रभवः दानप्रवृत्तेः अनुपारतानां कुशलवादीनां सवंशः सामयोनिः सुरद्विपानां वंश इव अष्टधा भिन्नः सन् विप्रससार--

"चतुर्भुजांशप्रभवः स तेषां दानप्रवृत्तेरनुपारतानाम् ।
सुरद्विपानामिव सामयोनिर्भिन्नोऽष्टधा विप्रससार वंशः ।।" (रघु० १६।३)

कुमारसंभवमहाकाव्ये शङ्करः पार्वतीं कथयति –किरणोष्मपायिनः सहस्रशः सहचराः अग्निपरिकीर्णतेजसं भानुं स्यन्दनाश्वहृदयङ्गमस्वनैः सामभिः संस्तुवन्ति --

"सामभिः सहचराः सहस्रशः स्यन्दनाश्वहृदयंगमस्वनैः ।
भानुमग्निपरिकीर्णतेजसं संस्तुवन्ति किरणोष्मपायिनः ।।" (८।४१)

अनेन प्रकारेण सामवेदसम्बद्धानि तत्त्वानि महाकवेः काव्येषु वर्णितानि सन्ति ।

अथर्ववेदसम्बद्धानि तत्त्वानि

महाकवेः काव्येषु यत्र तत्र अथर्ववेदसम्बद्धानि तत्त्वानि प्राप्तानि भवन्ति । रघुवंश-महाकाव्यस्य प्रथमे सर्गे वशिष्ठस्याथर्वपरायणत्वं वर्णितमस्ति ।

अथाथर्व निधेस्तस्य विजितारिपुरः पुरः । अर्थ्यामर्थपतिर्वाचमाददे वदतां वर ।।" (रघु० १।५९)

एवमेवाष्टमसर्गस्य चतुर्थश्लोकेऽपि अथर्वविद्विशेषणेन प्रयुक्तो महर्षिवशिष्ठः । प्रतीयते वशिष्ठः अथर्ववेदीति । तत्रैव प्राप्यते यत् पुरोहितपुरोगा द्विजातयः जिष्णुं तमतिथिं जैत्रैरथर्ववेदमन्त्रैः पूर्वमभिषेक्तुमुपचक्रमुः —

"पुरोहितपुरोगास्तं जिष्णुं जैत्रैरथर्वभिः ।
उपचक्रमिरे पूर्वमभिषेक्तुं द्विजानिभः ।।" (रघु० १७।१३)

वैदिकशब्दानां प्रयोगः

महाकविकालिदासस्य काव्येषु प्रयुक्ताः त्रयम्बकमित्यादयः शब्दाः विद्वद्भिरपाणिनीयाः कथ्यन्ते परमेते वैदिकशब्दा वैदिकदेवतावर्णनप्रसङ्गे प्रयुक्ताः सर्वथा महाकवेः महावैदिकत्वं स्मारयन्ति । वेदे प्रयुक्तानि धातुरूपाण्यपि महाकविना स्वकाव्ये सन्निविष्टानि यथा—'तं पातयाप्रथममास' एवं 'प्रभ्रंशयां यो नहुषं चकार' इत्यत्र क्रमशः 'पातयामास' 'प्रभ्रंशयाचंकार' रूपयोः खण्डरूपेणायोजनं कृतम् । वेदे एतादृशः प्रयोगः बाहुल्येन विद्यते ।

उपसंहारः

अतः संक्षेपेण कथनमिदं सर्वथा युक्तियुक्तं भवति यत् महाकवेः कालिदासस्य ग्रन्थेषु वैदिकतत्त्वानां सिद्धान्तानाञ्च वर्णनं, बाहुल्येन विद्यते । एते ऋग्वेदयजुर्वेदसामवेदाथर्ववेदसम्बद्धसिद्धान्ताः तत्त्वानि च प्रमाणयन्ति महाकवेरस्य महावैदिकत्वम् । यज्ञादेः संकेतेन वर्णनेन च तज्ज्ञाननिष्णातत्त्वं तु प्रतीयते एव वैदिकधर्मं प्रति स्वकीयाभिरुचिं प्रकटयता वैदिकधर्मस्य पक्षग्राहत्वं सूचितम् । यत्र तत्र कवेरस्य काव्येषु षट्कर्मनिरतानां वैदिकधर्मावलम्बिनामध्वरसम्पादनतत्पराणां समर्थनं प्राबल्येन कृतमिति प्रमाणितं महाकविकालिदासस्य महावैदिकत्वमिति दिक् ।

★

पूर्वमीमांसकमतेनात्मनिरूपणम्

डॉ० गजाननशास्त्रिमुसलगांवकरः

पूर्वमीमांसकमतेन 'आत्मा' चैतन्याश्रयो भवति[1]। स च मानसप्रत्यक्षगम्यः। तत्र मीमांसकैकदेशी प्रभाकरः 'इदमहं जानामि' इति व्यवहारस्तावत् न भवितुमर्हति, यावत् प्रतिज्ञानं ज्ञानस्य प्रकाश आत्मा च नाभ्युपगम्येत। अतः सर्वेष्वपि ज्ञानेषु स्वात्मनः कर्तृत्वेन ज्ञानस्य च ज्ञानत्वेन भानं भवति। तत्र अहम्प्रतीतिविषयत्वेनात्मनः प्रत्यक्षत्वं ज्ञानस्य तु स्वयंप्रकाशत्वेन प्रत्यक्षत्वमिति व्यवस्थापितवान्[2]।

किन्त्वस्य प्रतियोगी मीमांसकः कुमारिलस्वामी उपर्युक्तं मतं युक्तियुक्तं न मन्यते। यतो ज्ञानमर्थप्रकाशनापरपर्यायप्राकट्यान्यथानुपपत्तिगम्यम्। ज्ञानं हि सकर्मकं स्वकर्मभूतेऽर्थे फलं जनयति पाकादिवत्। तच्च फलमैन्द्रियकं प्रत्यक्षमित्युच्यते। लिङ्गादिजन्यन्तु परोक्षमिति। तदेव फलं कार्यभूतं स्वकारणभूतं ज्ञानं कल्पयति। अथवा ज्ञानजन्योऽर्थगतः कश्चिदतिशयविशेषो ज्ञानं कल्पयति[3]। तच्च फलं संविदादिपदाभिधेयम्। ताञ्च सविदं (तच्च ज्ञानं) स्वप्रकाशां मन्यते प्रभाकरः[4]। तदिदमनुपपन्नम्। अर्थावभाससमये संविदः (ज्ञानस्य) अप्रकाशमानत्वात्। सर्वे हि पुरुषाः 'अयं घटः' इत्यर्थविषयकमेव प्रकाशमनुभवन्ति, न संविद्विषयकम्। प्रकाशमानस्यैव च प्रत्यक्षत्वं युक्तम्, नाप्रकाशमानस्य। अतो न ज्ञानस्य प्रकाशत्वम्, किन्तु अनुमानगम्यतैव। एवं च 'ज्ञानं न प्रत्यक्षं वस्तुत्वात् घटवत्' इत्यनुमानेन तस्य प्रत्यक्षत्वं निराकृतं भवति। तार्किका अपि सुखादिवन्मानसप्रत्यक्षवेद्यत्वमङ्गीकुर्वन्ति ज्ञानस्य तदर्थं तेऽनुमानमपि प्रयुञ्जते—'ज्ञानं प्रत्यक्षं क्षणिकात्मविशेषगुणत्वात्, सुखादिवत् इति।' तदपि न। सुषुप्त्यवस्थायां विद्यमाने

---

* काशीहिन्दुविश्वविद्यालयीयमीमांसा-धर्मशास्त्रविभागस्य भू० पू० अध्यक्षः

१—मानमेयोदय—द्रव्यनिरूपणे]

२—मानमेयोदय— ,,]

३—तन्त्रसिद्धान्तरत्नावलि—पृ० ४६–५०]

४—प्रकरणपञ्चिका

प्राणनक्रियानिमित्ते प्रयत्ने प्रत्यक्षत्वाभावेन व्यभिचारात्। अतो न ज्ञानं प्रत्यक्षम्, किन्तु ज्ञाततानुमेयमेवेति सिद्धं भवति।

प्रभाकरोक्तमहंप्रत्ययगम्यत्वमपि आत्मनो न संभवति। यतः सर्वत्र घट-पटाद्यर्थज्ञानेषु 'अहं जानामी'ति व्यवहाराऽभावात्। यच्च शालिकोक्तं "अवश्यं च ज्ञातुरवभासो ज्ञेयावभासेषु अनुवर्तते इत्यास्थेयम्, अन्यथा स्व-परवेद्ययोरनतिशयः" इति। तदप्यसंगतम्, यतः प्रभाकरो हि ज्ञानमात्मसमवेतं मन्यते। तेनैव स्व-परवेदनयोर्विशेषः सिद्धो भवति। तथा 'स्वात्मसमवेतत्वस्य ज्ञानमपि व्यवहाराङ्गमि'त्यपि न वक्तुं शक्यते। यतो हि यदि विषयप्रकाशेऽपि प्रकाशकस्य प्रकाश आवश्यक इत्यभ्युपगम्येत, तदा सर्वेष्वपि ऐन्द्रियकज्ञानेषु इन्द्रियस्य ज्ञानमपि आवश्यकं भविष्यति, किन्तु तथा न भवति। अतः सर्वेष्वपि ज्ञानेषु ज्ञानस्य ज्ञानं नावश्यकं भवति। किञ्च—इन्द्रियसम्बन्धेन जनितं ज्ञानमेव 'प्रत्यक्ष'मित्युच्यते। अतः प्रभाकरमते इन्द्रियसम्बन्धरहिते ज्ञानादीनां ज्ञाने 'प्रत्यक्ष'शब्दस्य व्यवहारः कया व्युत्पत्त्या सम्पत्स्यते? अतो यथा पूर्वापरादिप्रतीतिभिर्दिगादिपदार्थानामनुमेयत्वं भवद्भिरभ्युपगम्यते, तद्वत् आत्मनोऽपि अहम्प्रतीतिद्वारा अनुमेयत्वमेव युक्तमभ्युपगन्तुम्। एवञ्च नात्मनः प्रत्यक्षत्वम्। अतो नेन्द्रियसन्निकर्षहीनस्य प्रत्यक्षत्वमिति स्पष्टं भवति। अपि च स्वप्रकाशज्ञानाश्रयीभूतस्यात्मनोऽपि स्वप्रकाशत्वमभ्युपगम्यते न वा? यदि नाभ्युपगम्यते तदा तज्ज्ञानार्थं कारणान्तरमपेक्ष्येत। यथा ज्ञानेन घटः प्रकाशितो भवति, अतः घटे प्रकाशोऽप्यपेक्षितो भवति। एवं च घटस्य प्रकाशो यथा—कारणान्तर सापेक्षस्तथा ज्ञानजन्यस्यात्मप्रकाशस्य कारणान्तरसापेक्षत्वं दुष्परिहरमेव स्यात्। अथ चात्मनः स्वप्रकाशत्वाभ्युपगमे प्राभाकरसिद्धान्तहानिर्भवेत्, यतः प्राभाकरमते आत्मनो जडत्वाभ्युपगमात्। अत्र प्रकाशरूपाग्न्याद्याश्रयीभूतेषु काष्ठादिष्वपि दह्यमानस्यांशस्य अंगारात्मकत्वेन प्रकाशात्मकादग्नेरभिन्नत्वम्, तदतिरिक्तः काष्ठांशः घटादिवत् परितः प्रसर्पितेन प्रकाशेन प्रकाशितो भवति। अतः प्रकाशाश्रयत्वेन कस्यापि वस्तुनः प्रकाशो न हि दृष्टिगोचरः।

अत्राऽद्वैतवेदान्तिनो हि ज्ञान-ज्ञात्रोरेकत्वं मन्यमाना—आत्मनः स्वप्रकाशत्वं समर्थयन्ति। तत्र प्रमाणत्वेन "अयं पुरुषः स्वयं ज्योतिः", "आत्मैवास्य ज्योतिर्भवति" इत्यादीनि श्रुतिवाक्यानि उपस्थापयन्ति। किन्त्वेभिः श्रुतिवाक्यैः आत्मनः स्वप्रकाशत्वसिद्धिर्न भवितुमर्हति "स मानसीन आत्मा जनानाम्" इत्यादिमानसज्ञानविषयत्वप्रतिपादकश्रुत्यन्तरविरोधात्। अतः प्रमाणत्वेनोपस्थापितानां श्रुतिवाक्यानामात्मनः स्वप्रकाशत्वे तात्पर्यं नास्ति। तथा 'आत्मा ज्ञानान्तराधीनप्रकाशः व्यवहार्यत्वात् घटवत्' इत्याद्यनुमानविरोधाच्च। न चात्मनो व्यवहार्यत्वमसिद्धमिति वाच्यम्। 'आत्मा व्यवहार्यो न भवति' इति व्यवहारस्यात्मगोचरत्वेन स्ववचनविरुद्धत्वात्। अत्र पुनः शंकते—यदि आत्मा स्वज्ञानस्य स्वयमेव विषयो भवति चेत् तदा कर्तृत्व-कर्मत्वयोर्विरुद्धधर्मयोरेकस्मिन्नेवात्मनि प्रसक्तिः। यथा 'देवदत्तो ग्रामं गच्छति' इत्यादिषु देवदत्ते गमन-

क्रियाकर्तृत्वं, तद्भिन्ने ग्रामे गमनक्रियाकर्मत्वं दृश्यते। अतः एकस्यैवात्मनः कर्तृत्वं कर्मत्वं च विरुद्धम्। तत्रोच्यते—यथा अद्वैतवेदान्तिनः "आत्मा स्वयंज्योतिषा आत्मानं प्रकाशयति" इति व्यवहारमनुसृत्य आत्मनि कर्तृत्वकर्मत्वकरणत्वादीनां त्रयाणामपि विरुद्धधर्माणामेकत्र समावेशं मन्यन्ते तथैवास्माकं मीमांसकानां मतेऽपि कर्तृत्वकर्मत्वयोरेकत्र समावेशः कथं न भवितुमर्हति ? लौकिक-वैदिकप्रयोगाभ्यामपि कर्तृत्व—कर्मत्वयोरेकत्र सिद्धिरस्ति। यतः 'आत्मानं जानीहि' इति लौकिकाः प्रयुज्यते, तथा "आत्मा वाऽरे द्रष्टव्यः" इति वैदिकप्रयोगोऽपि प्रसिद्ध एव। यथा देवदत्तनिरूपितगमनक्रियाजनितस्य प्राप्तिरूपस्य फलस्य आश्रयतात्मिका कर्मता ग्रामनिष्ठा अंगीक्रियते, तथैवात्मवृत्तिज्ञानजनितस्य प्राकटचरूपफलस्य—आधारता आत्मस्वयम्प्रकाशवादिभिरपि अभ्युपगन्तव्या स्यात्। अन्यथाऽऽत्मनः प्रकाशो न भवितुं शक्यः। तस्मान्मानसप्रत्यक्ष एवात्मा। स च देहेन्द्रियज्ञानसुखादिभ्यः पृथक्, शरीरभेदान्नाना, विभुर्नित्यः, स्वर्गापवर्गादिफलानां भोक्ता चाभ्युपगम्यते।

अत्र चार्वाकास्तावत् 'स्थूलोऽहं कृशोऽहम्' इत्यादिप्रत्ययानां शरीरगतस्थौल्यकार्श्यादिविषयत्वात् स्थौल्यकार्श्यादिधर्माणामाधारभूतं भौतिकशरीरमेवात्मास्तीत्युभ्युपगन्तुंयुक्तमिति वदन्ति। किन्त्वेतदसङ्गतम्, यतः आत्मविशेषगुणानां सुखदुःखादीनां शरीरगुणत्वं कदापि न संभवति। यदि सुखदुःखादयः शरीरविशेषगुणाः तर्हि ते यावच्छरीरमवतिष्ठेरन्। न हि ते मृतशरीरेषूपलभ्यन्ते। अतः सुखदुःखादीनामाश्रयः शरीराद् भिन्नः कश्चनावश्यमंगीकर्तव्यः। एवञ्च सुखादीनामाश्रयभूतस्यात्मनः सुखादीनामनाश्रयभूताच्छरीराद् भेदः सिद्धो भवति। स्थूलोऽहम्, कृशोऽहम्' इत्यादिव्यवहारस्तु शरीरात्मनोरत्यन्तसंमृष्टतया उष्णं जलमिति व्यवहारात् औपचारिकः। अतः शरीरादात्मनो भेदः 'मम शरीरम्' इति व्यवहारात्। तथा इन्द्रियाणामपि आत्मत्वं न सम्भवति। तत्र बाह्येन्द्रियाणां भौतिकत्वात् पृथिव्यादिभूतेषु चात्मगुणानां चैतन्यादीनामनुपलम्भात्। कारणगुणा एव कार्ये सजातीयगुणानारभन्तेइति नियमात् अचेतनभूतारब्धानां बाह्येन्द्रियाणामात्मत्वं नाभ्युपगन्तुं शक्यम्। आन्तरिन्द्रियं केवलं मन एव। तच्चापरोक्षभूते आत्मनि विद्यमानानां सुखदुःखादिगुणानामपरोक्षतायाः साधनमस्ति। साधनकर्त्रोर्नैसर्गिको भेदो भवति।

योगाचारबौद्धसम्मतं विज्ञानमपि नात्मा, विज्ञानस्य क्षणिकत्वात्। 'योऽहं प्राक् दुःखमन्वभूवम् स एवेदानीं सुखमनुभवामि' इति पूर्वापरकालयोरात्मन एकत्वावगमात् स्थिरत्वमेव सिद्धं भवति! तथाऽऽत्मनः सुखरूपत्वमपि नांगीकर्तुं शक्यते। यतः 'यस्य मे पूर्वं सुखमासीत् तस्यैवेदानीं दुःखमनुवर्तते' इति पूर्वापरकालयोरात्मन एकत्वावगमेऽपि सुखनिवृत्तेरनुसन्धानात्।

औपनिषदास्तावत् 'विज्ञानमानन्दम्ब्रह्म' इत्यादि श्रुतिवाक्यबलात् आत्मनो विज्ञानानन्दरूपत्वं समर्थयन्ति। न च विज्ञानस्य क्षणिकत्वात् आत्मनश्च नित्यत्वात् आत्मनो विज्ञानरूपत्वमयुक्तमिति वाच्यम्, विज्ञानस्य नित्यत्वाभ्युपगमात्। नीलपीतादिविषयभेदेन प्रतीयमानो ज्ञानभेदस्त्वौपाधिकः। स्वरूपो ज्ञानमेकं नित्यं चास्ते। न च विज्ञानमानन्दं ब्रह्म इत्यत्र त्रयाणामपि

पदानामेकार्थ्ये सति एकेनैव पदेन जडस्य 'आनन्द'पदेन च दुःखस्य व्यावृत्तिर्भवति। अन्यथा आत्मनि जडता दुःखरूपता त्रापि प्रसक्ता स्यात्। व्यावर्त्यभेदेन व्यावर्तकपदानां सार्थक्यं 'प्रकृष्टप्रकाशश्चन्द्र' इत्यादि लक्षणवाक्येष्वपि स्वीक्रियते। प्रकृष्टपदेन खद्योतादीनां निकृष्टः प्रकाशः प्रकाशपदेन च सान्द्रतिमिरस्य व्यावृत्तिर्भवति। प्रकृष्टः प्रकाशश्चेति द्वावपि एकस्यैवाखण्डचन्द्ररूप-स्यार्थस्य बोधनं कुरुतः। यदि कश्चन पृच्छति "अस्मिन् ज्योतिर्मण्डले कतमश्चन्द्रः?" अस्मिन् प्रश्नवाक्ये यद्यपि बहूनि पदानि सन्ति, तथापि समस्तस्य प्रश्नस्य तात्पर्यमेकस्मिन् चन्द्ररूपे प्रातिपदिकार्थे एव स्वीक्रियते। अतएव चन्द्रप्रतिपादकप्रश्ने सति उत्तरभूतस्य 'प्रकृष्टप्रकाशः चन्द्र' इति वाक्यस्यापि तात्पर्यं तस्मिन्नेव चन्द्ररूपे प्रातिपदिकार्थे एवांगीकर्तव्यं स्यात्। अन्यथा चन्द्र-प्रातिपदिकार्थस्य पृष्टत्वात् तदितरस्य कथनेन प्रश्नोत्तरयोः परस्परमसंगतिप्रसंगः। अतोऽविज्ञानस्य अनानन्दस्य च व्यावृत्तये विज्ञानम् आनन्दमिति पदद्वयस्थापनम्। अपि च 'प्रकृष्ट-प्रकाशश्चन्द्रः' अत्र प्रकृष्ट-प्रकाशपदयोः परस्परं चन्द्रपदेन चाभिन्नार्थकत्वं स्वीकर्तव्यमेव। अन्यथा चन्द्रप्रातिपदिकार्थविषयकप्रश्नस्योत्तरे अन्यार्थस्य कथनमसंगतं स्यात्। विज्ञानानन्दपदयोः परस्परं ब्रह्मपदेन च अभिन्नार्थकत्वमवश्यमंगीकरणीयम्। अतएवाद्वैतिनो वयमखण्डमेव वाक्यार्थमंगीकुर्मः। तदनुरूपः प्रयोगोऽपि भवति—'विज्ञानादिपदखण्डार्थबोधकम् लक्षणवाक्यत्वात् प्रकृष्टप्रकाशश्चन्द्र-इतिवत्' इतिरीत्या विज्ञानानन्दपदयोरेकार्थत्वमपर्यायत्वमवैयर्थ्यं च सिद्धं भवति।

किन्त्वेतदौपनिषदं मतमपि न विचारसहम्। प्रभाकरः कार्यरूपो वाक्यार्थ इति मन्यते। श्रीशंकराचार्यः अखण्डार्थ एव वाक्यार्थ इति मनुते। किन्तु कौमारिला मीमांसकास्तु संसर्ग-परपर्यायो विशिष्टार्थ एव वाक्यार्थ इति संगिरन्ते। तत्र प्राभाकरपक्षो न समीचीनः, नाप्या-चार्यपक्षोऽपि समीचीनः। अतो नाखण्डं वाक्यार्थः। सर्वेषां पदानामेकस्मिन्नेव अर्थे तात्पर्ये सति एकेनैव पदेन तस्यार्थस्य प्रतिपादितत्वात् इतरपदानां वैयर्थ्यस्य दुष्परिहरत्वात्। यदि सुषुप्तिकाले किञ्चिदपि दुःखमनुभूतं स्यात् तदा कदाचित् प्रबोधकाले तस्य स्मरणं स्यादपि, न च स्मरणं भवतीति तादृशस्मरणानुत्पत्त्यैव प्रबुद्धा जनाः 'सुषुप्तौ किञ्चिदपि दुःखं नासीत्' इत्यध्य-वस्यन्ति, ततश्च दुःखाभावे एव सुखव्यवहारं कुर्वन्ति। सुषुप्तौ सुखानुभवे हि—

वृथेयमन्तरेणैव कामिनीं यामिनी गता।
आश्लिष्टामप्यबुध्वैनां मृतवच्छयितं मया॥

ईदृशो निर्वेदो नोपपद्येत प्रबुद्धानाम्। तस्मान्न सुषुप्तौ सुखानुभवः प्रामाणिकः। प्रबुद्धव्यवहारस्तु ईदृशो भवति—'अहमात्मानमपि—अबुध्वा शयितोऽस्मि' इति प्रबुद्धव्यवहारेण सुषुप्तौ सुखाननुभवः आत्माऽप्रकाशश्च स्पष्टमेव सिद्धः। यदा हि सुषुप्तौ आत्मैव न प्रकाशते, तदा दूरे सुखप्रकाशचर्चा। अतो मानसप्रत्यक्षगम्य एव चैतन्याश्रयोऽयमात्मा सिद्धो भवतीति कौमारिला मीमांसकाः।

अभिनव-साहित्य-परिचयः

१—काव्यप्रकाशदर्पणः—सम्पादकः डॉ० गोपराजूरामा प्रवक्ता—गंगानाथझा केन्द्रीय संस्कृत विद्यापीठ, इलाहाबाद-२। प्रकाशकः मञ्जु प्रकाशन, ६२ बलरामपुर हाउस, इलाहाबाद-२। आकारः–रायल अष्टपृष्ठात्मकः। पृष्ठानि १८४। मूल्यम्—१६.००।

सान्धिविग्रहिकमहापात्रश्रीविश्वनाथकविराजविरचितोऽयं ग्रन्थो वाग्देवतावतारभूतस्याचार्य-मम्मटस्य काव्यप्रकाशमादाय दुर्बोधानुप्रबोधिनीटीकारूपेण विराजते। आंगलभाषामय्या विस्तृत-भूमिकया सवैदुष्यं सम्पादितोऽयं ग्रन्थोऽलङ्कारशास्त्रजगति महत्त्वपूर्णं पदमादधाति। प्रथमोल्लासतो दशमोल्लासं यावद् व्याप्ताः ग्रन्थग्रन्थयोऽत्र साधु स्फोरिता इव दृश्यन्ते। सम्पादितेऽस्मिन् ग्रन्थे काव्यप्रकाशस्य यद्यपि मूलपाठो नास्ति मुद्रितः किन्तु अध्ययने किमपि विशिष्टकाठिन्यं नानुभूयते। एतत्तु सत्यं यत्काव्यप्रकाशस्यापि सूत्रवृत्तीनां मुद्रणेन सहैव टीकेयं चेन्मुद्रिता स्यात्तर्हि शोभनतरं स्यादिति।

ग्रन्थे पाठान्तराऽऽवश्यकटिप्पणीप्रभृतीनां सम्पादनतत्त्वानामभिनिवेशेन सम्पादकस्य पाण्डित्यं सुस्पष्टं दृश्यते। ग्रन्थरत्नमिदं पुस्तकालयैरलङ्कारशास्त्रिभिरनुसन्धित्सुभिश्चावश्यं सङ्ग्राह्यम्। सर्वथा धन्यवादार्हाः डॉ० गोपराजूरामामहाभागाः।

२—अभिनवा स्तुतिः—रचयिता-पं० राजकिशोरमणिस्त्रिपाठी। प्रकाशकः–संस्कृत-सेवा-संस्थान १३३, खुर्रमपुर, गोरखपुर। आकारः—डबलक्राउन। पृष्ठानि ८०। मूल्यम् ३.००।

आदित्यमङ्गल–गणेशवन्दन–श्रीसुमुखजननीस्तोत्र– गिरिशसर्वस्व–नारायणीय–हनुमन्नुति–दीनाक्रन्दनाऽऽत्मनिवेदनाभिधैरष्टशीर्षकैरुपेतः स्तुतिग्रन्थोऽयं भावानां प्रामुख्यं भजन्नपि कवित्वदृशा सर्वथा परिपुष्टः सन् प्रौढरचनायां पदमादधाति। सर्वत्र स्तुतिषु स्फीता वाग्धारा प्रवाहिता। ग्रन्थकर्तुर्मतानुसारेण विभिन्नानामपि देवानां स्तुतिः विभिन्नपद्धत्या एकमेव तत्वं प्रतिपादयति। देवस्तु एक एव किन्तु भक्तानां भावनाभेदाद् भिन्न इव प्रतीयते।

ग्रन्थेऽस्मिन् श्रीसुमुखजननीस्तोत्रस्य प्राधान्यं यत्र हि शक्तिपीठानां संख्यानुसारेणैकपञ्चाशत्संख्याकान्यनवद्यपद्यानि सन्निवेशितानि। वस्तुत एवात्र भावाः नैसर्गिका नितरां हृद्याश्च सन्ति। जननीं प्रति मुग्धबालकस्य करुणाक्रन्दनं स्पष्टमेव साक्षात्क्रियते।

सर्वत्र सौविध्याय हिन्द्यामनुवादोऽपि विहितस्तथाऽन्ते अकारादिक्रमेणानुक्रमणिकाऽपि प्रदत्ता। मुद्रणदोषरहितः सुसज्जितश्चायं ग्रन्थः स्तुतिकाव्यपरम्परासमाश्लिष्टोऽवश्यमेव विज्ञजनैर्द्रष्टव्य इति निवेदयता श्रीमणिमहाभागाः नैकधा प्रशस्यन्ते सभाज्यन्ते च।

३—श्रीबदरीशसुप्रभातम्—रचयिता प्रकाशकश्च–कार्यकारोपाह्वः डॉ० स्वामिनाथन्। प्राप्तिस्थानम्—5/30 W. E. A. करोलबाग, नई दिल्ली-5। आकारः—D. D.। पृष्ठानि–२२। मूल्यम्—३.००।

श्रीबदरीशसुप्रभातं नाम द्विपञ्चाशत्संख्याक—वसन्ततिलकच्छन्दोबद्धानि 'श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम्' इत्यन्तानि पद्यानि बदरीनारायणस्य ब्रह्मावासभूत-बदरिकाश्रमस्य

च महिमप्रतिपादकानि स्वरचितानि पद्यानि। लघुकायेऽपि ग्रन्थेऽस्मिन् भारत-भागवतादिषु विद्यमानाः बदरिकाश्रमसम्बद्धविषया यत्र-तत्र समुद्धृताः।

प्रातःकाले भगवत्पादाद्याचार्याणां चिरजीविनां भागवतादीनाञ्च स्मरणं जायतेऽस्य पठनेन येनान्तःकरणशुद्धिर्निर्विवादैव सिद्धा। आदितोऽन्तं यावद् ग्रन्थावगमाय यथास्थानं पादटिप्पण्योऽपि प्रदत्ता यद्द्वारा क्वचिदपि काठिन्यं नायात्यर्थज्ञाने।

श्री एन्. रघुनाथ अय्यरमहाभागानां विस्तृतेनाऽऽङ्गलभाषामयेन प्राक्कथनेन विभूषितो ग्रन्थकर्तुश्च विशदयाऽऽङ्गलभाषोपस्कृतया सारगर्भितभूमिकया सम्बलितो ग्रन्थोऽयं स्व-गौरवं नूनं समेधयति। अमूल्यस्याप्यस्य केवलं रूप्यकत्रयमितं मूल्यम्। 'श्रीबदरीशसुप्रभातम्' नामकमिदं काव्यं परिशीलनेन कवयितुः कवित्वोत्कर्षं स्फुटं प्रमाणयति प्रतिष्ठापयति चानन्यसाधारणवैदुषीम्।

सहृदयहृदयान्यावर्जयद्भिः डॉ० स्वामिनाथमहाभागैः श्रीबदरीशसुप्रभातं सत्प्रेरणया व्यलेखीति ते भृशं धन्यवादार्हाः। काव्यमिदं विद्वज्जगति समुचितसम्मानं प्राप्स्यतीति सुदृढं विश्वसिमः।

४—रक्तदानम्—प्रणेता प्रकाशकश्च—डॉ० वनेश्वरपाठकः, संस्कृतविभागाध्यक्षः—सेंट जेवियर्स कॉलेज, राँची (बिहार)। वितरकः—सुबोधग्रन्थमालाकार्यालयः, पुस्तकपथः, राँची। आकारः—डबलक्राउन। पृष्ठानि—२५। मूल्यम् रु० ४.००।

रक्तदानमेकं सामाजिकं सामयिकञ्च द्व्यङ्कि रूपकमस्ति। अनेन रूपकेण प्रणेता पाठकमहोदयः समाजे कुष्ठरोग इव प्रसृतायाः तिलकयौतकदानकुप्रथायाः समाधानस्य स्पृहणीयं सफलं च प्रयत्नं विहितवानस्तीति प्रत्येकं शेमुषीभाजा एतद्रूपकानुशीलनेन स्फुटमेव ज्ञातुं शक्यते। अत्र हि यद्येकतः शिल्पविधानं, वस्तुविन्यासो रसनिबन्धनमाकर्षणोत्पादनञ्च युगानुसारेण नूतनतया प्रस्तुतं तर्हि अन्यतः भाषायां सहजः प्रवाहः, संलापे प्रभावपूर्णवाक्यानां विन्यासस्तथा रङ्गमञ्चसौविध्यादिकञ्चावश्यकतत्त्वं सम्यङ् निभालितम्।

रूपके परमसुन्दर्याः सुशिक्षितायाः उमायाश्चरित्रन्तु उत्कर्षं प्रापितमेव सहैव तद्रक्षायै स्वशरीरस्य बहु रक्तं दत्तवतः शङ्करस्यौदार्यं सर्वथा स्पृहणीयं ग्राह्यञ्चास्ति। साधूक्तं कविनिबद्धवक्त्रा डॉ० खन्नामहोदयेन उमाजनकमुद्दिश्य यत्—'इदानीं भवत इदं कर्तव्यमस्ति यद् भवान् स्वस्य रक्तस्य, अर्थादुमाया दानं कृत्वा शङ्करस्य रक्षां करोत्विति'।

समस्याप्रधानेऽस्मिन् रूपके कविः सर्वथा सफलः। आदितोऽन्तं यावन्न क्वचिदपि नीरसत्वं समुद्वेगो वा जायते समाकर्षणात्कौतूहलाद्वा विना। वस्तुत एवैतादृशानामाधुनिकतमविषयसम्बद्धानामभिनवसंस्कृतरूपकाणां महती आवश्यकता विद्यते। एतादृशरूपकैः सामान्यसंस्कृतज्ञजनानां मनोरञ्जनेन सहैव संस्कृतस्य प्रचार-प्रसारादिसन्दर्भेऽपि भूयान् लाभः सेत्स्यतीति न संशीतिविषयः। रूपकमिदं पर्याप्तं प्रचारमुपलभ्य प्रेरणाप्रदं स्यादिति नः शुभाशंसा। पाठकमहाभागस्य प्रथमोऽपि एष प्रयासस्तस्य सिद्धहस्ततां प्रमाणयति। संस्कृतजगद् भवता आशास्ते यदेवंविधान्यन्यान्यपि रूपकाणि विरच्य्य मनस्तोषयिष्यते संस्कृतस्य प्रचार-प्रसारादिषु सहयोगं च दास्यत इति।

—विद्याधरद्विवेदी

निवेदनम्—स्वासां नूतनकृतीनां परिचयाय समालोचनाय चाभिनव-साहित्यप्रणेतृभिरेकैकस्य पुस्तकस्य प्रतिद्वयं प्रेषणीयमिति।

सरस्वती श्रुतिमहती महीयताम्

—महाकविकालिदासः



ACHHRURAM KALKHOF & Co.
(SHELLAC) PRIVATE LIMITED
25 / 26 STEPHEN HOUSE
CALCUTTA--1



इतिनामकेन विश्वविश्रुतेन लाक्षाप्रतिष्ठानेन

सुरभारती–सेवायै



सादर-समर्पणम्

मा ते अग्ने प्रतिवेशा रिषाम

(१)

रात्रिं रात्रिमप्रयातं भरन्तोऽश्वायेव तिष्ठते घासमस्मै ।
रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम ॥

(२)

या ते वसोर्वात इषुः सा त एषा तया नो मृड ।
रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम ॥

(३)

सायंसायं गृहपतिर्नो अग्निः प्रातः प्रातः सौमनसस्य दाता ।
वसोर्वसोर्वसुदा न एधि वयं त्वेन्धानास्तन्वे पुषेम ॥

(४)

प्रातः प्रातर्गृहपतिर्नो अग्निः सायं सायं सौमनसस्य दाता ।
वसोर्वसोर्वसुधा न एधि इन्धानास्त्वा शतहिमा ऋधेम ॥

(५)

अपश्चादग्धान्नस्य भूयासम् ।
अन्नादायान्नपतये रुद्राय नमो अग्नये ॥

(६)

सभ्यः सभां मे पाहि ये च सभ्याः सभासदः ।
त्वमिन्द्राः पुरहूत विश्वमायुर्व्यश्नवत ॥

(७)

अहरहर्बलिमित्ते हरन्तोऽश्वायेव तिष्ठते घासमग्ने ।
रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम ॥

—ऋग्वेदात् अ० १६।५५।१

विद्वन्मोदावहा सूचना

संस्कृतविदुषां कृतेऽभूतपूर्वमवदानम्

शर्मण्यदेशीयाकाशवाणीतः प्रसारितानां श्रीमदाचार्य-सत्यनाराय शर्मणः संस्कृतप्रवचनानां सङ्कलनात्मकस्य प्रवचनपराग इति ग्रन्थरत्न प्रकाशनविषयिणी या सूचना पूर्वं प्रदत्ताऽऽसीत्, संस्कृतजगतः सौभाग त्सम्प्रति प्राकाश्यं गतोऽयं बहुमूल्यो ग्रन्थः पञ्चत्रिंशद्रूप्यकमूल्येन चौखम विश्वभारती, चौक, वाराणसी इति सङ्केतेन च लब्धुं शक्यते ।

—व्यवस्थापकः

